Almira 3
Shelf 2
7

1. Anumana Khanda
2. Vyadhikarana Dharmavachchina Bhava
3. Siddhanta Lakshana Of Jagadisha
4. Gadadhari Of Gadadhara Bhattacharya
5. Pancha Lakshani Of Jagadisha
6. Nan Vada Of Raghudeva
7. Avachchedakatva Nirukti Of Jagadisha
8. Vyadhikarana Of Jagadisha
9. Gadadhari Sadharana Tika
10. Tarkamrita Of Jagadisha Bhattacharya
11. Vyadhikarana Siddhanta Lakshana
12. Citra Rupa Vada Of Hamsanarayana Sharman
13. Anumati Didhiti Tippani Of Jagadisha Tarkalankara
14. Jagadisha Dana
15. Tarka Sangraha Dipika Of Ananta Bhatta
16. Samanya Lakshana Tippani Of Jagadisha Bhattacharya

४१२५.

श्रीः

अनुमानं न प्रमाणं प्रमाणाभासत्वादित्यप्रामाण्यवादिनं चार्वाकं प्रत्यनुमानं प्रमाणं प्रमाणत्वात् प्रत्यक्षकार्यवत्त्वादित्यादिना प्रामाण्यसाधनेन निरस्य अनुमितिनिरूपणे सङ्गत्यादिकमुपवर्ण्य अनुमितिप्रामाण्यसाधकहेतुरूपव्याप्तिज्ञानजन्यत्वघटकव्याप्तिज्ञानविषयव्याप्तिस्वरूपजिज्ञासायां नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिरिति निर्दिशन्ति तद्धि साध्याभाववदवृत्तित्वमित्यादिव्याप्तिपूर्वपक्षग्रन्थेन मीमांसकसौन्दडादिलक्षणानां दूषणेन निराकरणे कृते सिद्धान्तभूतं व्याप्तिलक्षणं निरूपयति अत्रोच्यते इत्यादिग्रन्थेन.। अत्रेति सप्तम्यर्थो विषयत्वं इदंशब्दस्य व्याप्तिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने शक्तिस्तेन तादृशेदमर्थः। शिष्यजिज्ञासारूपः वचधात्वर्थः प्रतिपत्त्यनुकूलव्यापारः स च प्रतियोग्यसमानाधिकरणेत्यादिशब्दरूपः तत्कर्मत्वं च विषयत्वरूपम्. कर्तृत्वं चात्र मयेत्यध्याहार्यम्. अस्मदाद्यर्थस्य [illegible] नाचोकारः तस्य तदर्थे कृतौ समवेतत्वसम्बन्धेनान्वयः कृतेश्च ज्ञानत्वसम्बन्धेन धात्वर्थेऽन्वयः तेन शिष्यजिज्ञासाविषयीभूता प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं सामानाधिकरण्यरूपा व्याप्तिकारणत्वेन भूतिजनक प्रतिपत्त्यनुकूलव्यापारविषयीभूता व्याप्तिरित्याकारकः शाब्दबोधः। शाब्दिकव्यापारविषयत्वं च व्याप्तौ तज्ज्ञानशाब्दबोधविषयत्वम् व्यापारविषयत्वं विना शाब्दबोधविषयत्वाभावात्. तथा च व्यापारविषयत्वेऽपि तस्य व्यापारजन्यबोधविषयत्वमिति भावः॥

प्रतियोग्यसमानाधिकरणयत्समानाधिकरणो~~त्यद्ध्य~~त्यन्ताभाव
~~प्रतियोगितावच्छेदक~~[illegible]भावः
विशेषणं यत्पदं हेतुपरं । द्वितीयं यत्पदं साध्यपरं । तेनेति तत्पदं साध्य
परं तस्येति तत्पदं हेतुपरं अक्षरार्थो निष्कलं । ततीयार्थो निष्कृष्टतत्वं । तथाच
प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकत्वार्थे तत्र यत्पदार्थे साध्येऽन्वयः तथाच
प्रतियोग्यसमानाधिकरणो हेतुसमानाधिकरणो योऽभावः तत्प्रति
योगितानवच्छेदकावच्छिन्नाभिन्नसाध्यसामानाधिकरण्यं साध्यन्ति
रूपिता हेतुनिष्ठा व्याप्तिरित्यर्थः । यथा वह्निमान् धूमादित्यादौ
प्रतियोग्यसमानाधिकरणो धूमसमानाधिकरणो योऽभावो न वह्न्य
भावः किन्तु घटाद्यभाव एव तत्प्रतियोगितानवच्छेदकावच्छिन्नाभिन्नं
साध्यं वह्निः तत्सामानाधिकरण्यस्य धूमे सत्त्वात् लक्षणसमन्वयः ।
धूमवान् वह्नेरित्यादौ प्रतियोग्यसमानाधिकरणो वह्निसमानाधि
करणोऽभावो धूमाभावोऽपि तत्प्रतियोगितावच्छेदकावच्छिन्न
मेव धूमः साध्यं न तु तद्भिन्नमिति तादृशसाध्यसामानाधिकरण्यस्य
वह्नावसत्त्वान्नातिव्याप्तिश्च ।

अत्र साध्ये प्रतियोगितानवच्छेदकावच्छिन्नभेदश्च तादृशप्रतियो
गितानवच्छेदकावच्छिन्न- ~~प्रतियोगितानवच्छेदकावच्छिन्नत्वव्याप्तिः~~,
प्रतियोगिताकसामान्यभेदो वोध्यः । अन्यथा प्रतियोग्यसमा
नाधिकरणो वह्निसमानाधिकरणो योऽभावो घटाभावस्तत्प्रतियोगिता
वच्छेदकावच्छिन्नभेदस्य धूमे साध्ये सत्त्वेन धूमवान् वह्नेरित्यादाव
तिव्याप्तिः स्यात् । सामान्यभेदश्च तादृशाभावप्रतियोगितावच्छे
दकावच्छिन्नं नेत्याकारकः, तथाच वह्निसमानाधिकरणो योऽभावो यथा

घटाद्यभाववत्यपि धूमाभावोऽपीति तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नो धूमोऽपि. घटादिभेदस्य सत्वेऽपि तादृशधूमभेदस्य सत्त्वे धूमेऽसत्वेन ~~[illegible]~~ सामान्यभेदवत्त्वसाध्यकेति नातिव्याप्तिः प्रतियोगितावच्छेदकीभूतावच्छिन्नप्रतियोगि तादृशसामान्य धूमभेदकत्व. प्रतियोगितावच्छेदकत्व तावच्छिन्नत्व विशिष्टधर्मानवच्छिन्नप्रतियोगिताको विवक्षणीयः. अन्यथा तादृशात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नत्वेऽपि तादृशप्रतियोगिता वच्छेदकत्व वच्छिन्नघटत्वरूपं नेति भेदस्य तादृशप्रतियोगितावच्छेदकघटत्वावच्छिन्नं नेति भेदस्य च धूमेऽसत्वेन प्रसक्तिव्याप्तिःस्यात्. प्रतियोगितावच्छेदकत्व वच्छिन्न विशिष्टधर्मानवच्छिन्नप्रतियोगिताकत्वस्योक्तौ तु उभयभेदस्य घटत्वोभयसाधारणधर्मानवच्छिन्नप्रतियोगिताकत्वात् घटत्वावच्छिन्नायाऽपि भेदस्य घटत्वत्वधर्मानवच्छिन्नप्रतियोगिताकत्वाच्च नोक्तदोषः. किन्तु व्याप्तिसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नो नेत्याकारक एव सामान्यभेद एव ग्राह्यः. तादृशसामान्यभेदस्य धूमेऽसत्वान्नातिव्याप्तिः ॥

अत्र शङ्कते—

घटः पटो नेत्यत्र घटे पटभेदस्य पटो घटो नेत्यत्र पटे घटभेदस्य बोधव्यवस्थार्थं यद्धर्मावच्छिन्नवाचकपदोत्तरं नञादिपदश्रुतिस्तद्धर्मावच्छिन्नप्रतियोगिताकभेदो नञा बोध्यत इति नियमेन अत्र यन्नाभवतीति साध्यवाचकपदोत्तरं नञः श्रवणेन साध्यभेदः प्रतियोगितावच्छेदकावच्छिन्नो बोधनीयो न तु प्रतियोगितावच्छेदकावच्छिन्नभेदः

साध्ये इति कथं वैयधिकरण्येन तादृशप्रतियोगितावच्छेदकावच्छिन्नाभिन्नसाध्य
सामानाधिकरण्यं बोध्यते. न चात्र साध्यभेद एव प्रतियोगितावच्छे
दकावच्छिन्नो विवक्ष्यते ~~अभेदस्य~~ न तु प्रतियोगितावच्छेदकावच्छि
न्नभेदः साध्ये इति वाच्यम्. वह्निमान्वह्नेर्नास्य सर्वस्यैव धूमादि
मत्त्वाभावप्रतियोगितावच्छेदकावच्छिन्नत्वादिति जगदीशवाक्ये
स्य वह्नेः प्रतियोगितानिरूपकाभावेनाव्याप्तिप्रदर्शनपरस्य दर्शितेन प्रति
योगितावच्छेदकावच्छिन्नभेदस्यैव साध्ये विवक्षितस्यावश्यकत्व
भावात्. अन्यथा जगदीशोक्तेरसङ्गतत्वापत्तेः. प्रतियोगितावच्छे
दकावच्छिन्ने साध्यभेदस्य विवक्षितत्वे न सम्भवति तद्वृत्तिकिञ्चिदव
वच्छिन्नस्य साध्यत्वव्याप्तिरित्येवावश्यकम्. यत एवोक्तं तेन
प्रतियोगितावच्छेदकावच्छिन्नभेदस्यैव साध्ये बोधने तात्पर्यं गम्यते.
न च प्रतियोगिनि साध्यभेदविवक्षणे धूमवान्वह्नेरित्यत्र हेतुसमाना
धिकरणघटाभावमादाय तत्प्रतियोगितावच्छेदकावच्छिन्ने घटे साध्य
धूमभेदसत्त्वादतिव्याप्तिप्रसङ्ग इति वाच्यम् तत्र तादृशप्रतियोगिताव
च्छेदकावच्छिन्नत्वावच्छेदेन साध्यभेदमादाय तादृशप्रतियोगितावच्छे
दकावच्छिन्नत्वव्यापको यद्भेदस्तेन समं तस्य सामानाधिकरण्यं व्या
प्तिरिति विवक्षणीयत्वात्. तथा च धूमाभाववत्यपि तत्र हेतुसमानाधि
करणत्वेन तादृशप्रतियोगितावच्छेदकावच्छिन्नत्वं धूमेऽपि तत्र साध्य
भेदाभावेन व्यापकत्वाभावादतिव्याप्तेरभावात्. ननु तथापि व्यापक
ताविशेषो गोत्वाभिमतेश्चेत् प्रतियोगितावच्छेदकावच्छिन्नभेदस्य

साध्ये विवक्षणीयेऽपि पूर्ववत्प्रतियोगितावच्छेदकावच्छिन्नयद्भेदस्य धूमे सत्त्वादतिव्याप्तिः हेतुसमानाधिकरणो यो भेदस्तदीयप्रतियोगितानवच्छेदकावच्छिन्नभेदस्य साध्ये वीप्सया यावत्त्वेन स्वीयत्वात् वीप्सा च व्यापकत्वे पर्यवस्यति. तेन च तादृशप्रतियोगितावच्छेदकावच्छिन्नत्वव्यापकप्रतियोगिताकभेदवत्साध्यत्वमिति पर्यवसानम्. तथा च तादृशप्रतियोगितावच्छेदकावच्छिन्नत्वव्यापकप्रतियोगिताको भेदः प्रतियोगितावच्छेदकावच्छिन्नो नैव व्यापकः सामान्यभेद एव स तु ~~धू~~ तादृशधूमाभावप्रतियोगितावच्छेदकावच्छिन्नधूमत्वस्य धूमे भेदाभाववत्त्वं धूमे नास्तीति नातिव्याप्तिः एवं च उभयत्रापि व्यापकत्वस्य प्रवेशेन समानत्वात्. इति चेन्न. साध्यभेदस्य विवक्षणे धूमवान् वह्नेरित्यादौ धूमस्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नत्वेऽपि तत्र धूमघटोभयभेदस्य सत्त्वेनातिव्याप्तेः वारणाय साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकेन धर्मितावच्छिन्नप्रतियोगिताकभेदस्य निवेशनीयतया प्रमेयवान् वाच्यत्वादित्यत्र प्रमेयत्वावच्छिन्नप्रतियोगिताकस्य प्रमेयं नेति साध्यभेदस्याप्रसिद्ध्याऽव्याप्तेः [illegible] प्रतियोगितावच्छेदकावच्छिन्नभेदस्य साध्ये विवक्षा. तथा च वाच्यत्वाधिकरणवृत्ति घटाद्यभावीयप्रतियोगितावच्छेदकतावच्छिन्नघटादिभेदस्य घटादिप्रमेये साध्ये [illegible] सत्त्वादव्याप्तेरिति चेत्. नैवमपि प्रमाणविशिष्टत्वस्य [illegible]

प्रतियोगितावच्छेदकोभयकत्वाद्युपादाने [illegible] ज्ञाते चेत् घटानाधिकरणं सत्ताजात्यादिरूप [illegible] तादृश[illegible] लाभात्.

नच तत्तद्व्यक्त्यालोके हेतुसमानाधिकरणस्य धूमाभावप्रतियोगितावच्छेदकतावच्छिन्नाभावो धूमत्वस्य धूमघटोभयभेदसाधारण[illegible] तादृशप्रतियोगितावच्छेदकावच्छिन्नत्वाभावो [illegible] प्रतियोगितावच्छेदकभेदाभावे [illegible] प्रमेयत्वावच्छि[illegible] प्रमेयत्वावच्छिन्नप्रतियोगितावच्छेदकप्रसिद्धि[illegible] [illegible] ~~[illegible]~~ [illegible] प्रमावत्त्वा [illegible] दर्शितेति वाच्यम्. ये यत्र दोषाः सम्भवन्ति ते सर्वे प्रदर्शनीया इति तेषामभावेन [illegible] दोषोऽपि [illegible]. । किंवा. हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नत्वसमानाधिकरणो यः साध्याभावस्तदवच्छिन्न प्रतियोगितावच्छेदकतावच्छिन्नप्रतियोगितावच्छेदकधर्मावच्छिन्न वत्त्वावच्छिन्नसमानाधिकरणमिति विवक्षणे धूमघटोभयभेदमादाय तिव्याप्तिवारणात्. [illegible]:।

अथ प्रतियोगितावच्छेदकावच्छिन्नभेदस्य साध्यविशेषणत्वेऽपि वह्निमान् धूमादित्यत्र गौः ह्रदव्यक्तिमत्त्वाभावानां चालनीन्यायेन एकव्यक्तिकव्यक्तिमत्त्वावच्छिन्नाभावसत्त्वेन हेतुसमानाधिकरणतया तादृशाभावप्रतियोगितावच्छेदकानवच्छिन्नत्वात् अवच्छिन्नं एवं साध्यतावच्छेदकावच्छिन्नान्यत्वघटित साध्ये प्रतियोगितावच्छेदकासत्त्वादव्याप्तिरिति प्रतियोगिभेदं साध्ये परित्यज्य प्रतियोगितावच्छेदकभेदः साध्यतावच्छेदके निवेशनीय तथा च हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकभिन्नं यत् साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः एवञ्च तत्तद्व्यक्तिमत्त्वाभावानां हेतुसमानाधिकरणत्वेऽपि तत्प्रतियोगितावच्छेदकधर्मभिन्नव्यक्तित्वावच्छिन्नमेव साध्यतावच्छेदकं वह्नित्वमिति नाव्याप्तिः इति दीधितिकृता प्रतियोगितानवच्छेदको यो धर्मस्तदवच्छिन्नसाध्यसामानाधिकरण्यमिति विवक्षितं भवता यत्तु जगदीशेनाद् साध्यवच्छिन्नस्येत्यादेः प्रतियोगितावच्छेदकावच्छिन्नं यन्न भवतीत्यर्थः तादृशाधिकरणेन उक्तलक्षणं परिष्कृतमिति तथा चेति। प्रतियोगितावच्छेदकं यद् अवच्छिन्नपदं नवच्छिन्नप्रतियोगिताकपरं भावप्रत्ययान्तपदं प्रतियोगितावच्छेदकत्वपरं तथा च प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकभेदवद्धर्मस्य च प्रकृतविच्छिन्नत्वं यत् धर्मावच्छिन्न धर्मविशेषणात्। तेन च तादृशाभावप्रतियोगितावच्छेदकाभेदसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति फलितार्थः पर्यवसितः अवच्छिन्नपदं अवच्छिन्नप्रतियोगिताकत्वाभावेन तत्प्रतियोगितावैशिष्ट्यम् अवच्छेदकप्रतियोगितावच्छेदकं न भवतीत्येवं नौ प्रमाणाभावेऽपि तदपि भावप्रतियो

गितावच्छेदकं घटत्वं भेदस्य धूमत्वे सत्त्वेनातिव्याप्तिः स्यादनुक्तौ च ~~[illegible]~~ धूमाधिकरणे हेतुसमानाधिकरणत्वेन धूमत्वस्य तत्प्रतियोगितावच्छेदकत्वान्नाव्याप्तिः नापि प्रतियोगितावच्छेदकं नेति सामान्यभेदस्य प्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकस्य सत्त्वेनातिव्याप्तिरिति भावः।

ननु रूपवत्साध्ये नीलादित्यत्र विषयितया रूपत्वविशिष्टं नास्तीत्यभावस्य हेतुसमानाधिकरणतया तत्प्रतियोगितावच्छेदकमेव साध्यतावच्छेदकं रूपत्वमित्यव्याप्तिवारणाय प्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नाया विवक्षणीयतया अत्र तद्व्यक्तित्वं नास्तीत्यभावस्य हेतुसमानाधिकरणत्वेऽपि तदीयप्रतियोगितावच्छेदकतायास्तादृशसम्बन्धावच्छिन्नत्वाभावात्: साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वाभावेनोक्तदोषाप्रसक्तेन अवच्छेदकत्वगर्भं निष्प्रयोजनमिति चेन्न। वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टस्य विषयितया साध्यत्वे तज्ज्ञानवह्नौ शुद्धसमवायेन वह्नित्वविशिष्टाभावस्य हेतुसमानाधिकरणतया तत्प्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकताघटकसमवायसम्बन्धावच्छिन्नतया वह्नित्वप्रकारीय ~~[illegible]~~ प्रतियोगितावच्छेदकावच्छिन्नत्वादव्याप्तेर्वारणाय साध्यतावच्छेदकताघटकसम्बन्धे पूर्वोक्तपर्याप्तिर्निवेश्या। एवं समवायेन वह्नित्वविशिष्टस्य विषयितया साध्यत्वे तज्ज्ञानवह्नौ वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टाभावस्य हेतुसमानाधिकरणस्य प्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकताघटकसमवायसम्बन्धावच्छिन्नतया अव्या

वैशिष्ट्यस्य साध्यतावच्छेदकताघटकत्वे ज्ञानलक्षणपर्याप्तिसम्बन्धेन विशेषणीया
तथाच साध्यतावच्छेदकताघटकसंसर्गतावच्छेदकताश्रयवह्नित्वप्रतियोगि-
ताकपर्याप्तियोगितावच्छेदकरूपे स्वावच्छेदकत्व (सम्बन्धावच्छिन्नावच्छेदकताक) प्रतियोगिताकपर्या-
प्तियोगितावच्छेदकत्वसम्बन्धेन वह्निपदवच्छेदकत्वं तादृशावच्छेदकता-
प्रतियोगिताकपर्याप्तिविशेषणीयः एवञ्च शुद्धसमवायस्य साध्यतावच्छे-
दकताघटकत्वस्थले शुद्धसमवायत्वावच्छिन्न (च्छेदकताक) त्वात् वह्नित्वप्रति-
योगिकसमवायस्य साध्यतावच्छेदकताघटकत्वस्थले तादृशविशेषण-
वह्नित्वावच्छिन्नावच्छेदकताकत्वमेव ग्राह्यम्: तादृश (साध्या) भावस्य हेतुसमानाधि-
करणाभावेन तयोः सत्त्वेऽपि नाव्याप्तिः एवं सति वह्नित्वप्रतियोगिक-
समवायेन वह्नेर्विशिष्टस्य संयोगेन साध्यत्वे धूमादिहेतौ हेतुसमानाधि-
करणस्य तादृशसम्बन्धाविच्छिन्नावच्छेदकताप्रतियोगिताकपर्याप्त-
प्रतियोगिकत्वादि तद्भावपर्याप्त्यवच्छेदकसम्बन्धाविच्छिन्नत्वस्य
ताद्रूप्येण तत्सम्बन्धेन साध्यतावच्छेदकताविशिष्टावच्छेदकतावति
रूपे (वृष) वह्नित्वे प्रतियोगितायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्ना-
वच्छेदकता (कताविरुद्ध) विशेषणीयाः एवं विशेषणे सति पूर्वोक्ताव्याप्तिर्न सम्भ-
वति तथाच तत्तत्कालीनसम्बन्धेन हेतुसमानाधिकरणाभावीय
तत्तत्कालिकप्रतियोगितावच्छेदकतायां स्वसामानाधिकरण्यविशेषण
साध्यतावच्छेदकताविशिष्टत्वाभावेन तादृशावच्छेदकत्वस्य निरूपित-
त्वसत्त्वेन (तत्तत्सम्बन्धावच्छिन्न) ग्राह्यतया साध्यवत्त्वेन तत्प्रतियोगिताविशिष्टत्वमादाय
तत्राव्याप्तिरिति तद्वारणाय तदवच्छेदकताघटकं सम्प्रयोजनमेव।

नचैवमनवच्छेदकत्वानुगमेऽपि वह्निमान्धूमादित्यत्र महानसीयवह्नेरभावस्य पर्वते हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकमेव वह्नित्वमिति व्याप्तेस्तादवस्थ्यमेवेति वाच्यम्-इत्याह नचेति. विशेषाभावकूटस्यैव सामान्याभावत्वेऽपि सामान्याभावस्य प्रामाणिकत्वेऽपि महानसीयवह्न्यभावादि प्रतीतिसिद्धो विशेषाभावोऽतिरिक्त एवेति बोधयितुं प्रतीतिसिद्धस्येत्युक्तम्। समानाधिकरणे साध्यतावच्छेदकेति. तादृशविशेषाभावमादायाव्याप्तिवारणाय हेतुसमानाधिकरणाभावीयप्रतियोगिता साध्यतावच्छेदकेतरानवच्छिन्ना विवक्षणीया. एवञ्च ईदृशविशेषानवच्छिन्ना या हेतुसमानाधिकरणाभावीयप्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति. महानसीयवह्न्यभावस्य हेतुसमानाधिकरण्येऽपि तदीयप्रतियोगितायाः साध्यतावच्छेदकेन वह्नित्वेनावच्छिन्नत्वान्महानसीयत्वेनावच्छिन्नतया अग्राह्यत्वेन नाव्याप्तिः साध्यतावच्छेदकानवच्छिन्नत्वमात्रोक्तौ धूमवान्वह्नेरित्यत्र धूमाभावीयप्रतियोगिताया अग्राह्यतया इतरासमनियतत्वेनाव्याप्तिः स्यात्. साध्यतावच्छेदकेतरानवच्छिन्नत्वमात्रोक्तौ च विशिष्टधूमादिसाध्यकौ अभावादीनामग्राह्यतयाऽसम्भवः स्यादतः न्यूनवृत्त्यनवच्छिन्नत्वं विवक्षितम्. न्यूनवृत्त्यनवच्छिन्नत्वमात्रोक्तौ वह्निधूमोभयवान्वह्नेरित्यत्र साध्याभावस्य वह्निधूमोभयाभावस्योभयत्वावच्छिन्नप्रतियोगिताकत्वेनाग्राह्यतयाऽव्याप्तिः स्यादतः साध्यतावच्छेदकतापर्याप्त्यनवच्छिन्नत्वं विवक्षितम्. तत्र महानसीयत्वस्य महानसवृत्तित्वरूपतया तादृशावच्छेदकतायां साध्यतावच्छेदकतापर्याप्त्यनवच्छिन्नतया आदितःप्रदेशग्राह्यतया महानसीयवह्न्यभावमादाय नाव्याप्तिरिति तत्त्वम्. महानसीयत्वस्य महानसीयसंयोगाद्रूपतया तादृशावच्छेदकत्वस्य समानाधिकरणत्वमिति स्यात्।

उभयानवच्छिन्नत्वं च साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्व-तादृश
निष्ठावच्छेदकतानिरूपितत्वैतदुभयाभाववत्त्वं वक्तव्यं न तथा साध्य
तावच्छेदकताघटितहेतुनिष्ठावच्छेदकतानिरूपकत्वम् [illegible] अवच्छेदक
भेदेनावच्छेदकताया भेदेन महानसीयवह्न्यभावीयप्रतियोगितावच्छेदक
तायाः महानसीयत्वनिष्ठायाः सावच्छिन्नायाः वह्नित्वनिष्ठाया निरवच्छिन्नाया
अभेदेन एकत्वासम्भवादनुगमाभावात् उभयनिष्ठावच्छेदकतानिरूपक
त्वस्य सत्त्वेनाव्याप्तितादवस्थ्यमेव स्यात् तथा च यत्र प्रमेयत्वस्य साध्यता
वच्छेदकत्वं तादृशे प्रमेयवान् वाच्यत्वादित्यादौ साध्यतावच्छेदकीभूतप्रमेय
त्वस्याप्रसिद्धत्वादव्याप्तिरिति न वाच्यम् समानाधिकरणेति तादृशेति
तन्मात्रवृत्तित्वस्य हेतुसमानाधिकरणप्रतियोगितावच्छेदकनिरूपकत्वाभावेऽपि तत्र
साध्यतावच्छेदकतानिष्ठावच्छेदकतानिरूपितत्व- साध्यतावच्छेदकतानव
च्छिन्नप्रतियोगितावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वोभयाभाववत्त्वस्य ~~[illegible]~~
हेतुसमानाधिकरणाभावीयप्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदक
तावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति पर्यवसितं तथा च साध्यतावच्छे
दकघटत्वं प्रमेयं तादृशस्य घटत्वं प्रमेयं तदुभयावच्छेदकताकाभावनिरूपित
प्रतियोगिता घटवान्नास्ति पटवान्नास्तीत्याकाराभावीयप्रतियोगितानव
च्छेदकं चालनीयन्यायेन घटादि प्रमेयं साध्यतावच्छेदकमिति नाव्याप्तिः
अत्र महानसीयवह्न्यभावमादायाव्याप्तिवारणाय पर्याप्तिनिवेशः यतः कस्यचिन्मतं
मयूरदूषयति हेतुसमानाधिकरणेत्यादि हेतुसमानाधिकरणाभावप्रति
योगितावच्छेदकतापर्याप्त्यधिकरणभिन्नत्वावच्छिन्नसाध्यतावच्छेदकतावच्छिन्न

प. १२

अत्र पर्याप्त्यधिकरणमित्यस्यानिवेशाच्च मते व्यासज्यवृत्तिप्रतियोगिकपर्याप्तिव्य-
प्यवानेतस्य तत्सम्बन्धेन तदधिकरणत्वस्य व्याप्यवानेतस्य महानसीयवह्न्यभा-
वप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणत्वं द्वित्वावच्छेदेनैव महानसीयत्ववह्नि-
~~त्वयो~~ त्वेति एकत्वावच्छेदेन तु तदभावोऽस्ति. एवं च महानसीयवह्न्यभावस्य हेतुमन्-
नाधिकरणत्वेऽपि तादृशाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणत्वाभाव-
एकत्वावच्छेदेन वह्नित्वे सत्त्वेन नाव्याप्तिः. तच्चैवं सति एतद्रीत्या महानसीयवह्निसाध्यके
धूमहेतौ महानसीयवह्न्यभावस्य हेतुमन्नाधिकरणत्वेऽपि तादृश महानसीय-
वह्न्यभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणत्वं महानसीयवह्नित्व-
द्वित्वावच्छेदेन सत्त्वेऽपि एकत्वावच्छेदेन तदभावसत्त्वादतिव्याप्तिः. अपि नेति वाच्यम्
एतन्मते साध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छेदेनैव तादृश पर्याप्त्यधिकरण-
त्वाभावस्य साध्यतावच्छेदके विवक्षणात्. तथा चात्र साध्यतावच्छेदकता-
पर्याप्त्यधिकरणं द्वित्वमेव तदवच्छेदेन तु महानसीयत्ववह्नित्वयोः तादृशाभाव-
प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणत्वाभावो नास्तीति नातिव्याप्तिः.
इति तथानिवेशाभिप्रायेण दूषणम्। तन्मते त्वखण्डाभिन्ना व्यासज्यवृत्तिप्रतियोगि-
पर्याप्ति ~~त्व~~ सम्बन्धेन तदधिकरणत्वस्य च व्याप्यवत्तया वच्छेदकताप्रसिद्धे
एकत्वावच्छेदेन तेन तदभावो न वक्तुं शक्यते. महानसीयवह्न्यभावीयप्रतियोगि-
तावच्छेदकतापर्याप्त्यधिकरणत्वस्य महानसीयत्वे वह्नित्वे च. यदि महानसीय-
वह्नित्वे प्रत्येकमपि पर्याप्त्यधिकरणत्वं यथाभावेऽपि न महानसीयत्व-
वह्नित्वयोर्द्वयोः [illegible] प्रत्येकमवच्छेदकत्वात् पर्याप्त्यधिकरणत्वं तादृशपर्या-
[illegible] तथा नैवानैकेऽपि महानसीयवह्न्यभावभावप्रतियोगितावच्छेदकत्वं [illegible]

सामानाधिकरण्यं व्याप्तिरित्युक्तौ महानसीयवह्निमत्त्वस्य पर्वतेऽसत्त्वा-
न्नाधिकरण्येऽपि तादृशाभावीयप्रतियोगितावच्छेदकता पर्याप्तिसम्बन्धेन
महानसीयत्ववह्नित्वोभये वर्तते न तु वह्नित्वमात्रे इति तादृशाभावीयप्रतियो-
गितावच्छेदकतापर्याप्त्यधिकरणताभावः शुद्धवह्नित्वे साध्यतावच्छेदके
वर्तत इत्येतस्याप्रसिद्धत्वात् तथा निवेशो भवतीति किमर्थं गुरुभूतमभाव-
भिन्नत्वं निवेश्यत इति तेषामाशयः। [illegible] येन सम्बन्धेन यस्य
प्रत्येकपर्याप्तिः तेन सम्बन्धेन तस्य तदुभयपर्याप्तिनियमेन पर्याप्तिसम्ब-
न्धेन महानसीयवह्निमत्ताभावीयप्रतियोगितावच्छेदकता महानसीयत्ववह्नित्वे
न पर्याप्तेत्येकस्यां तदुभयपर्याप्तिर्वर्तते। उभयमपि वर्तते चेत् प्रत्येकमपि वर्तत एवेति
यदि प्रत्येकनिरूपितपर्याप्तिसामान्याभावः [illegible] उभयनिरूपितपर्याप्तिसामान्याद्
[illegible] ~~[illegible]~~ उभयनिरूपितपर्याप्तिसामान्याभावरूपसाध्यता-
भावं हेतुं कृत्वा प्रत्येकनिरूपितपर्याप्तिसामान्याभावरूपस्य आधारभेदाभावस्याप्रसिद्धिः
तथा च तादृशाभावीयप्रतियोगितावच्छेदकता उभयपर्याप्तिर्वह्नित्वे वर्तत
इत्यस्याप्रसिद्धत्वादपर्याप्तिरेव तथा निवेशापेक्षित इत्यर्थः। *

साध्यतावच्छेदकेति। साध्यतावच्छेदकाभिन्नो यः साध्यतावच्छेदकस्तद्
प्रतियोगितावच्छेदकसामानाधिकरण्यमावश्यकम्
नवच्छिन्नप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामाना-
धिकरण्यं विवक्षणीयं तथा च महानसीयवह्निमत्त्वस्य हेतुसमानाधिकर-
णाभावप्रतियोगितावच्छेदकस्य साध्यतावच्छेदकवह्नित्वाभिन्नसाध्यतावच्छे-
दकं महानसीयत्वं तदवच्छिन्नैव तदीयप्रतियोगितेति तादृशाभावोऽपि
गृहीतुं शक्यत इति नाव्याप्तिर्लक्षणस्येति। साध्यतावच्छेदकवह्नि

साध्यतावच्छेदकधर्मो द्रव्यत्वादिस्तदवच्छिन्नप्रतियोगिताकं घटाभावो
वत्साध्यक वह्निमान्धूमादित्यत्र लक्षणसमन्वयः व्यभिचारिणि सा
ध्यतावच्छेदक धूमत्वेन साध्यत्वाभावे द्रव्यत्वादि धर्मो तदवच्छिन्न प्रति
योगिताकस्य धूमाभावस्य हेतुसमानाधिकरण्याभावान्नातिव्याप्तिः
अतोऽपि गुरुत्वं साकेतादिनापि समानाधिकरणत्वं नातिवेशनीयमिति तदाशयः
~~[illegible]~~ यथैवं विवक्ष्यते प्रमेयाश्रयवान्धूमादित्यत्र
साध्यतावच्छेदक प्रमेयत्वेन साध्यवत्ति धर्मो प्रसिद्ध्या अव्याप्तिरिति वा
स्वरूप- साध्यतानिरूपितावच्छेदकताविशिष्टान्यायाः साध्यवत्त्वा
वच्छेदकतायाः तदनिरूपित प्रतियोगिताया विवक्षितत्वात्. वैशि
स्वसमानाधिकरणस्वावच्छिन्नाभावप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन. साजात्यं च
ष्ट्यं च, स्वविशिष्टावच्छिन्नत्वे निरूपितत्वोभयसम्बन्धेन. सामाना
धिकरण्यं स्वरूपसम्बन्धेन. तथा च वह्निमान्धूमादित्यत्र साध्यता
निरूपितावच्छेदकता वह्नित्वनिष्ठा तद्भिन्ना या वह्नित्वनिष्ठैव तदवच्छि
न्नावच्छेदकता. तत्र स्वविशिष्टावच्छिन्नत्वरूपेण साजात्यं वह्नित्वे
स्वरूपघटितसामानाधिकरण्यमप्यस्त्येव. तदन्या साध्यवत्त्व
वच्छेदकता द्रव्यत्वनिष्ठावच्छेदकता तदनिरूपिता घटाभावीय
प्रतियोगितेति लक्षणसमन्वयः. प्रमेयाश्रयवान्धूमादित्यत्र साध्य
तानिरूपिता प्रमेयत्वनिष्ठावच्छेदकता स्वविशिष्टावच्छिन्नत्व सामाना
धिकरण्योभयसम्बन्धेन तद्विशिष्टा सैवावच्छेदकता तद्भिन्ना साध्यव
त्त्वावच्छेदकता द्रव्यत्वादिनिष्ठा तदवच्छिन्नावच्छेदकता तदनिरू
पिता घटाभावीयप्रतियोगितेति तदवच्छेदकं घटत्वं तदवच्छेदकं
वाच्यत्वरूपं प्रमेयत्वमिति नाव्याप्तिः:- नोऽस्मिन्नतया सर्वमिति.

संबन्धविवक्षणे तत्तद्वह्नेर्नानास्वभावानां साध्यतावच्छेदकताविशेषा
त्मा साध्यवन्निष्ठावच्छेदकता तत्तद्वह्नित्वावच्छेदकता तद्वह्नि
त्वप्रतियोगिताकतया अग्रेऽपि अनवच्छेदकत्वानुसरणे विनापि वह्नि
मान्धूमादित्यादावव्याप्त्यभावेन तादृशप्रतियोगिताश्रयस्य साध्य
सामानाधिकरण्यं व्याप्तिरित्येव पर्यवसितमिति तद्भागे यथा
मनवच्छेदकत्वानुसरणं वैयर्थ्यमापद्येतेति भावः।

ननु अर्थं चेदनवच्छेदकत्वानुसरणं नैवावश्यकं किमर्थं गुरुलक्षणं
कृतमिति चेन्न ~~त्वत्~~ दोषान्तरापत्तेरिति। तथाहि वह्निमान् प्रमे
यवान् वाच्यत्वादित्यत्र साध्यतावच्छेदकाभिमतः साध्यवाच्चिधर्मो यत्
त्वादि तदवच्छिन्नैव घटाद्यभावीयप्रतियोगितेति तादृशस्य हेतु
समानाधिकरणाभावाप्रसिद्ध्या अव्याप्तिः स्यादिति तथापि वाच्य
त्वं प्रदर्श्यते। इयत्तानवच्छिन्नत्वस्य अनवच्छेदकत्वानुसरणस्योपा
दाने प्रमेयसाध्यकस्थलेऽपि घटाद्यभावीयप्रतियोगितायाः साध्य
तावच्छेदकीभूतप्रमेयत्वावच्छिन्नतया ~~तदभा~~ वाच्यता
यत्र येन हेतुसमानाधिकरणानां घटाद्यभावानां प्रतियोगितावच्
छेदकीभूतप्रमेयत्वावच्छिन्नसामानाधिकरण्यसत्त्वेन नाव्याप्तिः। अत्र
घटीयप्रतियोगितात्वव्यापकसाध्यतावच्छेदकीभूतसाध्यवाच्यधर्मा
वच्छिन्नप्रतियोगिताया अप्रसिद्ध्या नैव घटतीति अभावाप्रसिद्धिकृता।

~~इत्यादिसूचयतीति। त~~

तद्रूपाविशेषणस्येत्यादि दीधितिमवतारयति द्रव्यत्वादिरूपेणेति. तत्तद्धर्मावच्छिन्न
बोधकपदसमभिव्याहृतवाक्यत्वेन शब्दस्य तद्धर्मावच्छिन्नालिङ्गिताकतद्धर्मावच्छिन्न
विधेयताकशाब्दबोधजनकतावच्छेदकत्वमर्थः नतु तद्धर्माश्रयनिष्ठलिङ्गिताक तद्धर्मा
श्रयनिष्ठविधेयताकशाब्दबोधजनकतावच्छेदकत्वम्. अन्यथा प्रतीतिप्रमात्वविरह
स्याधीनत्वात् तद्धर्माश्रयनिष्ठालिङ्गिता द्रव्यत्वाश्रयधूमनिष्ठा धूमत्वावच्छिन्ना
लिङ्गिता, तद्धर्माश्रयनिष्ठविधेयता तत्तद्वह्नित्वाश्रयवह्निनिष्ठा वह्नित्वावच्छिन्नावि
धेयता विसत्ताकशाब्दबोधजनकतावच्छेदकं धूमत्वावच्छिन्नसमानाधिकरणात्यन्ताभा
वप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यं यादृशस्य विषयस्य.
स्य, धूमे सत्ता धूमत्वव्यापकवह्नित्वशालितावगाह
द्रव्ये सत्ता धूमं वह्निव्याप्यमिति शब्दबोधस्यापि प्रामाण्यापत्तिः स्यात्. तद्धर्मावच्छिन्न
लिङ्गिताकतद्धर्मावच्छिन्नविधेयताकशाब्दबोधजनकतावच्छेदकत्वस्य विवक्षणे तु
तद्धर्मावच्छिन्नालिङ्गिता द्रव्यत्वावच्छिन्नालिङ्गिता तादृशालिङ्गिताकवह्नित्वावच्छिन्न
विधेयताकशाब्दबोधजनकतावच्छेदकं द्रव्यत्वावच्छिन्नसमानाधिकरणात्यन्ता
नैव तु धूमत्वावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यं
भावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यं, द्रव्यत्वावच्छिन्नाधि
वह्नित्वस्य
करणवृत्तित्वात्यन्ताभावप्रतियोगितावच्छेदकत्वेन तादृशसामानाधिकरण्यस्य
द्रव्ये विषयत्वेन द्रव्यं वह्निव्याप्यमिति प्रतीतेर्न प्रामाण्यम् एवं तद्धर्मावच्छिन्नवि
धेयता वह्नित्वावच्छिन्नविधेयता तादृशविधेयताक धूमत्वावच्छिन्नालिङ्गिताक
शाब्दबोधजनकतावच्छेदकं धूमत्वावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगिता
नवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यम् एव तु धूमत्वावच्छिन्नसमानाधिकरणा
त्यन्ताभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यं, तद्वह्नित्वस्य
धूमत्वावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वेन तादृशसामा

नाधिकरण्यस्य धूमे विषयताख्येन धूमत्वाद्यवच्छिन्नवान्वह्नेरित्यादाविति प्रतीतेरप्रामाण्यम्। तद्रूप विशिष्टस्येति अवच्छेदकतानिष्ठा तथा च तद्रूपविशिष्टनिष्ठा तद्धर्मावच्छिन्नसाध्यवत्त्वनिरूपितकता प्रयोजिका इत्यर्थः तद्धर्मावच्छिन्नाभिन्नावच्छेदकतद्धर्मावच्छिन्नानुयोगितानिरूपितावच्छेदिका इति यावत्। तथा च धूमत्वेनैव धूमस्य वह्निव्यापकत्वं न तु द्रव्यत्वादिरूपेण, वह्नित्वेनैव वह्नेर्धूमव्यापकत्वं न तु तद्वृत्त्यादिरूपेण। तेन द्रव्यं वह्निव्याप्यं धूमो ~~[illegible]~~ वह्निव्याप्य इति प्रतीत्योर्न प्रामाण्यम् अपि तु धूमो वह्निव्याप्य इत्यस्यामेव प्रतीतेः प्रामाण्यमिति भावः। तथा चेति व्याप्तिविशिष्टस्य अनुमितिजनकतायां विषयतावच्छेदकत्वमर्थः। अन्यथा व्याप्तिपदेनापि तादृशसामानाधिकरण्यस्यैवोपादाने तादृशसामानाधिकरण्यं तादृशसामानाधिकरण्यमेवेति पुनरुक्तिः स्यात्। व्याप्तिपदस्य तथार्थकत्वेन तादृशसामानाधिकरण्यं तद्धर्मावच्छिन्नसामानाधिकरण्यस्य सामान्यप्रतियोगितावच्छेदकतद्धर्मावच्छिन्नसामानाधिकरण्यं तद्धर्मावच्छिन्नहेतुताकतद्धर्मावच्छिन्नविषयताकानुमितिजनकतायां विषयतावच्छेदकमिति पर्यवसिततया पौनरुक्त्यभावादिति येनकेनापि ~~[illegible]~~ इत्युक्तौ व्याप्तेः सामान्यरूप तदैक्य ~~[illegible]~~ सामानाधिकरण्यमित्यर्थः।

व्याप्तेर्लक्षणे च सामानाधिकरण्यघटितं तदपि सामानाधिकरण्यविशेषधूमत्वादिनाश्रयत्वेन पक्षधर्मिताभाति। ~~[illegible]~~ तद्रूप सामान्य एकैकधूमादिकरणावच्छिन्नसामान्यप्रतियोगि तत्तद्वह्निसामानाधिकरण्यस्य तत्तद्धूमादिष्वस्य, धूमत्वादि अवच्छेदकत्वे तदापि धूमत्वावच्छिन्नसामानाधिकरण्यं सामानाम प्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यं धूमत्वावच्छिन्ननिष्ठा वह्नित्वावच्छिन्नसाध्यतानिरूपितानुमितिजनकतावच्छेदिका व्याप्तिरेव भवतीति भावः।

दण्डत्वादौ साध्ये पञ्चम्याः सम्बन्धे दण्डत्वादिकमेव साध्यतावच्छेदकमतो नाव्याप्ति-
रिति दोषोऽपि भवतामस्त्विति ननु दण्डिमानिति. साध्यतावच्छेदकताघटितोभयानवच्छि-
न्न हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छि-
न्नसामानाधिकरण्यं व्याप्तिः संयोगेन दण्डिसाध्यके समवायेन दण्डसंयोग-
हेतुके स्थले बहूनां दण्डव्यक्तीनां साध्यतावच्छेदकतया दण्डसंयोगाधिकरणेऽपि तद्द-
ण्डवदधिकरणे ऽन्यदण्डवदभावस्य अन्यदण्डवदधिकरणे तद्दण्डवदभावस्य वर्तमानतया
साध्यतावच्छेदकताघटितोभयानवच्छिन्नप्रतियोगिताकानां
चालनीन्यायेन हेतुसमानाधिकरणानां तत्तद्दण्डवदभावानां प्रतियोगितावच्छेदि-
का एव साध्यतावच्छेदिकाः सर्वदण्डव्यक्तय इत्यव्याप्तिरिति चेत्: अत्र दण्डसंयोगो
साध्यतानधिकरणे
दण्डप्रतियोगिकत्वविशिष्टसंयोगरूपो हेतुः दण्डिसंयोगमात्रस्य हेतुत्वे तस्य दण्डस्यापि वर्त-
मानतया असद्धेतुत्वं स्यात् दण्डप्रतियोगिकत्वविशिष्टसंयोगस्य दण्डनाधिकरणे एव व-
र्तमानतया सद्धेतुत्वमेव. किं वा अनुयोगितासम्बन्धेन दण्डसंयोगस्य हेतुता बोध्या। अत्र
शङ्कते नचेति. अत्र गुरुसाध्यतावच्छेदककस्थलार्थं निरुक्तसाध्यतावच्छेदककस्थलार्थं च
व्याप्तेर्द्वैविध्यं कर्तव्यम्. पूर्वोक्तव्याप्तेः सर्वसाधारणत्वे वह्निमान्धूमादित्यादौ निरुक्तसाध्य-
तावच्छेदककस्थले महानसीयवह्नित्वजातिमन्नाभावस्य हेतुसमा-
नाधिकरणतया साध्यतावच्छेदकताघटितोभयानवच्छिन्नप्रतियोगिताकतया त-
महानसीयवह्नित्वविशिष्टजात्यवच्छिन्नं
द्दोषप्रतियोगितावच्छेदकमेव साध्यतावच्छेदकव्याप्तिरिति चेत्: ~~[illegible]~~
नचात्र महानसीयवह्नित्वविशिष्टजातित्वेन वह्नित्वस्यैव गुरुसाध्यतावच्छेदकवह्नित्वघटितव्याप्तिः
रणार्थं प्रतियोगितावच्छेदकता निरुक्तत्वेन विवक्षणीया तथा च तादृशाभा-
गुरुसाध्यतावच्छेदकस्थलीयव्याप्तौ
वह्नित्वनिष्ठायाः
वस्य हेतुसमानाधिकरणत्वेऽपि तदीयप्रतियोगितावच्छेदकतायाः महानसीयवह्नि-
त्वनिष्ठविशेष्यतावच्छिन्नतया निरुक्तावच्छेदकत्वेन न ग्रहणं भवति. अतएव
जातीयप्रतियोगितावच्छेदकताया एव ग्राह्यतया तदनवच्छेदकं वह्नित्वमन्वेवेति

प्रतियोगिताकतया
नवच्छिन्नप्र
ताकत्वाभा
वं गृह्यते
तत्र जातित्वस्य
समानाधिक
रणत्वेन
वच्छिन्न
प्रतियोगिताक
त्वे: अतः

नाव्याप्तिः. निरवच्छिन्नत्वं च किञ्चित्सम्बन्धावच्छिन्नावच्छेदकत्वानिरूपकत्वं न त्ववच्छेदकत्वानिरूपकत्वमात्रं तथात्वे घटाद्यभावीयप्रतियोगितावच्छेदकताया घटत्वादिनिष्ठाया अपि संसर्गावच्छिन्नतया निरवच्छिन्नत्वाभावेनाग्रहीतादृशाभावादेरप्रसिद्ध्याव्याप्तितादवस्थ्यं स्यात्. किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वं लक्षणमेव संसर्गनिष्ठावच्छेदकतायाः सम्बन्धानवच्छिन्नतया तादृशनिरवच्छिन्नत्वाक्षतेः. महानसीयवह्नित्वविशिष्टजातिमन्नास्तीत्यभावीयप्रतियोगितावच्छेदकताया जातिनिष्ठाया जातित्ववैशिष्ट्यसम्बन्धावच्छिन्नतया न निरवच्छिन्ना. अनुयोगित्वसमानजातीयत्वेनैवोपस्थितेरिक्तपदार्थज्ञानस्याकिञ्चित्करत्वे प्रकारकत्वानियमात्. तथा च तादृशाभावस्याग्रहणतया अव्याप्तिरक्षुण्णैवेति. एवं जातिमद्भिन्नत्वादिति विशिष्टसाध्यतावच्छेदकस्थले साध्यतावच्छेदकतदितरोभयानवच्छिन्नप्रतियोगिताकस्य घटसमवेतत्वविशिष्टजातिमन्नास्तीत्याकाराभावस्य घटे हेतुसमानाधिकरणस्य प्रतियोगितावच्छेदकैकसा
[illegible]
ध्यतावच्छेदकीभूतजातौ सत्त्वादव्याप्तिः स्यात्. तत्र स्वार्थविशिष्टसाध्यतावच्छेदकस्थलीयव्याप्तौ प्रतियोगितावच्छेदकता साध्यतावच्छेदकतावच्छेदकतदितरोभयानवच्छिन्नत्वेन विशेषणीया. तथा च घटसमवेतत्वविशिष्टजातिमन्नास्तीत्यभावीयप्रतियोगितावच्छेदकता जातिनिष्ठा साध्यतावच्छेदकतावच्छेदकीभूतजातित्वेन तदितरेण घटसमवेतत्ववैशिष्ट्येनाप्यवच्छिन्नेति नोभयानवच्छिन्नेति तादृशाभावस्याग्रहणतया जातिमान्नास्तीति सामान्याभावस्य हेतुसमानाधिकरणतया च हेतुसमानाधिकरणतादृशाभावं घटत्वादिकमादाय लक्षणसमन्वयान्नाव्याप्तिः। अत्रोभयानवच्छिन्नत्वमात्रोक्तौ महानसीयवह्नि

वह्नित्वविशेषजातिमद्धूमादेरत्र साध्याभावस्य उभयानवच्छिन्नावच्छेदकताकप्रतियोगिताकत्वाभावेनाग्रदायभावानादायातिव्याप्तिः स्यात्, साध्यतावच्छेदकतावच्छेदकानवच्छिन्नत्वमात्रोक्तौ विशिष्टसाध्यतावच्छेदकव्याप्यजातिमत्त्वे साध्याभावस्य लक्षणाघटकत्वादतिव्याप्तिः स्यात्; द्वयानवच्छिन्नत्वमात्रोक्तौ घटत्वेन घटत्वविशिष्टस्य विवक्षितत्वा साध्यतायां तद्ज्ञानत्वहेतौ स्वरूपेणोघटत्वविशिष्टस्य विवक्षितत्वाद्यभावादव्याप्तिवारणाय प्रतियोगितावच्छेदकतायां कोटिद्वयानवच्छिन्नत्वं निवेशनीयं तथा चोक्तद्वयानवच्छिन्नप्रतियोगितावच्छेदकतायां ~~स्व~~रूपता साध्यतावच्छेदकतावच्छेदके ~~[illegible]~~ तावच्छिन्नत्वाभावेन दण्डमात्रादिसंयोगादेरत्राव्याप्तिः स्यादत उभयानवच्छिन्नत्वनिवेशः, 'नच प्रमेयस्य साध्यतावच्छेदकतावच्छेदकत्वस्थले साध्यतावच्छेदकतावच्छेदकप्रमेयत्वप्रसिद्ध्याऽव्याप्तिरिति वाच्यम्. प्रतियोगिताधर्मिकोभयानवच्छिन्नत्वद्वयाभावे स्वानवच्छिन्नप्रकारतावच्छेदकत्वं तादृशत्वाभावस्य विवक्षणीयत्वात्.

किंवा साध्यतावच्छेदकतावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपकत्व साध्यतावच्छेदकतावच्छेदकानिष्ठावच्छेदकतानिरूपकत्वोभयाभावस्य प्रतियोगितावच्छेदकतायां निवेशनीयत्वात्. अत्र वैशिष्ट्यं स्वसाक्षात्स्वसामानाधिकरण्यैतदुभयसम्बन्धेन साजात्यं च स्ववृत्तित्वानवच्छिन्नत्व निरवच्छिन्नत्वान्यतररूपेण. सामानाधिकरण्यं स्वरूपसम्बन्धेन. नन्वेवं गुरुसाध्यतावच्छेदकस्थले साध्यतावच्छेदकतादितरोभयानवच्छिन्नहेतुसमानाधिकरण्याभावीयप्रतियोगितानिरूपित निरवच्छिन्नावच्छेदकत्वाभावात्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिः, विशिष्टसाध्यतावच्छेदकस्थले साध्यता~~वच्छेदकता~~वच्छेदकतादितरोभयानवच्छिन्नप्रतियोगिताकहेतुसमानाधिकरणाभावीयप्रतियोगि

तन्निरूपिता साध्यतावच्छेदकतावच्छेदकतादितरोऽप्यानवच्छिन्नावच्छेदकताऽभावव त्साध्यतावच्छेदकतावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति पर्यवसितम्. अत्रोभयत्रैव निरवच्छिन्नत्वमेव ~~प्रवेश्यतां~~ किं वा उभयानवच्छिन्नत्वमेवावच्छेदकतायां प्रवेश्यतां ~~[illegible]~~ निरवच्छिन्नत्वनिवेशेऽपि महानसीयवह्नित्वानोत्तविशिष्टजातिमान्नास्तीति घटसमवेतत्वविशिष्टजातिमान्नास्तीति च प्रतीतिसिद्धाभावीयप्रतियोगितावच्छेदकताया जातिनिष्ठाया निरवच्छिन्नत्वाभावेन, उभयानवच्छिन्नत्वनिवेशेऽपि तदीयप्रतियोगितावच्छेदकताया उभयानवच्छिन्नत्वाभावेनाग्रहादुक्तस्थलयोर्व्याप्तिवारणसम्भवात् किमर्थमुभयथा निवेश इति चेन्नैवम्. उभयत्रापि निरवच्छिन्नत्वमात्रनिवेशे दण्डिमान्घटत्वादित्यत्र व्यभिचारिण्यपि हेतुसमानाधिकरणसाध्याभावीयप्रतियोगितावच्छेदकताया दण्डनिष्ठायाः दण्डत्वावच्छिन्नत्वेन निरवच्छिन्नत्वाभावेनाग्रहात् निरवच्छिन्नावच्छेदकताकाभावासत्त्वमादायातिव्याप्त्यापत्तेः विशिष्टसाध्यतावच्छेदकस्थले साध्यतावच्छेदकतावच्छेदकमादितोऽनवच्छिन्नत्वनिवेशे दण्डी नास्तीत्यभावीयप्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकतावच्छेदकदण्डत्वमात्रावच्छिन्नत्वेनोभयानवच्छिन्नत्वस्याग्रहान्न्यूनत्वस्य साध्यतावच्छेदकेऽधिकत्वेनातिव्याप्तिवारणं भवति, उभयत्रोभयानवच्छिन्नत्वमात्रनिवेशे वह्निमान्धूमादित्यादौ साध्यतावच्छेदकतावच्छेदकस्याप्रसिद्ध्याव्याप्तिः स्यात् ~~[illegible]~~ निरवच्छिन्नत्वनिवेशे तु घटाद्यभावीयप्रतियोगितावच्छेदकताया घटत्वनिष्ठाया निरवच्छिन्नत्वेन ग्रहादव्याप्त्यभावः अतः शुद्धसाध्यतावच्छेदककस्थलीयव्याप्तौ निरवच्छिन्नत्वं विशिष्टसाध्यतावच्छेदककस्थलीयव्याप्तौ उभयानवच्छिन्नत्वं प्रतियोगितावच्छेदकतायां निवेशनीयम्

विशेषस्यान्यतावच्छेदकत्वे
एवं सति ~~[illegible]~~ दण्डमात्रदण्डे संयोगादित्यत्र तद्दण्डवान्नास्तीत्यभावस्य हेतुतया
नाधिकरणत्वेऽपि तदीयप्रतियोगितावच्छेदकतया तद्दण्डनिष्ठायाः साध्यतावच्छेद
नादितः
कतावच्छेदकत्व~~[illegible]~~ दण्डत्वमात्रमात्रावच्छिन्नत्वेनाग्रहात् साध्यमात्रवत्त्वाद्यलक्षण
समन्वयेन कथमव्याप्तिरिति शङ्कां प्राहुः। समाधत्ते प्रमेयदण्डेति. यत्र दण्ड
वान्नास्तीति प्रतीतिस्तत्रैव प्रमेयदण्डवान्नास्तीति प्रतीतिरपि. केवलस्यावच्छेदक
त्वासम्भव एव विशेषस्यावच्छेदकत्वं कल्प्यते. यथा हि भूतत्वविशेषमूर्तत्वं नास्ती
ति प्रतीतिः पृथिव्यादिचतुष्टयातिरिक्ते मनस्यपि भवति मूर्तत्वं नास्तीति प्रतीतिर्न तत्र
न भवतीति विषयन्यूनाधिकतया मूर्तत्वं नास्तीति प्रतीतिविषयाभावप्रतियोगिता
वच्छेदकता ~~[illegible]~~: केवलमूर्तत्वे, भूतत्वविशेषमूर्तत्वं नास्तीति प्रतीतिविषयाभावप्रति
योगितावच्छेदकता भूतत्वविशिष्टमूर्तत्वे स्वीक्रियते. न चात्र तथा. प्रमेयदण्डवान्ना
स्तीति प्रतीतिसिद्धाभावप्रतियोगितावच्छेदकता ~~[illegible]~~ दण्डमात्रे स्वीकार्याऽऽपत्तेरभावेन
गुरुभूते
प्रमेयत्वविशिष्टदण्डे गुरुभूते न. किन्तु लघौ शुद्धदण्डमात्र एवाङ्गीकरणं ~~[illegible]~~. ~~[illegible]~~
प्रमेयत्वं तु दण्डांशे उपलक्षणतयैव भासते. एवञ्चैव तद्दण्डवान्नास्तीति प्रतीतावपि
तन्निष्ठत्वाक्षिप्तदण्डव्यक्तावेव प्रतियोगितावच्छेदकता स्यात्. यत्र तत्राविशेष
दण्डस्यावच्छेदकत्वं स्यात्तदा तुल्यन्यायेन प्रमेयदण्डवान्नास्तीत्यादौ प्रमेयत्व
विशिष्टदण्डस्यैवावच्छेदकत्वं स्यात्. ननु तद्दण्डवान्नास्तीत्यत्रापि दण्डमात्रस्या
दण्डो नास्ति तद्दण्डो नास्तीति प्रतीत्योः समानविषयतया
वच्छेदकत्वे दण्डमात्रे देशे तद्दण्डवान्नास्तीति प्रतीतिः कथमिति चेन्न. तद्दण्डो नास्ति
तद्व्यक्तित्वस्यापि नावच्छेदकत्वं
इत्यत्र तत्रापि नावच्छेदकता दण्डत्वस्यापि नावच्छेदकं किन्तु तद्दण्डव्यक्तेरेव. सा च
तद्व्यक्तिपर्यवसायिनी तन्निरूपिताक्षिप्तदण्डव्यक्तिः तद्व्यक्तेस्तु स्वरूपत एव भानं
तथात्वे तद्व्यक्तित्वस्यापि तद्व्यक्तित्वेन भानापत्तौ तत्त्वेनानवस्थापत्तेः
न तु तन्मते दण्डत्वेन तद्व्यक्तित्वेन वा. जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य

किन्त्वेकधर्मप्रकारकत्वस्यैवोक्तनियमोक्तेः। तेन तद्दण्डी नास्तीत्यत्र तस्मात् दण्डत्वं योजनक्षमं यैभासते दण्डतदभावयोरेव स्वरूपतो वच्छेदकतया भासते। ~~[illegible]~~ दण्डी नास्तीत्यत्र तु सकलदण्डव्यक्तयो वच्छेदकतया भासन्ते। तत्र तद्दण्डी नास्ति तद्दण्डी नास्तीति प्रतीतावच्छेदकांशे [illegible] विषयभेदेन सकलदण्डव्यक्तीनामभावस्थल एव दण्डी नास्तीति, तद्दण्डव्यक्तिमात्राभावस्थले तद्दण्डी नास्तीति प्रतीतिर्भवति। यथा च तद्दण्डराहित्ये दण्डिमति देशे तद्दण्डी नास्तीति प्रतीतिर्नोपपद्यते। एवं सति तद्दण्डी नास्तीत्यभावस्य हेतुसमानाधिकरणत्वेऽपि तदीयप्रतियोगितावच्छेदकतायाः स्वरूपतो भासमानतया साध्याकारोऽङ्गीकार्यः। साध्यतावच्छेदकतावच्छेदकेन दण्डत्वेन तादृशत्वेन तन्मादिना [illegible] साध्यतावच्छेदकदण्डेषु सर्वत्रैव चालनीयन्यायेन ~~[illegible]~~ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वमेवेत्यव्याप्तिर्न भवत्येव। तेन तद्दण्डाभावादिस्थले दण्डिमतः साध्यत्वेऽपि तत्संयोगेन दण्डः साध्यतावच्छेदकोऽपि [illegible] स्वाश्रयाश्रयत्वसम्बन्धेन दण्डत्वं साध्यतावच्छेदकमिति दीधितिकारैर्निर्दिष्टं तथा च नाव्याप्तिरित्यर्थः। अत्र हेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकतायां सम्बन्धविशेषो [illegible] समवायेन ~~विभाजित~~ सम्बन्धेन रूपत्वविशिष्टस्य रूपस्य ~~[illegible]~~ ~~[illegible]~~ समवायेन साध्यत्वे व्याप्तिर्बोध्यत्वे सङ्गतेः। विभाजितरूपत्वविशिष्टरूपस्य विषयताज्ञानसम्बन्धेन नास्तीति प्रतीतौ सिद्धाभावस्य धर्मिणो हेतुसमानाधिकरणस्य प्रतियोगितावच्छेदकमेव साध्यतावच्छेदकं रूपत्वमित्यव्याप्तिर्निरस्तैव प्रतियोगितावच्छेदकता साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वेन निवेशनीयम् तथा च तद्दण्डी नास्तीत्यभावस्य

हेतुसमानाधिकरणेऽपि तदीयप्रतियोगितावच्छेदकता साध्यताव
च्छेदकताघटक स्वाश्रयाश्रयत्व सम्बन्धावच्छिन्ना नेति नैवमुद्ग्रहः स्वाश्र
याश्रयत्वसम्बन्धेन घण्टत्वनिष्ठो गगनीयाभावो दण्डिमति हेतुसमा
नाधिकरणः अपि तु स्वाश्रयाश्रयत्वसम्बन्धेन घटत्वनिष्ठो यं गगनी
याभाव एव तत्प्रतियोगितानवच्छेदकमेव साध्यतावच्छेदकीभूतं
घण्टत्वमिति अव्याप्तेर्वारणं भवति इति समाध्याशयः।

न चात्र प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छि
न्नत्वप्रवेशे ~~सिद्धेः~~ विवक्षितया वह्नित्वावच्छिन्नाभावमादाय वह्निमान्धूमादि
त्यादावव्याप्तिसम्भवे किमर्थं स्वपर्याप्त्यधिकरणत्वादि ~~[illegible]~~ नाति द्रव्यत्वादिघ
वनीयमिति वाच्यम्. साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यस्यात्र
निवेशनीयतया विवक्षितया स्वरूपसम्बन्धस्य ज्ञानस्य प्रतियोगितया तस्य साध्यता
वच्छेदकसंयोगेनाधिकरणाप्रसिद्धेरेव तत्र तादृशाभावस्य दुर्वचत्वात्. स्वरूपसम्ब
घटीयत्वादेरत्र तु विवक्षितया स्वरूपसम्बन्धेन तज्ज्ञानस्य साध्यतावच्छेदकसम्ब
न्धेनाधिकरणाप्रसिद्धिरिति ~~[illegible]~~ द्रव्यत्वावच्छिन्नस्यौचित्यात्। नतु सम्बन्धेन
वच्छिन्नःप्रतियोगिमानं विवक्षितया स्वरूपसम्बन्धेन तु नसम्भवः इति निरुक्तावच्छेदक
सम्बन्धे स्वरूपत्वेनावच्छेदकत्वं तु न वाच्यं, गौरवेणैकं ज्ञानीयं तु लाघवसामान्येन विवक्षित
यापि जातेः स्वरूपताभानाङ्गीकारात्।

दण्डिमान्दण्डसंयोगादित्यत्राव्याप्तिसमाधेः स्वसामानाधिकरण्यार्थीयाभावानां दण्डा
दावित्यत्रादिपदं भवतादिपरं दण्डिमतः साध्यत्वे दोषप्रसक्तुं निरूपयति.
यदि चेति—/

अत्र मन्त्रार्थः यत्र दण्डवान्नास्तीति प्रतीतिस्तत्रैव प्रमेयदण्डवान्नास्तीत्यपि प्रतीतिः इत्यनयोः समानविषयतया शुद्धदण्डत्वस्य अवच्छेदकतयावगाहमानायां दण्डी नास्तीति प्रतीतौ अवच्छेदकत्वेन गृहीते दण्डमात्रे प्रमेयदण्डवान्नास्तीति प्रतीतावपि अवच्छेदकतावच्छेदकत्वेन भानाभ्युपगमे उपपत्तिर्वा. इति तद्रूपत्वे अवच्छेदकत्वस्य सम्बन्धविशेषरूपावच्छेदकत्वकल्पना. तेन प्रमेयत्वं केवलं तदुपलक्षणतयैव भासते. इत्थञ्च तद्दण्डो नास्तीत्यत्र तु न तथा उपेयते. दण्डिमति शुद्धदण्डत्वस्य अवच्छेदकत्वावगाहिनी दण्डी नास्तीति प्रतीतिर्न भवति तथापि विशेष्य दण्डत्वस्य अवच्छेदकत्वावगाहिनो तद्दण्डी नास्तीति प्रतीतेस्तु भवति. जातिदण्डोपाध्यतिरिक्तपदार्थस्य स्वातन्त्र्येण प्रकारतयैव भानानियमेन तद्दण्डत्वस्य स्वरूपतो भानं न सम्भवति. इति दण्डत्वेनैव (तद्दण्डस्य) दण्डस्य भानं वाच्यं. तथा च. तद्दण्डी नास्तीत्यादि दण्डी नास्तीत्यत्रैव दण्डस्य दण्डत्वेनैव भानं यदि स्वीक्रियते तदा प्रतियोगितावच्छेदकावच्छिन्नानिरूपकताकाधिकरणतासहाभावस्याविषयत्वेन अपि दण्डिमति दण्डी नास्तीति प्रतीतेरिव समानविषयकत्वात् तद्दण्डी नास्तीति प्रतीतेरप्रमाया अनुपपत्तिः स्यात्. तद्दण्डी नास्तीति प्रतीतिविषये अपि तथा च तद्दण्डी नास्तीति प्रतीतिविषयस्य दण्डत्वेन दण्डस्य भानस्य प्रसङ्गः. तेन तन्नानाविशिष्टदण्डत्वावच्छेदकः अवच्छेदकतावच्छेदक... मति देशे दण्डी नास्तीति प्रतीतेरापत्तिः स्यात्. तेन दण्डी नास्तीति प्रतीतिः केवलदण्डत्वावच्छिन्नदण्डनिष्ठावच्छेदकताकप्रतियोगिताकाभावविषयः, तद्दण्डो नास्तीति प्रतीतेस्तु तत्तद्दण्डत्वधर्मावच्छिन्नदण्डनिष्ठावच्छेदकताकप्रतियोगिताकाभावो विषय इति द्वयोः प्रतीत्योर्भिन्नविषयकत्वं वाच्यं. तथा च अपि दण्डिमति तद्दण्डी नास्तीति प्रतीतेरापत्तिरिष्टापत्तिः यतो दण्डी नास्तीति प्रतीतेरप्रमात्वमेव. एवञ्च प्रमेयदण्डवान्नास्तीति दण्डवान्नास्तीति प्रतीत्योः समानविष

यद्यपि प्रतीतिलाघवाभावेन प्रमेयदण्डवान्नास्तीति प्रतीतौ प्रमेयत्वगुरुत्वकल्पनी
यत्वे लघुधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावो यथानिवार्यः तथापि
न तद्दण्डो नास्तीति दण्डो नास्तीति प्रतीत्योः समानविषयतेति तद्दण्डो नास्तीत्यत्र तत्ता
दण्डत्वोभय
विशिष्टदण्डत्वरूपगुरुधर्मस्यैवावच्छेदकतया प्रतियोगितावच्छेदकतायां साध्यतावच्छे
दकतावच्छेदकतादि[illegible]त्वाभावेन तादृशदण्डत्वादेः [illegible]
र्थं कुण्डलमानदण्डसंयोगादिमत्त्वं दण्डत्वस्य पर्याप्त्यावच्छेदकत्वं कल्प्यते.
इति भावः. अतएवाकाशाभावस्य [illegible] प्रतियोगितानवच्छेदकस्यापि [illegible]
आदिपदग्राह्याणाम्. स्वत्वानां रूपत्वन्यूनवृत्तिजातिमत्त्वानुपपादिति. रूपत्वन्यू
नवृत्तिजातिमत्त्वं प्रत्यक्षमूलाः शुक्लत्वादिपञ्चकं शुक्लादिरूपाविशिष्टत्वात्
पर्याप्तत्वं देशः: न्यूनवृत्तित्वं च भेदघटितं. तच्च रूपत्वसमानाधिकरणभेदे सति रूप
त्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वं रूपत्वन्यूनवृत्तित्वं रूपत्वस्यै
विल्वात्. तथा च नीलादिरूपसमानाधिकरणो यो शुक्लाद्यभावप्रतियोगितावच्छेद
नीलत्वपीतत्वादेः नान्यभावीयप्रतियोगितायां नीलत्वादेरेवावच्छेदकताया नियतावच्छिन्नत्वात् साध्यता
[illegible]
कतैव रूपत्वन्यूनवृत्तिजातीनां शुक्लत्वादि साध्यतावच्छेदकानां उक्तव्याप्ति[illegible]
यत्र रूपत्वन्यूनवृत्तिजातिमत्त्वरूपत्वसम्बन्धेन यत्स्वाश्रयरूपत्वस्यैव साध्यतावच्छेद
कत्वं कल्पनीयं तादृशसम्बन्धेन रूपत्वावच्छिन्नो न हेतुसमानाधिकरणप्रतियोगितावा
च्छेदकः। तथा चेति. तद्धर्मावच्छिन्नाभेद्यतागुणेति प्रति तद्धर्मे व्यापकत्वात्
स्य हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदक तद्धर्मावच्छिन्नसमानाधिकरण
साहेतुमत्त्वस्य [illegible] कत्वस्य [illegible] तेन धूमत्वावच्छिन्नावच्छे
दताकज्ञानीतिं प्रति वह्निमन्निष्ठाभावप्रतियोगितानवच्छेदकधूमत्वावच्छिन्नसामाना
धिकरण्य [illegible] वह्निमत्त्वस्य [illegible] कत्वं तत्रापि [illegible] धूमावच्छेदक

मितिप्रमात्वं प्रमापदार्थशङ्कितमात्रमिति वैप्रमात्वात्. अन्यथा धूमादिमान्धूमाभावप्रति योगितानवच्छेदकद्रव्यत्वावच्छिन्नाभिमानताभिकल्पनादिमाधवाऽङ्गातिप्रसङ्गस्य प्रमात्वेऽपि ततो धूमाविशेष्यकाद्यमितेः प्रमात्वेन. ईदृशाद्यमितौ तादृशपरामर्शस्याकारणत्वात् प्रकारणीभूतपरामर्शस्याप्रमात्वात्. प्रकृते दण्डावच्छिन्नविशेष्यताकाद्यमितिं प्रति दण्डसंयोगसमानाधिकरणाभावप्रतियोगितानवच्छेदकदण्डावच्छिन्नत्वं समानाधिकरणहेतुमान्वक्ष्य इत्य[illegible]ज्ञानस्य कारणत्वेऽप्युक्तस्य अथ दण्डसंयोगवद्वृत्त्यभावप्रतियोगितावच्छेदकत्वादप्रमात्वेन तादृशाद्यमितेरप्रमात्वं स्यात्. दण्डसंयोगाद्यवृत्त्यभावप्रतियोगितानवच्छेदकदण्डत्वावच्छिन्नसमानाधिकरणहेतुमानयमिति ज्ञानस्य प्रमात्वेऽपि तस्य न दण्डावच्छिन्नविशेष्यताकाद्यमितिं प्रति कारणत्वमपि तु दण्डत्वावच्छिन्नविशेष्यताकाद्यमितिं प्रत्येव तेन दण्डत्वेनावच्छेदकत्वाभावादाद्यमितेस्तादृशप्रमापरामर्शजन्यत्वं दण्डत्वप्रकारताकत्व दण्डत्ववद्व्याप्तिरेवाद्यमितिर्न तु दण्डमानित्याकारिका ~~[illegible]~~ दण्डप्रकारिका भवतीत्यर्थः । वस्तुतस्तु । दण्डमान्दण्डसंयोगादित्यनुमानादिस्थले आशङ्क्य पक्षस्य दण्डत्वं साध्यतावच्छेदकं विधेयताप्रकारतानवच्छेदकं ज्ञानं कारणमित्युक्तं. यदि दण्डमानित्याकारकानुमितिः किन्तु दण्डत्ववद्व्याप्तिमेव. तादृशपूर्वपक्षग्रन्थानुरोधशङ्कोदेति. ~~[illegible]~~ दण्डमानित्यनुमितेरनुमानपक्षताश्च तेन दण्डस्यैव व्यापकतावच्छेदकत्वं सम्पादनीयं तच्च स्ववानिति स्वसाध्यत्वरूपपरम्परासम्बन्धेन वर्तते. ईदृशपरम्परया दण्डस्य विशेष्यतावच्छेदकत्वे ईदृशसम्बन्धेन दण्डवानयमिति तद्दण्डवानयमित्याकारकोऽर्थसमवायो न हेतुसमानाधिकरणवृत्ति दण्डव्यक्तीनां व्यापकतावच्छेदकतायामितिविशेष्यतावच्छेदकतापि नैव दाति दण्डमानित्यनुमितेरनापत्तिरिति. एतदभिप्रायेणैव आदिपदं [illegible]

यत्नेति। दण्डत्वावच्छिन्नविधेयताकानुमितिं प्रति पक्षतासंसर्गकदण्डत्वधर्मिकनिरूपकतावच्छेदकत्वेनेति वाच्यं. दण्डत्वस्य व्यापकतावच्छेदकत्वं दण्डस्य विधेयतावच्छेदकत्वं तयोरैक्यनियमो नात्र कल्प्यते. दण्डत्वधर्मिकव्यापकतावच्छेदकत्वज्ञानात् दण्डावच्छिन्नविधेयताकदाण्डिमानित्यनुमितेरपि भवति इति तदाशयः। तत्तु कुत्रेति. एवमुक्तौ दण्डावच्छिन्नविधेयताकानुमितिं प्रतीव पक्षतादण्डत्वावच्छिन्नविधेयताकानुमितिं प्रत्यपि पक्षतादण्डत्वधर्मिकनिरूपकतावच्छेदकज्ञानस्य कारणतया एतादृशव्याप्तिज्ञानेन कुतो न: कारणसत्त्वेन नियमेन सर्वत्र दाण्डिमान् दण्डत्ववानिति द्विविधानुमित्योरापत्तिः स्यादित्यत आह तेनाशयीत्यर्थः।

अयोगोलेति। अयोगोलकाभावघटितायाः अग्न्या व्याप्तेरिव अयोगोलकाभावघटितायाः व्याप्तेरपि कारणत्वस्य वक्तुमशक्यतया ~~[illegible]~~ स्वरूपानुसारेण यथायथमयोगोलकप्रतिरोधेः कारणलौकिकः दाण्डिमान् दण्डसंयोगादित्यत्र अयोगोलकाभावघटितव्याप्तेर्हेतुरूपेण पक्षभावान्न्योन्याभावघटितैक- दाण्डिमद्भेदस्य हेतुसमानाधिकरणात्यन्ताभावेन हेतुसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकसाध्यसामानाधिकरण्यस्याज्ञाततया तत एव दाण्डिमानित्यनुमिति संभवतीत्यर्थः। अत्र च अयोगोलकाभावघटितव्याप्तेर्व्यभिचारग्रहदशायामन्योन्याभावघटितव्याप्तिज्ञानादनुमितेरापादनौ सुलभः।

न त्वनुगतेति। दाण्डिमानित्यनुमितौ साध्यतावच्छेदकसम्बन्धो न संयोगः किन्तु स्ववत्त्व- प्रकृतसम्बन्धावच्छिन्नमेव। अतो नसम्बन्धेन स्वाधिकरणवत्त्वेनापि दण्डसंयोगिन् हेतुसमानाधिकरणमिति नाव्याप्तिः। न चैवं संयोगेन दाण्डिसाध्यकतया आयमानस्यानुमितस्यापत्तिः स्यादिति निवाच्यम्। दोषेति ज्ञानापि दण्डत्वं पक्षतावच्छेदकं वदता दण्डस्य साध्यतावच्छेदकत्वेन संयोगस्य साध्यतावच्छेदकसंसर्गतया आयमानानुमितो प्रयोजकः इत्युक्तानुमानपरतावाच्यता। दृष्टान्तानुमानमपि पक्षे साध्यता- वच्छेदकसंसर्गतानुमानप्रयोगो युक्तः इत्यर्थः। अनुकल्पे साध्यतावच्छेदकद्वयम्

अभावः प्रतियो-
गितानधिकरण
साध्यकाभावस्या-
ज्ञाततया व्याप्ति-
ज्ञाने साध्यता-
वच्छेदकसम्बन्धावच्छि-
न्नप्रतियोगिकत्वेन
सम्बन्धेन प्रति
योगिसामानाधिकरण्ये
[illegible]
[illegible]

[illegible]व्यभिचारवारणायादौ। यद्रूपावच्छिन्नस्येत्यस्य फलमाहेति। इदं च इत्यत्र। द्रव्यं गुणकर्मान्यत्वविशिष्टसत्तादेरजातित्वान्न जातिपदनिर्देशेन तत्र दोषाभावादनावश्यकत्वात् प्रयोग[illegible] [illegible]। इदमिति पक्षनिर्देशः एतन्मात्रनिर्देशात् [illegible]। इदंपदानुपादाने द्रव्यं पक्षः गुणकर्मान्यत्वविशिष्टसत्तावत्त्वं हेतुरिति भ्रमः स्यात्। इति केचित् [illegible]। इदंपदोपादानेऽपि इदं द्रव्यं पक्ष इति भ्रमसम्भवादिति यतः। अत्र हेतुतावच्छेदकतावच्छिन्नत्वस्य यद्रूपावच्छिन्नस्येत्यस्यानुगमः। विशिष्टसत्तात्वेन हेतुत्वे तु विशिष्टसत्तायाः शुद्धसत्तानतिरेकात् हेतुता शुद्धसत्ताया गुणे कर्मणि च हेतुसत्त्वाद्व्यभिचारः स्यात्। द्रव्यत्वाभाववत्[illegible] [illegible]योगितावच्छेदकत्वं द्रव्यत्वे साध्यतावच्छेदकमिति बोध्यम्। [illegible] यद्रूपविशिष्टस्यानुगमं तेन च हेतुतावच्छेदकावच्छिन्ननिरूपकतानिरूपितावच्छेदकत्व[illegible] [illegible] प्रतियोगितावच्छेदकत्वं साध्यतावच्छेदकावच्छिन्न[illegible] [illegible]। [illegible] विशिष्टसत्तात्वेऽपि द्रव्यं विशिष्टसत्तावत्त्वादिति प्रतीत्युपपत्तेर्हेतुतावच्छेदकीभूतविशिष्टसत्तात्वावच्छिन्न[illegible] [illegible]निरूपिताधिकरणतानिरूपकत्वात् द्रव्यत्वे न गुणादौ तत्र द्रव्यत्वाभाव[illegible] द्रव्यत्वस्य प्रतियोगितावच्छेदकत्वान्नातिव्याप्तिरित्यर्थः। यद्रूपावच्छिन्ने [illegible]हेतुनिष्ठाधेयतावच्छिन्नत्वानिष्ठाधेयतायां विशिष्टसत्तानिष्ठाधेयताया [illegible] विशिष्टसत्तानिष्ठाधेयतानिरूपिताधिकरणतायां गुणादिसत्त्वादव्याप्तिः। [illegible] विशिष्टनिष्ठाधेयताया [illegible] विशिष्टधर्मावच्छिन्ननिरूपिताधिकरणतायां [illegible] द्रव्यनिष्ठाधिकरणतायाः [illegible] तस्या नाव्याप्तिरिति भावः।

हेतुतावच्छेदकताश्रयभिन्नावच्छिन्नहेतुतावच्छेदकावच्छिन्न-
निरूपकतासामानाधिकरण्यतावच्छेदकत्वं

~~[illegible]~~ हेतुतावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशे तु पर्वतीयधूम-त्वाद् चत्वरीयधूमत्वान् महानसीयधूमत्वादिना प्रतीतीनामयथार्थापत्त्या पर्वतीयधूमत्वावच्छिन्नाधिकरणता चत्वरीयधूमत्वावच्छिन्नाधिकरणता महानसीयधूमत्वावच्छिन्नाधिकरणतादीनां विभिन्नधर्मावच्छिन्नानिरूपकतानिरूपिताधिकरणतानां स्वीकार आवश्यक एव. धूमवानिति प्रतीतिस्तादृशाविशेषाधिकरणतानुगमकमवगाहते सामान्याकारेण धूमत्वावच्छिन्ना~~[illegible]~~धिकरणतां चापि तदवगाहते इति. इति धूमत्वेतरधर्मानवच्छिन्नधूमत्वावच्छिन्ननिरूपकतासामानाधिकरण्यस्य अप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिः असम्भवश्च. तद्रूपवांस्तद्रसादित्यादौ ~~[illegible]~~ एकव्यक्तिकहेतुकस्थले तद्रसत्वावच्छिन्नाधिकरणतायाः प्रसिद्धतया व्याप्तिसम्भवादिति चेत्. समाधत्ते तथापीति. हेतुतावच्छेदकस्थ स्वाश्रयाधिकरणीभूतयन्निष्ठाधिकरणतानिरूपितनिरूपकतावच्छेदकत्वस्य सामान्यतोधिकरणतानिरूपितनिरूपकतावच्छेदकत्वस्य चान्योन्याभावात् तादृशहेतुतावच्छेदकाश्रयाधिकरणमेव हेतुतावच्छेदकावच्छिन्नाधिकरणमुच्यते. इदं हेतुतावच्छेदकमस्ति. वह्निमान् धूमादित्यत्र हेतुतावच्छेदकीभूते धूमत्वे धूमत्वाश्रयाधिकरणीभूतपर्वतनिष्ठाधिकरणतानिरूपकतावच्छेदकत्वं पर्वतीयधूमत्वे प्रसिद्धं न तु धूमत्वे तदवच्छेदकत्वस्य सत्त्वेपि सामान्यतोधिकरणतानिरूपकतावच्छेदकत्वस्यान्योन्याभावस्य सत्त्वात्तादृशं धूमत्वाश्रयाधिकरणं पर्वतादिकं हेत्वधिकरणं भवतीति नाप्रसिद्धिः; धूमवान् वह्नेरित्यत्र हेतुतावच्छेदके वह्नित्वे स्वाश्रयाधिकरणीभूतायोगोलकनिष्ठाधिकरणतानिरूपकतावच्छेदकत्वसत्त्वेपि सामान्यतोधिकरणतानिरूपकता

वच्छेदकत्वस्याभावेनोभयाभावो नादृशं वह्नित्वाश्रयाधिकरणमयोगो लकगोलकं हेत्वधिकरणमिति तत्प्रसिद्धिरिति नाव्याप्तिरित्याहुः. तद्रूपवान् द्रव्यत्वादित्यत्र हेतुतावच्छेदके तद्रव्यत्वे ~~स्वाश्रयाधिकरण~~स्य सामान्यतोऽधिकरणतानिरूपकतावच्छेदकत्वसत्त्वेऽपि स्वाश्रयाधिकरणीभूततद्रूपनिष्ठाधिकरणतानिरूपकतानवच्छेदकत्वस्याभावेनोभयाभावो नादृशं हेतुतावच्छेदकस्वाश्रयाधिकरणं तद्गुणादिकं हेत्वधिकरणं भवति. द्रव्यं विशेषसत्त्वादित्यत्र हेतुतावच्छेदके विशेषसत्त्वे स्वाश्रयाधिकरणीभूतयदित्यनेन गुणकर्मोपादाने तन्निष्ठाधिकरणतानिरूपकतानवच्छेदकत्वे सामान्यतोऽधिकरणतानिरूपकतावच्छेदकत्वमित्युभयमेवास्तीति तादृशहेत्वधिकरणत्वेन गुणः कर्म वा नादृतौ. द्रव्योपादाने सामान्यतोऽधिकरणतावच्छेदकत्वसत्त्वेऽपि द्रव्यनिष्ठाधिकरणतानिरूपकतानवच्छेदकत्वाभावेनोभयाभावसत्त्वात्तादृशं विशेषसत्त्वाश्रयाधिकरणं द्रव्यमेव हेत्वधिकरणत्वेन गृह्यते तद्रूपवदभावप्रतियोगितानवच्छेदकत्वात् ~~विशेष~~ द्रव्यत्वस्य नाव्याप्तिः. द्रव्यं सत्त्वादित्यत्र हेतुतावच्छेदके सत्त्वे स्वाश्रयाधिकरणीभूतयदित्यनेन द्रव्यस्य गुणकर्मणोर्वोपादाने सामान्यतोऽधिकरणतानिरूपकतावच्छेदकत्वसत्त्वेऽपि तन्निष्ठाधिकरणतानिरूपकतावच्छेदकत्वाभावेनोभयाभावात् तादृशहेत्वधिकरणत्वेन द्रव्यं गुणः कर्मापि गृह्यते. द्रव्ये द्रव्यत्व नावत्पर भावेऽपि गुणकर्मणोस्तत्सत्त्वेन हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वमेव द्रव्यत्वस्येति नाव्याप्तिः. इति सर्वत्र लक्षणसमन्वयः. + अत्र स्वाश्रयाधिकरणीभूतेति विशेषणादाने वह्निमान्धूमादित्यादौ यत्किञ्चित् क्रमादेकधूमादेस्तन्निष्ठाधिकरणतानिरूपकतानवच्छेदकत्वसत्त्वेऽपि

सामान्यतोऽधिकरणतानिरूपकतावच्छेदकत्वाभावेन ह्रदादेरपि हेतुमत्त्वाधिकरणत्वादित्याधिकरणत्वेन ग्राह्यतापत्तावपि संभवप्रतियोगितावच्छेदकताघटितलक्षणाघटनादिति स्यात्. स्वाश्रया~~[illegible]~~धिकरणीभूतपर्वतादौ ह्रदो नापादयितुं शक्यते अपितु पर्वतादेरेवेति नाव्याप्तिः. स्वाश्रयाधिकरणत्वं च हेतुतावच्छेदकसम्बन्धेन. तेन वह्निमान् धूमादित्यत्र कालिकेन धूमत्वाश्रयधूमाधिकरणह्रदादौ न कालिकेनाधिकरणतानवच्छेदकत्वाभावेऽपि न सामानाधिकरण्यधूमलेशलोपे नाव्याप्तिः (पर्वतादौ संयोगेन कालिकेन धूमस्य हेतुत्वे कालिकेन स्वाश्रयाधिकरणघटादिमादाय व्याप्तेरपि तथा कालिकेन हेतुत्वे पर्वतादौ संयोगेन कालिकेन स्वाश्रयाधिकरणपर्वतादिमादाय तत्र व्याप्तेरापाद्य च धूमाधिकरणत्वस्य प्रतीतेरिति. तथाच स्वावच्छेदकतावच्छिन्नप्रतियोगिताकपर्याप्तियोगितावच्छेदकत्वसम्बन्धेन हेतुतावच्छेदकसंसर्गतावच्छेदकतावच्छिन्नप्रतियोगिताकपर्याप्तियोगितावच्छेदकत्वरूपव्याप्तिनिरूपकताधिकरणत्वं स्वाश्रयाधिकरणत्वं पर्यवस्यति)

सामान्यतोऽधिकरणतानिरूपकतावच्छेदकत्वे निरूपकत्वं हेतुतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यं तथाच विशेषितासम्बन्धावच्छिन्ननिरूपकतावच्छेदकत्वस्य धूमत्वे सामान्यतोऽधिकरणतावच्छेदकत्वघटितत्वाद्वह्निमान् धूमादित्यादावव्याप्तिः स्यात्. (कालिकाधिकरणतानिरूपकतानवच्छेदकत्वघटकावच्छेदकत्वं हेतुतावच्छेदकताघटकसम्बन्धावच्छिन्नं ग्राह्यं अन्यथा आत्मत्वेन साध्यके आत्मा ज्ञानवत्त्वात् इत्यत्र हेतौ अव्याप्तिः आत्मात्मनीति विशेषणाभावे स्वाश्रयाधिकरणतिकाविशेषितपर्याप्तिमात्मत्वस्य समवायेनाधिकरणतानिरूपकतावच्छेदकत्वाभावेन तथात्वस्यासत्त्वात्.) सामान्यतोऽधिकरणतावच्छेदकतया हेतुतावच्छेदकतावच्छेदकसम्बन्धावच्छिन्नत्वं ग्राह्यं नन्वेवं धूमावयवत्वेन धूमादित्यत्र स्वाश्रयाधिकरणधूमावयवनिरूपिताधिकरणतानवच्छेदकत्वं सामान्यतो विशेषितासम्बन्धावच्छिन्नावच्छेदकतानिरूपकताधिकरणतावच्छेदकत्वस्य संयोगेन पर्वतादिमात्राधिकारावच्छेदक [illegible] इति स्यात्. अतोऽत्र धूमत्वादेरधिकरणतानवच्छेदकत्वरूपे हेतुतावच्छेदकसमवायत्वात् [illegible]

घ्यांतिपेक्षं. साधुहेतौ व्याप्तेर्हेत्वधिकरणत्वे सामानाधिकरण्याविशेष्यत्वे अधिकरणत्वे हेत्वधिकरणत्वस्याभावे व्याप्त्यधिकरणत्वविशेषः

सामान्यतोऽधिकरणतानिरूपकतावच्छेदकत्वाभावेन ह्रदादेरपि हेतुत्वाभिमते
कालादिकादेरधिकरणत्वेन ग्राह्यतया तद्वृत्त्यभावप्रतियोगितावच्छेदकता
दाहित्वस्य धूमादेः स्यात्. स्वाश्रया~~धि~~धिकरणीभूतकालादौ ह्रदो नोपादाय
शाब्दते आपेक्षिकपर्वतादेरेवेति नाव्याप्तिः. स्वाश्रयाधिकरणत्वं च हेतुतावच्छे-
दकसम्बन्धेन. तेन वह्निमान् धूमादित्यत्र कालिकेन धूमत्वाश्रयधूमाधिकरण
ह्रदादौ निरूपिताधिकरणतावच्छेदकत्वप्रतियोगिताभावस्य धूमत्वे सत्त्वेऽपि
नाव्याप्तिः (पर्वतीयसंयोगी कालिकेन धूमस्य हेतुत्वे कालिकेन स्वाश्रयाधिकरण
व्याप्यपरिणाय
पर्वतादिमादाय, कालिकेन हेतुत्वे पर्वतीयसंयोगिकालिकेन स्वाश्रयाधिकरण
पर्वतादिमादायातिव्याप्तेर्वारणाय च धूमाधिकरणत्वघटकं प्रतीकान्तरेव. तथा च
स्वावच्छेदकतासम्बन्धावच्छिन्नप्रतियोगिताकपर्याप्तियोगितावच्छेदकत्वसम्बन्धेन
हेतुतावच्छेदकसंसर्गतावच्छेदकतासम्बन्धावच्छिन्नप्रतियोगिताकपर्याप्तियोगिता-
वच्छेदकत्वस्वरूपसम्बन्धेन निरूपकताश्रयाधिकरणत्वं स्वाश्रयाधिकरणत्वं पर्यवस्यति)
सामान्यतोऽधिकरणतानिरूपकतावच्छेदकत्वे निरूपकत्वं हेतुतावच्छेदकसम्बन्धावच्छिन्नं
ग्राह्यं तथा च विशेषितासम्बन्धावच्छिन्ननिरूपकतावच्छेदकत्वस्य धूमत्वेऽसत्त्वान्नाधिक-
वच्छेदकत्वाप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिः स्यात्. (सालोकत्वाधिकरणतानिरू-
पकतानवच्छेदकत्वस्य चावच्छेदकत्वं हेतुतावच्छेदकतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यं
अन्यथा आत्मभेदसाध्यके आत्मा ज्ञानत्वादित्यत्र हेतौ अव्याप्तिः आत्मावृत्ति
ज्ञानत्वजाते स्वाश्रयाधिकरणतायां विशेषितस्य सम्बन्धावच्छिन्नत्वस्य समवायेनाधि-
करणतानिरूपकतानवच्छेदकत्वाभावेनोपयाभावासत्त्वात्.) सामान्यतोऽधिक-
रणतानवच्छेदकत्वं हेतुतावच्छेदकतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यं तथा च धूमावयववत्त्वात्
धूमादित्यत्र स्वाश्रयाधिकरणधूमावयवत्वानिरूपिताधिकरणतावच्छेदकत्वं सामान्यतो विशेषिता
सम्बन्धावच्छिन्नावच्छेदकतानिरूपकताधिकरणतावच्छेदकत्वस्य धूमत्वेऽसत्त्वान्नाधिकावच्छेद-
केऽप्रसिद्धा अव्याप्तिरिति भावः. धूमत्वादेरधिकरणतानवच्छेदकत्वस्य हेतुतावच्छेदकमाश्रयत्वान्मात्र

ध्वंसानिवेशं. साध्य
भेदान्यादिहेतौ
वाच्यत्वेन द्रव्य
त्वाद्यधिकरण
ज्ञानत्वाद्यव्याप्ति
आत्माधिकरण
त्वस्य प्रतियोगि
निरूपकत्वेन
दिव्यवृत्तिः

४१०८

श्री ५ को सरकार
सार्वजनिक संस्कृत पुस्तकालय

जागदीशी
व्यधिकरणधर्मावच्छिन्नाभावः

प.ग. ३०

परजन्यबोधविषयत्वप्रकारतानिरूपित इश्वरेच्छाविषयत्वं जन्य

जा.वृ.
१

ओं गणेशाय नमः ॥ नन्वीश्वरेच्छारूपस्य वाच्यत्वस्य गुणत्वादिसमवायित्वात् समवायित्वलक्षणघटितकरणधर्मे इत्यत आह । वाच्यत्वमिति । अस्माच्छब्दादयमर्थो बोद्धव्य इ
तीश्वरेच्छाविषयत्वं पदार्थान्तरं वा स्वत्वं ननु तादृशेच्छामात्रमतिप्रसक्तत्वात् । नचैतत्कस्यापि समवायीति भावः । समवायितयेति फलस्य समवायिकारणत्वेनेत्यर्थ इत्यप्या
हुः । नन्विदं वाच्यं ज्ञेयत्वादित्यादौ समवायितया वाच्यत्वाभावरूपस्य साध्याभावस्य प्रसिद्धावपि प्रमेयत्वाच्यत्वादित्यादिकेवलान्वयिनि तत्प्रसिद्धेरनुद्धरणम् । फलस्यान्य
तमत आह । प्रमेयेति । भावत्वेनेति । भावत्वेनाभावानामभावः सर्वत्र सुलभ इत्यन्वयः । ननु भावत्वेनाभावो नास्तीति प्रतीतिरभावस्यैवाभावत्वेन भावो नास्तीति प्रतीतिर्भा
वस्यैव प्रतियोगित्वमवगाहते । नवैतावता प्रमेयमात्रप्रतियोगिकाभावसिद्धिरत आह वह्नित्वेनेति । वह्नित्वेन निखिलानां सर्वेषामभावः सुलभ इति योजना । ननु जले वह्नित्वेन प्रमेयं नास्ती
तिप्रतीतिर्वह्निमात्रप्रतियोगिकाभावमवगाहते । ननु प्रमेयसामान्यप्रतियोगिकं वह्निमति तादृशप्रतीत्यनुपपत्त्या वह्निप्रतियोगिकाभावावगाहित्वस्यावश्यकत्वादत आह हन्ती
ति । तथा च गगनत्वेन प्रमेयं नास्तीति प्रतीतेरेव प्रमेयसामान्यप्रतियोगिकाभावसिद्धिः । नहि तत्रापि गगनमात्रप्रतियोगिकत्वं भासत इति वक्तुं शक्यते विनिगमनाभावेन प्र
मेयमात्रप्रतियोगिकत्वावगाहने बाधकाभावात् । कालिकसंबंधेन गगनत्वादिविशिष्टस्य प्रमेयस्य सर्वत्राभावः संभवतीत्यत उक्तमवृत्तिमात्रवृत्तीति । तथा च यादृशसं
बंधेन गगनत्वादेर्वृत्तिमद्वृत्तित्वं तादृशसंबंधावच्छिन्नावच्छेदकताक प्रतियोगिताको गगनत्वादिना प्रमेयसामान्याभावो वाच्य इति भावः । ननु कालिकसंबन्धेन प्रमे
यसाध्यके तेन संबन्धेन साध्याभावस्यैव प्रसिद्धिः कार्या सा च कालिकसंबन्धेन गगनत्वेन प्रमेयं नास्तीति प्रतीत्या न संभवति तत्संबन्धेन गगनादेर्वृत्तिमत्त्वमतेन तादृशप्रतीतेर्गग
नप्रतियोगिकत्वावगाहित्वेनोपपत्तौ प्रमेयान्तरप्रतियोगिकत्वे मानाभावादत आह दिक्ष्विति । तथा च घटत्वपटत्वाभ्यां प्रमेयं नास्तीति प्रतीत्या निखिलप्रमेयप्रतियोगिकत्वा
द्यभावः सुलभ इति भावः । इदमुपलक्षणम् । संयोगादिसंबन्धेन घटत्वादिकमपि प्रमेयत्ववद्वृत्ति इति तत्संबन्धेन घटत्वाद्यवच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावोऽपि
बोध्यः । अप्रसिद्धिदोषस्यापि सत्त्वान्मूले प्रतियोग्यवृत्ति इत्यादिदोषान्तरं किमित्युपात्तमतस्तदवतारार्थमाशंकते नन्विति । पारिभाषिकमेवेत्येवकारेण व्यभिचारे ऽ

ऽ व्यभिचार इति योगार्थो व्यवच्छिद्यते

इ तथा च साध्यतावच्छेदकीभूतो यः शरीरयत् हेतुतावच्छेदकवत्त्ववैशिष्ट्यं च स्वविशिष्टाभाववत्त्वव्यापकत्वसंबन्धेन तद्वैशिष्ट्यं च स्वावच्छिन्नाधिकरणवृत्तित्व स्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगि
ताकप्रतियोगिताकत्वोभयसंबन्धेन व्यापकतावत्स्वविशिष्टस्वावच्छिन्ननिरूपकताकाधिकरणताव्यापकप्रतियोग्यधिकरणतानवच्छिन्नत्वसंबन्धेन बोध्यम् । इ

अव्यभिचरितत्वमिति । अथैवं व्याप्तिमित्यादिग्रन्थाभिप्रेतमिति शेषः । तथा च न चैवं घट इत्यादिमूलस्य केवलान्वयिनो व्यभिचरितत्वेनालक्ष्यताप्रदर्शनपरत्वान्न पूर्वमूलासंगति
रिति ध्येयम् । यदित्यादि । अन्यत्समानाधिकरणेत्यस्यानुक्तौ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकस्यात्मत्वसामान्याभावस्यापि यावदन्तर्गतत्वात्त
स्य च व्यापकताघटकसमवायसंबन्धेन प्रतियोग्यधिकरणेनापि संबन्धेनावृत्तित्वाद्यमात्माज्ञानादित्यादावव्याप्तिस्तत्सद्भावात्तमित्यग्रे स्फुटीभविष्यति । न चात्मत्वाभा
वोपि समानकालीनत्वादिसंबन्धेन प्रतियोग्यधिकरणवृत्तिः । तथाविधसंबन्धानां वृत्त्यनियामकत्वात् क्वचिदपि तेन संबन्धेन वृत्तित्वाप्रतीतेः । इत्थं च हेतुसमानाधिक
रणत्वमपि हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणधेयत्वं ग्राह्यं तेनात्मत्वाभावस्यापि हेत्वधिकरणसंबन्धित्वान्नोक्तदोषतादवस्थ्यम् । न च हेतुसमानाधिकरणे इ
वृत्ति
त्यपहाय साध्यसमानाधिकरणयावन्तस्तादृशाभावाः स्वविशिष्टयद्धर्मावच्छिन्नहेत्वधिकरणतावच्छेदेन प्रतिसमानाधिकरणास्तद्धर्मवत्त्वमित्येव कुतो लक्षणं कृतमि
ति वाच्यम् । द्रव्यमात्मत्वादित्यादौ महाकाले साध्यसमानाधिकरणद्रव्यत्वादिसामान्याभावस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या तत्राव्याप्तिप्रसंगात् । दैशिकविशे
धा. ८ षणतासंबन्धेन सर्वाधिकरणवृत्तित्वोक्तौ च गौरवात् । यत्तु यत्समानाधिकरणयावन्तस्तादृशाभावाः साध्यसमानाधिकरणास्तत्त्वमित्येवास्तु लक्षणं स्वस्वप्रतियोगिस
मानाधिकरणस्य प्रवेशे बीजाभावादिति तन्न युक्तं तथा सति यत्समानाधिकरणयावन्तोऽभावाः साध्यसमानाधिकरणास्तत्त्वमित्यस्यैव सम्यक्त्वे साध्यतावच्छेदकावच्छि
न्नव्यापकतावच्छेदकप्रतियोगिताका इत्यस्य व्यर्थतापत्तेस्तन्मात्रोक्तौ च विनापि व्यधिकरणधर्मावच्छिन्नाभावं लक्षणसंभवे प्रतियोग्यवृत्तित्वोक्त्यादेरवतारकत्वानुपपत्तिः ।
यदपि यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावा दैशिकविशेषणतयोभयवृत्तयस्तत्त्वमित्येव लक्षणमस्तु ।
स्वस्वप्रतियोगिसामानाधिकरण्यपर्यन्तमपि वैगौरवात् । हेतुसमानाधिकरणस्य तत्तत्संयोगत्वावच्छिन्नाभावस्यैव दैशिकविशेषणतयोभयवृत्तित्वाभावाद्धूमवान्वह्ने
रित्यादावतिव्याप्तिविरहादिति तन्न रम्यं हेतुसमानाधिकरणस्य वह्निसंयोगाद्यात्मकाभावस्य दैशिकविशेषणतयोभयवृत्तित्वविरहेण वह्निमान् धूमादित्यादावव्या [illegible]

नच भावाभिन्नस्यैव हेतुसमानाधिकरणाभावस्य प्रवेशान्नैव दोषस्तद्घटभिन्नं घटत्वादिन्यायवृत्तितयाप्राप्तेः तद्घटभिन्नत्वाद्यभावस्य तद्घटत्वादिस्वरूपत्वेन भावत्वात् तद्घटत्वादि
ना तद्घटभिन्नत्वाद्यभावस्यैवोभयवृत्तित्वादिति अत्र च हेतुसमानाधिकरणो यावन्तस्तादृशाभावाः स्वप्रतियोगिताग्रहविरोधिताघटकसंबन्धेनोभयवृत्तपक्षस्त्वमिति कृते
न काप्यनुपपत्तिरित्यस्य तत्पक्षच्छवितेन अत्र च यत्पदं यद्धर्मावच्छिन्नपरं यद्धर्मवत्त्वमित्यस्य हेतुतावच्छेदकीभूतयद्धर्मवत्त्वमित्यर्थः तेन सकलधूमव्यक्त्यननुगततया व
ह्निव्याप्तेर्नलाभः न वा ज्ञानवानात्मत्वादित्यत्र सत्वात्ममनःसंयोगादित्यादौ मनसि हेतुसमानाधिकरणस्यात्मत्वसामान्याभावस्य स्वविशिष्टहेतुतावच्छेदकावच्छिन्नहे
त्वधिकरणाप्रसिद्धिनिबन्धनाव्याप्तिः यत्तु द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ हेतुसमानाधिकरणस्य द्रव्यत्वाद्यभावस्य तथात्वादव्याप्तिरतो यत्पदस्य यद्धर्मावच्छिन्न
परत्वमिति तन्न द्रव्यत्वाद्यभावस्यापि कालिकादिसंबन्धेन स्वविशिष्टयद्धेतुतावच्छेदकावच्छिन्नहेत्वधिकरणजन्यद्रव्यादिनदवच्छेदेन प्रतियोगिसामानाधिकरण्यात्
तदव्याप्तिविरहात् साध्यतेत्यादि साध्यतावच्छेदकावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदिका यदभावप्रतियोगिता तादृशाभाववानित्यर्थः अत्र च विशिष्टसत्तावान् जा
तेरित्यादौ विशिष्टसत्तात्वावच्छिन्नाभावस्यैव सत्तास्वरूपसाध्यतापकतावच्छेदकप्रतियोगिताकतया तस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधि
ति करण्यादव्याप्तिरतः साध्यतावच्छेदकावच्छिन्नेति तथाच द्रव्यत्वाद्यभावस्यैव निरुक्तयावदन्तर्गतस्य तथात्वान्नातिव्याप्तिः साध्यत्वं चात्र साध्यतावच्छेदकसंबन्धे
न निवेश्यं तेन वस्तुमात्रस्यैव विषयतासंबन्धेन ज्ञानवत्ताद्घटत्वादिना वाच्यत्वाभावस्यैव साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वेपि समवाये
न ज्ञानस्य साध्यत्वे द्रव्यत्वादिहेतौ नातिप्रसंगः समवायसंबन्धावच्छिन्नज्ञानवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकस्यात्मत्वाभावस्यैव प्रतियोग[illegible]
[illegible]समानाधिकरणत्वात् अत्र च साध्यवन्निष्ठाभावः प्रतियोगिव्यधिकरणत्वेन विशेषणीयः तेन साध्यवत्मात्र एव समवायित्वावच्छिन्नवाच्यत्वाभावप्रतियोगि
त्वेन घटाद्यभावस्य सत्वेपि न साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकाभावस्याप्रसिद्धिः इत्थं च तत्संबन्धेन स्वावच्छिन्नाधिकरणसाध्यवन्निष्ठाभा

2

वप्रतियोगितावच्छेदकोयोयसम्बन्धस्तत्त्वे सति तत्संबन्धावच्छिन्नाधेयतावच्छेदकत्वस्वरूपतत्संबन्धेन साध्यव्यापकतावच्छेदकत्वं निरुक्तव्यापकताघटकव्यापकतानवच्छेदकत्वापर
भावप्रतियोगितात्वादृशाभावाः प्रवेशनीयाः । न च तत्संबन्धावच्छिन्नाधेयतेत्यादिकं व्यर्थं द्रव्यत्वाद्यभावप्रतियोगितायामपि संयोगसंबन्धेन वह्न्यादिव्यापकतावच्छेद
कत्वापत्त्या यावदन्तर्गतस्य तत्संबन्धेन द्रव्यत्वाद्यभावस्य साध्यव्यापकताघटकीभूत [redacted] संयोगादिसंबन्धेन प्रतियोगिसामानाधिकरण्याप्रसिद्ध्या सद्धेतुमात्रे
व्यसंभव[redacted]वारणार्थत्वादुपादानात् । संयोगसंबन्धावच्छिन्नाधेयत्वस्य द्रव्यत्वादावसत्त्वेन द्रव्यत्वादिनिष्ठप्रतियोगितस्याधेयतानवच्छेदकत्वात् । तत्संबन्धेन स्वाव
च्छिन्नानधिकरणत्वं च तत्संबन्धेन स्वावच्छिन्नाधिकरणसामान्यभेदः । तेन वह्न्यादिनिष्ठप्रतियोगित्वावच्छिन्नाधिकरणगगनोभयभेदस्य घटत्वादिना वह्न्यादिनि
ष्ठप्रतियोगित्वावच्छिन्नाधिकरणभेदस्य च वह्न्यादिसाध्यवति सत्त्वेपि न क्षतिः । अत्राभावा इति स्वरूपकथनम् । वस्तुतः साध्यवन्निष्ठाभावस्य तत्संबन्धावच्छिन्नप्रतियो
गिताया सामानाधिकरण्येनानवच्छेदकत्वमेव तत्संबन्धेन साध्यव्यापकतावच्छेदकत्वं वाच्यम् । तत्र च साध्यवन्निष्ठत्वमभावस्य स्वरूपसंबन्धेन ग्राह्यम् । तेन स्पन्दः काल
त्वादित्यादौ स्पन्दत्वाद्यभावस्यापि कालिकसंबन्धेन साध्यवतिवृत्त्या यावदन्तर्गतत्वात्समवायित्वेन वाच्यत्वाद्यभावस्य च तादृशप्रतियोगिसमानाधिकरणत्वे
पि नातिव्याप्तिः । इत्थं च जातिसामान्याभावादेरपि वह्न्यादिव्यापकतया तत्प्रतियोगिकस्य जात्यादिस्वरूपस्य हेतुसमानाधिकरणाभावस्य जातिसामान्याभावात्म
कप्रतियोगिसमानाधिकरणत्वादसंभवापत्तिरतोऽभावा इत्युक्तं भावभिन्ना इति च तदर्थः । यथा च सामानाधिकरण्येनानवच्छेदकत्वघटितायां व्यापकतायां न
दोषस्तथाग्रे प्रपञ्चयिष्यते । न व्याप्तौ साध्यतावच्छेदकेत्यादि साध्यतावच्छेदकावच्छिन्नाधिकरणनियतवृत्तितान्यत्ववद्वृत्तिप्रतियोगिताकेत्यर्थः । न चैवमात्रह
निसाध्यकसद्धेतावव्याप्तिः । तत्र यावत्त्वस्यानुपादेयत्वात् । रावैक्यस्याकिंचित्करत्वात् । यद्वा साध्यतावच्छेदकावच्छिन्नसमानाधिकरणो यावन्तो धर्मास्तत्त्वैकसमा
नाधिकरणवृत्तिप्रतियोगिताकेत्यर्थः । इति प्राहुः । यत्तु साध्यवदन्याभावप्रतियोगितावच्छेदकप्रतियोगिताकेत्यर्थ इति तन्न । केवलान्वयिसाध्यकसद्धेतौ तादृशप्र

व्या. व्या.
२

तियोगित्वाप्रसिद्ध्याव्याप्तेः। गगनस्वरूपाभावस्य तादृशत्वेऽपि हेतुसमानाधिकरणत्वासंभवादिति। अत्र व्यापकतावच्छेदकप्रतियोगिताकत्वस्य व्यापकतायां अवच्छे-
देऽन्वय इति बहुव्रीहिकप्रत्ययः। तेन प्रतियोगितायाः समभवच्छेदकापदस्य समासे कोपधत्वेऽपि पुंवद्भावः। तद्धितेऽनुक्तोपधस्यैव पुंवद्भावनिषेधादित्यभियुक्ताः। सर्वत्रेति। सकलता-
वच्छेदेनेत्यर्थः। तथा च यावत्त्वानुगतावतिव्याप्तिरेव स्यान्नाव्याप्तिरिति भावः। सकलव्यभिचारिणीत्यर्थ इत्यन्ये। केचित्तु सर्वत्रेति। सकलहेत्वधिकरणावच्छेदेनेत्यर्थ
इत्याहुः। वाच्यत्वाद्यभावस्येति। घटत्वादिना वाच्यत्वाभावस्य चेत्यर्थः। तथात्वात्प्रतियोगिसमानाधिकरणत्वात्। तथा च धूमवान्वह्नेरित्यादावतिव्याप्तिवारणार्थमेव
यावत्पदोपादानमिति भावः। ननु साध्यतावच्छेदकव्यापकप्रतियोगिताकयावदभावनिवेशे वाच्यत्वाद्यभावमादाय कस्यातिप्रसंगस्यानुदयसंभवात्। साध्यतावच्छे-
दकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावानां यावत्त्वोपादाने गौरवग्रस्तमत आह। अत एवेति। निरुक्ताभावे यावत्त्वोपादानादेवेत्यर्थः। अन्यथा भूतत्वाद्यभाव-
स्य साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वान्मूर्त्तत्वोभयत्वाद्यवच्छिन्नाभावस्य च तादृशप्रतियोगिताकस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमा-
नाधिकरणत्वादतिव्याप्तिः स्यादेवेति भावः। यत्तु साध्यप्रतियोगिकोऽपि किंचिदभावो यद्धर्मावच्छिन्नहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्तद्धर्मवत्त्वमित्ये-
वलक्षणमस्तु कृतं यावत्त्वगर्भनिरुक्त्या धूमवान्वह्नेरित्यादौ घटत्वेन धूमाभावस्यापि तादृशहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वादतिव्याप्तिर्दुरास-
दित्याशंक्यात एवेत्यादिकमवतारयन्ति। नन्वेतादृशशंकायां धूमवान्वह्नेरित्यादिप्रसिद्धस्थल एव वह्निधूमोभयत्वावच्छिन्नाभावमादायातिव्याप्तिसंभवे भूतत्वमू-
र्त्तत्वोभयत्वानित्यापनुधावनस्य संदर्भविरोधापत्तेः। परंपिपादृशाभावस्य प्रतियोगिताव्यापकं साध्यतावच्छेदकं तादृशः कश्चिदभावो यद्धर्मावच्छिन्नाधिकरणावच्छे-
देन प्रतियोगिसमानाधिकरणस्तद्धर्मवत्त्वं व्याप्तिरित्युक्त्यैव वाच्यत्वाद्यभावमादायातिव्याप्तिवारणसंभवाद्यावत्त्वगर्भलक्षणं गौरवग्रस्तमत उक्तमत एवेत्यादि। तदप्य-
संगतं प्रतियोगितामात्रस्यैव प्रत्येकपर्यवसितत्वेन वह्नि धूमोभयत्वादेस्तद्व्यापकतासंभवाद्वह्निधूमोभयवत्त्व-धूमादित्यादावव्याप्तिभयेन तादृशनिरुक्तेः। केचित्तु सम्यगा

३

क्यत्वात्.ननु प्रतियोगिसामानाधिकरण्यमित्यत्र प्रतियोग्यधिकरणत्वं साध्यनिरूपितसाध्यतावच्छेदकसंबन्धेन ग्राह्यमित्यलं यावत्त्वनिवेशेनेत्यत आह.अत एवे
त्यादि इत्यपि वदन्ति.नव्यास्तु ननु साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नसाध्यनिष्ठयादृशंप्रतियोगिताकोयत्किंचिदभावो यदधिकरणावच्छेदेन तादृशप्रतियोगि
ताश्रयसमानाधिकरणत्वमित्यस्यैव सम्यक्त्वे यावत्त्वगर्भलक्षणारंभो गौरवग्रस्तः.प्रमेयवान्वाच्यत्वादित्यादौ विरहद्वयघटत्वपटत्वोभयगगनाद्यवच्छिन्नप्रतियोगिताक
प्रमेयाभावमादाय लक्षणसंभवात्.गगनादेर्वृत्तिमत्त्वलक्षणधर्मत्वाभावात्.सामान्यभावीयान्यप्रतियोगित्वं स्वरूपसंबन्धेन प्रत्याश्रयं विभिन्नमुपेयमतो विरहद्वय
टत्वपटत्वाभ्यां प्रमेयमात्रस्याभावमादायैव धूमवान्वह्नेरित्यादौ नातिप्रसंगः.न चानवच्छिन्नातवैयर्थ्यं वह्निधूमोभयत्वावच्छिन्नाभावमादाय धूमवान्वह्नेरित्यादावति
व्याप्तेर्वारकत्वात्साध्यनिष्ठपदमपि तदर्थमेव.अन्यथा गगनाद्यवच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभावमादाय व्यभिचारिमात्रेऽतिव्याप्त्यापत्तेरित्यत आह.अत एवेति.इत्थं च मत
त्वविशिष्टमूर्तत्वाद्यभावस्य साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नप्रतियोगिताकतया तस्य प्रतियोगिसामानाधिकरण्यं नातिव्याप्तिं संपादयतीत्याशयेन द्वित्वाद्यव
च्छिन्नाभावपर्यन्तस्य प्रतियोगिसामानाधिकरण्यमापेक्ष्य प्रसंगकृतेः परं तु प्रकृतसाध्यव्याप्यतावच्छेदकप्रतियोगिताकोयः कश्चिदभावो यदधिकरणावच्छेदेन प्रतियो
गिसमानाधिकरणत्वमेवाव्यभिचरितत्वं कुतो नोक्तम्.मूर्तत्वकर्तृत्वोभयत्वावच्छिन्नप्रतियोगिताकस्य तादृशोभयात्मकसाध्यव्याप्यतावच्छेदकत्वाभावादेतादृशो
भयाभावमादायातिव्याप्त्यसंभवादिति विभावनीयमिति प्राहुः.मूर्तत्वमात्रभिन्नत्वे सति विशेषगुणवत्त्वं तच्च न व्यापकतायाः प्रतियोगिवैयधिकरण्याघटितत्वे मन
त्वमूर्तत्वोभयस्य व्यापकं तादृशोभयवति घटादावुत्पत्तिक्षणावच्छेदेन विशेषगुणत्वाद्यवच्छिन्नाभावसत्त्वादत उक्तं मनोन्यत्वेति.साध्यस्यैवाभावमादाय नातिव्याप्तिः सुतरां वस्त्व
न्तरस्यैवेति कैमुतिकन्यायेनोक्तम्.मनोन्यत्वे इतीत्यपि वदन्ति.अन्यथात्वादिति.स्वविशिष्टेनाधिकरणावच्छेदेन प्रतियोग्यसमानाधिकरणत्वादित्यर्थः.मनस्येव व्यभिचारा
दिति भावः.ननु यत्समानाधिकरणा यावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वमित्यस्यैव सम्यक्त्वे साध्यतावच्छेदकावच्छिन्नेत्यादि व्यर्थम्.न च साधनसमानाधिकर

साध्यनिष्ठप्रतियोगिताश्रयं साध्यं भवति अतो नातिप्रसंगः.
यादृशप्रतियोगिताश्रयाधिकरणेदृशाभावाप्रतियोगि साध्यं भवति
तादृशत्वम्. ८

भा.व्या.
४

स्व २

त्रागोत्वाद्यभावस्य हेत्वधिकरणावृत्तेर्न प्रतियोगिसमानाधिकरणत्वासंभव इति वाच्यम्. तस्यापि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात्. नचै
वं रीत्या व्यभिचारिण्यतिव्याप्तिरिति वाच्यम्. अभावस्यासमानाधिकरणधर्मावच्छिन्नस्वप्रतियोगितात्वसामानाधिकरण्यं पतद्व्यप्रतियोगितायाः एव व्याप्यवृत्तितानि
रूपकतया धूमाद्यभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठप्रतियोगिताया अतथात्वेन धूमवान्वह्नेरित्यादावतिव्याप्त्ययोगात्. इत आह. साध्येत्यादि. गोत्वादीत्यादिपदेन ग
गनादिसंग्रहः. तथा च तद्दलानुक्तावसंभव एव स्यादिति भावः. नन्वेवं यत्समानाधिकरणा यावन्तः साध्यप्रतियोगिकाभावः साध्यतावच्छेदकसंबन्धेन प्रतियोगिसमाना(
धिकरणास्तत्त्वमित्येवोच्यतां तावतैव गोत्वाद्यभावमादायासंभवस्यानुद्धारादत आह. न त्वेति. तथा चोक्तविवक्षायां द्रव्यत्वाद्येकव्यक्तिसाध्यकसद्धेतौ लक्षणसंभवेपि
वह्निमान्धूमाज्ज्ञानिमान्सत्त्वादित्यादौ साध्यप्रतियोगिकानां तत्तद्धूमाभावानामात्मत्वाद्यभावानां च प्रतियोग्यसमानाधिकरणत्वादव्याप्तिरिति भावः. न च साध्यव्यापकप्रतियो
गिका इत्यस्यैव सम्यक्त्वे व्यापकतावच्छेदकप्रतियोगितादपर्यन्तं व्यर्थमिति वाच्यम्. तत्तत्साध्यव्यक्तीनां गगनादीनां च प्रमेयत्वादिप्रकारेण साध्यव्यापकत्वसत्त्वमादायासंभ
वापत्तेः. न च वृत्तिमत्त्वे सति स्वानधिकरणसाध्यवन्निष्ठाभावप्रतियोगित्वेन साध्यव्यापकत्वं निरुच्य तत्प्रतियोगिकाभाव एव निवेश्यतामिति वाच्यम्. तस्य लक्षणान्तरत्वे( ५
प्रकृतलक्षणस्य दुष्टत्वादिति भावः. यत्समानाधिकरणा इत्यत्र हेत्वधिकरणत्वं विशिनष्टि. येनेत्यादिना. तदधिकरणमिति तत्संबन्धीत्यर्थः. तेन तादात्म्येनाधिकरण
प्रसिद्धावपि तत्संबन्धेन सद्धेतौ नाव्याप्तिः. अन्यथा त्वेपीति. प्रतियोग्यधिकरणवृत्तित्वविरहेपीत्यर्थः. यद्यपि प्रतियोगिसामानाधिकरण्यमवश्यं स्वविशिष्टहेत्वधिकरणाव
च्छेदेनाप्रविवक्षणीयम्. तथा च हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणानुक्तौ कालिकसंबन्धेन धूमस्याधिकरणे महाकाले वर्तमानस्य प्रलयान्यत्वाद्यभावस्यापि यावदन्त
र्गतित्वात् स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्तिः संभवति. तथापि स्वविशिष्टहेत्वधिकरणेत्यादेरुक्तावनुक्तौ चोभयथैवायमात्मा ज्ञानादित्य
त्राव्याप्तिः. वह्निमान्धूमादित्यत्र स्वविशिष्टत्वाद्युक्तावेव तथैवाशयेन प्रसिद्धोदाहरणमित्यनुक्तम्. यत्तु महाकालस्यैव प्रलयान्यत्वाद्यभावविशिष्टहेत्वधिकरणत्वसंभवात्.

ट वृत्तिमत्त्वेसति स्वानधिकरणसाध्यवन्निष्ठाभाव
प्रतियोगियत्त्वं तद्वत्त्वम्. ट

स्वविशिष्टेत्याद्युक्तावपि वह्निमान् धूमादित्यादौ नाव्याप्तिः महाकालस्य हेतुतावच्छेदकसंयोगसंबन्धेन धूमाधिकरणत्वाभावेपि हेतुसंबन्धितानपायात् तादात्म्येन हेतोः संग्रहार्थं हेतुतावच्छेदकसंबन्धेन यो हेतुसंबन्धी तद्वृत्तियावदभावानामेव निवेशितत्वादिसमतम् ननु च संयोगमात्रेण धूमहेतोः पुष्पामंडलादौ वह्नेर्व्यभिचारेण पर्वतादिनिरूपितसंयोगेनैव तस्य हेतुत्वात्तादृशसंयोगेन च धूमस्याधिकरणपर्वतादेः प्रलयत्वादिस्वरूपस्य प्रलयान्यत्वाद्यभावस्य वैशिष्ट्याप्रसिद्धेरेवंसप्रकृत्वात् विभिन्नकालीनयोर्विषयतान्यसंबन्धसामान्येनैवाधाराधेयभावविरहादिति दिक् ननु पृथिवीत्ववान् महाकालत्वात् महाकाल [redacted] कपालान्यतरत्वादित्यादावव्याप्तिः साधनसमानाधिकरणस्य महाकालान्यत्वाद्यभावस्यापि हेत्वधिकरणमहाकालावच्छेदेन कालिकसंबन्धेन प्रतियोगिसमानाधिकरणत्वादत आह एवमिति दलान्तरेपि प्रतियोगिसामानाधिकरण्यदलेपीत्यर्थः एकसंबन्धेन व्यापकत्वमन्यसंबन्धेन प्रतियोगिसामानाधिकरण्यमित्येवं संबन्धभेदे निवेशने प्रोक्ताव्याप्तिरूपो दोषः साध्यव्यापकतावच्छेदकसंबन्धेन सार्द्धं प्रतियोगिसामानाधिकरण्यघटकसंबन्धस्यैक्यविवक्षया निरसनीय इत्यर्थः यत्संबन्धेन स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धर्मत्वं प्रतियोगिताकः साध्यवन्निष्ठाभावीयतत्संबन्धावच्छिन्नप्रतियोगितायाः सामानाधिकरण्यावच्छेदकान्यप्रतियोगिको वा यो भावस्तादृशसंबन्धेन प्रतियोगिनो यदधिकरणं तद्वृत्तित्वं विवक्षितमिति फलितोर्थः पृथिवीत्वाद्यभावप्रतियोगित्वं तु न कालिकसंबन्धेन पृथिवीत्वादिव्यापकतावच्छेदकं नित्यपृथिव्यां व्यभिचारेण किं तु समवायेनैव तेन च संबन्धेन पृथिवीत्वाद्यभावस्य हेत्वधिकरणमहाकालावच्छेदेन प्रतियोगिसामानाधिकरण्याभावान्नोक्ताव्याप्तिरिति भावः यत्तु येन संबन्धेन व्यापकत्वं तेन संबन्धेन प्रतियोगिसामानाधिकरण्योक्तावपि नित्यज्ञानं सविषयकत्वादित्यत्राव्याप्तिः साधनसमानाधिकरणस्य चक्षुर्भिन्नत्वाद्यभावस्यापि साध्यव्यापकताघटकविषयितासंबन्धेन यावद्धेत्वधिकरणे प्रतियोगिसमानाधिकरणत्वात् न च येन येन संबन्धेन व्यापकत्वं तेन तेन संबन्धेन प्रतियोगिसामानाधिकरण्यविवक्षणान्नोक्तदोषः तथा सति यावत्सद्वैयर्थ्यापत्तेः विशेषणतासामान्येनैव साध्यविधेयरूपिना विशेषणतयापि वाच्यत्वादेः साध्यव्यापकताघटकत्वादिना वाच्यत्वाद्यभावस्यैव तादृशसंब

ननुधूमवान्वह्नेरित्यादौधूमाभावस्यलाघवव्यापकताघटककालिकसंबन्धेनप्रतियोगिसमानाधिकरणत्वादितिचेन्न.

येनहेत्वधिकरणावच्छेदेनप्रतियोगिसामानाधिकरण्यविरहात्. धूमवान्वह्नेरित्यादौव्यभिचारिण्यतिव्याप्तिविरहात्. तन्मतंविषयितासंबन्धेनव्यापकतायाएवास्त्वाद्विष
यितासंबन्धेनस्वावच्छिन्नाधिकरणताप्रसिद्ध्यास्वावच्छिन्नानधिकरणसाध्यवन्निष्ठत्वादिव्यापकतायास्तेनसंबन्धेनासंभवात्. नचतेनसंबन्धेनस्वावच्छिन्नसंबन्धित्वमेवव्या
पकतायांनिवेशनीयमित्युक्तातिप्रसंगभयेनैवतस्यानिवेशनीयत्वात्. नचतत्संबन्धावच्छिन्नायाःसाध्यवन्निष्ठाभावप्रतियोगितायाःसामानाधिकरण्येनतानवच्छेदकधर्मव
त्त्वलक्षणंव्यापकत्वंविषयितासंबन्धेनसुलभंसाध्यवतिनित्यज्ञानेवस्तुमात्रस्यैवविषयितासंबन्धेनसत्त्वेपिनित्यज्ञानान्यत्वविशिष्टघटादेर्विषयितासंबन्धेनाभावस्यतत्रस
त्त्वेवाघटाभावादितिवाच्यंविषयितायावृत्त्यनियामकत्वात्तयातत्संबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः. यदपिमनस्त्ववान्अणुत्वादित्यत्रातिव्याप्तिः. परमाणुत्वसमाना
धिकरणस्यमनस्त्वाद्यभावस्यापिसाध्यव्यापकताघटकदिक्कृतविशेषणतयासर्वत्रैवपरमाणौप्रतियोगिसमानाधिकरणत्वादितितदपितुच्छं. नित्यानामव्यावर्त्तकत्वा
ज्जन्यानामेवमूर्त्तानांदिगुपाधितयापरमाणौदिक्कृतविशेषणतयातस्याप्यसत्त्वात्. तेनसंबन्धेनसाध्यव्यापकत्वविरहात्. अन्यथावस्तुमात्रस्यैवकालोपाधित्वसं
भवात्तदपिजन्यमात्रस्यनस्यात्. अतएवप्रलयदशायांदिगेतद्विभागोनास्तीत्यादिसिद्धान्तःसंगच्छते. अन्यथापरमाणूनांसत्त्वात्तदानीमपिदिग्विभागप्रसंगादिति
दिक्. यच्चस्पन्दोमहाकालत्वादित्यादावतिव्याप्तिः. साधनसमानाधिकरणस्यमहाकालान्यत्वाद्यभावस्यापिसाध्यव्यापकताघटककालिकसंबन्धेनमहाकालेप्रति
योगिसमानाधिकरणत्वात्. नचायंस्पन्दइत्याकारकयत्किंचिद्बोधमतेविषयतासंबन्धेनैवस्पन्दत्वव्यापकत्वात्. यावत्तद्गतस्पन्दाभावस्यैवसाध्यव्यापकताघटकवि
षयतासंबन्धेनहेत्वधिकरणेमहाकालेप्रतियोगिसमानाधिकरणत्वाभावान्नातिव्याप्तिः. नहितादृशबोधव्यक्तौकालिकसंबन्धेनापिस्पन्दत्वव्यापकत्वंभाविभिन्नेषुस्पन्देषुव्य
भिचारादितिवाच्यम्. विषयतायाज्ञानसमानकालीनतयातादृशबुद्ध्युत्पत्त्यभावदशायामेवस्पन्दत्ववतिविषयतासंबन्धेनतत्तद्बुद्धिव्यक्त्यभावस्यसत्त्वाद्विषयतासंबन्धेनायंस्पन्द
इत्याकारकजन्यबुद्धेःसाध्यव्यापकत्वासंभवात्. किंचव्यधिकरणधर्मावच्छिन्नाभावस्यासत्त्वेपिव्यधिकरणसंबन्धावच्छिन्नवाच्यत्वाद्यभावमादायैतद्वत्तात्वादिसाध्यकस्थले

लक्षणसमन्वयात्प्रतियोग्यवृत्तित्वेत्यादिमूलस्य तद्दूषकत्वानुपपत्तेः ॥ न च साध्यवत्त्वाभावीयप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकधर्मवत्त्वरूपव्यापकतायां व्य
धिकरणधर्मावच्छिन्नाभावमादायासंभववारकस्य सामानाधिकरण्येनेत्यस्य व्यर्थतायामेव तन्मूलग्रन्थस्य तात्पर्यमिति वाच्यम् । सामान्यधर्मेण विशेषाभावमादाय व्यापक
त्वस्याप्रसिद्धेर्वारणार्थमेव सामानाधिकरण्यदलस्यावश्यकतया मवश्यं संनिवेशनीयत्वादित्याकूतं विभाव्यते तदा संबन्धैक्यमविवक्षयेति ग्रन्थस्य साध्यव्यापकत्वस्य तदवच्छेदकप्र
तियोगित्वस्य प्रतियोगिसामानाधिकरण्यघटकीभूतप्रतियोग्यधिकरणत्वस्य चैकसंबन्धावच्छिन्नत्वविवक्षयेत्यर्थः ॥ तथा च स्वप्रतियोगितावच्छेदकसंबंधावच्छिन्नसा
ध्यव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः स्वप्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिसमानाधिकरणा इत्यर्थलाभात् । यावदन्तर्गतस्य समवायादिसंबन्धेन नि
त्यज्ञानत्वमनस्त्वसत्त्वाद्यभावस्य स्वप्रतियोगितावच्छेदकीभूतसमवायादिसंबन्धेन यावद्वृत्त्यधिकरणे प्रतियोग्यसमानाधिकरणत्वात् । नित्यज्ञानमीश्वरस्य विषयत्वा
मनस्त्ववद्गुणत्वास्पन्दत्वोमकालत्वादित्यादेः कुत्रापि नातिव्याप्तिः ॥ न चैवं ज्ञेयत्वादित्यादावव्याप्तिः ॥ व्यधिकरणधर्मावच्छिन्नवाच्यत्वाद्यभावस्यैव तत्र घटकतया तस्य प्र
तियोगितावच्छेदकसंबन्धसत्त्वे मानाभावादिति वाच्यम् । स्वरूपसंबन्धेन घटत्वादिना वाच्यत्वं नास्तीत्यादिप्रतीत्यनुरोधेन तादृशाभावस्यापि प्रतियोगितावच्छेदकसंबन्धस्वीका
रात् अन्यथा भूतलं संयोगेन पटत्वावच्छिन्नघटवदित्येवं निर्णयसत्त्वेपि भूतले संयोगेन पटत्वेन घटो नास्तीति प्रत्ययप्रसंगात् । न चैवमप्रसिद्धिस्ततः व्यधिकरणधर्मावच्छिन्नो
पि येऽभावाः प्रामाणिकास्तदा सर्वैः संबन्धैस्तत्प्रतियोगिता अवच्छिद्यत इति ग्रन्थकृतैव सामान्याभावे वक्ष्यमाणत्वात् । केचित्तु संबन्धैक्यविवक्षयेत्यस्य साध्यवत्त्वं साध्यव्याप
कत्वं प्रतियोगित्वं प्रतियोगिसामानाधिकरण्यघटकीभूतप्रतियोग्यधिकरणत्वं चैकेन साध्यतावच्छेदकसंबन्धेन विवक्षणीयमित्यर्थः ॥ तथा च साध्यतावच्छेदकसंबन्धाव
च्छिन्नसाध्यव्यापकतावच्छेदकीभूततादृशसंबन्धावच्छिन्नप्रतियोगिताका यावन्तोऽभावाः साध्यतावच्छेदकसंबन्धेन प्रतियोगिसमानाधिकरणा इत्यर्थलाभान्नकुत्रा
प्यतिव्याप्तिः ॥ न च प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वविवक्षणं व्यर्थमिति वाच्यम् । तदनुक्तौ वाच्यत्वादिभेदमादाय केवलान्वय्यादौ लक्षणसंभवे प्रतियोग्यवृत्ति

जा.ख.
६

ऽन्यादिमत्त्वेनानिराकरणतासंगतत्वापत्तेः त्रैवमपि सर्वत्र वाच्यत्वाद्यभावस्येत्यादिग्रन्थविरोधः ते वाच्यत्वादेः संयोगादिसंबन्धेन धूमाद्यव्यापकत्वादिति वाच्यम् । वाच्यत्वाद्यभाव
स्येत्यादिपदसत्त्वात् । यत्र स्वरूपसंबन्धेन साध्यता तत्र वाच्यत्वाद्यभावमादाय संयोगादिसंबन्धेन साध्यतायां च द्रव्याद्यभावमादायातिव्याप्तिवारणायैव तत्संगतेरित्याहुः । तन्मन्दं
मनोन्यत्वाद्यभावस्येत्याद्युक्तग्रन्थविरोधात् । भूतत्वमूर्त्तत्वोभयस्य समवायेन साध्यतायां मनोन्यत्वस्य तत्संबन्धेन साध्यव्यापकत्वासंभवात् । वृत्त्यनियामकसंबन्धेनाधिक
रणत्वस्य प्रतियोगित्वस्य चाप्रसिद्ध्या तेन साध्यतायां पर्वतीयत्वादिनादिसद्धेतावव्याप्तिः । न द्रव्यान्यरूपत्वादित्यादावतिव्याप्तेश्च । साध्यताघटकसमवायेन साध्यव्यापकता
वच्छेदकप्रतियोगिताकानां व्यधिकरणधर्मावच्छिन्नघटत्वाद्यभावानां सर्वेषामेव स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वादिति । यत्तु विशेषण
साध्यव्यापकत्वं तेनैव च प्रतियोगित्वं प्रतियोगिसामानाधिकरण्यं च संबन्धेस्य विवक्षयेत्यस्यार्थमाह । तथापि न वाच्यत्वाद्यभावस्यान्यत्वाद्यभावस्येत्यादिग्रन्थस्यासंग
गततापत्तेरुपेक्षितमिति । नन्वेतावताप्ययमात्मा ज्ञानादित्यादावव्याप्तिरेव घटत्वादिनात्मत्वसामान्याभावस्य स्वविशिष्टस्य हेतोर्विषयताधिकरणे घटादौ व्यापकताघटकसंबन्धप्र
तियोगिसामानाधिकरण्याभावादत आह । इत्यन्तरेपीति । पक्षादुक्तहेत्वधिकरणावच्छेदेनेत्यत्र हेत्वधिकरणदेशेपीत्यर्थः । संबन्धेस्य विवक्षयेति । हेतुसमानाधिकरण इत्यत्र हेत्व
धिकरणत्वं येन संबन्धेन स्वविशिष्टहेत्वधिकरणावच्छेदेनेत्यत्र हेत्वधिकरणत्वं तेनैव संबन्धेनेति विवक्षयेत्यर्थः । इत्थं च इत्यनन्तरमपि साधु संगच्छत इति तु नव्याः । पर्वतो धूमवान्व
ह्नेरित्यत्रातिव्याप्तिः । धूमसामान्याभावस्यापि हेत्वधिकरणावच्छेदेन स्वप्रतियोगित्वस्वकालिकसंबन्धेनाश्रयीभूतवृक्षादेः समानाधिकरणत्वादत आह इत्यन्तरेपीति । प्रतियो
गिसामानाधिकरण्यमित्यत्र प्रतियोगिताश्रयदेशेपीत्यर्थः । संबन्धानिबन्धनो दोषः प्रकृतसाध्यव्यापकत्वस्येदृशसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावस्यास्वसंबन्धा
वच्छिन्नप्रतियोगिताश्रयीभूतवृक्षादेः सामानाधिकरण्यनिबन्धनो दोषः । संबन्धेस्य विवक्षया यत्संबन्धेन व्यापकतावच्छेदकत्वं प्रतिसामानाधिकरण्यमित्यत्रापि तेन संबन्धे
न प्रतियोगिताश्रयत्वविवक्षयेत्यर्थ इति संक्षेपः । अत्र संबन्धैक्यविवक्षायां रूपसामान्याभाववान्पृथिवीत्वाज्जलत्ववान्पृथिवीत्वादित्यादि विरुद्धहेतावप्यतिव्याप्तिः । साधनसमानाधिकर

6

स्य पृथिवीत्वान्यत्वाद्यभावस्यापि हेत्वधिकरणपृथिव्यवच्छेदेन जलपृथिव्यवच्छेदेन वा दिक्कृतविशेषणतया प्रतियोगिसमानाधिकरणत्वात् मूर्त्तमात्रस्यैव दिगुपाधित्वोपगमात्. न च
तस्यालक्ष्यत्वेनीरूपमिश्रात्मादेरव यत्किंचित्पदार्थावच्छेदे विषयतासंबंधेन साध्यव्यापकताघटकान्तर्गतस्य ज्ञानाभावस्यैव हेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरण्यविरह
न्नातिव्याप्तिः. तादृशानुमित्यादेर्भिन्नकालीनघटादेर्येनापि संबन्धेनासत्त्वादिति वाच्यम्. विषयतया ज्ञानसमानकालीनतया तादृशानुमित्या वर्त्तमानयोरेव रूपरसयोर्गगना
देर्विषयतासंबन्धेन तदनुमित्यभावप्रतियोगित्वावच्छिन्नाभावसत्त्वात् तादृशज्ञानमात्रस्याभावस्य साध्यव्यापकतावच्छेदकप्रतियोगितावत्त्वाभावात्. स्वावच्छिन्नानधिकरणसा
ध्यवद्वृत्तीत्यादिव्यापकतायां तदनुमितिव्यक्तौ सत्त्वेऽपि प्रतियोगिवैयधिकरण्याघटितव्यापकत्वस्य तदनुमितिव्यक्तावसत्त्वे नोक्तस्थलेऽतिव्याप्तेरेव रूपकत्वादिति भ्रमं निराकुरुते. रू
पसामान्येत्यादिना. पृथिवीत्वादिकमित्रित्यपृथिव्यां दिगुपाधित्वे मानाभावात्. स्पदं तेन जन्यपृथिवीत्वाद्युपग्रहः. स हेतुप्रतिकूलविरोधिनिरस्तः प्रलय इति. महाप्रलय
इत्यर्थः. खण्डप्रलये तु पार्थिवपरमाणोरूपमस्त्येव अंत्योत्तरसर्गे पार्थिवद्व्यणुकस्वरूपोत्पत्त्यर्थं परमाणौ पाकान्तरकल्पनापत्तेरिति प्राञ्चः. प्रलय इत्यस्य पाकेन रूपादेः प्र
लयक्षण इत्यर्थः. तेन महाप्रलयानुपगमेऽपि न क्षतिः. उत्पत्तिकाले चेत्यत्र चकारो रूपनिरूपप्रलयस्यानुकर्षणार्थः आद्यपाकविनाशकक्षणायां तत्सत्त्वात्. न ग्रन्थन्यूनतेत्य
परे. ननु विरोधिविरहेऽपि घटघटवच्छेदेन व्यभिचारित्वात् तः स हेतुत्वमत आह. उत्पन्नेति. यद्यपि पाकेन श्यामादिरूपनाशकालेऽपि अवयविनि रूपसामान्याभावसत्त्वं तथापि
पीलुपाकवादिमतेन तत्संभवात्. अपक्वमानावयविन्यनुरोधात्. उत्पत्तिकालेमात्रानुसरणं तत्सत्त्वादिति रूपादिसामान्याभावसत्त्वादित्यर्थः प्रतियोगिवदिति प्रतियोगिन इवेत्य
र्थः. विरोधित्वं एकदैकदेशावृत्तित्वे मानाभावादिति. प्रलयाद्यवच्छेदेन परमाण्वादौ रूपादिसामान्याभावे तु योग्यसन्निकर्षाभावात् प्रत्यक्षासंभवेऽप्यनुमानादिकमानमस्तीत्याश
यः. यत्तु घटादावुत्पत्तिकालावच्छेदेन रूपसामान्याभावस्य प्रत्यक्षमेव संभवति तदानीं चक्षुःसंयुक्तविशेषणतायास्तत्रासत्त्वेऽपि द्रव्यसमवेतद्रव्याभावप्रत्यक्षे हेतोश्चक्षुःसं
युक्तसमवेतविशेषणतायाः सत्त्वेन संनिकर्षसंभवादिति. तन्न चक्षुःसंयुक्तसमवेतद्व्यणुकविशेषणतया रूपाद्यभावे चाक्षुषापत्तेश्चक्षुर्योग्यसंयुक्तसमवेतविशेषण

Tribhuvan University, Balmeeki Campus, Kathmandu

आ॰ व्या॰

नायां एव अभावग्राहकत्वेन द्रव्यान्यद्रव्यसमवेतवृत्त्यभावचाक्षुषत्वस्यैव तज्जन्यतावच्छेदकत्वात् अन्यथा त्रसरेणुवृत्त्यभावचाक्षुषे व्यभिचारापत्तेः वस्तुतः स्वोत्पत्तेः पूर्वं चक्षुः
संयुक्तसमवेतस्य घटादेः सत्वात्तद्विशेषणताया अपि तदानीमसत्वात्तदुक्तक्रमेण हेतुत्वैव नास्तीति ध्येयम् अत एवेति ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे मानाभा
वादेवेत्यर्थः रक्तिमध्वंसप्रागभावयोः सत्त्वमावेदयितुमन्तरापदं रक्तं रूपमिति न च गुणे शुक्लादयः पुंसीत्यनुशासनात् रक्तो नास्तीत्येव प्रयोगो युक्त इति वाच्यं वस्त्वन्तरवि
शेषणतानापन्नस्यैव शुक्लादिशब्दस्य पुंस्त्वानुशासनात् अत एव शुक्लं रूपमिति प्रयोगः समासे माशितत्वेनैव वक्ष्यत इति ध्येयम् एवं रक्तं रूपं नास्तीति प्रत्ययः पूर्वोत्पादिर
वरिक्तस्य ध्वंसवति उत्तररक्तस्य प्रागभाववति इदानीं रक्तेपीत्यर्थः न च रक्ततादशायां वर्तमानस्यापि रक्तान्तरध्वंसादेस्तदानीं रक्तत्वावच्छिन्नप्रतियोगिताकत्वविरहान्न
तादृशप्रत्ययस्यासाव्याप्यत्तेरिति वाच्यं ध्वंसादिप्रतियोगित्वस्य किंचिद्धर्मानवच्छेद्यत्वात् तत्तद्रक्तध्वंसप्रागभावादिषु रक्तत्वावच्छिन्नप्रतियोगिताकत्वकल्पनामपेक्ष्य 7
रक्तत्वावच्छिन्नात्यन्ताभावसंबन्धस्यैवान्तरारुणमादिषु कल्पनाया लघुत्वाच्च न च यावन्ति रक्तरूपाणि तत्तद्व्यक्तित्वेन रधर्मानवच्छिन्नतत्तद्व्यक्तिनिष्ठप्रतियोगिताकाभावकू
टैरेव रक्तं रूपं नास्तीति प्रत्ययः क्रियते प्रकृते च विद्यमानरूपप्रतियोगिकस्य तादृशाभावस्यासत्त्वान्न तथाप्रतीतिरिति वाच्यम् तथा सति अन्तरध्वपामे रक्तं रूपं नास्तीत्याका
रकनिर्णयेपि तत्र रक्तं रूपमस्तीति प्रत्ययापत्तेः विरोधिनः सामान्याभावस्याभिन्नत्वात् विशेषाभावकूटनिर्णयस्याप्रतिबन्धकत्वात् अन्यथा सामान्याभाव एव न सिद्ध्येदि
तिभावः प्राञ्चस्तु प्रतियोगितासंबन्धेन रूपत्वमात्रावच्छिन्नप्रकारताकः संसर्गाभावविशेष्यकः प्रत्ययो रूपत्वावच्छिन्नप्रकारताकबुद्धेर्विरोधीति रूपत्वं प्रतियोगितावच्छेद
कमेवेति श्यामतादशायां रूपत्वावच्छिन्नाभाव एव रूपं नास्तीति प्रतीतेर्विषयः किमनुरोधेन रूपध्वंसादिमतितरत्वकल्पनाभावसिद्धिरित्याहुः तन्मते अन्तरध्वयोमेस
मवायेन रक्तं रूपं नास्तीति प्रतीतेः प्रामाण्यानुरोधेनैव ध्वंसात्यन्ताभावयोर्न विरोधः अन्यथा समवायावच्छिन्नप्रतियोगिताकध्वंसाद्यप्रसिद्ध्या तत्प्रतीतेर्भ्रमत्वापत्तेरि
तितुपरस्यार्थः तत्सामानाधिकरण्यं चेति प्रतियोगिसामानाधिकरण्यं चेत्यर्थः स्वविशिष्टेति स्वपदं लक्षणघटकतत्तदभावव्यक्तिपरम् तथा च तत्तदभावा अपी

भत्वं यद्धेतुताघटकसंबन्धेन हेतुतावच्छेदकधर्मावच्छिन्नाधिकरणं तत्संबन्धेन तत्तदभावे स्वस्वप्रतियोगिसामानाधिकरण्यं ग्राह्यमित्यर्थः ॥ तेन हेतुसमानाधिकरणस्य घटत्वादिनावृत्याद्यभावस्यापि कालिकसंबन्धेन धूमाधिकरणसत्त्वादौ व्यापकताघटकसंयोगादिसंबन्धेन प्रतियोगिसामानाधिकरण्याभावेपि वह्निमान् धूमादित्यादौ नाव्याप्तिः ॥ न वा द्रव्यं विशिष्टसत्त्वादित्यादौ घटत्वादिना द्रव्यत्वाद्यभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वेपि न क्षतिः । गुणादीनां विशिष्टसत्तानधिकरणत्वात् । यद्यपि व्यापकतावच्छेदकत्वे मानाभावात् द्रव्यत्वाद्यभावनिष्ठं यत्प्रतियोगिसामानाधिकरण्यं तदवच्छेदकत्वं न हेत्वधिकरणस्यैव संभवः कथितातिव्याप्तितादवस्थ्यं च । न च स्वविशिष्टहेत्वधिकरणताव्याप्यभिन्नप्रतियोग्यधिकरणतावच्छेदकत्वं वाच्यं स्वविशिष्टपदवैयर्थ्यापत्तेः ॥ प्रतियोग्यधिकरणीभूतस्वविशिष्टयावद्धेत्वधिकरणवृत्तित्वस्योक्तौ द्रव्यं न घटत्वादित्यादावव्याप्तिः ॥ यावद्धेत्वधिकरणाप्रसिद्धेः ॥ तथापि यावन्तो हेतुमद्वृत्तिधर्मा हेत्वधिकरणत्वनिवा यावन्ति तत्तदाश्रयीभूतप्रतियोग्यधिकरणवृत्तित्वस्य विवक्षितत्वाददोषः । एकमात्रवृत्तिहेतोरपि तत्स्थले वृत्तित्वविशिष्टस्य वह्न्यधिकरणानि संतीति न तत्राव्याप्तिः ॥ न च प्रतियोग्यधिकरणवृत्तिस्वविशिष्टयावद्धेत्वधिकरणतावत्त्वमात्रं सम्यक् स्वविशिष्टस्य हेतुसमानाधिकरणत्वस्य च वैयर्थ्यापत्तेरिति भावः ॥ प्रागुक्तमपि स्वविशिष्टपदं हेत्वधिकरणावच्छेदेनेत्यस्य प्रवेशे सार्थकं भवति । इत्यतः पश्चादुक्तस्यापि तस्य प्रथमं प्रयोजनमाह । तेनेति । गोत्वादिना गवाद्यभावस्य नष्टतिकाले वृत्तावपि यद्गोत्वं न तद्गौरित्यादौ नातिप्रसंग इति योजना । इदमुपलक्षणं तत्तद्योगोलकान्यत्वाद्यभावस्यापि प्रतियोगिसमानाधिकरणत्वाद्धूमवान् वह्नेरित्यादावतिप्रसंगो द्रष्टव्यः ॥ गवाद्यभावस्य प्रतियोग्यधिकरणे दैशिकसंबन्धेनापि वृत्तित्वमुपपादयितुमाह । गवाद्यनधिकरणेति । इदानीं चत्वरे गौर्नास्तीति प्रत्ययात् । गोमत्यपि काले कालिकसंबन्धावच्छिन्नगवाद्यभावस्य गवानधिकरणचत्वरावच्छेदेन वृत्तौ न विरोधः ॥ नन्वेतत्प्रत्ययस्य चत्वर एवैतत्कालावच्छेदेन गवात्यन्ताभावो विषय इति वाच्यम् । देशवृत्तौ कालस्येव कालवृत्तौ देशावच्छेदकत्वानुभवादेकदेशस्य तु महाकालत्वात् । इदानीं गगने गौर्नास्तीति प्रतीतेर्गवाद्यभावस्यैतत्कालावच्छेदेन गगनवृत्तित्वावगाहितायां भ्रमत्वापत्तेश्च । गवाद्यभावस्य गगनादौ कालिकेनापि वृत्तिर्न महाकालावच्छेद्यत्वासंभवादिति भावः । तद्वृत्तीति । गवादिमतीत्यर्थः ॥

आ.प.
८

कालेजन्यकाले॰ ननुचरमध्वंसात्मकस्यप्रलयस्यांतराभावाभावस्यापियावदन्तर्गतत्वात्तस्यसृष्टिकालेप्रतियोगिसामानाधिकरण्याभावादव्याप्तिरतआह महाकालेवेति
तथा च तस्यापि महाकालेप्रतियोगिसामानाधिकरण्यात्तस्यकालिकसंबन्धेनजगदाधारत्वादितिभावः॰ ननुगोत्वादिजातेःप्रलयेकालिकसंबन्धेनसत्त्वेप्रमाणाभावाद्गो
त्वंतद्गोरितिसद्धेतुरेवेतियदि ब्रूयात्तदाप्याह यत्रकालत्वमिति॰ उक्तविवक्षानादरे घटादिसाधारणरूपेणगोःसाध्यतायामतिव्याप्तिरित्याशयेनसाध्यान्तरमाहजन्यद्रव्य
मिति॰ द्रव्यस्यसाध्यतायां कालत्वंसद्धेतुरेव प्रलयेकालिकसंबन्धेनपरमाण्वादेःसत्त्वात्॰ कार्यद्रव्यानधिकरणीभूतत्वे सति द्रव्यवत्त्वेनैव धर्मिग्राहकप्रमाणेनतत्सिद्धेरतोव्यभि
चारित्वसंपत्तयेजन्यपदम्॰ ननुमहाप्रलयानंगीकारे प्रागुक्तहेतुद्वयमेवलक्ष्यं खण्डप्रलयेपिब्रह्माण्डान्तरे ब्रह्माण्डान्तरेजन्यद्रव्यसत्त्वात्॰ अतः परंसाध्यान्तरमाह प्रल
याद्वृत्तिर्वेति॰ खण्डप्रलयावृत्तिर्वेत्यर्थः॰ यद्यपिप्रतिप्रतियोगिनोयदधिकरणंतद्वृत्तित्वस्यदैशिकसंबन्धेनविवक्षायामपियदागोत्वंतदागोरित्यादावतिव्याप्तिवारणंसंभवतिप्र
लयाद्यवृत्तित्वावच्छिन्नाभावस्यप्रतियोग्यधिकरणेमहाकालादौदैशिकविशेषणतासंबन्धेनवृत्तित्वविरहात्॰ नचद्रव्यंसकालत्वादित्यादावव्याप्तिः॰ कालिकसंबन्धेनमहाकाल
निष्ठस्यद्रव्यत्वाद्यभावस्यस्वप्रतियोग्यधिकरणेदैशिकविशेषणतयावृत्त्यभावादितिवाच्यं हेतुसमानाधिकरणत्वस्यापितादृशविशेषणतयाविशेषणीयत्वात्॰ तथापिरूपभि
न्नंगुणत्वादित्यादौसाधनसमानाधिकरणरूपान्यत्वाद्यभावस्यरूपभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यचसर्वस्यैवतादृशाभावस्यमहाकालादौस्वप्रतियोगिसमानाधि
करणत्वादतिव्याप्तिरतःस्वविशिष्टहेत्वधिकरणेत्यादिविवक्षानुसरणमितिवदन्ति॰ वस्तुतोदैशिकविशेषणताघटितस्यलक्षणान्तरत्वादेकेनापरस्यान्यथाऽनुपपन्नत्वादुक्तल
क्षणेनवैयर्थ्यमितिपरमार्थः॰ यत्तुहेत्वधिकरणेविशेषणतयावर्तमानानांनिरुक्तयावदभावानांप्रतियोगिवृत्तित्वमेवविशेषणतासंबन्धेनोचितंप्रतियोग्यधिकरणवृत्तित्वप्रवेशे
गौरवात्॰ सत्त्वव्यभिचारिस्थलान्यत्वाद्यभावमादायापिव्याप्त्यभावात् इतितत्तुच्छं स्ववृत्तित्वविशिष्टानांकेवलान्वयिधर्माणामन्यत्वाभावस्यस्वप्रतियोग्यवृत्तित्वेनासंभवापत्तेः॰ न
हिकालत्वादिवृत्तित्वविशिष्टानांवाच्यत्वादीनामभावोवाच्यत्वादिरूपप्रतियोगिवृत्तिरितिदिक्॰ प्राचांमतेसंयोगसामान्याभाववत्साध्यकंमेयत्वंद्रव्यएवव्यभिचारीत्यतःकपिपद

8

नादृशगोत्वाभावनिष्ठप्रतियोगितानिरूपकगोत्वाभावाभावस्यादृशगोत्वाभावा-
भावस्य धूमाभावनिष्ठाधिकरणतानिरूपकस्य तस्य धूमाभावस्वरूपत्वमिति पर्यव-
सितोऽर्थः ॥ ५ ।

तियोगिवैयधिकरण्यघटितत्वेपि वसाध्यव्यापकत्वमत्र प्रवेशितम् · यथासन्निवेशे वैयर्थ्यविरहात् तत्तदवच्छेदकत्वस्य संयोगाभावनिष्ठप्रतियोगित्वे पक्षान्तरोक्त्याशयेन संयोगात्मकाभावस्याभिधानं नु घटितसाध्यव्यापकतायाः प्रवेशे तु गगनत्वादिविशिष्टवाच्यत्वाद्यभावस्य गगनत्ववाच्यत्वोभयत्वावच्छिन्नाभावादेर्यावद्गगनत्वान्तस्य हेत्वधिकरणीभूतगगनावच्छेदेन प्रतियोगिसमानाधिकरणत्वादव्याप्तिरतः स्वविशिष्टपदम् · एतदभिप्रायेणैव संयोगाद्यात्मकाभावेत्यन्तादिपदमुपात्तम् · वस्तुतः सत्तावान्द्रव्यत्वाद्गुणत्ववान्रूपत्वादित्यादे काले जन्यरूपे च हेतुसमानाधिकरणस्य सत्ताभावस्य गुणत्वसामान्याभावस्य च केनापि संबन्धेनात्मगगनादौ नित्यरूपे चावृत्तित्वाद्वृत्त्यधिकरणावच्छेदेन तस्यैव यावदुक्तगतस्य प्रतियोगिसामानाधिकरण्यविरहादव्याप्तिः स्यादिति स्वविशिष्टपदं तस्यास्तीति दिक् · ननु धूमाद्यभावनिष्ठा जलादिवृत्तित्वविशिष्टगोत्वाभावस्याभावो धूमाभाव एवाभावप्रतियोगिकस्याभावाधिकरणकाभावस्याधिकरणस्वरूपत्वात् · तथा च धूमादौ साध्ये वह्न्यादिहेतावतिव्याप्तिः धूमाद्यभावस्य हेत्वधिकरणावच्छेदेन गोत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वादत आह · जलादिवृत्तीति · न च तादृशाभावस्य धूमाभावस्वरूपत्वेपि जलादेर्न तादृशाभावत्वावच्छिन्नाधिकरणत्वं किन्तु धूमाभावत्वावच्छिन्नाधिकरणत्वमेवेति न पूर्वयातिप्रसङ्ग इति वाच्यम् एवं सत्यभावमात्रस्यैव प्रायेणाभेदप्रसंगात् · उक्तक्रमेणैवातिप्रसंगवारणसंभवादिति भावः · ननु तथापि धूमवान्वह्नेरित्यादावतिव्याप्तिः समनियताभावानामैक्याद्धूमाभावस्य वह्निधूमोभयाभावादभिन्नस्यायोगोलकान्यत्वाभावादेरयोगोलकभेदत्वादिना भेदसामान्याभावादभिन्नस्य हेत्वधिकरणावच्छेदेनैव वह्न्यादिभेदाद्यात्मकप्रतियोगिसामानाधिकरण्यादिति चेदत्राहुः · यावत्पदस्य फलन्तु प्रतियोगिताविशेषणत्वेन साध्यव्यापकतावच्छेदकीभूतयत्प्रतियोगिताकाभावत्वस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन तत्प्रतियोगिताश्रयसामानाधिकरण्यं विवक्षितम् · तथा च धूमादिसामान्याभावस्य धूमादिनिष्ठतादृशप्रतियोगिताकस्य धूमादिनिष्ठप्रतियोगिताश्रयेण धूमादिना हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः · न च यत्समानाधिकरण इत्यस्य वैयर्थ्यम् · आत्मत्वसामान्याभावीयप्रतियोगितायाअपि साध्यव्यापकतावच्छेदकतया तत्प्रतियोगिताश्रयस्यात्मत्वसामान्याभावस्य तादृशप्रतियोगिताश्रयसामानाधिकरण्यविरहात्स्यमात्माभावादिसाध्यकाव्याप्तिवारकत्वात् · जलादिवृत्तित्वविशिष्टेत्यादिग्रंथस्तु

तथा च प्रमेयत्वत्वात्वेन धूमत्वरूपप्रमेयसामान्यनिष्ठप्रतियोगिताया धूमसामानाधिकरण्याभावसत्त्वादव्याप्तिरिति पर्यवसितोऽर्थः ३

वस्तुगतिमनुरुध्यैवोक्तं तेन तादृशाभावस्य धूमाभावस्वरूपत्वेऽपि तत्सम्बन्धेनाधिकरणतावच्छेदकेन साध्यव्यापकतावच्छेदकीभूतधूमनिष्ठप्रतियोगिताया यत्तयाश्रयसामानाधिकरण्यविरह
देव्याप्त्यसंभवेऽपि न क्षतिः । न च धूमत्वत्वेन धूमाभावस्य धूमनिष्ठं यत्प्रतियोगित्वं तदेव धूमत्वेन प्रमेयसामान्याभावस्य प्रमेयसामान्यनिष्ठं तथा च तत्तद्रूपत्वं प्रतियोगित्वान्तरेगौ
रवादित्युक्तविवक्षयाप्यप्रतीकार इति वाच्यम् । स्वरूपसंबंधात्मिकायाः प्रतियोगितायाः सामान्याभावस्थले प्रतियोगिभेदेनैव भिन्नत्वादिति संप्रदायविदः । वस्तुतः साध्य
व्यापकतावच्छेदिकायाः स्वन्यूनवृत्तिधर्मानवच्छिन्नाया यादृशप्रतियोगिताया निरूपकोऽभावस्तस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन तादृशप्रतियोगिताश्रयसामानाधिक
रण्यमेव वक्तव्यम् । तथा च धूमादिसामान्याभावस्य धूमत्वादिना प्रमेयसामान्याभावानतिरेकेऽपि तदीयं प्रमेयसामान्यनिष्ठं प्रतियोगित्वं स्वन्यूनवृत्तिनैव धूमत्वधर्मेणावच्छिन्न
मतो न तादृशप्रतियोगिताश्रयसामानाधिकरण्यमादायातिप्रसंग इति युक्तमुत्पश्यामः । यत्तु समनियताभावानामैक्यमते धूमवान्वह्नेरित्यादावतिव्याप्तिवारणाय येन
येन संबन्धेन व्यापकत्वं तेन तेन प्रत्येकं प्रतियोगिसामानाधिकरण्यं विवक्षितं तथा च व्यभिचारिण्यत्र एव यत्राधिकरणे व्यभिचारस्तादृशान्यतमस्य स्वात्मकस्वरूपत्वेनापि सा
ध्यव्यापकत्वात्तदभावस्य च हेत्वधिकरणावच्छेदेन तादृशान्यतमनिरूपितस्वरूपसंबन्धेन प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरित्यस्य विवक्षितसंबन्धस्य
व्यापकतावच्छेदकत्वेऽपि नित्यज्ञानं नित्यसविषयकत्वादित्यादौ नातिव्याप्तिर्नित्यज्ञानत्वाद्यभावस्य व्यापकतावच्छेदकीभूतसमवायसंबन्धेन प्रतियोगिसामानाधिकरण्यत्वादि
तिमतं तन्न युक्तं घटत्वादिना वाच्यत्वाद्यभावस्यैव घटत्वादिनाऽपि विरोधात्यत्वाद्यभावरूपतया तस्य च व्यापकतावच्छेदकायः पिण्डान्यतमनिरूपितस्वरूपसंबन्धेन यावद्धेत्व
धिकरणे प्रतियोगिसामानाधिकरण्यविरहादेव धूमवान्वह्नेरित्यादावतिव्याप्तिविरहापादकस्य स्वविशिष्टेत्यस्य यत्सामानाधिकरण्येत्यस्य च व्यर्थतापत्तेरिति दि
क् । ननु स्वाधिकरणधर्मावच्छिन्नाभावानां स्वत्वेऽपि सर्वेषां सद्भावे घटत्वादिविशिष्टवाच्यत्वाद्यभावावच्छिन्नवाच्यत्वाभावाभावं वा समादाय प्रोक्तलक्षणसंभवात्प्रतियोग्यवृत्ति
त्वोक्तिमूलावतारानुपपत्तिः । न चैवं विशिष्टव्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन व्यापकतावच्छेदकीभूतप्रतियोगितायां विशेषणीयत्वान्नैवमिति वाच्यं व्यभिचारवारकत्वे

न च समनियताभावैक्यमते निव्याप्तिः यावत्प्रतियोगितायां यावत्त्वविशेषणमावश्यकं तथा च तावत्त्वैकाप्रसिद्ध्य
वाक्यं दूषणमिति निवायं प्रतियोगितायां यावत्त्वमनिवेश्य कल्पान्तरस्य वक्ष्यमाणत्वात्. ५

नतादृशविशेषणस्यव्यर्थत्वात्.अन्यथाव्यधिकरणधर्मावच्छिन्नाभाववत्समानकालीनत्वेनापिहेतुंविशेष्यैवग्रन्थावतरणंकुतोनसमर्थयेदितिलक्षणान्तरमाहसमानाधि
करणेनामिति.वह्निमान्धूमात्सत्तावान्द्रव्यत्वादित्यादावव्याप्तिः.साध्यव्यापकप्रतियोगिकानांजलत्वविशिष्टद्रव्यत्वाभावगगनत्वविशिष्टसत्त्वाद्यभावानांस्वविशिष्टहेत्वधिक
रणावच्छेदेनप्रतियोगितावच्छेदकीभूतजलत्वविशिष्टद्रव्यत्वत्वावच्छिन्नसामानाधिकरण्याभावात्तदुक्तरूपावच्छिन्नेति.तथाचजलत्वविशिष्टद्रव्यत्वादेःसाध्यव्यापक
तावच्छेदकत्वाद्दोषः.यत्तुसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्यघटत्वेनवह्न्यभावस्यचयावद्वह्न्यधिकरणेघटत्वावच्छिन्नसामानाधिकरण्याभावाद्व्यापकतावच्छे
दकरूपावच्छिन्नेतिनदत्यन्तमसत्.घटत्वेनवह्न्यभावस्यैववह्नित्वेनघटाभावत्वमानस्यापियावद्धेतुमन्निष्ठप्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्नसमानाधिकरणत्वात्.न
तुसमवधित्वस्यवासत्त्वव्यापकतानवच्छेदकत्वात्तदवच्छिन्नस्यवासत्त्वाद्यभावस्यमूलोक्तस्यैवतल्लक्षणघटकत्वसहतेयतनादिनेतिदोषइत्यादि.येनसंबन्धेन
हेतुस्तेनसंबन्धेनहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणवृत्तित्वमभावेग्राह्यंतेनायमात्मज्ञानात्घटान्यत्वविशिष्टात्मघटसंयोगादित्यादावात्मत्वसामान्याभावस्यात
थात्वेऽपिनाव्याप्तिः.एवंयेनसंबन्धेनव्यापकतातत्संबन्धावच्छिन्नप्रतियोगिताकाभावस्यस्वप्रतियोगितावच्छेदकसंबन्धेनप्रतियोगितावच्छेदकावच्छिन्नसामानाधिक
रण्यंवोध्यम्.अतोनव्यधिकरधर्मावच्छिन्नाभावासत्त्वेऽपिव्यधिकरणसंबन्धावच्छिन्नवासत्त्वाभावमादायलक्षणसमन्वयात्प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारणानुपपत्तिः.
नवाजलत्वादेःसमवायेनसाध्यतायांमहाकालत्वादित्यादावतिव्याप्तिः.प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यस्वविशिष्टहेत्वधिकरणावच्छेदेनवोध्यत्वेन
ध्वंसत्वादित्यादौद्रव्यत्वाद्यभावस्यकालेहेतुमतिप्रतियोगिसामानाधिकरण्येऽपिनातिव्याप्तिः.इदन्त्ववधातव्यंसाध्यवन्निष्ठाभावप्रतियोगितायाःसामानाधिकरण्ये
नानवच्छेदकत्वरूपमेवव्यापकतावच्छेदकत्वमत्रपूर्वत्रचनिवेश्यंनतुप्रतियोगिवैयधिकरण्यघटितंतथासतिव्यधिकरणधर्मावच्छिन्नाभावासत्त्वेऽपिसर्वंप्रमेय
मित्याकारकयत्किंचिज्जन्यबुद्धिविषयत्वसामान्याभावमादायैवसर्वत्रलक्षणसमन्वयात्प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारणानुपपत्तिः.जन्यज्ञानव्यक्तिविषयत्व

Valmeeki University, Balmeeki Campus, Kathmandu

तस्यभावभिन्नत्वाभावात्.२

ग्रा·दा:
१०

स्यतारहत्युद्धिदरूपाभावस्यैव सत्त्वेन तत्संबन्धेनाभावस्यैव तादृशज्ञानविषयत्वाभावसहेतुसमानाधिकरणत्वात्. एवं चात्र स्वविशिष्टपदं तत्कपिसंयोगात्मकाभावं गगनत्वादिवि
शिष्टं वा यत्त्वाभावं वादाय तद्रूपिसंयोगाभाववान् प्रमेयत्वादित्यादौ व्याप्तिवारकं कपिसंयोगाभाववत्त्वादेहेतुव्यापकतानवच्छेदकत्वात्. किंतु हेतुमन्निष्ठकालेवर्त्तमानस्य सत्त्वसामा
न्याभावस्यापि निरुक्तरूपप्रकृतिस्तास्य वा तादृशस्त्वेन यावद्धेत्वधिकरणे प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविरहात्सत्तायानुव्यत्वादित्यादावव्याप्तिवारकमेव
स्वविशिष्टपदम्. न च साध्यतावच्छेदकसंबन्धेन साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकयत्किंचिदभावीयहेत्वधिकरणावच्छेदेन स्वावच्छेदकसंबन्धेन प्रतियोगितावच्छे
दकावच्छिन्नसमानाधिकरणत्वमिति वेद्य. ना सत्त्वादिना घटाभाववान् ज्ञेयत्वादित्यादौ उत्कस्यासमन्वयादिति वाच्यम्. स्वरूपसंबन्धावच्छिन्नप्रमेयत्वावच्छि
न्नाभावाप्रसिद्ध्या प्रमेयवान् ज्ञेयत्वादित्यादावव्याप्तिः. गुरुधर्मावच्छिन्नप्रतियोगिताप्रसिद्ध्या प्रमेयवह्निमान् धूमादित्यादावव्याप्तिः. इत्यनियमकसंबन्धस्य प्रतियोगिता
नवच्छेदकतया गोमीत्वेनवादित्यादौ स्वामित्वादिसंबन्धेन गवादेः साध्यतायामव्याप्तिश्चेति दिक्. ननु वह्नित्वेन धूमत्वजातिसामान्याभावो धूमीयसंयोगसंबन्धेन द्रव्यसा
मान्याभावो वा धूमाभाव एव तथायोगोलके भेदतदभावान्यतरत्वेनायोगोलकाहतेरभावोऽयोगोलकान्यत्वस्वरूपसंबन्धेन भेदसामान्याभावो वाऽयोगोलकभे
दाभाव एव समनियताभावानामैक्यात्. तथा च धूमाद्यभावस्य प्रतियोगितावच्छेदकं वह्नित्वादिकं तदवच्छिन्नेन सह यावद्धेत्वधिकरणे धूमाद्यभावस्य प्रतियोगितावच्छेदका
वच्छिन्नसामानाधिकरण्यात् धूमवान् वह्नेरित्यादावतिव्याप्तिः सामान्यधर्मेण विशेषाभावाप्रसिद्धमनुकूलम्. तथा च धूमत्वेन धूमाद्यभावानामेव प्रमेयत्वादिना धूमाद्यभा
वत्वात् तस्य प्रतियोगितावच्छेदकीभूतप्रमेयत्वावच्छिन्नसामानाधिकरण्यादिति चेत्. अत्रापि वाच्यत्वस्य कल्पनतः प्रतियोगित्वस्य विशेषणतया साध्यव्यापकतावच्छेदकरूपा
पावच्छिन्नयत्प्रतियोगिताकोपन्नसमानाधिकरणोऽभावः स्वविशिष्टहेत्वधिकरणवृत्तित्वतत्प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वविधिपर्यवसि
तार्थः. तथा च धूमादिनिष्ठतादृशधूमत्वावच्छिन्नप्रतियोगिताकाभावस्य धूमादिनिष्ठयत्प्रतियोगित्वं तदवच्छेदकीभूतधूमत्वावच्छिन्नेन साकं हेत्वधिकरणावच्छेदेन सामा

10

१ अत्र हेतुनिष्ठत्वं तद्धर्मत्वं संयोगादिसंबन्धेनोच्यते तेन धूमावयवसंयोगेन द्रव्याभाववत्त्वात् धूमवान्वह्नेरित्यादौ [illegible] व्याप्तिपूर्तिसंयोगस्यापि द्रव्यनिष्ठप्रतियोगिता न्यूनवृत्तितया [illegible]
२ केवलजगद्वृत्तिभिन्नत्वाभावो [illegible] सामानाधिकरण्ये [illegible] समनियताभावानामैक्यमते [illegible] व्याप्तिरित्यादिः॰

नाधिकरण्यविरहेण नातिव्याप्तिरिति सांप्रदायिकाः॰ वस्तुतोऽत्रापि साध्यव्यापकतावच्छेदकरूपावच्छिन्नया स्वन्यूनवृत्तिधर्मानवच्छिन्नया यादृशप्रतियोगिताया निरूपको भावस्तादृशप्रतियोगिताया यदवच्छेदकं तदवच्छिन्नेन सामानाधिकरण्यं वक्तव्यं धूमत्वादिना धूमाद्यभावस्तु न धूमत्वादिना धूमाद्यभावः सामान्यधर्मेण विशेषाभावानभ्युपगमात्॰ तदभ्युपगमे तु यादृशप्रतियोगिताकाभावे प्रतियोगितावच्छेदकावच्छिन्नवत्त्वजगद्वृत्तिभिन्नत्वस्य च द्वयोर्व्यतिरेकः॰ साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां तादृशप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं वाच्यमतो न कश्चिद्दोष इति ध्येयम्॰ तत्र वर्णितलक्षणमाह केचित्त्विति॰ अनवच्छेदकमिति यत्साध्यतावच्छेदकमिति परेणान्वितं घटत्वादिना वह्न्यभावमादाय वह्निमान्धूमादित्यादेर्लक्षणासंगतिः व्यभिचारिणि हेतुसमानाधिकरणस्य साध्यसामान्याभावस्यैव प्रतियोगितावच्छेदकं साध्यतावच्छेदकमतो नातिव्याप्तिः कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिवारणार्थं व्याप्यवृत्तिरिति वह्नित्वादिना घटाभावमादायाव्याप्तिरतः साध्येति॰ अत्र च प्रतियोगिता साध्यतावच्छेदकसंबन्धेन ग्राह्या॰ तेन समवायादिसम्बन्धेन वह्न्याद्यभावस्य हेतुसमानाधिकरणस्य प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वादेर्नासंभवः॰ प्रतियोगिवैयधिकरण्यप्रवेशे वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेरतस्तत्त्यागः व्याप्यवृत्तित्वं निरवच्छिन्नहेत्वधिकरणवृत्तिकत्वं हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिवृत्त्यभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यदभावव्यक्तित्वं तत्त्वं वा॰ एवं चैतल्लाभार्थमेव हेतुसमानाधिकरणस्येत्युक्तं ननु स्वात्मणतद्विशेषणवैयर्थ्यात्॰ यत्किंचिन्निवेशाच्च संयोगाभावस्य हेत्वधिकरणीभूतद्रव्यनिष्ठाभावप्रतियोगित्वेऽपि संयोगिसत्त्वादित्यादेर्नातिव्याप्तिः॰ ननु समनियताभावानामैक्यात् घटत्वेन वह्न्यभावस्यैव वह्नित्वेन घटाभावतया हेतुसमानाधिकरणस्यैव तादृशसाध्यप्रतियोगिताकाभावस्य प्रतियोगितावच्छेदकं वह्नित्वादिकमित्यव्याप्तिः॰ अतः समनियताभावैक्यमते निरुक्तिमाह हेतुसमानाधिकरणस्येति॰ व्याप्यवृत्तेरभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकमिति योजना॰ नन्वत्रापि हेतुसमानाधिकरणस्य वह्नित्वेन वह्निधूमोभयाभावस्य वह्नित्वेन पर्वतवृत्तेरभावस्य च प्रतियोगितायाः समानाधि

ग·टट·
११

करणं सदेव वह्नित्वमवच्छेदकमित्यव्याप्तिः· तादृशप्रतियोगितायाः अन्यूनवृत्तित्वेसति यत्त्वावच्छेदकं तस्यास्तत्त्वात्तथापि तथाविधे वह्नित्वे नतार्किकतार्किकदृष्टेनोभयं नास्ती
ति प्रतीतिसिद्धस्यैव तादृशाभावस्य प्रतियोगितावच्छेदकत्वाद्वह्नित्वस्य न च तादृशाभावप्रतियोगितावच्छेदकत्वं न वह्नित्वमात्रे पर्याप्तं किं तु तार्किकतार्किकभिन्नत्वेपि· अन्य
था तादृशप्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्नत्वघटितपर्वतादौ तादृशाभावास्तित्वप्रसंग इति वाच्यं सोऽयमिति प्रतियोगितावच्छेदकधर्मावच्छिन्नत्वनतामाभावस्याभा
वाविरोधित्वात्· अन्यथा घटवति घटत्वेन पटाभावस्याप्यलापापत्तेः· किं तु प्रतीतिबलाद्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वसिद्धौ स्वरूपं प्रतियोग्यंशे प्रकारीभूतध
र्मविशिष्टप्रतियोगितावच्छेदकावच्छिन्नस्यैव साधुत्वमनायत्याभावस्य विरोधित्वं वाच्यं तदेतद्वह्निमति वह्नित्वादिना तार्किकतार्किकोभयाभावादिसत्त्वेपि न क्षतिकरं अत एव च द्र
व्यत्वेन वह्निर्नास्ति वह्नित्वेन तद्वह्निर्नास्तीति प्रतीत्या सामान्यधर्मेण विशेषाभावोऽभ्युपेयते· न च तत्र वह्नित्वस्यैव प्रतियोगितावच्छेदकत्वं भासते द्रव्यत्वस्य तु वैशिष्ट्यमा
त्रं विषय इति वाच्यं वह्निमान् पर्वत इत्येवं निर्णयसत्त्वेपि द्रव्यत्वेन वह्निर्नास्तीति प्रत्यक्षमान· द्रव्यत्वस्यैवावच्छेदकतया भानात्· अन्यथा वह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताक
त्वेन वह्न्यभावबुद्धिं प्रति वह्नित्वेन वह्निविशिष्टनिश्चयस्यैव विरोधित्वात्तादृशप्रतीत्यसंभवापत्तेः· अस्माकं तु द्रव्यत्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वेन वह्न्यभावबुद्धिं
प्रति द्रव्यत्वेन वह्निविशिष्टनिश्चयस्यैव विरोधित्वात्तदसत्त्वादेव [illegible] तादृशाभावप्रतीतिसंभवात्· इत्यतो लक्षणान्तरमाह प्रतियोग्यनधिकरणस्येति· केचित्तु सामा
नाधिकरणपक्षभेदः· तथाहि हेतुसमानाधिकरणाभावीयस्वाभिन्नप्रतियोगितावच्छेदकं यत्तत्तदन्यत्वं साध्यतावच्छेदके विवक्षितम्· प्रतियोगित्वं स्वरूपसंबन्धविशेषः·
स च सामान्याभावस्थले प्रतियोगितावच्छेदकस्वरूपमेव न तु प्रतियोगिस्वरूपः· अननुगमापत्तेः तेनाधारधेयभावानुपपत्तेश्च· सामान्यधर्मेण विशेषाभावस्थले प्र
तियोग्यंशे प्रकारीभूतो विशेषधर्म एव तथा न तु सामान्यधर्मः· अतिप्रसक्तत्वात्· व्यधिकरणधर्मावच्छिन्नाभावस्थले च प्रतियोगितावच्छेदकादिस्वरूपं न प्रतियो
गित्वं किं त्वतिरिक्तमेवान्यथा प्रतियोगितावच्छेदकविशिष्टप्रतियोगिन्येव साधुत्वमभावस्याविरोधात्· तदवच्छिन्नत्वघटिततादृशाभावस्यासत्त्वप्रसंगात्· विवादे प्यतिरि

निरूपकत्वसंबन्धेन प्रतियोगितावान्घट इत्याकारकप्रतीत्यनुपपत्तेः· ३

न्तःयां प्रतियोगितायामेव अन्यथा समनियताभाववैकल्येन निखिलव्याप्यधिकरणधर्मावच्छिन्नाभावगगनाभावात्मकतया गगनाभावस्यैव तद्रूपत्वं चिन्तामणिकारेण तदङ्गीकारानुपपत्तेः इत्थं च पर्वते वह्नित्वेन तार्णतार्णवह्निर्नास्तीति प्रतीत्या तादृशाभावप्रतियोगितावच्छेदकत्वस्य वह्नित्वे सत्त्वेऽपि तादृशप्रतियोगितावच्छेदकत्वं न वह्नित्वाभिन्नं किंतु तादृशोभयत्वाभिन्नमतिरिक्तमेवेति स्वाभिप्रायाः साधनत्वावच्छिन्नाभावप्रतियोगितायाः यदवच्छेदकं न तद्धर्मत्वस्य वह्नित्वे सत्त्वान्न तस्य धूमव्यापकतावच्छेदकत्वहानिः नन्वत्र लक्षणे हेत्वधिकरणवृत्तित्वाभावस्य संसर्गाभावत्वेन न वाच्यं वह्निसामान्याभावस्यापि कालिकादिसंबन्धेन धूमवति सत्त्वादव्याप्त्यापत्तेः नापि दैशिकविशेषणतया घटभिन्नं द्रव्यत्वादि न्यापत्वतिव्याप्त्यापत्तेः घटत्वरूपस्य साध्याभावस्य दैशिकविशेषणतया वृत्तित्वविरहादित्यतो तत्स्मरणं तस्मात् प्रतियोगिव्यधिकरणमित्यस्यैवेति प्राहुः अपरे तु प्रागुक्तं व्याप्यवृत्तित्वं यत्किंचिद्वृत्तित्वेन दुर्वचमतः प्रतियोगिव्यधिकरणहेत्वादिलक्षणान्तरमुक्तमित्यप्याहुः अन्ये तु कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावादेः साध्ये आत्मत्वेऽनाव्याप्तिः आकाशाभावात्मकस्य साध्याभावस्य निरवच्छिन्नवृत्तिकतया तत्प्रतियोगितावच्छेदकमेव साध्यतावच्छेदकमतः प्रतियोगिव्यधिकरणस्यैवेति लक्षणान्तरमित्याहुः हेतुसमानाधिकरणस्य प्रतियोगिव्यधिकरणस्याभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत् साध्यतावच्छेदकमिति योजना अथात्र प्रतियोगिव्यधिकरणत्वं न स्वप्रतियोगिसमानाधिकरणभिन्नत्वं सम्भवि यतनाभावानामभिन्नतया घटत्वेन घटाभावादेरपि घटत्वेन प्रमेयसामान्याभावस्वरूपतया तस्य च प्रमेयात्मकप्रतियोगिसमानाधिकरणतया तद्भिन्नत्वासंभवात् अत एव स्वप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणो योऽयस्तद्भिन्नत्वमपि न तथा घटत्वेन घटाभावादेरपि प्रमेयत्वादिना घटाभावस्य द्रव्यत्वेन घटवद्वृत्तेरभावस्य वा तादात्म्योपगमात् अव्याप्तिप्रापत्तेः व्यधिकरणधर्मावच्छिन्नाभावस्यापि तत्रएव वारणसंभवेऽव्याप्तिः वा उक्तसामानाधिकरण्येनेत्यस्य वैयर्थ्यापाताच्च न च साध्यतावच्छेदकसंबन्धेन यादृशप्रतियोगिताश्रयानधिकरणं तादृशप्रतियोगितात्वं प्रतियोगितानात्वार्थः तथा च वह्नित्वेन घटाभावीयं घटनिष्ठप्रतियोगित्वमपि तादृशमतस्तदवच्छेदकत्वं वह्नित्वेऽप्यस्तीति सामानाधिकरण्यपदं तेन तादृशप्रतियोगितायां ता

हेत्वधिकरणं

+२ हेतुसमानाधिकरणाभावस्य यादृशप्रतियोगिताश्रयानधिकरणं नोपदर्शितं भवति ताहृशप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकीभूतसाध्यतावच्छेदकमिति स्पष्टोऽर्थः

२

मानाधिकरण्येनावच्छेदकाप्रसिद्ध्यानवच्छिन्नप्रतियोगितैवलक्षणघटकेतिवाच्यं विशिष्टसत्तावान्जातेरित्यादावतिव्याप्तेर्गुणादीनामपिविशिष्टसत्तानिष्ठप्रतियोगिताश्र
याधिकरणत्वात्। घटवान्महाकालत्वादित्यादावव्याप्तिप्रसंगाच्च। हेतुमतोमहाकालस्यसाध्यताघटककालिकसंबन्धेनघटघटाभावप्रतियोगिताश्रयाधिकरणतयाप्रति
योगिव्यधिकरणाभावाप्रसिद्धेरितिचेदत्राहुः। साध्यताघटकसंबन्धेनस्वाश्रयवृत्तित्वावच्छेदकधर्मावच्छिन्नाधिकरणभावकुत्वधिकरणिकाभावत्वः प्रतियोगितास्तद्
यप्रतियोगित्वंप्रतियोगितानात्वार्थः। तथाचवह्नित्वेनघटघटाभावस्यापिघटादिनिष्ठप्रतियोगितातादृशीतिनतदवच्छेदकत्वंवह्नित्वेप्यस्तीत्यतः सामानाधिकरण्यपदं घटवा
न्महाकालत्वादित्यादौगगनाभावीयगगननिष्ठमेवतादृशंप्रतियोगित्वंसुलभमितिनदोषः। वस्तुतोधूमवतिवह्नित्वेनघटोनास्तीतिवद्वह्निमत्वान्वह्नित्वेननघटवान्किंतुघ
टत्वेनेतिप्रतीतिबलाद्व्यधिकरणधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकान्योन्याभावोप्यस्ति। अतएवसमवायितयावाच्यत्ववद्वृत्तेघटेपक्षधर्मिकैः स्वीकृतः। त
थाचयादृशप्रतियोगितावच्छेदकावच्छिन्नोपत्वेनसाध्यतावच्छेदकसंबन्धेनयादृशप्रतियोगिताश्रयाधिकरणत्वंहेतुमत्तातादृशप्रतियोगितासमानाधिकरणवृ
त्तिनावच्छिन्नप्रतियोगिताकतादृशप्रतियोगितावच्छेदकताभावकत्वंतादृशप्रतियोगितावच्छेदकान्यत्वंवासाध्यतावच्छेदकेविवक्षितम्। तथाचघटादिनिष्ठस्यवह्नि
त्वेनैवघटघटाभावप्रतियोगित्वस्यापितादृशत्वेनवह्नित्वेतदवच्छेदकत्वाद्व्याप्तिरतः सामानाधिकरण्येनेत्युक्तम्। तथाचवह्नित्वस्यतादृशप्रतियोगितावच्छेदक
त्वेपितादृशप्रतियोगितासमानाधिकरणवृत्तित्वरूपव्यधिकरणधर्मेणतादृशप्रतियोगितावच्छेदकत्वात्यन्ताभावस्यतत्रसत्त्वान्नाव्याप्तिः। कालोघटवान्मह
कालत्वादित्यादौतुघटादिसामान्याभावप्रतियोगिता अतथात्वेपिघटत्वेनघटघटाभावप्रतियोगितायास्तथात्वेनलक्षणसमन्वयः। कृतः घटत्वेनघटवान्नतुघटत्वेनेत्यनु
भवात्। वह्नित्वादिसामान्यधर्मेणमहानसीयवह्न्याद्यभावसत्वेतुयादृशप्रतियोगितावच्छेदके स्वत्वावच्छेदकत्वमनतिरिक्तवृत्तित्वंग्राह्यं तद्भूतदतिरिक्तवृत्तित्वेसति
तत्समानाधिकरणंयद्यत्तदन्यत्वं नातोव्यधिकरणधर्मावच्छिन्नप्रतियोगितायाःस्वतएववारणासंभवेसामानाधिकरण्यपदवैयर्थ्यमित्यस्यानुसरणाः। प्रत्युत

12

या ३
वृत्तित्वावच्छिन्नप्रतियोगिताकत्वेन ४

तियोगितावच्छेदकविशिष्टस्य यत्प्रतियोगिताश्रयस्य च द्वयोः साध्यतावच्छेदकसंबंधेनानधिकरणहेत्वधिकरणतादृशप्रतियोगित्वं प्रतियोगितान्तार्थः तथाच वह्नित्वे
न घटपटोभयस्य घटनिष्ठप्रतियोगिताया अपि तादृशत्वाद्वह्नित्वादेरवच्छेदकत्वमादाय व्याप्तिः अतः सामानाधिकरण्येनेति प्रागुक्तार्थकं एतन्मते च सामान्यरूपेण वि
शेषाभावानभ्युपगमः नातो वह्नित्वेन तद्घटाभावमादाय व्याप्तिः न च स्वरूपसंबन्धाभिन्नप्रतियोगितायाः प्रतियोगिभेदेन भिन्नतया धूमाभावादित्यत्राव्याप्तिः वह्निसामा
न्याभावीयं यन्महानसीयवह्निनिष्ठं प्रतियोगित्वं तदवच्छेदकीभूतवह्नित्वविशिष्टस्य तत्प्रतियोगिताश्रयीभूतमहानसीयवह्नेश्च द्वयोरनधिकरणत्वस्य हेतुमति पर्वते सत्वा
दिति वाच्यं प्रतियोगिव्यक्तीनां भेदेपि एकधर्मावच्छिन्नप्रतियोगिताया लाघवेनैक्यस्वीकारादिति न च कालो घटवान् महाकालत्वादित्यादौ तादृशप्रतियोगिताप्रसि
द्ध्या व्याप्तिः गगनाद्यभावीयप्रतियोगिताश्रयीभूतगगनस्याधिकरणाप्रसिद्ध्या तादृशप्रतियोगिताया लक्षणघटकत्वादिति वाच्यं महाकालान्यत्वविशिष्टघटाद्य
भावस्य तादृशविशिष्टघटत्वावच्छिन्नप्रतियोगिताया एव तथात्वात् यत्प्रतियोगितावच्छेदकविशिष्टयत्प्रतियोगिताश्रयोभयत्वं वा हेत्वधिकरणयत्किंचिन्नि
ष्ठाधिकरणतानवच्छेदकं तादृशप्रतियोगिताया एव निवेश्यतया गगनाभावादिकमादायैव लक्षणसंभवाच्चेति तन्न प्रतियोगिभेदेपि प्रतियोगितावच्छेदकाभे
देन प्रतियोगिताया अभेदस्तत्र वह्नित्वेन घटाभावस्य वह्नित्वावच्छिन्नघटनिष्ठप्रतियोगिता सैव वह्नित्वादिना वह्निधूमोभयाभावस्यापि वह्नित्वावच्छिन्ना धूमा
दिनिष्ठा प्रतियोगिता लाघवात् तथा च सामानाधिकरण्येनेत्यस्य वैयर्थ्यं दुर्वारं वह्नित्वेन घटाभावीयं यद्वह्निनिष्ठं प्रतियोगित्वं तदवच्छेदकीभूतवह्नित्वविशिष्टस्य
तादृशप्रतियोगिताश्रयीभूतवह्निधूमादेश्च द्वयोरधिकरणत्वस्य सर्वत्रैव हेतुमति सत्वेन वह्नित्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिताया लक्षणघटकत्वादि
तिदिक् एवं चेति तथा चास्य प्रथमाधिकत्वात्तादृशेपि न क्षतिरिति भावः वह्नित्वावच्छिन्नघटाद्यभाववति धूमादौ वर्त्तमानत्वादुक्तं साध्याभावेति अत्र साध्या
भावो व्याप्यवृत्तिर्बोध्यः एवं परत्रापि विशिष्टेति महानसीयत्वादिविशिष्टवह्नित्वावच्छिन्नप्रतियोगिताकस्येत्यर्थः ननु विशिष्टस्यातिरिक्तत्वान्महानसीयत्ववह्नित्व

योगिरोसस्येदवापरंपरयालत्रावच्छेदकताघटकेष्वित्यत आह द्रव्यत्वकर्म्मत्वेति· ननु व्याप्यवृत्तित्वघटितलक्षणयोः संयोगिसत्त्वादित्यत्राव्याप्तिः स्वसमानाधिकरणा
भावप्रतियोगितावच्छेदकावच्छिन्नवृत्तिकत्वस्वरूपस्य वा व्याप्यवृत्तित्वस्य संयोगाभावेऽसत्त्वादत आह सत्त्ववतीति· तथा च हेतुसमानाधिकरणस्य व्याप्यवृत्तेरित्यनेन निरवच्छि
न्नहेत्वधिकरणवृत्तित्वं हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावस्य विवक्षितमिति भावः· उक्तधर्मे गगनसाध्यतायामव्यभिचारित्वापत्तिव्याप्तिवारणा
य पारिभाषिकावच्छेदकत्वानुसरणस्यावश्यकत्वे व्याप्यवृत्तित्वस्य प्रकृते निरुक्तावपुर्वेऽपि न क्षतिरित्याशयेनाह वक्ष्यमाणं चेति· यथाश्रुतस्य प्रतियोगितावच्छेदकत्वान
तिरिक्तवृत्तित्वस्योक्तौ सत्तावान् जातिमत्त्वादित्यादावव्याप्तिः तादृशप्रतियोगितावच्छेदकीभूतविशिष्टसत्त्वानतिरिक्तवृत्तित्वान्तस्य ज्ञानस्यैतत्तेनोव स्पष्टमालमिति सिद्धं
नलक्षणे वक्ष्यमाणमित्यर्थः· तथा च हेतुमन्निष्ठाभावीययत्संबन्धावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यद्धर्मविशिष्टसंबंधिनिष्ठाभावीययत्संब
न्धावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं तदेव पारिभाषिकावच्छेदकं तत्त्वं साध्यतावच्छेदके बोध्यमिति भावः· ननु तथापि द्रव्यं गुणसामान्याभा 12
वस्य संयोगवति घटादौ सत्त्वात् गुणत्वस्य संयोगत्वविशिष्टसंबंधिनिष्ठाभावीययत्संबन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वविरहात् तत्र संयोगत्वस्य पारिभाषिकाव
च्छेदकत्वसंभवनापीत्यत आह· गुणवृत्तित्वेति· गुणसमवेतत्वेत्यर्थः· घटादावुक्तसाध्याभावसत्त्वेऽपि गुणसमवेतस्य द्रव्यत्वादेः सत्त्वाद्यात्मधर्मस्येत्यर्थः· संयोगी गु
णान्यत्वे सति सत्त्वादित्यादौ गुणवृत्तित्वमात्रस्य संयोगत्वस्य न पारिभाषिकावच्छेदकत्वं संभवति· गुणवृत्तित्वावच्छिन्नाभावस्य हेतुसमानाधिकरणत्वात्· अतः संयो
गसाध्यकव्यभिचारिमात्रेऽयं दूषणमात्रसंयोगत्वस्य पारिभाषिकावच्छेदकत्वं न दूषणमाह· द्रव्यसमवेतेति· उक्तान्यासमवेतत्वेत्यर्थः· उक्ताभावानामव्याप्यवृत्तित्वे संयोगा
त्मकस्वप्रतियोग्यधिकरणवृत्तित्वेन कदाचित् सत्त्वादिरूपाणां तत्प्रतियोगितावच्छेदकानां संयोगत्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं न स्यात्· तदे
वनास्तीति तेषां व्याप्यवृत्तितया संयोगात्मकस्वप्रतियोग्यधिकरणवृत्तित्वादेव तावन्मात्रं सूचयितुं समं व्याप्यवृत्तीति प्राक्तनलक्षणं दूषयितुमुपन्यस्यति साध्यतावच्छेद

केति स्वपदं विशिष्टे तु परम् तथा च यद्धर्मावच्छिन्नसमानाधिकरणसाध्याभावत्वावच्छेदेन साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं तद्धर्मवत्त्वं पर्यवसित
मवच्छेदकत्वं चात्रानतिरिक्तवृत्तित्वं व्यभिचारिणि तु हेतुसामानाधिकरण्यस्य साध्यसामान्याभावस्यैव साध्यसामानाधिकरण्यविरहान्नातिप्रसंगः विशिष्टस
त्तावाञ्जातेरित्यादौ यावत एव हेतुसमानाधिकरणस्य साध्याभावस्य सत्तारूपसाध्यसामानाधिकरण्यादिति व्याप्तिः अतः साध्यतावच्छेदकावच्छिन्नेति तथा च विशिष्टस
त्ताभावस्यैव तादृशस्य विशिष्टसत्तारूपसाध्यसमानाधिकरणत्वाभावान्नातिप्रसंगः अत्र च सामानाधिकरण्यं येन संबन्धेन साध्यता तेन संबन्धेन साध्यस्याधिकरणे
दैशिकविशेषणतया वृत्तित्वरूपं ग्राह्यं तेन द्रव्यत्वादिसमानाधिकरणस्य ज्ञानाद्यभावस्य विषयतया ज्ञानाद्यधिकरणे वृत्तावपि समवायेन ज्ञानसाध्यके द्रव्यत्वादिहे
तौ नातिव्याप्तिः नवा कालः प्रमेयत्वादित्यादौ सर्वेषामेव साध्याभावानां साध्यवति काले कालिकसंबन्धेन वृत्तावप्यतिप्रसंगः साध्याभावनिष्ठं हेतुसामानाधिकरण्यम
पि हेतुतावच्छेदकसंबन्धेन प्रकृतहेतोर्यदधिकरणं तत्र विशेषणतया वृत्तिमत्त्वरूपं बोध्यं ते[illegible]न्याज्ज्ञानादित्यादौ विषयतया ज्ञानस्य हेतोरधिकरणे वर्तमानस्यात्म
त्वाभावस्य द्रव्यविशिष्टसत्त्वादित्यादौ च सत्तासमानाधिकरणस्य द्रव्यत्वसामान्याभावस्य साध्यसामानाधिकरण्यविरहेपि नाव्याप्तिः नवा कालः कालपरिमाणादि
त्यादौ हेत्वधिकरणे कालिकसंबन्धेन वर्तमानस्य कालत्वादिसामान्याभावस्य साध्यवति दैशिकविशेषणतया वृत्तिमत्त्वविरहेपि न क्षतिः साध्याभावस्तु पूर्वोक्तद्वि
तीयरीत्या बोध्यः तेनाधिकरणधर्मावच्छिन्नाभावासत्त्वेपि साध्यस्य विशिष्टाभावादिकमादायैव लक्षणसंभवान्न प्रतियोग्यवृत्तित्वेत्यादिग्रन्थावतारसंगतिः
कपिसंयोगी सत्त्वादित्यादौ तु कपिसंयोगाभावस्य साध्यसामानाधिकरण्येपि द्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य साध्यसामानाधिकरण्यवि
रहान्नातिव्याप्तिः कालिकसंबन्धावच्छिन्नप्रतियोगिताके गगनाभावस्याभावे साध्ये यत्र समवेतत्वादिकं हेतुस्तत्र हेतुमति दैशिकविशेषणतया वर्तमानस्याकाशा
भावात्मकस्य साध्याभावस्य साध्यवति दैशिकविशेषणतया वृत्तावपि हेतुसमानाधिकरणस्य नित्यत्वादिसामान्याभावस्यापि निरुक्तसाध्याभावत्वात्तस्यैव साध्यसा

मानाधिकरण्यविरहो व्याप्तिरिति व्याप्तिः यत्समानाधिकरणेति यत्समानाधिकरणसाध्याभावप्रमासामान्यमित्यर्थः तेन धूमवान्वह्नेरित्यादौ व्यधिकरणधर्मावच्छिन्न(साध्याभावप्रमाव्यक्तेः साध्यवत्ताज्ञानाविरोधित्वेऽपि साध्यसामान्याभावप्रमाया एव साध्यवत्ताज्ञानविरोधितया नातिव्याप्तिः व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य साध्यसामान्याभाववत्त्वभ्रमस्थले पर्वतो वह्निमानित्याकारकसाध्यवत्ताज्ञानविरोधित्वासंभवः स्यादतः प्रमात्वोपादानं प्रमात्वं चात्र भ्रमसामान्यभिन्नज्ञानत्वं तेन तादृशबुद्धेरपि अंशतः प्रमात्वा(न्न दोषः न चैवमपि ह्रदे वह्निसामान्याभावप्रमायाः साध्यवत्ताज्ञानविरोधित्वादव्याप्तिरतो यत्समानाधिकरणेति फलितः प्रमाविशेषणं तथा च [illegible] वृक्षसाध्याभावप्रमासामान्यमित्यर्थः तेन वृक्षत्वसमानाधिकरणस्य संयोगसामान्याभावस्यैव गुणे धर्मिणि प्रमायाः साध्यवत्ताज्ञानविरोधित्वेऽपि संयोगी वृक्षत्वादित्यादौ नाव्याप्तिः यत्तु साध्यवत्ताज्ञानविरोधित्वं हेतुमत्तावृत्तिधर्मावच्छिन्नविशेष्यकं यत्साध्यवत्ताज्ञानं तद्विरोधित्वरूपं वाच्यं तथा च गुणो न संयोगीति प्रमाया गुणः संयोगीत्याकारकबुद्धिविरोधित्वेऽपि तादृशी साध्यवत्ताधीर्न हेतुमत्तावृत्तिधर्मावच्छिन्नविशेष्यिका गुणत्वादेर्हेतुमत्त्वरहितत्वादतो नोक्तदोष इति तन्न यत्समानाधिकरणेत्यस्य व्यर्थत्वापत्तेः साध्याभावप्रमासामान्यस्य हेतुमत्तावृत्तिधर्मावच्छिन्नविशेष्यकसाध्यवत्ताज्ञानस्य विरोधित्वं नास्ति तत्त्वमित्यस्यैव सम्यक्त्वात् जलादिधर्मिकवह्निसामान्याभावप्रमायाः साध्यवत्ताधीविरोधित्वेऽपि धूमवत्तावृत्तिधर्मावच्छिन्नविशेष्यकं यद्धूमवत्ताज्ञानं तद्विरोधित्वाभावादेव वह्निमान् धूमादित्यादावव्याप्त्यसंभवादित्यादिक् अत्र च साध्यतावच्छेदकसंबन्धेन तेन रूपेण च साध्यवत्ताज्ञानं बोध्यं तेन पर्वतो न समवायेन वह्निमानित्यादिप्रमायाः समवायेन वह्निमत्ताबुद्धिं प्रति पर्वतो महानसीयवह्निमानिति प्रमायाश्च संयोगेन महानसीयवह्निमत्ताबोधं प्रतिबन्धकत्वेऽपि वह्निमान् धूमादित्यादौ नाव्याप्तिः प्रतिबध्यकतावच्छेदकधर्मवत्ताज्ञानत्वावच्छिन्नं ग्राह्यं तेन वह्निसामान्याभाववत्त्वेन तया गृहीतस्य महानसीयवह्न्यभावादेः पर्वतादौ प्रमायाः संयोगसंबन्धावच्छिन्नपर्वतधर्मिकवह्निमत्ताबुद्धिविरोधित्वेऽपि नासंभवः सर्वत्रेति साध्यसामानाधिकरण्यपावच्छेदकत्वस्य सामानाधिकरण्यत्वमित्यत एव प्रथमस्य द्वितीयस्य च यत्समानाधिकरणप्रमासामान्ये साध्यवत्ताज्ञानविरोधित्वं नास्ति

तत्वमित्यत्र स्वसामंजस्यादितिभावः॰ यत्तु यत्समानाधिकरणसाध्याभाववत्वावच्छेदेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्यं न तन्नैव प्रथमलक्ष
णार्थः॰ तथाच धूमसमानाधिकरणस्य घटादिसामान्याभावस्य वह्नित्वावच्छिन्नघटपटप्रसिद्धासाध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याभावा
दसंभवः स्यादतः साध्याभावपदम्॰ नचैवमपिप्रतियोगिपदं व्यर्थमेवेति वाच्यम्॰ अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वे साध्यतावच्छेदकावच्छिन्नप्रतियोगिसा
मानाधिकरण्याभावस्याखंडस्यैव निरुक्तत्वात्॰ एवं द्वितीयलक्षणेपि साध्यतावच्छेदकावच्छिन्नप्रतियोगिमत्ताग्रहविरोधित्वं निवेश्य साध्याभावपदस्य सार्थक्यं
बोध्यमिति नन्वमं प्रतियोग्यवृत्तिश्चेत्यादि ग्रन्थावतारणानुरोधेन साध्याभावस्य पूर्वोक्तद्वितीयपरीक्षे नवनव्यनयाहेतुसमानाधिकरणस्य वह्नित्वेन घटाभावादेर्वा सा
ध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याप्रसिद्ध्यालक्षणघटकप्रक्षेपेप्यसंभवतादवस्थ्यात्॰ नचघटत्वेन वह्न्यभावो वह्नित्वेन घटाभावात्मकः॰ समनियताभावानामै
क्यात्॰ तथाच तस्यापि साध्यावच्छेदकीभूतवह्नित्वरूपप्रतियोगिनः सामानाधिकरण्यमक्षतमेवेति वाच्यम्॰ तथासति घटसामान्याभावादेरपि घटत्वादिना प्रमेय
सामान्याभावात्मकतया तस्यापि साध्यतावच्छेदकीभूतवह्नित्वावच्छिन्नप्रमेयरूपप्रतियोगिसमानाधिकरणतया तमादायासंभवतादवस्थ्यात् साध्याभावपदस्य व्य
र्थतापातज्ञालेपस्यादिति॰ प्रगल्भस्यैव लक्षणान्तरमुपन्यस्यति॰ यत्किंचि॰ यद्धर्माविति॰ यन्निष्ठसाध्याभाववद्वृत्तिसामान्यमित्यर्थः॰ तेन वह्निनिष्ठस्य धूमाधिकरणधर्म
वह्नित्वाभाववद्वृत्तित्वस्य धूमसाध्यकानुमित्यविरोधित्वेपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः॰ धूमादिनिष्ठस्यानलत्वापवह्नित्वव्याप्याभाववद्वृत्तित्वस्यापि इन्धनत्वादि
कारेणावह्न्यनुमितेर्विरोधित्वादसंभवः स्यादतः प्रकृतेति॰ साध्यतावच्छेदकसंबन्धेन रूपेण च प्रकृतसाध्यके इत्यर्थः॰ तथाचतादृशसाध्याभाववद्वृत्तित्वस्य वह्नित्वेनव
ह्न्यनुमितिप्रत्यविरोधित्वान्नदोषः॰ प्रकृतानुमितिविरोधित्वं न प्रकृतानुमितिविरोधिज्ञानविषयत्वमात्रं धूमनिष्ठवृत्तित्वस्यापि वह्न्यनुमितिविरोधिनो व्यभिचारभ्रमस्य
विषयत्वसंभवात्॰ किंतु विषयितया प्रकृतानुमितिप्रतिबंधकतावच्छेदकत्वं॰ तथा च वह्निनिष्ठवृत्तित्वमात्रस्य धूमसाध्यकानुमितिविरोधितावच्छेदकत्वाभावाद्व्यभिचारि

व्या. प.
१५

त्यमिति व्याप्तिलक्षणे साध्याभाववतीति तथा च यन्निष्ठसाध्याभाववद्वृत्तित्वविशिष्टज्ञानसामान्यं प्रकृतानुमितिप्रतिबन्धकतानवच्छेदकं तत्त्वमर्थः। न च धूमत्वेन घटाभाववद्वृत्ति-
त्वादौ साध्याभाववद्वृत्तित्वभ्रमदशायामपि धूमसाध्यकानुमित्युत्पत्त्या वह्निनिष्ठनिर्धूमवद्वृत्तित्वस्य धूमसाध्यकानुमितिप्रतिबन्धकतानवच्छेदकत्वाद्व्यभिचारिण्य-
तिव्याप्तितादवस्थ्यमिति वाच्यं यन्निष्ठसाध्याभाववद्वृत्तित्वविशिष्टज्ञानसामान्यं न प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तमिति तत्त्वमित्युक्तत्वात्। साध्याभाववत्त्वपूर्वो-
क्तद्वितीयरीत्या प्रवेशनीयः तेन न पूर्वोक्तदोषः। अनुमितिविरोधित्वज्ञानस्येति। अनुमितिविरोधित्वं हि न साक्षादनुमितिप्रतिबन्धकत्वं व्यभिचारधियः साक्षात्तथा-
त्वेन व्यभिचारिमात्रेऽतिप्रसङ्गापत्तेः। किन्त्वनुमितिजनकज्ञानविरोधित्वं तज्जनकं च पक्षधर्मतादिरूपव्याप्तिज्ञानं तदनाहार्यज्ञानं प्रति न साध्याभाववद्वृत्तित्वज्ञानं विरोधि
किन्तु साध्याभाववद्वृत्तित्वमनुमितिविरोधीत्याकारकज्ञानमेव तत्पर्येति व्यभिचारिण्यतिव्याप्तिः। यदि तु साध्याभाववद्वृत्तिर्हेतुरित्याकारकज्ञानं प्रकृतानुमितिजनकं त-
दा निरुक्तव्याप्तेरनुमित्यनुपयुक्ततया तदभिधानमनर्थकमित्यस्वरसमितिभावः। एतेन यदि प्रकृतानुमितिपदं प्रकृतहेतुधर्मिकसाध्याभाववद्वृत्तित्वानुमितिपरं न तु प्रकृ-
तसाध्यकानुमितिपरं विरोधित्वं चात्र साक्षादेव तद्विषयकत्वेन तदा न व्यभिचारिण्यतिप्रसङ्ग इत्यपास्तम्। तादृशव्याप्तेरनुमित्यनुपयुक्ततया तदभिधानेऽर्थान्तरतादव-
स्थ्यमिति मिश्रलक्षणमेव परिष्कृत्योपन्यस्यति। केचित्त्विति। केवलान्वयिनि प्रसिद्धं वह्निरहितत्वादिसाध्यकव्यतिरेकिणो यावन्तः साध्याभावास्तत्तत्सजातीयत्वं
तत्तदधिकरणवृत्तित्वाभावेनादृशान्यतररूपात्मकमप्रसिद्धमत उक्तं प्रत्येकमिति। यावन्तः साध्याभावास्तेषामपि सजातीयत्वमेवं लिङ्गत्वाभावेनास्यत उक्तं तत्त-
त्सजातीया इति। तदधिकरणवृत्तित्वाभावास्तूक्तेः तत्सजातीयावत्साध्याभावपरामर्शे वह्निमान् धूमाद्घटसामान्याभाववान् घटत्वादित्यादौ साध्याभावात्मकतत्तद्धि-
पक्षवृत्तित्वादिसत्त्वाभावपर्यवसानापि धिकरणप्रसिद्ध्या व्याप्तिरलक्ष्यतदधिकरणेति। तथा च प्रतिसिद्धरूपेण साध्याभावानुपादाने तत्तत्सजातीयस्य तदधिकर-
णवृत्तित्वाभावेऽग्राह्य इति भावः। व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य सजातीयं घटत्वादि तन्न तदधिकरणवृत्तित्वाभावमादाय व्यभिचारिण्यतिव्याप्तिवारणाय यथा

15

वत्तइति· तथा च साध्यसामान्याभावसजातीयस्य तदधिकरणवृत्तित्वाभावस्य तत्रासत्त्वाद्दोषः साध्यसामान्याभाववद्वृत्तित्वस्यैव व्यधिकरणधर्मावच्छिन्नाभावो। व्यभिचारिण्यप्यस्तीत्यतः सजातीय इत्युक्तम्· ननु घटत्वेन निर्धूमवृत्तित्वस्याभावेपि अभावत्वादिना धूमसामान्याभावसजातीय एवेत्यतिव्याप्तिस्तदवस्थमत आह साजात्यं चेति· यद्यपि साध्याभावनिष्ठं यत्समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपं तेनैव रूपेण साजात्यं वाच्यं तथा च वह्निसामान्याभावादिनिष्ठं यत्तादृशान्यतररूपं वह्निनिष्ठवह्नित्वावच्छिन्नप्रतियोगिताकत्वस्वरूपं तस्य निर्वह्निवृत्तित्वसामान्याभावेऽसत्त्वादसंभवः· तथापि यावन्तः समानाधिकरणधर्मावच्छिन्नाभावास्तावदन्यतमत्वतादृशान्यतररूपेण साजात्यं वाच्यमित्यदोषः समनियताभावानामैक्यात् गगनाभावस्य निखिलव्यधिकरणधर्मावच्छिन्नाभाव इतिमते तु गगनाभावत्वतदन्यत्वान्यतररूपेणैव साजात्यं वाच्यं तेन घटत्वेन निर्धूमवृत्तित्वाभावस्यैव गगनत्वादिसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकतया धूमसामान्याभावसजातीयत्वेपि नातिव्याप्तिः· साध्याभाववदिति· साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावो न साध्याभावपदेनोक्त इत्यर्थः· साध्यव्यापकतावच्छेदकप्रतियोगितावच्छेदकत्वरूपप्रथमरीत्याभिधाने घटत्वविशिष्टवाच्यत्वाद्यभावस्यापि साध्याभावपदार्थतया तत्र तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्यापि हेतावसत्त्वादसंभवः स्यादतस्तत्परित्यागः· अत्र साध्यव्यापकताघटकसंबन्धेनैव साध्यव्यापकस्याभावो ग्राह्यस्तेनैव संबन्धेन साध्यव्यापकस्य संबन्धावच्छिन्नाभाववति हेतौ वृत्तावपि न क्षतिः· यत्तु साध्यतावच्छेदकसंबन्धेन साध्यव्यापकत्वं तेनैव साध्यव्यापकस्याभावो निवेश्य इति मतं तदयुक्तं यत्र तादात्म्यसंबन्धेन प्रमेयमात्रं साध्यं तत्र तेन संबन्धेन साध्यव्यापकतावच्छेदकं वस्तुप्रमेयत्वादिकं तादात्म्येन तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या तत्र सद्धेतावव्याप्तिः· प्रमेयत्वेन घटपटोभयाभेदस्वीकारेण कथंचित्तत्राव्याप्तिवारणेपि वृत्त्यनियामकसंबन्धेन साध्यतायामव्याप्तिः· साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः· किंचैवं धूमवान्वह्नेरित्यादावतिव्याप्तिः संयोगेन धूमसामान्याभावस्याव्याप्यवृत्तितया धूमत्वेन घटाद्यभावस्यैव तादृशस्या

वद्वृत्तित्वेन तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्य क्वापि सत्त्वात्। अस्माकं तु स्वरूपसंबन्धेनापि धूमभेदस्यापि धूमव्यापकतया वह्नेस्तदभाववद्वृत्तित्वाभावा
देवातिव्याप्तिरित्यादि निबोध्यम्। ननु कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिः कपिसंयोगसामान्याभावस्यापि प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेद
करूपावच्छिन्नप्रतियोगिताकत्वेन यावद्वृत्तिगतत्वात् तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्यैतेनाभावात्तत आह व्याप्यवृत्तिरिति। व्याप्यवृत्तित्वमवच्छिन्नवृत्ति
कान्यत्वं संयोगी सत्त्वादित्यादौ तु द्रव्यत्वादिसामान्याभावस्यापि साध्याभाववत्तया हेतोस्तदधिकरणवृत्तित्वाभावादेवनातिव्याप्तिः। ननु रूपवान् पृथिवीत्वादित्यादाव
व्याप्तिः रूपत्वेन नित्यसमवेताभावस्यापि निरुक्तयावत्साध्याभावान्तर्गतत्वात् तत्सजातीयस्य तदधिकरणवृत्तित्वसामान्याभावस्यापि हेतावसत्त्वात्। सामान्यध
र्मितविशेषाभावस्वीकारे तु रूपत्वेन तद्रूपाभावमादायाप्यव्याप्तिरत आह। प्रतियोगितावच्छेदकावच्छिन्नेत्यादि। प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधि
करणत्वं च यत्प्रतियोगिताकाभावे स्वावच्छेदकसंबन्धेन स्वसामानाधिकरण्यस्वावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्प्रतियोगिताकत्वं बोध्यं तेन नित्यरूपात्मके
न प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्यविरहेऽप्युक्ताभावस्य न संग्रहः न वा वाच्यत्वेन प्रमेयत्वाद्यभावस्यैव ज्ञेयत्वत्वेन वाच्यत्वाद्यभाव
तया स्वाधिकरणधर्मावच्छिन्नाभावमात्रस्यैव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्येऽपि न संग्रहः। अत्र च निरुक्तायास्तद्व्यप्रतियोगिताया ए
व साध्यव्यापकतावच्छेदकरूपावच्छिन्नत्वं बोध्यं तेन संयोगात्मकस्यैव साध्याभावस्य समवेतसामान्याभावनिष्ठनिरुक्तप्रतियोगिताकत्वं कपिसंयोगाभावत्वरूप
साध्यव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वयोः सत्त्वेऽपि कपिसंयोगाभाववान् द्रव्यत्वादित्यादौ रूपत्वेन नित्यसमवेताभावस्यैव नित्यरूपसामान्याभा
वतया तत्र नित्यरूपत्वावच्छिन्ननिरुक्तप्रतियोगिताकत्वसाध्यव्यापकतावच्छेदकीभूतरूपत्वावच्छिन्नप्रतियोगिताकत्वयोः सत्त्वेऽपि रूपवान् पृथिवीत्वादित्यादौ ना
व्याप्तिः समवेतसामान्याभावत्वाद्यवच्छिन्नप्रतियोगितायाः साध्यव्यापकतावच्छेदकरूपानवच्छिन्नत्वादिति ध्येयम्। तृतीयरीतेः प्रवेशस्य फलमाह तत्तत्साध्यव्य

16

न्तोरिति॰ अभाववति हेतोर्दृष्टान्तापि नाव्याप्तिरित्यन्वयः॰ साध्यवृत्तित्वादेः फलमाह अव्याप्यवृत्तेर्वो साध्यस्येति॰ ननु साध्याभाववेत्यादि सामान्यतः साध्याभाववद्वृत्तित्वं च
व्यापकेत्युक्तौ वह्निसामान्याभावसजातीयस्याधिकरणधर्मावच्छिन्नाभावस्याधिकरणसाध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकाभावस्याप्रसिद्ध्याव्यतिरेकिमात्रेऽ
व्याप्तिरतस्तत्र हि साध्याभावस्याविशेषणं तथा च निर्वह्निवृत्तित्वसामान्याभावस्यैव [illegible] निर्वह्निवृत्तित्वव्यापकप्रतियोगिताकस्तत्र साध्याभावसजातीयत्वम
स्तीत्यदोषः॰ नन्वेवमपि निर्धूमवृत्तित्वेनानिर्धूमवृत्तित्ववह्निभेदोभयाभावस्य जलवृत्तित्वेनानिर्धूमवृत्तित्वाभावस्यापि तत्तद्रूपगणितेनो वह्नौ सत्त्वादतिव्याप्तिः॰
न च व्यासज्यवृत्तिधर्मानवच्छिन्नत्वमिव स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वमपि प्रतियोगितायां विशेषणं वाच्यमतो नोक्तदोषः तथापि गुणभेदाभावसजातीयस्य पूर्व
क्षणवृत्तित्वविशिष्टगुणसमवेतत्वाभावस्य हेतौ सत्त्वात् गुणभिन्नं सत्त्वादित्यादावतिप्रसंग इत आह ननु साध्याभाववद्वृत्तित्वतानिरूपकसमानाधिकरणध
र्मानवच्छिन्नप्रतियोगिताकाभावो ध्येय इत्यपपाठः क्वाचित्कः॰ तत्र चातिरिक्तो तेन न निर्वह्निवृत्तित्वसामान्याभावादेः संग्रहः॰ अन्यथा वह्निसामान्याभावसजा
तीयस्य समानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्ध्याऽव्याप्तिप्रसंगात् न च निर्धूमत्वादिसजातीयस्य निर्धूमवृत्तित्वत्वादिना वह्निहेतोरभावस्य
हेतौ सत्त्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिरित्युक्तघटकसंबन्धावच्छिन्नवृत्तितामात्रनिष्ठत्वेन प्रतियोगितायां निवेशनीयत्वेऽपि निर्धूमवृत्तित्वत्वेन जलवृत्तित्वजला
न्यनिर्धूमवृत्तित्वोभयाभावमादायातिव्याप्तेस्तादवस्थ्यमिति वाच्यम्॰ एतत्स्वरसेनैव व्यहृत्यादिलक्षणान्तरस्य वक्ष्यमाणत्वात् यद्यपि तत्साध्याभाववद्वृ
त्तित्वावच्छिन्नाभाव इत्यस्यैव त्वे समानाधिकरणधर्मादिकं प्रक्षिप्य निषेधह्यप्रवेशो निरर्थकः॰ सर्वत्र व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वेन घ
टाभावस्यैव तादृशस्य साध्याभावसजातीयस्य सम्भवात् तथापि यथासन्निवेशे न वैयर्थ्यम् यत्र तादात्म्येन संबन्धेन हेतुता तत्र सद्धेतौ व्यधिकरणधर्मावच्छि
न्नसाध्याभाववत्तादात्म्यस्य जगत्त्वरूपतया तादृशतादात्म्यत्वस्य केवलान्वयित्वेन तदवच्छिन्नाभावाप्रसिद्ध्याऽव्याप्तेः॰ स्यादेतो वा निषेधद्वयगर्भता प्रयुक्त

पसामा
न्याभावे

आ. व्या.
७

त्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावा इत्युक्तावसंभवः स्वाद्यधिकरणधर्मावच्छिन्नतत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेः । तादृशवृत्तितात्वमपेक्ष्य लघुवृत्तित्वत्वमात्रस्यैवोक्ताभावप्रतियोगितावच्छेदकत्वादिति ननु चैवं उभयोः प्रतियोगितावच्छेदकत्वमंगीकृत्यैव लक्षणकरणात् । अन्यथा महाकालभेदे साध्ये जन्यत्वविशिष्टघटादेः कालिकसंबन्धेन हेतुतायामव्याप्तिप्रसंगात् । महाकालभेदाभाववद्वृत्तित्वत्वमपेक्ष्य लघुना महाकालवृत्तित्वत्वमात्रेणैव महाकालभेदाभाववद्वृत्तित्वाभावप्रतियोगितायाअवच्छेदात् । महाकालभेदाभावसजातीयस्य तद्वृत्तित्वातिरिक्तसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्धेरिति ध्येयम् । तादृशवृत्तित्वव्यापकत्वस्य प्रयोजनमाह साध्याभाववद्वृत्तिविशेषवृत्तित्वस्येति । अभावमादाय नातिप्रसंग इत्यन्वयः । ननु व्यभिचारिणि रूपवदधिकरणवृत्त्यन्यान्यत्वस्याभावस्यापि साध्याभाववत्तया तद्वृत्तित्वसामान्याभावस्य व्यभिचारिण्यसत्त्वानुक्तोऽतिव्याप्तिरत आह पार्थिवत्वादिति । पार्थिवत्वविशिष्टं यन्निर्धूमवृत्तित्वं तद्वृत्तौ नास्ति वह्नेः पार्थिवत्वान्नातिप्रसंग इति भावः । आदिना जलत्वादिपरिग्रहः । व्यासज्यवृत्तिधर्मानवच्छिन्नत्वस्य प्रयोजनमाह हेत्वाद्यवच्छिन्नस्य चेति । निर्धूमवृत्तित्ववह्निभेदोभयत्वावच्छिन्नस्य चेत्यर्थः । न तेष इति अन्यथा निर्वह्निसंयुक्तत्वाभावस्य साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वाभावाप्रसिद्धेः वृत्तित्वसामान्याभावस्य च धूमेऽसत्त्वादव्याप्तिरेवस्यादिति भावः । इत्थं च साध्याभाववद्वृत्तित्वस्य हेतुतावच्छेदकसंबन्धेनोक्तेरित्यर्थः । तादृशसंबन्धेन हेत्वधिकरणताप्रवेशे गौरवमतः कस्यचिदित्युक्तम् । तथा च हेतुतावच्छेदकसंबन्धावच्छिन्नाधिकरणतावद्वृत्तित्वं साध्याभाववद्विशेषणमित्यर्थः । सत्त्वादित्यादेरित्यादिपदेन वह्निमान् धूमादित्यादेः परिग्रहः । तत्रापि जातिसामान्याभावादेः साध्याभाववत्तद्वृत्तिसंयोगसंयोगसंबन्धेन ह्रदस्य प्रतिहेतुरव्याप्तिसंभवात् । ननु द्रव्यं विशिष्टसत्त्वादित्यत्राव्याप्तिः । विशिष्टसत्त्वस्य केवलसत्त्वानतिरेकेण द्रव्यत्वाभाववद्वृत्तित्वाद्द्रव्यत्वाभावसजातीयस्य तद्वृत्तित्वाभावस्य हेतावसत्त्वात् । न चैवं विशिष्टहेत्वधिकरणे वर्तमान एव साध्याभावो ग्राह्यस्तेन तद्दोषव्युदासादिति वाच्यम् । तथापि धूमवान् वह्नेरित्यत्रातिव्याप्तिः । निर्धूमवृत्तित्वसामान्याभावस्य महानसीयवह्नौ सत्त्वात् । न च हेतुतावच्छेदकधर्मावच्छेदेन तादृशवृत्तित्वाभाववत्त्वं विवक्षितम् ।

17

तथा सत्यपि निर्धूमत्वादिसजातीयं निर्धूमवृत्तित्वत्वेन रूपेण वृत्तेरभावं ताद्रूप्येण जलवृत्तित्वजलान्यनिर्धूमवृत्तित्वोभयाभावं चादायातिव्याप्तितादवस्थ्यात्त
आदायेति । वह्नित्वावच्छिन्नधूमाभावसजातीयस्य तद्व्यापकीभूतस्य तथैवाभावस्य प्रतियोगितावच्छेदकेनैव वह्नित्वादिना वह्नित्वाद्यवच्छिन्नं प्रतिव्यापकतावच्छेदकत्वा
द्धूमव्यभिचारिण्यतिव्याप्तिरतो यावत्त्व इति । तथा च धूमादिसामान्याभावस्यापि साध्याभाववत्तया यावदन्तर्गतत्वात् व्यापकीभूताभावप्रतियोगितावच्छेदकेन धूमत्वादिना
वह्न्यादिकं प्रति व्यापकत्वाभावान्नातिव्याप्तिः । तत्तद्धूमाभावसजातीयस्य तद्व्यापकीभूताभावस्य प्रतियोगितावच्छेदकेन तत्तद्वह्नित्वादिना धूमादिकं प्रति व्यापकत्वाभावा
दसंभवः स्यादित्यत आह तादृशाः साध्याभावा इति । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका अभावा इति तदर्थः । तत्तद्वह्न्यादिकं तु न सा
ध्यव्यापकतावच्छेदकरूपमतस्तद्वह्नित्वाभावमादायैवोक्तदोषः । तादृशयावत्साध्याभावसाजात्यं तादृशसाध्याभाववृत्तिप्रागुक्तान्यतररूपवत्त्वं तच्च व्यतिरेकि
ण्येव प्रसिद्धमतः प्रत्येकमपीति । यद्यपि तादृशयावत्साध्याभावानां प्रत्येकं निरूपितमपि साजात्यं न कुत्राप्यभावेऽस्तीति अप्रसिद्धेरव्याप्तितादवस्थ्यं तथापि तेषामि
न्यतमस्य तस्य तस्येत्येवं शेषपूरणात् । यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयस्य तत्तद्व्यापकीभूताभावस्यालाभाद्दोषः । धूमादिसामान्याभावव्यापकस्य
वह्नित्वादिना घटाद्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादिना वह्नित्वाद्यवच्छिन्नं प्रति व्यापकत्वाद्धूमव्यभिचारिण्यतिव्याप्तिरतः सजातीयस्येति साजात्यं तु प्रागुक्तमेद
कृणाद्यास्त्वं तेन संयोगादित्वं द्रव्यावच्छिन्नद्रव्यत्वादिनिष्ठावच्छेदकताकवह्न्यभावप्रतियोगितावच्छेदकेन द्रव्यत्वादिना वह्न्यादिव्यापकत्वेऽपि धूमगतान्वयेऽस्त्वित्यादेर्नातिव्याप्तिः ।
तादृशाभावस्य धूमादिसामान्याभावसाजात्यविरहादिति ध्येयम् । धूमादिसामान्याभावसजातीयस्य तद्व्यापकीभूतस्य च वह्निसंयोगाद्यभावस्य प्रतियोगिताव
च्छेदकेन वह्निसंयोगत्वादिना वह्न्यादिकं प्रति व्यापकत्वादतिव्याप्तिरतो व्याप्यवृत्तीति । वस्तुतो धूमवद्वृत्तेरभावस्य प्रतियोगितावच्छेदकेन वह्नित्वेन वह्निं प्रति व्यापक
त्वादतिव्याप्तिरतो व्याप्यवृत्तिना निरूपकप्रतियोगितायामत्यन्ताभावव्याप्यवृत्तिपरं । तेन यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यपधि

९९३

अ·वी.
१८

करणे धर्मावच्छिन्नाभावभिन्नत्वोभयाभावसत्ताद्वारा प्रतियोगितया एवंलक्षणघटकत्वान्नोक्तदोषः । धूमाद्यभावसजातीयस्य वह्न्याद्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादि
नावच्छिन्नत्वादिकं प्रतिव्यापकत्वाद्भेदान्वयिप्रतियोगिताकव्याप्तिर्लोव्यापकीभूतत्वेति । यद्यपि तत्र व्यभिचारस्थले तत्तदभावस्यापि निरुक्तसाध्याभाववत्तया न समानाधिकरण
स्य तत्सजातीयाभावस्य प्रतियोगितावच्छेदकं तद्धर्मेण तत्संयोगोलकभेदत्वादिनावच्छिन्नाद्यवच्छिन्नं प्रतिव्यापकत्वाभावात् सामानाधिकरण्येनाप्यत्रावपि नातिव्याप्तिः । त
थापि साध्याभावव्यापकत्वघटितनिरुक्तौ साध्याभावसजातीयाभावे साध्याभावसामानाधिकरण्यस्यापि विशेषणतया न साध्याभावव्यापकीभूतपर्यन्तस्य व्यर्थतेति ध्ये
यम् । यत्तु साध्यतावच्छेदकसंबन्धेन साध्यव्यापकतापर्याप्त्यवच्छेदकं तेन संबन्धेन तद्रूपावच्छिन्नाभावो न साध्याभावपदार्थः । तथा च अयोगोलकभेदत्वस्य तत्संयोगात्मक
साध्यतावच्छेदकसंबन्धेन धूमव्यापकतावच्छेदकत्वमिति न तदवच्छिन्नाभावो न साध्याभावः । किन्तु धूमाद्यभावः एवं च तत्समानाधिकरणस्य वह्न्याद्यभावस्य प्रतियो
गितावच्छेदके न वह्नित्वादिना वह्नित्वाद्यवच्छिन्नं प्रतिव्यापकत्वादतिव्याप्तिरतः समानाधिकरणान्तपदस्य व्यापकीभूतस्योपयुक्तं न चैवं वह्निमान् धूमादित्यत्रैवाव्याप्तिः ।
संयोगेन वह्न्याद्यभावस्यापि साध्याभाववत्तया तस्य केवलान्वयितया तत्सजातीयतद्घटपदीभूतव्याप्यवृत्त्यभावाप्रसिद्धेरिति वाच्यम् । यावन्तो व्याप्यवृत्तयः साध्या
भावास्तेषामेव प्रवेशतया वह्निसामान्याभावस्य निरवच्छिन्नाधिकरणवृत्तित्वेन तद्रूपव्याप्यवृत्तित्वविरहेण तावदन्तर्गतत्वात् । धूमाद्यभावस्तु वह्निमत्त्वायोगोल
कस्थतया व्याप्यवृत्तिरिति तत्तत्तादात्म्येन प्रमेयमात्रस्य साध्यतायामव्याप्तेः । तत्र प्रमेयत्वादेरेव तादात्म्येन साध्यव्यापकतावच्छेदकतया तादात्म्येन तत्त्वावच्छिन्ना
भावाप्रसिद्धेः । अत्र तु यावन्तः साध्याभावाः प्रत्येकं तत्सजातीयनिष्ठं यद्रूपावच्छिन्नप्रतियोगिताकाभाववत्त्वं तत्तत्साध्याभावव्यापकतावच्छेदकं तत्तद्रूपेण यद्रूपाव
च्छिन्नं प्रतिव्यापकत्वमवच्छिन्नेन रूपवत्त्वमित्यर्थः । तन्मेव साध्याभावव्यापकतावच्छेदकत्वमपहाय साध्याभावसमानाधिकरणवृत्तित्वोक्तौ गुरुतान्यत्वविशिष्ट
सत्ताभाववतानुयोगित्वविशिष्टसत्ताभावादित्वमादायातिव्याप्तिः । गुरुतान्यत्वविशिष्टसत्ताभावाभावरूपस्य तु व्याप्यवृत्त्यभावरूपस्यापि निरुक्तसाध्याभावस्य सजातीयस

18

मानाधिकरण्यस्य सत्तास्वरूपेऽभावे वर्त्ततेय द्रव्यान्यत्वविशिष्टसत्ताभाववत्त्वस्वरूपधर्मावच्छिन्नप्रतियोगिताकाभाववत्त्वं तेन द्रव्यान्यत्वविशिष्टसत्ताभाववत्त्वरूपधर्मेण हेतुतावच्छेदकावच्छिन्नं प्रतिव्यापकतावच्छेदकत्वम् साध्याभावव्यापकतावच्छेदकत्वात्कौ तु द्रव्यान्यत्वविशिष्टसत्ताभावत्वावच्छिन्नप्रतियोगिताकाभाववत्त्वं न गुणान्यत्वविशिष्टसत्ताभावाभावपात्मकस्य द्रव्यान्यत्वाद्यभावस्वरूपस्य वा साध्याभावस्य व्यापकतावच्छेदकं द्रव्य एव व्यभिचारादतो नोक्तदोष इति प्राहुः द्रव्यविशिष्टसत्तादिसाध्यादौ व्यापकभिन्नतादृशाभावप्रतियोगितावच्छेदकेन द्रव्यत्वतादिना उत्कर्मान्यत्वविशिष्टसत्तादिकं प्रतिव्यापकतानवच्छेदकत्वाद्व्याप्तेरिति यद्रूपावच्छिन्नेति। न चैवं गगनत्वसंयोगत्वादित्यादौ तादृशगतित्वाद्यभावस्य प्रतियोगितावच्छेदकीभूतगगनत्वत्वादिनापि कालिकसंबन्धेन स्पन्दत्वव्यापकतायाः तिव्याप्तिरिति वाच्यं तादृशाभावस्य यत्संबन्धावच्छिन्नप्रतियोगितायाः अवच्छेदको यो धर्मस्तत्प्रतियोगितावच्छेदकसंबन्धेन हेतुव्यापकत्वस्योक्तत्वादिति भावः। परैः परिष्कृतं निरसितुमाह साधनस्येत्यादिना। तादृशेति यावन्तः साध्याभावाः प्रत्येकं तत्सजातीयव्यापकीभूताभावेत्यर्थः। नत्ववच्छेदकत्वमिति। तत्तत्साध्याभावसजातीयव्यापकीभूताभावप्रतियोगितावच्छेदकत्वमित्यर्थः। प्रथमे दूषणमाह द्रव्यमित्यादिना तादृशाभावेति। साध्याभावसजातीयव्यापकीभूताभावेत्यर्थः। द्वितीये दूषणमाह तेयं प्रमेयत्वादित्यादि। प्रमेयत्वादेरिति। न च सामान्यधर्मेण विशेषाभावस्यापि अवस्थापितत्वात्। प्रमेयत्वेन गगनाभावस्यैव प्रागुक्तप्रमेयसाध्याभावसजातीयस्य प्रतियोगितावच्छेदकप्रमेयत्वमादाय नाव्याप्तिरिति वाच्यं वह्नित्वेन महानसीयवह्न्यभावमादाय धूमसाध्यकवह्नावतिव्याप्तिभिया स्वाधिकरणवृत्तिधर्मानवच्छिन्नप्रतियोगितायाः प्रवेशयत्नात्। प्रमेयत्वेन गगनाभावप्रतियोगिताया योगिताया अतथात्वात्। यद्यपि वह्नित्वेन महानसीयवह्न्यभावमादाय धूमवान्वह्नेरित्यादावतिव्याप्तिवारणार्थं स्वाधिकरणवृत्तिधर्मानवच्छिन्नत्वविशेषणं तदर्थं व्याप्यवृत्तित्वविशेषणं कृतं नोक्तमित्याभाति तथापि विषयत्वाद्यपेक्षया गुरोः प्रमाविषयत्वस्य प्रतियोगितानवच्छेदकत्वेनोक्ताव्याप्तिताद्वस्थ्यमिति भावः। वस्तुतस्तु यावन्तः साध्याभावाः प्रत्येकं तत्सजातीयो यस्तत्तत्समानाधिकरणो व्याप्यवृत्त्यभावस्तत्प्रतियोगित्वमेव व्याप्तिः। व्याप्यवृत्तित्वं तु प्रकृतहेतुसामानाधि

अ·व्या·
९८

करणप्रकृतिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभाववत्त्वं तेन धूमसामान्याभावसमानाधिकरणेन तत्तज्जातीयस्य वह्निधूमोभयत्वावच्छिन्नाभावस्य प्रतियोगित्वेऽपि धूमसाध्यकवह्न्यादौ नातिव्याप्तिस्तादृशोभयाभावस्य वह्नित्वव्याप्यवृत्तित्वाभावात्· एवं च यत्राभावे प्रकृतसाध्यसमानाधिकरणव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावः स एव साध्याभावपदार्थः· तेनोभाववान्प्रमेयत्वादित्यादौ साध्यप्रतियोगिकस्य घटत्वावच्छिन्नाभावस्याधिकरणे घटादौ वर्तमानस्य तत्तज्जातीयहेत्वभावस्य निरुक्तव्याप्यवृत्तित्वाप्रसिद्धावपि नाव्याप्तिः· इत्थं च द्रव्यं सत्त्वादित्यादौ गुणान्यत्वाद्यभावस्यापि निरुक्तसाध्याभाववत्तानधिकरणे गुणादौ वर्तमानस्य तत्तज्जातीयाभावस्य निरुक्तव्याप्यवृत्तित्वाप्रसिद्ध्यैव नातिव्याप्तिः· वाच्यं प्रमेयादित्यादौ तु व्यधिकरणधर्मावच्छिन्नवाच्यत्वाद्यभावसमानाधिकरणस्य निरुक्तघटत्वपटत्वाभ्यां प्रमेयाभावस्यापि घटत्वादिना वाच्यत्वाद्यभावस्येव वा निरुक्तव्याप्यवृत्तित्वशालिनः प्रतियोगितामादाय लक्षणसंभव इति· यथाश्रुतमेव मिश्रलक्षणं सम्यगिति प्रतीमः· न च वह्निमान्धूमादित्यादावव्याप्तिः यावत्साध्याभावान्तर्गतद्रव्यसामान्याभावस्य सजातीयनिरुक्तव्याप्यवृत्तिसमानाधिकरणाभावप्रतियोगित्वस्य धूमा एव सत्त्वात्· संयोगेन धूमस्याव्याप्यवृत्तितया धूमाद्यभावस्य लक्षणाघटकत्वादिति वाच्यं संयोगेन द्रव्यस्याव्याप्यवृत्तितया धूमद्रव्यान्यतराभावस्य निरुक्तशालिनः प्रतियोगित्वधूमादेः सत्त्वात् मिश्रलक्षणमिति प्राहुः· व्यापकीभूतस्य सजातीयस्येत्यादिपरित्यागेन लघुलक्षणमाह यद्वेति· तादृशेति· प्रकृतसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावा इत्यर्थः· अत्रापि येन संबन्धेन साध्यव्यापकता तत्संबन्धावच्छिन्नाभावानां प्रतियोगितावच्छेदकधर्मैस्तत्संबन्धेन यद्रूपावच्छिन्नं प्रति व्यापकत्वमभिप्रेतं इति पर्यवसितार्थः तेन गगनवान्स्पन्दत्वादित्यादौ गगनत्वाद्यभावप्रतियोगितावच्छेदकैर्गगनत्वत्वादिभिः कालिकसंबन्धेन स्पन्दत्वादेर्व्यापकत्वेऽपि नातिव्याप्तिः· न वा वाच्यत्वादिभेदप्रतियोगितावच्छेदकरूपाप्रसिद्ध्यैव केवलान्वयिस्थले लक्षणसंभवा प्रतियोग्यवृत्तित्वेत्यादिग्रंथावतारानुपपत्तिः· न च धूमत्वेन धूमाभावस्यैव वह्नित्वेन धूमवज्जलेऽभाववत्तायाः पिंडान्यत्वाभावस्याप्ययः पिंडान्यत्वनिरूपितस्वरूपसंबन्धेन भेदत्वावच्छिन्नाभावत्वात्प्र

तियोगितावच्छेदकीभूतवह्नित्वभेदत्वादिभिर्वृत्त्या प्रवच्छिन्नं प्रतिव्याप्यकं नावच्छेदकत्वात् धूमवान्वह्नेरित्यादावतिव्याप्तिरिति वाच्यं यत्प्रतियोगिताकाभावे स्वावच्छेदक
वच्छिन्नवद्वृत्तित्वव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभयाभावकात्प्रतियोगिताया एवावच्छेदकधर्मस्य लक्षणघटकत्वादिति संक्षेपः ९२ केचित्तु
साध्याभाववद्वृत्तित्वस्य घटत्वादिनाऽभावमादाय व्यभिचारिण्यतिव्याप्तिरतो यावत्त्व इत्युक्तं तादृशवृत्तित्वाभावत्वं तत्र दैशिकविशेषणतया ग्राह्यम् तेन नि
र्धर्मिवृत्तित्वादिसामान्याभावस्यापि कालिकादिसम्बन्धेन वह्न्यादिवृत्तितापत्त्योपादानेऽपि नातिव्याप्तितादवस्थ्यं वह्निमान्धूमाद्द्रव्यं ज्ञेयत्वादित्यादावव्याप्तिः अपि व्यधिक
रणधर्मावच्छिन्नसाध्याभाववत्त्वं युक्तं तत्त्वादिसमनियतप्रतियोगिताकस्य संयुक्तत्वादिसामान्याभावस्यैतावसत्त्वात् अतो वृत्तिमद्वृत्त्य इत्युक्तं तदयुक्तं वस्तुतस्तु
नास्ति तादात्म्यसम्बन्धेन सद्धेतावेव निरुक्तलक्षणगमनात् व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्तादात्म्यप्रतियोगिकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव व
स्तुगत्या तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकतया तथाविधयावदभावस्यैव हेतौ सत्त्वादिति ध्येयम् येन सम्बन्धेन हेतुता वृत्तिमद्वृत्त्य इत्यत्रापि वृत्तिमत्त्वं तेनैव सं
बन्धेन बोध्यमित्येव पाठः तदभावस्येति तत्सामान्याभावस्येत्यर्थः जात्यादाविति समवेतत्वप्रतिजातित्वात्मसम्बन्धान्तरेण यो वृत्तिमान् तद्वृत्तित्वरूपदर्शि
तं न क्षतिः नाव्याप्तिः हेतुतावच्छेदकसम्बन्धेन यो वृत्तिमान् तद्वृत्तित्वेन तादृशाभावस्य यावदन्तर्गतत्वादिति भावः अत्र वृत्तिमद्वृत्तिता दैशिकविशेषणतया ग्रा
ह्या तेन वाच्यं द्रव्यत्वादित्यादौ व्यधिकरणधर्मावच्छिन्नवाच्यत्वाभाववत्समवेतत्वत्वसमनियतप्रतियोगिताकसमवेतत्वसामान्याभावस्य हेतुतावच्छेदकसम्बन्धेन वृत्तिम
तिसत्त्वे कालिकसम्बन्धेन वर्तमानस्य दैशिकविशेषणतया द्रव्यत्वादेरेतादृशत्वेनाव्याप्तिः अत्रापीत्यपिकारेण साध्याभाववति वृत्तिरपि हेतुतावच्छेदकसम्बन्धेन
वाच्येति व्यंजितं तेन तत्तद्धूमावयवगान्यत्वाभावस्यापि परिग्रहः द्वितीयपत्या साध्याभाववत्त्वेन तद्वृत्तिसम्बन्धे सामान्येन यावद्वृत्तिस्तदभावस्य तत्तद्धूमावयववत्समानका
लिकद्रव्यवृत्ते धूमे हेतावसत्त्वेऽपि वह्निमान्धूमादित्यादौ नाव्याप्तिः ननु साध्यप्रतियोगिकाभावमात्रस्य प्रवेशे धूमस्य तत्तद्धूमाभाववद्वृत्तित्वेन वह्निमान्धूमादित्या

दावव्याप्तिः॰ साध्यतावच्छेदकधर्मावच्छिन्नाभावप्रवेशे तु गगनादेः साध्यत्वे द्रव्यादावतिव्याप्तिः॰ साध्याभावस्य केवलान्वयित्वात्। एवं गगनगगनत्वानुमेयत्वाभ्यां पृथिवीत्वादित्यादावव्याप्तिः॰ तादृशधर्मावच्छिन्नप्रतियोगित्वाप्रसिद्धेरत आह साध्याभावश्चेति॰ पर्वतादिरिति॰ प्रथमस्त्यापि जनेतु वह्निमान् धूमात् धूमादित्यादौ तत्त्वातादृशोभयत्वावच्छिन्नाभाववद्वृत्तित्वस्य धर्मस्याप्रसिद्धेरसंभवः स्यादिति॰ प्रकृतसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको व्याप्यवृत्तिश्चाभावोऽत्र साध्याभावपदार्थः॰ यथाश्रुते साध्याभावत्वप्रवेशेऽनासंगत्यापत्तेः॰ अत्रापि येन संबन्धेन व्यापकता तत्संबन्धेन तादृशरूपावच्छिन्नाभावो ग्राह्यः॰ तेन ज्ञानवानात्मत्वादित्यादौ स्वरूपसंबन्धेन साध्यव्यापकस्य प्रमेयत्वादेः कालिकसंबन्धेनाभावाधिकरणसमवेतत्वाभावस्यात्मत्वनिष्ठस्य हेतावसत्त्वेऽपि न क्षतिः॰ यत्तु साध्यतावच्छेदकसंबन्धेन तादृशरूपावच्छिन्नाभावानां विवक्षणात् ज्ञानवानात्मत्वादित्यादावपि नाव्याप्तिः॰ कालिकसंबन्धेन प्रमेयत्वाभावस्य साध्यतावच्छेदकसमवायसंबन्धानवच्छिन्नत्वात्॰ इत्थं च व्यापकतापि तेनैव संबन्धेन ग्राह्या॰ तेन विषयितया साध्यव्यापकस्य ज्ञानादेः साध्यतावच्छेदकसमवायेनाभाववति हेतौ वर्तमानत्वेऽपि द्रव्यं पृथिवीत्वादित्यादौ नाव्याप्तिरिति॰ तन्न॰ वृत्त्यनियामकसंबन्धेन साध्यतायां तदवच्छिन्नप्रतियोगिताप्रसिद्ध्या सद्धेतावव्याप्त्यापत्तेः॰ धूमवान् वह्नेरित्यादावतिव्याप्तेश्च॰ संयोगेनाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव व्यापकतया तद्वद्वृत्तित्वाभावस्यापि अधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तित्वात् प्रमेयवान् द्रव्यत्वादित्यादौ तादात्म्येन साध्यतायामव्याप्तेश्च॰ साध्यतावच्छेदकतादात्म्येन प्रमेयत्वादेरेव साध्यव्यापकतावच्छेदकतया तत्संबन्धेन तदवच्छिन्नाभावाप्रसिद्धेरिति दिक्॰ वह्निमान् धूमादित्यादावव्याप्तिः॰ वह्निसंयोगाभावस्यापि साध्यव्यापकतया तदभावात्मकवह्निसंयोगवद्वृत्तित्वसामान्याभावस्य घटादिनिष्ठहेतावसत्त्वात् ततो व्याप्यवृत्तित्वेनाभावो विशेषणीयः॰ वस्तुतो निरुक्तसाध्याभावाधिकरणत्वमवश्यं विशेषणताविशेषसंबन्धेन ग्राह्यम्॰ अन्यथा द्रव्यं गुणत्वादित्यादौ द्रव्यत्वाभावस्य कालिकसंबन्धेनाधिकरणे गुणस्य वृत्तेर्द्रव्यत्वाभाववत्समवेतत्वसामान्याभावस्य ज्ञानादिनिष्ठस्य हेतावसत्त्वादव्याप्तेः॰ तथा च वह्निसंयोगाद्यात्मका

२०

भावस्य तादृशसंबन्धेनाधिकरणाप्रसिद्धेस्तस्मात्तथाव्याप्तिवारणार्थं न व्याप्यवृत्तिपदं परं तु रूपवान्पृथिवीत्वादित्यादौ नित्यत्वादिना रूपाद्यभावस्यापि तादृशधर्मावच्छिन्नाभावतया नद्वत्समवेतत्वाभावस्य नित्यरूपादिनिष्ठस्य हेतावसत्त्वादव्याप्तिरतो व्याप्यवृत्तिपदं न च तस्यापि व्याप्यवृत्तित्वात्कुतो देशतास्वरूप्यं यत्प्रतियोगिताकाभावे स्वावच्छेदकसंबन्धेन स्वावच्छेदकावच्छिन्नावच्छिन्नत्वस्य व्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वस्य च योजनीयेदं : साध्यव्यापकतावच्छेदकरूपावच्छिन्नतादृशप्रतियोगिताकाभावस्योक्तत्वान्नित्यत्वादिना रूपाद्यभावस्य व्यधिकरणधर्मावच्छिन्नाभावभिन्नस्य स्वावच्छेदकीभूतनित्यत्वाद्यवच्छिन्नत्ववृत्तित्वादेवयुक्ततरः · एते न संयोगाभावत्वादेः साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतानवच्छेदकत्वेऽपि न व्याप्यवृत्तिपदवैयर्थ्यमिति ध्येयम् · ननु वह्निमान्धूमादित्यादावालोकाद्यवच्छिन्नत्वादिनाऽऽलोकादिवृत्तिसामान्याभावोऽपि साध्याभाववद्वृत्तिताभावो यावदन्तर्गतः संयोगादिसंबन्धेन वह्निसामान्याभाववद्वृत्तित्वस्याप्यालोकादिवृत्तिमध्ये निवेशात् · एवमपि धूमत्वावच्छिन्नत्ववदभावव्यधिकरणीभूतमहानसवृत्तित्वादेर्महानसवृत्तित्वादिना योऽभावः सोऽपि साध्याभाववद्वृत्तिताभावो यावदन्तर्गतस्तयोर्धूमादावसत्त्वादसंभव इत्यत आह तद्वद्वृत्तिताभावो यावदिति · भिन्नलक्षणद्वयापत्तेर्न तत्साध्याभाववद्वृत्तित्वत्वव्यापकव्याप्तज्ञवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वप्रवेशे आलोकादिवृत्तित्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य हेतावसत्त्वाद्वह्निमान्धूमादित्यत्राव्याप्तिरतोऽन्यथा व्याचष्टे स्वव्यापकेति · स्वं प्रतियोगितानव्यापकीभूतं यत्साध्याभाववद्वृत्तित्वत्वं तद्व्यापकप्रतियोगिताकत्वमित्यर्थः · व्यधिकरणधर्मावच्छिन्नसाधारणसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वाद्व्यभिचारिण्यतिव्याप्तिरत उक्तं तत्तदिति · तथा च निर्धूमवृत्तित्वाभावस्यैव तत्र व्यापकत्वे तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगितया तस्य वह्नावसत्त्वान्नातिव्याप्तिरिति भावः · स्वनिष्ठवृत्तित्वत्वेन वृत्तिसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वानवच्छिन्नप्रतियोगिताकस्य यस्य कस्याभावस्यैव व्यभिचारिण्यतिप्रसंगादिति कृतं तत्रापि निर्धूमवृत्तित्वत्वस्यापि सामान्यतः साध्याभाववद्वृत्तितात्वानतिरिक्त-

वृत्तित्वत्वघटितेनाभावमादायेति । १

व्या. प.
२१

समानाधिकरणधर्मेतया तत्तदवच्छिन्नसामान्याभावमादायातिव्याप्तिवारणायोगात् तत्र हि मूले नचैवमपि कथमधिकरणधर्मावच्छिन्नद्रव्यत्वाभाववद्वृत्तित्वेन घटादिजातिता-
न्यतराभावं घटादौ तेरभावमादाय द्रव्यं पृथिवीत्यादित्यादावव्याप्तिः हेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वमिव्यावृत्तित्वेनापि प्रतियोगिताया विशेषणीयत्वात् अतएव
व तत्तत्साध्याभाववद्वृत्तित्वावच्छिन्नाभावा इत्युक्तौ वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः साध्याभाववद्वृत्तित्वावच्छिन्नं यद्धेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वभिन्ना
वृत्तिप्रतियोगिकं तादृशप्रतियोगिताकस्य वृत्तिमदत्यन्ताभावस्याप्रसिद्धेरतो निषेधद्वयगर्भता तेन घटत्वादिना तादृशवृत्तित्वाभावमादायैवोपलक्षणसंगतिः केचित्तु यद्य-
पि तत्तत्साध्याभाववद्वृत्तित्वावच्छिन्नाभावान्तोऽभावा इत्येव लाघवाद्वक्तुमुचितं तथापि वाच्यं ज्ञेयत्वादित्यादौ नातिव्याप्तिर्हेतौ जगत एव साध्याभाववत्तादात्म्यतया
तादृशतादात्म्यत्वावच्छिन्नाभावाप्रसिद्ध्याव्याप्तिरतो निषेधद्वयगर्भता इत्थं च विरहद्वयघटत्वपटत्वाभ्यामेव तादृशवृत्तित्वाभावः सुलभ इति प्राहुः यत्तु वृत्तित्वत्वमपे-
क्ष्य गुरौ वाच्यत्वाभाववद्वृत्तित्वस्य प्रतियोगितानवच्छेदकतया केवलान्वयिन्यव्याप्तिरित्यतस्तत्साध्याभाववद्वृत्तित्वावच्छिन्नाभावो नोक्तः ननु उक्तगुरुधर्मस्य
प्रतियोगितावच्छेदकत्वमादायैवलक्षणकरणात् अन्यथैतल्लक्ष्ये वृत्तिमद्भिन्नेति वैयर्थ्यापत्तेः वृत्तित्वमात्रस्यैव तत्तत्साध्याभाववद्वृत्तित्वातिरिक्तसमाना-
धिकरणधर्मतया तदवच्छिन्नाभावमादायैवाव्याप्त्यभावात् किं चैवं गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे तद्भिन्नं द्रव्यत्वादित्यादावतिव्याप्तिरपि स्यात् न च घट-
वृत्तित्वापेक्षया गुरुत्वेन तद्भेदाभाववद्वृत्तित्वावच्छिन्नाभावाप्रसिद्धेः न च घटवृत्तित्वस्य साध्याभाववद्वृत्तित्वातिरिक्तसमानाधिकरणधर्मतया तदव-
च्छिन्नाभावस्योपलक्षणघटकत्वात् एवं सति द्रव्यं द्रव्यत्वादित्यादौ स्वेतरद्रव्यत्वाभाववद्वृत्तित्वस्य जलवृत्तित्वापेक्षया गुरुत्वेन तदवच्छिन्नाभावाप्रसिद्ध्यातिव्या-
प्तिर्दुर्वारेति दिक् यस्य यस्य भिन्नसमानाधिकरणस्य यावत्त्वं सम्मतं तत्तत्प्रतियोगितासामान्यधिकरणाय निवेशापेक्षया लाघवमनुसृत्याह वृत्तित्वं वृत्तिनावेति तत्-
तत्साध्याभाववद्वृत्तित्वातिरिक्तेनेति पूर्वेणान्वयः तथा च तत्तत्साध्याभाववद्वृत्तित्वातिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नेत्यर्थः साध्याभाववद्वृत्तित्ववृत्ति

तद्वृत्तित्वस्य घटत्वेनाभावमादायातिव्याप्तिः। ३

21

नावेतिपाठे साध्याभाववन्मद्संपातायातं यद्यपि वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य घटत्वादिसामान्याभावस्य घटत्वाभावस्य वा हेतावसत्त्वाद्वह्निमान्धूमादित्यादौ सर्व
त्रासंभवः। नाद्यधर्मानवच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताकाभावविवक्षणेऽपि घटभेदत्वेन घटभेदादिनिर्वह्निवृत्तित्वान्यतराभावस्य तादृशस्य हेतावसत्त्वात्। तथापि पूर्ववक्ष्या
पि रूस्ये हेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वभिन्ना वृत्तित्वेन प्रतियोगित्वं निवेशनीयमित्यदोषः। स्वन्यूनवृत्तिधर्मानवच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताया एव तादृश वृ
त्तित्वस्यातिरिक्त वृत्तित्वनिष्ठधर्मानवच्छिन्नत्वं विवक्षितमिति केचित्। वृत्तित्ववृत्तिना धर्मेण वेतिपाठे तु धूमत्वाद्यभावमादायासंभववारणाय नेदं धर्मेण वेति वृत्सामान्येऽन्वयः। तं
भव धूमत्वत्वघटभेदत्वादेस्तादृशवृत्तित्वव्यतिरिक्तधर्मत्वादेव नासंभवः। वाच्यं प्रमेयादिसाध्यकेतु तादात्म्येन हेतौ विरहाद्घटत्वेन घटत्वाभावमवृत्तिगगनादिना वा वृत्तित्वाभावमा
दाय लक्षणसमन्वय इति ध्येयम्। स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वेऽस्य फलमाह आलोकाद्यवृत्तित्वेनेति। निर्वह्निवृत्तित्वस्येति। प्रतियोगितायास्तत्तत्साध्याभाववद्वृत्ति
त्वव्यापकत्वप्रदर्शनार्थं न तु स्वव्यापकवृत्तित्वत्वे तु क्वापि आलोकादिवृत्तित्वावच्छिन्नाभावस्य वारणसंभवात्प्रतियोगिताव्यापकत्वादिरीत्या तु तत्तत्साध्याभाववत्त्वप्रवेशो व्यर्थ इ
त्याशयमालोकावृत्तिवृत्तित्वाभावमादायाव्याप्तिवारणार्थं तिस्रावस्यकतत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगितत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नात्यन्ताभावप्रतियोगि
प्रतियोगितावत्त्वरूपपर्यवसितार्थे तत्तत्साध्याभाववतः सत्त्वे वा निविष्टतया वैयर्थ्यशङ्कानवकाशमिति भावः। तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगितेत्यस्य फलमा
ह यथेति। आदिना वाच्यत्वादेः परिग्रहः। घटत्वादेः साध्यव्यापकतावच्छेदकत्वाभावात्तदवच्छिन्नवह्न्यभावस्य लक्षणघटकत्वादत उक्तमिंधनत्वादीति। इन्धनत्वावच्छिन्नाभाव
स्य महानसादावसत्त्वात्तमादाय सत्तेर्विरहात्सत्तो वह्न्यभावेति। तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकत्वस्यानुक्तावसंभव एवेत्यान्तु वह्निमान्धूमादित्यत्राव्याप्तिभावे प्रमेय
मात्रस्य हेतुतास्थले तत्तत्प्रमेयनिष्ठवृत्तित्वाभावस्य प्रमेयान्तरवृत्तेस्तत्प्रमेये विरहादित्येवमादावपि तु सर्वसाधारण्येनाह स्वनिष्ठेति। स्वनिष्ठं यत्साध्याभाववद्वृत्तित्वं तत्सा
ध्याभावस्येत्यर्थः। अत्र घटत्वादेः साध्ये स्वीयविशेषणतया घटान्यत्वे हेतावतिव्याप्तिः। साधनस्यैव हेतुतावच्छेदकसंबन्धेन वृत्तिमत्तया तन्निष्ठयावदभावस्यैव हेतौ सत्त्वात्तन्न

२२

आ.वा:
२२

चैत्रस्वीयसत्त्वान्साध्यसमानाधिकरणत्वेन हेतुविशेषणत्वेनातिव्याप्तिरिति वाच्यं तथापि द्रव्यत्वादौ साध्ये स्वीयत्वसमवायादिना सत्त्वादिहेतावतिव्याप्तिः तादृशसंबन्धेन हेतोरेव वृत्तिमत्त्व पातित्वेषु यावद्भावत्वस्य साध्यसामानाधिकरण्यस्य च हेतौ सत्त्वात्. एवं महाकालान्यो घटादित्यादौ कालिकसंबन्धेन हेतावतिव्याप्तिः. वृत्तिमन्मात्रस्यैव हेतुताघटकसंबन्धेन महाकालवृत्तेस्तेन संबन्धेन तत्र वृत्तित्वाभावासंभवात्. न च महाकालवृत्तित्वसामान्याभावस्यापि प्रलयावच्छेदेन घटादावेव वृत्तिमत्त्वेनातिव्याप्तिरिति वाच्यं साध्यसामानाधिकरण्यस्य व्याप्यवृत्तित्वात्. अन्यथा घटादिहेतावपि खण्डकालावच्छेदेन महाकालवृत्तित्वाभावसत्त्वादुक्तातिव्याप्तितादवस्थ्यात्. एवं द्रव्यत्वादेः साध्यतायामवृत्तिगगनादिहेतावतिव्याप्तिर्विशिष्टसत्तायामव्याप्तिः. द्रव्यान्यस्मिन्गुणत्वे विशिष्टसत्ताया वृत्तिमत्त्वादिति वदन्ति. यत्त्विह वृत्तिमद्वृत्तयो यावन्तः साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वावच्छिन्नाधिकरणतासामान्यवत्त्वं व्याप्तिरिति वक्ष्यते तदा नैतेषामपि दोषः प्रसज्यति. वृत्तिमद्वृत्तित्वस्य च सर्वत्रैव दैशिकविशेषणतासंबन्धेन वृत्तेर्निर्वचनीयत्वात्. अन्यथाधिकरणत्वमात्रस्यैव संयोगादिसंबन्धेनावर्तमानत्वाद्गगनान्यवृत्तित्यादावतिव्याप्तिरिति ध्येयम्. अन्ये त्वित्यादि. अत्र साध्याभावकूटाधिकरणवृत्तित्वस्य घटत्वादिनाभावमादाय व्यभिचारिण्यतिव्याप्तिरतो यावन्त इति. तथा च तादृशवृत्तित्वसामान्याभावस्य हेतावसत्त्वान्नातिप्रसंगः. न च तादृशवृत्तित्वत्वावच्छिन्नाभाववत्त्वोक्तावपि तादृशातिव्याप्त्युदासः संभवतीति वाच्यं तथापि तादृशवृत्तित्वत्वेन घटादेरभावमादायातिव्याप्तितादवस्थ्यात् तादृशवृत्तित्वत्वस्य गुरुतयात्तदवच्छिन्नाभावाप्रसिद्धेश्च. अत एव तादृशवृत्तित्वसामान्याभाववत्त्वमपि न विवक्षितं केवलान्वयिन्यव्याप्तेश्च वाच्यत्वाभावकूटवद्वृत्तित्वसामान्याभावस्य हेतावसत्त्वादिति भावः. इत्थमपि वाच्यत्वाभावकूटवद्वृत्तित्वसामान्याभावस्यैव यावदन्तर्गतस्य ज्ञेयत्वादिहेतावसत्त्वादयं ज्ञेयत्वादिसाध्यकाव्याप्तिरतो वृत्तिमद्वृत्तय इत्युक्तम्. तथा चैतस्य वृत्तिमद्वृत्तिताभावस्य नित्यत्वाद्यावदन्तर्गतत्वेऽपि तु घटत्वादिना तादृशवृत्तित्वाभावस्यैव सत्त्वं ज्ञेयत्वादिहेतौ वर्तत इति नाव्याप्तिः. अत्र वृत्तिमत्त्वादिकं पूर्वलक्षणेऽपि देयम्. तेन न पूर्वोक्तदोषः. ननु प्रलयभिन्नं गोत्वादित्यादौ कालिकसंबन्धेन हेतावतिव्याप्तिः. महाकालस्य कालिकसंबन्धेन प्रलयान्यत्वाभावकूटवत्त्वेन तत्र हेतुताघटकसंबन्धेन या वृत्तिता तस्याः अधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वात्. न च दैशिकविशेषणतया

22

साध्याभाववद्वृत्तित्वत्वविशिष्टनमतत्तादृशवृत्तित्वस्यलघुतया वृत्तित्वसामान्याभावस्याप्रसिद्ध्या घटादिवृत्तिगोत्वे हेतावसत्त्वान्नातिव्याप्तिरितिवाच्यम्· घटत्वाभाववान्पटत्वादित्या
दावभावसाध्यकेऽव्याप्तिप्रसंगात्· साध्याभाववत्पदान्तर्गतस्य घटत्वस्वरूपसाध्याभावस्य विशेषणतयाधिकरणाप्रसिद्धेः दैशिकविशेषणतया वृत्तिमतामेवसाध्याभावा
नां प्रवेशे तु घटत्वाभाववान्पटत्वादित्यादावव्याप्तिर्व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव तन्मते दैशिकविशेषणतया वृत्तिमत्तया तद्वद्वृत्तित्वस्यापि तादृशाध
र्मावच्छिन्नाभावस्यैव वृत्तिमद्भिन्नत्वात्· एवं कालिकसंबन्धावच्छिन्नप्रतियोगिताके गगनत्वाभावस्याभावे साध्ये ज्ञानादिहेतावव्याप्तिः· गगनत्वाद्यभावघटितत्वस्य
दैशिकविशेषणतासंबन्धेन पदाधिकरणानवृत्तित्वसामान्याभावस्य वृत्तिमतिशक्तादेः प्रसिद्धस्य ज्ञानादिहेतावभावादितिचेन्न· साध्यतावच्छेदकसंबन्धेन स्वप्रतियो
गितावच्छेदकविशिष्टसाध्यवत्ताबुद्धेः संसर्गविधया प्रतिबन्धकतावच्छेदको यः संबन्धस्तेन वृत्तिमतः साध्याभाववद्वृत्तितादृशसंबन्धेनैवाधिकरणत्वस्योक्तत्वात्तत्सं
योगाभाववान्प्रमेयत्वादित्यादौ च संयोगादिरूपसाध्याभावो न तादृशसंबन्धेन वृत्तिमान्निरवच्छिन्नसमवायादिसंबन्धेनैव संयोगादिनिश्चयस्य तद्विरोधित्वादतो न
तत्राव्याप्तिः· केवलान्वयिनि तादृशाभावप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताबुद्धेरप्रसिद्धेरेव प्रसक्त्यभावात् न हि घटत्वेन वाच्यत्वं नास्तीति बुद्धौ जातायामपि घटत्वेन वा
च्यत्वमस्तीति ज्ञानानुत्पादात् घटत्वाभाववत्ताबुद्धिं प्रति च समवायादिना घटत्ववत्तानिश्चयस्य प्रतिबन्धकत्वादेवोक्तव्याप्तेर्मुदासः· तादृशवृत्तित्वत्वव्यापकप्रतियोगि
ताकत्वप्रवेश एव समुदयपदं सार्थकं भवत्यतः प्रागेव वृत्तित्वाभावं व्याख्येतादृशेति· स्वेति· स्वं प्रतियोगितानवच्छेदकं यत्साध्याभाववद्वृत्तित्वं तत्त्वं तद्व्यापकप्रतियो
गिताकेत्यर्थः· प्रयोजनं चोक्तं· वह्निमान्धूमादित्यत्रालोकवृत्तिसामान्याभावस्य साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्याभावत्वेऽपि तस्य हेतावसत्त्वादव्याप्तिरतः स्व
व्यापकेति· तथा चालोकवृत्तित्वावच्छिन्नप्रतियोगित्वस्य व्यापकं न निर्धूमवृत्तित्वत्वं धूमवत्यनैव्यभिचारादयमभावो न तत्स्वरूपघटकस्तेन नाव्याप्तिः· प्रतियोगिताव्यापकतादृश
वृत्तित्वत्वव्यापकत्वानुक्तौ वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः· प्रतियोगिताव्यापकसाध्याभाववद्वृत्तित्वत्वं न तत्र कस्य घटवृत्तित्वाभावस्याप्यवच्छेदकं तस्य हेतावसत्त्वात्·तदुपाद

ग्रा.वा.
२३

नैव तादृशाभावप्रतियोगित्वं नवा च तादृशाभावकूटवद्वृत्तित्वव्यापकत्वं परवृत्तित्वेऽव्यभिचारादिनैतस्य तत्त्वरूपायाः त्वान्ताव्याप्तिरिति भावः। अत्र च प्रतियोगित्वं स्वरूपेन वृत्तिधर्मानवच्छिन्नत्वं ग्राह्यं तेन दण्डाखण्डेपत्वादित्यादौ घटवृत्तित्वेन वृत्तित्वसामान्याभावस्य गगनादिवृत्तेर्हेतावसत्त्वेऽपि नाव्याप्तिः। सार्वभौममते एकविशिष्टापरत्वमेवोभयत्वं तेन घटवृत्तित्वपटान्यवृत्तित्वोभयाभावमादाय नाव्याप्तिः। तादृशप्रतियोगितायां तादृशवृत्तित्वत्वाव्यापकत्वादिति ध्येयम्। स्वव्यापकत्वरूपस्य पूर्वोक्तलक्षणे नैव व्यावृत्तिः। तादृशवृत्तित्वत्वव्यापकत्वलेस्य तु न प्रागिव वह्निमान् धूमादित्यादावव्याप्तिः। न च महानसादेः साध्याभावकूटानधिकरणात्। किन्तु केवलान्वयिस्थल एवैतादृशेनाह उक्तप्रायिकमिति। न्यव्यापकेत्याद्यपेक्षया लाघवात् साध्याभावकूटवद्वृत्तित्वानवच्छिन्नाभावस्य यावत्त्वेन निवेशं तु तादृशवृत्तित्वत्वेन घटादेरभावमादाय केवलान्वयिनि लक्षणासंभवादिति वाच्यं वह्निमान् धूमादित्यादौ सर्वथासंभवापत्तेः। निर्वह्निवृत्तित्वाद्यपेक्षया गुरुत्वेन वह्न्यभावकूटवद्वृत्तित्वत्वव्यापकत्वाभावकूटवद्वृत्तित्वत्वादेः प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावप्रसिद्धेरिति भावः। ननु वृत्तिमत्त्वयोर्यावत्तः साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकाभावासत्त्वमेवोच्यतां तत्तद्रूपेण निवेशेनेत्यत आह साध्याभावेति। साध्यप्रतियोगिकाभावेत्यर्थः। अधिकरणेति। साध्यप्रतियोगिकाभाववद्वृत्तित्वसामान्याभावस्य वृत्तिमात्रनिष्ठत्वादिति भावः। अतद्नितथा च धूमाभावकूटवद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य निर्धूमवृत्तित्वसामान्याभावस्यैव वह्न्यादिहेतावसत्त्वान्न व्यभिचारिण्यतिव्याप्तिः। नैवं गगनाभाववान् वाच्यत्वादित्यादावव्याप्तिः। गगनस्यापि साध्याभावतया तदधिकरणाप्रसिद्धेरिति वाच्यं वृत्तिमत्त्वेनापि साध्याभावविशेषणीयत्वात्। नव्यमते गगनस्य स्वाभावविरहत्वे मानाभावादिति भावः। अत्र साध्याभावकूटवद्वृत्तित्वत्वव्यापकप्रतियोगितेत्यत्र कूटपदस्य फलं ग्रन्थकृतैवोक्तं प्रतियोगिताव्यापकसाध्याभाववद्वृत्तित्वत्वमित्यत्र कूटपदस्य फलं तु नालोकावृत्तेरभावमादाय वह्निमान् धूमादित्यादावव्याप्तिवारणं तादृशाभावस्य स्वव्यापकवृत्तित्वत्वकप्रतियोगिताकेत्यनुक्तावपि वारणसंभवात्। सत्त्वादावपि तदभावप्रतियोगितासत्त्वात्। पर्वतालोकवह्निवृत्तित्वस्याभावमादायाव्याप्तिवारणमेव तत्फलमिति प्राञ्चस्तन्नुदं स्वाश्रयनिष्ठान्यताभावाप्रतियोगिनः सा

23

ध्याभाववद्वृत्तित्वस्याश्रये वर्त्तमानस्याभावस्य प्रतियोगिप्रतियोगिताकाभावत्वेनैव नानावृत्तित्वाभावानां निवेशात्. तच्च वसत्त्वदेव वृत्त्यन्तरस्यानभिधेयेऽन्यथा त
न्निवेशे फलानुसंधानस्य वा पुनरुक्तस्य सहृदयेनानुसंधानस्य समानत्वात्. अन्यथा साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकस्याधिकरणे धर्म्मविशिष्टत्वाभावस्यापि प्रति
योगिताव्यापकस्य साध्याभाववद्वृत्तित्वत्ववत्त्वाभावादेव युक्तत्वात्तमादाय व्यभिचारिण्यतिव्याप्तिवारणार्थं ग्रन्थकृता वृत्त्यन्तरोपन्यस्तानां चिन्त्यापत्तेरिति ध्येयम्. धूमवत्तिना
व्याप्तिरिति परेणान्वयः. एवमग्रेऽपि इदमापाततः साध्यतावच्छेदकसंबन्धावच्छिन्नाभावप्रवेशेऽप्यत्रातिव्याप्तेर्दुरुद्धरत्वात्. साध्याभाववत्संयुक्तत्वसामान्याभावस्योक्ता(
पि संयोगेन वृत्तिमत्त्वसत्त्वात्. वह्न्यवयवमात्रसंयुक्तवस्तुनोऽसत्त्वादिति ध्येयम्. ननु संबन्धविशेषाविवक्षायां प्रलयोत्पन्नधर्म्मानित्यरूपादिकमेव वह्न्यभाववद्धिकरणं तदा
त्वं जन्यविभुमूर्त्तानां यथायोगं कालिकसंयोगादिकृत्स्नविशेषणताभिर्वह्निमत्त्वेन द्रव्यस्य वह्न्यभाववद्वृत्तित्वविरहाद् द्रुतसमानकालीनत्वधर्म्मासंयोगिद्रव्यस्याप्रसिद्धत्वात् न
था च तत्र साध्याभाववद्वृत्तित्वमिति हेतुतावच्छेदकसंबन्धेन हेतुप्रसिद्ध्यैव न धूमेऽतिव्याप्तिः. समवायेन धूमस्य धूमस्य हेतुत्वे तु विरुद्धत्वादेव न दुष्टत्वसंभवात् तथा संयो
गेन चेति. तथात्वे वह्निः साध्यत्वे तथा चात्र वह्न्यभावाधिकरणं पर्वतीयरूपादिकं तत्र हेतुतावच्छेदकसंबन्धेन तद्वृत्तित्वस्य रूपत्वादेः प्रसिद्धस्याभावो वर्त्तत एव वह्न्यवयवत्वे इ
त्यतिव्याप्तिः स्यादिति साध्यतावच्छेदकसंबन्धेन साध्याभावस्य प्रवेशे न स्यादिति भावः. ननु समवायेन वह्न्यभावस्य वह्न्यवयववत्तासमानाधिकरणत्वात्. अग्रे वक्ष्यमा
णेन साध्याभावानां हेतुसामानाधिकरण्यविशेषणेनैव न तादृशाभावमन्तर्भाव्योक्तरीत्या वातिव्याप्तिरतो हेत्वन्तरमाह पर्वतेति. अत्र समवायेन वह्न्यभावस्य पर्वते सं
योगेन वह्न्यभावस्य च वह्न्यवयवे हेतुसमानाधिकरणत्वात्. तदुभयघटितसाध्याभाववदधिकरणं पक्षिन्यरूपादिकं तत्समवेतत्वाभावस्य तादृशसंयोगहेतौ सत्त्वाद्
त्यतिव्याप्तिः. यत्तु संयोगेन वह्निः साध्यत्वे वह्न्यवयवस्य विरुद्धत्वात् हेतौ साध्यसामानाधिकरण्यविशेषणेनैव वारयितुं शक्यत्वात्. अतः पर्वतेत्यादिहेत्वन्तरमि
ति. ननु च वह्न्यवयवेऽपि वह्न्यन्तरस्य संयोगेन वृत्तौ विरोधविरहात्. तादात्म्येन साध्यत्वानुरोधात् साध्यसंबन्धितामात्रस्यैव सामानाधिकरण्यप्रवेशप्रयत्नादिति भावः. एवं

धूवेति पर्वतस्य संयोगावच्छिन्नवह्न्यभावानधिकरणत्वात् वह्निमत्पर्वतस्य समवायावच्छिन्नवह्न्यभावानधिकरणत्वादिति भावः॥ नाव्याप्तिरिति। प्रागुक्तरीत्या साध्याभावकूटवृत्तिनिरूपत्वादौ हेतुतावच्छेदकसंबन्धेन हेतुप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिर्नेत्यपि द्रष्टव्यम्। अत्र च वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकत्वमत एवेत्युक्तं तेन धनी चैत्रत्वादित्यादौ स्वामित्वादिसंबन्धेन साध्यतायां नाव्याप्तिः। साध्यतावच्छेदकसंबन्धातिरिक्तसमानाधिकरणसंसर्गानवच्छिन्नप्रतियोगिताकसाध्याभावो ग्राह्य इति तु न युक्तं धनी दुम्बत्वादित्यादौ व्यधिकरणसंबन्धेन साध्याभावस्यैव तादृशत्वे नाव्याप्तिप्रसंगात्। ननु साध्याभावो यदि साध्यतावच्छेदकरूपेण विवक्षितस्तदा प्रमेयं वाच्यत्वादित्यत्राव्याप्तिः प्रमेयत्वावच्छिन्नप्रतियोगिताप्रसिद्धेः। न च साध्यतावच्छेदकतानिरूपितसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावस्याभावो वक्तव्यः। तथा चात्रिगगनादिना प्रमेयघटेतराभावस्यैव न सुलभ इति वाच्यम्। ग्राह्यत्वप्रमेयत्वान्यतमत्वादित्यादावतिव्याप्तिस्तादृशान्यतमत्वस्य ग्राह्यत्वघटितत्वापेक्षया गुरुत्वेन प्रतियोगितानवच्छेदकतया व्यधिकरणधर्मावच्छिन्नाभावानामेव तादृशसाध्याभावत्वादत आह। तथेति। स्वप्रतियोगिताप्रतियोगिताव्यापकसाध्यतावच्छेदकस्येत्यस्य फलमाह। पृथिवीत्वाभावादाविति। ननु द्विपक्षो घटादिः। तथा च घटपटादिवृत्तित्वावच्छिन्नाभावघटितसाध्याभावकूटाधिकरणप्रसिद्ध्या पृथिवीत्वाभाववज्जलत्वादित्यादौ नाव्याप्तिः। प्रतियोगितायाः पर्याप्त्या एवपि सत्त्वेन साध्यतावच्छेदकस्य तद्व्यापकतया तादृशाभावानां लक्षणघटकत्वात्। प्रतियोगिभेदेपि एकधर्मावच्छिन्नप्रतियोगिताया एकत्वादिति भावः। सद्धेताविति। नाव्याप्तिरित्यन्वयः। वह्निमान् धूमादित्यत्र साध्यतावच्छेदकसंबन्धेन विपक्षीभूतजलादिवृत्तित्वावच्छिन्नाभावकूटस्य ग्रहणे द्रव्यं पृथिवीत्वादित्यादौ च विपक्षीभूतरूपरसादिप्रत्येकासमवेतसामान्याभावकूटस्य जात्यादावधिकरणतासत्त्वात् तदप्रसिद्धिनिबन्धनाव्याप्तेस्तत्स्थले विरहात् द्रव्यं नोपदत्तं ननु यावत्तावेकाधिकरणं यत्तावत्समुदायस्य विवक्षायां नोक्ताव्याप्तिरत आह। पृथिवीत्वादाविति। साधनसमानाधिकरणत्वेन साध्याभावस्य विशेषणीयत्वे न जातित्वावच्छिन्नाभावमादाय नातिव्याप्तिः संभवत्याऽपि प्रत्युपात्तम्। तथा च जलासमवेतत्वावच्छिन्नाभावस्य तेजोसमवेतत्वावच्छिन्नाभावस्य च साधनसमानाधिकरणत्वात्। ननु म

पर्याप्तसाध्याभाववद्वृत्तित्वमिति जात्यादौ प्रकृतहेतोरसत्त्वादतिव्याप्तिरिति भावः । द्रव्यत्वस्य समवायेन हेतुत्वे तादृशसाध्याभाववद्वृत्तित्वमिति जात्यादौ हेतुतावच्छेदकसंबन्धेन तत्प्रसिद्धौ
वनातिव्याप्तिः स्यादत उक्तं द्रव्यत्वप्रकारकेति । सामान्यादौ स्वरूपसंबन्धेन वृत्तिर्विषयतादावेवमुक्तप्रमाविशेष्यतादाविति नातिव्याप्तिरित्यन्वयः । तादृशधर्मप्रतीति
विषयत्वमादाय जात्यादावपीत्यत आह प्रमेति । अत्र प्रतियोगिताव्यापकत्वं साध्यतावच्छेदकताघटकसंबन्धेन ग्राह्यम् । तेन नित्यज्ञानवत्त्वस्यात्मनः साध्यतायामीश्वरत्वाद्
हेतौ घटान्यभेदस्य पटान्यभेदस्य च द्वयोर्विषयतासंबन्धेन प्रतियोगिताव्यापकीभूतनित्यज्ञानात्मकसाध्यतावच्छेदकव्यापकप्रतियोगिताकयोरेकाधिकरणप्रसिद्धावपि ना
व्याप्तिः । न वा तादृशस्यैव साध्ये द्रव्यत्वप्रकारकप्रमाविशेष्यतावत्यत्र पृथिव्यादौ साधनसमानाधिकरणस्य पृथिव्यादिनवद्रव्याणां प्रत्येकभिन्नद्रव्यभेदस्य वृत्तित्वमिति गुणा
दौ हेतोरसत्त्वे पतिव्याप्तिः । न चैवं वह्निमान्यत्वोभयवान् धूमादित्यत्राव्याप्तिः । प्रतियोगितामात्रस्यैव प्रत्येकपर्यवसितत्वेन तत्प्रतिपर्याप्त्याऽरूपसाध्यतावच्छेदकताघटकसंब
न्धेन कस्याप्यव्यापकत्वतया निरुक्तसाध्याभावाप्रसिद्धेरिति वाच्यम् । एकविशिष्टापरत्वान्निरुक्तस्योभयत्वस्य सार्वभौमत्वेन पर्याप्तिसंबन्धेनैव साध्यतावच्छेदकत्वादि
ति भावः । साध्यतावच्छेदकव्यापिकाप्रतियोगितेत्यस्य फलमाह नापीति । घटत्वाभाववत्त्वेन साध्यत्वे साध्याभाववद्वृत्तित्वं घटस्यैव सुलभमत उक्तमभावत्वादिनेति आ
दिना प्रमेयपरिग्रहः । तथा चाभाववान् प्रमेयत्वाद्वा घटत्वादित्यत्र साधनसमानाधिकरणतत्तद्घटान्यत्वाभाववदधिकरणाप्रसिद्ध्याव्याप्तिः स्यादतः साध्यतावच्छेदकव्यापकेति ।
साध्यतावच्छेदकीभूताभावत्वादिव्यापकप्रतियोगिकत्वाभावादेव तत्तद्घटान्यत्वाभावानां तल्लक्षणघटकत्वादिति भावः । अभावस्वरूपेण वृत्तिधर्मानवच्छिन्नायाः स्वप्रतियोगितायाः
साध्यतावच्छेदकसमनैयत्यं वाच्यं तेन घटत्वाभावत्वेन पटत्वाभावत्वेन वा घटाभावाभावप्रमेयत्वसामान्याभावयोरेकाधिकरणप्रसिद्धावपि नोक्तव्याप्तेरसम्भवः । घटत्वाभा
वत्वादेरभावप्रमेयनिष्ठप्रमेयत्वसामान्यनिष्ठप्रतियोगितान्यूनवृत्तित्वेन तादृशप्रतियोगिताकाभावानां लक्षणाघटकत्वात् । एवं साध्यसामानाधिकरण्यमपि हेतौ वक्तव्यं
तेन सत्तावत्समवेतत्वसमनियतप्रतियोगिताकस्य साधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्भिन्नत्वात् तादृशस्य च यावत्स्वहेतौ सत्त्वेऽपि जात्यभाववानुमत्वाद्

ग.ग.
२५

त्वादिविशिष्टहेतौ नास्ति व्याप्तिरिति ध्येयम्। यद्यपि घटवृत्तित्वविशिष्टवाच्यत्वाभावस्य घटान्यवृत्तित्वविशिष्टवाच्यत्वाभावस्य च द्वयोरेकाधिकरणाप्रसिद्ध्या वाच्यं ज्ञेयत्वादि
त्यादावव्याप्तिः। न च घटान्यवृत्तित्वविशिष्टवाच्यत्वत्वं न प्रतियोगितावच्छेदकं तदपेक्षया लाघवाद्घटादिवृत्तित्वविशिष्टत्वस्यैव तथात्वात्। तादृशवैशिष्ट्यावच्छिन्नाभावानां सा
ध्यतावच्छेदकसम्बन्धप्रतियोगिताकत्वाभावोऽप्युक्तः। घटवृत्तित्वविशिष्टे वस्तुमात्र एव तत्प्रतियोगितासत्त्वादिति वाच्यं वाच्यत्वनिष्ठाधेयताविशेषेण घटावच्छि
न्नप्रतियोगिताकाभावस्य तादृशसंसर्गेण घटान्यावच्छिन्नप्रतियोगिताकाभावस्य च द्वयोस्तथाप्येकाधिकरणाप्रसिद्ध्याऽव्याप्तितादवस्थ्यात्। न चाधेयताविशेषेण घ
टादेः प्रतियोगितावच्छेदकत्वे मानाभावः तस्य त्वयाप्यवश्यं वाच्यत्वात्। अन्यथा घटवृत्तित्वविशिष्टवाच्यत्ववान् द्रव्यत्वादित्यादावतिव्याप्त्यापत्तेः। तस्मात्तादृशवाच्यत्व
त्वावच्छिन्नाभावाप्रसिद्ध्या घटवृत्तित्वविशिष्टत्वावच्छिन्नाभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावेन व्यधिकरणधर्मावच्छिन्नस्यैव घटवृत्तित्वविशिष्ट
वाच्यत्वाभावस्य तत्स्थलदत्वात्। तथापि दूषणमिदं गुरुतयोपेक्ष्याह द्रव्यत्वेत्यादि। ननु सार्वभौमाभावमतेऽविरुद्धयोरुभयत्वस्याङ्गीकृततयापि समानाधिकरणयोरेक
विशिष्टापरत्वमेवोभयत्वं तथा च पृथिवीत्वविशिष्टद्रव्यत्वत्वद्रव्यत्वविशिष्टपृथिवीत्वत्वमेव साध्यतावच्छेदकं पर्यवसितमिति तन्न तत्समनियतप्रतियोगिताकत्वाभावा
देनोभयान्यतरत्वावच्छिन्नाभावमादाय नातिव्याप्तिः। न प्रतियोगितायाः पृथिवीत्वेऽसत्त्वेन निरुक्तसाध्यतावच्छेदकस्य तद्व्यापकत्वात् तत आह अपि चेति। उद्देश्य
विधेयस्थले समानलिंगकत्वस्यानियतत्वात्। पृथिव्यामन्यत्वविशिष्टद्रव्यत्वस्य साध्यताभ्रमनिराकर्तुं पक्षमुद्दिश्य वक्ति द्रव्यमिति। पृथिवीति। पृथिव्यन्यत्वे सति द्रव्यान्या
समवेतसकलद्रव्यसमवेतवदित्यर्थः। न च सकलद्रव्यवृत्तित्वान्तर्भावेण द्रव्यत्वस्य साध्यत्वे द्रव्यान्यासमवेतत्वावच्छिन्नाभावस्य तादृशसाध्यतावच्छेदकसमनि
यतप्रतियोगिताकत्वाभावादुत्तरसकलद्रव्यवृत्तित्वघटितद्रव्यत्वत्वावच्छिन्नात्यन्ताभावस्याप्रसिद्धत्वादग्रे द्रव्यत्वत्वावच्छिन्नाभावमादायातिव्याप्तेरसंग
त्यापत्तिरिति वाच्यम्। द्रव्यत्वत्वपदेन द्रव्यमित्याकारकप्रतीतिप्रकारत्वस्यैवाग्रे वक्तव्यत्वान्न तस्य च द्रव्यान्यासमवेतत्वमपेक्ष्यापि लघुत्वेन प्रतियोगितावच्छेदक

त्वसंभवादिति भावः. द्रव्यत्वत्वादित्यत्रादिना पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वस्य पृथिवीवृत्तित्वविशिष्टद्रव्यत्वत्वस्य च द्वयोरेवावच्छेदकयोः परिग्रहः. ननु साध्यता
वच्छेदकतान्यसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभाव एव साध्याभावपदार्थो विवक्षितः. तथा च विशिष्टद्रव्यत्वत्वस्य साध्यतायां द्रव्यत्वसामान्याभावस्यात
थात्वान्नातिव्याप्तिः. गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वोपगमात्तादृग्रूपेण साध्यतायामपि नातिव्याप्तिरत आह. किंचेति. ननु विशिष्टस्यातिरिक्तत्वमते द्रव्यत्वादिसामा
न्याभावस्य विशिष्टसाध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावादेवमपि तथा नातिव्याप्तिरत आह किंचेति प्रांचः. सद्धेतौ वा यत्रादौ अप्रसिद्धेरिति कालस
सकलरूपवत्त्वेपि साध्यवत्ताधीविरोधितापन्नसमवायसम्बन्धेन तदनधिकरणत्वादिति भावः. शंकते यावतामिति. तथा च यदधिकरणधर्मावच्छिन्नाभावैरैक्याधिक
रण्या यत्तस्य तद्रूपस्याधिकरणेऽवृत्तित्वप्रसिद्ध्यैव नाव्याप्तिरिति भावः. विवक्षितेतीत्यपि नातद्विवक्षायामपि वक्ष्यमाणातिव्याप्तिः सूचिता. ननु यावतां मिथः सामानाधिकर
ण्यं तावत्समुदायो विवक्षितः किं वा यावतां साध्याभावानामभावांतरेण सामानाधिकरण्यं तावत्समुदायोऽभिप्रेतः. प्रथमे इदमिति. अन्त्ये इदमिति पृथिव्यां विशेषणाननुप
स्थितेरिति. तथा सति घटत्वद्रव्यभिन्नपटत्वद्रव्यभिन्नं कुम्भत्वद्रव्यभिन्नत्वादीनामेव तद्द्वयोर्मिथः सामानाधिकरण्यापन्नसाध्याभावानामधिकरणे तद्द्वयोर्वृत्तिमत्त्वादेव वा
युत्वादिनातिव्याप्त्यनुपपत्तेः. एतत्पृथिवीसमवेतप्रतियोगिकाभावस्य साध्यत्वे वायुत्वादेः सद्धेतुत्वात्समवेतत्वापेक्षया गुरुत्वेनैतत्पृथिवीसमवेतत्वावच्छिन्ना
भावाप्रसिद्धेव साध्यतायोगादुरापदम्. नन्वेतत्पृथिवीवृत्तिगुणत्वावच्छिन्नाभावस्य साध्यत्वेपि वायुत्वादेः सद्धेतुरेव प्रलये परमाणावुत्पत्तिकाले चापृथिवि
नि वायौ तत्सत्त्वात्. साध्यान्तरमाह. सत्तान्येति. अत्र पृथ्वीपदमेतत्पृथ्वीपरम्. अन्यथा प्रागुक्तदिशा व्यक्तीनां तद्द्वयोर्मिथः सामानाधिकरण्यापन्नसाध्याभावतया वायु
त्वादेस्तदनधिकरणीभूतवायुवृत्तित्वेनैवातिव्याप्त्यसंभवापत्तेरिति ध्येयम्. अत्राप्येतत्पृथिवीसमवेतप्रतियोगिकाभावस्य केवलान्वयित्वपितया तत्साध्यकवा
युत्वादेः सद्धेतुत्वात्समवेतत्वापेक्षया गुरुत्वेनैतत्पृथिवीसमवेतत्वावच्छिन्नाभावस्य चाप्रसिद्ध्या साध्यत्वायोगात्सत्तान्यपदम्. न च सत्तान्यैतत्पृथिवीसमवेत(

व्या.व्या.
२६

७५
२६

नावच्छिन्नाभावोऽप्रसिद्धः द्रव्यत्वस्यैव तदवच्छेदकत्वादिति वाच्यं सकलद्रव्यवृत्तित्वादिघटितद्रव्यत्वस्यैव तादृशसमवेतत्वापेक्षया गुरुत्वेनानवच्छेदकत्वात् सत्तासमवेतत्वावच्छिन्नाभावस्याप्रसिद्ध्या तत्समवेतत्वावच्छिन्नाभावस्य साध्यत्वे समवेतमात्रस्यैव तत्स्वावत्त्वेन मिथः सामानाधिकरण्यापन्नसमवेतवृत्तितावायोर्हेतौ सत्त्वादेव नातिव्याप्तिरतः पृथिवीपदम्. ननु वायुत्वस्योक्तसाध्यसामानाधिकरण्याभावादेव न तत्रातिव्याप्तिरतो हेत्वन्तरमाह रूपवदिति. अयं हेतुर्गुणादौ साध्यसमानाधिकरणः रूपान्यत्वाभावस्य पृथिव्यामुत्पत्तिकालावच्छेदेन सत्त्वात्तत्रातिव्याप्तिसंभवाद्रूपवदन्यत्वानुधावनं रूपवद्भेदस्यापि तदानीं पृथिव्यामुपगमेत्वाह रूप्याद्यविति. आदिना वायुरूपान्यतरत्वादेः परिग्रहः. तादृशेति. मिथः सामानाधिकरण्यापन्नेत्यर्थः. द्वितीयेनाह वस्तुत इति. तादृशाभावेति. अधिकरणधर्मावच्छिन्नसाध्याभावेत्यर्थः. सहत्वेति अवच्छेदकभेदेनाभावभेदमभ्युपेत्योक्तं दुर्वारैवेति. ननु यावत्तामेव व्यक्तिवृत्तित्वं नावच्छेदकत्वेनोक्त्या नाप्रसिद्धिः प्रागुक्तातिव्याप्तिप्रसंगात्. किंच सत्तान्येन पृथिवीसमवेतभिन्नस्य चाभावो द्रव्यत्वं स्वरूप एव लाघवात्. ननु सत्तान्येन पृथिवीसमवेतमात्रं वक्तुं नां तथात्वे गौरवादतः परस्परसामानाधिकरण्यापन्नतादृशद्रव्यत्वादिस्वरूपसाध्याभावस्तोमवत्तिर्हेतोः सत्त्वादेव नातिव्याप्तिरिति ब्रूयान्न दोषान्तरमाह किंचेति. यत्तु सत्तान्यपृथिवीसमवेतभिन्नत्वस्य रूपसामान्याभावस्याभावोऽनुगतप्रतीतिबलादतिरिक्त एवेति न वृत्तिर्हेतोः सत्त्वासत्त्वाभ्यां नोक्तातिव्याप्त्यव्याप्त्योः संभव इत्यतः किंचेति न तु कुंस्थितानीले नाभावाभावातिरिक्तत्वभंगीकृत्य दोषनिरसे भूतत्वमूर्तत्वान्यतरत्वे नाभावाभावस्यातिरिक्तत्वाद्ग्रे भूतत्वमूर्तत्वादिनातिव्याप्त्यभिधानस्य सदर्भविरोधापत्तेः साध्याभावत्वेऽवच्छिन्नत्वस्य संयोगसमवायादिप्रत्येकप्रवेशमभिप्रेत्याह धूमादाविति. अव्याप्तिरिति निर्वह्निसमवेतत्वावच्छिन्नाभावस्य यावदन्तर्गतस्य धूमादावसत्त्वादिति भावः. संबन्धसामान्येन तादृशावच्छिन्नत्वस्य प्रवेशमभिप्रेत्याह साध्यतेति. कालादाविति. आदिपदेन दिशः परिग्रहः. व्यभिचारिणि पृथिवीद्रव्यत्वादिसाध्ये ननु धूमवान्वह्नेरित्यादौ तत्र हेतुतावच्छेदकसंबन्धेन वृत्तित्वविवक्षायामप्यव्याप्तेर्ध्रौव्यात्. धूमाभाववत्कालादौ समवेतमात्रस्यैव संयोगसंबन्धेन वृत्तेः. न तत्सामा

न्याभावस्य हेतुतावच्छेदकसंबंधेन यो वृत्तिमान् तद्वृत्तित्वेन लक्षणघटकत्वादिति ध्येयम्. सत्तादिमात्रसमवेतादेः परिग्रहः. शंकते साधनेति. तथा च सद्धेतुस्थले च
धिकरणधर्मावच्छिन्नस्य साध्याभावस्यैव साधनसमानाधिकरणत्वात्. ननु तद्वृत्तित्वस्यापि तादृशाभावमात्र एव लक्षणसंगतिः. इत्थं च वृत्तिमद्वृत्तिपदस्य सार्थक्यं
व्यतिरेकिण्यपि संभवतीति दूषणम्. यथा चैवं साधनतावच्छेदकस्य स्वप्रतियोगिव्यापकत्वदलस्य सार्थक्यं तथोपपादितं प्राक्. यद्यपि हेतुसमानाधिकरणत्वेन सा
ध्याभावानां निवेशे तादृशसाध्याभाववद्वृत्तित्वत्वे प्रतियोगिताव्यापकत्वदलस्योपादानं विफलं वह्निमान् धूमादित्यादावालोकावृत्तित्वावच्छिन्नाभावमादाय।
व्याप्तेः प्रसंगस्य तादृशाभावे साधनसमानाधिकरणसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वाभावादेवासंभवात्. न चान्त्यदले तादृशवृत्तित्वत्वस्य
प्रतियोगिताव्यापकत्वं न देयमेवेति वाच्यम्. तथा सति हेतुसमानाधिकरणसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिकस्य द्रव्यवृत्तित्वसामान्याभावस्यै
व स्पर्शवत्त्वहेतावसत्तादौ भूतत्वमूर्तत्वेत्यादिनाऽतिव्याप्तेरसंगत्यापत्तेः. तथापि वृत्तित्वालोकान्यत्वोभयत्वावच्छिन्नाभावस्यैव हेतुसमानाधिकरणस
ध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य वृत्तिमद्वृत्तित्वे धूमहेतावसत्त्वेन तमादाय व्याप्तिवारकत्वादेव तस्य सार्थक्यं. न च पर्वतवृत्तित्वपर्वतान्यवृत्तित्वोभयत्वा
वच्छिन्नाभावमादाय व्याप्तिवारणार्थमासज्यवृत्तिधर्मानवच्छिन्नत्वेनैव प्रतियोगिता विशेषणीयेति. न तत एव वृत्तित्वालोकान्यत्वोभयाभावस्य प्रसिद्धत्वात्तादृ
शवृत्तितात्वे प्रतियोगिताव्यापकत्वस्योपादानं विफलमिति वाच्यं पर्वतपर्वतान्यवृत्तित्वोभयत्वावच्छिन्नाभाववारणाय वृत्तित्वपर्याप्त्यासज्यवृत्तिधर्मानव
च्छिन्नत्वेनैव प्रतियोगिताया वाच्यत्वात्. तादृशप्रतियोगिताकत्वस्य च वृत्तित्वालोकान्यत्वोभयाभावेऽपि सत्त्वादिति ध्येयम्. भूतत्वमूर्तत्वान्यतरत्वप्रतियोगिका
भावस्य केवलान्वयित्वात्तेन साध्ये स्पर्शवत्त्वादिकं सद्धेतुरेवेत्यत उक्तमन्यतरत्वेनेति. तादृशेनेति. हेतुसमानाधिकरणो यो भूतत्वमूर्तत्वोभयघटितसाध्या
भाववत्तामलवृत्तीत्यर्थः. पृथिव्यावृत्तितादिना जलतेजोऽनिलानां परिग्रहः. अत्र भूतत्वं विशेषगुणवत्त्वे सत्यात्माभिन्नत्वं न तु बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वं

७ग.व्या.
२७

मूर्त्तत्वं स्पर्शवत्तो मनस्त्वं जातिविशेषो वा तत्त्वावच्छिन्नपरिमाणत्वं तथा सति मनःपरिमाणत्वस्य द्वयोरेव यत्समानाधिकरणतादृशसाध्याभावयोरेकाधिकर
रणाप्रसिद्ध्यातिव्याप्त्यसंभवादिति दुष्टम् मम। ननु साधनाधिकरणत्यार्तिं विशिष्टजातिसाध्याभाववत्त्वस्य निवेशान्नैष दोषः क्वचिदपि स्पर्शविशिष्टत्वे भूतत्वमूर्त्तत्वोभ
योरसत्त्वात्तदुभयान्यतरघटितसाध्याभावकूटस्यैकाश्रये मनसि च हेतोः सत्त्वात्। वस्तुतः समनियताभावानामैक्यमते भूतत्वमूर्त्तत्वान्यतरत्वावच्छिन्नाभावो भूत
त्वमनस्त्वामनस्त्वावच्छिन्नस्य मूर्त्तत्वगगनत्वावच्छिन्नस्य चाभावः। तथा च मनस्त्वगगनत्वयोरपि भूतत्वमूर्त्तत्वान्यतरत्वावच्छिन्नाभावस्य साध्यस्याभाववत्त्वात् हे
तुसमानाधिकरणतदुभयघटितसाध्याभावस्य कूटाधिकरणप्रसिद्ध्या नातिव्याप्तिः। अस्तु यावन्ति निरुक्तसाध्याभाववत्त्वानि तावतां प्रत्येकावच्छिन्नस्य यदधिक
रणं तद्वृत्तित्वाभावाः वृत्तिमद्भेदो यावत्तत्सहत्वमेव व्याप्तिः। तथा च भूतत्वमूर्त्तत्वान्यतराभावाभाववत्त्वावच्छिन्नस्याधिकरणे गगने च मनसि च हेतोः सत्त्वान्नातिव्या
प्तिरत आह किंचेति। ननु भूतत्वमूर्त्तत्वान्यतरत्वावच्छिन्नाभावाभावोऽनुगतव्यवहारादतिरिक्त एव न तु भूतत्वमूर्त्तत्वोभयस्वरूपः। तथा च साधनसमानाधिकरणतादृशा
भाववति गगने मनसि च हेतोः सत्त्वान्नातिव्याप्तिरतः किंचेत्यपि वदन्ति। उदाहरणस्थले तु हेतुसमानाधिकरणा यावन्तः पदार्थाः साध्यवद्वृत्तित्वव्यधिकरणधर्मा
वच्छिन्नाभावभिन्नतोभयाभाववन्तस्तावत्समस्तार्थकूटाधिकरणवृत्तित्वाभावो वृत्तिमद्भेदो तयोर्यावत्तत्त्वं विवक्षितम्। तथा च हेतुसमानाधिकरणयोर्गगनत्वम
नस्त्वयोरेव तादृशपदार्थयोरेकाधिकरणाप्रसिद्ध्या नातिव्याप्तिः। निरुक्तोभयाभाववतां घटत्वपटत्वादीनामेकाधिकरणाप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्ति
रतो हेतुसमानाधिकरणोपादानमित्यतः किंचेतीति प्राहुः। कालान्यत्वसाध्यकस्य कालिकसंबन्धेन हेतोर्घटत्वादेरत्र तेन नातिव्याप्तिर्व्याप्तिरत उक्तं महेति।
तथा च महाकालान्यो घटादित्यादावित्यर्थः। वृत्तिमन्मात्रस्यैवेति। तथा च महाकालवृत्तित्वसामान्याभावस्य वृत्तिमद्वृत्तित्वाभावाव्यधिकरणधर्मावच्छिन्ना
भावस्य च यावत एव हेतोः सत्त्वादतिव्याप्तिरिति भावः। अत्र केचित्। सार्वभौममते सामानाधिकरण्यस्याप्यवृत्तित्वात् खण्डकालावच्छेदेन घटादेरेव वृत्ति

२७

एतद्रूपत्वञ्च स्वीयोपाधिरिति न स्वस्वरूपत्वैकधर्मनिवारकः २

मतिवर्त्तमानस्य महाकालवृत्तित्वसामान्याभावस्यावच्छेदकत्वाधिकरणावच्छेदेन हेतावसत्त्वान्नातिव्याप्तिः। वृत्तिमद्भिन्नत्वे यो यावन्तस्तादृशा वृत्तित्वाभावा यावदेन
धिकरणावच्छेदेन न तत्त्वस्य हेतौ विवक्षितत्वात् अत एवैतद्रूपं गुरुत्वादित्यादेर्वैतद्रूपभिन्नसमवेतत्वत्वसमनियतप्रतियोगिताकस्य स्वव्यधिकरणधर्मावच्छि-
न्नाभावस्यैव वृत्तिमद्भिन्नत्वेऽपि नातिव्याप्तिः। एतद्रूपावच्छेदेन गुरुत्वादेरेव वर्त्तमानस्यैतद्रूपभिन्नसमवेतत्वसामान्याभावस्य हेत्वधिकरणीभूतगुणान्तरा-
वच्छेदेन हेतावसत्त्वादित्याहुः। तच्चिन्त्यं यत्तु वृत्तिमद्भिन्नत्वे यद्यस्य वृत्तिमत्त्वं वृत्तित्वसाध्यवद्भिन्नत्वप्रतियोगिकत्वोभयानधिकरणत्वमर्थः। तथा च महा-
कालवृत्तित्वसामान्याभावस्यापि साध्यवद्भिन्नत्वप्रतियोगिकत्वविरहेण निरुक्तोभयानधिकरणस्य हेतावसत्त्वात् महाकालान्यो घटादित्यादौ नाति-
व्याप्तिः। न च महाकालवृत्तित्वान्यापेक्षया लाघवात् कालिकसंबन्धावच्छिन्नवृत्तित्वस्यैव महाकालवृत्तित्वाभावप्रतियोगितावच्छेदकत्वं तथा च महाकाल-
वृत्तित्वसामान्याभावस्य न निरुक्तवृत्तिमद्भिन्नत्वं प्रसिद्धत्वात्। वृत्तिमद्भिन्नत्वेऽभावस्य न साध्यवद्भिन्नत्वप्रतियोगिकत्वादिति वाच्यं यावन्ति कालि-
कसंबन्धेन महाकालवृत्तित्वानि तावदन्यतमत्वावच्छिन्नाभावस्य तावद्धर्मिकयत्किंचिद्वृत्तिभेदोऽप्यत्वावच्छिन्नाभावस्य वा निरुक्तोभयानधिकरणस्य
हेतावसत्त्वे नातिव्याप्त्यसंभवात्। कालिकसंबन्धावच्छिन्नवृत्तित्वत्वमपेक्ष्य तावदन्यतमत्वलक्षणखण्डभेदस्यैव लाघवेन प्रतियोगितावच्छेदकत्वो-
चित्यादिति। तन्न। तथापि नित्यज्ञानभिन्नं घटादित्यादौ विषयतासंबन्धेन हेतावतिव्याप्तेर्वज्रलेपत्वात्। नित्यज्ञानविषयतासामान्याभावस्याप्र-
सिद्धत्वात् व्यधिकरणधर्मावच्छिन्नतादृशविषयत्वाभावस्याप्यत एव हेतौ सत्त्वात्। नव्यास्तु साधनसमानाधिकरणव्याप्यवृत्तयो यावन्तः सा-
ध्याभावाः साध्यसामानाधिकरण्यापन्नतावत्कूटवद्भिन्नत्वाभावो विवक्षितः। तथा च व्यभिचारिमात्र एव साध्यसामान्याभावघटितकूटे साध्यसामा-
नाधिकरण्याप्रसिद्ध्या नातिव्याप्तिः। यावन्तस्तादृशाः साध्याभावाः तत्कूटाधिकरणस्य वा साध्यवत्त्वं विवक्षितं तादृशयावत्तादृशवृत्तित्वाभावस्य च वृत्ति-

व्या·प्र·
२८

यद्वृत्तित्वं यावत्त्वं नापेक्षितं वैयर्थ्यात् । इत्थं च साधनसमानाधिकरणयावन्तस्साध्याभावाः साध्याभावीभूततत्तदभावकूटवद्वृत्तित्वमपि लक्षणं साधीय इ
तिप्राहुः ॥ वस्तुतः पूर्वलक्षणस्थानेऽपि कृत्रिमवद्वृत्तियो यावन्तस्साध्याभावकूटवद्वृत्तित्वाभावास्तदन्यतावच्छिन्नाधिकरणतासामान्यकधर्मवत्त्वमेव व्याप्तिर्वाच्या । तत्र
कृत्रिमवद्वृत्तित्वं साध्याभाववद्वृत्तित्वं च वैशिष्ट्यविशेषणतयैव वक्तव्यमतो न कोऽपि दोषः पद्मादध्यानीत्यवधातव्यमिति दिक् । एतेनेति महाकालादौ घटादिसत्त्वात्
वृत्तिमात्रस्य प्रसंगेनेत्यर्थः परास्तमिति परेणान्वयः । अत्र वाच्यं ज्ञेयत्वात्सत्तावान्द्रव्यत्वादित्यादिनानाव्याप्तिः वृत्तिसाध्यकसद्धेतौ न प्रसिद्धिः वृत्तित्वविशिष्टसाध्याभाव
स्य तदन्यव्यक्तिवृत्तित्वविशिष्टसाध्याभावस्य च द्वयोः साधनसमानाधिकरणयोरेकाधिकरणाप्रसिद्ध्या साधनाधिकरणयत्किंचिद्व्यक्तिप्रसिद्धवृत्तिकूटवद्वृत्ति
त्वसामान्याभावानां हेतावसत्त्वेनाव्याप्तिरतः प्रतियोगिकानां यावदभावविशेषणं विशिष्टसत्तावान् जातेरित्यादौ जातिसमानाधिकरणस्य साध्यीभूतसत्त्वव्या
पकतावच्छेदकरूपावच्छिन्नाभावस्य व्यधिकरणधर्मावच्छिन्नाभावत्वनियमात्कृत्रिमवत्तत्कूटवद्वृत्तित्वाभावस्य यावदन्तर्गतत्वे हेतौ सत्त्वादिति व्याप्तिरतः सा
ध्यतावच्छेदकावच्छिन्नेति । तथा च गगनत्वाभावकर्मान्यत्वाभावयोरप्युक्तरूपावच्छिन्नप्रतियोगिताकत्वादुभयघटितकूटाधिकरणाप्रसिद्ध्यैवनाति
व्याप्तिः । अत्रापि येन संबन्धेन व्यापकता तेनाभावो ग्राह्यः । तेन समवायावच्छिन्नवृत्त्यभावघटितकूटवद्वृत्तित्वाभावस्य वृक्षकत्वादिविशिष्टस्य हेतावसत्त्वे
पि वह्निमान्धूमवत्त्वादित्यादावव्याप्तिः । न च विशेषणविशेषेणैव साध्यव्यापकत्वं तेन संबन्धेन तादृशरूपावच्छिन्नाभावश्च ग्राह्यः साध्यस्य गुणसामान्यस्या
भाव इत्याद्युक्तरयुक्त्यविरोधात् । गुणस्य दैशिकविशेषणतासंबन्धेन गुणव्यापकत्वात् । यत्तु साध्यतावच्छेदकसंबन्धेनैव व्यापकत्वं तादृशरूपावच्छिन्नाभावं च नि
वेशयन्ति तन्न युक्तं वृत्त्यनियामकसंबन्धेन साध्यतायां तदवच्छिन्नप्रतियोगित्वाप्रसिद्ध्या अव्याप्तिप्रसंगात् । धूमवान्वह्नेरित्यादावतिव्याप्तेश्च । संयोगेन द्रव्यसा
व्याप्यवृत्तितया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकानामेव संयोगेन द्रव्याभावानां व्याप्यवृत्तित्वात् । तत्कूटवद्वृत्तित्वसामान्याभावस्य कृत्रिमदृष्टेः ।

28

ताऽप्रमेयत्वेन प्रमेयव्यापकतावच्छेदकं यत्तु प्रमेयत्वादि तेन संबन्धेन तदवच्छिन्नाभावाप्रसिद्ध्या तादात्म्येन प्रमेयसाध्यकसद्धेतावव्याप्तेरसम्भवदितत्वाच्च. न च द्रव्यं घटादि
त्यादौ कालिकसंबन्धेनोक्तावृत्तिव्याप्तिः साधनसमानाधिकरणस्य द्रव्यत्वाभावकूटस्य कालिकसंबन्धेनाधिकरणे महाकाले हेतुतावच्छेदकसंबन्धेन वृत्तिमत्त्वा
त्तस्यैव वृत्तेरिति वाच्यं दैशिकविशेषणतया तादृशाभावाधिकरणत्वस्य निवेशनीयत्वादिति भावः. न तु तद्भिन्नं घटत्वादिर्योसौ साध्यव्यापकतावच्छेद
करूपावच्छिन्नप्रतियोगिताकयावदभावाधिकरणीभूतन्तद्वृत्तित्वस्याधिकरणधर्मावच्छिन्नाभावबोधकत्वेऽपीत्यत उक्तं यावन्तीति. न च दैशिकविशेषण
तया तद्भिन्नस्याधिकरणाप्रसिद्धेरव्याप्तिः कथं यावत्त्वविशेषणमिति वाच्यम्. अथापि तद्भिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यापि याव
दन्तर्गतस्य साध्याभावस्य तादृशसंबन्धेन तदधिकरणीभूतं न तद्वृत्तित्वस्य चाधिकरणधर्मावच्छिन्नाभावस्य घटत्वहेतौ घटत्वहेतौ सत्त्वादिति व्याप्तिरतो
यावन्तः. वह्निसंयोगसामान्याभाववान् संयोगसामान्याभाववान्वा धूमादित्यादावव्याप्तिः. साधनसमानाधिकरणस्य साध्यव्यापकतावच्छेदकीभू
तसंयोगसामान्याभावत्वावच्छिन्नप्रतियोगिताकस्य वह्निसंयोगाद्यात्मकस्याधिकरणाप्रसिद्धेरतो व्याप्यवृत्तिपदमित्याह केवलेत्यादिना.
केवलान्वयिनि तस्य तेन साध्यव्यापकत्वमाविष्कृतं संयोगादीत्यादिना वह्निसंयोगत्वावच्छिन्नाभावस्योपग्रहः. तेन प्राचां मते द्रव्यसंयोगसामा
न्याभावस्यासत्त्वेऽपि न क्षतिः. दैशिकाव्याप्यवृत्तिसाध्यकप्रयोजनमुक्त्वा कालिकाव्याप्यवृत्तिसाध्यके तदाह एवमिति. ननु तादृशरूपाव
च्छिन्नप्रतियोगिताकानां कालत्वाभावानामेव लक्षणघटकत्वात् संयोगाद्यात्मकाभावमादाय नाव्याप्तिरत उक्तं एवमितीत्यपि केचित्तु.
न व्याप्यवृत्तीरिति. तथा च गगनसामान्याभावस्य साधनसमानाधिकरणत्वेऽपि व्याप्यवृत्तित्वाभावाद् गगनवान् द्रव्यत्वादित्यादौ नाव्या
प्तिः. अत एव गगनसामान्याभावस्यापि साधनसमानाधिकरणसाध्याभाववत्तया न तद्वृत्तिकूटाधिकरणसम्भवे तत्सामान्याभावस्य वृत्तिमिति

निर्धूमे कत्वादौ प्रसिद्धसाध्यमत्त्वहेतौ च सत्त्वाद्व्याप्तिरेवस्त्वादि इति भावः स्वसमानाधिकरणोत्पत्तिसमानकालिकत्वं उक्तरूपेति साध्यापकतावच्छेद
करूपावच्छिन्नेत्यर्थः कश्चिदिति वह्निमान् धूमादित्यादौ घटपटान्यतमत्वरूपसाध्यवृत्तित्वावच्छिन्नाभावकूटस्यापि निरुक्ताभावत
या तदधिकरणाप्रसिद्धिनिबन्धनाव्याप्तिवारणाय तन्निवेशः समानाधिकरणेत्युक्तमिति भावः न तु घटभिन्नपटत्वादित्यादौ वाच्यत्वेय
त्वादित्यादौ च साध्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावकूटवत्त्वं न तु स्वप्रसिद्धमनस्तत्राव्याप्त्यभावात् किंचिदित्युक्तम्
अत्र वह्नित्वाधिकरणपर्वतीयचित्रधूमादौ इति विशेषणतया वर्तमानत्वमेव हेतुसमानाधिकरणपदं तेन घटे तेषु पि विद्यमानत्वप्रकारकप्रमावि
षयत्वादित्यादौ जलत्वेन जातिमत्त्वसाधनसमानाधिकरणस्य जलत्वान्यभावस्य तेजोत्वान्यभावस्य वा निरुक्तरूपावच्छिन्नप्रतियोगिताक
त्वान्नोभयघटितकूटव्यावृत्तादौ हेतौ वृत्तित्वविशिष्टनाति व्याप्तिः हेत्वधिकरणजलत्वादिप्रत्येकनिष्ठपर्याप्तस्य कू
ट तदधिकरणे जलत्वादिहेतौ सत्त्वादि इति भावः उक्तसम्बन्धेनेति तादृशाभावकूटवत्त्वं च निरूपितहेतुतावच्छेदकसम्बन्धेन ग्राह्यं तेन द्रव्यमिति
न सत्त्वादित्यादौ साधनसमानाधिकरणसाध्याभावकूटाधिकरणे महाकाले वृत्तिमत्त्वात्स्वैककालिकसम्बन्धेन सत्त्वादिपनाति व्याप्तिः ता
दृशवृत्तित्वाभावस्तादृशवृत्तित्वस्य समनियतपर्याप्तप्रतियोगिताग्राह्यः तेन पर्वतवृत्तित्वादिसामान्याभावस्य वृत्तितादात्म्याभयत्वा
वच्छिन्नाभावस्य च हेतौ च सत्त्वे वह्निमान् धूमादित्यादौ वाच्यत्वेयत्वादित्यादौ च नासम्भवः अधिकमभिहितं प्राग्व्याप्तिरहस्ये तेषु एतत्स
त्रापि वृत्तिमत्त्वं हेतुतावच्छेदकसम्बन्धेनैव ग्राह्यं तेन संयुक्तत्वसामान्याभावस्यापि ताद्रूप्यसम्बन्धेन वृत्तिमत्त्वापि ज्ञानादेर्ग्रहणस्य हेतावपि वह्निमा
न् धूमादित्यादौ नाव्याप्तिरित्यर्थः साध्यवत्ता प्रतियोगिघटकेतरसम्बन्धेन कूटाधिकरणायाः पर्वतीयायाः प्रकृतलक्षणघटकत्वात्तत्वोक्तम्:

त्व
इत्यादिकमित्यादिपदेन ग्राह्यः प्रतियोगितावच्छेदकमेतेतादृशघटत्वावच्छिन्नाभावा इतिमद्वन्मोपावनत्तत्त्वमित्यादेरस्य व
नम् इति पुञ्जलक्षणं समाप्तम् अभाववुद्धौ प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानत्वेन हेतुतायाः स्वयमनङ्गीकारादुक्तार्थ
मात्रविशेषणतेति ननु घटत्वेन पटो नास्तीत्यादि वुद्धेः पटत्वादिविशिष्टवैशिष्ट्यावगाहित्वमेवासिद्धमत आह अभावेत्यादिना न
स्वातन्त्र्येणेति न पटत्वादेः प्रतियोगिवृत्तित्वमस्य विषयीकृतमित्यर्थः तद्धर्मावच्छिन्नप्रतियोगित्वसंसर्गकाभावप्रत्ययस्तादृश
संबन्धेन तद्धर्मविशिष्टवैशिष्ट्यावगाहित्वनियमादिति भावः ननु न घटत्वेन पटो नास्तीत्याकारकसमानाधिकरणधर्मावच्छिन्नाभा
वप्रत्यक्षे व्यभिचारस्तेनोक्तनियमस्य तत आह घटो नास्तीत्येवेति तथा च विशेषधर्मेण सामान्याभावो ऽप्रसिद्ध एव न तु प्रसिद्धत्वेन प
टो नास्तीति प्रतीतेः घटेन घटत्वावच्छिन्नाभावमात्रावगाहित्वादतस्तत्र हेत्वभावादेवेन न व्यभिचारः अन्यथा सामान्यरूपेण विशे
षाभावस्यापि स्वीकारे पटे नीलत्वेन घटो नास्तीत्यपि प्रत्ययप्रसंगादिति भावः प्रकृते योजयति नहीति इह घटत्वेन पटो नास्तीत्य
भिलापस्थलेन स्वसमानाधिकरणधर्मस्य अथावगाहनमिति अधिकरणधर्मेण विशिष्टप्रतियोगितमभिव्युत्तेनान्वयः न चेति निहत्ति
प्रमापा एवार्थसाधकत्वादिति भावः ननु [illegible] प्रयोजकत्वाद् घटत्वादेः प्रतियोगितावच्छिन्नत्वमनवगाह्य ज्ञापितत्ववच्छेदकत्वाद्धि प्रत्ययसंभ
वाद्यधिकरणधर्मावच्छिन्नाभावः सो ऽस्तीत्यत आह यदि पुनरिति स्वरसवाहि यथार्थः स च पटे घटत्वमनवगाहत एव संभवतीति
भावः घटत्वेन पटो नास्तीत्यादिपदेन घटत्वेन द्रव्यं नास्तीति द्रव्यत्वेन पटो नास्ति इत्याद्यनुभवस्योपग्रहः तुल्ययुक्त्या नरहितध
र्मेण न स्यैव विशेषरूपेण सामान्यस्य सामान्यरूपेण च विशेषस्याभावे बाधकाभावादिति ध्येयम् घटत्वेन पटत्वेन घटो नास्तीति प

चा. ल.
३०

ट घटत्वेनेनस्य घटत्वत्वविशिष्टेनेत्यर्थः ॥ तेन ताद्रूप्येण प्रतियोग्यंशे घटत्वत्वमनवगाह्य जाते समानाधिकरणधर्मावच्छिन्नाभा
वप्रत्यक्ष एवोक्तनियमस्य व्यभिचारो दर्शितः ॥ तादृशाभावेपि स्वसमनियतान्यधर्मावच्छिन्नप्रतियोगिताकाभाववारणमित्य
र्थः ॥ तेन सामान्यरूपेण विशेषस्य विशेषरूपेण च सामान्यस्याभावः संगृहीतः ॥ यत्तु द्रव्यत्वेन घटो नास्तीति प्रतीति घटत्वावच्छि
न्नाभावेनैवोपपत्तौ सामान्यरूपेण च विशेषाभावादेर्मानाभाव इति तत्प्रागेव दूषितमिति ॥ यदपि संयोगसंसर्गकघटत्वावच्छिन्ना
भावत्वावच्छेदेन लाघवात्तादृशसंबन्धेन घटत्वावच्छिन्नस्य विरोधित्वकल्पनात् संयोगेन घटादिमति घटत्वादिनाघभावस्यासंभ
व इति केश्चिदुक्तं तदपि मन्दम् ॥ तावतापि गगनत्वादिना घटादेर्गगनत्वादिना ज्ञेयत्वादेश्च व्यधिकरणधर्मावच्छिन्नाभावस्य
दुर्वारत्वादिति गगनादेरधिकरणस्य स्वरूपसंसर्गकगगनत्वत्वावच्छिन्नाभावस्य चाप्रसिद्धत्वात्तद्विरोधस्य कल्पयितुमशक्
यत्वादिति दिक् ॥ इति श्रीजगदीशभट्टाचार्यकृता चतुर्दशलक्षणी समाप्ता ॥ श्रीमत्साम्बसदाशिवार्पणमस्तु ॥ ॥ ५
॥

30

व्या· २

दी· सिं· व्या· २

द्रव्यत्वे गुणेन पृथिवीत्वसामानाधिकरण्यमिति प्रतीतिवत्सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परंपरासंबन्धेन सामानाधिकरण्यस्य वा अभावं गुणोऽवगाहते· ननु सत्तायामेव द्रव्यवृत्तित्वाभावम्· सत्ता न द्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्यादि सर्वजनप्रसिद्धप्रतीतिबाधितत्वात्· बाधकाभावात्तु संयोगतदभावयोरवच्छेदकभेदे नैकत्रप्रतीत्या तदुभयोरेकत्र प्रसिद्धिः· अतीन्द्रियसाध्यकेऽतीन्द्रिये व्यभिचारित्वप्रसंगाच्च· तत्रसामानाधिकरण्याभावस्य प्रत्यक्षत्वासंभवेनासिद्धेः· न च तदभाववद्वृत्तित्वेन तत्र तदनुमेयम्· तद्वृत्तिभिन्नत्वस्योपाधित्वात्· किंच इदमिदानीमिति प्रतीतिनियामकविशेषणतानाविशेषेण हेतुतायां सद्धेतावतिव्याप्तिः· तेन संबन्धेनाधिकरणे काले तेन संबन्धेन साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः· ॥ ॥

त्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षस्तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः। साध्यवैय्यधिकरण्यं च साध्यवद्भिन्नाधिकरणत्वम्। चरमाधिकरणत्वांशस्यानतिप्रयोजकतया तदुपहाय द्वयमेवोक्त्या अन्यथारूपपत्तिस्तदुभयमपीति। साध्येत्यादेः साध्यवदधिकरणानधिकरणत्वाभावः। साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावश्चार्थः। तत्र केवलान्वयिनि साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिद्धा नानाव्यक्तिसाध्यके च एकसाध्यव्यक्तिनिष्ठाधेयत्वानिरूपकाधिकरणत्वं साधनाधिकरणवृत्त्यन्तरस्येत्यव्याप्तिः। क्वचिद्व्यभिचारित्वातिप्रसंगश्चापि। द्वितीये च साध्यवैय्यधिकरण्ये यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेदो विवक्षितस्तदा केवलान्वयिनि। यदि च यत्किंचित्साध्यवद्व्यक्तिभेदस्तदा नानाधिकरणसाध्यके सर्वत्राव्याप्तिः। केचित्तु साध्यसामानाधिकरण्यं हेतुतावच्छेदकसंबन्धेन। हेत्वधिकरणे तेनैव संबन्धेन साध्यवद्वृत्तित्वाभावस्तदधिकरणभिन्नत्वमर्थस्तेन धूमस्य स्वावयवे संयोगेन वह्निमति च समवायेनावृत्तावपि न क्षतिः। तादृशाभावश्च सम्बन्धान्तरेण तत्रैव वर्त्तमाने सुलभः। व्यभिचारित्वं तु व्यभिचारनिरूपकाधिकरणस्यैव तादृशि तादृशाभाववत्त्वम्। सत्तायां गुणेन द्रव्यत्वसामानाधिकरण्यमित्यनुभवात्। न चैवं गुणकर्मान्यत्वविशिष्टत्वेऽव्याप्तिः। विशिष्टस्यातिरिक्तत्वात्। अनतिरिक्ते तु विशेषणविशेष्यसम्बन्धस्यैव परंपरयाव्याप्तत्वात्। केवलान्वयिनि चाव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुः। तच्चिन्त्यम्। सत्तायां गुणेन द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिर्हि

नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः· न तावदव्यभिचरितत्वम्· तद्धि न साध्याभाववदवृत्तित्वम्· साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्· साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम्· सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम्· साध्यवदन्यावृत्तित्वं वा· केवलान्वयिन्यभावात्·॥ नापि साध्यासामानाधिकरण्यानधिकरणत्वम्· साध्यवैयधिकरण्यानधिकरणत्वं वा· तदुभयमपि साध्यानधिकरणानधिकरणत्वम्· न तत्र यत्किंचित्साध्यानधिकरणाधिकरणे धूमे चाप्रसिद्धम्·

श्रीगणेशाय नमः·· समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते नन्वित्यादिना· साध्याभाववदवृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशंक्याह साध्यवद्भिन्नेति· साध्यवद्भिन्नो यः साध्याभाववांस्तदवृत्तित्वमित्यर्थः· कर्मादौ संयोगाद्यभाववत्त्वस्य भिन्नत्वे मानाभावादाह साध्यवदिति· हेतोः साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेनाव्याप्तेराह सकलेति· साकल्यं साध्याभाववति साध्ये च बोध्यं साध्याभावो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यः· तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः· न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः· अव्याप्यवृत्तिसाध्यक व्याप्यवृत्तिसद्धेतावव्याप्तेर्व्यभिचारिणि चाव्याप्यवृत्तौ नातिव्याप्तेर्वारणायाभाववद्वृत्त्ये प्रतियोगिवैयधिकरण्यम्बोध्यम्· हेत्वभावोऽपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः· तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेण बोध्यं तेन द्रव्यत्वादौ साध्ये विशिष्टसत्तादौ नाव्याप्तिः· न वा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्तादावतिप्रसङ्गः· यत्त्वेकव्यक्तिकं साध्यं विपक्षो वा न तत्र निर्धूमत्वादिव्याप्यतत्वेन साध्ये निर्वह्नित्वादौ चाव्याप्तिः· तत्र हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादत आह साध्यवदिति· अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं नहि भवति नीलो घटो घटान्य इति·॥ ॥

नापीति· साध्यसमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्त्वम्· साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वम्· साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमित्यावत्· न त्वनधिकरणत्वमित्यर्थः· साध्यवद्भिन्नस्य साध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्वृत्तौ नातिप्रसंगः· साध्यनिष्ठाधेय(

४१०३

दीपशोतिः

पञ्चलक्षदण्यां
मग्निहोत्राद्युक्तेः

प-स:२

32

श्री ५ को सरकार
[illegible] संस्कृत [illegible]

ग.टी.
२०

दोषसंगमयन्ति॰ ननु स्वरूपसंबन्धात्मकप्रतियोगित्वस्य विशिष्टधीजनकत्वस्वरूपसंबन्धताघटकनियमघटितत्वादात्माश्रयत्वमत आह प्रतियोगि
त्वादीति॰ आदिनावच्छेदकत्वादेः परिग्रहः॰ न संबन्धत्वेनेति॰ प्रतियोगितात्वादिधर्मान्तरप्रकारेण हेतुमन्निष्ठाभावीयत्वप्रकारेणैव ज्ञातत्वे
रणादिति भावः॰ संयोगत्वादिनैवेति॰ संबन्धविधविधयेत्यादि॰ ननु प्रतियोगित्वादिकमपि स्वरूपसंबन्धरूपमेवेत्युक्तदोषतादवस्थ्यम्॰ किं
च हेत्वनियामकसंबन्धेन हेतुतास्थले तेन संबन्धेन हेतुसंबन्धित्वस्यावश्यं प्रवेश एवेत्यतः संबन्धत्वेन निवेशेऽपि न क्षतिरित्याशयेनाह
दर्शितं चेति॰ विशेष्यत्वविशेषणत्वान्यविशिष्टधीविषयत्वस्यैव संबन्धतास्वरूपत्वादिति भावः॰ भावसामान्यत्वभिन्नस्वरूपस्याभावत्वस्य
प्रवेशे घटत्वाभाववाननुक्तत्वादित्यापत्तिव्याप्तिरत आह अभाववत्त्वं चेति॰ इदमित्यादि॰ इदं चान्योन्याभावत्वात्यन्ताभावत्वयोरभावत्वा
गर्भतामभिप्रेत्य तयोरलक्ष्यतायां त्वाह तदपि चेति॰ अभाववत्त्वमपि चेत्यर्थः॰ अपरभावोऽर्थः॰ अतिरिक्तविषयतापक्षस्य नैयायिकेनापि के
नचित्स्वीकारात् तस्य दृष्टान्तता॰ तत्त्वादीति॰ विषयतात्वादित्यर्थः॰ तत्त्वेति॰ प्रतियोगिताविलक्षणतात्वेत्यर्थः॰ केचित्तु तत्त्वं तता
आदिना चेदंतात्वस्योपग्रहः॰ तत्त्वेदंत्वयोः पदार्थान्तरत्वं विना दुर्वचत्वात्तत्रैव पर्यवसानादित्याहुः॰

इति गादाधरीरहस्यता
हितुमानलक्षणस्य
टी.१.१.

व्यापकत्वं निर्वाच्यम्. अन्यथा दंडिमान् दंडिसंयोगादित्यादौ दंडित्वादिप्रकारेण व्यापकत्वानुपपत्तेः. तथा च प्रमेयवान् घटत्वादित्यादावव्याप्तिः
प्रमेयत्वावच्छिन्नत्वस्याप्रसिद्धेः. न च प्रकारित्वादेरप्रसिद्धिः. प्रतियोगितानिष्ठव्याप्यतावच्छेदकतायाः प्रकृते निवेशनीयत्वात्. अन्यथा प्रका
रित्वप्रतियोगित्वसाधारणैकावच्छेदकत्वविरहेण व्यभिचारिण्यतिव्याप्त्यापत्तेरत आह समवायेनेति. ननु स्वरूपसंबन्धेन गगनादेर्वृत्तिमत्त्व
मतेऽपि प्रकृतसाध्यीयसाध्यतावच्छेदकसंबन्धसामान्येनावृत्तोभयाभावविवक्षयैव सामंजस्ये कृतं विवक्षान्तरेण घटवान् महाकाल
त्वादित्यत्र घटीयविशेषणतायां घटत्वावच्छिन्नप्रतियोगिकत्वविरहेण घटाभावस्यैव प्रतियोगिवैयधिकरण्यसंभवात्. कालः प्र
मेयवान् महाकालत्वादित्यत्र कालिकसंबन्धेन प्रमेयसामान्यस्य व्याप्यवृत्तितया तत्प्रतियोगिवैयधिकरण्यस्यैवानुपादेयत्वेन निर्दोष
त्वादतः पूर्वकल्पे दोषान्तरमाह अत एवेति. यद्यपि संयोगमात्रस्यैव वह्नित्वावच्छिन्नप्रतियोगिकत्वविरहाद्वह्निधूमोभयत्वावच्छिन्नाभाव
मादायैव नातिव्याप्तिसंभावना तथापि वह्निधूमोभयवान् वह्नेरित्यादौ संयोगस्य द्रव्यत्वावच्छिन्नप्रतियोगिताकत्वविरहेऽपि समवायस्यैव तत्त्वे
न द्रव्यत्वप्रतियोगिकत्वगुणानुयोगिकत्वोभयवत्त्वेन द्रव्यं जानेरित्यादौ नातिव्याप्तिरिति योजना. विरहेऽपि चेति. चकारस्तु प्रमादिक इति
प्राञ्चः. वस्तुतस्तु संयोगस्य संबन्धमात्रस्य वह्नित्वावच्छिन्नप्रतियोगित्वाप्रसिद्धावपीत्यर्थः. तथा च संबन्धमात्रस्यैव प्रतियोगिकापत्यनु
योगिकसंबन्धत्वनियमेन वह्निधूमोभयत्वावच्छिन्नप्रतियोगिकसंबन्धस्याप्रसिद्ध्या तादृशप्रतियोगिकत्वस्य लक्षणाघटकत्वेऽपि वह्नि
धूमोभयवान् वह्नेरित्यादौ नातिव्याप्तिः. प्रकारित्वादेः संसर्गत्वे मानाभावादिति प्रागेव प्रपंचितमस्माभिः. केचित्तु वह्नेरित्यत्र धूमादित्य
त्र नातिव्याप्तिरित्यनन्तरं चाव्याप्तिरिति पाठं कल्पयन्तो द्रव्यं जानेरित्यादावतिव्याप्तिः वह्निधूमोभयवान् वह्नेरित्यत्र चाव्याप्तिरिति विपर्यलक्षितो

आ·ग्रं·
१९

न्नप्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्वाभावः तत्संबन्धेन तद्धर्मावच्छिन्नं व्यापकमितिचेन्नतु धर्मान्तरावच्छिन्नाभावाप्रवेशेन लाघवादितिवाच्यं
पटादिनिष्ठविशिष्टद्रव्यत्ववान्घटत्वादित्यादावव्याप्तेः नाद्यः द्रव्यत्वभेदमादाय कथंचित्तत्र लक्षणासमन्वयेपि दधित्वविशिष्टप्रमेयवान्स्थूलदधि
त्वादित्यत्राव्याप्तेः केनापि संबन्धेन हेतुमतः साध्यतावच्छेदकावच्छिन्नानधिकरणत्वासंभवात् तत्रापि दध्यन्तरानुयोगिकसमवायसंबन्धेन हे
तुमतः पुरुषस्य साध्यानधिकरणत्वे नुक्तक्रमेणापि व्यापकत्वं सुवचमिति तु विभावनीयम् तेन संबन्धेनेति नचैवं संयोगेनापि रूपस्य पृथिवीत्व
व्यापकत्वापत्तिस्तेन संबन्धेन रूपाभावस्य प्रतियोगिव्यधिकरणप्रसिद्धेरिति वाच्यं तथात्वेपि तेन संबन्धेन साध्यसमानाधिकरणप्रसिद्धेर्व्या
प्तिलक्षणातिव्याप्ति[illegible]ः विरहाप्रसिद्धेस्तत्र धर्मस्य साध्यतावच्छेदकसंबन्धावच्छिन्नाधिकरणतानिरूपकतावच्छेदकत्वेन विशेषणी
यत्वाद्युक्तं न वह्निनियामकसंबन्धेन साध्यतायामव्याप्तिस्तादृशसंबन्धस्यापि प्रतियोगितावच्छेदकत्वतन्मते एवैतन्निरुक्त्यादरात् निरुक्तप्रतियो
गितासामान्ये यत्संबन्धातिरिक्तसंबन्धानवच्छिन्नत्वोभयाभावस्तत्संबन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वमिति तु न चैवं वृत्त्यनियामकसंबन्धेन
साध्यतायां व्यभिचारिण्यतिव्याप्त्यापत्तेः यद्रूपावच्छेदकतानाघटसंबन्धेन यादृशप्रतियोगितावच्छेदकानधिकरणं हेत्वधिकरणं हेत्वधिक
रणंतादृशप्रतियोगितासामान्ये यद्धर्मावच्छिन्नत्वावच्छेदकतानाक्रान्तत्वयत्संबन्धावच्छिन्नत्वावच्छेदकताक्रान्तत्वोभयाभावस्तेन संबन्धेन तद्धर्माव
च्छिन्नस्य व्यापकत्वं विवक्षितम् वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकत्वाभावेपि प्रतियोगितावच्छेदकताघटकसंबन्धत्वं सर्व
सम्मतमेव चैत्रो न पचतीत्यादौ वृत्त्यनियामकतानुकूलत्वसंबन्धेन पाकविशिष्टायाः कृतेरभावस्य चैत्रादावन्वयदर्शनात् व्यभिचारिणितु
साध्यवत्सामान्याभावप्रतियोगितायामेव तादृशोभयाभावविरहान्नातिव्याप्तिरिति नव्याः ननु व्याप्यवृत्तिसाध्यकस्थले प्रकृतलक्षणे व

नियोगितावच्छेदकावच्छिन्नप्रतियोगिकसंबन्धसामान्येसाध्यतावच्छेदकसंबन्धत्वे हेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकसंबन्धत्वोभयाभा
वत्तादृशप्रतियोगिताकथं नोक्तेति चिंतनीयम्. कालस्य जगदाधारत्वप्रवादमनुसृत्याह स्वरूपसंबन्धेनेति. कालिकविशेषणताविशेषइत्यर्थः.
गगनादेरवृत्तित्वप्रवादस्तु संयोगसमवायपरः. तथा चोक्तप्रमाणस्यापि गगनाभावो न प्रतियोगिव्यधिकरण इति घटवान्महाकालत्वादित्यादाव
व्याप्तिलक्षणस्यैवेति भावः. निरुक्तेति प्रतियोगितावच्छेदकसंबन्धेन यादृशप्रतियोगितावच्छेदकावच्छिन्नासंबन्धित्वं हेतुमतस्तादृशप्रतियो
गितासामान्ये इत्यर्थः. तथा च संयोगादिना घटाभाववन्महत्येव घटवान्महाकालत्वादित्यादौ संगतिः. घटाभावप्रतियोगितायां धूमत्वावच्छिन्न
त्वसंयोगसंबन्धावच्छिन्नत्वोभयाभाववत्त्वेन धूमत्वादिना धूमादिव्यापकतापत्तिवारणाय सामान्येति. तथा च धूमनिष्ठतादृशप्रतियोगितायामेव
तदुभयसत्त्वान्न दोषः. पक्षसंबन्धेति. समवायितसंयोगेन साध्यतायां घटत्वादिहेतावव्याप्तिः साधनवन्निष्ठस्य समवायेन संयोगिसामान्याभावस्य
प्रतियोगितायां संयोगसमवायोभयावच्छेद्यतासत्त्वात् अतो धर्मसंबन्धपदयोरुपादानं तथा च तदभावप्रतियोगितायां धर्मविधया संयोगे
नावच्छेद्यत्वाभावान्नाव्याप्तिरिति भावः. अत्र कश्चिद्यादृशसंबन्धावच्छिन्नेत्यपि दुष्टवंशादैक्यानुपादेयत्वात्. तेन धूमवानित्यत्र संयो
त्वेन वह्निसामान्याभाववत्त्वेपि नाव्याप्तिः. तत्संयोगावच्छिन्नप्रतियोगितायाः संयोगसामान्यानवच्छेदकत्वात्. संयोगत्वस्य तादृशसंबंधविध
यावच्छेदकतावच्छेदकत्वेनैव तथात्. एवं यद्धर्मावच्छिन्नेत्यत्रापि कश्चिद्यादृशधर्मावच्छिन्नेति बोध्यं तेन दंडिमान् दंडिसंयोगादित्यादौ तादृशप्रतियो
गितायास्तत्र दंडावच्छेद्यत्वसंयोगावच्छेद्यत्वोभयाभाववत्त्वेपि नाव्याप्तिः. प्रमेयत्वावच्छेद्यत्वविशिष्टस्वरूपसंबन्धावच्छिन्नत्वाप्रसिद्ध्या प्रमेय
वान्वाच्यत्वादित्यादावव्याप्तिरतो विशिष्टाभावमपहाय तादृशोभयाभाव उक्तः. न च निरुक्तप्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावीयधर्मावच्छि

थापर्वतः संयोगेन वह्निधूमोभयवान्नित्यादिप्रमाया दुर्घटत्वापत्तेरिति वाच्यम्· तथासत्यत एवेत्यादिनाग्रेवक्ष्यमाणतया वह्निधूमोभयवान्हृदत्वादप्र
वृत्तिव्याप्त्यसंगत्यापत्तेः· वह्निधूमोभयवत्ताप्रमानियामकसंयोगवत्ताप्रमानियामकसंयोगमात्रस्यैव हेत्वधिकरणीभूतायोगोलकानुयोगिकत्वा
भावेन वह्निधूमोभयत्वावच्छिन्नाभावमादायैवातिव्याप्त्यसंभवात्· तथापि साध्यसाधनभेदेन व्याप्तिभेद इत्याशयज्ञ हेतिधर्मेण साध्यतायां तद्
रूपस्यपदस्य यादृशप्रतियोगितावच्छेदकप्रतियोगिकत्वघटितोभयाभावस्यैव प्रवेशान्नोक्तस्थलेऽव्याप्तिः· न चैवमुभयपदेन साध्यतायां व्यभिचा
रिण्यतिव्याप्तिः· तद्दोषस्यात एवेत्यादिनाग्रेवक्ष्यमाणत्वादिति· वस्तुतः संबन्धस्यैव प्रतियोगिकपर्याप्त्यनुयोगिकत्वनियमादेव वह्निधूमोभयत्वावच्छिन्नप्र
तियोगिकत्वसंबन्धत्वाप्रसिद्ध्यैव तदुभयत्वावच्छिन्नाभावस्य लक्षणाघटकत्वान्नाव्याप्तिः· अत एवात्र वह्निधूमोभयवान्ह्रद इत्यादावतिव्याप्तिरुपद
र्श्यते· न च वह्निधूमोभयत्वावच्छिन्नप्रकारितादेव तादृशोभयत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धत्वप्रसिद्धिसंभवः· प्राचां मते प्रकारित्वादेः संब
न्धत्वाभावादिति विशिष्टप्रमानियामकस्यैव तथात्वादिति ध्येयम्· न चैवमपि घटवान्नित्यादित्वाननादित्यत्राव्याप्तिः विषयतासंबन्धेन गगनीयत्वनिष्ठज्ञाना
नुयोगिकत्वोभयस्य तेन गगनाभावमादायाप्रसिद्धिसंभवादिति वाच्यम्· तादृशसंबन्धेन घटादेरप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्य
स्यैवाप्रवेशादित्याशयादिति ध्येयम्· अत्र वयं ब्रूमः· साध्यतावच्छेदकसंबन्धावच्छिन्नप्रकृतसाध्याधिकरणतानिरूपितस्वरूपसंबन्धेन यादृशप्रतियो
गितावच्छेदकावच्छिन्नाधिकरणतासामान्याभावत्वं हेतुमत्तादृशप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके विवक्षये वसामंजस्येनिरुक्त
प्रतियोगिकत्वे इत्यादिरेवंऽन्त्याः· प्रसिद्धिर्विफला कालो घटवान्महाकालत्वादित्यादौ कालिकसंबन्धावच्छिन्नघटाधिकरणतानिरूपितस्वरूपसं
बन्धेन घटत्वावच्छिन्नाधिकरणतासामान्याभावस्यैव हेतुमन्निष्ठत्वेन घटत्वावच्छिन्नाभावस्यैव निरुक्तप्रतियोगिव्यधिकरणस्य सुलभत्वात्· एवं यादृशप्र

वारणमिति व्याप्तिस्तदुभयसंयोगस्यानिरुक्तोभयाभावविरहादिति । वह्निमदित्यस्य फलमाह धूमसंयोग इति । अन्यथा गुरुत्वाधिकरणमहानसानुयोगिकत्वधूमप्रतियोगिकत्वोभयस्यैव धूमसंयोगसत्त्वेन धूमाभावस्य प्रतियोगिवैयधिकरण्याभावादसम्भवापत्तेरित्यत्रातिप्रसङ्गः स्यादिति भावः । यत्तं तत्रपविरहादित्यन्वयि । निरुक्तपदस्यस्फलतः फलमाह चैत्रत्वेति । निरुक्तपदानुक्तौ चैत्रान्यत्वविशिष्टेन दण्डवानेतद्दण्डादिमच्चैत्रवृत्तेन दण्डसंयोग एव चैत्रान्यत्वविशिष्टेन दण्डाभावप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूतचैत्रानुयोगिकत्वोभयाभावविरहात्तदा दण्डाभावस्य लक्षणघटकतया निव्याप्तिः स्यात्तदुपादाने तु चैत्रान्यत्वविशिष्टेन दण्डत्वावच्छिन्नप्रतियोगिताकत्वस्याभावादेव तन्नोभयाभावसंभवदृतिनातिव्याप्तिरिति भावः । यादृशप्रतियोगितापन्याश्रयं नानैव न त्वेकं निमत्तं न चैत्रान्यत्वविशिष्टदण्डत्वावच्छिन्नत्वं यत्र चैत्राहप्ति दण्डनिष्ठं प्रतियोगित्वं तदुभयप्रतियोगिकत्वहेत्वधिकरणीभूतचैत्रानुयोगिकत्वोभयाभावस्य संयोगसामान्य एव सत्त्वान्निरुक्तपदं विनापि नातिव्याप्तिः संभवतीत्यतस्तदन्यतमसाधारण्येनातिव्याप्तिरस्यार्थमुक्तमेतदिति । दण्डसामान्यस्य हेतुत्वे एतद्दण्डप्रतियोगिकसंयोगसामान्य एव दण्डत्वाधिकरणीभूतवह्निमदनुयोगिकत्वाभावादेवोभयाभावसत्त्वादतिव्याप्तिविरहः स्यादतो हेत्वावृत्तेति । संयोगेन साध्यतायां निरुक्तपदस्य व्यावृत्तिमुक्ता समवायेन साध्यतायां तमाह गुणकर्मान्यत्वेति । इदं च समवायस्य नानात्वमिति मिश्रमतेन तस्यैकत्वे तु तद्गुणानुयोगिकत्वविशिष्टसत्त्वप्रतियोगिकत्वोभयसत्त्वेनातिव्याप्तितादवस्थ्यात् । यद्यपि यादृशप्रतियोगितावच्छेदकावच्छिन्नेत्युक्तौ वह्निधूमोभयवान् धूमादित्यत्राव्याप्तिः संयोगसामान्यस्य वह्निधूमोभयत्वावच्छिन्नप्रतियोगिताकत्वधूमाधिकरणपर्वतानुयोगिकत्वोभयाभावसत्त्वात् । न च निरुक्तप्रतियोगितावच्छेदकावच्छिन्नवत्ताप्रमायाः संसर्गिकविषयत्वमेव निरुक्तप्रतियोगिप्रतियोगिकत्वं वाच्यं तच्च पर्वते वह्निधूमयोः प्रत्येकं संयोगस्याप्यस्तीति नाव्याप्तिः अस

अ.टी.
१७

कालिकसंबन्धसामान्ये महाकालानुयोगिकत्वसत्त्वेपि गगनप्रतियोगिकत्वविरहात् गगनादेरभाव एव एवं घटत्वान्महाकालत्वादित्यादौ प्रतियो
गित्वघटितपूरणतया प्रसिद्धेः इति भावः. ननु हेत्वधिकरणीभूतयत्किंचित्पदार्थानुयोगिकत्वं यदि न प्रसिद्धं वह्निनेनतदा धूमवान्वह्नेरित्यादावतिव्याप्तिः
धूमप्रतियोगिकस्यापि संयोगस्य कालिकसंबन्धेनापि गोत्ववदवृत्तित्वात्. यदि च साध्यतावच्छेदकसंबन्धस्य संसर्गतानियामको यः संबन्धस्तेन हेत्वधिक
रणवृत्तित्वमेव तदनुयोगिकत्वं तदा संयोगेन द्रव्यस्य साध्यतायां द्रव्यत्वान्मसत्त्वादावतिव्याप्तिः जातौ समवायेन द्रव्यस्य प्रसिद्धेः. न च साध्यता
वच्छेदकसंबन्धावच्छिन्नाधिकरणतासामान्ये निरूक्तोभयाभाववत्त्वं विवक्षितं तच्च हेत्वधिकरणवृत्तित्वस्वरूपसंबन्धेनैव गगनाद्यमिति सांप्रतं
अत एवेत्यादिवक्ष्यमाणग्रन्थासंगतिप्रसंगात्. समवायस्यैकत्वेपि तत्तदवच्छिन्नद्रव्यत्वाधिकरणतानिरूक्तोभयाभाववत्त्वेन द्रव्यं जातेरित्या
दावतिव्याप्त्यभावादिति चेन्न संयोगः पर्वते वह्नेः संबन्धो न तु वह्नौ पर्वतस्येत्यादिप्रतीत्या यत्किंचिदनुयोगिकयत्किंचित्प्रतियोगिकसंबन्धत्वमनुभव
सिद्धं कुत्रचिदेव संयोगादौ न तु सर्वत्र न तु स्वरूपसंबन्धविशेषोऽतिरिक्तो वेत्यन्यदेतत् तथा च साध्यतावच्छेदकसंबन्धसामान्ये निरूक्तप्रतियोगिप्रति
योगिकसंबन्धविशेषोऽतिरिक्तो वेत्यन्यदेतत् तथा च साध्यतावच्छेदकसंबन्धसामान्ये हेत्वधिकरणीभूतयत्किंचित्पदनुयोगिकसंबन्धत्वाभावस्य म्प ५
विवक्षणात् धूमसंयोगस्याप्रयोगो न कालानुयोगिकसंसर्गत्वविरहादेव नातिप्रसंगस्तत्र यथार्थविशिष्टधीनियामकस्यैव तदनुयोगिकसंबन्धत्वात्. ए
तेन वह्निमान्वह्नेरूपादित्यत्रातिव्याप्तिः पर्वतवह्निसंयोगस्य वह्निप्रतियोगिकत्वे हेत्वधिकरणीभूतवह्न्यनुयोगिकत्वाभावविरहेण वह्निसा
मान्याभावस्य लक्षणाघटकत्वादित्यपास्तं पर्वतवह्निसंयोगस्य हेतुमद्वह्निवृत्तित्वेपि वह्न्यनुयोगिकसंबन्धत्वविरहेण तत्र तादृशोभयाभाव
सत्त्वात्. इदन्त्ववधातव्यं यन्नैकसंयोगव्यक्त्याश्रययोरर्थयोः परस्परविशिष्टधीः प्रमा तत्र तयोरेकस्मिन्संयोगेन साध्ये तदीयरूपादित्यादेर्व्याप्ति

१७

साध्यतायां जातिमत्त्वादेवेति व्याप्तिः । साध्यतावच्छेदकीभूतसमवायात्मकधर्मे समवायित्वावच्छिन्नप्रतियोगिताकत्वगुणानुयोगिकत्वोभयसत्त्वेन साध्याभावस्यालक्षणघटकत्वात्तः संबन्धपदं यद्धर्मावच्छिन्नसंसर्गताकप्रकृतसाध्यकानुमितिः फलं तद्धर्मावच्छिन्नसामान्यपरमिति तु फलितार्थः । घटीयसंयोगेऽपि व्याप्तिसंयोगेऽवा हेतुमन्मत्नेन सानुयोगिकत्ववह्नित्वावच्छिन्नप्रतियोगिकत्वोभयाभावसत्त्वाद्रूपाप्रमादित्यात्र व्याप्तिरतः पृथक्संसामान्यपदं तथा च महानसीयवह्निसंयोगे एतत्तादृशोभयाभावविरहान्नाव्याप्तिः । संयोगसामान्यस्यैव हेतुमत्त्वेऽयोगोलकानुयोगिकत्वधूमत्वावच्छिन्नप्रतियोगिताकत्वोभयाभावसत्त्वाद्धूमवान्वह्नेरित्यादौ नातिव्याप्तिः । संयोगसामान्यस्यैव समवायनिष्ठपर्वतानुयोगिकत्वस्य वह्नित्वावच्छिन्नप्रतियोगिताकत्वस्य च द्वयोरभावसत्त्वान्न धेनाव्याप्तिरतः सामान्योभयेति । तादृशोभयाभावश्च स्वरूपसंबन्धेन बोध्यस्तेन समवायादिना नोभयाभावस्य संबन्धमात्रे सत्त्वेऽपि सद्धेतौ नाव्याप्तिः । एतद्घटवान्कालान्तरीयघटत्वादित्यादौ एतद्घटत्वावच्छिन्नप्रतियोगिताकत्वविशिष्टघटानुयोगिकत्वाप्रसिद्धेरभावान्तरमादायातिव्याप्तिः । गगनप्रतियोगिकत्वविशिष्टमहाकालानुयोगिकत्वाप्रसिद्ध्या गगनाभावमादायाप्युक्ताव्याप्तिवारणस्य चासंभवः स्यादतो निरुक्तप्रतियोगिकत्वविशिष्टयत्किंचिदधिकरणानुयोगिकत्वसामान्याभावं परित्यज्य तदुभयसामान्याभाव उक्तः । न च यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसंबन्धसामान्ये हेत्वधिकरणवृत्तिकिंचिद्व्यन्नानुयोगिकत्वविशिष्टसाध्यतावच्छेदकसंबन्धत्वस्य तथाविधसंबन्धसामान्ये वा यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वसानिरेकत्वतादृशप्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छेदकस्य तु तेनोक्तमिति वाच्यम् । द्रव्यवान्प्रमेयत्वादित्यादौ संयोगेन साध्यतायामतिव्याप्त्यापत्तेः । प्रमेयानुयोगिकसंयोगसामान्यस्यैव द्रव्यत्वावच्छिन्नप्रतियोगिताकत्वेन साध्याभावस्य लक्षणघटकत्वादिति ध्येयम् । एवं च

भा.म्स.
१६

वि

धेयत्वस्येत्यर्थः तथा च विशिष्टसत्तावाञ्जातेरित्यादावतिव्याप्तिरिति भावः ननु तादृशसंबन्धावच्छिन्नयत्किंद्धेत्वधिकरणनिष्ठाधिकरणतानिरूपितानवच्छे
दकप्रतियोगितावच्छेदकत्वं साध्यसामान्यस्य तेन विवक्षितं मतो नोक्तदोष इत्यत आह समवायेनेति ननु समवायेन जातेरप्यवृत्तित्वात्तत्साध्यकेप्र
तियोगिवैयधिकरण्यमेव न देयं देयं वा व्याप्यवृत्तिसाध्यकस्थलीयमिति चेत् साध्यतावच्छेदके व्याप्यवृत्तितानवच्छेदकत्वं विशेषणमतो न तत्प
क्षस्यातिव्याप्तिरत आह संयोगेनेति अत्र विशिष्टनिरूपिताधेयत्वस्यातिरिक्तत्वोपगमे स्वप्रतियोगितावच्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसं
बन्धावच्छिन्नत्वोभयाभाववद्धेत्वधिकरणयत्किंचिद्व्यक्तिवृत्तित्वसामान्यवत्त्वस्य विवक्षणान्नोक्तदोष इत्यस्मद्गुरुचरणाः नन्वास्तु साध्यताव
च्छेदकसंबन्धेन प्रतियोग्यधिकरणं यावद्धेत्वधिकरणं तद्वृत्तोयोपपत्तस्यत्वं प्रतियोगिवैयधिकरण्यं वा अयन्तो गगनाभावभावमादायैव प्रसिद्धेरतो
विशेषः न चैवं घटत्वसंबन्धेन यद्धर्मावच्छिन्नानधिकरणं हेत्वधिकरणं तत्संबन्धावसाध्यतावच्छेदकसंबन्धेन तद्धर्मावच्छिन्नसामानाधिकर
ण्यमेव लाघवाद्व्याप्तिरस्तु तथा च घटवान्महाकालत्वादित्यादौ समवायेन घटत्वाभावोपि प्रतियोगिव्यधिकरणः संभवतीति वाच्यम् घटवृत्तित्व
विशिष्टद्रव्यत्ववान्घटत्वादित्यादावव्याप्तिः केनापि संबन्धेन हेतुमतः साध्यतावच्छेदकावच्छिन्नानधिकरणत्वासंभवादिति प्राहुः तादृशसंबन्धसा
मान्य इत्यस्य पूर्वत्रार्थेन्वयः क्वचित्साध्यतावच्छेदकसंबन्धसामान्य इत्येव पाठः विवक्षितत्वादिति अभावात्तमूलग्रन्थेनेत्यादि तथा च सा
ध्यतावच्छेदकसंबन्धसामान्ये यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वसामान्यो
भयाभाववत्तादृशप्रतियोगितानवच्छेदकीभूतसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यर्थः संबन्धसामान्ये इत्युक्तौ कालि
कसंबन्धेन धूमप्रतियोगिकत्वायःपिण्डानुयोगिकत्वोभयसत्त्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिरतः साध्यतावच्छेदकेति समवायेन संयोगेन

नतु पादद्रासंबन्धेन पटत्वावच्छिन्नानधिकरणं हेत्वधिकरणमित्यत्र तादात्म्यसंबन्धानुरोधात्तद्धर्मावच्छिन्नसंबन्धिभिन्नत्वे तु संबन्धित्वमवच्छेदकं विवक्षणीयं तथा च तादात्म्यसंबन्धेन सं
बन्धितत्स्वे वस्रसिद्धा हेतुसंबन्धिभिन्नत्वसंबन्धेन साध्यसंबन्धिभिन्नत्वत्वानुपपन्नं कथमिदमपाप्रेराद्यं केति चेन्न दण्डित्वविशिष्टप्रमेयवान् स्थूलदण्डित्वादित्यादौ समवायेन हेताव
१॥२
व्याप्तिः तत्र केनापि संबन्धेन हेत्वधिकरणे साध्यानधिक
रणत्वाभावात् व्यभिचारवारणाय स्थूलपदमिति ध्येयम्

मन इति वक्तव्यमविशिष्टस्य ध्वंसस्थले तु यावत्त्वप्रतियोगिताश्रयानधिकरणत्वं हेतुमत इत्येव लाघवादुक्तमुचितं तथा चउड्डुघटस्यताप्ला
पामसत्कालीनत्वविशिष्टघटाभावोपि प्रतियोगिसमानाधिकरण एव प्रतियोगिता च प्रतियोगितावच्छेदकस्वरूपा लाघवात्ः ननु प्रतियो
गिस्वरूपानानात्वेन गौरवात्तो नैकप्रतियोग्यनधिकरणत्वमादाय संयोगी एतत्त्वादित्यादावव्याप्तिरित्याद्युक्तिश्चिन्त्यं प्रालोपध्वंसमहत्काल
त्वादित्यादावव्याप्तिवारणाय धर्मिणो विशिष्टस्य ध्वंसस्थलेपि प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वप्रवेशस्य प्रामाणिकत्वया गौरवस्याकिंचित्कर
त्वादिति सार्वभौममतमाशंक्यानिरुक्तेन चेति· वाक्यमिति परेणान्वयः· तादृशसंबन्धेनेति· साध्यतावच्छेदकसंबन्धेनेत्यर्थः· इदं चावृत्तीत्यस्य प्रति
योगिन्यावृत्यान्वितं तादृशपदस्य प्रतियोगितावच्छेदकसंबन्धपरत्वे प्रनरणे प्रतियोगितासाध्यतावच्छेदकसंबन्धावच्छिन्नाप्राप्त्या· तादृशसंबन्धेने
त्यस्य फलमाह सत्तादीति· विषयतायाः वृत्तिनियामकत्वमते सत्तावति घटादौ ज्ञानाभावस्य सहजत एव प्रतियोगिवैयधिकरण्यं संभवतीत्यतः
संयोगसामान्यस्य चेति· नातिप्रसंग इति ज्ञानवान् संयोगवान् सत्त्वादित्यादौ नातिप्रसंग इत्यर्थः· तत्राग द्रव्यत्वजातित्वसामान्याभावस्य संयोगाद्व
भावाद्युक्तातिव्याप्तिवारणायैवपत्वं चिन्त्यं यस्यापि प्रयोजनमित्यवधेयम्· प्रतियोगितावच्छेदकविशिष्टस्येत्यस्य फलमाह भूतत्वेत्यादि स्वयं
मनस्त्वः स्वं ड नाभूतत्वोभयपर्याप्तवृत्तित्वस्य सद्धेतुतामाश्रित्याह गुणकर्मान्यत्वेत्यादि विशिष्टान्तद्वयं मनोगुणयोः क्रमेणान्वितम्· इदं चाविशि
ष्टस्यानतिरिक्तत्वे विशिष्टधर्मावच्छिन्नाधेयत्वस्य चातिरिक्तत्वमित्यभ्युपेत्य· अन्यथा सार्वभौममते उभयत्वस्यैक विशिष्टपरत्वे मतत्वमूर्तत्वोभयत्व
गुणकर्मान्यत्वविशिष्टयोरतिरिक्ततया तयोः सहजत एव गुणाप्रवृत्तितया प्रतियोगितावच्छेदकविशिष्टेत्यभिधानस्यासंगतिरिति ध्येयम्· सामान्य
पदस्य फलमाह संयोगसामान्यं चेति तथा च संयोगी द्रव्यत्वादित्यादावव्याप्तिवारणार्थमेव सामान्यपदमिति भावः· विशिष्टस्येति· विशिष्टनिरूपिता

ष्टघटत्वत्वात्· अन्यथा उक्तप्रतीत्याखंडकालएवविशिष्टवत्त्वावगाहने वस्तुमात्रस्यैव महामहामहाकालेऽसत्त्वप्रसंगात्· इदानींनघटनींमित्यादिप्रती
तिव्यतिरेकेण महाकालविषयिण्याः प्रतीतेः स्वरसतः कुत्राप्यसत्त्वात्· न चैवं खण्डकालस्याधिकरणत्वे मानाभावः घटध्वंसविशिष्टः कालः घटवद्यः
इत्यादिप्रतीतेः प्रमात्वानुरोधेनैव खंडकालस्य तथात्वादिति सिद्धान्तानुसारिपंथाः· परेतु महानसीयवह्नित्वेन वह्निघटोभयत्वेन वावच्छिन्नप्र
तियोगिताकस्य धूमसमानाधिकरणाभावस्य प्रतियोगितावच्छेदकत्वं वह्नित्वेप्यस्तीत्यव्याप्तिभियाऽवरूपं साध्यतावच्छेदकाघटको यः साध्यवृत्तिधर्मस्त
दवच्छिन्नहेतुसमानाधिकरणाभावप्रतियोगितालक्षणेप्रवेशनीया· प्रत्येकमुभयत्वपर्याप्तिसंबन्धेनाऽसतो धर्मस्य तादृशसंबन्धेनोभयवृत्तित्वासं
भवेन हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणभिन्नत्वस्य निवेशायोगात्· एवं च महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभावस्य प्रति
योगितायाः साध्यतावच्छेदकघटकेन महाकालान्यत्ववैशिष्ट्यरूपसाध्यनिष्ठधर्मेणावच्छिन्नत्वात्तादृशप्रतियोगिताकाभावमादाय न प्रतियोगिव्य
धिकरणाभावस्य प्रसिद्धिसंभावनापीत्याहुस्तच्चिन्त्यं प्रमेयवान्वाच्यत्वादित्यादौ हेतुसमानाधिकरणतादृशप्रतियोगिताकाभावाप्रसिद्ध्याऽव्याप्तिप्र
संगात्· वस्तुतो यादृशप्रतियोगितावच्छेदकविशिष्टस्यानधिकरणत्वं हेतुमति तत्तावच्छेदवैशिष्ट्यं साध्यतावच्छेदकताघटकसंबन्धमात्रेणवाच्यम
न्यथा तत्रापि पिंड स्वकालिकसंबन्धेन धूमत्वविशिष्टं यद्द्रव्यादिकं संयोगेन तदधिकरणराजितया धूमवान्वह्नेरित्यादावतिव्याप्त्यापत्तेः· इत्थंचपञ्चस
मवायेन घटत्वविशिष्टस्यैव कालिकसंबन्धेन साध्यतात् महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभावस्य साध्यतावच्छेदकताघटकसंबन्धेन प्रतियो
गितावच्छेदकावच्छिन्नत्वमप्रसिद्धं स्वरूपसमवायाभ्यामेव तत्तत्तथात्वात् विशिष्टनिरूपितसमवायानभ्युपगमात्तल्लक्षणाभावमादायन प्रति
द्धिसंभव इति ध्येयम्· केचित्तु साध्यसाधनभेदेन व्याप्तिभिन्नत्वं विशिष्टसाध्यकस्थले एव यादृशप्रतियोगितावच्छेदकावच्छिन्नत्वानधिकरणत्वं हेतु

हेतौ साव्याप्तिरनभ्युपगमेऽद्ध्वपदं तथाविधकालत्वात्वप्पुकृदिशानाव्याप्तिरतोमात्रपदं तादृशधर्मस्य महाकालत्वादेः समवायादिनाव्यापकत्वं संयोगाद्यव्याप्यवृत्तेः सुघटमित्यत उक्तं विशेषणतेति। कालिकविशेषणतयेत्यर्थः। व्याप्यवृत्तिप्रमेयत्वादेः प्रतियोगिवैयधिकरण्याघटितमेव कालिकसंबन्धावच्छिन्नव्यापकत्वं संभवतीत्यत उक्तमव्याप्यवृत्तीति। तादृशसाध्यघटादिकं द्रव्यत्वादिकं च न घटोपि कालस्य तदनधिकरणदेशावच्छेदेन कालिकसंबन्धावच्छिन्नाभाववत्त्वात्। नह्येवंविधोवाप्यत्वादि न तदनधिकरणदेशप्रसिद्धा तदवच्छेदेन कालिकसंबन्धावच्छिन्नवत्त्वाभावस्य कालेऽसंभवादिति भावः। तस्यादिति। तथा च कालो घटवान्महाकालत्वादित्यादौ व्याप्तिलक्षणाव्याप्तिरिति भावः। प्रथमविवक्षानुसारेणैवं संगमयति स्वावच्छेदकमिति। प्रतियोगितावच्छेदकसंबन्धेनेत्यर्थः। काले महाकाले। तत्संबन्धावच्छिन्नत्वस्य साध्यतावच्छेदकीभूतकालिकसंबन्धावच्छिन्नत्वस्य। असंभव इति परेणान्वयः। द्वितीयविवक्षानुसारेणाह तेन संबन्धेनेति। साध्यतावच्छेदकीभूतकालिकसंबन्धेनेत्यर्थः। ननु महाकालान्यत्वविशिष्टघटाभावस्यैव प्रतियोगिव्यधिकरणः सुलभः। न चात्र विशेष्यत्वेन महाकालनिरूपितविशेषणताया एव विवक्षितत्वात्तादृशसंबन्धेन निरुक्तप्रतियोगिव्यधिकरणप्रसिद्धेर्वोक्ताभावस्यापि प्रतियोगिवैयधिकरण्यासंभव इति वाच्यं तथासति कालमात्रवृत्तिधर्मस्य तादृशविशेषणतयाव्यापकं तस्यादित्यस्यैव सम्यक्त्वेऽपि इद्व्याप्तिरिक्ते तदभिधानस्य सन्दर्भविरोधापत्तेः। स्वरूपसंबन्धेन गगनादेर्वृत्तित्वमते तु इत्यग्रिमग्रन्थविरोधाच्च। महाकालीयविशेषणतया गगनादेर्वृत्तिमत्त्वेऽपि तादृशसंबन्धसामान्ये महाकालान्यविशिष्टघटत्वावच्छिन्नप्रतियोगिताकत्वविशिष्टतादृशघटत्वावच्छिन्नाभावस्यैव निरुक्तरूपेण प्रतियोगिव्यधिकरणत्वसंभवेन पूर्वमतस्यैव सम्यक्त्वादिति चेन्न तदानीं महाकालान्योऽविशिष्टो घटः कालोयं महाकालान्यत्वविशिष्टघटवानित्यादिप्रतीत्या महाकालस्यापि तत्कालोपाध्यवच्छेदेन महाकालान्यत्वविशि

आ·रसे·
१४

तादृशसंबन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्यागगनादेःपृथिवीत्वव्यापकत्वंदुर्घटमेवस्यादितिभावः·तादृशसंबन्धस्यप्रतियोगितानवच्छेदक
त्वेपिद्वितीयकल्पानुसारेणव्यापकत्वसंपादयतिसाध्यतावच्छेदकसंबन्धेनेति·तथाचसंबन्धान्तरावच्छिन्नपटाद्यभावमादायैवलक्षणसमन्व
यइतिभावः·द्रव्यत्वस्यगगनासंयुक्तविभ्वन्तरेनव्यभिचारादुक्तत्वस्माहपृथिवीत्वादीति·व्यापकत्वमिति·गगनादेरितिपूर्वेणान्वयः·नन्वेवंनि
रुक्तव्याप्तिज्ञानाद्घटोगगनवानित्यनुमितिःप्रमास्यादतआहसिद्धिरपीति·तथैववृत्त्यनियामकसंयोगेनैव·तथाचतादृशसंबन्धेनगगनाद्य
नुमितेःप्रमात्वमिष्टमेवेतिभावः·तेनासंबन्धेत्यादीति·येनसंबन्धेनसामानाधिकरण्यपरामर्शोभासतेतेनैवसंबन्धेनसाध्यानुमितेःफलत्वा
दितिभावः·सामानाधिकरण्येहेतुत्वस्यतत्रसंबन्धविशेषनिवेशस्यवानंगीकारमतेआहअव्यापकत्वाद्येति·तेनेत्यनुषज्यते·तथाचयादृशसंब
न्धेनसाध्यस्यहेतुव्यापकत्वंगृह्यतेतेनैवसंबन्धेनसाध्यसिद्धिःफलमतोवृत्तिनियामकसंबन्धेनसाध्यस्यहेतुव्यापकत्वस्यासंभवादेवनतेनसाध्य
स्यप्रमानुमितिरितिभावः·ननुवृत्तिनियामकसंयोगेनापिगगनस्यपृथिवीत्वादिव्यापकत्वंदुर्घटंतादृशसंबन्धेनगगनसंबन्धप्रसिद्ध्यागगनाभाव
स्यप्रतियोग्यधिकरणत्वाभावात्तादृशाभावान्तरप्रतियोगित्वस्यगगनादावसत्त्वादतआहव्यक्तीत्यादि·इदंवृत्तिनियामकसंबन्धेनगगना
देर्व्यापकत्वम्·तथाचनिरुक्तप्रतियोगिप्रतियोगिकत्वेत्यादिनावक्ष्यमाणंप्रतियोग्यसामानाधिकरण्यंवृत्तिनियामकसंबन्धेनगगनाभावेपिसा
दितिभावः·कालिकसंबन्धेनगोत्वादौसाध्येघटादिकालोपाधिमात्रवृत्तिघटत्वादिहेतौनाव्याप्तिः·विभिन्नकालीनतत्तद्व्यक्तित्वावच्छिन्नाभा
वस्यैवघटादौप्रतियोगिवैयधिकरण्यसंभवादतउक्तमष्टद्रव्यातिरिक्तेति·पृथिव्यादिचतुर्द्रव्यातिरिक्तेतितुज्यायः·गगनादेःकालत्वविरहादेवत
दुदासइतिध्येयम्·वर्तमानत्वकत्वंचकालस्यापिभिन्नकालीनतत्तद्व्यक्तित्वावच्छिन्नाभावस्यप्रतियोग्यनधिकरणत्वप्रसिद्ध्यातन्मात्रवृत्तिसत्त्वादि

१४

मतइतिवक्तव्यमविशिष्टसाध्यकस्थलेतु यादृशप्रतियोगिताश्रयानधिकरणत्वं हेतुमतइत्येवलाघवात्कृतमुचितं तथाचउद्देश्यसाध्यतायामसत्त्वाननुगतत्वविशिष्टघटाभावोपि प्रतियोगिसमानाधिकरणएव प्रतियोगिताच प्रतियोगितावच्छेदकस्वरूपालाघवात्. ननुप्रतियोगिस्वरूपानानात्वेनगौरवात्तोनैकप्रतियोग्यनधिकरणतामादाय संयोगीसत्त्वादित्यादावव्याप्तिरित्याद्युक्तमित्यत्राह लाघवान्महाकालत्वादिसाध्यकाव्याप्तिवारणार्थमेवाविशिष्टसाध्यकस्थलेपि प्रतियोगितावच्छेदकतावच्छिन्नानधिकरणत्वप्रवेशस्यप्रामाणिकत्वयागौरवस्याकिंचित्करत्वादिति सार्वभौममतमाशंक्यनिराचष्टेन चेति. वाच्यमितिपरेणान्वयः. तादृशसंबन्धेनेति साध्यतावच्छेदकसंबन्धेनेत्यर्थः. इदंचाहृतीत्यस्यप्रतियोगित्वानुगतत्वाविशिष्टंतादृशपदस्य प्रतियोगितावच्छेदकसंबन्धपरत्वेप्रतियोगितासाध्यतावच्छेदकसंबन्धावच्छिन्नत्वाप्राप्त्या. तादृशसंबन्धेनेत्यस्यफलमाह सत्त्वादीति. विषयतायाहृत्वनियामकत्वमतेसत्त्ववतिघटेतज्ज्ञानाभावस्यसत्त्वाज्जातएवप्रतियोगिवैयधिकरण्यंसंभवतीत्यतः संयोगसामान्यस्य चेति. नातिप्रसंगइति ज्ञानवान्संयोगवान्सत्त्वादित्यादौनातिप्रसंगइत्यर्थः. तत्रतद्व्यक्तित्वसामान्याभावस्यसंयोगादवभावादुक्तातिव्याप्तिवारणमेवप्रतियोगिव्यधिकरणस्यापि प्रयोजनमित्यवधेयम्. प्रतियोगितावच्छेदकविशिष्टस्येत्यस्यफलमाह भूतत्वेत्यादि स्वयंमतस्यैवंदूषणान्तरत्वोभयसाध्यकमूर्तत्वस्य सद्धेतुतामाशंक्याह गुणकर्मान्यत्वेत्यादि विशिष्टसत्त्वमनेनगुणत्वकर्मत्वान्यतरत्वेतम्. इदंचाविशिष्टस्यानतिरिक्तत्वेविशिष्टधर्मावच्छिन्नाधेयत्वस्यचातिरिक्तत्वमित्यभ्युपेत्य अन्यथा सार्वभौममते उभयत्वस्यैकविशिष्टपरत्वेभूतत्वमूर्तत्वोभयत्वगुणकर्मान्यत्वविशिष्टयोरतिरिक्ततयातयोःसहजनएवगुणघटितया प्रतियोगितावच्छेदकविशिष्टत्वमिधानस्यासंगतिरितिध्येयम्. सामान्यपदस्यफलमाह संयोगसामान्यंविति तथाचसंयोगीद्रव्यत्वादित्यादावव्याप्तिवारणार्थमेवसामान्यपदमितिभावः. विशिष्टस्येति. विशिष्टनिरूपिता

७ग.ली.
१५

ष्टघटवत्त्वात्. अन्यथा उक्तप्रतीत्यापत्तेऽ महाकाल एव विशिष्टवत्त्वावगाहने वस्तुमात्रस्यैव मकामहामहाकालेऽसत्त्वप्रसंगात्. इदानीं नेदानीमित्यादिप्रती
तिव्यतिरेकेण महाकालविषयिण्याः प्रतीतेः स्वरसतः कुत्राप्यसत्त्वात्. न चैवं खण्डकालस्याधिकरणत्वे मानाभावः घटध्वंसविशिष्टः कालः घटवदसः
इत्यादिप्रतीतेः प्रमात्वानुरोधेनैव खण्डकालस्य तथात्वादिति सिद्धान्तानुसारिपन्थाः. परे तु महानसीयवह्नित्वेन वह्निघटोभयत्वेन वावच्छिन्नप्र
तियोगिताकस्य धूमसमानाधिकरणाभावस्य प्रतियोगितावच्छेदकतंच प्रसिद्धत्वेप्यसीत्यव्याप्तिभियाऽवश्यं साध्यतावच्छेदकाघटकीयः साध्यवृत्तिधर्मस्त
दवच्छिन्नहेतुसमानाधिकरणाभावप्रतियोगितालक्षणे प्रवेशनीया. प्रत्येकमुभयत्वपर्याप्तिसंबन्धेनाऽसत्तो धर्मस्य तादृशसंबन्धेनोभयवृत्तित्वासं
भवेन हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणभिन्नत्वस्य निवेशायोगात्. एवं च महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभावस्य प्रति
योगितायाः साध्यतावच्छेदकघटके महाकालान्यत्ववैशिष्ट्यरूपसाध्यनिष्ठधर्मेणावच्छिन्नत्वान्न तादृशप्रतियोगिताकाभावमादाय न प्रतियोगिव्य
धिकरणाभावस्य प्रसिद्धिसंभावनापीत्याहुस्तच्चिन्त्यं प्रमेयवान् वाच्यत्वादित्यादौ हेतुसमानाधिकरणतादृशप्रतियोगिताकाभावाप्रसिद्ध्याऽव्याप्तिप्र
संगात्. वस्तुतोऽपि तादृशप्रतियोगितावच्छेदकविशिष्टस्यानधिकरणत्वं हेतुमत्त्युत्पन्नावच्छेदकवैशिष्ट्यं साध्यतावच्छेदकताघटकसंबन्धमात्रेणेतरेण वाच्यम
न्यथा तत्रापि पिंडस्य कालिकसंबन्धेन धूमत्वविशिष्टं यद्घटादिकं संयोगेन तदधिकरणवृत्तितया धूमवान्वह्नेरित्यादावतिव्याप्त्यापत्तेः. इत्थं च घटत्वस
मवायेन घटत्वविशिष्टस्यैव कालिकसंबन्धेन साध्यतायां महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभावस्य साध्यतावच्छेदकताघटकसंबन्धेन प्रतियो
गितावच्छेदकावच्छिन्नत्वमप्रसिद्धं स्वरूपसमवायाभ्यामेव तत्तथात्वात् विशिष्टनिरूपितसमवायानभ्युपगमात् तत्तादृशाभावमादाय न प्रति
द्धिसंभव इति ध्येयम्. केचित्तु साध्यसाधनभेदेन व्याप्तिभिन्नत्वं विशिष्टसाध्यकस्थले एवं तादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतु

हेतौ नाव्याप्तिरतेऽस्मत्समेऽद्व्यपदं तथाविधकालत्वादेरप्युक्तरीत्या नाव्याप्तिरतो मात्रपदं तादृशधर्मस्य महाकालत्वादेः समवायादिनाव्यापकत्वं संयो
गाद्यव्याप्यवृत्तेः सुघटमित्यत उक्तं विशेषणतेति । कालिकविशेषणतयेत्यर्थः । व्याप्यवृत्तिप्रमेयत्वादेः प्रतियोगिवैयधिकरण्यापादितमेव का
लिकसंबन्धावच्छिन्नव्यापकत्वं संभवतीत्यत उक्तमव्याप्यवृत्तीति । तादृशसाध्यं घटादिकं द्रव्यत्वादिकं च न हेतोरपि कालस्य तदनधिकरणदेशा
वच्छेदेन कालिकसंबन्धावच्छिन्नाभाववत्त्वात् । न ह्येवंविधो वाच्यत्वादिर्न तदनधिकरणदेशाप्रसिद्ध्या तदवच्छेदेन कालिकसंबन्धावच्छिन्नवाच्य
त्वाभावस्य कालेऽसंभवादिति भावः । न स्यादिति । तथा च कालोपाधित्वान्महाकालत्वादित्यादौ व्याप्तिलक्षणाव्याप्तिरिति भावः । प्रथमविवक्षानुसारे
ण दोषं संगमयति स्वावच्छेदकमिति । प्रतियोगितावच्छेदकसंबन्धेनेत्यर्थः । काले महाकाले । तत्संबन्धावच्छिन्नत्वस्य साध्यतावच्छेदकीभूतकालि
कसंबन्धावच्छिन्नत्वस्य । असंभव इति परेणान्वयः । द्वितीयविवक्षानुसारेणाह तेन संबन्धेनेति । साध्यतावच्छेदकीभूतकालिकसंबन्धेनेत्यर्थः । न
तु महाकालान्यत्वविशिष्टघटाभाव एव प्रतियोगिव्यधिकरणः सुलभः । न चात्र विशेष्यत्वेन महाकालनिरूपितविशेषणताया एव विवक्षि
तत्वात्तादृशसंबन्धेन निरुक्तप्रतियोग्यधिकरणप्रसिद्धेर्वोक्ताभावस्यापि प्रतियोगिवैयधिकरण्यासंभव इति वाच्यं तथा सति कालमात्रवृत्ति
धर्मस्य तादृशविशेषणतयावृत्तिमपि व्यापकत्वं न स्यादित्यस्यैव सम्यक्त्वेऽष्टव्याप्तिरिते तदभिधानस्य सन्दर्भविरोधापत्तेः । स्वरूपसंबन्धेन गगनादे
र्वृत्तित्वमते तु इत्यग्रिमग्रन्थविरोधाच्च । महाकालीयविशेषणतया गगनादेर्वृत्तिमत्त्वेऽपि तादृशसंबन्धसामान्ये महाकालान्यविशिष्टघटत्वावच्छिन्न
प्रतियोगिताकत्वविरहात्तादृशघटत्वावच्छिन्नाभावस्यैव निरुक्तरूपेण प्रतियोगिव्यधिकरणत्वसंभवेन पूर्वमतस्यैव सम्यक्त्वादिति चेन्न तदानीं म
हाकालान्यविशिष्टो घटः कालोऽयं महाकालान्यत्वविशिष्टघटवानित्यादिप्रतीत्या महाकालस्यापि तत्तत्कालोपाध्यवच्छेदेन महाकालान्यत्वविशि

तादृशसंबन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या गगनादेः पृथिवीत्वव्यापकत्वं दुर्घटमेव स्यादिति भावः। तादृशसंबन्धस्य प्रतियोगितानवच्छेदकत्वेपि द्वितीयकल्पानुसारेण व्यापकत्वं संपादयति साध्यतावच्छेदकसंबन्धेनेति। तथा च संबन्धान्तरावच्छिन्नगगनाभावमादायैव लक्षणसमन्वय इति भावः। द्रव्यत्वस्य गगनासंयुक्तविभ्वन्तरे न व्यभिचाराद्धेतुत्वन्तस्मादाह पृथिवीत्वादाविति। व्यापकत्वमिति। गगनादेरिति पूर्वेणान्वयः। नन्वेवं निरुक्तव्याप्तिज्ञानात्तद्रूपेण गगनवानित्यनुमितिः प्रमा स्यादत आह सिद्धरूपीति। तथैव हि वृत्त्यनियामकसंयोगेनैव। तथा च तादृशसंबन्धेन गगनाद्यनुमितेः प्रमात्वमिष्टमेवेति भावः। तेनासंबन्धित्यादीति। येन संबन्धेन सामानाधिकरण्यं परामर्शे भासते तेनैव संबन्धेन साध्यानुमितेः फलत्वादिति भावः। सामानाधिकरण्ये हेतुत्वस्य तद्घटकसंबन्धविशेषनिवेशस्य चानङ्गीकारमते आह अव्यापकत्वाद्येति। तेनेत्यनुषज्यते। तथा च यादृशसंबन्धेन साध्यस्य हेतुव्यापकत्वं गृह्यते तेनैव संबन्धेन साध्यसिद्धिः फलमतोऽवृत्तिनियामकसंबन्धेन साध्यस्य हेतुव्यापकत्वस्यासंभवादेव न तेन साध्यस्य प्रमानुमितिरिति भावः। ननु वृत्तिनियामकसंयोगेनापि गगनस्य पृथिवीत्वादिव्यापकत्वं दुर्वारं तादृशसंबन्धेन गगनसंबन्धाप्रसिद्ध्या गगनाभावस्य प्रतियोगिव्यधिकरणत्वाभावात् तादृशाभावान्तरप्रतियोगित्वस्य गगनादावसत्त्वादत आह व्यक्तीत्यादि। इदं वृत्तिनियामकसंबन्धेन गगनादेरव्यापकत्वम्। तथा च निरुक्तप्रतियोगिप्रतियोगिकत्वेत्यादिना वक्ष्यमाणप्रतियोग्यसामानाधिकरण्यं वृत्तिनियामकसंबन्धेन गगनाभावेपि सादिति भावः। कालिकसंबन्धेन गोत्वादौ साध्ये घटादिकालोपाधिमात्रवृत्तिघटत्वादिहेतौ नाव्याप्तिः। विभिन्नकालीनतत्तद्व्यक्तित्वावच्छिन्नाभावस्यैव घटादौ प्रतियोगिव्यधिकरणस्य संभवादत उक्तमष्टद्रव्यातिरिक्तेति। पृथिव्यादिनवद्रव्यातिरिक्ते इति तु न्यायः। गगनादेः कालत्वविरहादेव न मुदास इति ध्येयम्। वर्मात्मकत्वेऽकालस्यापि भिन्नकालीनतत्तद्व्यक्तित्वावच्छिन्नाभावस्य प्रतियोग्यनधिकरणत्वप्रसिद्ध्या तन्मात्रवृत्तित्वसत्त्वादि

ननु गोः साध्यत्वेपि गोत्वं हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकमित्याकारकव्याप्तिधियोनुमितिहेतुत्वात्तत्र च धर्मितावच्छेदकविधेयैक्यान्यत्वस्यापेक्षितत्वात्तद्ग्रहे गोविधेयकानुमितिरप्यनुपपन्नेत्यत आह आदीति. आदिना पक्षधर्मतापरिग्रहः. तथा च गवेतरवृत्तित्वव्याप्तेः साध्यताव्यापकतावच्छेदकताग्रहे धर्मितावच्छेदकतयोपस्थिते ध्रौव्येपि तद्विशिष्टस्य पक्षतापक्षधर्मताधीसत्त्वे वायं गौरित्यनुमितेर्गोविधेयकत्वमावश्यकमिति तदनुरोधेनैव नानात्मनव्यापकत्वं वाच्यमित्याशयः. यत्तु शुद्धगोत्वावच्छिन्नविधेयकानुमितिं प्रति गोत्वनिष्ठनिरवच्छिन्नविशेष्यताकमेवतियोगितानवच्छेदकत्वज्ञानं हेतुरतो गोत्वत्वाग्रहे गोत्वे साध्यतादिव्यापकतावच्छेदकत्वग्रहसंभवात्साध्यकानुमितेर्नानुपपत्तिरभावलौकिकप्रत्यक्ष एवाधिकरणतावच्छेदकरूपेणानुपस्थिते हेतुत्वादिति तत्तुच्छं व्यभिचारसत्ताप्रतिबध्यतया नाशव्यापकताग्रहस्यानुमित्यहेतुत्वात्. अन्यथानुमित्यप्रसक्त्या शुद्धगोत्वविधेयकानुमितिं प्रति निरवच्छिन्नगोत्वविशेष्यताकस्य प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावाप्रतियोगित्वज्ञानस्य हेतुत्वात् एवं गौरित्यनुमितेर्गोत्वत्वाद्यनुपस्थितावपि गोत्वरूपधर्मसाध्यकत्वस्य दुर्वारत्वापत्तेरिति दिक्. प्राञ्चस्तु गोतादात्म्यस्य साध्यताव्यापकत्वग्रहादेव गोस्तादात्म्येनासिद्धिसंभवात्तदनुरोधेन गोस्तादात्म्येन व्यापकत्वस्वीकारेण युक्तः संबन्धगतव्यापकत्वग्रहादेव संबन्धिनोनुमितेर्मिश्रादिसंमतत्वात्. तदुक्तं गोत्वत्वाग्रहदशायामपीति. गोतादात्म्यताग्रहदशायामपीति तदर्थ इत्याहुस्तच्चिन्त्यं गोत्वत्वाग्रहदशायामित्यस्य गोत्वत्वेनाग्रहे यस्मादिति प्रतीत्या गोत्ववाधनिश्चयदशायामित्यर्थः. तथा च तदानीं गौरित्यनुमित्यर्थं धर्मिणो धर्मव्यापकत्वमवश्यं स्वीकार्यमित्यपि वदन्ति. गौरिति. त्रिमुनीतिपरेणान्वयः. गोर्व्यतिरेकादिति. तादात्म्येनेत्यनुषज्यते. एवं चेति. सामानाधिकरण्यापेक्षसंबन्धित्वप्रवेशे चेत्यर्थः. संयोगत्वेन संयोगमात्रस्य प्रतियोगितावच्छेदकत्वे वृत्त्यनियामकसंयोगस्यापि तत्त्वं सर्वसिद्धमतो मात्रपदम्. संबन्धरूपत्वेति. अन्यथाता

तरियसंबन्धयोरपि भेदेन व्याप्तेर्भेदात्तादात्म्येन हेतुसाध्यस्थले हेतुमन्निष्ठाभावाऽप्रतियोगिसाध्यतादात्म्यमेव व्याप्तिर्वक्तुमुचितानालाघवादिति वदन्ति· एव
मिति· सामानाधिकरण्यापत्तेः संबन्धिसन्निवेशेनोक्तेनेत्यर्थः· धर्मिण इति· वस्तुन इत्यर्थः· तथा च गोः सास्नावत्त्वाद्गुणिमान्यमेवतन इत्यादौ तादात्म्यसंबन्धे
न व्यापकता व्याप्यतापि संगच्छत इति भावः· ननु तादात्म्येन धर्मिणो धर्मव्याप्यतायामपसिद्धान्त इत्यत आह अत एव वेति· धर्मिणो धर्मव्याप्यत्वाद
वेत्यर्थः· तच्च तत्रव्यतिरेक्यादि ग्रन्थे· ननु समवायेन जलत्वादेः पृथिवीत्वाभावव्याप्यत्वपरतयैव तत्र कुत्र संगतिरित्याशंक्य तथा सति पृथिव्यां जला
दिभेदसाधनार्थं तदुपन्यासो न स्याद्व्यापकताघटकसंबन्धावच्छिन्नव्यापकताभावेन व्याप्यताघटकसंबन्धावच्छिन्नव्याप्याभावस्यैवासिद्धेरित्यव
यिनि दृष्टान्तप्रदर्शनं परिहरति यथा वेति· धूमावयव इति· न वह्निर्धीरित्यन्वयः· कथमन्यथेति· नियम उपपद्यते इत्यन्वयः· महानसे संयोगेनेति· न
निवर्तत इत्यन्वयः· न संयोगावच्छिन्नाभावो नुमितेर्भासत इति तदर्थः· निवर्तते वेति· धूम इति परेणान्वयः· तादात्म्येनैवेति· समवायेन व्या
प्यतायां तु समवायेन जलस्यात्यन्ताभावसिद्धेरिति जलभेदसाधनार्थं तत्रास्यावतारो न स्यादिति भावः· नन्वेतावतापि तादात्म्यसंबन्धावच्छिन्नजलाभाव
सिद्धेर्न तु जलान्योन्याभाव इति न दोषस्तादवस्थ्यमत आह स एव वेति· धर्मिणो धर्मव्याप्यत्वे प्राचां संवादमुपन्यस्य धर्मिणो धर्मव्यापकत्वे तमाह इत्थ
मेवं चेति· धर्मिणो धर्मव्यापकत्वे प्रमाणमप्याह अत एव वेति· धर्मिणो धर्मव्यापकत्वादेवेत्यर्थः· नन्वियं गौरित्यनुमितिर्गवेतरावृत्तित्वरूपायाः अद्
गोत्वनिरूपितव्याप्तेर्ज्ञानात्समवायेन निरवच्छिन्नगोत्वसाध्यकैव भविष्यति साध्यवदन्यावृत्तित्वरूपाया अपि व्याप्तेरनुमितिहेतुत्वस्याग्रे वाच्यता
दतस्तादृशानुमित्यनुरोधाद्धर्मिणो व्यापकत्वस्वीकारोनुचित इत्युक्तम्· गोत्वत्वेति· गोत्वत्वं गवेतरावृत्तित्वं तथा च गवेतरावृत्तित्वरूपाया गोत्वव्या
प्तेर्ज्ञानदशायामप्यन्यायायं गौरित्यनुमितेर्गोत्वविधेयकत्वासंभवात् गो[illegible]विधेयकमेवेति तदनुरोधाद्वरं धर्मिणो व्यापकत्वं वाच्यमिति भावः

त्तामात्रयाव्याप्तिः॰ एवं द्रव्यत्वसाध्यके घटानुयोगिकसमवायेन सत्त्वादिहेतौ समवायमात्रेण तत्सत्तामात्रमापीत्यतो यः संबन्ध इत्यपदस्य यादृशसंबंध इत्युक्तम्॰ साध्यस्य चेति॰ ग्राह्यसामानाधिकरण्य इत्यन्वयः॰ धूमाधिकरणे तत्तत्संयोगेन वह्निसामान्याभावान्याभावसत्त्वाद्वह्निमान्धूमादित्यादावव्याप्तिरतो यादृशा इत्युक्तं तेन संबन्धेन यो हेतुमानित्यस्य फलमाह धूमसमवायीति॰ प्रतियोगिताया इति॰ अवच्छेदकत्वेपि वह्नित्वस्य नक्षतिरित्यन्वयः॰ साध्यस्य चेत्यादेः फलमाह धूमसंयोगीत्यादि॰ ननु तादात्म्येन गगनादेः साध्यत्वे तादृशाव्याप्तिस्तत्र साधनवन्निष्ठान्योन्याभावप्रतियोगितायाः साध्यतावच्छेदकतादात्म्यसंबन्धावच्छिन्नत्वे मानाभावस्य समपमेव बोधुधिकारि प्रयोजकत्वात्॰ एवं धनी चैत्रत्वादित्यादौ स्वत्वनियामकस्वामित्वसंबन्धेन धनादेः साध्यतायामपि तादृशसंबंधावच्छिन्नप्रतियोगिताप्रसिद्धेरत आह यद्वेति॰ ननु प्रतियोगितावच्छेदकसंबंधेन यद्वैयधिकरण्यं प्रवेश्यं तेन प्रतियोगितायाः साध्यतावच्छेदकसंबन्धावच्छिन्नत्वविवक्षायां गौरवमतो यद्वेत्यादिकल्पेत्यादि॰ नत्वेवं संबन्धान्तरावच्छिन्नत्वेन तत्तत्प्रतियोगितावच्छेदकभेदकृतगौरवं तत्त्वेन यद्वेत्यादिकल्पस्यैव गुरुत्वादित्याहुः॰ संबन्धभेदेनेति॰ साध्यतावच्छेदकसंबन्धेन॰ ननु संबन्धविशेषेणैव साध्यसाधनयोः सामानाधिकरण्यप्रवेशे तादात्म्येन हेतुसाध्यभावेऽव्याप्तिः॰ तादृशसंबन्धेन हेतुसाध्ययोरधिकरणाप्रसिद्धेरत आह एवं स्थित इति॰ संबन्धविशेषस्यात्रानिवेशे स्थिते इत्यर्थः॰ सामानाधिकरण्यादावित्यादिपदेन हेतुसामानाधिकरण्यप्रविष्टहेत्वधिकरणत्वस्य परिग्रहः॰ प्रयोजनमाह तथा चेति॰ धर्मिणोपीति तादात्म्येन व्याप्यत्वं व्यापकत्वं निर्वहयतीत्यर्थः॰ अन्यथा तादात्म्येन हेतोः साध्यस्य चाधिकरणाप्रसिद्ध्या न तन्निर्वाह इति भावः॰ योन्योन्याभावः यो भाव इत्येव वक्तुमुचितमन्योन्याभावत्वनिवेशे वैयर्थ्यादिति ध्येयम्॰ तदनवच्छेदकवह्निमत्त्वेति॰ वह्निमत्त्वं च वह्न्यधिकरणत्वं तच्चाधिकरणव्यक्तीनां भेदेप्यभिन्नमित्याशयेनेदम्॰ अत्र साध्यसाधनयोरिव

४०

संबन्धतयास्वावच्छेदकभिन्नतादृशसंबन्धेनसाधनस्यनःप्रतियोग्यनधिकरणत्वाभावात्.प्रतियोगितावच्छेदकभिन्नयत्किंचित्संबन्धेनप्रतियोग्यनधिक
रणतोन्यात्तदुपरागोपिसंयोगेनवह्निसाध्यकेधूमादावव्याप्तिःसमवायावच्छिन्नवह्न्यभावस्यैवसमवायेनप्रतियोगिव्यधिकरणस्यवह्नित्वस्वरूपंयत्प्रति
योगित्वंतस्यैवसंयोगेनाप्यवच्छिन्नत्वादितिवदन्ति.प्रतियोगिस्वरूपेणतदवच्छेदकस्वरूपेणवायत्प्रतियोगित्वंतदपिकस्यचिदभावस्यकेनचिद्धर्मे
णसंबन्धेनवावच्छिन्नंव्यवहारबलात्तदनुसारेणसंबन्धेनधर्मेणवासमवायावच्छिन्नवह्न्यभावप्रतियोगित्वंसंयोगावच्छिन्नमित्यादिव्यवहाराभा
वात्.तथाचयदभावीययत्प्रतियोगितावच्छेदकसंबन्धेनयदभावीययत्प्रतियोगितानिरूपितावच्छेदकभिन्नधर्मावच्छिन्नासंबन्धित्वंहेतु
मत्तत्तदभावीययत्प्रतियोगितानिरूपितावच्छेदकताश्रयत्वंसाध्यतावच्छेदकत्वेनविवक्षितमित्यदोषः.यत्प्रतियोगितेत्यपहाययादृशप्रतियोगिते
त्यभिधानादेवतादृशार्थलाभात्.नचप्रतियोगितावच्छेदकरूपंयत्प्रतियोगित्वंतद्यदभावीयतादृशप्रतियोगितावच्छेदकसंबन्धेनतादृशप्रति
योगित्वावच्छिन्नसामानाधिकरण्यंहेतुमतइत्येवसम्यक्.प्रतियोगितावच्छेदकावच्छिन्नत्वप्रवेशोव्यर्थइतिवाच्यंवह्निधूमोभयवान्वह्नेरित्यादावति
व्याप्त्यापत्तेः.हेतुमन्मात्रस्यैववह्निधूमोभयत्वावच्छिन्नाभावप्रतियोगिमत्त्वादित्यस्यसुकरत्वात्.साध्यसामानाधिकरण्येति.परामर्शविषयसा
ध्यसामानाधिकरण्यइत्यर्थः.संबन्धविशेषेणसाध्यसाधनयोःसामानाधिकरण्यज्ञानादनुमितिस्तद्धिप्रतिबन्धकतयैवविरोधस्यहे
त्वाभासत्वमितिमतेनेदं.यदिचयेनकेनापिसंबन्धेनसाध्यसाधनयोःसामानाधिकरण्यज्ञानादनुमितिःस्वव्यापकसंबन्धितासामान्यंवाव्याप्तिः.व्यापक
त्वदलेसाध्यसाधनयोःसंबन्धविशेषप्रवेशनादेवातिप्रसंगभंगादितिविभाव्यतेनतुपरामर्शेनसाधनस्यानुमित्याचसाध्यस्यग्राह्यंयत्पक्षतावच्छेदके
नसार्द्धंसामानाधिकरण्यंतत्रप्रविष्टोयादृशःसंबन्धइत्यर्थेविरोधःधूमवान्वह्नेरित्यादौमहानसीयमहानसीयसंयोगेनसद्धेतौसंयोगमात्रेणहेतुम

देशेनुप्रतियोगितानवच्छेदकमित्यत्रावच्छेदकत्वं साध्यतावच्छेदकताघटकसंबन्धेन ग्राह्यमन्यथा विषयितासंबन्धेन रूपत्वावच्छिन्नस्य ज्ञानादेः
पृथिव्यादौ समवायेनाभावस्य सत्त्वाद्रूपवान् पृथिवीत्वादित्यादौ व्याप्तिप्रसंगात् वस्तुतः साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नं यत्प्रतियोगिता
वच्छेदकत्वं तन्निरूपितस्वरूपसंबन्धेनैव निरुक्तप्रतियोगितावच्छेदकत्वस्याभावः साध्यतावच्छेदकधर्मे वक्तव्यस्तेन वह्निमान् धूमादित्यादौ पगव
ह्नित्वादिनिरूपितसमवायादिसंबन्धेन वह्नित्वादेः साध्यतावच्छेदकत्वं तत्र तादृशसंबन्धावच्छिन्नस्य प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियो
गितावच्छेदकत्वस्याप्रसिद्धावपि न क्षतिरिति ध्येयम्। अत्र यादृशप्रतियोगितावच्छेदकधर्मे तादृशप्रतियोगिताश्रयाधिकरणीभूतयत्प्रतियोगिनिष्ठा
धिकरणतानवच्छेदकत्वस्याधिकरणतावच्छेदकत्वस्य च द्वयोर्व्यतिरेकः तत्र प्रतिभेदकूटवत्त्वमेव यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरण
त्वमित्यस्यार्थो बोध्यः। तेन धूमवदित्यादिप्रतीतेरवश्यक्लृप्ताभिपर्वततादितत्तद्धर्मविशिष्टतत्तद्रूपत्वावच्छिन्नाधिकरणताकभिन्नेवोपपत्तौ धूमत्वाद्य
खंडधर्मावच्छिन्नाधिकरणतायां मानाभावात्। धूमादिसामान्याभावप्रतियोगितावच्छेदकं यद्धूमत्वादिकं तदवच्छिन्नाधिकरणताप्रसिद्धावपि धूम
वान्वह्नेरित्यादेर्नाव्याप्तिः। धूमाधिकरतत्तत्प्रतिभेदकूटवत्त्वमादायैव धूमसामान्याभावस्य प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यसंभवादिति
ध्येयम्। नन्वत्र प्रतियोगित्वं नातिरिक्तपदार्थः प्रतियोगित्वादिकं तु स्वरूपसंबन्धविशेष इत्यापुनरप्यविरोधात् किंतु स्वरूपसंबन्धः स च यत्प्रतियोगिस्व
रूपस्तत्तद्वह्निमान् धूमादित्यादौ सर्वत्रैवासंभवः घटादिस्वरूपस्यैकस्यैव घटपटाभावप्रतियोगित्वस्य घटत्वसमवेतत्वज्ञेयत्वाद्यवच्छिन्नतया नानादृशा
वच्छेदकैर्भिन्नं ज्ञेयत्वाद्यवच्छिन्नस्य हेतुमति सत्त्वात्प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः। न च प्रतियोगितावच्छेदकस्वरूपमेव प्रतियोगित्वमित्यदोषः
समवायेन वह्नेः साध्यत्वे धूमादावतिव्याप्तिप्रसंगात्। समवायावच्छिन्नवह्न्यभावस्य वह्नित्वस्वरूपप्रतियोगित्वे समवायवत्संयोगस्यापि तदवच्छेदक

त्म
भाववयोरभाववत्त्वं लाघवात्· ननु कपिसंयोगाद्यसमवेतमात्रं तथात्वं गौरवादित्याशयः· गुणसामान्याभावस्य संयोगप्रतियोगित्वमाविष्कर्तुं गुणाना
मित्युक्तम्· तत्प्रतियोगिनेति· कपिसंयोगीयतत्प्रतियोगितावच्छेदकेत्यर्थः· ननु गुणसामान्याभावस्याभावो द्रव्यत्वमेव लाघवात्· ननु गुणो गौरवादतः
संयोगस्य प्रतियोगित्वं न गुणसामान्याभावस्येति वाच्यं घटादावुत्पत्तिदशायां गुणसामान्याभावस्यैव सत्त्वेन द्रव्यत्वस्य तदभावत्वासंभवात्· अभावाभाव
स्य प्रतियोगित्वनियमाच्चेति भावः· यादृशेति· तथा च गुणसामान्याभावनिष्ठप्रतियोगितायाः अवच्छेदकं यद्गुणसामान्याभावत्वं हेतुमत्तत्त्वावच्छिन्ना
नधिकरणत्वेपि कपिसंयोगाभाववत्त्वस्य तादृशप्रतियोगितानवच्छेदकत्वात्· नाद्रव्येण साध्यतायामात्मत्वहेतौ नाव्याप्तिः· द्रव्यत्वाभाववानात्मत्वादित्या
दौ तु द्रव्यत्वाभावत्वावच्छिन्नानधिकरणत्वं हेतुमत्तन्निष्ठाभावस्य तादृशप्रतियोगितावच्छेदकमेव द्रव्यत्वाभावत्वमतो नातिव्याप्तिरिति भावः· न च व
ह्निमानेतत्त्ववत्त्वादित्यादौ तत्तद्वह्निसंयोगसंवन्धेन साध्यतायामव्याप्तिः· तत्संवन्धावच्छिन्नघटाभावप्रतियोगिनस्तेन संवन्धेनाधिकरणाप्रसिद्धेरि
ति वाच्यं यत्प्रतियोगितावच्छेदकसंवन्धावच्छिन्नाधिकरणतानिरूपितस्वरूपसंवन्धेन यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतासामा
न्याभाववत्त्वं हेतुमतस्तेन संवन्धेन तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात्· घटत्वावच्छिन्नाधिकरणतासामान्यस्यैव तत्तद्वह्निनिरूपि
तसंयोगसंयोगसंवन्धावच्छिन्नाधिकरणतानिरूपितस्वरूपसंवन्धेनाभावस्य हेतुमति सत्त्वेन तादृशसंवन्धेन घटाद्यभावस्यैव प्रतियोगिव्यधि
करणत्वसंभवात्· तादृशाभाववत्त्वं च हेतुमतो निरवच्छिन्नविशेषणतयैव वाच्यमतः कपिसंयोगाधिकरणत्वाभावस्यैव वृक्षवृत्तित्वेपि तत्साध्यके
एतत्त्वादौ नाव्याप्तिः· अत्र प्रतियोगितावच्छेदकधर्मावच्छिन्नत्वं साध्यतावच्छेदकतानाघटकसंवन्धेनैव ग्राह्यमतो नापः पिंडस्य कालिकादिसंवन्धेन
पक्षत्वविशिष्टचत्वरादिकं संयोगेन तस्याधिकरणत्वेपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः· प्रतियोगितावच्छेदकतानाघटकसंवन्धेन तदवच्छिन्नत्वमि

शे गगनाद्यभावस्तदभावात्मकेन स्वप्रतियोगिना समं समानाधिकरणत्वात्. गगनाभावस्यैव संयोगादिसंबन्धेनाभावत्वावच्छिन्नाभावतयाखंडत्वाः प्रसि
द्धावपि तस्य प्रतियोगिव्यधिकरणत्वाभावात्. एतेनानित्यत्वादिविशिष्टस्य गगनाद्यभावस्य योऽभावस्तदभावत्वं न गगनाभावस्य तस्य केवलान्वयितया
जन्येऽपि नित्यत्वादिनित्वविशिष्टस्य गगनाभावस्याभावो नास्तीति प्रसंगात्. किंतु नित्यत्वादेरेव तथात्वमित्युक्तावपि न निस्तार इति चेदत्र नव्याः. यथाश्रुते
प्रागुक्तरूपेण प्रतियोगिव्यधिकरणाभावस्याप्रसिद्ध्या वह्निमान्धूमादित्यादावसंभवः स्यादतो यत्किंचित्स्वप्रतियोगित्वं यादृशसंबन्धावच्छिन्नं तादृश
संबन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं यस्य साधनाधिकरणं तन्निष्ठाभावस्य साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिता
नवच्छेदकत्वमेव लक्षणे प्रवेशनीयम्. तथा च सद्धेतुस्थल इव द्रव्यत्वाभाववान्सत्त्वादित्यत्रापि संयोगेन घटाभाव एव प्रतियोगिव्यधिकरणस्तदी
यं घटनिष्ठप्रतियोगित्वं यादृशेन संयोगसंबन्धेनावच्छिन्नं तादृशेन संयोगसंबन्धेन साधनवतो द्रव्यस्य न तदीयप्रतियोगितावच्छेदकावच्छिन्नसामा
न्यानधिकरणत्वमक्षतमेव. न चैवमपि तदीयस्य साध्यतावच्छेदकीभूतस्वरूपसंबन्धावच्छिन्नप्रतियोगित्वस्याप्रसिद्ध्या न दोषसंगतिः. पूर्वंक्षणवृत्ति
त्वादिविशिष्टस्य घटाद्यभावस्याभाव एव तत्प्रसिद्धेरिति प्राहुः. स्वावच्छेदकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणो हेत्वधिकरण
वृत्त्यभावप्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्व यद्धर्मावच्छिन्नत्वोभयाभाव इत्यग्रिमलक्षणाभिप्रायेणेदं संयोगेन घटाद्यभावस्यैव प्रतियोगिवैय
धिकरण्यस्यैवालभ्यत्वादित्यपि वदन्ति. प्राचां मते संयोगसामान्याभावसाध्यक आत्मत्वविहेतुमतः कपिसंयोगसामावउत्रः. वृक्षादावुत्पत्तिकाला
वच्छेदेन गुणसामान्याभावसत्त्वाद्वृक्षत्वादिकं परित्यज्यात्मत्वं हेतुरुक्तः. यद्यपि वृक्षादेः स्वसमवेतकपिसंयोगप्रतियोगिनः समवेतसामान्याभावस्य
द्रव्यमात्रसमवेताभावस्य चानधिकरणत्वाद्वृक्षत्वादेरपि हेतुतायामव्याप्तिः संभवत्येव. तथापि सत्ताद्रव्यत्वयोरेव समवेताभावद्रव्यमात्रसमवेतवेना

सद्धेतुरेवातः साध्यान्तरमाह द्रव्यत्वाभावेति। यद्यपि द्रव्यत्वाभावस्याव्याप्यवृत्तित्वात्तत्साध्यके प्रतियोगिवैयधिकरण्यप्रवेशादसंगतत्वं तथात्र कालिकसंबंधा
वच्छिन्नद्रव्यत्वाभावः साध्यः स च गुणाद्यवच्छेदेन कालस्यैवाव्याप्यवृत्तिरिति वाच्यं तथा सति तस्य केवलान्वयित्वात्तत्साध्यकसत्त्वादेः सद्धेतुत्वेन तत्रातिव्या
प्तेरुपन्यासानौचित्यात्। तथापि सत्त्वहेतौ द्रव्यत्वाभावस्य व्यभिचारदशायामपि प्रतियोगिसामान्यानधिकरणसत्त्ववन्निष्ठाभावप्रतियोगितानवच्छेद
कं द्रव्यत्वाभाववत्त्वमित्याकारकव्यापकत्वज्ञानादनुमित्यापत्तिरेव तत्रातिव्याप्तिग्रन्थार्थः। वस्तुतो द्रव्यत्वाभावस्यापि न प्रागुक्ताव्याप्यवृत्तित्वमिति ध्येयम्।
प्रथमे साध्ये इति व्याप्तिं ग्राहयति साध्याभाववद्वृत्तीति। तत्प्रतियोगीति। तस्य संयोगात्मनः साध्याभावस्य यः प्रतियोगी संयोगविशेषाभाववत्त्वादित्य
र्थः। द्वितीये साध्ये इति व्याप्तिं योजयति नित्यत्वादीति। नित्यत्वादिविशिष्टं यद्द्रव्यत्वं तदभावात्मको यः साध्याभावस्तत्प्रतियोगी तदधिकरणत्वात् साध्या
भाववतो द्रव्यस्येति पूर्वेणान्वयः। ननु विशिष्टद्रव्यत्वाभावेन द्रव्यत्वस्वरूपसाध्याभावस्य प्रतियोगी किं तु नित्यत्वादिविशिष्टद्रव्यत्वस्यैवेति द्रव्यत्वं प्रति
योगिव्यधिकरणमेवेत्यत आह स्वाभावेति स्वं नित्यवृत्तित्वविशिष्टद्रव्यत्वं न च नित्यत्वविशिष्टद्रव्यत्वाभावस्याभावो न नित्यत्वविशिष्टद्रव्यत्वं विशिष्टस्यान
तिरिक्ततया जन्यद्रव्येपि नित्यवृत्तित्वविशिष्टद्रव्यत्वाभावो नास्तीति प्रतीतिप्रसंगात्। किं तु नित्ये भवत्वादिकमेवेति नाति नातिव्याप्तिरिति वाच्यं विशिष्टाधि
करणताप्रतीतिनिर्वाहकतयैवातिप्रसंगभंगे द्रव्यत्वमपेक्ष्य नित्यानन्तसंख्यापरिमाणादेस्तादृशाभावत्वकल्पनायां गौरवात्। अभावाभावस्यैव
प्रतियोगित्वमिति सिद्धान्तप्रवादाच्च। नन्वेवमपि निरुक्ताभावानां स्वाश्रयतत्त्वघटितवृत्तित्वविशिष्टं यत्स्वं तदभावात्मकस्वप्रतियोगिना समं समानाधिकर
णत्वात्प्रतियोगिव्यधिकरणाभावाप्रसिद्धेव नातिव्याप्तिः। एवं वह्निमात्रवृत्तीनां गुणाद्यात्मकाभावानामपि पूर्वक्षणवृत्तित्वविशिष्टस्य स्वस्य यो भा
वस्तादृशप्रतियोगिना सार्द्धं सामानाधिकरण्यात्। न च वक्ष्यमाणस्वंशः प्रसिद्धगगनाद्यभाव एव प्रतियोगिव्यधिकरणस्तस्यापि नित्यत्वादिविशिष्टे

योगिसामानाधिकरण्याभावविशिष्टेत्यर्थः। तथा च हेतुमतिद्रव्यादौ संयोगवद्वृत्तित्वविशिष्टः संयोगाभावो नास्तीति नाव्याप्तिः। विशिष्टनिष्ठाधेयत्वमप्यतिरिक्तमित्याशयेनेदं यद्वा तद्विशिष्टस्येत्यस्य हेत्वधिकरणेऽन्वयः। तत्र च पञ्चम्यर्थोऽधिकरणत्वं तथा च तद्विशिष्टस्याधिकरणं यद्धेत्वधिकरणं तद्वृत्तित्वमभावे वाच्यमित्यर्थः। यद्यपि प्रतियोग्यसमानाधिकरणत्वं हेतुविशेषणीकृत्य प्रतियोग्यसमानाधिकरणविशिष्टो यो हेतुस्तदधिकरणवृत्त्यभावस्य प्रतियोगितानवच्छेदकत्वं वाच्यं तावतैव संयोगी एतत्त्वादित्यादौ नाव्याप्तिसंभावना तत्पक्षस्य प्रतियोगिवैयधिकरण्यावच्छिन्नहेत्वधिकरणत्वाभावात्। तथापि कर्मेति संयोगाभावः प्रतियोग्यसामानाधिकरण इत्यग्रिममूलस्वरसेनैव हेतुसमानाधिकरणाभावस्यैव विशेषणं प्रतियोग्यसमानाधिकरणत्वं लभ्यत एव एतावांस्तु यास इत्येव ध्येयम्। ननु भेदस्य व्याप्यवृत्तितया प्रतियोगिसमानाधिकरणभिन्नत्वोक्त्यैव प्रागुक्ताव्याप्तिवारणसंभवे तद्विशिष्टस्येत्यादिकमफलमत आह तद्वृत्तीति। प्रतियोगिमद्वृत्तिभिन्नत्वमित्यर्थः। अत्रेति। अस्वरसादित्यन्वयः। न तदभाववत्त्वमिति। तथा च संयोगी सत्त्वादित्यादावतिव्याप्तिरिति भावः। ननु संयोगाभावे गुणे न संयोगसामानाधिकरण्यमिति प्रतीतिबलाद्गुणत्वावच्छेदेन संयोगाभावे प्रतियोगिसामानाधिकरण्याभाववत्त्वान्नातिव्याप्तिरत आह प्रतीतेरिति। उक्तप्रतीतिस्तु संयोगाभावनिष्ठस्य संयोगसामानाधिकरण्यस्यावच्छेदकत्वाभावमेव गुणे संयोगानधिकरणीभूतगुणवृत्तित्वमेव वा संयोगाभावादाववगाहत इति भावः। वक्ष्यति मूलकारः। नन्वत्रापि हेत्वधिकरण इति। तेन कपिसंयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकीभूतगुणावच्छिन्नत्वेऽपि कपिसंयोगी एतत्त्वादित्यादौ नाप्यव्याप्तिरिति भावः। ननु हेत्वधिकरणे प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वं प्रतियोगिसामानाधिकरण्यानवच्छेदकीभूतहेत्वधिकरणवृत्तित्वं तत्र व्याप्यवृत्तेरवच्छेदकत्वविरहात्प्रसिद्धं ग्रहणं चेत्यत आह प्रतियोग्यनधिकरणेत्यादि। कस्यचिदिति। अनधिकरण इति परेणान्वयः। तद्व्यक्त्यन्तरेति। प्रतियोगिव्यक्त्यन्तरे इत्यर्थः। स्वमते संयोगसामान्याभावस्यैकत्वेनान्वयित्वात्तत्साध्यकसत्त्वादिदं

आ · टि ·
९

सामान्याभावस्यापि धूमवद्वृत्तितावच्छेदेन महानसीयसंयोगेन प्रतियोग्यसमानाधिकरणत्वाद्वह्निमान् धूमादित्यादावव्याप्तिः · स्वप्रतियोगितावच्छेदकसंबन्ध(
सामान्येन तथा चोक्तौ जातिमान् ज्ञानित्वादित्यादावतिव्याप्तिः · समवायेन जात्यभावस्यैव तादात्म्येन जातिमत्तादात्म्यवत्त्वात्तस्य च स्वप्रतियोगितावच्छे
दकतादात्म्येन यज्ज्ञानिसंबन्धिमद्वृत्तित्वेन प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम् · स्वप्रतियोगित्वं यादृशसंबन्धावच्छिन्नं तादृशसंबन्धेन यत्प्रति
योगिसंबन्धिमद्वृत्तित्वाभावस्योक्तत्वात् · संयोगसामान्यावच्छिन्नवह्न्यभावप्रतियोगितायां महानसीयसंयोगत्वादिविशिष्टानवच्छेद्यतया वह्न्यभावस्य पर्व
तादौ महानसीयसंयोगसंबन्धेन स्वप्रतियोगिसामानाधिकरण्यविरहेऽप्यव्याप्त्यभावादिति ध्येयम् · ननु समवायावच्छिन्नवह्न्यभावमादाय धूमादाव
व्याप्तिवारणार्थमिष्टसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगित्वं निवेशनीयं तथा च कपिसंयोगवत्तादात्म्येन साध्यतायामेतद्वृक्षत्वादिहेतावव्या
प्तिर्भेदमात्रस्यैव स्वप्रतियोगितावच्छेदकतादात्म्येन प्रतियोग्यधिकरणाप्रसिद्धेरत आह संबन्धिवेति · भवतीति चेति · न च तादात्म्येन वस्तुमात्रस्यैव व्याप्य
वृत्तित्वात्तादृशसंबन्धेन साध्यतायां प्रतियोगिवैयधिकरण्याप्रवेशादिरप्रयुक्तमिति वाच्यं मूलावच्छेदेन कपिसंयोगवद्भेदस्य वृक्षादौ स्वयमंगीकारात्तादात्म्ये
न कपिसंयोगवतोऽप्यव्याप्यवृत्तित्वात् · न चैवं प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावेत्यग्रिमनिष्कर्षेऽप्यप्रतीकार इति वाच्यं स्वप्रतियोगितावच्छेदकसंबन्धेन ये
स्वप्रतियोगिसंबन्धिनस्तत्तद्व्यक्तित्वावच्छिन्नभेदकूटविशिष्टहेतुमद्वृत्तित्वस्यैव वक्तव्यत्वात् · वस्तुतस्तादात्म्यसंबन्धेनापि न दूष्यचिन्ता प्रागुक्तव्याप्यवृत्तित्व
मतो यथाश्रुतमेव सम्यक् · केचित्तु प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितायां यद्धर्मावच्छिन्नत्वयत्संबन्धावच्छिन्नत्वोभयाभाव इत्यादिवक्ष्य(
माणनिष्कर्षस्य तादात्म्येन साध्यतायां व्यभिचारिण्यतिव्याप्तिरतः प्रतियोग्यनधिकरणत्वं परित्यज्य प्रतियोग्यसंबन्धित्वमवश्यं तत्र निवेश्यमित्याशयेन
संबन्धित्वमुक्तमित्याहुः · ननु कपिसंयोगाभावस्यापि गुणे प्रतियोग्यसमानाधिकरणत्वात्कपिसंयोगी एतत्त्वादित्यादावव्याप्तिरत आह तद्विशिष्टस्येति · प्रति(

८

तीयलक्षणस्य साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकत्वात्तदभिप्रेत्याह व्याप्तिश्चेति । तादात्म्येन गवादेः साध्यतायां तत्संबन्धावच्छिन्नाभावाप्रसिद्धा असाधारणत्वात्तत्र व्याप्तिरित्यर्थः ।। इदमप्यभावप्रत्यभावो नाधिकरणस्वरूपो न वा धर्मान्तरमत्यन्ताभाव एव धर्मिणो भेद इति मते नान्यथा घटादिभेदरूपस्य घटभेदत्वात्यन्ताभावस्य घटत्वात्तन्नाभावस्य चाघटनिष्ठप्रतियोगितायामेव तादात्म्यसंबन्धावच्छिन्नत्वाद्व्याप्तिविरहादित्यध्येयम् । ननु विषयताया वृत्त्यनियामकमते ज्ञानाभावस्य गगनादौ सहजातप्रतियोगिव्यधिकरणत्वान्नातिव्याप्तिरत आह विशेषणतेति । अनव्यभिचारनिरूपकः कालो दिक् च तत्र काले कालिकेन दिशि दैशिकसंबन्धेन विशेषणतास्य सत्त्वात्तदभावो न प्रतियोगिव्यधिकरण इति भवत्यतिव्याप्तिः ।। विशेषपदं च व्यभिचारित्वस्यापि द्रव्यत्वादिमित्युक्तौ संबन्धसामान्येन विशेषणतास्य मनस्यसत्त्वान्नातिव्याप्तिसंभवः ।। कालोपाधित्ववद्दिगुपाधित्वस्यापि मनस्यसत्त्वाद्व्यावर्त्तकत्वादन्यथा मनसः कालोपाधित्वमपि स्यादत उक्तं मनोन्येति । ननु मूर्त्तमात्रस्य दिगुपाधित्वं महत्त्वादिगृहीतायामवच्छेदकत्वं न त्वधिकरणत्वमिति प्राचां मते संबन्धसामान्येनैव तस्य विशेषणतानधिकरणत्वान्मनोन्यपदं किमिति चेन्न । एवमप्यवच्छेदकतासंबन्धेनैव मनसो विशेषणतावत्तायाः संभवेन मनोन्यपदवैयर्थ्यापत्तेः । ननु स्वमनोदिक्कालयोर्विशेषणतातिरिक्तत्वात्तत्र व्याप्तिरेवेत्यत आह जातीति । न च जातेर्व्याप्यवृत्तितया तत्साध्यकप्रतियोगिवैयधिकरण्याप्रवेशेनैव नातिव्याप्तिरिति वाच्यं समवायेनाव्यापकत्वग्रहदशायामपि संबन्धसामान्येन प्रतियोगिवैयधिकरण्यघटितव्यापकत्वज्ञानात् समवायेन जात्यनुमित्यापत्तेरेव प्रकृते तिव्याप्तिपदार्थत्वात् जात्यादेरपि प्राग्युक्तव्याप्यवृत्तित्वविरहाच्च । अतिव्याप्तिं प्रयोजयति साध्यभूतेति । विशेषणतादिकं तावत्कालिकं च । एकार्थेति । समवायस्यापि स्वात्मकत्वस्वरूपसंबन्ध इति तत्रापि जात्यर्थसमवाययोरित्याशयः ।। भावत्वात् समवेतत्वादित्यपि कश्चित् । प्रतियोगितेति । तथा ज्ञानाद्यभावस्यापि तादृशेन संबन्धेन घटादौ प्रतियोगिवैयधिकरण्यान्नातिव्याप्तिः ।। न च तादृशाभावः किंचित्संबन्धेन प्रतियोगिसामानाधिकरण्याभावोक्तौ वह्नि

44

लक्षणे तेनोभयाव्यावर्तितायाः सुवचत्वादिति भावः। नन्वेवमपि प्रतियोगिवैयधिकरण्यघटितस्य व्याप्यवृत्तिसाध्यकस्थलीयव्याप्तिलक्षणस्य गोमानो
त्वादित्यादावतिव्याप्तिरेव गवाद्यभावस्य स्वप्रतियोगिसमानाधिकरणतयानवच्छिन्नस्य लक्षणघटकत्वादत आह न चान्यमिति। गवादि अभाव इत्यर्थः।
तथा च यत्किंचिद्वृत्त्यधिकरणावच्छेदेन प्रतियोगिवैयधिकरण्यपदस्यैव वाच्यं तस्य गवाद्यभावे ऽपि सत्त्वान्न तत्रापि लक्षणेति व्याप्तिरिति भावः। न
चेति वाच्यमिति परेणान्वयः। संसर्गाभावविशेष इति। सदातनत्वविशिष्टसंसर्गाभाव इत्यर्थः। संसर्गेति। स्वप्रतियोगितावच्छेदकसंसर्गेण यः प्र
तियोग्यारोपस्तज्जन्यप्रतीतिविषयो यो ऽभावस्तत्त्वमित्यर्थः। संसर्गस्तु तादात्म्यभिन्नो ग्राह्यः। तेन भेदव्युदासः। प्रागभावध्वंसयोरप्युत्तरकालपूर्वकालावेव
प्रतियोगितावच्छेदकसंबन्धावित्यतो नाभ्यामेव संबन्धाभ्यां प्रतियोग्यारोपः प्रागभावध्वंसयोः प्रत्यक्षहेतुरनयोर्नाव्याप्तिरिति प्राचामाशयः। घटितमिति। तथा
च वक्ष्यमाणाव्याप्तिप्रसंग इति भावः। तत्र जन्यत्वे नियमान्तरस्य साध्यसंबन्धितावच्छेदकरूपत्वात्तद्घटकस्येत्यर्थः। ननु अभावबुद्धौ प्रतियोग्यारोपस्य हेतुत्वे मानाभा
वादुक्तसंसर्गाभावघटितलक्षणस्यासंभवः। दूरे घटाभावलौकिकप्रत्यक्षे प्रत्यारोपस्य हेतुतास्वीकारे ऽप्यतीन्द्रियसाध्यके व्यभिचारिण्यतिव्याप्तिः। तत्र हेतुस
मानाधिकरणस्य साध्याभावस्यातीन्द्रियतया निरुक्तसंसर्गाभावत्वविरहादत आह वस्तुने चेति। भेदभिन्नाभावत्वं संसर्गाभावत्वं सदातनत्वविशिष्टं च
न त्वात्यन्ताभावत्वं भेदत्वं तु संसर्गाविषयतादात्म्यावच्छिन्नप्रतियोगिताकाभावत्वमनुयोगिताविशेषो वेत्याशयः। यत्तु भेदत्वादिवत्संसर्गाभावत्वमप्य
खण्डोपाधिरिति ननु तद्भेदत्वादिवदखण्डस्य संसर्गाभावत्वस्यानुभवेनाविषयीकरणात् [illegible] व्यवहारस्य भेदभिन्नाभावत्वादिनाप्युपपत्तेः। वस्तुगति
मनुसृत्याहानुपपत्तिमिति। विवेचयिष्यत इति। तदपि वा नोपादेयमित्यादिग्रन्थाभिप्रेतमिति शेषः। साध्यतावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्यघटित
लक्षणमभिप्रेत्याह प्रयोजनविरहेति। धूमादिसमानाधिकरणस्य प्रतियोगिसमानाधिकरणत्वेन तमादायाव्याप्तिविरहादिति भावः। व्याप्यवृत्तिसाध्यकस्थ

वह्न्यादिभेदस्य।

ङ्गियोगितातिरिक्तवृत्तित्वेनानवच्छेदकत्वादित्यर्थः । ननु द्व्यणुकत्वावच्छिन्नानधिकरणकालवृत्तित्वविशिष्टस्यैतद्द्व्यणुकस्य प्रतियोगितावच्छेदकं द्व्यणुकत्वमे
वेत्यन्यूनवृत्तित्वमत आह नहीति । ध्वंसादिप्रतियोगितायाः सामान्यधर्मावच्छिन्नत्वे मानाभावान्नष्ट इत्यादिप्रतीतेर्गोप्रतियोगिकध्वंसावगाहितयाप्यु
पपत्तेर्वधिनिश्चयात्प्रतिबन्धकत्वानुरोधेनैव भेदात्यन्ताभावयोर्गोत्वाद्यवच्छिन्नप्रतियोगिताकत्वोपगमात् । न चैवं तद्गोत्वाद्यवच्छिन्नवत्ताबुद्धिं प्रति
तद्गोत्वाद्यवच्छिन्नाभाववत्तानिर्णयत्वेन विरोधितया तद्वदत्यन्ताभावस्येव तद्गोध्वंसस्यापि तद्गोत्वावच्छिन्नप्रतियोगिताकत्वमावश्यकमिति वाच्यमेवं
संबन्धेन तद्वदत्यन्ताभावग्रहेऽपि संबन्धान्तरेण तद्गोमत्ताबुद्धिः स्यात् । संबन्धविशेषमनन्तर्भाव्यैवात्यन्ताभावग्रहस्य प्रतिबन्धकतया ध्वंसवत्ताग्रहे साधारण्या
भावात् । ध्वंसस्याभावत्वाघटितत्वेन तत्प्रकारकबुद्धेरत्यन्ताभावसाधारण्यायोगाच्चेत्याशयेनाह नष्टेऽपीति । ननु प्रतियोगिमत इव इत्येवास्तु तत्राप्य
त्यन्ताभावानुपगमात्तत आह अन्यथेति । तस्येति । गोत्वादिनाऽगवादेरत्यन्ताभावस्येत्यर्थः । [illegible] गगनाद्यभावस्य गोविशिष्टगोत्वाद्यभावस्य वा प्रलयवृत्तित्वे वि
नश्यतीति । कालमात्रेति । अगवात्यन्ताभावस्य दैशिकविशेषणतया कालमात्रावृत्तित्वं प्रयौरिष्यते एवमसातनत्वव्यवहारस्य कालिकविशेषणतयैव वक्तव्यत्वा
दिति विभावनीयम् । ननु प्रतियोगिविशिष्टेऽपि काले तदत्यन्ताभावसत्त्वे वाद्यवच्छेदेनापि इदानीं गोत्वं नास्तीति प्रतीतिः कथं न स्यादत आह इयांस्त्विति । ए
तस्य प्रतियोगिमतः कालस्य देशभेदः प्रतियोग्यनाधारदेशः तथा च अत्यन्ताभाववत्त्वे । अपरस्येति ध्वंसादिमतः कालस्येत्यर्थः । रूपावच्छिन्नमिति । नि
रवच्छिन्नमित्यर्थः । तथात्वमिति पूर्वेणान्वयः । नन्विदानीमश्वे गोत्वं नास्तीति प्रतीतेः कालवृत्तितया अश्ववृत्तितया च गोत्वाद्यभावावगाहितयैवोपप
त्तौ देशस्य कालवृत्तितावच्छेदकत्वे मानाभाव इत्यत आह देश इति । इवार्थः सादृश्यं तथानुभूयमानत्वेन । तथा चानुभव एव देशस्य कालवृत्तितावच्छेदक
त्वे मानमन्यथा गृहे नेदानीं गौरित्यादिप्रत्ययबलाद्गृहादिदेशस्य गवात्यन्ताभाववत्तायामपि कालो नावच्छेदकः स्यात्तत्रापि गवाद्यभावे गृहवृत्तित्वेन का

45

प्रथमक्षणे क्रिया क्रियातो विभागः द्वितीयक्षणे ततः पूर्वदेशसंयोगनाशः क्षणिकद्व्योत्पत्तिश्च
तृतीये क्षणे च चतुर्थक्षणे द्व्यणुकनाशः क्षणिकद्व्यसंयोगश्च ततः क्रियानाशः ततः संयोगनाशश्च

तथापि प्रतियोगिवैयधिकरण्यमादाय तस्य व्याप्यवृत्तिसाध्यकस्थलीयलक्षणस्यावश्यं दैशिकविशेषणतया भावस्य हेतुसमानाधिकरणघटितत्वात्तत्रैवातिव्याप्त्याः। नच कालिकसंबन्धावच्छिन्नप्रतियोगिताकस्य दैशिकसंबन्धेन हेतुमन्निष्ठात्यन्ताभावस्याप्रसिद्ध्या नातिव्याप्तिरिति वाच्यं स्वाष्टिकालवृत्तित्वादिविशिष्टगोत्वात्यन्ताभावस्यैव तादृशस्य प्रसिद्धत्वादिति भावः। मिश्रमतं निरसितुमाह संसर्गाभावेति। अत्यन्ताभावपदेनेत्यादिः। तथाच प्रलये गोत्वावच्छिन्नध्वंसवत्त्वादेव नातिव्याप्तिरिति भावः। नच गोध्वंसस्य गोत्वावच्छिन्नत्वस्वीकारेऽपि साध्यतावच्छेदकसंबन्धीभूतकालिकविशेषणतावच्छिन्नप्रतियोगिताकत्वविरहात्तु तत्समादायातिव्याप्तिस्तदवस्थेति वाच्यं साध्यतावच्छेदकसंबन्धान्यसंबन्धानवच्छिन्नत्वस्यैव हेतुसमानाधिकरणाभावप्रतियोगित्वस्य लक्षणे प्रवेशनीयत्वात्तस्य च ध्वंसप्रतियोगिताया अवारणादिति भावः। यदासन्न इति। स्पन्दवति खण्डप्रलये सर्गान्तरीयद्व्यणुकादिप्रागभाववत्त्वेन द्व्यणुकत्वावच्छिन्नध्वंसविरहादतिव्याप्तिः। ननु महाप्रलयप्रवर्त्तितीयक्षणे द्व्यणुकत्वावच्छिन्नध्वंससत्त्वान्नातिव्याप्तिः तदानीमपि चरमद्व्यणुकनाशानुगुणस्य परमाणुस्पन्दस्य सत्त्वात्तत्कालोत्पन्नपरमाण्वन्तरसंयोगेन प्रलयपूर्वक्षण एव पश्चात्तस्य विनाश्यत्वात्तादृशपरमाण्वन्तरसंयोगस्य च कार्यद्रव्येण सहैव स्वीकारान्नित्यत्वमाश्रयनाशादेवत्तन्नाशसंभवादत आह यदादृष्टमिति। केचित्तु स्वमते द्व्यणुकस्याभावात्स्पन्दस्य च खण्डप्रलये दृष्टौ प्रमाणाभावाद्यदादृष्टमित्याद्युक्तमित्याहुस्तच्चिन्त्यं नित्यज्ञानमादाय सद्धेतुतावारणाय जन्येति। नित्यसुखाभिव्यक्तेर्मोक्षत्वमते सद्धेतुत्वमाशङ्क्य साध्यान्तरमाह दुःखं चेति। ननु कार्यमात्रं प्रत्यदृष्टस्य हेतुत्वात्प्रलयप्राक्क्षणेऽपि तस्य सत्त्वं तथाच तदानीमेव दुःखत्वावच्छिन्नध्वंससत्त्वान्नातिव्याप्तिः। दुःखादेः स्वसाक्षात्कारनाश्यतया तदानीमसंभवात् उत्तरक्षणे सत्साक्षात्कारासंभवाददृष्टे प्रमाणाभावाच्च। किं यथा बहुब्रह्माण्डानां युगपत्प्रलयानुपगमे ब्रह्माण्डान्तरवर्तिदुःखमादाय सद्धेतुरेवायमत आह यदा तस्येति। अत्र तदीयसुषुप्त्यादिसमये तदीयज्ञानादिविरहाद्व्यभिचारः स्फुट एवेति द्व्यणुकत्वादेरिति। खण्डप्रलये केषांचिद्द्व्यणुकस्य केषांचित्प्रागभावस्य सत्त्वेन द्व्यणुकत्वस्य प्र

ध्वंसीयप्रतियोगितायाः किंचित्संबन्धानवच्छि-
न्नत्वा साध्यतावच्छेदकान्यसंबन्धानवच्छिन्न-
त्वं ज्ञापयति ८

नवभावस्वरूपाभावस्यैव प्रतियोग्यसमानाधिकरणत्वं सुलभमिति वाच्यं तथास्यापि स्वसमानाधिकरणाभावान्तरभिन्नत्वाद्भावमात्राधिकरणवृत्त्यभावमात्रप्रतियोगिकोऽपि विशिष्टाभावाद्यात्मकोऽधिकरणभिन्नो नेष्यते· ३

त्ति नेति· अत्रामूर्त्तत्वाश्रयेण न क्षतीत्यर्थः· ननु वृक्षादिभेदसाध्यव्याप्तेः प्रतियोग्यसमानाधिकरणपदेनैव वारणादत्यन्तपदं व्यर्थमत आह अत्यन्तपदं
चेति· अत्यन्ताभावत्वनिरूपकं यत्प्रतियोगित्वं तदाश्रयवैयधिकरण्यविवक्षायाः फलमाह अन्यथेति· तद्भेदस्य स्वसमानाधिकरणान्तरभेदस्य· स्व
स्वरूपानतिरिक्ततयेति· अनवस्थाभयेनेत्यादि· दुर्लभत्वापत्तेरिति· हेतुसमानाधिकरणाभावमात्रस्यैव स्वात्मकभेदप्रतियोगिपदाभावान्तरं तत्समाना
धिकरणत्वादिभावः· अग्रे विवक्षणीयस्य साध्यतावच्छेदकसंबन्धेन प्रतियोग्यसमानाधिकरणस्य वह्निमान्धूमादित्यादौ पटाद्यभावेऽसत्त्वान्न सर्वत्राप्र
सिद्धिः· किन्तु स्वरूपसंबन्धेन साध्यतायामेवेति अप्रसिद्धत्वमपहाय दुर्लभत्वमुक्तम्· अत्यन्ताभावत्वनिरूपकप्रतियोगितावच्छेदकत्वविवक्षायाः फलमाह स्व
वैषम्यमेवेति· भावभेदस्यातिरिक्ततासौ का एवाह· अभावसाध्यक इति· तथा च घटभिन्नं पटत्वादित्यादौ पटत्वसमानाधिकरणस्य निरुक्तप्रतियोगिव्यधिकरण
गोत्वाद्यभावस्य घटभेदभिन्नतया तादृशभेदस्य च गोत्वाद्यभावरूपत्वात्तत्प्रतियोगितावच्छेदकमेव घटभेदत्वमित्यव्याप्तिरिति भावः· संप्रदाय इत्यस्वरसस्तद्बीजन्तु
क्तविवक्षायामपि तद्वैषम्यमेव हेतुसमानाधिकरणात्यन्ताभावानामत्यन्ताभावत्वनिरूपकपूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकत्वेन प्रतियोगिनामसंभवात्समाना
धिकरणाभावसाध्यकाव्याप्तितादवस्थ्यम्· यादृशप्रतियोगितावच्छेदकविशिष्टस्यानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितानवच्छेदकत्वप्रवेशे तु व्यर्थ
मेवात्यन्तपदमिति ध्येयम्· गोध्वंसवत्त्वेनेति· गवात्यन्ताभावस्य गोध्वंसविरोधित्वादिति भावः· ननु दैशिकविशेषणतया यद्यत्तस्याधिकरणं तत्रैव गवात्यन्ताभाव
स्याविरोधात्कालिकसंबन्धेन गोध्वंसवत्यपि प्रलये तदत्यन्ताभावसत्त्वेन साध्याभावान्नातिव्याप्तिरिति वाच्यम्· प्राचां मते प्रलयस्यैव कालस्यापि दैशिकविशेष
णतया गवादिध्वंसवत्त्वात्· अत एव तन्मतेऽपि काले दैशिकविशेषणतया वायुनाशाधीनवायुस्पर्शनाशाग्रहः शब्दानित्यतायां मिश्रैरुक्तः· यद्यप्येवमपि ना
तिव्याप्तिसंभवः कालिकसम्बन्धावच्छिन्नगवाद्यभावस्यैव प्रलये कालिकसंबन्धेन वर्तमानत्वात् ध्वंसादिमति दैशिकसंबन्धेनैव गवात्यन्ताभावस्यानभ्युपगमात्·

46

वाच्यं जातौ विशिष्टसत्त्वव्यभिचारज्ञानदशायामपि विशिष्टसत्त्वधर्मिकज्ञाने तन्निष्ठप्रतियोगिव्यधिकरणाभावाप्रतियोगित्वज्ञानाद्विशिष्टसाध्यकानुमितिप्रसंगस्यैव प्रकृतेतिप्रसंगपदार्थत्वाद्विशिष्टसत्त्वस्याप्युक्तरीत्या व्याप्यवृत्तित्वविरहाच्च· ननु विशिष्टस्यातिरिक्तत्वमतेनेतज्जातिव्याप्त्यभावादाह भूतत्वेति· प्राञ्चस्तु विशिष्टसत्त्वस्य व्याप्यवृत्तित्वात्तत्साध्यके प्रतियोगिवैयधिकरण्याप्रवेशाद्भूतत्वेत्यादिसाध्यान्तरं तत्र च भूतत्वमात्मान्यत्वे सति विशेषगुणवत्त्वं मूर्तत्वं परिच्छिन्नपरिमाणवत्त्वं तदुभयं चाव्याप्यवृत्त्येव घटादावुत्पत्तिकालावच्छेदेन तदुभयाभावसत्त्वादित्याहुः· न चेति वाच्यमित्यन्वयि तदभावः भूतत्वमूर्तत्वोभयाभावः सहजात एवेति· प्रतियोगितावच्छेदकावच्छिन्नत्वाप्रवेशेऽपीत्यर्थः· ननु उभयत्वस्य विशिष्टस्यातिरिक्तत्वेऽपि सहजातः प्रतियोगिव्यधिकरणस्य विशिष्टत्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकमेवोभयत्वमतो नातिव्याप्तिः· विशिष्टत्वावच्छिन्नाभावस्योभयत्वावच्छिन्नानतिरेकादत आह नवेति· तदवच्छिन्नाभावः उभयत्वावच्छिन्नाभावः तदवच्छिन्नाभावात् वैशिष्ट्यावच्छिन्नाभावात्· लिंगव्यत्ययेन अनतिरिक्त इत्यनुषज्यते· तथा चातिरिक्त एवेति भावः· न च विरुद्धयोरुभयत्वावच्छिन्नाभावस्यातिरिक्तत्वेऽपि समनियताभावानामैक्याद्विरुद्धयोर्भूतत्वमूर्तत्वयोरुभयत्वावच्छिन्नाभावो विशिष्टाभाव एवेति वाच्यं तावतापि हेतुमतो यादृशप्रतियोगिताश्रयानधिकरणत्वं तादृशप्रतियोगितानवच्छेदकत्वस्य भूतत्वमूर्तत्वोभयत्वेऽनपायादतिव्याप्तितादवस्थ्यादिति भावः· उभयत्वस्येति· प्रत्यक्षसिद्धत्वादिति परेणान्वयः· तथा विरुद्धयोरिव समानाधिकरणयोरपि उभयत्वमतिरिक्तमेव· विरुद्धाविरुद्धस्थलीयप्रतीत्योः समानाकारकत्वाभावाद्भूतत्वमूर्तत्वयोर्विरुद्धत्वभ्रमदशायामप्युभयत्वस्य प्रत्ययापत्तेरिति भावः· न चेति· वाच्यमिति परेणान्वितं· तत्र भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यत्र· व्याप्तिरेवेति· तथा च तस्य तत्स्थलव्यावारणप्रयासोऽनुचित इति भावः· तथात्वेऽपीति· उभयत्वाश्रयस्य मूर्तत्वस्यानतिप्रसक्तत्वेऽपीत्यर्थः· तथा च हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणतावच्छेदकेन साध्यतावच्छेदकावच्छिन्नसाध्यवत्तास्थल एव व्याप्तिरतो नैनं दोषः स्पृशतीति भावः· इतिमतिव्याप्त्यभावस्य व्यभिचारनियतत्वाद्व्यभिचारं ग्राहय

प्रसिद्धेऽपि हेतुसामानाधिकरण्याप्रसिद्धेरित्यर्थः ५

एवं· विशेषणतया गगननिष्ठस्य घटत्वाभावस्यैव तादृशघटत्वाभावाभावाभावत्वकल्पनात्तावतैवाभावत्वप्रतीतेः प्रमात्वसंभवात्· अत एव साध्यता घटकसंबन्धेन साध्यवत्त्वबुद्धिविषयविधयाप्रतिबन्धकतावच्छेदको यः संबन्धस्तेन संबन्धेन हेतुसामानाधिकरण्याप्रसिद्ध्या प्रागुक्तगगनत्वादिहेतौ द्रव्यत्वाभाववज्जातित्वादित्यादौ चाव्याप्तिस्तथापि साध्यतावच्छेदकसंबन्धेन प्रतियोगिमत्त्वबुद्धिविषयविधयाप्रतिबंधकतावच्छेदको यः संबन्धस्तेन संबन्धेन हेत्वधिकरणवृत्तित्वमभावस्य विवक्षितमित्यदोषः· तथा च द्रव्यत्वाभाववज्जातित्वादित्यादौ विशेषणताविशेषेण जातित्वाभाववत्त्वबुद्धिविषयविधयाप्रतिबन्धकतावच्छेदको यः स्वरूपसंबन्धस्तेन जातित्वरूपाभावस्य प्रसिद्धिरिति भावः· वस्तुतो व्याप्यवृत्तित्वमत्र साध्यतावच्छेदकसंबन्धेन यत्स्वाधिकरणं तद्वृत्त्यभावस्य तादृशसंबन्धावच्छिन्नप्रतियोगित्वाभावरूपं ग्रन्थकृतोऽभिप्रेतम्· तादृशसाध्यकं च समवायादिनात्मत्वादिसाध्यके ज्ञानवत्त्वादिकं समवायेनात्मत्ववति समवायावच्छिन्नात्मत्वाभावस्य केनापि संबन्धेनावृत्तेस्तथा च तादृशसाध्यकत्वेनोपादेयं सत्तावाञ्जातेरित्यादौ पुनरुपादेयमेव समवायेन सत्त्ववति सत्तादेः समवायावच्छिन्नसत्ताद्यभावस्यापि कालिकादिसंबन्धेन वर्तमानतया सत्त्वादेर्निरुक्तव्याप्यवृत्तित्वाभावात् व्याप्यवृत्तिताघटकस्य साधिकरणवृत्तित्वस्य संबन्धसामान्येन प्रविष्टत्वात्· एतद्व्याभार्थं सर्वथैव व्याप्यवृत्तीत्युक्तम्· तस्य संबन्धविशेषानियन्त्रितत्वात्· समवायादिस्तु संबन्धो न वृत्तिनियामकस्तेनात्मत्वादेरपि न व्याप्यवृत्तित्वक्षतिरिति ध्येयम्· केचित्तु सर्वथैव व्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्याघटितव्याप्तिविशिष्टहेतुमत्तानिश्चयोऽनुमितौ नोपादेयम् प्रतिसामानाधिकरण्यांशस्तु जनकतावच्छेदके नोपादेयः साध्यसाधनभेदेन कार्यकारणभावभेदेन व्याप्तेः कारणताघटकत्वापत्तेरित्यपि वदन्ति· एकधर्मावच्छिन्नप्रतियोगिताकाः प्रतियोगिव्यक्तीनां भेदेऽप्यैक्यमिति नवीनमते वह्निमान् धूमादित्यादौ च वह्न्यादिसामान्याभावमादायाव्याप्त्यसंभवादतिव्याप्तिवारणमेव प्रयोजनमाह तेनेति· न च विशिष्टसत्त्वस्य व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्यप्रवेशादिकमयुक्तमिति

योग्यः

तज्जनकतावच्छेदके अनुमितिजनकतावच्छेदके ३

आ·सी
५

दशायामिदानीं मिलत्कपाले न घट इत्यनुभवात्तत्कालावच्छेदेन कपाले घटस्य सामान्याभावः सिद्ध इति· न चैवं तदानीं तत्तद्घुन घट इत्यादिप्रतीतिरेतत्कालावच्छेदेन तत्तद्धेव घटाभावो विषयो न तु तत्तदवच्छेदेनैतत्कालेन तथैवेति वाच्यं तत्तद्घटाभावस्य व्याप्यवृत्तितयैवैतत्कालस्य तदवच्छेदकत्वावगाहने ऽप्रतीतेर्भ्रमत्वापातात्· न च तथापि तत्कालवृत्तिघटस्याभाव एव तत्तद्भासतां न त्वेतेति वाच्यं कालस्य प्रतियोगिवृत्त्यावग्रहेऽपि तादृशप्रतीतेस्तत्तदवच्छेदेन समवाये न घटाभावावगाहित्वस्यानुभवसिद्धत्वादिति भावः· तथा चेति· गुणवत्त्वं योगवृत्तिद्रव्यत्वात् माभूमासमयो घटवानेतत्कालत्वात्कपालघटवदेवं सादित्याद्यव्याप्तिवारणायेत्यर्थः· नीति· असमानाधिकरणत्वमित्यर्थः· नोपादेयं नेति येन संबन्धेन रूपेण च यद्व्याप्यवृत्तिस्तेन संबन्धेन तेन रूपेण तस्य साध्यतायां नोपादेयमित्यर्थः· तेन द्रव्ये संयोगत्वेनाव्याप्यवृत्तेरपि संयोगस्य समवेतत्वेन साध्यतायां नासिद्धता· अव्याप्यवृत्तेरपि द्रव्यत्वस्य समवायेन साध्यतायां च तत्प्रतियोगिव्यधिकरणपदमिति परे तु समवायेन व्याप्यवृत्ति द्रव्यत्वात्मत्वादेः कालिकेन साध्यतायां तद्ग्रहणमेव· अव्याप्यवृत्तिसाध्यके संयोगाभाववान्नित्यगुणत्वादित्यादौ क्वचिदेव नेदयम्· व्याप्यवृत्तिसाध्यके तु प्रयोजनविरहात्सर्वत्रैव नेदयमित्यावेदयितुं सर्वथैवेत्युक्तम्· साध्यसाधनभेदेनेति· साधनताघटकसंबन्धेऽप्युपलक्षणम्· अन्वयपदमपि व्याप्यवृत्तिसाध्यकस्थले न तदुपवेशे सत्तावान्ज्ञानेत्यादावव्याप्तेः· साधनवत्तिमत्त्वादौ समवायेन सत्ताभावस्यापि कालिकसंबन्धेन वृत्तेः· न चाभावे हेत्वधिकरणवृत्तित्वस्य विशेषणतया विवक्षितत्वान्नोक्तदोषस्तथा सत्यपि द्रव्यत्ववत्यन्यत्वसत्त्वादित्यत्रातिव्याप्तिः· द्रव्यत्वरूपसाध्याभावस्य विशेषणतया वृत्तित्वविरहे द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यापि द्रव्यत्वानतिरेकात्· न चाभावत्वप्रतीतेः प्रमात्वस्वार्थमभावाभावस्यातिरिक्ततयोक्तातिव्याप्त्यादिवारणमपि तिवाच्यम्· अभावत्वं चेत्प्रतियोगितया तेन भावाभावसाधारणस्याभावत्वस्य निर्वचनविरोधापत्तेः· घटत्वाद्यभावस्यापि कालिकसंबन्धावच्छिन्नाभावे स्वरूपसंबन्धेन साध्ये गगनत्वादिहेतावव्याप्तेस्तथाप्यनु ५

२ प्रकृतानुमित्युद्देश्यभिन्नत्वे सति साध्यसंशयवत्त्वं पक्षत्वम् ·

मानेनापि वृक्षः संयोगसामान्याभाववानित्यनुमितेः प्रतिरोधादिति ध्येयम् · ननु योयद्धर्मस्यानवच्छेदकः स तदभावस्यावच्छेदक इति व्याप्तेर्वृक्षत्वादेः संयोग
सामान्याभावावच्छेदकत्वं तं सेत्स्यतीत्याशंक्य निरवच्छेदकत्वेन वेति · गुणत्वादीति · तथा च व्यभिचारेणोक्तव्याप्तेरिति भावः · · ननु वृक्षत्वं संयोगसामान्याभावावच्छेदकं
संयोगसामान्यानवच्छेदकत्वादितिविशेष्ये व्याप्तिर्वाच्या प्रमेयत्वसत्त्वादेः पक्षसमत्वा दतः स्वरूपासिद्धिमाह यथायेति · प्रतिदं प्रमितिभिन्नत्वेपीति
परेणान्वयः · · ननु वह्निपूर्ववर्तितायाअवच्छेदकं दण्डत्वमपि प्रसंगात्तद्भिन्नत्वव्यवहितपूर्ववर्ति जातीयतायाः सा च न भिन्नाद्यन्यतः संयोगस्यतानु
रूपं द्रव्यं तमादाय दोष इति · तत्सामान्येति · घटपूर्ववर्तित्वसामान्यस्य वह्निसामानाधिकरण्यस्य चेत्यर्थः · केचित्तु कपित्व्याप्त्वप्रयोजकत्वमन्यथान्तरभावा
नवच्छेदकत्वस्य हेतुतावच्छेदकत्वमेव कुतो नोक्तं वृक्षत्वादेः साध्यते वृक्षत्वावच्छेदेन तत्संयोगव्यक्तीनामसत्त्वेपि संयोगसामान्यस्यासंभवादित्यभिप्राय
कोयं ग्रन्थ इत्याहुः · गुणस्येति · सामान्याभाव इति परेणान्वयः · · नन्वाघस्रेण घटे गुणो नास्तीति प्रत्यक्षमसंभवि संनिकर्षाभावात् प्रथमक्षणे घटे गुणो
नास्तीति व्यवहारादिकं च संदिग्धप्रामाण्यकमतः स्थलान्तरमाह प्रलयावच्छेदेनेति · तदानीं जन्यभावसत्त्वे प्रलयत्वव्याहतेरिति
भावः · · ननु महाप्रलये भावानामभावानवच्छेदेनेत्यप्रकृतमतआह तथेति · तन्मूलप्रतीतिः पर्वत इति हुताशनावच्छेदकत्वाभावं शिखरेति शिखरावच्छिन्नप
र्वतवृत्तित्वाभावं हुताशने बनाहेति · ननु पर्वते स्व हुताशनाभावमिति परिवृत्यान्तराप्याह वृत्तेरिति · वृत्तेः संबन्धस्य वृत्तिमतः संबन्धवतः · तथा च योयद
वच्छेदेन यदीययत्संबन्धाभाववान् स तदवच्छेदेन तस्य तत्संबन्धावच्छिन्नाभाववानिति व्याप्त्यापि शिखरावच्छेदेन संयोगसंबन्धावच्छिन्नवह्न्यभावसिद्धिरिति भावः
ननूक्तव्याप्त्वाप्रयोजकत्वमन्यथानुपपत्त्यायेन येन यदीयपदात्संबन्धावास्ते न तदभावाति व्याप्त्यापि कुण्डादिसंयोगिनि वदरादेः संयोगेन कुण्डादिमत्त्वापत्तिरित्यु
क्तावाह एवमिति · भेदेति विशेषः · यथा घटवत्यपि काले इदानीं तत्रौ न घट इति प्रतीत्या तत्त्वावच्छेदेनैतत्काले घटाभावस्तथा घटवत्यपि काले घटत्वाद्यद

ब

१५९

आ.सं.
४

षाभाववत्त्वं पक्षे स्वरूपासिद्धमिति वाच्यम् अतिप्रसंगभंगाय यत्तत्त्वादिनैव तत्त्वमवावच्छि. न हि तत्र संयोगं प्रति तत्तदवयवत्वेन हेतुत्वस्यानभ्युपगतमते व्याप्यवृत्तिगगनसं
योगस्यासंभवादिति भावः. प्राचां मते पक्षधर्मयोरुभयमादाय स्वावच्छेदेनेति. इत्युभयोः साधनाव्यापकत्वरक्षायै. न चैवं तत्तत्संयोगाभावस्य गुणेऽव्याप्यवृत्तितया सा
वच्छि. नन्वेवं साध्यव्यापकत्वं दुर्घटमिति वाच्यम् स्वावच्छेदेनेत्यनेन निरवच्छि. नवृत्तिकत्वविशिष्टत्वस्य विवक्षितत्वात्. न च न तथापि कपिसंयोगाभाववति वृक्षे नि
रवच्छि. नवृत्तिकत्वविशिष्टस्य तदीययावद्विशेषाभावस्यासत्त्वादुपाधेः साध्याव्यापकत्वमिति वाच्यं जात्यवच्छिन्नाभावस्यैवोक्तव्याप्तौ साध्यविधया प्रवेशात् क
पिसंयोगाभावस्य चातथात्वेन तं प्रति तदीययावद्विशेषाभावस्योक्तरूपेणाव्यापकत्वेऽपि क्षत्यभावात्. न चाभिघातादिसामान्याभावस्य वृक्षेऽपि सत्त्वात्तत्र च निर
वच्छिन्नवृत्तिकत्वविशिष्टतदीययावद्विशेषाभावस्यासत्त्वादेवोपाधेः साध्याव्यापकत्वमिति वाच्यं गुणविभाजकजातेरेव हेतुसाध्ययोः प्रवेशात्. केचित्तु स्वा
वच्छेदेनेत्यस्यावच्छेदकतासंबन्धेन तदभावाधिकरणीभूतं तदवच्छेदकस्यावच्छेदकतासंबन्धेनाभाववत्त्वेनेत्यर्थः. तथा च तद्विशिष्टयावद्विशेषाभाववत्त्वमुपाधिरि
त्याहुः [redacted]. ये तु स्वावच्छेदेनेत्यस्य परस्परानवच्छेदकानवच्छिन्नवृत्तिकत्वविशिष्टत्वमर्थमाहुस्तन्न. व्याप्यवृत्तिरूपादीनां विशेषाभावस्यावच्छेदका
प्रसिद्ध्या तदनवच्छेदकस्याप्यसंभवेन न तत्र वसाध्याव्यापकत्वतादवस्थ्यादिति [illegible]: यत्तद्भ्यां विना कृतमनुगतानुमानमाशंक्य निषेधयति एतेनेति. वक्ष्य
माणदोषेणेत्यर्थः. अर्थेति. संयोगसामान्याभावस्य त्वन्मते केवलान्वयित्वमानत्वात् साध्यताप्रामाण्यभाववत्त्वादित्यस्यैव सम्यक्त्वादिति भावः. अथ सत्त्वभावत्वा व ४
दिकमेव तर्हि हेतुरस्त्वत आह अप्रयोजकत्वादिति. अनुकूलतर्कविरहादित्यर्थः. ननु निरुपाधित्वमेव प्रयोजकमस्त्वित्याह निर्गगनत्वादिति. आदिना द्रव्यभिन्न उरि
त्वादेरुपग्रहः. अत्र यद्यपि निर्गगनत्वोपाधेर्नरत्वाभावेन साध्याभावोन्नायकतया दोषत्वं संयोगस्यैव साध्याभाववत्तया वृक्षादौ निश्चितत्वात् तथापि व्यभिचारो
न्नायकतया तत्र एव तथापि स्वव्याप्यत्वेन साध्यस्य पक्षवृत्तित्वाभावोन्नायकतया दूषकत्वं बोध्यम्. संयोगसामान्याभावेन वृक्षवृत्तिनिर्गगनत्वव्याप्यत्वादित्यनु

४

तियोगितावच्छेदकत्वान्नाध्यक्षमिति भावः॥ ननु प्रतियोगितावच्छेदकविशिष्टस्यैव यस्य कस्यचित्प्रतियोगिनो योग्यत्वमत्यन्ताभावग्रहे तन्त्रं ननु योग्यमात्रप्र
तियोगिताकत्वमन्यथा घटेऽपि संयोगसामान्याभावस्य तादृशप्रत्यक्षं न स्यादत आह यदीति॥ यदीतः सर्वावयवावच्छेदेन प्रतियोगिग्रहात्मकादोषा
दित्यर्थः॥ न चैवं प्रतियोगिग्रहदशायां नाप्रत्यक्षं दुर्वारमिति वाच्यं प्रतियोग्युपलब्धिसामग्र्या अपि दोषत्वोपगमात्॥ प्रतियोगिन उपलब्धिर्यत इ
ति व्युत्पत्त्या तस्या एव प्रसुप्तत्वादिति भावः॥ प्रतियोग्युपलम्भरूपदोषाभावस्य संयोगसामान्याभावप्रत्यक्षे कार्यसहभावेन हेतुत्वोपगमान्नोक्तदो
षस्तत्त्वमाहुः॥ नचैति मानत्वमितिपरेणान्वयः॥ योयदीयेति॥ योयज्जातिसमानाधिकरणोभयावृत्तिधर्मावच्छिन्न यत्त्वं स्वावच्छिन्न
प्रतियोगिताकयावदभाववान्तज्जात्यवच्छिन्नतत्त्वं स्वावच्छिन्नप्रतियोगिताकाभाववानित्यर्थः॥ तेन न स्वरूपासिद्धिर्नवासिद्धसाधनं जात्युपादानात्॥ उ
रुधर्मस्य प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्धावपि न व्यभिचारः॥ न च सत्त्वगुणत्वावच्छिन्नाभावमादाय स्वरूपासिद्धिवारकस्योभयावृत्ति
पदस्य वैयर्थ्यं व्यभिचारवारकस्य वासिद्धिवारकस्य विशेषणस्य कृतार्थत्वात् यः पक्षधर्माद्याप्तिसंभवत्वात्॥ अत एव नित्यत्वसाध्यकानुमाने विशेषणमुक्तं रासमा
नाधिकरणत्व [illegible] त्वेनोक्तेतरार्थकस्यान्तरपदस्य सार्थक्यं वत्ते॥ समर्थितं यद्यपि यावद्विशेषाभाववानित्यस्य यदीयानां यद्धर्मावच्छिन्नप्रतियो
गितानां यावत्तां प्रत्येकावच्छिन्नप्रतियोगिताकयावदभाववान् तद्धर्मावच्छिन्नाभाववानित्यर्थः॥ तथा च संयोगत्वावच्छिन्नप्रतियोगिताव्यक्तीनां प्रत्येका
वच्छिन्नाभावकूटवत्त्वस्य पक्षे सत्त्वान्नासिद्धिर्नवा अर्थविशेषणत्वमिति ध्येयम्॥ योयद्धर्मन्यूनवृत्तिधर्मावच्छिन्नयावदभाववान्स तद्धर्मावच्छिन्नाभा
ववानित्यर्थस्तु संयोगत्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्य घटवृत्तिसंयोगत्व वृत्त्यन्यासमवेतत्वावच्छिन्नाभावस्य यावद्गगनस्य वृत्तौ ते पक्षे स्वरू
पासिद्ध्यान्नुपादेयः॥ संयोगयावद्विशेषाभाववानिति॥ न च सर्वावयवावच्छेदेन वृक्षे गगनादेरेकस्यैव संयोगाभावादितितस्यैवाभावस्याविरहात् संयोगयावद्विशे

१ न्यूनवृत्तिधर्माश्च धर्मविशिष्टस्य यो॥ यो॥ गगनः वेशिष्ट्य वस्त्व आपत्त समवायाविच्छिन्न प्रतियोगिता
वच्छेदकस्य घोषत्ववंशजेन॥ अतो वृक्षान्यासमवेतत्व पारदलम् पक्षतावच्छेदक [illegible] विशिष्टाभाव
स्वाभाव इति वृत्तित्वस्याभाव इति वृत्तित्वाभाव संबन्धे॥

१ नित्यत्वसाध्यकानुमाने नावच्छेदक प८
फलाकाशादित्रिषु प्रमयत्वे व्यभिचारवार
णाय सामान्यवत्त्वविशेषणम् तत्र समा
नाधिकरणत्व पदं हि सिद्धसाध्यतावि
रोधनाय नि. ८

१ सामान्यवत्त्वविशिष्टत्वलक्षणसमा
नाधिकरणत्वविशिष्टवृत्तित्व
स्य [illegible]
[illegible] विशेषद्वय ८

सामान्य
वत्त्वे सति

[illegible]

लक्ष्यतत्पदं लक्ष्ये लक्षणे चोभयत्रान्वितमिति भावः। ननु साधननिष्ठसामानाधिकरण्यस्य व्याप्तित्वेप्येकैव हि सा व्याप्तिरित्यादिग्रन्थानुपपत्तिस्तदवस्थैव किंच विशिष्टसत्ताव्यापकीभूतद्रव्यत्वसामानाधिकरण्यवतः सत्त्वस्य ग्रहणे पर्वतादावपि द्रव्यत्वानुमितिः प्रमा स्यादत आह नहीति। तादृशसामानाधिकरण्यवतीत्यर्थः। तथा च तादृशसामानाधिकरण्यविशिष्टधूमत्वव्याप्तिस्तत्प्रकारकैव पक्षधर्मताधीरनुमितिहेतुः। तत्र नीलघटत्वप्रकारकबुद्धौ घटत्वस्येव स्वरूपत एव धूमत्वभानं न तु धूमत्वत्वेन यतो गौरवमिति भावः। आद्येति। तथा च तामादायैव पर्वतीयवह्निधूमयोरसन्निकर्षात्तयोः कथं व्याप्तिग्रह इति परामर्शीयपूर्वपक्ष इति भावः। द्वितीयेति। तथा च तामभिप्रेत्यैवैकैव हि सा व्याप्तिरित्यादिपरामर्शीयसिद्धान्तग्रन्थ इति भावः। यत्रैकमेव साध्याधिकरणं तत्रैतद्रूपवानेतद्रसादित्यादौ व्याप्त्यभिन्नैव यत्र च द्रव्यत्वादौ साध्ये रूपत्वव्याप्यजातिमत्तो हेतुत्वं तत्र हेतुतावच्छेदकीभूतानां नीलत्वादिजातीनां नानात्वेन हेतोपि कथिद्भिन्नैवेति मन्तव्यम्। आद्यानुमितेर्विषयविधया जनकतावच्छेदकद्वयाद्भिन्ना किंतु व्यवहारोपयिकीति। द्वितीयात्वभिन्नानुमितिजनकतावच्छेदकाद्भिन्नैवेत्यर्थ इत्यपि कश्चित्। कपिसंयोग्येतत्पदार्थस्य साध्यताभ्रमवारणार्थमयमिति पक्षनिर्देशः। सांप्रदायिकमते संयोगसामान्याभावस्य द्रव्ये सत्त्वात्कपीति वृक्षमात्रेऽपि संयोगाभावादेतदिति। न चाभावे हेतुसमानाधिकरणस्यैव हेत्वधिकरणे निरवच्छिन्नवृत्तिकत्वप्रवेशेणेदृशाव्याप्तिपुरासंभवात्प्रतियोगिवैयधिकरण्यप्रवेशो मलकृतामनुचित इति वाच्यम्। अग्रे समाधास्यमानत्वादिति भावः। तत्र असमानाधिकरणान्तम्। ननु शाखावमूलासर्वविषयतावच्छेदेन सर्वत्र द्रव्ये गगनादिसंयोगस्य सत्त्वात्कुतस्तत्सामान्याभावस्य द्रव्ये संभव इत्यत आह संयोगस्येति। वृक्षत्वेति। शाखावच्छेदेन तत्संयोगसत्त्वेपि वृक्षत्वावच्छेदेन कस्याश्चिदपि संयोगस्य तत्रासत्त्वात्तदवच्छेदेनैव संयोगसामान्याभावसंभवः। अवच्छेदकभेदेनैकत्र भावाभावयोः समावेशादिति भावः। नन्वेवं वृक्षे संयोगसामान्याभावस्य वृत्तेनानाक्षेपमत आह तत्र चेति। संयोगसामान्याभावे सत्त्वादिरूपस्य प्रतियोगिना संबन्धेनेत्यादि। तथा च संयोगसामान्याभावस्याप्योग्यप्र

पि॰ यत्तु द्रव्ये धर्मिणि गुणकर्मणोः साध्यताभ्युपगमं निरसितुमिदमिति पक्षनिर्देश इति तन्मन्दं एवमिति इत्थंविशिष्टद्रव्ये गुणकर्मणोः साध्यताभ्युपगमस्यानिरस्तत्वादिति॰ गुणस्य वह्नेरिति गुणत्वाभावादित्यर्थः॥ तथा च हेतुतावच्छेदकावच्छिन्नाधिकरणत्वं न गुणस्येति भावः॰ यद्यप्येवं पञ्चमीभिः पर्वतचत्वरादिलक्षणधर्मविशिष्टधूमत्वावच्छिन्नाधिकरणताव्यक्तिभिरेव धूमवानिति प्रतीत्युपपत्तौ धूमत्वावच्छिन्नाधिकरणतायां मानाभाववत्त्वं वह्निमान्धूमादित्यादावव्याप्तिः हेतुतावच्छेदकीभूतधूमत्वावच्छिन्नाधिकरणत्वाप्रसिद्धेः तथापि हेतुतावच्छेदकधर्मस्वाश्रयाधिकरणीभूतयन्निष्ठाधिकरणतानवच्छेदकत्वस्याधिकरणावच्छेदकत्वस्य च द्वयोर्व्यतिरेकः तथाविधहेतुतावच्छेदकाश्रयाधिकरणमेव हेतुतावच्छेदकावच्छिन्नाधिकरणेनेन विवक्षितं वह्निमान्धूमादित्यादौ च तादृशहेत्वधिकरणं धूमस्याधिकरणमात्रं द्रव्यं विशिष्टसत्त्वादित्यादौ तादृशं हेत्वधिकरणं द्रव्यमेव न तु गुणादि॰ विशिष्टसत्तात्वेन तन्निष्ठाधिकरणतानवच्छेदकत्वस्याधिकरणतावच्छेदकत्वस्य च द्वयोः सत्त्वादिति ध्येयम्॰ साधनभेदेन व्याप्तिभेद इत्यत्र हेतुतावच्छेदकं नाधिकरणतावच्छेदकं तत्र तदाश्रयसमानाधिकरणत्वमेव निवेश्यमित्यपि वदन्ति॰ ननु सामानाधिकरण्यस्य व्याप्तित्वे इति धर्मभिन्नत्वात् धूमसामान्ये वह्निसामान्यस्यैका व्याप्तिरिति व्यवहारोऽनुपपन्न इत्यत आह सामानाधिकरण्येति॰ तथा च वह्नित्वधूमत्वयोरनुगमादेव तत्र व्याप्तेरैक्यव्यवहारो न तु वस्तुगत्या व्याप्तेरैक्यमिति भावः॰ नन्वेवं महानसीयवह्निसामानाधिकरण्यस्य तस्य पक्षवृत्तिधूमादावसत्त्वात् पर्वतीयवह्निसामानाधिकरण्यस्य च प्रागननुभवात् कुतः परामर्शस्याशङ्कायामेकैव वह्निसाव्याप्तिरिति परामर्शोपसिद्धुत्तग्न्योसंगत इत्यत आह वस्तुतस्त्विति॰ एकमात्रेति॰ तथा च धूमव्यापकवह्निसमानाधिकरणधूमादिमत्तानिश्चयदशायां परामर्शस्य धूमादिलिङ्गकानुमितिहेतुत्वात् तद्व्याप्तिस्मृत्यादिसाधारण्येऽपि न क्षतिरिति वाच्यम्॰ पक्षधर्मांशे विषयत्वेनानुमितिजनकतावच्छेदकस्यैव व्याप्तिपदार्थतया धूमत्वादेस्तत्तन्निवेशेन दुर्ज्ञेयत्वे तस्यैव तत्र व्याप्तित्वादिति भावः॰ धूमत्वादिमत्तीति॰ तथा च तस्येति प्र रासभवान्पर्वत इति ज्ञानादप्यनुमितिः स्यात् न च धूमादिव्यापकवह्निसमानाधिकरणा२

व्या. सि.
२

त्वं तथा च तत्रापि स्व[illegible]ज्ञानीयाश्रयत्वसंबन्धेन रूपत्वमेव साधनतावच्छेदकमिति भावः। साध्यतावच्छेदकमिति अनुमितिविधेयतावच्छेदकमित्यर्थः। त
था चोक्तव्याप्तिज्ञानाद् [illegible] दंडत्वप्रकारिकादडत्वप्रकारिकादंडत्ववत्तानिश्चयवानुमितिः। ननु दंडिमानिति दंडप्रकारिकानस्यव्यापकतावच्छेदकत्वेनागृह
त्कारणाधीनतद्वच्छिन्नविधेयकानुमित्यसंभवादिति भावः। वस्तुतो दंडत्वसाध्यतावच्छेदकत्वे दंडिमानित्यनुमितिर्न स्यात् दंडानां व्यापकतानवच्छे
दकत्वादित्यस्वरसादेव दंडत्वादिकमित्यत्रादिपदग्रहणं तत्तेन तत्तद्दंडव्यक्तीनामेव स्ववृत्तिदंडत्वावच्छिन्नवत्तालक्षणपरंपरासंबन्धेन साध्यतावच्छेदक
त्वलाभाद् दंडिमानित्यनुमितेर्नानुपपत्तिलेशोऽपीति ध्येयम्। केचित्तु साध्यसाधनभेदेन व्याप्तिग्रहानुमित्योः कार्यकारणभावभेदाद्यत्र दंडत्वादिविशिष्टसा
ध्यतावच्छेदकं तत्र हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदको यो धर्मस्तद्विशिष्टावच्छिन्नसामानाधिकरण्यरूपैव व्याप्तिस्तद्विशिष्टावच्छिन्नविधेय
कानुमितिप्रयोजिका। यत्र परंपरया दंडत्वादिकमेवानुमितौ विधेयतावच्छेदकं तत्र हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदको यो धर्मः परंपरयातद्वच्छिन्नसामा
नाधिकरण्यरूपैव व्याप्तिः प्रयोजिका इति सामानाधिकरण्यांशे दंडादेः प्रवेशाप्रवेशक्षमत एव दंडिमान् दंडत्ववत्वान् इत्यनुमित्योर्दंडादिविषयकत्वनियम इत्य
प्याहुः। यत्तु दंडत्वधर्मिकनिरुक्तानवच्छेदकत्वज्ञानस्यैव कार्यतावच्छेदकं दंडावच्छिन्नविधेयताकानुमितित्वमित्यनुमित्यनुमितेर्दंडप्रकारकत्वेनानुपपन्नमिति
तत्तुच्छं परंपरया दंडत्वावच्छिन्नविधेयताकानुमितित्वस्यापि तादृशज्ञानकार्यतावच्छेदकतया सर्वत्रैव दंडिमान् डत्ववत्वानित्युभयाकारानुमित्यापत्तेः। उभय
धर्मावच्छिन्नस्यैव सामग्रीसंभवादिति दिक्। नव्यास्तु दंडिमानित्याद्यनुमितौ न संयोगेन दंडादेः प्रकारत्वं किन्तु स्ववृत्तिपुरुषत्वावच्छिन्नाधिकरणकसंबन्धेन न
चैवमनुभवापलापापत्तेः। दीधितिकृन्मतेऽपि दंडस्य साध्यतावच्छेदकविधया संयोगस्य साधनतावच्छेदकताघटकसंसर्गविधया [illegible]वगाहित्वापलापापत्तेरिति
प्राहुः। यद्रूपविशिष्टेत्यस्य फलमाह इत्थं चेति। चोवावधारणे इत्यादौ इत्यादिन्यायस्थलीयहेतौ तथा च न्यायः। पक्षनिर्देशं विना नास्तीत इदंपदेन तन्निर्देशः। एवमग्रे

२

न च अङ्कस्याप्यतावच्छेदकस्थले प्रतियोगितानवच्छेदकत्वमित्यत्रावच्छेदकत्वं निरवच्छिन्नमिव विशिष्टस्याप्यतावच्छेदकस्थले येन रूपेणास्याप्यतावच्छे-
दकत्वं न तदितरोभयानवच्छिन्नप्रतियोगितानवच्छेदकत्वं ग्राह्यमन्यथा महानसे पर्वतीयवह्नि रजितत्वविशिष्टजातिमान्नास्तीत्यादिप्रतीत्या विशिष्टवह्नि-
त्वस्य तादृशाभावप्रतियोगितावच्छेदकत्वे तयावद्भूमान्धूमादित्यादावपि जातिमद्धान्यघटत्वादित्यादावव्याप्तिप्रसंगात्. घटेपटसमवेतत्वविशिष्टजाति-
मान्नास्तीत्यादिप्रतीत्या विशिष्टजातेस्तादृशप्रतियोगितावच्छेदकत्वात्. तथा च तदंऽवान्नास्तीतिप्रतीत्या तज्जातिविशिष्टदंऽयत्वे रेखावच्छेदकत्वावगाहनात् कु-
कुदंऽयकीनांदंऽत्वतदितरोभयानवच्छिन्नं यद्धेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वं तदभाववत्त्वान्नाव्याप्तिरिति वाच्यम्. प्रमेयदंऽवान्नास्तीत्यादि-
प्रमेयत्वोपलक्षितस्यैव तदंऽवान्नास्तीत्यादावपि तत्त्वोपलक्षितदंऽमात्रस्यैवावच्छेदकत्वावगाहनात् द्रव्यत्वस्यावच्छेदकत्वासंभवस्य विशिष्टस्य तथात्वस्वीकार-
रः अन्यथा प्रमेयत्वविशिष्टदंऽादेरपि तथात्वापत्तेरत आह द्रव्याद्यावृत्ति. हेतुमन्निदंऽसामान्याभाववत्त्वाद्दंऽत्वमपि तादृशावच्छेदकमेवेत्यत उक्तं परं परात- 8
वंधमिति. तथा च स्वाश्रयत्वस्वरूपपरंपरासंबंधेन दंऽवतोदंऽनि: साधनवन्निष्ठाभावविरहान्नाव्याप्तिः तत्प्रतियोगितावच्छेदकता घटत्वसंबंधावच्छिन्नाया ए-
व हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतायाः प्रविष्टत्वात्. अन्यथा विषयिता रूपताप्रिततो ज्ञानस्य समवायेनाभाववत्हेतुमतिसत्त्वाद्रूपवान्पृथि-
वीत्यादित्यादावव्याप्तिप्रसंगादिति भावः. यदि च अङ्कदंऽमते रेखावच्छेदकत्वावगाहिप्रत्ययानतरानपान्न दंऽ नास्तीतिप्रतीत्या तज्जातिविशिष्टदंऽयत्वे-
रेखावच्छेदकत्वं प्रकृतं दंऽ नास्तीतिप्रतीत्यन्यथानुपपत्त्या दंऽस्यावच्छेदकत्वसिद्धौ प्रमेयदंऽवान्नास्तीत्यादेरपि तत्प्रामाण्यावच्छेदकत्वस्यैव तत्सामंजस्ये विशिष्टस्य तत्प्रा-
वच्छेदकत्वाकल्पनात्. तथा च अथयुक्ताव्याप्तिरित्युच्यते तदा रूपत्वव्याप्यजातिजातिमद्घटत्वादित्यादावव्याप्तिः सर्वस्यापि नीलत्वपीतत्वादिस्वरूपास्य रूपत्व-
व्याप्यजातित्वेन साधनवन्निष्ठाभावप्रतियोगितानिरवच्छिन्नावच्छेदकत्वाद्रूपवान्नीलो नास्तीत्यादिप्रत्ययादित्यत आयेन हेतुसाध्यमित्यादि पदद्वयं।

स ६।

आ॰सि
१

श्रीगणेशाय नमः ॥ वह्नित्वावच्छिन्नस्य सर्वस्यैव धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकीभिन्नत धूमत्वावच्छिन्नत्वाद्व्याप्तिरित्यन्यथा व्याचष्टे प्रतियोगितानवच्छेदको यो धर्म इति । तथा च प्रतियोगितावच्छेदकत्वस्य भावप्रधाननिर्देशतयाऽवच्छिन्नपुरस्काऽवच्छिन्नप्रतियोगिताकपरतया तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नत्वं लभ्यत इति नावच्छिन्नपदवैयर्थ्यमिति ध्येयम् । यद्यपि महानसीयवह्निर्नास्तीत्यादिप्रतीतिसिद्धस्य हेतुमन्निष्ठाभावस्य प्रतियोगितावच्छेदकमेव वह्नित्वमित्यव्याप्तिस्तदवस्थ्यम् । न च तादृशावच्छेदकतापर्याप्त्यधिकरणत्वं न वह्नित्वस्येत्यदोषः । प्रत्येकमुभयत्र पर्याप्तिसंबन्धेनाऽसत्तो वच्छेदकत्वस्योभयत्र पर्याप्तिसंबन्धेन सत्त्वायोगात् । तथापि साध्यतावच्छेदकतत्तदुभयावच्छेद्यभिन्नाया एव प्रतियोगिताया अनवच्छेदकत्वस्य विवक्षितत्वाददोषः । न च प्रमेयाभाववान् धूमादित्यादावव्याप्तिः साध्यतावच्छेदके तस्याः प्रसिद्धेरिति वाच्यं तदितरपदेन स्वानवच्छिन्नप्रकारतावच्छेदकत्वस्य विवक्षितत्वात् । साध्यतावच्छेदकभिन्नो यः साध्यनिष्ठो धर्मस्तदनवच्छिन्नाप्रतियोगिता तु न निवेश्या तथा सति तादृशप्रतियोगिताशून्यसाध्यसामानाधिकरण्यस्यैव व्याप्तित्वसंभवे साध्यतावच्छेदकस्य तादृशप्रतियोगितानवच्छेदकत्वानुसरणवैयर्थ्यापत्तेरिति ध्येयम् । अपि च प्रमेयवान्वाच्यत्वादित्यादावव्याप्तिः । तथा हि साध्यतावच्छेदकातिरिक्तं साध्यवृत्ति यद्गुरुत्वादिकं तदनवच्छेद्यप्रतियोगिताकस्य हेतुसमानाधिकरणाभावस्याप्रसिद्धेरिति तु न भ्रमः । द्रव्यत्वादिरूपेण धूमे वह्निव्याप्यत्वस्य धूमसामान्ये वा तत्तद्वह्निव्याप्यत्वस्य वारणार्थं विशिष्य लक्ष्यं निर्दिशति तद्रूपविशिष्टस्येत्यादिना । वह्निमान्धूमादित्यत्र धूमादिनिष्ठतत्तद्वह्नित्वावच्छिन्नसामानाधिकरण्यस्य वह्निसामान्यनिरूपितव्याप्तित्वाभावादाह तद्धर्मावच्छिन्नेति । तद्धर्मावच्छिन्नहेतुकतादृशधर्मावच्छिन्नविधेयकानुमितिजनकतायां विषयविधयाऽवच्छेदिका इति तदर्थः । तेन व्याप्तिपदेनापि तादृशसामानाधिकरण्यान्वयान्न पौनरुक्त्यं व्याप्तेः सामान्यरूपताज्ञानाय यावदिति । ननु दंडिमान् दंडसंयोगादित्यत्राव्याप्तिर्ज्वालनीत्यायेन दंडमात्रस्यैव हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वात् ।

४.१०६

नागदीक्षी·
सिद्धान्त·
लक्षणं·

प·त्र·२०

श्री ५ को सरकार

52

विभक्त्यर्थस्यान्योन्याभावबोधने अनुयोगिवाचकपदसमानविभक्तिकपदार्थस्य संसर्गाभावबोधने च नञोऽसामर्थ्यमित्यर्थः॰ तथा च फलानुरोधेन
नञनत्रनत्रदानुपूर्वीज्ञानस्य हेतुत्वकल्पनान्नियमपुरःसरमिति भावः॰ तथाविधकार्यकारणभावकल्पनं पूर्वमतेप्यावश्यकमित्याह तेनेति॰ तथाविधा
सामर्थ्यकल्पने नेत्यर्थः॰ संसर्गाभावः संसर्गाभाववद्भेदः॰ तथा च तादृशकार्यकारणभावकल्पनायावश्यकमिति भावः॰ न चैवं सति वैयाकरण
मतेपि न पचतीत्यादौ नञोन्योन्याभावबोधकत्वापत्तिरिष्टत्वात् आहुरित्यनेनास्वसूचितः॰ स च दुग्धं न दधि इत्यादौ दधिपदोत्तरलुप्तविभक्तेरनुसं
धानं विनापि शाब्दबोधस्यानुभवसिद्धस्यापलापो बोध्य इति॰ अन्नसत्त्वं रहस्यं वा यत्किंचिज्जिज्ञासितं मया तत्सर्वं जगदीशकृपातोऽर्थमिति निश्चितम्॥
इति श्रीरघुदेवभट्टाचार्यविरचिता नञ्वादटिप्पणी समाप्ता॥ रघुदेवकृतग्रन्थालोकनेन मनीषिणः॰ अध्यापयन्तु सन्तोषैर्नव्या दमविवादतः॥

न १४

श्रीरामः

४११३

श्री ५ को सरकार

श्रीयुतगदाधरभट्टाचार्य
रचित:
पक्षताग्रन्थोय
[illegible]
गादाधरी
सं०
६२
अस्य
श्रीसोमशर्म्मस्य:॥

ग.प.°
१

श्रीगणेशाय नमः ॥ मूले व्याप्तिपक्षधर्मतयोः संगसमर्थनानन्तरं तां परिजिहीर्षुस्तयोरेककार्यकारित्वरूपां संगतिं प्रदर्शयन् व्याप्त्यनन्त
रमित्यादिमूलमवतारयति अनुमितीति · अनुमितिलक्षणं · अनुमितिस्वरूपे · यदेककार्यतदनुकूलत्वसंगत्या · तत्प्रयोजकत्वरूपसंग [redacted]
त्या · प्रयोजकत्वं च कारणतावच्छेदकस्यापीति व्याप्तिपक्षधर्मतयोर्विषयविधया परामर्शनिष्ठकारणतावच्छेदकत्वेनाऽनुमितिजनकत्वेपि न क्षतिः
यद्यपि पक्षतायाः न कारणतावच्छेदकघटकत्वं · तामनन्तर्भाव्य पर्वतादिवृत्तित्वेनैवानुमितिजनकतावच्छेदकत्वात् · तथापि पक्षतायाः अनु
मितौ स्वातन्त्र्येण कारणतया तदुपलक्षितधर्मिवृत्तितायाः कारणतावच्छेदकतया [illegible]विशिष्टस्य कार्यानुकूलत्वमक्षतमेवेति ध्येयं · निरू
पयितुमिति · निरूपणं प्रतिपत्त्यनुकूलो व्यापारः । एवं च पक्षधर्मताघटकपक्षतानिरूपणस्यापि पक्षधर्मताप्रतिपत्त्यनुकूलत्वेन तन्निरूपणा
त्वमक्षतमेवेति · मूले पक्षतानिरूपणे पि पक्षधर्मतानिरूपयितुमिष्टस्य नासंगतिः · पक्षधर्मत्वं पक्षसाराजित्वं पक्ष्यां धर्मतापदं पक्षीयधर्मवि ३ पक्ष
शेषरूपपक्षतापरमिति केचित् · तच्चिन्त्यं तथात्वे लिखनसंक्षेपनिर्बन्धिनो दीधितिकारस्य पक्षतानिरूपयितुमिष्टस्योपेक्षाया बीजाभावा
त् · माऽस्त्वीति · व्याप्तिनिरूपणानन्तरमिति मूलपाठाभिप्रायेण · व्याप्त्यनन्तरमिति पाठे चशब्देकाराभावात्तत्प्रसक्तेसाध्यपेक्षप्रसक्तविस्तारी

राम°
१

ती १

तिरीत्याप्यस्योपजीवकेत्यादिग्रंथधारकस्य तथाविधत्वेऽस्खलनासंगतेः तत्रेति मूले तत्पदं पक्षधर्मतापरं· सप्तम्यर्थश्च घटकत्वं· अन्वय
धास्यपक्षत्वमित्यत्रेत्यवधेयं· संदिग्धेत्यादिमूलग्रंथस्य संदिग्धः साध्यरूपो धर्मो यत्रेति व्युत्पत्त्या विषयतया साध्यीभूतधर्मसंदेहवत्त्वं तादृश
संदेहपर्यवसितं पक्षत्वमित्यर्थः । तत्र साध्ये धर्मत्वनिवेशनमफलं धर्मपदस्यार्थस्यापरस्मिन्नसंदिग्धं साध्यधर्मत्वं, वह्नौ हि वत्वात्सा।
ध्यनिरूपितधर्मित्वपर्यवसितं पक्षत्वमित्युक्तौ साध्यसंदिग्धस्वधर्मत्वं पक्षत्वमित्युक्तौ च साध्यनिरूपितधर्मित्वस्य पक्षधर्मत्वं स्वत्वांशे सिद्धि
स्यत्वेव स्वमारणानुपपत्तिप्रयोजकं तत्र· एवं साध्यकोटिकसंशयस्य निवेशो साध्यं पक्षवृत्तिर्न वा साध्यं पक्षविशिष्टाभावप्रतियोगि न वेत्यादि
संशयासंग्रहः । तादृशसंशयोपादाने च पक्षः साध्यवान्न वेत्यादिसंशयादनुमित्यनुपपत्तिरतो धर्मतांशपरित्यज्य केवलान्वयिग्रंथस्य
शिक्षितैव वस्वभावात्तथाविधसंशयानुगमप्रकारं दर्शयति यत्रेति यत्र । पद्धर्मावच्छिन्ने । सप्तम्यर्थश्च निरूपात्वपि विशेष्यत्वं ॥
साध्यस्य । साध्यतावच्छेदकावच्छिन्नस्य । षष्ठ्यर्थः प्रकारित्वं । तस्यापि निरूपितेऽन्वयः । तत्र तद्धर्मावच्छिन्ने । सप्तम्यर्थोऽनुमित्यन्वयि वि
शेष्यत्वं । तादृशसंबंधेन साध्यानुमितौ तादृशसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नविधेयकानुमितौ पक्षता जनकीभूते

३ साध्यधर्मो येनेति
साध्यतावच्छेदकसंबं
धेनेत्यर्थः ४

गुदा०
१

सर्थः।पक्षविशेष्यकसाध्याभावविशिष्ट[redacted]बुद्धाविवसाध्यधर्मिकपक्षवृत्तित्वपक्षनिष्ठाभावप्रतियोगित्वविशिष्टबुद्धावपिपक्षः
साध्यवानितिनिश्चयस्यप्राचीनमतेप्रतिबन्धकतात्साध्यंपक्षवृत्तिर्नवेत्यादिसंशयसंग्रहः।एवंसुडपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितरु ²च
ढसंयोगादिसंसर्गावच्छिन्नमुद्द[redacted]वह्नित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नंप्रतिपर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयो
गादिसंसर्गावच्छिन्नवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नप्रतिबन्धकताकसंशयोहेत्वोरितिपर्यवसितंतादृशनिश्चयप्रति
वध्यत्वस्ययथोक्तस्यघटादिविषयकसमूहालंबनात्मकवह्निमत्तानिश्चयप्रतिबध्यघटादिसंशयसाधारण्यात्तादृशनिश्चयप
त्वावच्छिन्नप्रतिबंधकताप्रवेशः।अवच्छिन्नत्वंचान्यूनवृत्तित्वं।ननुस्वरूपसंबंधविशेषः।तेनवह्निसामान्याभावविशिष्टबुद्धौमहानसी
यत्वादिविषयतामनन्तर्भाव्यवह्निमान्महानसीयवह्निमानित्यादिसकलत्वानसाधारण्याद्वह्नित्वाद्यवच्छिन्नवत्तानिश्चयत्वेनैवप्रति ४व
बंधकताकत्वमनान्महानसीयवह्निमान्वह्निसामान्याभाववान्वापक्षइत्याकारकसंशयंप्रतिमहानसीयवह्नित्वाद्यवच्छिन्नप्रकारकनिश्च
यत्वेनाप्रतिबंधकत्वेपिनतथाविधसंशयस्यमहानसीयवह्नित्वावच्छिन्नसाध्यकानुमितौपक्षतात्वानुपपत्तिः।नवामहानसीयव

राम०
२

ध्रुमाभावादिविशिष्टबुद्धिप्रतिबंधकतावच्छेदककोटौवह्नित्वावच्छिन्नप्रकारकत्वादेर्निविष्टत्वेपिवह्निमान्क्मिसाद्यनुमितौमहानसीयव
ह्निमान्नवापक्षइत्यादिसंशयस्यपक्षतात्वापत्तिश्च·रसंयवाहार्यस्याप्रमात्वज्ञानानास्कंदितस्यचनिश्चयस्याप्रतिबंधकतयाःआहार्यत्वेप्र
मात्वज्ञानानास्कंदितत्वंनिश्चयेविशेषणंदेयमतोनतथाविधनिश्चयत्वान्न्यूनवृत्तिप्रतिबंधकताप्रसिद्धिः।परंतुवह्निमान्नवेत्यादेःक
स्यापिज्ञानस्यधर्मितावच्छिन्नविशेष्यताकान्यसंसर्गकान्यधर्मावच्छिन्नप्रकारकनिश्चयसाधारणसंयोगादिसंसर्गकवह्नित्वाद्यवच्छि
न्नप्रकारकनिश्च[redacted]यत्वान्न्यूनवृत्ति प्रतिबंधकताकत्वंनसंभवतीतिप्रकृतपक्षतावच्छेदका
वच्छिन्नविशेष्यतानिरूपितत्वादेःप्रकारताविशेषणत्वे।उपनीतभानात्मकबाधनिश्चयस्यसाध्यवत्तानिश्चयसामान्यनिवर्त्त
नीयतयाऽप्रमात्वज्ञानानास्कंदितस्यचतस्यानुमितिविरोधितयातथाविधबाधदशायामनुमित्यापत्तिरतःसंशयत्वनिवेशनं·[illegible]सा
ध्यविशेष्यकसंशयसाधारणस्यानतिप्रसक्तसंशयत्वस्यदुर्वचतयापुनरननुगमतादवस्थ्यमितिवाच्यंबाधनिश्चयनिवर्त्तनीयत्वस्यैवात्र
संशयपदेनविवक्षितत्वात्।केवलान्वयिनिसाध्येपक्षनिष्ठाभावप्रतियोगित्वनिश्चयरूपएवसुलभोबाधः।एकविध बाधोपादानेनैवनानावि

ता

।साध्याविषयतानिरूपितविषयतानिरूपितविषयताकत्वमर्थः तेन ज्ञातत्वस्य सं
संसर्गतया प्रकारतया वा भानेपि तद्विषयसं(पक्षं)शयस्य नासंग्रहः ।१

त्व,

गदा०
३

धसंशयानुगमसंभवात्· तदननुगमो न दोषाय· अनुगमस्यापि कथंचित्संभवात्· [illegible] पक्षे साध्यवैशिष्ट्यावगाहित्वमेव संशयपदेन विवक्षित
मिति नानुगमः। साध्यं पक्षवृत्ति न वेति साध्यविशेष्यकसंशयस्यापि तद्घात्वादिति· तदसत्· तथा सति साध्यपक्षवैशिष्ट्यानवगाहिनः साध्यं
पक्षनिष्ठाभावप्रतियोगि न वेति संशयस्यासंग्रहात्· न च केवलान्वयिस्थले साध्यं पक्षवृत्ति [redacted]
न वेत्येतादृशसंशयादेवानुमित्युपपत्तौ तथाविधसंशयासंग्रहो न दोषायेति वाच्यं· प्रमेयत्वं घटनिष्ठसंताभावप्रति
योगि न वेति संशयस्य केवलान्वयिन्यप्रमाणिकत्वेव संगृहीततयातद्विरोधात्· वस्तुतस्तु तादात्म्यसंबंधेन वाच्यसाध्यकप्रमेयपक्ष
कस्थले तादृशसंशयाप्रसिद्धिः। तादात्म्यसंबंधेन पक्षसम्बन्धाभावरूपकोट्यप्रसिद्धेः· न च साध्यपक्षनिष्ठाभावप्रतियोगित्वसं
शयस्य पक्षतात्वेपि उक्तस्थले पक्षतावच्छेदकसामानाधिकरण्येनानुमितेरुद्देश्यत्वे पक्षतावच्छेदकावच्छेदेन वर्तमा
नभेदप्रतियोगित्वकोटिकसंशयस्य साध्यवत्तानिश्चयप्रतिबध्यतया पक्षतात्वमङ्गीकार्यं तच्च न संभवति· प्रमेयत्वाव
च्छेदेन वर्तमानभेदाप्रसिद्ध्या कोट्यप्रसिद्धेरिति वाच्यं· व्यासज्यवृत्तिधर्मावच्छिन्नभेदस्य प्रतियोगिन्यपि प्रत्येकं वर्तमानत

वह्निमान्धूमादित्यादौ
धूमसंयोगेनेत्यर्थः
अवच्छेदकावच्छेदेन
स्यपर्वतत्वव्यापक
संयोगेनेत्यर्थः ३

साध्यवत्तानिश्चयप्रति
बध्यत्वेन

राम०
३

इतरभेदादिसाध्यकस्थले तत्र परामर्शे हेतौ नरत्वव्यापकीभूताभावप्रतियोगि· गंधवत्तापृथिवीलक्षणकः एवमेव व्याप्तिधीः

× वस्तुत इतरभेदाभावरूपौ ×

अन्वयव्याप्तिकेनुमाने
त्रव्याप्तिज्ञानादनुमि
तेः पूर्वं साध्यज्ञानस्या
वश्यकत्वात्

यात्तादृशभेदस्यैव पक्षतावच्छेदकावच्छेदेन वर्त्तमानस्य प्रसिद्धेः तत्र पक्षतावच्छेदकावच्छिन्नवृत्तिकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वतादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकतोभयत्वावच्छिन्नतदभाववत्कोटिकसंशयस्य पक्षतात्वोपगमाच्च· एवमप्रसिद्धसा(ध्यकव्यतिरेक्यनुमानस्थले साध्यपक्षवैशिष्ट्यावगाहिसंशयानुपपत्तेः तत्र साध्यात्मकाभावप्रतियोगिनि पक्षवृत्तित्वादिसंशयस्यैव प(क्षतात्वस्योपगंतव्यतया संशयपदेन पक्षसाध्यवैशिष्ट्यावगाहित्वनिवेशनासंभवः। अथ वह्निव्याप्यसाध्यकस्थले महानसीयवह्नित्वाद्यवच्छिन्नसाध्यकस्थले च वह्निमान्नवा पक्ष इत्यादिसंशयस्य पक्षतात्वप्रसंगः। साध्यवत्तानिश्चयनिवर्त्यत्वात् न च सिद्धसाधनस्थलेऽनुमितिवारणमेव पक्षताहेतुत्वकल्पनफलं· एवं चोक्तसंशयस्यानुमितिहेतुत्वोपगमेऽपि सिद्धिदशायामनुमित्याप्यसंभवात्तस्य पक्षतात्वमि। एतेनैव निवार्यं· साध्यतावच्छेदकावच्छिन्नसाध्यतदभावान्यतरस्मिन्पक्षसंबंधावगाहिसंदेहस्यैव प्राचीनैः पक्षतात्वोपगमात्· अन्यथा बाधवारकसंशयत्वनिवेशस्यापि निष्प्रयोजनकत्वापत्तेः। न च तादृशसंशयस्य वह्निव्याप्याद्यभाववत्तानिश्चयरूपबाधप्रतिबध्यतया नातिप्रसंग इति वाच्यं· वह्निव्याप्याभावाभाववान्पर्वतः पर्वतो वह्निमान्नवेति संशयस्य तादृशबाधनिश्चयप्रतिबध्यतया

२ अज्ञातं

संबंध[illegible]श्च स्वनिष्ठा
भावप्रतियोगित्वादि·प
रूपरितोपि

व्याप्यवानिति कोटिकः
संज्ञानस्य तादृशसंश
यप्रतिबंधकत्वेन विरुद्धज्ञान (विषयता [illegible] कान्याहार्य)
नापि [illegible] स्वीकारेणाहार्यस्य च्या
प्रतिबध्यत्वे न चेपारिभवोतोभावाभा[illegible]ववानिति।

समानाधिकरण्यमात्रेणा
नुमितौ अवच्छेदकावच्छेदे
न संशयस्य प्रतिबध्यत्वेन
सम्बद्धांशेऽवगानुसरणं

ए तावत्तापि तद्वारणासंभवात्· परन्तु महानससाध्यतावच्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्नप्रतिबध्यतायाः निवेशान्नोक्तातिप्रसंगः । व
ह्न्यभावविशिष्टज्ञानत्वावच्छिन्नायाः वह्निव्याप्यवत्तानिश्चयप्रतिबध्यतायाः अवच्छेदककोटौ वह्निव्याप्यत्वावच्छिन्नविषयताया अनंतर्भावा
दिति· तत्र· वह्न्यभावादिसाधकस्थले वह्निमान्नवेत्यादिसंशयासंग्रहप्रसंगात्· वह्निविशिष्टबुद्धित्वावच्छिन्नाया वह्न्यभावादिनिश्चयप्रति
बध्यताया अवच्छेदकगर्भे वह्न्यभावत्वाद्यवच्छिन्नविषयताया अनिवेशात्· यत्र वह्निव्याप्यत्वाद्यवच्छिन्नसैव पक्षत्वं साध्यत्वं च तत्र वह्निव्या
प्यो वह्निमान्नवेति संशयवारणस्यापि अशक्यत्वात्· परन्तु व्याप्यवत्ताज्ञान प्रतिबंधकतावच्छेदकविषयताघटितधर्मावच्छिन्नत्वेन
प्रतिबध्यताया निवेशनीयतया वह्निव्याप्यवत्ताज्ञानं प्रतिवह्न्यभावादिनिश्चयत्वेनाप्रतिबंधकतया तद्विषयतायाः साध्यवत्ताज्ञा
नप्रतिबंधकतावच्छेदकत्वविरहेण नातिप्रसंग इति· तदपि न· तावत्तापि महानसीयवह्नित्वावच्छिन्नसाध्यकस्थले महानसी
यवह्न्यभावाभाववान्पर्वतो वह्निमान्नवेति संशयवारणासंभवात्· अत्रोच्यते· संशयत्वं स्वनिष्ठविषयिताघटितधर्मावच्छिन्न
प्रतिबंधकतानिरूपितप्रतिबध्यताशालित्वं· ज्ञानभेदेन विषयिताभेदानभ्युपगमात्· संशयनिष्ठवह्निमत्पर्वतादिविषयिताया

न च संशयव्यवच्छेदकप्रतिबध्यतायामेवानिश्चयत्वो
तं विशेषणं देयं किं प्रतिबध्यतावच्छेदकावच्छिन्नत्वेने
ति वाच्यं वह्निः पर्वतवृत्तिर्न वेति संशयीयप्रतिबध्यताया
निरूपकभेदेनाभिन्नत्वात् १२

अप्रसक्ते केनिश्चयप्रवृत्तित्वात्प्रतिबंधकतावच्छेदकघटकत्वोपपत्तिः वह्न्यादिसाध्यकस्थले वह्न्यभाववान्पर्वतो घटवान्नवेत्याकारकसंशय
स्यतादृशधर्म्माक्रान्तस्य साध्यवत्तानिश्चयप्रतिबध्यस्य च वारणाय साध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेद
अतो > कावच्छिन्नत्वेन निरुक्तसंशयत्वघटकप्रतिबध्यता निवेशनीयो घटादिमत्ताज्ञानत्वावच्छिन्नप्रतिबध्यतापात्रतथात्वातिप्रसंगः । तत्र
वह्न्यभाववान्नवेति संशयस्य पक्षतात्वमिष्टमेव । तस्य वह्निपक्षनिष्ठाभावप्रतियोगी न वेति संशयसमशीलत्वात् । स्वनिष्ठविषयितायां च
वाधप्रतिबध्यतावच्छेदकत्वं निवेशनीयं । तेन वह्निव्याप्यसाध्यकस्थले वह्निमान्नवा पर्वत इत्येतादृशसंशयस्य व्युदासः । तत्र वह्निव्या
प्याभावाभाववत्वेन व्याप्यपृथग्भानेपि संशयत्वघटकीभूतस्वनिष्ठवह्निमत्पक्षविषयितायां वह्निव्याप्याभाववन्निश्चयप्रतिबध्यतावच्छे
दकत्वविरहात् । एवंच शुद्धवह्नित्वावच्छिन्नसाध्यकस्थले वह्न्यभाववान्पर्वत इत्येतादृशबाधनिश्चयप्रतिबध्यस्य महानसीयवह्निमा
पर न्नवान्पर्वत इत्येतादृशसंशयस्य पक्षतात्ववारणाय साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकावच्छिन्नत्वनिवेशनं सफलमित्यवधेयं । [illegible]ना
वच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकसामानाधिकरण्यमात्रेण कोटिद्वयावगाहिनो निश्चयस्यावच्छेदकावच्छेदेन साध्यादिम

[illegible]

गदा०
५

ज्ञानिश्चयप्रतिबध्यत्वेपि निरुक्तसंशयत्वाभावेन न पक्षतात्वमिति संक्षेपः। अथवावच्छेदकावच्छेदेन कोटिमवगाहमानस्य कोटिद्वयसमुच्चय
स्य पक्षतात्वापत्तिः। तस्यापि उक्तरूपाक्रान्तत्वात्. न च विरोधावगाहित्वनिवेशात्तद्वारणसंभवः। कुत्रचित्किंचित्प्रतियोगिकविरोधमानस्य स
मुच्चयेप्यक्षतत्वात्. साध्यतदभावादि विरोधावगाहित्वस्य प्रत्येकं सकलसंशयसाधार[illegible]णासंभवादिति चेन्न संयोगादेरव्याप्यवृत्तिता तादृ
नदशायां तद्वत्वग्रहविषयीभूतधर्मिणि तदभावादिग्रहोपसत्ता तद्वत्ताग्रहस्य तदभावग्रहप्रतिबंधकतायामव्याप्यवृत्तित्वज्ञानस्योत्तेजकतामु
ति ५ पेक्ष्याव्याप्यवृत्तितावगाहित्वेनैव प्रतिबंधकतोपेयते. अव्याप्यवृत्तित्वं चानवच्छिन्नाधार ताकत्वं. सर्वत्र प्रतिबंधकज्ञाने तादृशाधारतायाः अंततः ( ५ द
संसर्गविधयेव भानमुपेयते. एवं च समुच्चयनिष्ठकोटिविषयिता न विपरीतधीप्रतिबंधकतावच्छेदिका. अव्याप्यवृत्तित्वविषयितानिरूपि
त तत्वात्. अत्रोक्तसंशयत्वनिरुक्तौ स्वपदेन समुच्चयोपायज्ञानासंभवेन तस्य पक्षतात्वापत्तिविरहात्. अथवा स्वविघटितधर्मावच्छिन्नप्रति स्वंसंशयत्वरूपाप्रकारिता
बंधकतानिरूपितप्रतिबध्यतावच्छेदकीभूताया[illegible]वच्छेदकधर्मावच्छिन्ननिरूपितविरोधिविषयितानिरूपितप्रकारितासामानाधि
करणसंबंधेन तद्विशिष्टप्रकारितेव संशयत्वं. न च समुच्चयव्याहतं. समुच्चये विरोधाभानेन कोटिद्वयविषयितयोर्विरोधविषयितानिरू

ता

राम०
५

अत्रेयं चिंता विरोध्यावगाहित्वेन वा ग्रंथस्य समुच्चयवैलक्षण्योपपत्तौ भिन्नरूपकभेदेन विषयि-
ताया भेदस्य वज्रलेपत्वं [illegible] एवं च [illegible] निश्चयीयविषयतायाः संशयीयतः [illegible] भेदसिद्धिरि-
ति ४

पितत्वात् संशये चोक्ततः कोट्योः संसर्गतया परस्परविरोधभानोपगमेन सकलसंशयसंग्रहः। यद्देशे संशयत्वं तत्कोटिविरोधस्येवोक्त-
रूपेणोपादानसंभवान्न वस्तुतः परविरोधभानमानमाद्यापातिप्रसंग इति [illegible] केचित्तु साध्यनिश्चयसाध्याभाववन्निश्चयप्रतिबध्यतावच्छेद-
कविशेष्यताशालित्वं समुदितार्थः। संशये च धर्मिणि उभयप्रकारतानिरूपितैकविलक्षणविषयता समुच्चयवैलक्षण्योप[illegible]गम्यते इति [illegible]
तादृशविषयतायाः विभिन्नरूपेणोभयनिश्चयप्रतिबध्यतावच्छेदकतयानासंभव इत्याहुः। तच्चिंत्यं संभवत्पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्य-
तदभावकोटिकज्ञानत्वादिकमुपेक्ष्य निरुक्तरूपेण संशयनिवेशनप्रयोजनं दर्शयति नेवेति नपक्षेति नपक्षविशेष्यकस्य पक्षः साध्यवान्नवे-
त्याकारकस्य साध्यविशेष्यकस्य साध्यं पक्षवृत्ति नवेत्याकारकस्य संशयस्य नानुगमः। तथा सति फलस्याविलक्षणतया व्यभिचारेणाकार-
णतापत्त्येतेति भावः। इदमुपलक्षणं साध्यवद्ध्रदादिकोटिकसंशयानुगमोपि बोध्यः विशिष्यसंबंधनिवेशप्रयोजनं दर्शयति नेचे-
ति संबंधांतरेण तत्संबंधातिरिक्तसंबंधेन संदेहे संदेहदशायां निर्णीतसंबंधेन पक्षांशे साध्यीयसंसर्गविधया तत्कालीननिर्णयवि-
षयीभूततत्संबंधेन एतदनंतरमनुमितावितिशेषणीयं तत्संबंधेन संशयासत्वेपि तत्संबंधेन सिद्ध्यभावकाले इष्टापत्तिसंभवान्निर्णी

त्रि

व
गदा० तेऽस्तु तं· संबंधमनिवेश्य साध्यनिरूपितसामान्यनिवर्त्तितनिवेशे प्रसिद्धिप्रसंगः यत्किंचिन्निरूपितनिवर्त्तितं· यत्किंचित्संसर्गनिरूपितसामान्यानिर्त्से त्वेवा
पूर्दिनिवेशनेतद्दोषप्रसंगो बोध्यः। धूमत्वांशपरित्यागे प्रयोजनमाह। नवा तत्र प्रमितिरिति· स्वधर्मत्वसंशयविषयसाध्यकत्वं पक्षत्वमित्य
६ स्व क्तौ धर्मत्वनिवेशप्रवृत्तिसाध्यकघटादिपक्षकस्थलेन पक्षतावैकल्यं· घटादिसमवेतं सत्प्रसिद्धत्वादृगनादौ तत्संशयसंभवादिति तत्र प्रम
तिपर्यंतस्य पक्षतानुसरणं· तथा च साध्ये संबंधांतरेण पक्षवृत्तित्वसंदेहदशायां निर्णीतसंबंधेनानुमितिवारणाय प्रकृतसाध्यतावच्छेदकसंबं ब
धेन स्ववृत्तित्वसंशयस्यावश्यं निवेशनीयतया तत्र प्रमितिसमवेतस्याप्रसिद्ध्या साध्ये पक्षवृत्तित्वसंशयप्रमादा। पापि न तत्र पक्षतोपपत्तिरिति ५ त्व
भावः स्वरूपसंबंधेन तत्र मोहत्तित्वस्याप्रसिद्ध्या तेन संबंधेनात्रानुमितौ नानुपपत्तिरतः समवायेनेति· पक्षे साध्यीयसाध्यतावच्छेदकसंबंधाव
च्छिन्नधर्मितासंशयस्य पक्षतात्वेन तत्र प्रमितिपूर्वत्तिमत्साध्यसाधनेनानुपपत्तिरतः आकाशादीति· तद्वैकल्ये· पक्षतावैकल्ये· संदेहोऽ
नुमितौ हेतुः पद्मविशेषणतया पक्षधर्मताज्ञाननिष्ठतज्जनकतायामवच्छेदकः अथवा उपलक्षणतया तादृशजनकतायामवच्छेदकः
द्वयं तत्राद्यंपक्षे दूषयति मूले संदेह इति· विशेषणं अपेक्षणीयानुमित्यव्यवहितप्राक्क्षणताके अनुमितिकारणविशेषणविधयाऽनुमितिकार राम०

वा त

णतावच्छेदकमितियावत्· परामर्शपूर्वंस्यसंशयस्य नाशादित्यन्वयः। यत्रादौ लिंगदर्शनं ततो व्याप्तिस्मरणं तदभिप्रायेण लिंगदर्शनस्य
यत्र तयोर्विपरीतक्रमः तदभिप्रायेण व्याप्तिस्मरणस्य नाशकत्वमभिहितं· अत एकत्रोभयोर्नाशकत्वासंभवेपि न क्षतिः। आदिपदेन
यत्र संशयानन्तरक्षणे व्याप्तिस्मरणाद्यनुगुणज्ञानोत्तरोत्पादस्तदनन्तरमेव व्याप्तिस्मरणादिस्तत्र सत्तादृशज्ञानसंग्रहः। एतावताका
रणतापक्षोपि निरस्तः। कार्याव्यवहितप्राक्क्षणेऽसत्तो निर्व्यापारस्य कारणत्वासंभवात्· व्यापारस्यानुमितिप्रसक्तस्य दुर्वचत्वात्· द्वितीयं
दूषयति· नोपलक्षणमिति· अव्यावर्तकतापत्तेः सिद्धिस्थलेऽनुमितिवारकतापत्तेः तत्कालीनपरामर्शस्यापि कालान्तरीणसंशयविष
यधर्मिवृत्तित्वावगाहितया सामग्र्यन्तर्भूतत्वादिति भावः। अथ यत्र साध्यसंदेहोप्यनुमितौ हेतुरेव· लिंगदर्शनादेः पूर्वोत्पन्नस्य संशयस्य
तेन विनाशेपि तदनन्तरं परामर्शाव्यवहितप्राक्क्षणजातसंशयान्तरादेवानुमितिरिति कल्प्यते। नच यत्रानुत्पन्नस्यैव संशयस्य
सामग्रीवशात् परामर्शोत्पत्तिस्तत्रानुमित्यनुदयप्रसंगः। परामर्शकाले तदुत्तरं च विशेषदर्शनरूपप्रतिबंधकवशेन संशयोत्पादा
दासंभवादिति वाच्यं· फलानुरोधेन सर्वत्रैवानुमित्युपधायकपरामर्शाव्यवहितप्राक्क्षणे संशयोत्पादकल्पनात्· यत्र संशयोत्पाद

र्वत्र

प्राक्

तज्जन्यस्य
संस्कारादेःअनुमि
तिकारणत्वेपिसि
द्धेर्यांशानुमि
त्यापत्तिरिति भावः

प्राक्क्षणे एव परामर्शसामग्रीप्रमाणासिद्धा वा अन्यत्र परामर्शसामग्रीपूर्वक्षणे संशयजनकधर्मिज्ञानाद्यभावः प्रामाणिकस्तत्र परामर्शानन्तरं संशयसमये तत्क्षणे निश्चय एवोपगम्यते· तत एव महत्ताद्युपपत्तेस्तत्रानुमितेर्नोत्पत्तेरनुभवबलाय साध्यसंशयसामग्रीमत्त्वमेव कल्प्यते· अनुगतानुगतसिषाधयिषाभावकूटविशिष्टसिद्ध्यभावस्यानुमितिहेतुतापक्षेऽपि संशयहेतुतायां लाघवात्· संशयहेतुतोपगमे कोटिनिश्चयदशायां संशयाभावादेवानुमितिवारणसंभवात्· नानाविधबाधाभावस्यानुमितिहेतुताकल्पने नानुमितिसामग्रीप्रतिबन्धकतायां तु इति विशेषेण च लाघवात्· जनकज्ञानविरोधितयैव बाधादीनां हेत्वाभासत्वोपपत्तेः संशयस्य च कार्यतावच्छेदककोटौ कारणवैशिष्ट्यनिवेशस्य विशिष्य तादृशतादृशसंशयत्वेनैव हेतुता वाच्या· अतो दीधितिकारोक्तप्रकारस्य स्वत्वघटिततया गुरुरूपत्वेऽप्यावश्यकत्वात्प्रतिबध्यतादीनां स्वस्वावच्छेदकभेदेन भिन्नानामननुगमाच्च· शब्दानुगमकमात्रपर्यवसानेऽपि न क्षतिः। संशयबाधसाधारणतदभाववत्ताज्ञानत्वेनैव कारणत्वं न तु पक्षधर्मिकसाध्यतदभावोभयप्रकारकज्ञानत्वरूपसंशयत्वेन गौरवात् बाधनिश्चयदशायां च नानुमित्यापत्तिसंभवः प्रत्यक्षादिसाधारणा लौकिकविशिष्टबुद्धितावच्छिन्नं प्रति बाधनिश्चयस्य प्रतिबन्धकतावश्यकत्वादिति तन्मतेऽपि· बाधनिश्चयेऽप्रामाण्यग्रहसत्त्वेऽनुमित्यापत्तेः अप्रा

३४

[illegible]

नु
माण्यग्रहाभावस्य संशयजनकतायामप्रयोजनविरहेणानिवेशात्. साध्यसंदेहेऽप्रामाण्यग्रहसत्वेऽनुमित्युपगमे क्षतिविरहात् [illegible]
संशयेऽप्रामाण्यग्रहसत्वेऽनुमित्संशादेपि संशये विषयसंशायकस्याप्रामाण्यसंशयस्याकिंचित्करत्वात्तत्राप्रामाण्यनिश्चयत्वावच्छि-
न्नाभावस्यैव निवेशनीयतया अप्रामाण्यसंशयास्कंदितबाधनिश्चयसत्वेऽनुमितेर्दुर्वारत्वादिति चेन्न. प्रत्यक्षादिनानिर्णीतस्यापि साध्य-
स्यानुमित्सया अनुमितेरानुभाविकत्वात्. संशयस्य पक्षतात्वे तदनुपपत्तेः। अनुभवापलापेपि विशेषदर्शनमूलकप्रत्यक्षादेव सर्वत्र प्रत्यक्षादि-
संभवेऽनुमानप्रामाण्यस्यैव विलयापत्तेः. पक्षधर्मताप्रत्यक्षव्याप्तिस्मरणयोरविरलक्रमेणोत्पत्त्यनंतरं यत्र परामर्शस्तत्र व्याप्तिस्मरणा-
कालीनपक्षधर्मताज्ञानस्यापि विशेषदर्शनतया तस्य पूर्वसत्वेन तत्र व्याप्तिस्मरणानंतरं संशयकल्पनासंभवाच्च. संशयानंतरजातसिद्ध्या-
त्मकपरामर्शादनुमित्यापत्तेश्चेति संक्षेपः॥ संशयनाशेऽपि यावत्तन्निर्णयसंभवस्तावत्पर्यंतं संशययोग्यताया अनपायात्तस्याश्च पक्षता-
त्वं संभवतीति तन्निराकरणे मूलस्य न्यूनताऽतो नापीति मूलमेव संशययोग्यतानिराकरणपरतया व्याचष्टे संशययोग्यतामिति। साधक-
बाधकमानपदस्य सिद्धिबाधहेतुरूपयथाश्रुतपरत्वे सर्वदैवानुमित्यनुपपत्तिः अनुमितिपूर्वं सिद्धिबाधहेतुभूतचक्षुरादेः सिद्धिहेतुभू-

[illegible]

[illegible]

त्परामर्शस्य च सर्वत्रैव सत्वादन्तस्तस्यं सिद्धिबाधपरतया व्याचष्टे साधकेति। यद्यपि बाधकमात्रपदस्य बाधजनकतत्सामग्रीपरत्वेपि न क्षतिः। बाधसामग्र्यनंतरक्षणे कदाप्यनुमितेरनुत्पादात् तथापि बाधजनकत्वमात्रेण तत्सामग्रीपरत्वेन दवच्छिन्नाभावस्य हेतुत्वा[illegible]स्य तेन तत्र चोक्तैवानुपपत्तिः बाधसामग्री. तेन तत्सत्वे च द्वितीयक्षणे न निर्वहतीति लक्षणापत्त्यावश्यकत्वे बाधसत्वक्षणोचितेत्यभिप्रायेणेदं ननु पक्षे साध्याभावनिश्चयस्य बाधत्वे केवलान्वयिनि साध्याभावाप्रसिद्ध्या बाधाप्रसिद्धिरिति तद्भावघटितपक्षतावैकल्यमत आह· केवलान्वयिनि चेति· पक्षनिष्ठेति· साधारण्यादिः धीः। निर्णयः। सत्यभोबाध इति· तथा च तादृशबाधाभावस्यैव पक्षताघटकत्वान्नानुपपत्तिरिति भावः। फलमहत्सनेन तत्राभावांशे साध्यीपत्वस्वमात्मकबाधस्यापि कदाचित्कस्य चित्स्वरूपस्य प्रसिद्ध्या तदभावघटितत्वमपि पक्षतायाः संभवतीति सूचितं व्याप्तिस्मरणादिनाऽर्वागनुमित्सानाशस्य तत्वेऽनुमितिरनुपपाद्यमिति साध्यपि यावद्विरहे साध्यसिद्धत्वमवतारयति· नन्विति· तत्रापि परामर्शपूर्वमनुमित्सानाशस्य तत्वेपि पुनरनुमित्सा परामर्शानंतरं तदनुत्पादांतरं त्वनुपरामर्शानंतरोत्पन्नेनेच्छाजनकज्ञानेनेच्छाजननसमकाले परामर्शस्य नाशात्तादृशेच्छा ततः कथमनुमितिरित्यत आह· ततः परामर्शोत्तरमिति· विनश्यद[illegible]नुमित्सयाऽनुमितिरनुपपाद्येति विनश्यदवस्थपाप्नुपपा

वस्था,

द्युपत्तिः स्मरणात्मक इति चाक्षुषादिपरामर्शस्यानुमितत्वांशे इष्टसाधनताप्रकारकसमूहालंबनत्वं नोपपद्यते तस्यायोग्यविशेष्यकज्ञान
जननेऽपि स्मृतिसामग्र्यां तत्र तत्तस्य तथात्वमुपेक्ष्य तन्मूलकस्याप्यवश्यकगोचरसंस्कारस्यैवानुमित्याजनकेष्टसाधनताज्ञानजनि
तसंस्कारसहकृतात्समूहालंबनस्मरणात्मकपरामर्शात्तरस्यानुस्मरणे स्मरणात्मकफलस्य सतो तथा [illegible] विद्यमानस्य परामर्शोऽपि वोध्यः
। ननु कल्पकाभावान्नैतादृशकल्पनासंभव इत्याशंकां परिहरति फलबलादिति सिसाधयिषारूपकारणं विनाऽनुमित्यात्मककार्यानु
पपत्तिबलादित्यर्थः सिषाधयिषाविरहेऽपीति मूलस्यानुमात्रैश्यादिः तेनेश्वरस्य सिषाधयिषाया अजन्यत्वेऽपि न क्षतिः इच्छारूपपक्ष
तायाश्चात्मनिष्ठमतात्सत्वे वहेतुत्वेऽस्मिन्नभिप्रायेणोक्तं नवतत्त्वाऽपि पूर्ववत्फलबलादनुमित्यंशकल्पिताया अनुमितिशक्योपपत्तिर्या तत्र तद
भावस्यानुभवसिद्धत्वेन तथा कल्पनासंभवात् पूर्वं कदापि यस्मिन् यानुमितिर्नासीत् तत्र तत्तदिष्टसाधनतायाश्च गृहीतत्वे न तद्गोचरानुभवस्य
चासंभवेन तदनुमित्यसामग्र्यास्तद्घटितत्वाच्च विषयनिष्ठफलासत्वे वा अनुमित्यापाद्यत्वाद्वाच्ये तदभिप्रायेणोक्तं स्यात्तेऽपक्षतो
पपत्तिरीधितिकृदाशंकते नवानुमि तया च सिद्ध्यनंतरमनुमित्यापत्तिरित्यर्थः । तदानीं । सिद्धिदशायां नतज्ज्ञानकत्वमिति । तद

३.१+ तीति । द्वैव । समानाधिकरण व्यधिकरण साधारणेच्छामात्रमेव । स्वानिष्ठैव अनुमान्तरसमवेतैव । तस्याः
ईश्वरेच्छायाः । पक्षतावस्थस्वादिति ।

गद०
२

वि४

थाचानुमितिजनकत्वविशिष्टेच्छात्वेनैवहेतुता कारणतावच्छेदकविशिष्टस्य प्राक्सत्वमेव फलोपधानेऽनुमिति नातिप्रसंग इति भावः । अनु
मितिजनकत्वेनजनकत्वे आत्माश्रयसत्वेपि स्फुटत्वात्तदुपेक्ष्य दूषणान्तरमाह । तद्धीति । योग्यता । स्वरूपयोग्यता । अनपायादिति । कारणताव
च्छेदकधर्मरूपयोग्यतायाः सर्वदैव सत्वादित्यर्थः तदुपधाने । तद्वैशिष्ट्यं तद्भावात् । अनुमितिवैशिष्ट्याभावात् तथाचानुमित्सा इत्यया
मि ज्ञापाः अनुमितिविशिष्टेच्छायाः प्रागसत्वात् । अनुमितेरेवानुपपत्तिः इदमुपलक्षणं अनुमित्सनंतरमनुमित्सापत्तिरपि द्रष्टव्या । नन्वनुमिति
जनकतावच्छेदकाः यावंतो धर्माः प्रत्येकं तदवच्छिन्नकूटविशिष्टत्वरूपतत्सामग्रीसमवधानमेवेच्छाविशेषणं देयं । तच्चकार्याव्यवहितप्राक्क्षण
सत्वेतिनातिप्रसंग इत्याशंकां परिहरति न तत्सामग्रीति · कारणमात्रस्येति । तथाचपरामर्शादिसत्वदशायामीदृशपक्षताविरहादेवानुमि
तिवारणसंभवात्परामर्शादीनां हेतुताविलयप्रसंग इति भावः । ननु सामग्रीसमवहितेच्छात्वेन न पक्षतायां हेतुत्वमुपेयते सामग्रीघट
कहेतूनां विशेष्यविशेषणभावे विनिगमनाविरहात्तेषां स्वतंत्रकारणत्वेनैवातिप्रसंगस्य वारितत्वात् किंतु ईश्वरेच्छामात्रापेक्ष सि
द्धिकाले पक्षताव्यवहारवारणाय पक्षपदप्रवृत्तिनिमित्तत्वमेव तादृप्येणोपपते अतो नायं दोष इत्यतो दूषणान्तरमाह शेषेति

त्य यै२

राम०
३

व

अनुमितिसामग्र्या एव पक्षतात्वसंभवेनेच्छारूपविशेष्यभागनिवेशस्य निष्प्रयोजनकत्वादित्यर्थः अत्रेष्टापत्तौ दूषणान्तरमाह तदानीमिति तदानीं परामर्शादिसमवहितसिद्धिदशायां। अनुपश्चात्स्य सामग्रीविरहे सत्त्वेनैव वक्तव्यतापातात्। सामग्रीमध्ये निवेशापातात्। तथा चैतादृ राकारणां सिषाधयिषाविरहविशिष्टसिद्ध्यभाव एव। एवं च तस्यैव पक्षतात्वमस्तु अलं कारणान्तरस्य पक्षताकुक्षौ निवेशेनेति सिद्धान्तलक्षण एव पर्यवसानमिति भावः। सिद्धान्तलक्षणे सिध्युत्तरक्षणे सिषाधयिषाधीनानुमितेरुपपादनाय सहकृतान्तं विशेषणमुपात्तं तच्चान्तरेणोपपद्यते यदि सिद्धिसिषाधयिषापरामर्शानां त्रयाणामनुमित्यव्यवहितपूर्वक्षणेऽवस्थितिः संभवति। नचैवमुपपद्यते आत्मविशेषगुणानां द्विक्षणमात्रस्थायितया त्रयाणां युगपदवस्थानासंभवात्। न च यत्रापेक्षाबुद्ध्यात्मकस्य परामर्शस्य साध्यनिश्चयस्य वा प्रथममुत्पादस्तत्रैव तृतीयक्षणे त्रयाणामवस्थानं संभवतीति वाच्यं। अपेक्षाबुद्धेः क्षणत्रयावस्थायित्वमङ्गीकुर्वाणैस्तदव्यवहितोत्तरक्षणे तदधिकरणे विशेषगुणोत्पादस्याभ्युपगमात् अन्यथा स्वसमानाधिकरणस्वानन्तरोत्पन्नविशेषगुणात्मकनाशकवशात् तस्या अपि तृतीयक्षणे विनाशापत्तेरित्याशंकापरिजिहीर्षया सिध्यात्मकसमूहालम्बनपरामर्शस्थलेतादृशविशेषणमप्रयोजनं दर्शयति पक्षतेत्यादि

न्या। अनुमित्साभावविहितोत्तरक्षणे विशिष्टपक्षप्रत्यक्षं न संभवति इच्छोत्पत्तिकाले ज्ञानानुत्पत्त्या विशेषणज्ञानघटितसामग्रीविरहात् इच्छापूर्वं प्र
णेतादृशसामग्रीसमवधाने इच्छासामग्र्यपेक्षया प्रत्यक्षसामग्र्या बलवत्त्वेन तस्या एव प्रत्यक्षसंभवादतो विशिष्टस्मरणानुसरणं। अ
नन्ताभंगाय परामर्शपूर्वोत्पन्नेच्छास्थले प्रयोजनमुक्त्वा तदनन्तरक्षणोत्पन्नेच्छास्थले तद्दर्शयति। अनुमितीतीति। पक्षे त्वनुपपद्यते। इच्छा
सामग्रीसंपत्तये· अनुमितीष्टसाधनताविषयकेति· तादृशस्मरणात्· सा अतआप्य विशिष्टपक्षस्मरणात्· पूर्वोक्तयुक्त्या चाक्षुषादिप
रामर्शस्यानुमित्साविष्टसाधनतावगाहितासंभवात् यत्र परामर्शाव्यवहितपूर्वक्षणे इष्टसाधनताज्ञानं तत्र तत्पूर्वक्षण एव फलेच्छा
संभवेन तस्याः परामर्शोत्पत्तिसमनाशात्तदुत्तरमनुमित्सायाः संभवेन इष्टसाधनताविषयकपरामर्शस्यावश्यकत्वात्स्मरणानुसरणं। अ
नन्तापरिहाराय प्रत्यक्षस्थले प्रयोजनमाह· अनुमित्सापूर्वमिति· अत्रापि पक्षे त्वनुपपन्नत्वे प्रत्यक्षात्मकधूमादिविशेषणज्ञानस्थले तज्ज
नकसन्निकर्षादितस्तदुत्तरक्षणे विशिष्टप्रत्यक्षमेव भविष्यति। नत्विच्छा। विनश्यदवस्थसन्निकर्षाद्विशेषणप्रत्यक्षानुधावने च प्रया
सगौरवमतो विशेषणस्मरणपर्यन्तानुधावने· अनुमित्सापूर्वकाले परामर्शजनकसन्निकर्षादिसत्त्वे तस्या एवानुपपत्तिरतोऽनुमि

३ लेकपरामर्श·

त्मा कालो मन्त्रेंद्रियसन्निकर्षो हि इति। महदुक्तानां तं महदुक्तांतमार्गोपस्थाप्य सिषाधयिषाविरहविशिष्टत्वं तस्याभावविशेषणत्वे सिसाधयिषादशा
यां तद्भावविशिष्टस्य सिद्ध्यभावस्यासेऽभवाप्तिः ओसत्तामसत्तां चानुमित्यनुपपत्तिरतः साधकमानाविशेषणमिति। सिषाधयिषापद
स्य सिद्धीच्छासामान्यपरत्वे परस्य स्वत्वादिप्रकारकेच्छावत्त्वात् स्वसत्ताप्रत्यक्षादिसामग्र्यां सिद्धिदशायामनुमित्यापत्तिः अनुमितिगोचरे
च्छापरत्वेपि परस्य किंचिद्गोचरं ज्ञानं जायतामितीच्छावत्वात्सिद्धिकालेऽनुमित्यापत्तिः न वानुमित्सत्तस्यापि तादृशेच्छाविषयासिद्धेस्तत्रा
नुमितिरिष्टैवेति वाच्यं। महदुक्तानुमित्सुक्षेपि वयादृशेच्छाया विषयासिद्धिस्तादृशेच्छासत्वस्य वा सिद्धिकालेऽनुमितेरानुभविकत्वात् तदुक्ते
च्छापाश्चात् तत उपस्थितपदार्थगोचरमानसज्ञाने नापि विषयासिद्ध्याऽकिंचित्करत्वादित्यतः सिषाधयिषापदार्थं व्याचष्टे। सिषाध
यिषा चेति। घटविशिष्टपर्वतविषयकानुमितिर्जायतामितीतादृशेच्छासत्वे सिद्धिसत्वे च वह्न्यनुमित्यनुत्पादात्तत्साध्यविशिष्टेति। त
त्संबंधेन तत्साध्यतावच्छेदकावच्छिन्नविशिष्टेत्यर्थः। तेन कालिकसंबंधेन वह्निविशिष्टपर्वतविषयकानुमितिर्जायतामिच्छासत्वाव
च्छिन्नविशिष्टपर्वतविषयकानुमितिर्जायतामिति तादृशेच्छासत्वेपि सिद्धिकाले संयोगादिना न वह्नित्वावच्छिन्नस्यानुमितिः वह्नि

विशिष्टमहानसविषयकानुमितिर्जायतां वह्निविशिष्टद्रव्यत्वावच्छिन्नविषयकानुमितिर्जायतामितीच्छावत्त्वात्पर्वतो वह्निमानित्यनुमित्यनु
त्पादा[illegible]त्तत्पक्षकेति तत्पक्षतावच्छेदकावच्छिन्नेत्यर्थः न च यत्किंचिद्गोचरं ज्ञानं जायतामितीच्छावत्त्वादिनाऽऽलोकवान् पर्वत इत्याद्यनुमि
मितिसामग्रीदशायां वह्निमत्पर्वतविषयकानुमितिर्जायतामितीच्छावत्त्वादपि न सिद्धिसत्त्वे वह्निविधेयकानुमितिर्जायते तत्कालीन
सिध्यमतिर्वध्या[illegible]लोकानुमितिसत्त्वे वतादृशेच्छाविषयत्वात्तद्वह्निमत्पर्वतविषयकानुमितिसिद्धिरनुक्तरूपेणापि इच्छायाः उ
त्तेजकत्वं न संभवतीति वाच्यं साध्यविशिष्टपक्षनिरूपितविलक्षणविषयिताप्रकारकत्वेनेवेच्छायाः उत्तेजकत्वोपगमात् आलोकवा
न्पर्वत इत्याद्यनुमितेर्वह्निविशिष्टनिरूपितविलक्षणविषयिताशून्यत्वेन तदुपसातादृशविषयिताप्रकारकेच्छाविषयसिध्यसंभवा
त्साध्यविशिष्टपक्षनिरूपितत्वं च साध्यावच्छिन्नपक्षनिष्ठनिरूपकताकत्वं अतो ह्रदो वह्निमानित्यादौ साध्यविशिष्टपक्षाप्र
सिद्धावपि न तादृशविषयितायास्तत्प्रकारिका[illegible]नुमित्यापाद्यासिद्धिः इत्यादिनिष्ठतादृशस्वमहतिविषयितानिरूपकत्वस्या
पि ह्रदाद्यंशे प्रकारीभूतवह्न्याद्यवच्छिन्नत्वात्तं [illegible] तत्साध्यविशिष्टतत्पक्षविषयकत्वे सनेन न तत्साध्यतावच्छेदकावच्छिन्नतत्

शि४

सर्गावच्छिन्नविधेयतानिरूपिततत्सत्तावच्छेदकावच्छिन्नोद्देश्यताकत्वपर्यंतं विवक्षितमतो वन्हिमान्पर्वतो घटवानित्याद्यनुमि
तिसामग्रीदशायां पूर्वोक्तयुक्त्या वन्हिमत्पर्वतविषयकानुमितिर्जायतामित्याकारकेच्छावत्वात्पर्वतादिपक्षकवन्ह्यादिविधेयकानुमि
त्यनुत्पादेपि न क्षतिः तादृशोद्देश्यतात्वेन च उद्देश्यता[illegible]प्रकारकत्वं विवक्षणीयं तेन केवलपर्वतत्वाद्यवच्छिन्नोद्देश्यतात्वेन तादृशो
द्देश्यताप्रकारकानुत्सायां पर्वतेऽन्यानुमितिसामग्रीसत्वे वन्हेः सिद्धिसत्वेन तत्र वन्ह्यनुमित्यापत्तिः साध्यविशिष्टपक्षविषयकत्व
प्रकारकत्वनिवेशनप्रयोजनं दर्शयति · यत्किंचिदिति · यत्किंचिद्धर्मकत्वप्रकारकत्वं निवेशेपि यत्किंचिज्ज्ञानेन जायतामित्यादीच्छावा
रणाय भवतीति यत्किंचिज्ज्ञोत्तरत्वप्रकारकेच्छानुभवेनैवेच्छापूर्वं यत्किंचिज्ज्ञोत्तरत्वानवस्थावश्यसिद्धत्वात्तादृशेच्छैव न संभवतीत्या
न गोचरेच्छायां स्वरूपसत्ताः स्वविषयसिद्धेरेव विरोधित्वात्तदुक्तं नहि ज्ञाने ज्ञाते ज्ञानेच्छा भवतीति वाच्यं · एतदुत्तरवर्त्तियत्किं
चिज्ज्ञोत्तरत्वं ज्ञानं जायतामित्याकारकेच्छाया एव विवक्षितत्वात्तेनानुमितित्वप्रकारकत्वं निवेश्यैव तथाविधेच्छायाकारत्वासं
भवे किंगुरुत्तरसाध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशेनेत्यत [illegible]

आह-१

[redacted] अनुमितित्वाप्रकारिकायामपीति· प्रत्यक्षाद्यात्मकसिद्धिदशायांपर्व
तेवन्हिर्ज्ञानंजायतामित्याद्याकारकेच्छानसंभवतितद्विषयीभूतप्रत्यक्षादिरूपसिद्धेरेवसत्वात् अतः प्रत्यक्षाद्यतिरिक्तमिति। शाब्दादिरूपसि
द्धौसत्यांप्रत्यक्षातिरिक्तंज्ञानंजायतामित्यादीच्छाया उत्पादासंभवात्प्रत्यक्षाद्यनंतरमिति· प्रत्यक्षादिरूपसिध्यनंतरमित्यर्थः। अनुमित्सु [illegible] चेति·
तथाचानुमितित्वंनिवेशयितुमशक्यमेवतादृशेच्छानामसंग्रहप्रसंगादितिभावः। इदमनुपदं स्फुटं। अनुमितित्वप्रकारकत्वनिवेशेपि
द्यदानुमितिर्जायतामित्यादीच्छाकालेसिद्धिसत्वेवन्ह्याद्यनुमितिवारणायप्रकृतसाध्यादिविषयकत्वप्रकारकत्वनिवेशनमावश्यकं।
नचप्रकृतसाध्यादिविषयिणीयाअनुमितिः तद्विषयकत्वनिवेशेनापिदर्शितेच्छावारणासंभवइतिवाच्यं· दर्शितेच्छायाअपिय
द्यद्यनुमितित्वेनवन्ह्यादिगोचरसमूहालंबनानुमितिविषयकत्वात्तेनानुमितित्वप्रकारकत्वानिवेशेअनुमितिरेवप्रत्यक्षत्वादि
नाइच्छाविषयस्तत्रानुमित्यापत्तिरितिवाच्यं· इष्टत्वात्। अनुमितौप्रत्यक्षत्वभ्रमदशायामेवतादृशेच्छायाउत्पादात्तस्याअनुमितित्वप्र
कारकेच्छासमशीलत्वात्तेनानुमितित्वप्रकारकत्वस्यानिवेशेपर्वतेवन्हेः प्रत्यक्षतः सिद्धौशाब्दसामग्र्याचसत्वांप्रत्यक्षातिरिक्तंज्ञानं

म३

गादि३

[illegible]

उ× २ व्क्षसत्वेऽनुमित्यापत्तिः तस्यापि अनुमितिविषयत्वात् न चेष्टापत्तिः
तदुत्तरं पर्वतो वन्हिमानित्यादिमानसाद्युत्पादात् विषयासिद्धेस्तादृशे

ज्ञापकतामितीच्छासत्वेऽनुमित्यापत्तिरितिवाच्यं तत्रेच्छासत्वेऽप्यनुमितित्वप्रकारकेच्छाविरहविशिष्टसमानविषयकशाब्दसामग्र्याः प्रति
बंधकत्वादेवानुमितिवारणसंभवात् तत्र पक्षसिद्धिदशायां पर्वते वन्हेरनुमानं ज्ञापकतामितीच्छायायांतु किं विह्नोचरंह्मानं ज्ञापकतामितीत्यादृशे
च्छातुल्यत्वात् तेन प्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीरूपप्रतिबंधकसत्तात्वापत्तिरितिवाच्यं प्रत्यक्षत्वादिप्रकारकेच्छाविशिष्टाया एव प्रत्यक्ष
सामग्र्या अनुमितिप्रतिबंधकत्वात् अन्यथा सिद्धिसत्वकालेपि तादृशेच्छासत्वेऽनुमित्यनुत्पादप्रसंगात् तेन चोक्तयुक्त्या वन्हिविधेय
कत्वावगाहित्वनिवेशस्यावश्यकतया वन्हिप्रकारकत्वावगाहिदर्शितेच्छावत्वानानुमितिप्रसंगः अनुमितिनिष्ठवन्हिविधेयकत्वावगाहीच्छाद
शायां च ज्ञापयेत एवानुमितिः विधेयतायाः प्रत्यक्षेऽप्रमाणिकतया तत्प्रकारकेच्छाया अनुमितः प्रत्यक्षेऽपि विषयसिद्धेरितिवाच्यं विधेयतायाः प्रत्य
क्षाव्यावृत्तत्वे तत्प्रकारिकायाः प्रत्यक्षान्यत्वप्रकारिकायाः अपि इच्छायाः प्रत्यक्षसिद्धिकाले संभवात् प्रत्यक्षान्यत्वप्रकारकेच्छापर्येतानुसर
णस्य निर्बीजत्वात् न च विधेयताप्रत्यक्षाव्यावृत्तेवं तदवगाहित्वसूचनायैव प्रदर्शितेच्छाकारे प्रत्यक्षान्यत्वोल्लेख इति वाच्यं एवमपि व ऽस्य २
ह्यमाणस्य शाब्दादिसिद्धिकालेऽशाब्दत्वाने ज्ञापकतामितीच्छावत्वेनानुमितिर्जायते न तु प्रत्यक्षसामग्रीकाले इत्यस्य संगमपि तु प्रश

६

गदा०
१३

स्यतावज्ञा[illegible]रेच्छायाः मतस्य स्वाकारेऽत्र विधेयतयाद्यवगाहित्वे मतस्य स्वत्वमयीकालेपि तद्वृत्त्यनुमितेरौचित्यात् तदनवगाहित्वे सिद्धावप्यनुत्ते
जकत्वात्। [illegible]। अनुमितित्वमतस्य सामान्यत्वात्तत्वादिप्रकारकेच्छानामनुमितिविषयपक्षेच्छात्वेनैवानुगमः पर्वते वह्नेरनुमितिज्ञाने जायतामि
त्याकारकेच्छाकालेऽसत्त्वात् सिद्धौ तथाविधोपनीतभानसामग्र्या वानुमितेर्वारणप्रतथाविधेच्छाव्यक्तीनां तत्र व्यक्तित्वेन प्रतिबंधकताकल्
पत इति न दोषः न च तासां तद्व्यक्तित्वेनानंतप्रतिबंधकताकल्पनामपेक्षानुमितित्वादिरूपप्रकारविशेषमन्तर्भाव्यैवानुमित्सानामुत्तेज
कत्वमुचितमिति वाच्यं तथा सति पर्वते वह्नेरनुमितिज्ञाने जायतामितीच्छाकाले तथाविधोपनीतभानविरोधिघटाद्यनुमितौ च्छाविशिष्टतत्सा
मग्रीसत्त्वे सिद्धौ सत्वाद्यनुमित्सापपत्तेस्तादृशेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन सिद्धौ उत्तेजकत्वापातात्तदभावसहकृतस्य मिथो विशेष्यवि
शेषणभावे विनिगमनाविरहेण सिद्धिप्रतिबंधकतानंतप्रसंगात् ननु साध्यविधेयकत्वावच्छिन्नपक्षोद्देश्यकत्वप्रकारकेच्छायाः उपादाने
० पक्षोद्देश्यकत्वावच्छिन्नसाध्यविधेयकत्वप्रकारकेच्छायाः असंग्रहः एवं विषयानुपरक्तानुमितिविषयिण्याः अनुमितिर्जायतामितीच्छा
याः निरुक्तरूपेणासंग्रहः न च साऽसंग्राह्येवेत्यासि[illegible] साध्यांतरानुमितिसामग्र्यामसत्त्वात्तद्वृत्ताद्यपि सिद्धस्य प्रकृतसाध्यस्यानुमितेस्तादि

गदा०
१३

च्छाविषयसिध्यनुरोधेनावश्यकत्वादित्सतत्राह· यादृशयादृशेति· अस्य संसाधिज्ञोपस्थितिं चिज्ञोचरंत्वानेनापत्तामितीच्छासत्वेऽनुमित्सुत्पादतासं
चानुत्तेजकत्वात् सिसौसत्वमिति। तत्तदिच्छाभावसमुदायस्येति। साध्यविशेषविशिष्टपक्षविशेषाद्यवगाहित्वप्रकारकेच्छानां तत्तद्वगा
हित्वप्रकारकानुमितिगोचरेच्छात्वेनानुगमय्य एकैकाभावा ~~[illegible]~~।
~~[illegible]~~ निवेश्यन्ते। तथाविधानानामनुमितिर्नापत्तां मस्त्वामत्तानेनापत्तामित्साकारकेच्छा
५ सिद्धिदशायाम् नां तदुपपद्यव्यक्तिसत्वे ऽनुमितिस्तत्तद्व्यक्तित्वावच्छिन्नाभावा एव निवेशनीयाः अन्यथाऽतिप्रसंगात् तत्कालीनसिद्धिभेदा एव वा। एतेन तत्का
लीनसंयोगविभागादिव्यक्तिविशेषाभावनिवेशमादाय विनिगमनाविरहो निरस्तः सामानाधिकरण्यसंबन्धेन तदिच्छाभाववैशिष्ट्य
निवेशापेक्षया तत्तत्सिद्धिभेदानां विशेषणताविशेषसंबन्धेनैव वैशिष्ट्यनिवेशप्रतियोगितावच्छेदकसंबन्धानिवेशेन लाघवात्। सिध्युत्त
रं तथाविधेच्छोत्पत्तिकालेऽनुमित्यापत्तिस्तु इच्छासामग्र्याऽनुमितिविरोधित्वादेव न संभवतीति ध्येयं। इदं त्ववधेयं। तादृशेच्छाभावसमुदा
यस्यानन्तत्वसमुदायत्वेन निवेशः समुदायत्वस्य दुर्वचत्वात् न च तावदभावमात्रविषयकधीविषयत्वं तत्। तावत्वस्य दुर्वचत्वात् तावदभावेवि

गामनावि २

गदा॰
१४

षपकत्वं तत्तद्भावविषयत्वेन निवेशे तदपेक्षया लाघवेन तत्तद्भावानां तत्तद्भाववत्त्वेन सिद्धावेव निवेशेपि तत्सूचितत्वात् तत्तद्भावानां
मिथो विशेषणविशेष्यभावानापन्नानां निवेशोऽवच्छेदकभेदात् – प्रतिबंधकताभेद इति चेत् एकविशिष्टापरत्वेनैवाभावानां निवेशनीयत्वात् न तत्र
च विशेष्यविशेषणभावे विनिरहेपि न क्षतिः गत्यंतराभावात् तत्तद्भावमात्रविषयकधीविषयत्वेन निवेशेपि ह्यनेन तत्तद्भावविषयितानामेक
विशिष्टापरत्वेनैव निवेशनीयतया विशेष्यविशेषणभावेपि विनिगमनाविरहस्यावश्यकत्वादिति ।। इच्छायाश्चाननुगमेपि । कैरूपेणास्वी
सामिच्छानामनुपादानासंभवेपि न क्षतिः । न सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यानुमितिहेतुतानुपपत्तिः तावद्भावविशिष्टसि
अभावस्यानुगतत्वादिति भावः । अत्रेदं चिंत्यते वह्निविशिष्टपर्वतमहानसोभयानुमितिजनकताभिसाकारिकेच्छानामपि तत्साध्यविशिष्टत
त्पक्षकत्वप्रकारकतया पर्वते वह्नेः सिद्धिकालेऽपि महानसपक्षकानुमितिसामग्र्यामसत्त्वात्तादृशेच्छावत्सासत्वे तु वह्न्यनुमित्यापत्तिः अनु
मित्यंशे तत्साध्यविशिष्टतत्पक्षविषयकत्वान्यकिंचिद्विषयकत्वाप्रकारकत्वविशेषणस्येच्छायां निवेशे वह्निविशिष्टपर्वतं महानस
सैवानुमिनुयामित्यादिसमूहालंबनेच्छायाः संग्रहमसंङ्गः वह्निविशिष्टपर्वतावगाहिनीमहानसविषयकानुमितिभिन्नानुमितिर्जाय

अ ङ्ग

१४

राम॰
१४

५

तामित्याकारकेच्छावत्वादुपदर्शितं न स्यात्तेऽव्याप्तिप्रसंगस्याशक्यवारणतां चेतीच्छाविषयतावच्छेदकतापर्याप्तिनिवेशनमावश्यकं
यावद्वह्निविशिष्टपर्वतानुमितिर्भवत्वित्यादीच्छापास्तं तत्साध्यविशिष्टतत्पक्षकानुमितित्वपर्याप्तविषयतावच्छेदकताकेच्छात्वेनैवोत्तेज
कत्वं पर्यवसितं तच्चानुमितित्वानंतर्भावेनादृशेच्छापास्तं तत्साध्यविशिष्टतत्पक्षविषयकत्वपरिसमाप्तविषयतावच्छेदकताकभावे
नाशक्यसंग्रहत्वात्तदेवं चानुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुमितिविषयकत्वरूपेण संग्रहाभिधानमसंगतं न च
तत्कल्पस्य परित्यज्यैव पादृशपादृशत्वाभिधाने इदानीमनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानां पृथक्कृत्याभावनिवेशनमेवा
भिप्रेतमिति वाच्यं पक्षांतःसंकोराद्यभावात्तनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुगमस्यैव संभवतीत्यत आह तत्साध्यविशि
ष्टतत्पक्षकानुमितित्वपर्याप्तावच्छेदकताकत्वं तादृशधर्मघटकपरिसमाप्तावच्छेदकताकत्वं तत्साध्यविशिष्टतत्पक्षविषयकत्वानुमितित्व
निष्ठाऽवच्छेदकताभिन्नावच्छेदकतानिरूपकविषयताकत्वमेव पर्यवसितं एवं च तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रत्यक्षान्यज्ञान
त्वनिष्ठावच्छेदकताभिन्नावच्छेदकतानिरूपकविषयताकेच्छात्वादिना प्रत्यक्षान्यज्ञानत्वप्रकारकेच्छानां पृथगुत्तेजकतापेक्षयानि

चक्कवा ४

ता
मि

अथा ४

दि १

हृत्ल धर्मघटकानुमितित्वनिष्ठावच्छेदकताभिन्नावच्छेदकतायामेवमत्र स्थान्यज्ञानत्वादिनिष्ठावच्छेदकताभिन्नत्वनिवेशनमनुचितं तथा घटा
न्तरस्य च तादृशरूपेणोरस्य स्थान्यज्ञानत्वादिप्रकारकेच्छानामपि संग्रहः स्मेमवत्तिन च वह्निविशिष्टपर्वतविषयकं ज्ञायतामित्येतादृशेच्छा
याः सिद्ध्यधीनसंस्कारोत्पत्त्यैव चरितार्थायाः वारणाय विषयतायामनुमितित्वावच्छिन्नत्वविशेषणस्यावश्यकतया न तत्संग्रह इति वाच्यं
समवायेन किंचिदवच्छिन्नत्वनिवेशेप्येतादृशेच्छावारणासंभवादिति चेत् पक्षांशे साध्यावगाहित्वेनानुमितिविषयकेच्छानां उक्तरूप
समशीलरूपान्तरेणोत्तेजकतायाः तादृशावच्छेदकतायामेव पक्षांशे तादृशसाध्यावगाहित्वीयावच्छेदकताभिन्नत्वमपि निवेश्यतंजा
वतैव तत्संग्रहस्यापि संभवादिच्छायाः अननुगमाभिधानासंगतेः न च विषयतायां साध्यविशिष्टपक्षावगाहित्वावच्छिन्नत्वनिवेशन
मावश्यकं अन्यथान्यानुमितिसामग्रीसमवहितानामनुमितिजनकतामित्साध्याकारकविषयविशेषानुपरक्तानुमितीच्छानां वारणासं
भवादिति अन्यानुमितिसामग्र्यसमवहिततादृशे[redacted]च्छानां तत्तद्व्यक्तित्वेनैवउत्तेजकत्वस्योपगंत
व्यतया उत्तेजकाननुगमाभिधानसंगतिरिति वाच्यं तादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबंधकतयैव अनुमितिप्रसंगवारणासंभवेन तासां वारणानौचित्यात्तथा सति [illegible]

[illegible]

[illegible]

निवेश्य

शिष्टपक्षावगाहित्वावच्छिन्नत्वमधिकमनुमितिनिष्ठविषयतायांदृशि[redacted]तसामग्र्यसमवहिततया विधेच्छानां तत्तद्व्यक्तितेनोत्ते
जकताकत्वेन तत्तदिच्छाभावानां विशेष्यविशेषणभावे विनिगमनाविरहेणगौरवप्रसंगात्स्वमानुमितिसामग्रीकालीनतादृशेच्छानं
प्रतिबंधकत्वे तत्कालीनतत्तदात्मवायुसंयोगादिव्यक्तीनां विनिगमनाविरहेणप्रतिबंधकताप्रसंगवत्तादृशसामग्र्यभावकालीनतथा
विधेच्छानां उत्तेजकतामतेपि विनिगमनाविरहेण तत्तदिच्छाकालीनसंयोगविशेषाणां उत्तेजकताप्रसंगस्य दुर्वारत्वात् अथवो
क्तानुगतरूपेणोत्तेजकीभूतायां इच्छायां अनुमितिर्जायतामित्याकारकानुमितिसामग्रीसमवहितेच्छाव्यक्तीनां भेदाएव निवेश
नीयाः न तु तासामग्र्यनुमितिप्रतिबंधकत्वमिति तत्तदिच्छाभेदनिवेशस्थले तत्तत्कालीनवायुसंयोगभेदनिवेशे नोपपत्तिः इच्छायां तद्भेद
स्यावावृत्तेतात्तत्तत्संयोगाभावानां वैशिष्ट्यस्य निवेशोचतादृशवैशिष्ट्यस्य सामानाधिकरण्यरूपतयासाक्षात्संबंधेनेच्छाभेदनिवे
शेलाघवस्यैव विनिगमकत्वात् अत्राहुः उक्तसकलेच्छानां निरुक्तरूपेणानुगमेपि एतत्क्षणानंतरक्षणे अनुमितिर्जायतामित्याकार
केच्छानामेवनिरुक्तरूपेणसंग्रहात्तत्तद्व्यक्तित्वेन पृथगभावानां निवेशनीयाः तादृशक्षणवृत्तित्वावच्छेदकतामेदं उक्तावच्छेदकतायां

निवेशपतन्नसंग्रहे कालान्तरेपि तथाविधेछावत्वादनुमित्यापत्तेः कालान्तरेऽनुमित्यप्रसाच तादृशानुमित्सापाविषयसिद्धेछोपत्तयोगात्
इत्यननुगमाभिधानसंगतिः तत्कालान्तरीणतादृशेछानां तत्तद्व्यक्तित्वेन प्रतिबंधकतया तादृशेछावत्वादनुमित्यापत्तिवारणसंभव इति वा
च्यं उपदर्शितैकैकधर्मप्रकारकैकैकानुमित्साव्यक्तीनां तत्तद्व्यक्तित्वेनोत्तेजकतापेक्षया तत्समानप्रकारककालान्तरीणबहुतरेछा
नां तत्तद्व्यक्तित्वेन प्रतिबंधकत्वे गौरवात् तेनैवमपि प्राथमिकस्य साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वविशेषणाभिधानस्य संग
तिर्दुर्वारैवेति वाच्यं अनुमितिनिष्ठविषयितायां साध्यविशिष्टपक्षविषयकत्वाद्यन्यप्रकारानवछिन्नत्वनिवेश एव तत्तात्पर्यात् वस्तुतः सा
ध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशनमप्यावश्यकं अन्यथा किंचित्त्वानं ज्ञापतां पक्षिंत्गोचरं ज्ञापत्तौ इत्यादीछावारणसंभवात्
तत्संग्रहे तादृशीनां सर्वासामिछानां तत्तद्व्यक्तित्वेनैव प्रतिबंधकत्वे गौरवात् अनुमितिं ज्ञापतां इत्यादीनां च पृथगनुमितित्वादिपर्या
प्तविषयतावछेदकताकेछात्वेनैवोत्तेजकता अस्मानुमितिसामग्रीसमं वहि तादृशेछानां च तत्तद्व्यक्तित्वेन प्रतिबंधकत्वमेवेति सं
दर्भसंगतं। ननु धूमेन पर्वतं वन्हिमनुमिनुयामित्याकारिकेछावत्वाऽप्रसक्तिः गकानुमित्यसमानतत्साधारणरूपेणैव सिषाधयिषाणां

त

चि

ग्र स्मत

सिद्धौ उक्तेनकतायाः आवश्यकत्वात्तत्सत्त्वे सिद्धिकाले असत्यपि धूमपरामर्शे आलोकादिपरामर्शादनुमित्यापत्तिः पक्षतायाः अक्षतत्वादित्यत
आह धूमेनेति । भिन्नलिंगकेच्छासत्त्वे सिद्धिदशामात्र एव यदि नानुमितिस्तदा तादृशेच्छायाः प्रतिबंधकत्वेन संभवतीत्यत आह अन्यानामपि सिद्धा
विति । तत्रानुमितेः संदिग्धत्वापरीति । तदिति तल्लिंगकानुमिताविति शेषः अन्यथाचेति । तदन्यमात्रलिंगकत्वप्रकारकसिद्धीच्छेत्यर्थः
। धूमलिंगकानुमितिरालोकलिंगकानुमितिश्च जायतामित्याकारकसमूहालंबनेच्छाकाले आलोकादिपरामर्शादनुमित्युपपत्त
ये भावेति । तदन्यमात्रलिंगकत्वप्रकारकत्वं च तत्तल्लिंगकत्वाप्रकारकत्वे सति किंचिल्लिंगकत्वप्रकारकत्वं । अतः प्रमेयसामान्यलिंगक
स्य तत्तदन्याप्रसिद्धावपि न दोषः । तल्लिंगकत्वाप्रकारकत्वं च तल्लिंगकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकतावच्छि
न्नानुमितिनिष्ठविशेष्यताकान्यत्वं अतः आलोकेनेंधनं धूमेन वह्निमनुमिनुयामित्यादीच्छादशायामालोकादिलिंगकवह्न्याद्यनुमि
तेर्नोपपत्तिः आलोकलिंगकत्वप्रकारताशरीरे च वास्तवालोकादिप्रकारतानं निवेशनीया किंत्वालोकत्वाद्यवच्छिन्नप्रकारतैवान्यथा
लोकत्वादिना धूमत्वादिना च धूमालोकादिकमवगाहमानयोरिच्छयोरालोकलिंगकानुमित्यादौ प्रतिबंधकत्वं तदभाववयोरापत्तेः इत्ये

इष्टसिद्धि

मि

अ३

णानुमित्युपमित्यादीच्छापात्रालोकादिलिंगकानुमित्सविरोधित्वोपपत्तये आलोकत्वाद्यवच्छिन्नत्वस्थले आलोकाद्यवृत्तित्वेनाज्ञायमानधर्मा
वच्छिन्नत्वमेव निवेश्यं इमतादेरालोकत्वादिविरुद्धत्वधर्मदर्शनपांतादृशेच्छापाविरोधित्वोपपादनायालोकत्वादेरालोकाद्यवृत्तित्वज्ञानरूपस्य का
लीनापात्रालोकेनानुमित्युपमित्सादीच्छापा विरोधित्वोपपत्तये च वास्तवालोकादिवृत्तित्वस्य तेन रूपेणाज्ञायमानत्वस्य चोपेक्षणं धूमत्वा
देरालोकाद्यवृत्ति त्वज्ञानदशायामेव तल्लिंगकानुमित्सापात्रालोकलिंगकानुमितिविरोधित्वेनात्मदा [illegible] क इत्यनालोक
इत्यादिज्ञानस्वकालीनानामालोकोऽयमित्यादिज्ञानकालीनानां वेच्छानां तत्तद्व्यक्ति त्वेन भेदकूटस्यैव सत्वात्तंत्रेणप्रतिबंधकता
वच्छेदकेऽनुप्रवेशनीयः तेनोक्तकल्पे कालान्तरीणपुरुषान्तरीणज्ञानवारणाय स्वसमानकालीनत्वस्वसामानाधिकरण्ययोर्द्वो
नविशेषणताध्रौव्येसत्वपदेन फलीभूतानुमित्सूपादाने यादृशयादृशानुमितीच्छायां क्वचिदपि धर्मेनालोकाद्यवृत्तित्वज्ञानं प्रसिध्य
ति तत्र स्वसमानाधिकरण स्वसमानकालीनालोकत्वादिविरुद्धत्वज्ञानाविषयधर्मवल्लिंगकत्वप्रकारकानुमित्साभिन्नानुमि र
त्साभावरूपकारणाप्रसिद्धिः स्वत्वाननुगमेन कार्यकारणभावस्य तत्तदनुमितिव्यक्तिविश्रामस्य भेदप्रतियोग्यनुमित्सोपादाने चा

लोकेन द्रव्येणानुमिनुयामित्याद्याकारकयादृशेच्छासमानाधिकरणसमानकालीनज्ञानाप्रसिद्धिः तादृशेच्छायाः तथाविधभि
न्नत्वेनालोकलिंगकानुमितिप्रतिबंधकत्वापत्तेरितिपरास्तं आलोको द्रव्यमित्यादिज्ञानविशिष्टत्वेनालोको न द्रव्यमित्यादिज्ञानविरहा
विशिष्टत्वेनैव वा द्रव्यत्वादिमल्लिंगकत्वप्रकारकेच्छायाः अनुगमय्य यद्वा तादृशप्रतिबंधकतावच्छेदककोटौ निवेशनीयाः भेदस्य
कालिकाव्याप्यवृत्तितापगमात् तादृशज्ञानस्य स्वकालीनानां द्रव्येणानुमिनुयामित्यादीच्छानां विशिष्टभिन्नतया प्रतिबंधकत्वोपप
त्तिः सामानाधिकरण्यसंबंधेन वैशिष्ट्यनिवेशात् पुरुषान्तरीयज्ञानमादाय न दोषः। द्रव्यत्वावच्छिन्नेनानुमिनुयामित्याद्याकारिका
नां द्रव्यत्वांशे लिंगतावच्छेदकतावगाहीच्छानां तु न द्रव्यत्वादिमद्विषयकपरामर्शजन्यत्वरूपद्रव्यत्वादिमल्लिंगकत्वप्रकारकत्वं वि
षयतापामेव तत्र द्रव्यत्वाद्यवच्छिन्नत्वभानात् लिंगांशे द्रव्यत्ववत्त्वानवगाहनात् अतस्तथाविधेच्छानामालोकत्वाद्यवच्छिन्नलिंग
कानुमितिविरोधित्वमक्षतमेवालोकत्वाद्यवच्छिन्नेनानुमिनुयामित्यादीच्छानां आलोकत्वावच्छिन्नलिंगकानुमितिविरोधित्वोप
पत्तये चालोकत्ववल्लिंगकत्वाद्यप्रकारकत्ववदालोकत्वाद्यवच्छिन्नलिंगकत्वाद्यप्रकारकत्वमपि आलोकत्वाद्यवच्छिन्नलिंगका

आ २

तौ २ गाव

~~नुमि २~~

नुमितिप्रतिबंधकतायां निवेशनीयं पर्वते वह्निमनुमिनुयामित्याकारकलिंगविशेषजन्यत्वानवगाहीच्छानामविरोधित्वोपप
त्तये किंचिल्लिंगकत्वप्रकारत्वनिवेशनं तदर्थः किंचिल्लिंगकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकतावच्छि
न्नविशेष्यताकत्वं अतो धूमेनेंधनमनु[illegible]मिनुयामित्याकारकेच्छानां नालोकादिलिंगकवह्न्याद्यनुमितिविरोधित्वं। इदमत्रा
वधेयं। आलोकलिंगिकासति धूमलिंगिकानुमितिर्जायतामित्याकारकेच्छाकाले केवलालोकादिलिंगकपरामर्शादनुमितिर्न
जायते तथाविधानुमितेस्तादृशेच्छाया अविषयत्वात् उभयादिलिंगकानुमितेरेव तद्विषयत्वात् एवं धूमलिंगकवह्न्यनुमिति
रालोकलिंगकवह्निघटोभयानुमितिश्च जायतामितीच्छाकाले घटाद्यनुमितिसामग्रीसत्त्वमालोकपरामर्शाद्वह्न्यनुमिति
र्नं जायते घटाद्यविषयकानुमितेस्तस्यास्तादृशेच्छाविषयासिद्धेरतस्तथाविधेच्छानां तत्र तत्र प्रतिबंधकतानिर्वाहाय तल्लिंगक
त्वतत्साध्यविशिष्टतत्पक्षविषयकत्वानुमितित्वादिप्रकारताभिन्नप्रकारतानिरूपितविशेष्यताशून्यत्वमेव तल्लिंगकत्वाप्रका
रकत्वे सनेन विवक्षणीयं उक्तस्थले चालोकलिंगकवह्न्यनुमितित्वादिप्रकारतानिरूपितविशेष्यता दृशप्रकारतातिरिक्त

ता

विषय

तिरि

पि

धूमलिंगकत्वादिप्रकारतानिरूपितैव समूहालंबनस्यैव प्रकारताभेदेन विशेष्यताभेदात् अन्यथा समूहालंबनतस्तादृशेच्छायां वैल
क्षण्यानुपपत्तिः तथा च तादृशेच्छानां तथाविधप्रकारतानिरूपितविशेष्यताशून्यत्वेन प्रतिबंधकत्वनिर्वाहः आलोकेनानुमितिर्जा
यतां धूमेन च पर्वते वह्निमनुमिनुयामित्याकारकसमूहालंबनेच्छानां तादृशविशेष्यताशून्यत्वविरहेपि आलोकलिंगकान्यानुमि
तिसामग्रीकालीनतथाविधेच्छानां तद्व्यक्तित्वेनैव प्रतिबंधकत्वोपगमात्तदानीमालोकलिंगकवह्न्याद्यनुमित्यापत्तिः पर्वते व
ह्निमनुमिनुयां धूमेन च पर्वते वह्निमनुमिनुयामित्याकारकसमूहालंबनेच्छायाः प्रामाणिकत्वेन तत्रालोकपरामर्शादनुमितिर्भवत्येव
एवं च लिंगविशेषजन्यत्वानवगाहीच्छानां विशेषणदलेनैव प्रतिबंधकत्ववारणं धूमेन घटमनुमिनुयामित्यादीच्छावारणायैव विशे
ष्यदलप्रयोजनं तदर्थं च न किंचिल्लिंगकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नविशेष्यताकत्वं तथा
सति धूमेनानुमिनुयामित्याद्याकारकविषयविशेषानुपरक्तानुमितीच्छानामसंग्रहापत्तेः किंतु किंचिल्लिंगकत्वतत्साध्यविशिष्ट
तत्पक्षविषयकत्वानुमितित्वादिप्रकारताभिन्नप्रकारतानिरूपितविशेष्यताकत्वमेव धूमेन घटमनु[illegible]मिनुयामितीच्छावज्र

४ एवं धूमेनानुमिनुयामित्याकारकविषयविशेषानुपरक्तानुमितीच्छानां प्रतिबन्धकतानिर्वाहाय यत्किञ्चिल्लिङ्गकत्वतत्साध्यविशिष्ट
तत्पक्षविषयकत्वानुमितित्वादिप्रकारताभिन्नप्रकारतानिरूपितविशेष्यताकत्वं विशेष्यदलेन विवक्षणीयम्. इति पाठान्तरसमाप्तः १

मिनु २ पि ३ अ १

मेनंवन्हिंघटोमयमनुमिमीत्यादीच्छानामप्यालोकलिंगकवन्ह्याद्यनुमित्साविरोधित्वमिष्टमेव सिद्धौतादृशेच्छायानुत्तेजकतयासि
द्धिकालेतादृशेच्छावत्वादसत्वामालोकलिंगकानुमितीच्छायांनतादृशानुमितिरितिरिक्तृ।एकलिंगकेच्छाकालीनोभयलिंगकपराम
र्शजन्यानुमितौव्यभिचारवारणायकारश्चपुनरग्रेमदर्शयिष्यते· ननुस्वविषयसजातीयज्ञानेच्छायाविरोधित्वमदृष्टचरमित्यतआह·
कामिनीजिज्ञासादिवदिति।यथाकामिनीजिज्ञासाघटादिविषयकचाक्षुषप्रतिबंधिकातथेत्यर्थः।एवञ्चप्रतिबंधिकेति·प्रस
क्तासमवधानदशायामनुमित्सानुसारमपोज्झिकेत्यर्थः तथाचोक्तस्थलेपक्षतासत्वेऽपितिविरहात्तदिष्टमेवेतिभावः ननुकामिनीजि
ज्ञासास्थलेकामिनीभिन्नघटादिविषयकज्ञानानुत्पादस्यसर्वानुभवसिद्धतयातत्रतस्याःप्रतिबंधकत्वमस्तामिच्छासत्वेधूमादि
लिंगकानुमितीच्छादशायामालोकलिंगकवन्ह्यनुमित्सनुसारस्तत्रानुभविकः तथाप्रतितुल्ययुक्त्याघटाद्यनुमित्साप्रत्यक्षादि
गोचरेच्छादशायामपितदनुत्पादस्यतथात्वप्रसक्तेः नह्यत्रैकमपिविशेषमीक्षामहे इत्यभिसंधायोक्तातिवारणायकस्यान्तरमनुस
रति।पदित्वेति।तथाचान्यालिंगकानुमितीच्छायाःप्रतिबंधकत्वमसंभावितमेवेतिभावः तत्वेति।अन्यलिंगकानुमितीच्छास्थले इत्य

पि ५

र्थः तल्लिंगकानुमितीच्छा। तल्लिंगकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वाद्यवच्छिन्नविशेष्यता
केच्छा। वाच्या-सिषाधयिषापदेन विवक्षणीयेत्यर्थः नन्वेवं लिंगविशेषानुपरक्तानुमितीच्छाकाले सिद्धौ सत्यामनुमित्यनुपपत्तिरित्यत
आह-तदन्यमात्रेति। धूमेनालोकेन चानुमिनुयामित्यादिसमूहालंबनेच्छाकाले आलोकादिलिंगकानुमित्युपपत्तये मात्रेति। तथा च
तल्लिंगकतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वाप्रकारिका सती या किंचिल्लिंगकतत्साध्यविशिष्टतत्पक्षविषयकानुमिति
त्वादिप्रकारिकेच्छा तदन्यतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारिकेच्छेत्यर्थः। लिंगविशेषोपरक्तानुमितीच्छासं
ग्रहाय सत्यंत्यालोकेनेंधनमनुमिनुयां धूमेन च वन्हिमनुमिनुयामित्याकारकेच्छावेदालोकलिंगकवन्ह्यनुमित्यापत्तिवारणा ला ४
पतत्साध्यादिनिवेशः। लिंगविशेषानुपरक्तानुमितीच्छाकाले पर्वते वन्हिमनुमिनुयां धूमेनेंधनमनुमिनुयामित्याकारकसमू
हालंबनेच्छाकाले च आलोकादिलिंगकानुमित्युपपत्तये तद्विशेष्यत्वे। यत्किंचिज्ज्ञो चरंहानेजापत्ताग्मेत्यादीच्छावारणाय चर
मदलं। पयप्यालोकधूमोभयलिंगकवन्हिविशिष्टपर्वतविषयकानुमितिर्जायतामालोकेन वन्हिघटोभयविशिष्टपक्षविष

पकानुमितिर्धूमेन वन्हिविशिष्टपर्वतविषयकानुमितिर्जायतामित्यादीच्छावारणाय तल्लिंगकत्वतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारताभिन्नप्रकारतानिरूपितविशेष्यताकान्यत्वमेव सत्वेन देहेन विवक्षणीयं तथा च लिंगविशेषानुपरक्तानुमितीच्छानां तादृशविशेष्यताकान्यत्वविरहात् किं चिल्लिंगकत्वादिप्रकारकत्वनिवेशनमफलमेवेति तथाविधविशेष्यताशालित्वेनैवेच्छाया उत्तेजकत्वमुचितं तथापि तादृशविशेष्यताशालीच्छाया मेवत्र द्रव्यमात्रेत्यादि ग्रंथतात्पर्यं न्यासंगतिः शेषं पूर्वोक्तदिशावसेयं धूमालोकोभयलिंगकानुमितौ च धूमलिंगकत्वालोकलिंगकत्वतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारताभिन्नप्रकारतानिरूपितविशेष्यताकेच्छात्वेन स्वातन्त्र्येणोत्तेजकत्वं । तेनोभयलिंगकानुमितीच्छादशायामुभयलिंगकपरामर्शादनुमित्युपपत्तिः । धूमालोकाभ्यामग्निरनुमिनुयामित्याविषयकसमूहालंबनपरामर्शजन्यानुमितौ धूमादिलिंगकानुमितीच्छाविरहविशिष्टसिद्ध्यभावस्य हेतुतायां व्यभिचारस्य दुर्वारत्वात्तादृशानुमितावपि धूमादिलिंगकपरामर्शजन्यत्वरूपधूमलिंगकत्वसाक्षतत्वात्तत्र च यत्र धूमलिंगकानुमितीच्छाया उत्तेजकता तत्रालोकादिलिंगकानुमितीच्छानामपि तल्लिंगकपरामर्शविशिष्टानामु

५४ नन्वेवं धूमालोकादिलिङ्गकानुमितिसाधारणैकपक्षताया असम्भवात् तत्तदिच्छापत्तिमाह- लिङ्गविशेषेणापीति, लिङ्गभेदेनापि पक्षत्वं भिन्नमेवेत्यर्थः आद्ये, साध्यादिभेदसमुदायघटकः तत्पदं व्यर्थम् अदृष्टान्तार्थम्। तथा च साध्यादिभेदेनेव लिङ्गभेदेनापि पक्षताभेदो न क्षतिरिति भावः। नन्वेवं लिङ्गभेदेन पक्षताया अननुगमात् तस्या व्यभिचारेणानुमितिकारणतत्कार्यतासम्भवः नन्वेतत्र तत्साध्यकत्वादेव तत्तल्लिङ्गकत्वस्यापि कार्यतावच्छेदके निवेशान्न व्यभिचार इति वाच्यम्। तावताप्यालोकलिङ्गकानुमितीच्छाधीन धूमालोकोभयादिविषयकसमूहालम्बनपरामर्शजन्यानुमितौ धूमादिलिङ्गकानुमितीच्छाविरहविशिष्टसिद्ध्यभावव्यभिचारस्य दुर्वारत्वात् — इति सप्तमीबीजपाठान्तरम् ५४

[illegible]
[illegible]

तेजनकत्वोपगमाच्चोक्तस्थले व्यभिचार इति वाच्यं तथा सति तत्र धूमलिंगकेच्छायामपि धूमलिंगकपरामर्शविशिष्टाया एवोक्तजनक
त्वौचित्यात् सर्वसाधारणोकपक्षताया एव सुवचनतया लिंगविशेषेणापीति यथासंगतेरिति चेन्न· धूमलिंगकेच्छाविरहविशिष्टसिद्धि
विशिष्टान्यानुमितित्वमेव तादृशसिध्यभाववज्जन्यतावच्छेदकं तादृशसिद्धिविशिष्टत्वं च स्वसामानाधिकरण्यावच्छिन्नस्वाव्यवहितो
त्तरोत्पत्तिकत्वसंबंधेनुक्तसमूहालंबनस्थलीयानुमितिस्तु तथाविधसिद्धिविशिष्टैवेति न तत्र व्यभिचारः सिद्धिकालेऽसत्वे तल्लि
गकसिद्धावपि पक्षतायां उक्तस्थले इव न धूमपरामर्शादनुमित्यापत्तिः धूमादिलिंगकेच्छाविरहविशिष्टसिद्ध्यभावघटितस्यैव धूमा
दिपरामर्शघटितकारणस्तोमस्य कार्योत्पत्तिप्रयोजकत्वोपगमात् समूहालंबनस्थले आलोकादिपरामर्शघटितसामग्रीजन्यव
कार्योत्पत्तिनिर्वाहात् स्वाव्यवहितोत्तरत्वं च स्वतृतीयक्षणसाधारणं स्वध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधि
करणत्वरूपं वाच्यं· अन्यथा यत्र क्रमेण सिद्ध्यात्मकधूमालोकोभयलिंगकपरामर्शधूमलिंगकेच्छानुमितयस्तत्रानुमितेस्स्वाधि
करणस्यालोकलिंगकेच्छाविरहविशिष्टसिद्ध्यधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणत्वेन तदुत्पत्तिकानुमितेरुक्त

उधिकरणकालध्वंसा

गदा॰
२२

मित्युपोऽप्यालोकेनानुमिनुयामित्यादिसकलेच्छासाधारणरूपेणैव सिषाधयिषायां सिद्ध्यनुकूलेच्छात्वं न चाच धूमालोकादिलिंगक
निखिलानुमितिसाधारण्येकैव पक्षतोक्तस्थलेऽतिप्रसंगभंगाय च प्रतिबंधकांतरमेव कल्प्यत इत्याशयेनाप्याह॰ तल्लिंगके।
ति॰ अस्य सत्यां सिद्धावन्यलिंगकानुमितीच्छासत्त्वेऽनुमित्युपपत्तये सिद्धिकालीनेति॰ सामानाधिकरण्यसंबंधेन सिद्धिविशिष्टेत्यर्थः। समूहाल
वनेच्छाकाले सिद्धिसत्त्वेऽनुमित्युपपत्तये तल्लिंगकानुमितीच्छाविरहविशिष्टेति तल्लिंगकत्वातादिप्रकारतान्यप्रकारतानिरूपितविशे
ष्यताकेच्छाविरहविशिष्टेत्यर्थः तेन धूमालोकोभयलिंगकवह्न्यनुमितिर्जायतामित्याद्याकारकेच्छावत्त्वा[illegible]धिकाले न केवलालो
कलिंगकानुमितिप्रसंगः न वाऽलोकेन वह्निघटोभयानुमितिर्धूमेन वह्न्यनुमितिर्जायतामित्येतादृशेच्छाकाले सिद्धिसत्त्वे केवलालो
कादिलिंगकपरामर्शात् केवलवह्न्याद्यनुमित्यापत्तिः पर्याप्तितादृशप्रकारतानिरूपितविशेष्यताकत्वस्येच्छाविशेषणत्वोपग न्य
म एव समूहालंबनेच्छास्थलेऽनुमितिरुपपादयितुं शक्यते तथापि ज्ञानेच्छयोर्यौगपद्यमंगीकुर्वतां नवीनानां मते पक्षसिद्ध्युत्ति
काले धूमलिंगानुमितीच्छायास्तद्वितीयक्षणे चालोकलिंगकानुमितीच्छाया अनुत्पादस्तत्रालोकलिंगकानुमित्युपपत्तये तादृशा

का॰१ अ॰१

टिप ५

राम॰
२२

वैशिष्ट्य प१

२ [illegible]मेव प्रतिबंधकत्वं

शेष्यतापात्तीच्छाविरहवैशिष्ट्यं पन्तानुधावत्वे लिंगविशेषानुपरक्तानुमितीच्छानामपि निरुक्तोत्तेजकतावच्छेदकाक्रांततया तादृशेच्छा
पाः प्रतिबंधकत्वाप्रसक्तेः अन्यलिंगकेति संपाततः ~~सिद्धिविशिष्टेच्छामात्रस्य प्रतिबंधकत्वे सिद्धिविशिष्टपरत्वतदनुमित्साविरहो~~
~~च्छाकारः शेषमात्रप्रतिबंधकत्वाप्रसक्तेः अन्यलिंगकेति संपाततः~~ सिद्धिविशिष्टेच्छामात्रस्य प्रतिबंधकत्वे सिद्धिविशिष्टपरत्वतद
नुमित्साविरहो वेच्छाकालीनाननुगतेच्छाप्रक्तानां तत्तद्व्यक्तित्वेनाभावानां निवेशनीयतया महागौरवमिति तत्साध्यविशिष्टतत्पक्ष
विषयकत्वप्रकारकानुमितीच्छात्वेनैव विशेष्यीभूतेच्छानिवेशो बोध्यः वक्तानन्तत्कसाध्यविशिष्टपक्षविषयकत्वादिप्रकारकत्वम
प्यन्यलिंगकानुमितीच्छापां न निवेशनीयं घटादीच्छाकालीनाननुगतेच्छानां भवन्मतेपि सिद्धावुत्तेजकतापां साधुवक्तव्यतया साम्या
तेमन्मते तत्र घटादीच्छासाधारणरूपेणैवानुमित्साया उत्तेजकत्वोपगमात्तुल्यस्थले पक्षतानिर्वाहे न गौरवं तादृशादृशाननुगते
च्छानामन्यलिंगकेच्छापामेवोत्तेजकत्वोपगमात् अत्र च तादृशगुरुधर्मावच्छिन्नाभावस्य [illegible] मेहेनानंतकारणतानां पक्षताकारणा
नरस्य च कल्पनामपेक्ष्य लिंगभेदेन तत्तल्लिंगकानुमितीच्छाविरहविशिष्टसिद्धित्वरूपगुरुधर्मावच्छिन्नाभावहेतुताकल्पनस्यैव

सिद्धिरूप

साध्यत्वेन पूर्वमते तस्यैव सम्यक्त्वं तु पाकाकारोत्पन्निर्भरस्त्रूत्वनापेक्षितत्वादिति· परे त्वन्यलिंगकत्वप्रकारकानुगतानुमितीच्छासत्त्वे हि तत्सिद्धि
दशायामननुगतानुमित्सावत्त्वात्तल्लिंगकानुमित्स्युपपत्तये सिद्धौ तादृशेच्छाभावकूटवैशिष्ट्यनिवेशेन पूर्वमते गौरवमेतन्मते चान्यलिंगका
ननुगतानुमित्सात्वरूपेणैव जनकत्वादेव तत्रानुमित्युपपत्तेः सिद्धौ तादृशाभावानिवेशात् न चैतन्मतेऽप्यन्यलिंगकानुमित्साप्रतिबंधकतायामे
वत्तासामुत्तेजकत्वस्यावश्यकतया साम्यमिति वाच्यं पक्षतापत्रानुगतसाध्यानुमित्सात्मकसमूहालंबनरूपैवान्यलिंगकानुमितीच्छा त
त्रान्यलिंगकानुमित्सायां तादृशेच्छाव्यक्तिभेदा एव निवेशनीयाः सिद्धौ तु समानाधिकरणप्रसंबंधेन तद्वत्ताभावाः तत्र च तत्तत्कालीन
संयोगादिमत्त्वाभावानां निवेशमादाय विनिगमनाविरहेण गौरवं न च पूर्वमतेऽपि तत्तत्सिद्धिव्यक्तिभेदा एव सिद्धौ निवेशनीयाः न तु
तत्तदिच्छाभावाः इति न विनिगमनाविरहावकाश इति वाच्यं सिद्धेरनंतरं पत्रतादृशसमूहालंबनेच्छाव्यक्तीनामुत्पत्तिसत्त्वे तादृशे
च्छानां सिद्धौ निवेशे इच्छोत्पत्तिकालेऽनुमित्स्यापत्तेस्तयोरिच्छयोर्युगपदुत्पादमते इच्छासामग्र्यास्तावताविरोधित्वात्तादृशस्थले सिद्धिजन
नकालेऽप्रतिबंधकोत्तेजकेच्छयोरेकस्यात्र परस्य केवलतत्समूहमुत्पत्तिस्तत्र द्वितीयक्षणेऽनुमित्युपपत्तये तन्मतेऽपि तत्तत्सिद्धिभेदा अन्य

सिद्धि

लिंगकेच्छाविशेषणीभूतसिद्ध्यंशेनिवेश्यंतेनतुअन्यलिंगकेच्छायांतन्निवेशनेसिद्धौवातदिच्छासंताभावाः अतोनतत्कालीनसंयोगा
दिव्यत्वभावनिवेशप्रादायविनिगमनाविरहप्रसंगस्यादुः साधकमानपरस्मसिद्धिकारणापरत्वेपूर्वोक्तदोषप्रसंगात्तत्स्याच्चेत्साधकेसि
-साध्यवत्तनिश्चयः।प्रकृतसाध्यपक्षवैशिष्ट्यावगाहिनिश्चयः पाषाणमयोवन्हिमान्पर्वतस्तेजस्वीइत्याद्याकारकसमानप्रकारकनिश्च
यद्दशायांपर्वतोवन्हिमानित्याकारकानुमितेरनुभ॰वसिद्धतयायथाश्रुतेचतदनुपपत्तेः प्रकारविशेषेनिवेशयति।पाषाणमयत्वादिनेति
।तत्र।पर्वतेतस्य।वन्हे।धर्मितत्साध्यत्वयो।उद्देश्यत्वविधेयत्वयोः अनुप्रवेशनीयावित्यस्यपक्षताशरीरदलादिः तथाचपर्वतत्वाद्यवच्छिन्नोद्दे
श्यतानिरूपितसंयोगादिसंसर्गावच्छिन्नवन्हित्वाद्यवच्छिन्नविधेयताकानुमितिंप्रतितद्रूपावच्छिन्नविशेष्यतानिरूपिततत्संसर्गाव
च्छिन्नतद्धर्मावच्छिन्नप्रकारताशालिनिश्चयतावच्छिन्नस्यसिषाधयिषाविरहविशिष्टस्याभावोहेतुरितिपर्यवसितंपर्वतोवन्हिमानि
त्यादिसिद्धिदशायांवन्हिमान्पर्वतोघटवानित्याद्यनुमिस्तुदपाततत्वमतिवप्यतावच्छेदकेप्रकारतामुपेक्ष्यविधेयतानिवेशनेविधेयता
चवन्हिमनुमिनोमीत्यनुव्यवसायनियामकपक्षतावच्छेदकव्यावृत्तोविषयताविशेषः स्वरूपतः पर्वतत्ववन्हित्वादिप्रकारकसि

त्विदश्यपक्षे जातिमान्वह्निमान्पर्वतो जातिमद्वह्निमानित्याद्यनुमित्युत्पत्तेः शुद्धपर्वतत्ववह्नित्वादिप्रकारकसिद्धिदशायामधिकविषयिण्याः
सुंदरपर्वतो वन्हिमान्पर्वतः सुंदरवन्हिमानित्याद्यनुमितेरुत्पत्त्या प्रतिबध्यदिशि पर्वततावच्छिन्नेत्यादिना किंचिद्धर्मविशेषितपर्वतता
दिपर्याप्तावच्छेदकताकत्वमेव विवक्षणीयं तदर्थश्च पर्वततादिनिष्ठनिरवच्छिन्नावच्छेदकताभिन्नावच्छेदकतानिरूपकत्वे। पर्वतो वह्निमा
नित्यनुमितौ जातिमान्वन्हिमान्पर्वतो जातिमद्वन्हिमानित्यादिसिद्धेरप्रतिबंधकतया प्रतिबंधकदश्यपि पर्वततावच्छिन्नेत्यादिना किंचिद्वि
शेषिततरवच्छिन्नत्वमेव विवक्षणीयं तदर्थश्च निरवच्छिन्नत्वस्वावच्छेदकताकत्वमिति ध्येयं नन्वनु पर्वततावच्छिन्नविशेष्यताकानुमि
तौ पर्वततावच्छिन्नविशेष्यताकसिद्धेः प्रतिबंधकत्वे पर्वतत्वेनैकपर्वतविशेष्यकसिद्धिदशायां तेन रूपेणान्यपर्वतेऽपि साध्यानुमित्य
नुदयापत्तिरत आह यदि चेति। पर्वतत्वांशेऽवच्छेदकतावगाहियत्किंचिद्व्यक्तिविशेष्यकसिद्धिदशायां तेन रूपेण धर्म्यंतरेऽप्यनुमित्य
नुमादस्य निर्विवादतया सामानाधिकरण्येनेति। एकत्र एकधर्मिणि। अनुमित्सासत्त्वे विशेषणाभावादेव विशिष्टाभावनिर्वाहात्तु धर
मे विशेषनिवेशनमफलमतो विनाप्यनुमित्सामिति। अन्यत्र। अन्यधर्मिणि। धर्मिविशेषानंतर्भावेऽपि व्यापकतारीत्या सामानाधिक

रण्येन सिसिद्दशायामवच्छेदकावच्छेदेनानुमितेर्बाधकाभावान्नादृशेति। सामानाधिकरण्यमात्रावगाहीत्यर्थः धर्मिविशेषेपीति। तथा च
पर्वतत्वावच्छिन्ने तत्पर्वतो हेरूपकानुमितौ पर्वतत्वावच्छिन्नतत्पर्वतत्वादिविशेष्यकसाध्यवत्तानिश्चयत्वेन प्रतिबन्धकत्वमिति भावः। अन्य
था। तदानींतादृशानुमितेरनुभवविरुद्धत्वविरहे। धर्मिविशेषो निवेश्यत इत्यनुपपद्यते। अनुमितिर्हि द्विविधा पक्षतावच्छेदकसाध्ययो। सा
मानाधिकरण्यमात्रावगाहिनी तयोरवच्छेद्यावच्छेदकभावावगाहिनी च। अवच्छेद्यावच्छेदकभावोपि किञ्चित्स्वरूपसंबन्धविशेषः यथा
मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यादौ मूलादिसंयोगायोः तत्रान्यादृशस्य तस्य दुर्वचत्वात् तदवगाहित्वमेव चानुमितौ पक्षतावच्छेद
कदेशकालावच्छेदेन बाधग्रहस्य विरोधित्वपाबाधस्यासिद्धिव्यभिचारसंकरं मणिकृद्व्यवस्थापयिष्यति। क्वचिच्च व्याप्यव्यापकभावः
यथा पृथिवी रूपवतीत्यादौ पृथिवीत्वादिरूपायोः पक्षतावच्छेदकस्य साध्यांशे धर्मिपारतन्त्र्येण प्रकारस्यावच्छिन्नत्वसंबन्धविधया
भासते अतोऽवच्छेदकावच्छेदेनानुमितेः न पर्वतत्वावच्छिन्नो वह्निमान्पर्वत इत्याकारकता अथवा पक्षांशे संबन्धविधया भासमा
नसाध्यसंबन्धतावच्छेदकतया पक्षतावच्छेदकावच्छिन्नत्वभाने पक्षतावच्छेदकावच्छिन्नविशिष्टसाध्यीयत्वेनैव पक्षे तत्संबन्धभान

गदा०
२५

मित्यन्यत्र विवेचितं· अवच्छेदकावच्छेदेनानुमितिश्च सामानाधिकरण्यमात्रावगाहि सिसाधयिषायामपि जायते न्यूनविषयकसिसाधयिषादशा
यामधिकविषयकानुमितेः सर्वानुभवसिद्धत्वान्त्वत्र एव यत्रावच्छेदकावच्छेदेनानुमितिस्तद्दशायां तत्र नांशतः सिद्धसाधनं दोषः प्रकृते च
पृथिव्यामितरभेदानुमाने अंशे घटे सिद्धसाधनमाशंक्य सर्वा पृथिवी इतरभिन्नेत्यादेः प्रतीतेरभावात् पक्षतावच्छेदकनानात्वे हि तदिति
समाधानस्य वक्ष्यमाणत्वात् इत्यतस्तदेवोपपादयति· पक्षतावच्छेदकस्येति। सामानाधिकरण्येन। सामानाधिकरण्यमात्रेण। तदवच्छेदेन। पक्ष
तावच्छेदकावच्छेदेन। सिद्धेः। सिद्धेरेव। सामानाधिकरण्यमात्रावगाहि सिद्धेः प्रतिबंधकत्वमेवकारेणाव्यवच्छेद्यं अत्रायंभावः पर्वतो वह्निमा
नित्यादि सिसाधयिषादशायां पर्वतः सेन्द्रवन्हिमानित्याद्यनुमितेस्तस्यां विधेयतावच्छेदकतायाः पर्याप्तिः प्रतिबध्यतावच्छेदककोटौ निवेश
नीया एवं संयोगादिना वन्हेः सिद्धावपि संयुक्तसंयोगादिना वन्ह्यनुमितेः प्रसक्तेः संसर्गतायामपि पर्याप्तिर्निवेशनीया एवं संयोगादि
नासाध्यस्य दंडोपलक्षितपुरुषादेः सिद्धावपि विशिष्टनिरूपितसंयोगादिना दंडिपुरुषाद्यनुमितेः प्रसक्तेः संसर्गतावच्छेदकतायामपि
पर्याप्तिर्निवेशनीया एवं चावच्छेदकावच्छेदेनानुमितौ इत्थं वह्नित्वादौऽस्तु त्वसंयोगत। सैवाविधेयतावच्छेदकतायाः संसर्गतावच्छे

राम०
२५

दकतापर्याप्तत्वात्तादृशानुमितेर्न सामानाधिकरण्यमात्रावगाहिसिद्धिप्रतिवध्यत्वमिति। यं च स्तुव्यापकतायाः संसर्गतया भाने
मानाभावात्पक्षतावच्छेदकाक्रान्तयावद्व्यक्तिविषयकानुमितेरेव पक्षतावच्छेदकावच्छेदेनानुमितिरिति वदंति। तन्मते मणिकारोक्तन्या
येनांशतः सिद्धसाधनस्यानुगतरूपावच्छिन्ननानाव्यक्तिपक्षकास्वनुमितावदोषत्वे पक्षतावच्छेदकव्यापकोद्देश्यताकान्यत्वमेव सि
द्धिसामान्यप्रतिवध्यतावच्छेदककोटौ निवेशनीयेन च विषयभेदेन विषयताभेदात्पक्षतावच्छेदकावच्छेदेनानुमितेर्विषयतानामपि का
नाव्यक्तिपक्षकस्थले पक्षतावच्छेदकाव्यापकत्वमेवेति तत्र पक्षतावच्छेदकव्यापकोद्देश्यतायाअप्रसिद्धिरिति वाच्यं उद्देश्यतासंबं
धेन पक्षतावच्छेदकव्यापकान्यत्वस्यैवानुमितिविशेषणत्वोपगमे न निर्वाहात् दीधिकारमतेत्ववच्छेदकावच्छेदेनावच्छेद्यावच्छेद
कभावस्य स्वरूपसंबंधरूपस्यैव व्याप्यव्यापकभावरूपस्यापि भानमनुमतं भागासिद्धेर्दोषत्वनिर्वाहार्थं पक्षतावच्छेदकावच्छेदेना
नुमितौ पक्षतावच्छेदकावच्छेदेन हेतुमत्ताज्ञानकारणताया आवश्यकत्वात् शिखरविशिष्टः पर्वतो वन्हिमानिति साध्ये शिखरे हेतो
स्तत्संबंधस्यावच्छेदकताविरहेतसिद्धेयद्रूपकतेत्यांशे पक्षतावच्छेदकेऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिन्यामनुमितौन

दवच्छेदेन हेतुमत्ताज्ञानस्य हेतुतायाः भागासिद्धेर्दोषत्वाभ्युपगमेपि स्वरूपसंबंधरूपावच्छेदकत्वावगाहिन्यामनुमितौ पक्षतावच्छेदकावछेदेन हेतुमत्ताज्ञानापेक्षा नोपेयते इति समाधानस्य स्वस्वपंक्त्यवच्छेदकत्वयोर्वस्तुनोर्भेदादित्यनेनाग्रे वक्ष्यमाणत्वात् एवं व्यापकत्वभानस्य तदनुमतत्वे पर्वतत्वसामानाधिकरण्येनैकत्रैस्तत्र एकत्र साध्यसिद्ध्यावित्यनेनैवावच्छेदकावच्छेदेनपासिद्धिरित्तदसामेतत्त्वाप्रयोजकस्य सामानाधिकरण्येनेत्युपादानर्थक्याच्च पुन्मते चैतदेवमतं प्राचीनमतेपि उक्तयुक्त्या विधेयतावच्छेदकतापर्याप्तिनिर्वेशस्यावश्यकत्वात् तादृशोद्देश्यताकान्यत्वस्याधिकस्य निवेशनीयतया गौरवात् एवं सिद्धि· सामान्यशून्यतादशायामवच्छेदकावच्छेदेनानुमितावुत्पद्यमानायां सिद्ध्यभाववत्त्वात्तत्कार्यतावच्छेदकीभूतपक्षतावच्छेदकव्यापकान्यानुमितावच्छिन्नस्य पत्ते श्वत्र सत्त्वेपि सिद्धिसामान्याभाववत्कालीनायामवच्छेदकावच्छेदेनानुमितौ विशिष्टवह्नित्वे विशिष्टसंयोगत्वे वापयोर्यो विषयताविशेष इव शुद्धवह्नित्वे शुद्धसंयोगत्वे वापयर्यामो विषयताविशेषः स्वीक्रियते एकज्ञानस्य एकविषये विषयताद्वयोपगमे क्षतिविरहादिति सिद्धिसामान्याभावकार्यतावच्छेदकावच्छिन्नोत्पत्तिरिष्टैव न चावच्छेदकावच्छेदेनानुमितौ व्यापकतायाः संसर्गतयाभानोपगमेनादृशानुमिताववच्छेदकावछे

देनहेतुमत्ताज्ञानस्यपृथक्कारणताकल्पनेगौरवं एतन्मतेतत्तत्पर्वतोद्देश्यकानुमितौतत्तत्पर्वतविशेष्यकपरामर्शस्यहेतुतापाऽर्थवशादेवयावत्पर्वतविशेष्यकपरामर्शोत्तथाविधानुमितेरुत्पादात्तादृशानुमितौपरामर्शस्यस्वतंत्रहेतुताकल्पनाव्यापकतायाः संसर्गविधयाभानस्यक्वचिदप्यनभ्युपगमादितिवाच्यं पक्षैकःपरामर्शः कतिपयपर्वतविषयकः अन्यश्चतदितरयावत्पर्वतविषयकस्तत्राप्यवच्छेदकावच्छेदेनानुमितेरुत्पादापत्तेः नचेष्टापत्तिः अवच्छेदकावच्छेदेनहेतुमत्ताज्ञानंविनाअवच्छेदकावच्छेदेनानुमित्यनुत्पादस्यसर्वसिद्धत्वात् तत्रचकस्यापिपरामर्शस्यभवन्मतसिद्धायाः अवच्छेदकावच्छेदेनहेतुमत्तावगाहितायाः असंभवात् एवंपक्षतावच्छेदकताघटकसंबंधेनपक्षतावच्छेदकसमवृत्तितत्रतेनसंबंधेनपक्षतावच्छेदकाक्रान्तोप्रसिद्ध्या अनुमितिद्वैविध्यानुपपत्तिश्चेत्तन्मतेअपिचावच्छेद्यावच्छेदकभावरूपाधिकविषयानवगाहनेसामानाधिकरण्यमात्रेणसिद्धिदशायांतादृशानुमित्सुमतौबीजाभावः सिद्ध्यविषयीभूतधर्मिविषयकत्वस्यतद्बीजत्वेतथाविधसिद्धिदशायांसिद्ध्यविषयाभूतकतिपयपर्वतादिविषयकानुमितेरप्युपादौचित्यात् अथमणिकृतापक्षतावच्छेदकेत्वेंऽशतः सिद्धसाधनस्यादोषत्वोपगमेपितदितरप्राचीनैरनुमितिमात्रएवांशतः सिद्धसाधनस्यापिदोषत्वमुपेयते

गदा० १७

ऽत एव तेषां मतमवलंब्य मणिकृतापि शब्दानित्यत्वानुमाने ध्वंसप्रागभावांशतः सिद्धसाधनवारणाय वर्णात्मकत्वादिविशेषणं पक्षे
निवेशितं अत एव गंधादिरूपपक्षतावच्छेदकस्य पृथिवीतरभेदादौ साध्ये हेतुता नाचार्यैरनुमन्यते व्याप्तिग्रह एव हेतुरूपपक्षतावच्छेद
कसाध्ययोः सामानाधिकरण्यभानेन सिद्धसाधनात्मकसकलपृथिवीविषयकानुमितेरयोगात् न चांशतः साध्यसिद्धावप्यधिकधर्मिवि
षयतया पापापूर्वत्वादिविषयकानुमित्युत्पादवदुचितः अधिकधर्मिविषयकानुमितेः सिद्धिदशायामुत्पादे वागनित्यत्वादिसिद्धिदशाया
मनित्ये वाग्नसिद्धत्वादिसमूहालंबनानुमित्युत्पादस्यौचितान्न हि तत्र कस्याप्यनुमितिः नवीनैरपि पक्षतावच्छेदकैक्य एवांशतः सि
द्धसाधनस्यादोषतोपगमात् एवं च नवीनमत एवावच्छेदकावच्छिन्नत्वावगाहितदनवगाह्यनुमितिभेदे न पक्षताभेदस्य स्वीकरणीय
तया गौरवं न च विशिष्टबुद्धौ धर्मितावच्छेदकव्यापकत्वभानानुपगमे पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहिबाधदशायां तत्सा
मानाधिकरण्येनैतादृशबाधविषयधर्मिविषयिण्याः कतिपयधर्मिविशेष्यकानुमितेरिव सकलधर्मिविषयकानुमितेरप्युत्पादौचित्या
दवच्छेदकावच्छेदेनानुमितावुद्देश्यतायामपि अंशतो बाधस्य दोषतापत्तेरिति वाच्यं सामानाधिकरण्यमात्रावगाहिन्यां विशिष्टबुद्धौ स

राम० १७

मानविषयकतथाविधविपरीतनिश्चयप्रतिबंधकतायाः प्राचामनुमततयांशतोबाधस्य दोषत्वोपपत्तेः एवंच यावत्पक्षविषय
कानुमितौ यावत्पक्षविशेष्यकहेतुमत्ताज्ञानापेक्षया तद्विरोधितया भागासिद्धेरपि दोषतानिर्वाहः एवं यत्र सकलपर्वतानां नैकपरा
मर्शविषयतात्रापि तु परामर्शद्वयविषयता तत्र यावत्सर्वत्वविषयकानुमितिरूपावच्छेदकावच्छेदेनानुमितिः प्राचीनमते इष्टैव नवीनमते
पि तत्र तादनुमितेरावश्यकत्वात् इति अत्रावच्छेदकावच्छेदेनानुमितौ तादृशपरामर्शस्य हेतुत्वकल्पनेनापि तन्मते लाघवमेवं अत्रावच्छेद
कावच्छेदेन विशिष्टबुद्धौ व्यापकत्वभानानुपगमे व्यापकत्वभानस्य सामानाधिकरण्ये न विपरीतज्ञानप्रतिबंधकत्वासंभवेन तत्प्र
योजकत्वस्य दुर्वचत्वापत्तेः न चैकरूपेणासमानधर्मिविषयकत्वमेव विपरीतज्ञानप्रतिबंधकत्वे बीजं तथा सति पार्थिवगंधत्वाव
च्छेदेन जलावृत्तित्वादिनिश्चयस्यापि पृथ्वीगंधत्वावच्छेदेन तन्निश्चयस्येव गंधोजलवृत्तिर्नवेत्यादौ गंधत्वादिसामानाधिकरण्यप्रमाने
ण जलवृत्तित्वादिसंशये विरोधिताप्रसंगात् उभयोरेव निश्चययोर्गंधत्वाश्रययावद्धर्मितात्राद्यभावावगाहितयाऽविशेषात् विरो
धिविषयकत्वाविशेषे धर्मितावच्छेदककोटौ अधिकभानस्याविरोधिताबीजत्वाभावात् नमनये उभयनिश्चयविषयव्यापकतयोर्भेद

नविशेषसंभवात् एतेनावच्छेदकावच्छेदेनानुमितौ व्यापकत्वमानापेक्षणात् लाघवाद्यावत्धर्मिवृत्तित्वं खंडैकविषयताभ्युपगम एवोचितः तद
न्यविषयतैव सिद्धिसामान्यप्रतिबध्यतावच्छेदिका सिद्धिसामान्याभावकालीनानुमितौ तादृशी अत्र एकैकधर्मिवृत्तिविषयतापीष्यत इति परा
स्तु पक्षतावच्छेदकसामानाधिकरण्येन तदवच्छेदेन च सिद्धिदशायां सामानाधिकरण्यमात्रावगाहिन्यनुमितिर्जायते उभयोरेव सिद्ध्योः प
क्षतावच्छेदकवत्तिसाध्यसंबंधरूपत्वादुभयसामानाधिकरण्यावगाहितया तादृशानुमितेस्तदितरांशानवगाहित्वात् अतस्तथाविधानु
मितौ उभयविधसिद्ध्योरेव प्रतिबंधकत्वं दर्शयति । तत्सामानाधिकरण्येनेति । तत्सामानाधिकरण्यमात्रेण । पक्षतावच्छेदकसामाना
धिकरण्यमात्रेण अवच्छेदकावच्छेदकावच्छेदेनानुमितावपि सामानाधिकरण्यावगाहितया तन्व्यावर्त्तनाय अवच्छेद्यावच्छेदकभावावगाहि
त्वव्यवच्छेदार्थकं मात्रपदं । अवच्छेद्यावच्छेदकभावानवगाहित्वं च न सिद्ध्यभावजन्यतावच्छेदककोटौ निवेशनीयं उक्तदिशा आपत्तिसंभवात्
पर्याप्तिनिवेशादेवोपपत्तेर्वैयर्थ्याच्चेत्यवधेयं । सिद्धिमात्रस्येति । मात्रपदं कार्त्स्न्यार्थकं तथा च पक्षतावच्छेदकसामानाधिरण्येन तदवच्छेदेन
च सिद्धेरित्यर्थः प्रतिबंधकता चोभयविधसिद्ध्योः संसर्गतादीनां पर्याप्तिमन्निवेशैकरूपेणोभयसाधारणनिष्ठत्वं शक्यते निर्वक्तुं अन्यथा

पुनः पृथक् पृथगेवेति ध्येयं । पक्षसामानाधिकरण्येनानुमितौ तथाविधसिद्धेरवच्छेदकावच्छेदेन सिद्धिव्यावर्त्तरूपेण प्रतिबंधकत्वेपि न त्ववच्छेद
कावच्छेदेन सिद्धेर्न प्रतिबंधकताधिकं त्ववच्छेदकावच्छेदकावच्छेदेनानुमितौ तस्याप्रतिबंधकत्वे कल्पनीये त्ववच्छिन्नसंयोगादिपर्याप्तसंसर्ग
ताकत्वस्य प्रतिबध्यतावच्छेदके ऽवश्यं प्रवेशनीयतया त्ववच्छिन्नत्वातिरिक्तधर्मानवच्छिन्नसंयोगादिनिष्ठसंसर्गताकत्वस्यैव च तद्यंतपातस्य
मुख्यसंयोगादिसंसर्गकानुमितिसाधारण्येन तादृशप्रतिबंधकतयैवोपपत्तेरिति । तदसत् सामानाधिकरण्येनानुमित्युपायो ऽवच्छेदकावच्छे
देनानुमित्युपामितसाध्याकारकेच्छानां पृथक् पृथगुत्तेजकताया वक्ष्यमाणतया पृथक् प्रतिबंधकताकल्पनस्यावश्यकत्वात् ननु सिद्धिदशा
यां पक्षतावच्छेदकावच्छेदेनानुमितिर्जायतामित्याकारकसिषाधयिषासत्त्वेऽसति चावच्छेदकावच्छेदेन हेतुपरामर्शे सामानाधिकरण्य
मात्रावगाहिपरामर्शात् तादृशानुमितेरापत्तिः तथाविधसिषाधयिषासत्त्वेनुपक्षतायाः अक्षतत्वादित्यत आह । इत्थं चेति · इत्थं च तस्य
पुत्वापक्षतावच्छेदकावच्छिन्नत्वतत्सामानाधिकरण्यमात्रावगाह्यनुमित्योः सिद्धेः पृथक् प्रतिबंधकत्वे च लिंगभेदन्याय इति । यथा तत्त
ल्लिंगकानुमितौ सिद्धेः प्रतिबंधकतायां तत्तल्लिंगकानुमितीच्छैवोत्तेजिका न त्वन्यलिंगकानुमितीच्छा तथा पक्षतावच्छेदकसामाना

धिकरणरूपमात्रावगाहिनीमनुमितिंप्रतिसिद्धेःप्रतिबंधकतापांतादृशानुमितीच्छैवोत्तेजिकानत्वन्यविधानुमितीच्छेतिस्वीकरणेपमित्ति
नातिप्रसंगइत्यर्थः।यदिपर्वतेवन्हिरितिसाध्याकारकनिश्चयानंतरंपर्वतोवन्हिमानितिसाध्याकारकानुमितिर्जायतेतदासाध्यविशेष्यकानुमितौ
साध्यविशेष्यकसिद्धेःप्रतिबंधकत्वेपिसामान्यतःसाध्यपक्षवैशिष्ट्यावगाह्यनुमितौतादृशसिद्धित्वेननैकप्रतिबंधकत्वंकल्पनीयंत्रपि
तुविशिष्यैवप्रतिबंधकताइत्यपेक्षयागौरवस्यादोषत्वादित्याशयेनाह।साध्यविशेष्यकेति।द्वयोःसमानविषयकत्वेविशेष्यविशेषणभा
ववैपरीत्यमकिंचित्करमित्यभिप्रायेणानिर्भरस्तुचत्रापक्षमामाणिकत्वेसुक्ते।मणिकारस्यतुसमानप्रकारकसिद्धेरेवप्रतिबंधकत्वमनुमतंपृ
थिव्यामितरभेदइतिसाध्यविशेष्यकानुमित्यनंतरंतत्तादात्म्यकविशेषणज्ञानसहकृतात्व्यतिरेकिपरामर्शादेवपृथिवीतरभिन्नाइतिप
क्षविशेष्यकानुमितेरुत्पादस्यतेनव्यतिरेकिग्रंथेवक्ष्यमाणत्वात्पक्षविशेष्यकैवेति।तथाचविशिष्यैवप्रकारताविशेष्यतेनिवेश्ये
वप्रतिबध्यप्रतिबंधकभावःकल्पनीयइतिभावः।तत्रतादृशानुमितित्वस्याप्रामाणिकत्वेतदुभयविधज्ञानसाधारणपक्षसाध्यवैशिष्ट्या
वगाहिनिश्चयत्वस्यानतिप्रसक्तस्यस्वव्यत्वेउभयविधसिद्ध्योरनुगतरूपेणैवप्रतिबंधकता।प्रतिबध्यतावच्छेदकत्वंतुपक्षविशेष्य

कसाध्यप्रकारकानुमितित्वादिकमेव नत्वनुगतं पक्षविशेष्यकसाध्यप्रकारकानुमितिजनोपत्तं साध्यविशेष्यकपक्षप्रकारकानुमितिजनो
पत्तामित्याकारिकयोरिष्टयोः पृथक् उत्तेजकत्वानुरोधात् एवं च। साध्यविशेष्यकसिद्ध्यनन्तरं पक्षविशेष्यकानुमित्युत्पत्तेः प्रामाणिकत्वे
चानुत्पत्त्यापादितिपर्यवसानादित्यस्य हेतुः समानाकारकसिद्धेरिति। अन्यूनाकारकसिद्धेरित्यर्थः पर्वतः संदरवह्निमानित्यादिसि
द्धिदशायामपि न्यूनविषयिण्याः पर्वतो वह्निमानित्याद्यनुमितेरनुत्पादात्। अधिकविषयकसिद्धेरविरोधित्वेऽवच्छेदकावच्छेदेन सिद्धेः सामा
नाधिकरण्येनानुमितौ प्रतिबंधकतालिखनस्यासंगतेः अत एव जातिशक्तिवादे गोत्वेन गोवृत्तित्वानुमाने सिद्धसाधनतानसंभवती
त्यविशिष्टहेतुना विशिष्टसाध्यसाधन एव सिद्धसाधनावकाशो न तु विशिष्टेनाविशिष्टसाधनेऽपीति जातावप्यनुमानपक्षमाक्षि
प्य मिश्राः अथोपस्थापितात्तत्सिद्धिरिति मूलमवतारयामासुः ननु साध्यविशेष्यकानुमितिः न सर्वत्रानुभवसिद्धा पर्वतो। वह्निमानि
त्याकारकानुमितेरेवानुभवात्। व्याप्यविशेष्यकपरामर्शादपि पक्षविशेष्यकपरामर्शादपि पक्षविशेष्यकानुमित्युत्पादस्य परा
मर्शद्वयस्यानुरूपेणाहेतुतावादिनोऽपि संमतत्वात्। किंच। असिद्धसाध्यकस्थले विशेषणज्ञानादिविरहेण साध्यविशेषणक

नुमितेरनुपपत्त्या साध्यविशेष्यकानुमितिरूपेपत्तेः। एवं च पक्षविशेष्यकसिद्धिदशायामपि तादृश्यानुमितेरप्रामाणिकत्वात्तदनभ्युपग
मे क्षतिविरहात्तां प्रति साध्यपक्षवैशिष्ट्यावगाहिज्ञानत्वेनोभयविधसिद्धिसाधारण्येनापि प्रतिबंधकत्वं संभवतीत्यभिप्रेत्य मतांतरमा
ह: तादृशेति: साध्यविशेष्यकानुमितिमित्यर्थः सिद्धिमात्रे। पक्षविशेष्यिका साध्यविशेष्यिका च सिद्धिरित्यर्थः   ननुउक्ते स्वत्वसाध्यज्ञा
नदशायामपि साध्यविशेष्यिकानुमितिरप्रामाणिकी तत्र साध्यविशेषणकानुमितेरेव संभवादिति तादृशानुमितिं प्रति बंधकतायां पक्षादि
विषयतायाः सिषाधयिषाविरहस्य निश्चयत्वस्य च निवेशनं गौरवापेत्यभिसंधायाह। साध्यप्रसिद्धिरिति: साध्यतावच्छेदकप्रकारकज्ञान
मित्यर्थः तेनेतरत्वव्यापकीभूताभावप्रतियोगिपृथिवीत्ववतो पृथिवीत्वादिपरामर्शे शब्दादिना साध्यज्ञानसत्त्वेपि पृथिव्यामितरभे
दत्वाकारकानुमितेर्नानुपपत्तिः न च तत्र पृथिवीतरभिन्नेत्येतादृशानुमितेः संभवः विशेषणतावच्छेदकीभूतेतरभेदत्वादिप्रकारकज्ञा
नविरहात्   अथेतरभेदत्वादिप्रकारकज्ञानस्य यदीतरभेदत्वाद्यवच्छिन्नमुख्यविशेष्यकज्ञानत्वं प्रतिबंधतावच्छेदकं तदा तथाविधज्ञा
नदशायामितरभेदादिपक्षकप्रमेयत्वाद्यनुमितेरप्यनुपपत्तिः तद्धर्मावच्छिन्नविधेयकत्वस्याधिकस्य निवेशेपि इतरभेदः प्रमेयः पृथिवीत्य

रभिन्नेत्यादिसमूहालंवनानुमितेर्गोत्वाभाववो गोत्वाभाववानित्याद्यनुमितेश्चानुपपत्तिः अत्र केचित्। पृथिवी इतरभिन्नेत्यादिसाध्यविशेषणकानुमितौ तथाविधप्रत्यक्षादिसाधारणो विशेष्यत्वावच्छेदकताभिन्नप्रकारतैव विधेयता साध्यविशेष्यकानुमितौ च ततोऽन्या तथा च प्रकारताभिन्नविधेयतैव साध्यप्रसिद्धिप्रतिबध्यतावच्छेदिकेति नानुपपत्तिरित्याहुः तत्र प्रकारताविशेषस्य विधेयतात्वोपगमे जलभेदे तेजोभेदत्वप्रकारकतेजोभेदादिसाध्यकानुमितेर्जलभेदादिविधेयत्वापातात् न चाधेयतासंबन्धावच्छिन्नप्रकारताश्रयावृत्तित्वं तदिति वाच्यं तथा सत्याधेयतासंबन्धेन जलभेदादिसाध्यकतादृशानुमितेरपि तद्विधेयताकत्वानुपपत्तेः यदि च यत्राधेयत्वं साध्यतावच्छेदकसंबन्धः तत्र विधेयत्वमतिरिक्तमित्युच्यते तदा तत्संबन्धेन जलभेदादिसाध्यकानुमितौ प्रकारताभिन्नविधेयताशालिन्यां साध्यप्रसिद्ध्यभावव्यभिचारो दुरुद्धरः वस्तुतस्तु तद्धर्मावच्छिन्नप्रकारकत्वे सति तद्धर्मावच्छिन्नविधेयकानुमितित्वमेव तद्धर्मप्रकारकज्ञानप्रतिबध्यतावच्छेदकं। साध्यप्रसिद्धिस्थले च साध्यप्रकारिकैवानुमितिर्जायते न तु तद्रूपप्रकारिकेति न तत्र व्यभिचारः अत एव। साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेः प्रतिबन्धकत्वादेव। प्रसिद्धसाध्यकस्थले। ऽभावरूपसाध्यप्रसिद्धिस्थले न तु भावसाध्यकस्थले इत्यर्थः तत्र परामर्शस्यानिय

ममतः साध्यघटितव्याप्तिविषयकतया साध्यविशेष्यकानुमितेरप्रसिद्ध्या साध्यप्रसिद्धिप्रतिबंधकतायाः कस्यपि तुमशक्यत्वाऽपष्टंभका
संगतेः स्वनिरूपितप्रकारतानवच्छेदकत्वविशिष्टविधेयतावच्छेदकतापर्याप्त्यधिकरणपातुरूपविषयानिष्ठप्रत्यासत्त्यानुमितिंप्रतिविष
यतावच्छेदकतासंबंधेन ज्ञानस्य सर्वसाधारण्येन प्रतिबंधकतायास्त्वत्रापाततउक्तिसंभवेपि साध्याघटितव्यतिरेकव्याप्तिविषयकपरामर्शघ
टितसामग्र्या एव साध्यविशेष्यकानुमितस्तारुप्ययोजकतायाः कृप्तत्वात् अभावसाध्यकस्थले साध्यविशेष्यकानुमितेरप्रसक्त्याश्चाः साध्यवि
शेषणकानुमितिः साध्यविशेष्यकत्वे तादृशप्रतिबंधकतायाः प्रयोजकत्वाऽपष्टंभासंगतिरादेव स्यात्। यत्र यत्र महानसीयवह्निमात्रवि
षयकः परामर्शस्तत्र पक्षधर्मताज्ञानसत्त्वेऽपि पर्वतीयवह्निर्मांसमानो विशेषणताज्ञानविरहेण विशेष्यतयैव भासत इति भावसाध्यकस्थलेपि
साध्यविशेष्यकानुमितिसंभव इति तत्तुच्छं सामान्यलक्षणायाः प्रत्यासत्तित्वमते महानसीयवह्निविषयकपरामर्शे पर्वतीयवह्न्यभानप्रयो
जकस्यदुर्लभत्वात्। नच स्मरणात्मकपरामर्शे कदाचिदुद्बोधकविरहात्तदभावसंभवाद्बुद्धेर्बाधकस्य फलबलकल्प्यत्वात् शिष्टविशेषणकबुद्धौ विशे
षणज्ञानहेतुतायाः निर्युक्तिकत्वात् विशेषणतावच्छेदकप्रकारकज्ञानस्याऽवश्यकत्वात् पर्वतीयवह्न्याविषयकपरामर्शादेपि वह्नित्वेन तद्वह्निवि

शेषणकानुमितिसंभवाच्च· इत्थमत्रावधेयं साध्यप्रसिद्धिप्रतिबंधकतायामपि साध्यविशेष्यकानुमितित्वप्रकारके ज्ञापाउत्तेजकत्वमावश्यकं। अन्यथा पक्षविशेष्यकसिद्धिदशायां तादृशेच्छासत्त्वे साध्यविशेष्यकानुमितेरप्रत्यापत्तेः। सिद्ध्यसमवहितसाध्यप्रसिद्धिदशायां साध्यविशेषणकानुमितेः संभवेन तेन एवोद्देश्यसंशयनिवृत्त्यादिसंभवे साध्यविशेष्यकानुमितेरनुपगमेन क्षतिकरं इत्यभिसंधायैव साध्यप्रसिद्धेस्तद्धिसेधित्वमुरीकृतं ग्रन्थकृता प्रकृते च साध्यविशेषणकानुमितेस्तादृशसंभवेन तादृशानुमित्युपगमाच्चयानौचित्यात्। यथा चात्र सिद्ध्यसमवहितसाध्यप्रसिद्धिरथचानुमित्सा तत्र व्यतिरेकिपरामर्शात्साध्यविशेष्यकात द्विशेषणिकानुमितिरापाद्येत। न त्वेकविधादेव परामर्शादेकदा द्विविधानुमितिरानुभविकी तस्माद्व्यतिरेकिपरामर्शात्साध्यप्रसिद्धिदशायामपि साध्यविशेष्यिकाया एवानुमितेः स्वीकारः समुचितः। सिद्धिप्रतिबंधकतापेक्षया साध्यप्रसिद्धिप्रतिबंधकतायामवच्छेदकलाघवमप्यकिंचित्करमेव व्यतिरेकिपरामर्शात्क्वचित्साध्यविशेषणकानुमितिस्वीकारे तादृशानुमितिं प्रति व्यतिरेकिलिंगकत्वान्वयिलिंगत्वादिप्रकारकानुमित्साया एवोत्तेजकीकृत्य सिद्धेः प्रतिबंधकताद्रूपेणैव गौरवात्। परे तु अप्रसिद्धसाध्यकस्थले साध्यविशेषणिकैवानुमितिर्जायते। इतरभेदत्वादिरूपविशेषणतावच्छेदकप्रकारकज्ञानविरहेऽपि विशे

गदा०
३१

ष्ये विशेषणांतरं त्रच विशेष्यणांतरमिति न्यायेनैव पृथिवीत्वेतरभिन्नेत्याद्यनुमितिसंभवात्।नचलाघवानवकाशः तादृशानुमितिंप्रत्येवसाध्यप्रसिद्धि
प्रतिबंधकतायाः आवश्यकत्वनोपत्तादिति वाच्यं तथाविधानुमितौ यादृशी विवक्षितातस्याः साध्यप्रसिद्धिकालीनविशिष्टवैशिष्ट्यावगाह्यनुमितिसा
धारण्याभ्युपगमात्सा अविशेष्यकानुमित्यनुपगमे साध्यप्रसिद्धिप्रतिबंधकतायाएकाकत्वनात्।नच सिद्धिकालेन तथाविधानुमितिर्वारणायतत्रसि
द्धेः साध्यप्रसिद्धेर्वा प्रतिबंधकत्वकल्पनाधिक्यमावश्यकमिति वाच्यं विशिष्टवैशिष्ट्यानुमितिस्थलीयसिद्धिप्रतिबंधकतायां गौरवापत्तेः इतरभेद
त्वादिनेतरभेदादिविधेयकानुमितित्वस्य तत्स्थलीयप्रतिबध्यतावच्छेदकस्योभयसाधारणत्वादिति।परंतु विशिष्टवैशिष्ट्यानुमितौ विशि
ष्टवैशिष्ट्यावगाहिनी सिद्धिरेव विरोधिनी।नतु केवले विशेष्ये विशेषणमित्यादिरीत्या जायमानापि सा न तथा।तस्याश्च संसर्गांशे विशिष्टनि
रूपितत्वानवगाहितया न्यूनविषयकत्वात्। एवंच केवले विशेष्ये विशेषणमिति न्यायेनानुमितेरुपगमे तादृशसिद्धिदशायां तस्या वार
णीयतया तत्र तादृशसिद्धेर्विरोधित्वकल्पनाधिक्यमावश्यकमेवेति किमपराद्धं साध्यविशेष्यकानुमितिस्वीकारेण तत्स्वीकारे विशि
ष्टवैशिष्ट्यानवगाहिसाध्यविशेषणकानुमितेरनभ्युपगमेन प्रतिबध्यप्रतिबंधकभावलाघवादिति।तदपिनदुष्टं विशिष्टनिरूपित

राम०
३१

वैशिष्ट्यमात्रमात्रविरोधिवाधादिकाले केवलं विशेष्ये विशेषणमिति न्यायेनानुमितेः सर्वसंमततया तत्र तादृशसिद्धेः प्रतिबंधकतया आवश्यकत्वेन साध्यविशेष्यकानुमितिस्वीकर्त्तुरधिकप्रतिबंधकताकताकल्पनस्य दुर्वारत्वादिति। यदि तु विशिष्टप्रतियोगिकविलक्षणवैशिष्ट्यानवगाहिन्यपि विशिष्टविशेषणज्ञाने विशिष्टज्ञानत्वेऽप्यपेक्षितं तत्र तत्संतुल्ययुक्त्या विशिष्टविशेष्यज्ञानेऽपि विशिष्टविशेष्यकज्ञानं हेतुतया साध्यतावच्छेदकविशिष्टविशेष्यकानुमितिरप्यप्रसिद्धसाध्यकस्थले न संभवति। न च विशेष्यज्ञानस्य विशिष्टबुद्धौ हेतुतया तद्विरोधस्यापि न तद्विशेषहेतुतेति वाच्यं। सामान्यप्रत्यासत्तिजन्यज्ञाने विशेष्यज्ञानव्यभिचारेण सामान्यहेतुतासंभवेऽपि तुल्यरूपाधयुविशेषणावगाहिज्ञानस्याप्येकविशिष्टेऽपरविशेषणकत्ववारणाय विशेषहेतुताया आवश्यकत्वात्। अन्यथा विशीषणज्ञानस्यापि विशिष्टधीहेतुताया उच्छेदात्। अत एव विशिष्टवाक्यार्थविशेष्यकशाब्दबोधेऽवांतरवाक्यार्थज्ञानापेक्षा। न च साध्यविशेष्यकानुमितौ तुल्यरूपयोरेव पक्षविधेयतावच्छेदकयोः साध्यांशे प्रकारता न त्वेकविशिष्टांशेऽपरस्येति न विशिष्टसाध्यज्ञानापेक्षेति वाच्यं निर्विशेष्यतावच्छेदकानुमितेरनुभवविरुद्धत्वात्। प्रत्यक्षस्य च निर्धर्मितावच्छेदकस्याप्यभ्युपगमात् प्राथमिकाभावप्रत्यक्षे प्रतियोग्यधिकरणयोरभावविशेषणतयाभानोपपत्तिः तथा च साध्यविशेष्यकानुमितिर्निर्युक्तिके

वेतिवदंति। स्वपजलत्वव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादिपरामर्शात्तद्देहत्वादिरूपविशेषणज्ञानं विनास्वरूपः तत्तत्प्रकारि
काष्ठपिंडजलत्वमदेहत्वाकारिकानुमितिरेवकथमुत्पद्यतइतिचेत्। कथंचित्तत्तज्जलीयत्वमात्रपुरस्कारेणैवाभावानुमित्युपपादितिक्तं तेपरस्तावितेन
।ननुसिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यपक्षतात्वेपिसंदेहवत्सपरामर्शस्वमित्यादिग्रंथेनसिषाधयिषापक्षतापक्षोक्तसव्यभिचारस्यसि
द्धिकालीनानुमितिस्थलेताद्वस्थ्यंसिषाधयिषानाशेविशिष्टबुद्धप्रतिबंधकस्यानुमित्यव्यवहितप्राक्क्षणोऽसत्वादित्याक्षेपेपत्त्यापति
समाधानमाहअत्र चेति। व्याप्तिस्मरणादीत्यादिना। अनुमित्याद्वितीयक्षणोपत्रपक्षधर्मताज्ञानेतत्स्थलीयतादृशज्ञानपरिग्रहः पूर्वेति। व्या
प्तिस्मरणादिपूर्वकालीनेत्यर्थः परामर्शदशायामसत्त्वात्सिद्धेर्विशेष्याभावादेवविशिष्टाभावनिर्वाहेनानुमित्यनुपपत्तिरतः परामर्शकाले
चेसिद्धिसत्वइति। अनुमित्यंतरेति। परामर्शद्वितीयक्षणोत्तदव्यवहितप्राक्क्षणोवेत्यादिः तदुत्पत्तिप्रकारश्चाधस्ताद्दर्शितः एवंतुसिषाध
यिषापक्षतापक्षः। सिषाधयिषाविरहेपीत्यादिदोषादेवहेयइतिभावः ननुसर्वपुनरत्रानुमित्सोत्पत्तौप्रमानाभावइत्यतआह नचैवेति। अनु
मित्सांतरोत्पत्तेरेवेत्यर्थः कारणीभूतस्येति। तथाचतादृशविशिष्टाभावात्मककारणंविनानुपपत्तिरेवसिद्धिस्थलेपिविशिष्टाभावनिर्वाहका

नुमित्सांतरोत्पत्तौमानमितिभावः एतन्मतएवदोषितिष्ठतोपि निर्भरः मिश्रादिमतस्यगौरवकंवालेतत्वादितिक्षेपं मिश्रमतमाहः अन्ये।
त्वितिद्वित्रिक्षणांतरितानामपीति। द्विस्वव्यवहितानां त्रिक्षणाव्यवहिता चेत्यर्थः अनुमित्सायां। अनुमित्सोत्पत्तौ। तेनैकक्षणांतरितायामपि
अनुमित्सायां पश्चादनुमितिस्तत्राप्यनुपपत्तिस्तत्वेन तदनभिधानेन्यूनता एवं प्रथमकल्पे सिषाधयिषोत्पत्तिक्षणादारभ्य क्षणचतुष्टयात्मकका
लस्यैवविवक्षणीयत्वात्त्रिक्षणानंतरितानुमित्सास्थलेऽनुमित्सनिवहिश्चेति दूषणद्वयानवकाशः स्वोत्पत्तिपदस्यव्याख्या। सिषाधयिषापदेन
विवक्षणीया। साच। योग्यताच। स्वोत्पत्त्यनंतरमिति। स्वप्रागभावोत्तरमित्यर्थः स्वस्य उत्पत्तिर्यस्मादितिव्युत्पत्त्या स्वोत्पत्तिपदस्य प्रागभावपरत्वा
त्। अन्यथा सिषाधयिषोत्पत्तिकाले योग्यतानुपपत्त्या तद्वितीयक्षणेऽनुमितेरनिर्वाहात् सिध्यानुत्पादश्च सिद्धिप्रागभावः तथाच स्वप्राग
भावध्वंसविशिष्टस्वविषयसिद्धिप्रागभाव एवानुमित्सायोग्यतेति पर्यवसितं। अनुमित्सापूर्वंतद्विषयीभूतसिद्ध्यनंतरं अनुमितिवारणा
यदत्तदूषोपाहाने। नच नियामकाभावेनानामतानां यावदनुमितीनामेवानुमित्साविषयत्वसंभवात्स्वविषयीभूतैकानुमितावुत्पन्नायामपि
भाविव्यक्त्यंतरप्रागभावमादाययोग्यतासंगतेरिति वाच्यं। स्वविषयसिद्धित्वावच्छिन्नप्रागभावस्य विवक्षितत्वात् अत एव स्वविषयेत्युक्तं प्रति

च्चिद्विशेषध्वंसवतिकालेसामान्यधर्मावच्छिन्नप्रागभावासंभवेनसिद्धित्वावच्छिन्नप्रागभावस्यकदाप्यसत्त्वात्सामान्यधर्मस्यप्रागभावप्रतियोगिता वच्छेदकत्वानंगीकारेपुनःस्वविषयसिध्यसमानकालीनत्वमेवप्रागभावविशेषणादेयं।वह्न्यनुमितिर्घटानुमितिश्चजायतामित्यादीच्छानंतरंघटानुमित्यादिरूपविषयसिद्धावपिवह्न्याद्यनुमितेस्तस्यासिद्धीतिप्रकृतसाध्यपक्षवैशिष्ट्यावगाहिनिश्चयपार्थकं।अनुमित्सेतरं।दिवसादिविलंबेनाप्यनुमितिप्रसंगादित्यर्थः।अन्तरानुमित्युत्पादे।स्वविषयसिद्धित्वावच्छिन्नप्रागभावासत्त्वेनयोग्यताक्षतेर्नोत्पत्तिसंभवइत्यतोऽन्तरानुमित्यनुत्पादइति।द्वित्रिक्षणादिविलंबेनानुमितेरिष्टत्वात्।दिवसादिविलंबेनेति।सिध्यसत्त्वेऽनुमितेरिष्टत्वात्।इंद्रियादिनानिर्णीतइतिलिंगेननिर्णीतेसाध्ये।तदनुमित्यनुत्पादएवनसंभवतीत्यतःइंद्रियादिनेति।आदिनाशब्दपरिग्रहः।अनुमित्सेति।अनुमित्साधिकरणक्षणाव्यवहितोत्तरक्षणमारभ्यक्रमेणपक्षविषयकलिंगज्ञानव्याप्तिस्मरणयोरुत्पत्तौसत्यामुत्सर्गतोयावताकालेनपरामर्शोत्पत्तिःअनुमित्सोत्पत्तिक्षणमारभ्यतत्क्षणपर्यंतयावंत्क्षणापीवातावदधिकक्षणानवस्थायीस्थूलप्रागभावानधिकरणत्वस्वनाशाधिकरणासमुपध्वंसाधिकरणसमयध्वंसानधिकरणत्वोभयसंबंधेनसिषाधयिषावत्कालत्वेन।नत्वत्रानुगतेनतत्कालत्वेन।गौरवात्।तज्जत्वासौ

तेजकत्वापेक्षणात्तत्सिद्धिभेदानामेवनिवेशनौचित्यात्। अपेक्षणतापादुत्तेजकत्वकल्पेपि वस्मरणापाः पूर्वानुमित्साबलादनुमित्सुत्तरमुद्
मित्साप्रयुक्तेरसंगत्यापत्तेश्च तत्रानुमितिस्मरणस्योत्तेजकताकल्पकाभावादिति ध्येयं। अनुमित्सोत्तरं पत्रविलंबेन लिंगदर्शनादिके तत्तद्व्याप
रामर्शः तत्रानुमित्सासति स्मरणमारभ्यपरामर्शोत्पत्तिपर्यंतस्थायीदंडादिरूपी तत्स्मारणपलिंगदर्शनादेरनुमित्सास्मरणव्यवहितो
त्तरक्षणोत्पत्तिकत्वमवुसतं। पत्रानुमित्सोत्पत्तिद्वितीयक्षणोपक्षलिंगव्याप्तिविषयकमेकं स्मरणं तदनंतरक्षणेपरामर्श इति तत्र
स्मरणात्प्रथमक्षण एव परामर्शोत्पत्तेरतिरिक्तकालमात्रसत्ताप्रथमवारस्मरणपक्रमेणेति। अनुमित्सासति द्वितीयक्षणपो लिंगदर्शनव्या
प्तिस्मरणयोः क्रमेणोत्पत्तावपि कुतश्चिद्विलंबितवंधकाद्यत्रविलंबेन परामर्शोत्पत्तिस्तत्राधिकक्षणानामपि तथाविधतयातद्वारणायोत्स
र्गतइति। तादृशव्याप्तिस्मरणानंतरक्षणेपरामर्शोत्पत्तावसति विरोधिनीत्यर्थः अनुमित्यनंतरगुणक्षणव्यवधानविरहेणापंचमक्ष
णेनुमितिरुत्पद्यतेनतुतदग्रेपि। तथाविधक्षणाव्यवधानात् इत्येतन्न्यूनतापत्त्यभंगापत्तादृशकालविशेषोपादानं इत्यवधेयं न तु तथा
विधकालस्योत्तेजकत्वेगौरवमित्यतआह फलबलेनेति। अनुमित्सानाशोऽनुमित्यात्मककार्योत्पत्त्यनुरोधेनेत्यर्थः तथाकल्पनात्तान्त

हेशकालस्य उत्तेजकत्वकल्पनात् यत्र तथाविधपरामर्शोत्पत्तिक्षणोऽनुमितिप्रतिबंधकबाधनिश्चयसमवधानमासीत् तदुपगमश्च तद्द्वितीयक्ष
णोतत्र। सिद्धौ सत्यां तदनंतरं वेदमनुमितिमामागिको एव प्रत्यनुमित्साद्वितीयक्षणो लिंगदर्शनसामग्रीसमवधानं तदनंतरं लिंगदर्शनादिक्र
मेण परामर्शोत्पत्तिस्तत्र सिद्धौ सत्यामतोऽनंतरक्षणोऽनुमितिस्तथा चैतदेकापेक्षयाऽधिकक्षणकालस्योत्तेजकत्वमावश्यकमित्यत आह अ
नुमित्सोक्षणानंतरमिति। अनुमित्सोत्पत्तिक्षणमारभ्य तृतीयमित्यर्थः। यावत्कालपर्यंतमनुमितिर्जनितरस्येत्यनेनान्वयः। अनुमित्सो
त्तरमनुमित्सांतरोत्पत्त्या दिवसादिविलंबेनापि सिद्ध्यनंतरमनुमित्सुसत्ता तावत्कालस्यानुत्तेजकत्वात्। अनुमित्सानाशेपीति प्रागनु
मित्साप्रागसत्त्वेपीत्यर्थः। अस्तां सिद्धौ आनुमित्सोत्तरं दिवसादिविलंबेनाप्यनुमित्सूदयात् सिद्धौ सत्यामिति। प्रागित्यादिः यावत्का
लमध्ये। यावत्क्षणानंतरक्षणो। तावानेव कालः। तावत्क्षणाधिकक्षणानवस्थायी अनुमित्स्यानुमित्सार्थकमित्यादिविषया
पदेनोपस्थितः विवक्षितः अनुमित्साप्रयोज्यतया उत्तेजकत्ववत् सिद्धिप्रयोज्यतयापि तस्य पुनः प्रतिबंधकत्वमुचितमित्याशयेना
ह यदि चेति। सिद्ध्यनंतरमिवेति शेषः। तेन नाशस्य वैयर्थ्यं हि त्रिक्षणमध्ये इति द्विक्षणमध्ये त्रिक्षणमध्ये चेत्यर्थः। सिद्धेश्चतुर्थक्षणे

पंचमक्षणो वेति फलितं। सिद्ध्या। सिद्धिपदेन। तावान्। तन्नाशानंतरमपि द्विक्षणस्थायी त्रिक्षणस्थायीगउपत्तक्षणीयः। ननु सिद्ध्युत्तरं कि
यत्क्षणमध्ये अनुमितिर्नोत्पत्ते कियत्क्षणानंतरं वा जायत इत्यस्य विशिष्य निर्णेतुमशक्यत्वात् कालस्य प्रतिबंधकत्वकल्पनमसंभवि। एवमुत्ते
जककालस्यापि विशिष्य निर्णेतुमशक्यत्वात् तदुत्तेजकत्वमपि तथेत्यत आह। विशिष्येति। अवहितैः। सावधानैः। नियमः निर्णयपूत तथा च येषां
विशिष्य तावत्कालनिर्णयो भवति तेषामेव तत्र विशिष्य प्रतिबंधकत्वावगमो भविष्यति। अन्येषां तु सामान्यत एवेति भावः। केचित्तु ननु
कालविशेषाणां सिद्धिसिषाधयिषाधिकरणकालत्वेनैवेत्प्रतिबंधकोत्तेजकभावः। तदधिककालस्यापि तथात्वप्रसंगः। अनतिप्रसक्तानु
गतधर्मांतरं च दुर्वचमेवेत्यत आहः विशिष्येति। अनतिप्रसक्तानुगतविशेषणाविशेषं निवेश्येत्यर्थः। क्षणनियमः कतिपयक्षणानामेव तथात्वे
नताधिकाधिकक्षणानामिति नियमनिर्वाहः। अवहितैः। निरुक्तिकुशलैः। सिद्ध्याद्युत्पत्तिक्षणमारभ्य क्षणचतुष्टयादेः स्वप्रागभा
वानधिकरणत्वनाशाधिकरणसमयनाशाधिकरणसमयनाशानधिकरणत्वोभयसंबंधेन सिद्ध्यादिमत्त्वमेवानुगमकमनतिप्र
सक्तं चेति भावः इत्यपि व्याचक्षते। वदंतीत्यस्वरससूचनाय। स चोक्तपरंपरायाः संबंधत्वे मानाभावात्तत्तद्व्यक्तित्वेनोत्तेजक[illegible]त्वाभ्युपगमेऽ

हेशकालस्य उत्तेजकत्वकल्पनात् पक्षतथाविधपरामर्शोसत्त्विति स्वरसो अनुमितित्वंधकबाधनिश्चयसमवधानपासीतदुपगमश्च तत्र हि जीपक्ष
गोतत्र। सिद्धौ सत्सां तदनंतरवेदमनुमितिमामाशिकोस्व पत्रानुमित्सा हि जीपक्षगो लिंगदर्शनसामग्रीसमवधानंतदनंतरं लिंगदर्शनादिक्र
मेणापरामर्शोसत्त्वि स्तत्र सिद्धौ सत्सामतंनंर स्वरोनुमितितथात्वेतदोक्तापेक्षयाऽधिकस्य कालस्योत्तेजकत्वमावश्यकमित्यतआह अ
नुमित्सोसत्सनंतरमिति। अनुमित्सोत्पत्तिक्षणमारभ्यत इत्यर्थः यावत्कालपर्यंतमनुमितिजपितरसयेतनेनान्वयः अनुमित्सो
त्तरमनुमित्सांतरोत्पत्त्या दिवसादिविलंबेनापि सिध्यनंतरमनुमित्सुसत्त्वात् तावत्कालस्यानुत्तेजकत्वात्। अनुमित्सानाशेपोति प्रागनु
मित्सापामसत्सामपीत्यर्थः अमसत्सां सिद्धौ अनुमित्सोत्तरं दिवसादिविलंबेनाप्यनुमित्सुदयात् सिद्धौसत्सामिति। भाविसादिः यावत्का
लमध्ये। यावत्क्षणानंतरक्षणो। तावानेव कालः। तावत्क्षणाधिकक्षणानवस्थायी अनुमित्साया अनुमित्सार्थकसिषाधयिषा
पदेनोपस्थितः विवक्षितः अनुमित्साप्रयोग्यतापा उत्तेजकत्ववत्ति हि योग्यतापात्र्यपित्तत्वपुत्त्याप्रतिबंधकत्वमुचितमित्याशयेना
हपदिवेति। सिध्यनंतरमिवेति शेषः तेनतास्य वैयर्थ्यं हि त्रिक्षणमध्ये इति हि क्षणमध्यत्रिक्षणमध्ये चेत्यर्थः सिद्धेश्च तुर्थक्षणो

पंचमक्षणेवेति फलितं।सिद्ध्यासिद्धिपदेन।तावत्।तत्राशानंतरमपि द्विक्षणस्थायीत्रिक्षणस्थायीगउपलक्षणीयः नतुसिस्मुत्तरंक्षि
पत्क्षणमध्येऽनुमितिनोत्पत्तेःक्षिपत्क्षणानंतरंव्याजापनइत्यस्यविशिष्य निर्णेतुमशक्यत्वात्कालस्यप्रतिबंधकत्वकल्पनमसंभवि।एवंतुत्ते
जककालस्यापिविशिष्य निर्णेतुमशक्यतयातदुत्तेजकत्वमपिनयेत्यतआह विशिष्येति।अवहितैः।सावधानैः।नियमः निर्णयप्रत्याचपेषो
विशिष्यतावत्कालनिर्णयोभवतितेषामेवतत्रविशिष्यप्रतिबंधकतावगमोभविष्यति।अन्येषांतुसामान्यतएवेतिभावः केचित्तु नतु
कालविशेषाणांसिद्धिसिषाधयिषाधिकरणकालत्वेनैवप्रतिबंधकोत्तेजकभावः तदाधिककालस्यापितथात्वप्रसंगः अनतिप्रसक्तानु
गतधर्मांतरंचदुर्वचमेवेत्यतआहः विशिष्येतिअनतिप्रसक्तानुगतविशेषणाविशेषनिवेशप्रत्यर्थः क्षणनियमः कतिपयक्षणानामेवतथात्व
नत्वाधिकाधिकक्षणानामितिनियमनिर्वाहः अवहितैः।निरुक्तिकुशलैः।सिद्ध्याद्युत्पत्तिक्षणमारभ्यक्षणचतुष्टयादेः स्वप्रागभा
वानधिकरणत्वस्वनाशाधिकरणसमयनाशाधिकरणसमयनाशानधिकरणत्वोभयसंबंधेन सिद्ध्यादिमत्त्वमेवानुगमकमनतिप्र
सक्तंचेतिभावइत्यपिव्याचक्षते।वदंतीत्यस्वरससूचनाय।सचीकपरपराणाः संबंधत्वेमानाभावात्तत्तद्व्यक्तित्वेनोत्तेजक[illegible]त्वाभ्युपगमेउ

गदा०
३६

त्ते दोषाप्यातादिति इच्छाया विषयसिद्धौ सत्संचरितार्थतया नोत्तरकालमनुमितिर्जायत इति तद्वारणाय स्वविषयसिध्यनुपहितत्वेनेच्छाविशेषणीयात
त्र। तद्विषयसिद्धिदशायां परामर्शेऽनुमित्सासमवधानसंभव एव तद्विशेषणमर्थवद्भवति। तच्चायातेतो न घटते इच्छापरामर्शयोर्युगपदुत्पादा
संभवेनानुमितिकालेऽन्यतरविनाशावश्यकत्वादित्यतस्तद्दूषयति· अत्र चेति सिद्धिप्रतिबंधकतावच्छेदककोटौ चेत्यर्थः तदिच्छाविषयसि
ध्यनुपहितत्वं तद्विशेषणमित्यस्मिन्मते णान्वयः निर्णयेच्छेति निर्णयत्वप्रकारकेच्छा। अनुमितित्वप्रकारिकेच्छायाः प्रत्यक्षात्मकसिध्या। चरि
तार्थतया तद्बलात्तादृशसिध्यनंतरमप्यनुमित्सुत्पत्तेः प्रकृतानुपयोगात्त्वनुमित्सोत्पत्तिकाले विशेषणज्ञानोत्पत्त्यसंभवेन तत्पूर्वमेव तद्बुद्धित
विशिष्टप्रत्यक्षसामग्रीसमवधानस्यावश्यकतया प्रत्यक्षसामग्र्याबलवत्त्वेनेच्छोत्पत्तिरेव न संभवतीत्यतः स्वोक्तन्यायेनेति। अनुमित्सापूर्वका
लीनत्वेत्यादिप्रकारेत्यर्थः स्मरणेऽविशेषणज्ञानापेक्षाविरहादुक्तप्रयासं विनैवेच्छा द्वितीयपक्षेऽविशिष्टपक्षस्मरणं निर्वहतीत्यभिसंधा
याह· स्मरणं वेति अनुमितित्वप्रकारिकेच्छायामपि तद्विशेषणज्ञानस्य प्रयोजनमाह· अत्र वेति साध्यव्याप्यविशिष्टपक्षस्मरणानंतरमनु
मितिरेव भविष्यति न त्विच्छेत्यतोऽनुमितिकारणसामग्रीविघटनाय तथाविधस्मरणस्य साध्यविशिष्टपक्षविषयकत्वानुसरणं। ततोऽप

राम०
३६

क्षणे साध्यस्य तद्व्याप्यस्य चानुमितेर्द्वितीयक्षणे साध्यतद्व्याप्ययोरनुमित्सायाश्च निर्वाहाय साध्यव्याप्यतद्व्याप्यतदुभयानुमितिनिष्ठेष्टसा
धनताविषयकत्वानुधावनं। साध्यानुमितेस्तदनन्तरं पुनस्तदनुमित्सापत्तेश्च संपादनाय साध्यानुमित्सायाः साध्यव्याप्यस्यापि निश्चिततत्प
तदनुमितेः संपादनाय च साध्यव्याप्यानुमित्सायाः स्वतन्त्रयोरित्यादिनानुसरणं। अनुमित्साद्वितीयक्षणे साध्यस्यानुमितौ तदनन्तरं त
दनुमितिरिष्टेव वेति साध्यव्याप्यस्यानुमितौ च परामर्शसामग्र्यापत्तिसंभवस्तत्तदनन्तरमुभयानुमित्सानुसरणं। अनुमित्सो
त्पत्तिक्षणाधिकक्षणचतुष्टयादिरूपयोः। पत्ताया उत्तेजकत्वमते यत्र पर्वते वह्निममनुयामीतीच्छा ततो वह्निव्याप्यवान्पर्वत इति परा
मर्शस्तदनन्तरं च पर्वतो वह्निमानित्यनुमितिः तत्रापि तादृशानुमित्सापत्तिः संभवतीत्याह योग्यतेति। तदिच्छाविषयसिध्यनुपहित
त्वं तदिच्छायां विशेषणं देयमिति शेषः। मतस्वात्मकसिद्धिसमवहितानुमितित्वमतस्साम्याज्ञानत्वादिप्रकारकेच्छावलादनुमि
त्सुस्स्यात्तदिच्छाविषयेति सिद्धेर्विशेषणं विशेष्यतयात्राभिमताया इच्छा तद्विषयेत्यर्थः। अथ तादृशेच्छाया उत्तेजकीभूतसकालेच्छासा
धारणेनानुमितिगोचरेच्छात्वेन निवेशो मतस्वात्मकत्वेऽपि निर्णयत्वादिप्रकारकानुमित्साविषयतया विषयो त साध्यावत्तेक

गदा०
३१

ताप्रसंगः तत्र व्याप्तित्वेन निवेशे च उत्तेजकीभूतेच्छाव्यक्तिसमसंख्याभावानां सिद्धौ विशेषणतायां गौरवं । तत्तद्व्याप्तिप्रसिध्यनुपहिततत्तद्व्या
प्योत्तेजकतामपेक्ष्य लाघवात् तत्तत्क्षणावच्छिन्ने व्याप्ते न तथात्वकल्पनाप्रसंगश्चेति चेन्न । प्रागुक्तयुक्त्या इच्छाविषयतावच्छेदकतायाः प्रकृतसाध्य
विशिष्टप्रकृतपक्षविषयकानुमितित्वादिपर्याप्तिनिवेशस्यावश्यकतया इच्छाविषयतावच्छेदकतापर्याप्त्यधिकरणरूपभेदेनेच्छायाः पृथगुत्ते
जकतायाः आवश्यकत्वात् । तत्तद्धर्मप्रकारकेच्छायां तत्तद्धर्मावच्छिन्नानुपहितत्वेन निवेशनीयमित्यत्र तात्पर्यात् । अत एवानुमितिद्वयं जायता
मित्येतादृशेच्छाबलात् क्रमिकानुमितिद्वयमप्युपपद्यते । एकानुमितावुपधानदशायामपि द्वित्वावच्छिन्नानुपहितत्वस्याक्षतत्वात् । अथ
वा स्वविषयकत्वस्वसामानाधिकरण्योभयसंबन्धेन प्रकृतपक्षधर्मिकप्रकृतसाध्यनिष्ठयविशिष्टान्यत्वमेवानुपहितत्वं तार्थः । भेद
स्याव्याप्यवृत्तितयाऽनुमितिदशायामिच्छायामसिद्धिविशिष्टत्वेऽपि तस्यैव विशिष्टान्यत्वमव्याहतं । प्रकृतपक्षकप्रकृतसाध्यकानुमितिवि
षयकसमूहालंबनेच्छायां पक्षान्तरपक्षकानुमितेरन्यसाध्यकानुमितेर्वा विषयतया तत्र तद्वत्त्वादन्यानुमित्यनंतरं प्रकृतानुमितिनि
र्वाहाय प्रकृतपक्षप्रकृतसाध्याद्यवगाहित्वं निश्चयविशेषणीयं । एतद्विशेषणमनन्तर्भाव्य हि त्वादिप्रकारकेच्छायाः पृथगुत्तेजकत्वे गि

राम०
२१

कारात्तात्तादशेच्छावत्त्वात्तुमित्सनंतरमनुमित्युपपत्तिःद्वित्वप्रकारकेच्छावत्त्वाच्चनानुमितिरूपानंतरमनुमित्संतरंतावन्वयंतमनुमित्सायाएवानवस्थानात्योग्यतायाउत्तेजकतामतेचद्वित्वादिप्रकारकेच्छायोग्यतायाद्वित्वाद्यवच्छिन्नानुपहितत्वेनैवपृथगुत्तेजकतावाच्येतिकृतमतिविस्तरेण।नन्विच्छायाइच्छायाअतिनिरुक्तयोग्यतायाऽभावेनविशिष्टाततःसिद्धेरभावस्यपक्षतात्वेतत्साध्यकतत्पक्षकस्थलेकदाचिदपिकस्यचिदिच्छानजातातत्रपक्षताप्रसिद्धिरित्याशंकायांविशिष्टविषयिणीभगवदिच्छामादायकेषांचित्समाधानमास्तुतादृशस्थलेइच्छाविरहविशेषितसिध्यभावएवपक्षतेतिसमाधेयंपक्षसाध्येति।पक्षतावच्छेदकसाध्यतावच्छेदकादिभेदेनेत्यर्थःपक्षताभेदादितिसिद्धिपदार्थस्यप्रकृतपक्षतावच्छेदकादिघटितत्वादितिभावः।यत्रेति।यादृशपक्षकयादृशसाध्यकस्थलइत्यर्थःसिध्यनंतरंकदाप्यनुमितिर्नजातेति।सिद्धिकालेपरामर्शसत्त्वेऽनुमित्सायाअसमवधानादितिभावः।सिध्यभावमात्रमिति।इच्छाभावाविशेषितायाएवसिद्धेरभावइत्यर्थःसिद्धिकालीनानुमित्यनुरोधेनैवविशिष्टसिध्यभावस्यपक्षतात्वोपगमादितिभावः।एतेनेति।आत्मानुमित्सेत्यतिरप्रसिद्धा।अप्रसिद्धानपिचनाउमित्सताह्युपयोगिनीतत्रविशिष्टाभावस्यपक्षतात्वस्वीकारेप्रयोजनविरहेतात्पर्यः।उक्तिसाध्या

रापेत्तिसर्वत्रैवप्रसक्तायाः सिषाधयिषाविरहविशिष्टसिद्ध्यभावपदार्थत्वस्य पादनापेतर्थः नोपादेयइति शब्दैकस्यानुपादेयत्वात्तत्कारणताव
च्छेदकगौरवस्य हि सहिष्णुतायाश्चान्याय्यत्वादिति भावः। परामर्शपूर्वकालोत्पन्नानुमित्सानाशे ऽनुमित्यन्तरमकस्य पित्वायोग्यतायाश्चोत्तेजकत्वम
नादृत्यानुमितिमुपपादयतः सार्वभौमस्य मतमाह यत्तोऽपि· सिषाधयिषानाशे सति पारदशासिद्ध्यनन्तरमनुमितिस्तस्याः सिषाधयिषावि
रहविशिष्टस्य क्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकतयाभिमतनिवेशात्तत्प्रतिबंधकत्वोपपत्तिः सिषाधयिषाविशिष्टत्वं क्षणस्य स्वा
धिकरणावच्छेदेन वोध्यं तेन सिषाधयिषावतोऽपि कालस्य सिषाधयिषानधिकरणदेशावच्छेदेन सिषाधयिषाविरहविशिष्टत्वपात्रक्रमेण।
सिषाधयिषासिद्धिपरामर्शानुमितयस्तत्र सिषाधयिषाविरहविशिष्टत्वविशेषणेनोपपाद्यस्यानुमित्सप्रतिक्षणानिष्ठाव्यवधानस्ये
वानुपपत्तितादवस्थ्यपरास्तं स्वपदेनापि भेदप्रतियोगिनि सिद्धिरेवोपादनीया प्रतियोगिवैयधिकरण्यस्याभावविशेषणतादत्तसिषा
धयिषाधिकरणक्षणावारणं पुनरनुपादेयं। प्रतियोगिपदेन सिषाधयिषाविरहप्रतियोगिनएव विशिष्यावश्यं विवक्षणीयतया सि
षाधयिषायाः सिषाधयिषात्वेन निवेशननुपेक्ष्य सिषाधयिषाविरहप्रतियोगित्वेन निवेशनस्य शिरोवेष्टनेन नासिकास्पर्शतुल्या

त्वात्सिषाधयिषानधिकरणत्वन्निवेशने च सिषाधयिषाविरहं प्रावेव पर्याद्धक्षसमानक्षणत्वविवेशनव्यावृत्तस्य संगतेः सर्वेषामे
व क्षणानां सिषाधयिषाविरहविशिष्टपूर्वपूर्वक्षणध्वंससाधिकरणक्षणध्वंससाधिकरणगपाताद्दशध्वंसानधिकरणत्वरूपाव्यवहि
तत्वाश्रयपपक्षणामसिद्धिरतः सिषाधयिषाविरहविशिष्टक्षणीस्वाधिकरणत्वनिवेशः स्वपदे भेदप्रतियोगितत्सिद्धिव्यक्तिपरं
सिद्धिसामान्यपरत्वे सर्वेषामेव क्षणानां पूर्वपूर्वसिध्यधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणतया पूर्ववदसिध्याप
त्तेः इच्छाविरहविशिष्टस्वक्षणाव्यवहितोत्तरत्वनिवेशे ज्ञानेच्छयोर्युगपदुत्पादमते पश्चानुमित्सा तत्तीयक्षणे घटेच्छासिध्यात्मक
परामर्शस्तदुत्तरं चानुमितिस्तत्र सिद्धेरिच्छाविरहविशिष्टस्वाधिकरणस्य सिध्या इच्छाविरहविशिष्टस्वाधिकरणक्षणोत्पत्तिकानुमि
तिकमितिकमित्रैव स्यासिद्धिः अनुमित्साविरहाविशिष्टतदभावस्य परामर्शक्षणेऽसत्त्वात्तदुत्तरमनुमित्यनुपपत्तिरतः सिषाधयिषा
पंर्पतानुधावनं। अथवा इच्छासामान्यनिवेशे पत्र घटेच्छानंतरक्षणे सिध्यात्मकः परामर्शस्तदनंतरक्षणे सिद्धावभाभप्याग्रह
स्तदनंतरमनुमितिः सिद्धेरभावादज्ञानानामस्यां दिशा पारएवानुमितिप्रतिबंधकत्वात् तत्रतादशानुमित्सुमति क्षणस्येच्छाविरहवि

ग०प्र०
३९

शिष्टसिद्धिद्वितीयक्षणाव्यवहितोत्तरत्वया सिद्धेः स्वपदेनोपादानसंभवेनाविरोधित्वपाऽप्रामाण्यग्रहोत्पादस्यापेऽनुमितिवारणाय सिषाधयि
षापदं तथासत्यनुमित्युत्पत्तिक्षणस्य सिषाधयिषाविरहविशिष्टसिद्ध्युत्पादक्षणाव्यवहितत्वापत्तिः त्वाने ध्यपो यौगपद्याम्फपनुगमापयु
त्रानुमित्साद्वितीयक्षणे सिद्ध्यात्मकः परामर्शः तदनंतरं घटे ज्ञातत्वतादृशसिद्ध्यधिकरणस्यापि क्षणस्येच्छाविरहविशिष्टत्वाभावात्तस्य स्व
पदेनोपादातुमशक्यत्वात् सिषाधयिषाविरहविशिष्टतदभावो नानुमित्यव्यवहितपूर्वक्षण इति तत्रानुमितिनिर्वाहाय इच्छासामान्योपेक्ष(
णमिति तदनस्याधीयः स्वस्वमनुमितिसामग्री। सत्वेन तदानीमनुमित्यनुत्पादश्चोक्तस्य इष्टत्वात्। न चानुमित्सापूर्वकालो सत्रापेक्षाबुध्यात्मक(
वाधादिवशात्तदानीमनुमित्यनुमित्सानुत्पादसंभवः अपेक्षाबुध्यनंतरक्षणे विशेषगुणांतरानुत्पन्नावेव तस्याः क्षणत्रयावस्थानसंभवात्।
यत्तु यत्रानुमित्सानंतरं घटे ज्ञातदनंतरं सिद्ध्यात्मकपरामर्शस्तदनंतरं चानुमितिस्तत्रानुमित्सोत्पादक्षणे नेच्छाविरहविशिष्टतत्सिद्ध्यधि
करणक्षणाव्यवहितोत्तरक्षण इति तादृशसिद्धेस्तदनुमित्यप्रतिवंधकत्वात् सिषाधयिषापर्यंतानुधावनमिति। तदप्यसत् इच्छाविरहविशि
ष्टस्वक्षणाव्यवहितोत्तरत्वशरीरेऽव्यवधानप्रतियोगिस्वक्षणएवेच्छाविरहविशिष्टत्वनिवेशनस्य प्रयोजनवत्तयोत्तरत्वप्रतियोगिनि स्वक्षणे(

राम०
३९

तद्विशिष्टत्वस्याविवेशेनोपपत्ता उक्तानुमितिस्तत्क्षणस्येच्छाविरहविशिष्टतात्सिध्यधिकरणस्याव्यवहितत्तपात्तादृशसिद्ध्युमादक्षणोत्पन्न
पाच्च घटेच्छोत्पत्तिक्षणे तादृशसिद्धेरिच्छाविरहविशिष्टत्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वपक्षेऽनुमित्यनिर्वाहविरहात् प्रथमविशिष्टांतस
ष्टत्तिस्यत्वे सिषाधयिषापूर्वस्यापिनः कस्यचित्स्थूलकालस्य परामर्शोत्पत्तिकाले विनाशपूर्वकालावच्छेदेन सिषाधयिषाविरहविशिष्टसिध्यधिक
रणतादृशकालध्वंसाधिकरणपरामर्शोत्पत्तिक्षणध्वंसाधिकरणस्यानुमितिस्तत्क्षणस्य सिषाधयिषाविरहविशिष्टसिध्यधिकरणकालाव्यव
हितोत्तरत्वानुपपत्तिरतः कालपदमुपेक्ष्य क्षणपदोपादाने अथ सिषाधयिषाविरहविशिष्टस्य निरूपिताधिकरणत्वनिवेशे उक्तस्थूलका
लस्याविनिन्नक्षणावच्छेदेन सिषाधयिषाविरहसिध्युभयाधिकरणत्वेपि सर्वदैव विशेष्याभावविशेषणाभावान्यतरप्रयुक्तविशिष्टाभाववत्त
याविशिष्टाधिकरणत्वासंभवात् क्षणत्वनिवेशनमन्तरेणैवमावृत्तिः संभवतीति चेन्न सिषाधयिषापूर्वक्षणादेः सिद्धिक्षणादेश्च प्रसक्तेर्वि
शिष्टाभावावच्छेदकत्वेपि तदुभयानुगतान्यतरत्वावच्छिन्नस्यैकक्षणावच्छिन्नत्वाविशेषितसामानाधिकरण्यसंबन्धेन सिषाधयिषावि
रहविशिष्टायाः सिद्धेरधिकरणतावच्छेदकत्वे बाधकाभावात् एकरूपावच्छिन्नस्यैव विरहस्य रूपावच्छेदकत्वविरोधात् अन्यथा तत्कालैकत

राभाववदुक्तस्यसिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यसर्वक्षणावच्छेदेनैवसत्वेविरोधेनतादृशपक्षतावच्छिन्नाधिकरणतायाअनिर्वाहात्तत्रतुपक्षताव
न्नाप्रतीतेरप्यनुपपत्तेः एवंच एकक्षणावच्छिन्नसामानाधिकरण्यसंबंधेनएकविशिष्टापराधिकरणत्वमेवोक्तस्थूलकालेनसंभवतीतितस्यैकक्ष
णावच्छिन्नोभयाधिकरणत्वनियतत्वात्क्षणाद्यघटिततादृशसंबंधनिवेशापेक्षयाचतस्याधिकरणेक्षणत्वनिवेशएवउचितः।यस्मात्स्थूलकेवलसा
मानाधिकरण्यसंबंधेन एकविशिष्टापरामर्शोयदाकदाचिद्विशेषणावमितिविशेष्याभावादेवनतुविशेषणाभावात्तथाचसिषाधयिषाविरहविशि
ष्टस्थूलकालेसिषाधयिषासिद्ध्युभयसत्वक्षणेनसिषाधयिषाविरहरूपविशेषणाभाववत्तद्विशिष्टसिद्ध्यभाववदितितादृशकालस्यविशिष्टाधिक
रणत्वंनिराबाधमेवाएतेनसिषाधयिषापूर्वक्षणस्यसिद्ध्यनधिकरणत्वेनतस्यानधिकरणकालस्येवदेशेप्येककालेचवृत्त्यावनवच्छेदकत्वे
नस्थूलकालेसिषाधयिषाविरहविशिष्टसिद्ध्यवृत्तौनावच्छेदकत्वमितितत्साधारणरूपावच्छिन्नस्यविशिष्टसिद्ध्यधिकरणतावच्छेदकत्वासं
भवेपिनक्षतिः यद्यपिसिषाधयिषाविरहवैशिष्ट्यावच्छेदेनतस्याधिकरणत्वनिवेशेपितादृशकालेकालांतरेणसिषाधयिषाविरहवैशिष्ट्यस
त्तद्विशिष्टसिद्ध्यधिकरणतानवच्छेदकत्वात्तादृशकालमादायोक्तदूषणस्यानवकाशस्तथापिसिषाधयिषाविरहवैशिष्ट्योपलक्षितेसिद्ध्यधि

करणत्वनिवेशाभिप्रायेण क्षणत्वोपादानं यद्यपि क्षिपादिरूपतादृशस्थूलकालस्याप्येतल्लक्षणावच्छिन्नसूक्ष्मक्षणतया क्षणत्वनिवेशेनेपि तद्दोष
तादवस्थ्यात् तथापि स्ववृत्तिप्रागभावध्वंसविशिष्टत्वरूपक्षणत्वावच्छेदेन सिषाधयिषाविरहविशिष्टत्वनिवेशनान्न दोषः सिषाधयिषाविरहविशिष्टक्षणे
स्वाधिकरणत्वमवश्यं सिषाधयिषाविरहवैशिष्ट्यावच्छिन्ने तादृशस्थूलकाले तु स्वाधिकरणत्वस्य च न तदवच्छिन्नत्वनियम इति सिषाधयिषा
विरहवैशिष्ट्यावच्छेदेन स्वाधिकरणत्वाभाव एव लक्षणपदोपादानेन तु क्षणत्वमपि निविष्टमिति तत्त्वं। अथाव्यवहितोत्तरक्षणोत्पत्तिः स्वाधिक
रणावच्छेदेन बोध्यात्मानुमितिपदं वा स्वसमानाधिकरणानुमितिपरं तेन महाप्रलयानभ्युपगमे सकलसिद्धीनामुत्तरमेवात्मसंयोगो नामात्म
नोऽकस्मिंश्चिदवश्यमनुमितिस्तत्सिषाधयिषाविरहविशिष्टतादृशस्वक्षणानन्तरक्षणोत्पन्नानुमितिकभिन्नात्सिषाधयिषाद्युपोत्प
त्तिमत्क्षणोत्पन्नेश्वरीया च सिद्धिरेव सिषाधयिषाविरहविशिष्टतदधिकरणक्षणमासिद्ध्या स्वपदेन तस्याग्रहोपादानमशक्यत्वा
त्तत्रस्याप्रसिद्धेः इच्छाविरहविशिष्टत्वाभावात् सिषाधयिषाविरहविशिष्टनिरुक्तासिद्धिभिन्नसिद्धेरप्रसिद्धेः महाप्रलयस्याप्रामा
णिकत्वेपि यदुत्तरमनुमितिः किंचिदपि नोत्पत्स्यते तादृशचरमसिद्धेरेव प्रतिबन्धकत्वं स्यात्तनान्यस्मादसत्त्वानुपपत्तेर्नावकाशः अथावधानो

शनिवेशात्प्रतिबंधकसिद्धिनाशानंतरं तत्तद्धिकरणेऽनुमितेस्तत्तावपि न तत्सामग्रीप्रतिबंधकत्वोपपत्तिः स्वस्वसकलक्षणानामेव स्वाधिकरण
क्षणध्वंसाधिकरणक्षणध्वंसानाधिकरणत्वरूपक्षणाव्यवहितत्वाक्रांतत्वपात्रनादौ संसारे सर्वासामेव सिद्धीनां पूर्वं कदाचित्स्वाधिकरणेऽनुमि
त्युत्पत्त्या सिषाधयिषापात्रांतरीत्यात्रासिद्धेरेव सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितक्षणे तत्रानुमितिकभिन्नात्तस्याः सिषाधयिषा
विरहविशिष्टत्वाभावादप्रसिद्धिरत उत्तरेति स्वाधिकरणक्षणध्वंसाधिकरणार्थकं। सकलसिद्धीनामेव स्वक्षणाव्यवहितोत्तरत्वाक्रांतस्व
टितोपक्षणाविनष्टानुमितेस्सत्तिपर्यंतस्वपूर्वस्यापि स्वसत्त्वकालत्वोसत्त्वात्रानुमितिकत्वपूर्ववदप्रसिद्धिरिति द्वितीयक्षणपदं। अनुमित्यात्म
कसिद्धीनां स्वाव्यवहितोत्तरक्षणवृत्तिस्वात्मकानुमितिकत्वपाऽप्रतिबंधकत्वापत्तिरत उत्पत्तिनिवेशः यद्यपि स्वान्यत्वस्यानुमितिविशे
षणत्वेप्येतद्दोषवारणसंभवस्तथापि अपेक्षाबुद्धेः क्षणत्रयावस्थायित्वमते उक्तं समानाधिकरणविशेषगुणांतरीत्याऽदस्य चोपगमेप
त्रापेक्षाबुद्ध्यात्मकानुमितिद्वितीयक्षणे तादृशोमतस्वादिरूपासिद्धेस्तस्याश्चतुर्थक्षणेऽनुमित्युत्पादवारकं तत्प्रतिबंधकत्वं नोपपद्यत इति
गुरुशरीरापत्त्याऽप्रस्तुतत्वेन निवेशने। अथानुमित्यव्यवहितपूर्वक्षणवृत्तिसिद्धिभिन्नत्वेन निरुक्तक्षणोत्पत्तिकानुमितिकभिन्नत्वापेक्षया लघीयः

कथमुपेक्षितमिति चेत् । तथासति पक्षक्रमेण सिद्धिसिषाधयिषानुमितपक्षत्वे इच्छाजनकसामग्र्या अनुमितिप्रतिबंधकत्वेनैवेच्छोत्पत्तिसणेऽनुमितिकारणसंभवात् अव्यवहितपूर्वत्वघटकानुमित्युत्पत्तिक्षणोत्तरव्यवहितमात्रक्षणे वा सिषाधयिषाविरहविशिष्टत्वस्य तद्वारणानुरोधेन निवेशे वैयर्थ्यात् तादृशस्थलोपसिद्धिस्तत्तीपक्षणोऽनुमितपत्वविरोधितापाः सिद्धौ सिषाधयिषाविरहवैशिष्ट्यस्य निवेशमन्तरेणोपपत्तेः मूलोपात्तसिद्धिविशेषणसहकृतांतं निष्प्रयोजनकं स्यादिति मूलविरोधः तथा च इच्छाजनकसामग्र्याः प्रतिबंधकत्वमते तेऽपि मूलाविरोधोपपादनापीक्ष्णगुरुतररीतेरादरः अत्र कल्पे वक्ष्यमाणानुपपत्तिस्तत्तीपक्षणसाधारणाव्यवहितोत्तरत्वनिवेशोऽस्वर्तकामः अगत्या इच्छासामग्र्या अनुमितिप्रतिबंधकत्वमतमाश्रित्य मूलोक्तसहकृतांतं सार्थकयिष्यतीत्यवधेयं । अनुमितेरव्यवहितपूर्वोत्पन्नस्याव्यवहितपूर्वस्यापि नो घटकत्वे विरोधितोपपत्तये सिद्धिपदं । अवगतद्वितीयसिषाधयिषाविरहविशेषणमपि जनस्तत्र संप्रतिपत्तिमद्दर्शयन्प्रथमसिषाधयिषाविरहविशेषणप्रयोजनं पृच्छति अथेति तत्तीपक्षेणोऽस्वाधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणत्वसामान्याभावरूपाव्यवधानाभावस्फुटीकरणाय तत्तोपक्षणसामिहितांतत्तोपक्षणाव्यवधायकत्वेन तत्तीपक्षणादतिध्वंसम

गदा०
४१

तिपोगित्वे सति स्वाधिकरणक्षणध्वंसाधिकरणत्वं सिद्धिनाशक्षणे सिषाधयिषोत्पत्तौ सिद्ध्युत्तरसिषाधयिषानाशक्षणेऽनुमित्युत्पत्तौ वा वि
शेष्याभावादेवानुमितिपूर्वं पक्षतानिर्वाह इत्यतोऽविरलेति। पक्षतासंपत्तय इति। सिद्धौ सिषाधयिषाविरहस्याविशेषणत्वे उक्तस्थले सिद्धि
द्वितीयक्षणेऽनुमित्यनुत्पत्तावस्याः स्वक्षणमवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नत्वेन सिंषाधयिषोत्पत्तिक्षणेऽपि च तादृशसिद्धिसत्त्वेन
तदभावरूपपक्षताया अनिर्वाहादिति भावः। प्राथमिक इति। सिषाधयिषाविरह इत्यनुषज्यते। स्वक्षणस्येति। विशेषणमित्यनुषज्यते। उत्तरप
ति। पत्रे इति। ज्ञानेच्छयोर्युगपदुत्पादमते सिषाधयिषोत्पत्तिकालसिद्ध्युत्पादिसिद्धिध्वंसपरामर्शरूपत्वे परामर्शोत्पत्तिकाले सिषाधयिषासत्त्वादेव वि
शिष्टाभावेन निर्वहत इति क्रमेणेति अविरलक्रमेणेत्यर्थः। सिषाधयिषासिद्ध्योरंतरा क्षणैकविलंबे सिषाधयिषाविरहेण क्षणे विशेष्या
पि पक्षतानिर्वाहस्य च क्षमाणत्वात् सिद्धिपरामर्शयोः परामर्शानुमित्योरं कालक्षव्यवधानेनोत्पत्तौ विशेष्याभावादेव विशिष्टाभावसंप
त्तेश्च सिषाधयिषानुमितित्वप्रकारकेच्छा अनुमित्यात्मकसिद्ध्या विच्छायाः स्वविषयसिद्ध्युपहितत्वात्तदुत्तरमनुमित्यंतरोत्पत्तिरेव न सं
भवतीति मात्स्थिकेति पक्षतासंपत्तये इति सिषाधयिषाविरहस्य क्षणविशेषणस्यानुपादाने तत्रानुमित्युत्पादक्षणस्य सिद्धिक्ष

रामा
४१

णध्वंसाधिकरणपरामर्शोत्पत्तिक्षणध्वंसाधिकरणत्वेन सिद्धिक्षणाव्यवहितत्वविरहात्तादृशसिद्धेरपि प्रतिबंधकतापत्त्या पक्षतानुपपत्तिः त
द्विशेषणोपादाने च सिद्ध्युत्पत्तिक्षणस्य सिषाधयिषाविशिष्टत्वात् सिषाधयिषाविरहविशिष्टस्य क्षणः परामर्शोत्पत्तिक्षण एव तद्ध्वंसा
धिकरणकालध्वंसानधिकरणत्वरूपमव्यवधानमनुमित्युत्पादक्षणस्यास्त्येवेति पक्षतोपपत्तिभावः पक्षताविरहे तु सिद्ध्युत्तरक्ष
णस्यापि सिषाधयिषाविरहविशिष्टतयानुमित्युत्पादक्षणस्य तादृशक्षणध्वंसाधिकरणकालध्वंसाधिकरणतया तत्सामान्याभावा
त्मकतादृशक्षणाव्यवधानविरहादिति भावः यद्यपि सिषाधयिषाविरहविशिष्टानुमित्यव्यवहितपूर्वक्षणवृत्तिसिद्धित्वं विशिष्टसि
द्ध्यभावस्य पक्षतात्वमंगीकृत्याप्युक्तानुपपत्तिः शक्यते वारयितुं तथाप्यव्यवहितोत्तरक्षणोत्पत्तिघटितपक्षतापक्षस्याक्षिप्तत्वात्तत्रैव
दोषोद्धारः द्वितीयक्षणसाधारणमव्यवधानं निवेश्य शंकते अत्र यदीति। तृतीयस्यापि क्षणस्याव्यवहितोत्तरत्वमिति। क्षणद्वयानुगमकस्व
क्षणत्वेन स्वक्षणमनंतर्भाव्य प्रातिस्विकरूपेण स्वक्षणस्याव्यवधानशरीरे निवेशनोपत्वात्। तृतीयक्षणे च स्वोत्पत्तिक्षणध्वंसाधि
करणद्वितीयक्षणध्वंसाधिकरणत्वेपि स्वाधिकरणद्वितीयक्षणध्वंसाधिकरणकालध्वंसानधिकरणत्वेन स्वक्षणाव्यवधानसा

गदा०
४३

क्षणत्वादितिभावः। द्वितीयमतेपि क्षणसाधारण्यात् स्वक्षणध्वंसाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपानुगता
अवधाननिवेशनेनसंभवति। अपि साधुस्यात्मकसिद्धिचतुर्थे सिषाधयिषापेचमक्षणोत्सत्त्रानुमितौ व्यभिचारस्यादवस्थानात्। चतुर्थे
क्षणसाधारणानुगताव्यवहितोत्तरत्वस्यैकस्यैव तन्निवेशे चतुर्थे क्षणोत्पन्नानुमितावपि साधु अनात्मकसिद्धेरप्रतिबन्धकतापत्तेरिति
शेषं। अपि साधु द्विद्वितीयक्षणावधिकक्षणत्रयमतेस्तु स्वद्वितीयतृतीयक्षणसाधारणमनुगताव्यवहितोत्तरत्वमेकान्तरं
गानिवृत्तिस्वध्वंसेति। उभयमत्र कालपरं कालिकसंबन्धेन स्वध्वंसवत्त्वाभावापत्तिर्न स्वध्वंसे स्वक्षणस्य स्वनाशविषयकध्वंसे देहा
न्तनाशवत्त्वेपि न सत्संज्ञाप्रसिद्धिः नवा स्वपूर्वकालस्यापि तत्पूर्वकालीनस्वविषयकत्वान्नाशवत्त्वेपि तदुत्तरत्वस्य तत्साधारण्य
प्रसंगः एवं सति यत्र सिषासिद्धिपरामर्शानुमितीनां क्रमेणोत्पादस्तत्र सिद्धेः स्वक्षणे सिषाधयिषाविरहविशेषणमन्तरेणा
पि अव्यवहितोत्तरक्षणोत्पन्नानुमितिकत्वनिवेशादुक्तप्रथमविशिष्टाव्याप्त्यसंगतेः स्थलान्तरे तद्व्यावृत्तिमाह तथाचेति। प्रथ
मक्षणोपक्षतावारणायेति।जास्यासिद्धेः तृतीयक्षणोत्पन्नानुमितिकत्वानिरूपकसिद्धिमत्त्वविरहेणापक्षणप्रसक्तेरितिभा

राम०
४३

वः प्रथमक्षणे पूर्वं च सिषाधयिषाविरहविशेषणासत्त्वेऽपि स्वनाशाधिकरणकालध्वंसानधिकरणत्वघटिताव्यवहितोत्तरत्वनिवेशकत्वेन। कातिप्रसंगवारणसंभवः अनुमित्युत्पत्तिक्षणोत्पत्तिस्थिनाशाधिकरणकालध्वंसानधिकरणत्वस्य सिषाधयिषाविरहविशिष्टत्वसित्त्वअधिकरणप्रथमक्षणध्वंसाधिकरणत्वस्य च सत्त्वादतोऽव्यवहितोत्तरक्षणे तस्य विशेषणतामाह। उत्तरेति। तथा चोक्तस्थले सिद्ध्यव्यवहितोत्तरतृतीयक्षणेऽपि सिषाधयिषासत्त्वात् सिषाधयिषापिषाविरहविशिष्टतादशक्षणोत्पत्तिकत्वेनानुमितेरिति तादशसिद्धेरनुमितिप्रतिबंधकतानिर्वाहः द्वितीयविशिष्टांतस्य पद्विशेषणत्वं प्रयोजनकत्वे वा प्रागभिहितं इदानीमपि तस्य तद्विशेषणत्वं तत्प्रयोजनकत्वं तत्तु प्रथमविशिष्टांतवदन्यादृशमिति प्रदर्शयितुं पूर्वोक्तमप्यनुवदति। द्वितीयेति। सिद्धेर्विशेषणमित्यस्तु षज्वते तत्रैवेति। यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्रैवेत्यर्थः द्वितीयक्षण इति द्वितीयक्षणेऽनुमितिनिर्वाहार्थमित्यादिः पक्षतासंपत्तये इति। विशेषणाभावेन विशिष्टाभावरूपपक्षतानिर्वाहायेत्यर्थः अन्यथा उक्तक्रमेण तादशसिद्धेर्निरुक्तसिद्धिभिन्नतया विशेष्यसत्त्वेन पक्षतानुपपत्तेरिति भावः ननु दर्शितस्थले प्रथमक्षणे पक्षतासत्त्वेऽपि न क्षतिः सिषा

धयिषाकालेनुमित्युत्पादस्येच्छासामग्र्याप्रतिबंधनापि संभवात् इत्थं च निष्प्रयोजनकतया प्रथमविशिष्टांतानुपादाने द्वितीयमपि निष्प्रयोजनं तादृशसिद्धेः स्वाव्यवहितोत्तरततीयक्षणीयस्यानुमितिकत्वपे वा प्रतिबंधकत्वेनततीयक्षणोत्पन्नानुमितिनिर्वाहादित्याशयेनेच्छासामग्र्या अनुमितिप्रतिबंधकतामतेन तदुभयं परित्यजति· पदद्वयेति इच्छासामग्र्यपेक्षयानुमितिसामग्र्या हीनबलत्वेपि अनुमित्साविशिष्टायाः अनुमितिसामग्र्या इच्छां प्रति प्रतिबंधकत्स्य न स्यावश्यकतया तस्या बलवत्त्वकल्पनमुचितं अन्यथा इच्छासामग्र्यपि क्षयाबाधादिरूपानेकप्रतिबंधकाभावघटिततया गुरुशरीरया अनुमितिसामग्र्याः प्रतिबंधकतायामिच्छानिवेशेन गौरवात् इति पुत्साज्ञाने इच्छोपयोगपक्षस्वीकारसंभवे पीच्छासामग्र्या अनुमितिविरोधिताव्यवस्थापनं न संभवतीत्याशयेन पदद्वयमुक्तं। सिषाधयिषाविरहविशेषणसार्थक्यस्याशक्यत्वे अनुमित्यव्यवहितपूर्ववर्तित्वं परित्यज्याव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वरूपगुरुविशेषणोपादानमनुचितमित्याशयेनाह। अनुमित्यव्यवहितेति। अनुमितिपदं स्वसमानाधिकरणानुमितिकं परं अतो व्यधिकरणानुमित्यव्यवहितपूर्ववर्तिसिद्धेः सात्रपेनुमित्यनुत्पाददोषापादकतानिर्वाहः पुन्नाशानंतरमनुमितिरुत्पद्यते तादृशसिद्धेरप्रतिबंधकतावारणायाव्यवहितत्वोपादाने तच्चानुमितिपूर्वकालीनध्वंसाप्रतियोगित्वरूपं पूर्वक्षणो

सिध्यावेव वा विशेषणे पूर्वकालीनत्वं च कालिकसंबंधेन तत्प्रागभाववत्त्वमेव ध्वंसस्य कालोपाधितया तदुपपत्तिः सर्वासामेव सिद्धीनां पूर्वजातप
त्तिं चिरदनुमितिनिरूपिततत्त्रिक्षाव्यवधानवत्तयानुमित्यव्यवहितसिद्धिभिन्नसिद्ध्यप्रसिद्धिरतः पूर्वं क्षणद्वेजित्वविशेषणं पूर्वत्वं प्रागभाववत्त्वं
अनुमितावपि पर्यंतस्यापि स्थूलकालमहाकालसाधारणमित्युक्तदोषतादवस्थ्यमतः क्षणपर्यंतनिवेशने प्रागभावावच्छिन्नवृत्तित्वनिवेशने
ऽप्रतियोगित्वात्तत्सिद्धिविशेषणत्वे च क्षणत्वमनुपादेयमेव जन्यमात्रस्य कालोपाधित्वे तु कालिकसंबंधेन प्रागभाववत्त्वं सिध्यावेव विशे
षणे देपं प्रागभावानभ्युपगमेव स्वसमाणात्तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोपाधित्वे तु कालिकसंबंधेन प्रागभाववत्त्वं सिध्यावेव विशेषणे दे
पं प्रागभावानभ्युपगमेव स्वसमाणात्तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपमव्यवहितपूर्वत्वमेव क्षणविशेषणात्तदुभयदलानामावृत्तिरग्रे
व्यक्तीभविष्यति अनुमित्यव्यवहितपूर्ववर्तिना आत्ममनोयोगादेस्तादृशसिद्धिभिन्नतयाऽप्रसक्तप्रतिबंधकतावारकद्वितीयसिद्धिपदसार्थ
क्यापत्त्यप्रसिद्धिपदं नैव स्यात्तन्नाड्रीतिम्नापनेनोभयपरित्यागएवोचित इति वाच्यं तथा सति बाधबुद्ध्यादेरपि निरुक्तरूपेणैव प्रतिबंधकतसा
स्वतंत्रे तत्प्रतिबंधकतायाघातान्न च व्याहन्यतां तत्प्रतिबंधकतांतरं न हि तत्क्षतिमावहति किंतु तावता लाघवमेवेति वैयर्थ्यदोषो दुर्वारि

एवेतिचार्यां।एतच्छेषस्य वैयर्थ्याच्चासिद्धेरित्संतेनवस्त्वपरिदर्शनीयत्वात्यद्यप्येवंप्रथमसिद्ध्यनुपादानेपिवाधादेस्वतंत्रप्रतिवंधकताविरो
पभीरूणांहेत्वीपसिद्धिपदोपादानंनाविरुध्येते।अखंडाभावसंपादकत्वेनलक्षणदोषासंस्पर्शादितिप्रथमंतदुपादानमनुचितंतथाप्यनुमि
त्स्यव्यवहितएवेववर्तिवर्तिनांस्वत्वघटितेननिरुक्तरूपेणानुगमासंभवेनतत्तद्व्यक्तित्वेनतेषांभेदकूटस्यैवनिवेशनीयतयासिद्धौसिद्ध्यतिरिक्त
तादृशपदार्थभेदानामव्यावर्तकानांनिवेशगौरवात्सिद्धव्यक्तीनामेवभेदानिवेशनीयाइत्येतत्सूचनायप्रथसिद्धिपदोपादानं।अतएवाग्रे
तत्तद्व्यक्तित्वेनसिद्धव्यक्तीनांभेदनिवेशेभेदानांविशेष्यविशेषणभावेविनिगमनाविरहेणमहागौरवात्फलानुसारात्सिद्धिनिपसिद्धिव्यक्ती
नांतत्तद्व्यक्तित्वेनप्रतिवंधकतापक्षएवसाध्यापान्नसिषाधयिषाविरहविशेषणपरित्यागश्चानुचितःसिषाधयिषाकालीनसिद्धिव्यक्तीना
मनंतानांतत्तद्व्यक्तित्वावच्छिन्नभेदकूटनिवेशापेक्षयातद्विशेषणदानस्यैवनचितत्वादितिकथंचिदनुगमप्रकारःपरिचिंतनीयइतिसिद्धे
वैयर्थ्यमित्याशयेनचैयर्थ्याच्चेतिवक्ष्यति।तादृशसिद्धीनां।भिन्नांतपरिचेपसिद्धिव्यक्तीनांनिरुक्तरूपेणेतिनिरुक्तसाध्यमित्वत्वविशिष्ट
सिद्ध्युत्तरंसिषाधयिषोत्पत्तावनुमितिःसिषाधयिषोत्पत्तिक्षणेनुमितिवारणायकल्पनीयप्रतिवंधकत्वकतादृशव्यक्तौसिषाधयिषाविरहवै

शिष्टनिवेशनस्यावश्यकत्वपाकसेति ननूक्तवित्सिषाधयिषाविरहविशेषणस्यावश्यकत्वमात्रं तदभिप्रायेणैवमुक्तेन तदुपादानसंगतिरतो
दषणांतरमाह तत्तत्समयेति। तत्तदात्मनिगमनाविरहेणाक्रमिकसिद्धिसिषाधयिषानुमित्युत्पत्तिस्थले सिषाधयिषोत्पत्तिक्षणोनुमितिग
रणाप्रसिद्धेः सिषाधयिषाविरहविशिष्टतत्तद्व्यक्तित्वेन प्रतिबंधकत्वापेक्षया लाघवेन च प्रतिबंधकतापत्तेरित्यर्थः तथा च मूलोक्तस्य सिषाध
यिषाविरहविशिष्टसिद्ध्यभावस्य पक्षतात्वाघात इति भावः। ननु तत्समयेः समूततत्तदात्मनो संबंधाः स्वरूपानतिरिक्ताः तथा च तत्तदात्मस्वरू
पस्य तत्तत्समयस्वरूपस्य वा संबंधस्य प्रतिबंधकत्वे तत्तदात्मन्यस्मदादितत्तत्समये चान्यत्रात्मनि अनुमित्युपपत्तिरतोऽत्रान्यसमप्रतिबंधक
तां प्रसंजयति· तत्तत्समयेति। सिद्ध्यनंतरं सिषाधयिषाद्वितीयक्षणोत्पन्नानुमितिस्थले इत्यादिः सिद्ध्यभावेतरसकलकारणाधिकर
णतत्तत्क्षणावच्छिन्नानां तत्तदात्मविशिष्टतत्तन्मनोयोगादिव्यक्तीनामित्यर्थः सामानाधिकरण्यसंबंधेन सिषाधयिषाविरहावच्छिन्ना
यास्तत्तत्सिद्धेः प्रतिबंधकत्वापेक्षया लाघवादिति भावः। नियामकाभावात्। नियामकाभावप्रसंगात् सिषाधयिषाविरहविशिष्टसि
द्धिसत्त्वे द्वितीयक्षणानुमित्युत्पादनिर्वाहायाः निरुक्तसिद्धिभिन्नसिद्ध्यभावरूपपक्षतामात्रमनुमित्युत्पादनिर्वाह्यात् तदभावस्य वान्योमात्र

गदा०
४६

पक्षिपात्त्रनुमितस्तत्ताद्यनुसारमपोतत्वासंभवादिति भावः तादृशान्योन्याभावप्रसक्तो दोषतावादिनं प्रतिवंध्या निरस्यति नवेत्यादिना। एवकारार्थेन।
स्याः उत्पत्तेः कारणतावच्छेदकावच्छिन्नसमाजाधीनत्वकथनेन तस्याः कारणतावच्छेदककुक्षिनिवेशोऽन्योन्याभावः सूचितः तथा सति मापशः
कारणतावच्छेदकावच्छिन्नसमवधानस्यापि अग्रेतनकार्योत्सधानत्वापातात् निविशते। निवेशमाने महद्दूषणं वेहं। अथवीक्तपक्षतायाः कार्योत्प
त्तिनियामकत्वमेव न वेत्यादिना निराकृते। कारणतावच्छेदककोटावित्यादेः कार्योत्पत्तिनियामकतावच्छेदकघटकं इत्यर्थः अत्रातोऽन्योन्याभावप्रवेशेऽप्य
तिवंधास्वीकारपक्षे· तथा सतीतीत्येवेत्याद्युपपद्यपि स्वरूपणाव्यवहितोत्तरक्षणो सतिकत्वं स्वत्वघटितत्वेन तत्तद्व्यक्तिविश्रान्तमिति भिद्य
जियोगितावच्छेदकगर्भिततद्विशेषणार्थक्यात् तत्सहचेपव्यक्तीनां तत्तद्व्यक्तित्वेन भेदासिद्धौ विशेषणीयाः तथा च कारणतावच्छेदकस्य नो
त्पत्तिघटितत्वं तथापि भिद्यकूटनिवेशे विशेषणविशेष्यभावे विनिगमनाविरहेण कारणतानेसंदुष्परिहमेवेति भावः। कार्योत्साहादि
कमित्यादिपदेन तादृशगौरवमप्योजकमेद्कूटस्यापि परिग्रहः तस्य कारणतावच्छेदकत्वेऽतीप्रसक्तिवंदेरेव संगतः अनुमित्यव्यवहितपू
र्वोत्सत्त्रपरामर्शादितोऽनुमितस्तुतं रमनुमितेर्योरिणापोत्पत्तिकालावच्छिन्नत्वविशेषितेनेति। स्वाधिकरणसमयध्वंसवदन्यकालत्वसंबंध

राम०
४६

विशेषितेनेत्यर्थः तादृशध्वंसवत्त्वं कालिकसंबंधेनानेनोत्पत्तिक्षणस्यापि प्रतियोगितादिसंबंधेन स्वाधिकरणकालध्वंसावच्छिन्नत्वेपि तत्क्ष
तिः एवं च कालिकसंबंधेन तादृशध्वंसवदात्मसंबंधविशिष्टस्य ज्ञानादेर्द्वितीयक्षणे सत्त्वादुक्तातिप्रसंगतादवस्थ्यमतः कालपदं। तादृश
कालसंबंधस्योत्पत्तिक्षणावधिपात्रावच्छेदकत्वे सत्यविशेषणे सति विशेषणविधया तथात्वस्याप्रयोजकत्वादनुपयोगाच्चावच्छिन्नांतस्य कर्मधा
रयमध्यप्रवेशप्रयुक्ते स्वावच्छिन्नत्वविशेषितेनेत्युक्तं। विशेषणत्वं च स्वसामानाधिकरण्यसंबंधेन बोध्यं। धर्मिणो विशेष्यत्वात्कालांतरी
णानुमितिसमानाधिकरणघटज्ञानादिरनुमित्सापत्तिवारणाय स्वक्षणाव्यवहितोत्तरक्षणे सत्त्वमनुमितिविशेषणं। तदर्थश्च स्वा
धिकरणकालत्वे स्वाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणोपक्षणः स तु तत्रत्वसंसर्गतनिवेश्यः।
त्त्वोत्तरतृतीयक्षणे सच्चानुमितिकज्ञानादिजन्यस्तद्द्वितीयक्षणे नानुमितिप्रसंगः तादृशानुमितिकसंस्कारद्वितीयक्षणेनुमितिवा
रणाय स्वाधिकरणत्वे सत्युपेक्षिततृतीयादिक्षणसत्त्वज्ञानाद्यनधिकरणत्वेपि संस्काराद्यधिकरणत्वाक्षतेस्तादृशापेक्षाबुद्धि।
द्वितीयक्षणेऽनुमितिवारणानुरोधस्तु न तदुपेक्षाबीजं तदानीं समानाधिकरणविशेषगुणांतरस्याप्यनुत्पत्तेस्तत्ममोजकादेश

नुमित्यनुत्पादोपपत्तेः अपेक्षाबुद्धिद्वितीयक्षणे समानाधिकरणविशेषगुणोत्पादोपगमे त्वपेक्षाबुद्धेस्तृतीयक्षणावस्थायिताया एवानु
पपत्तेः वस्तुतस्त्वपेक्षाबुद्धेर्द्विक्षणावस्थायितामत एवैतन्मतिर्वह्निमद्दर्शने । अन्यथासिद्ध्यादि द्वितीयक्षणे तत्रापेक्षाबुद्ध्यात्मकपराम
र्शत्तृतीयक्षणेऽनुमित्यनुपपत्तेस्तस्यास्तृतीयक्षणपर्यन्तावस्थानमते द्वितीयक्षणे विशेषगुणानुत्पत्तौ तदानीमनुमित्युत्पत्तिकालावच्छिन्नसवि
षयकसत्त्वस्य दुर्घटत्वादित्यवधेयं अनुमितेः स्वसमानाधिकरणानुमित्युत्तरोत्पन्नज्ञानोत्तराद्यनुमित्युत्तरोत्पन्नज्ञानोत्तराद्यनुमितिमसं
गवारणायाधिकरणान्तं क्षणविशेषणं । स्वपूर्वकालावृत्त्यनुमितेरपि स्वाव्यवहितोत्तरत्वाक्रान्तस्वद्वितीयक्षणपर्यन्तस्यापि स्थूल
कालोत्पत्तत्र तत्पातदोषतादवस्थ्यमिति क्षणत्वनिवेशः अनुमितेः स्वाव्यवहितोत्तरक्षणवृत्तिस्वसमानाधिकरणस्वात्मकानुमिति
कत्वपातद्वारणायोत्पत्तिनिवेशः वस्तुतस्तु स्वान्यत्वनिवेशादप्युत्पत्तिनिवेशप्रयोजननिर्वाहः नच तथासत्यपेक्षाबुद्ध्यात्मकानुमि
त्यनन्तरोत्पन्नज्ञानादनुमित्यापत्तिस्तादृशज्ञानस्य स्वाव्यवहितोत्तरक्षणवृत्तिपूर्वक्षणोत्पन्नानुमितिकत्वादिति वाच्यं अपेक्षाबुद्धिद्वितीय
क्षणे विशेषगुणान्तरानुत्पादे अपेक्षाबुद्धेर्द्वितीयक्षणमात्रस्थायितामत एवैषामतिर्वह्निरित्युक्तत्वात् पुरुषान्तरीयानुमित्यव्यवहि

पूर्वोत्पन्नज्ञानान्तरहतः पुंसोऽनुमितेर्वारणाय स्वसामानाधिकरण्यमनुमितिविशेषणं एकपुरुषीयानुमितित्वव्यवहितपूर्वोत्पन्नद्वित्वाद्वि
तत्वहेतः पुरुषान्तरस्यानुमितेर्वारणाय स्वविषयकत्वनिवेशनेऽनुमितत्वव्यवहितपूर्वक्षणं ज्ञानोत्पत्तिनियमाशंकया ज्ञानत्वमुपेक्षितं व्यक्तीभ
विष्यति चेदनुपरिशात्वबहुव्रीहिप्रतिपाद्यसंबंधांशस्याधिक्यस्यात्र निवेशाद्बहुव्रीहिपरिसाजन्यपुरुषांतरमादस्वसमानाधिकरणेति॥
अत्राप्युत्पत्तिकालावच्छिन्नत्वविशेषितेनेत्यनुपपत्तेरन्यथानुमितित्वव्यवहितपूर्वोत्पन्नज्ञानादेरनुमित्युत्पादिक्षणेऽपि सत्त्वात्तद्वेनाम
प्यनुमित्यन्तरापत्तेः न चानुमितित्वव्यवहितपूर्वक्षणोत्पत्तेर्विशेषणात्तथैव सामञ्जस्ये उत्पत्तिकालावच्छिन्नत्वस्य पृथग्विशेषणत्वमनुपयुक्त
मिति वाच्यं अव्यवहितपूर्वक्षणोत्पत्तेर्विशेषणत्वेनदृष्टकष्टत्वे। शे विशेषणात्तथैव सामंजस्ये त्वक्षणोत्स्वाधिकरणकालध्वंसानधिक
रणत्वरूपस्योत्पत्तिघटकांशस्यैव पथ्योपादानात्प्रवेशेऽलनाद्वीतिन्यायेन तदंशमपि परित्यज्य स्वसमानाधिकरणानुमितित्वव्यवहितपू
र्वक्षणवृत्तित्वविशिष्टज्ञानत्वेन कारणतासंभवोऽग्रे प्रदर्शयिष्यते एवञ्चानुमितौ सामानाधिकरण्यविशेषणमप्रयोजनं पूर्ववत् अ
नुमितित्वव्यवहितपूर्वत्वं प्रागभावसत्त्वे तत्प्रागभावाधिकरणकालस्वप्रागभावानधिकरणत्वे सति तत्प्रागभाववत्त्वं अनुमितिपूर्वविनष्ट

गदा° स्वतदुत्तरोत्पन्नस्य च घटज्ञानादेर्वारणाय इत्यद्रूपं स्वाव्यवहितोत्तरत्वघटकात्स्वाधिकरणकालध्वंसासमानाधिकरणत्वस्य स्वसंसर्गतादेरतदीयसंसर्गत्वस्य लघु
त्वादप्यतत्कल्पे लाघवं चेद्ध्वंसप्रागभावानंगीकारे तद्घटितं वक्ष्यमाणाव्यवहितपूर्वत्वमेव निवेश्यं अनुमित्यव्यवहितपूर्वस्मिन्तदुत्तरस्यापि स्थूलका
४८ लेऽनुमित्युत्तरमुत्पन्नस्य घटादिज्ञानस्य वारणाय क्षणत्वनिवेशनं । अनुमितिप्रागभावविशिष्टोत्पत्तिकत्वविवक्षणे क्षणपदं कालपरमेव अनु
मित्यव्यवहितपूर्वक्षणस्यापि न तत्पूर्वत्वात घटज्ञानादितोऽनुमितिपूर्वमनुमितेर्वारणायोत्पत्तिनिवेशनं पूर्ववह्नित्वादिवारणाय सवि
षयकत्वनिवेशनं ज्ञानत्वोपेक्षया पांवीतमपि पूर्ववद्बोध्यं अत्रोभयत्र स्वत्वघटितत्वेन तत्तद्व्यक्तिविश्रामादननुगम इति प्रांति । योगिनिस्वत्व
मेतद्धर्म्यानुगतमेकं कूटघटितधर्मेणाकारणतोऽप्रसंगपत्तिस्वक्षणेति । स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमि
तिकं स्वं अनुमितिसामग्र्यसमवधानक्षणो ह्यत्र घटज्ञानादिकमेव तदन्यसविषयकोऽनुमित्यव्यवहितपूर्वक्षणोऽत्र तत्समानाधिक
रणपरामर्शादिरतस्ततोऽनुमित्युपपत्तिः तादृशादेव परामर्शादनुमित्यनंतरानुमितिवारणाय अत्राप्युत्पत्तिकालावच्छिन्नत्वविशे राम°
षितत्वेन सनुषपततेन चैवं स्वोत्पत्तिक्षणावच्छिन्नत्वस्यानुयोगिनिवेशेनानुगमस्यावश्यकतया मपासोपम फलं इति वाच्यं तत्र हस्तनिष्ठ

तत्तदधिकरणसमयध्वंसाधिकरणसंबंधाज्ञातमभावकूटविशिष्टत्वस्यैवात्रोत्पत्तिकालावच्छिन्नतार्थत्वात्तादृशस्य चानुगतत्वात्स्वसमानाधिक
रणानुमितित्वावच्छेदेन स्वस्मरणाव्यहितोत्तरस्मरणानुत्पत्तिकत्वं विवक्षणीयं अतोऽनुमितौ स्वादृकपरामर्शाद्यधिकरणक्षणाव्यवहितोत्तर
स्मरणानुत्पत्तिकत्वस्यात्तत्परामर्शसमानाधिकरणकालोत्तरीयानुमितौ सत्वेपि तत्तत्सविषयके भेदृशमासिद्धिः स्वक्षणाःव्यवहितोत्तरत्वं प्र
वेनिरुक्तं आद्यं तत्सुषुप्तीययादृशघटज्ञानाद्युत्तरं तदीयानुमितावनुसत्रापामेतत्स्य पुंसो मुक्तिस्तादृशमेव घटज्ञानादिकं स्वाधिकरण
समयोत्तरं स्मरणानुत्पत्तिकत्वसमानाधिकरणानुमितिसामान्यकमिति परामर्शाद्यसमवहिताः तदन्यघटज्ञानादितोनुमित्यापत्तिरतस्त
त्स्याः स्वपदेनोपादानासंभवादतो व्यवधाननिवेशः निरुक्ताव्यवधानस्य चानुमित्सनुत्पादकघटज्ञानादेः पूर्वं कदाचिदुत्पन्नाय तत्राप्यनुमि
तेरुत्पत्त्यधिकरणक्षणोऽव्यवहितोत्तरत्वस्य तादृशानुमित्सुतितादृशघटज्ञानादिद्वितीयक्षणपतनस्यापि स्थूलकाले सत्त्वात्तादृशं स्वमप्रसि
द्धमेव स्यात् अत उत्तरत्वक्षणत्वयोर्निवेशान अनुमितेः स्वाव्यवहितोत्तरक्षणवृत्तिस्वात्मकानुमितिकतया स्वपदेनोपादानासंभवाज्जतोनुमि
त्यंतरापत्तिरत उत्पत्तिनिवेशः व्यधिकरणानुमित्यव्यवहितपूर्वोत्पन्नघटज्ञानादिवारणाय समानाधिकरणपमनुमितिविशेषणं

गदा०
४८

द्वितीयकल्पेनुमितिव्यवहितपूर्वक्षणोत्पत्तिमुपलक्षणीकृत्य पृथगुक्तमिति कालस्य विशेषणतया निवेशापेक्षया तादृशक्षणोत्पत्तिघटकतादृशक्षणत्वेति स्व
स्वविशेषणतया निवेशनमेवोचितं तावतैवातिप्रसंगभंगादिसामञ्जस्येनाह:। किंवृत्तिपदस्याहृत्तिस्फुटेवमादृशपरामर्शद्वितीयक्षणे किमतः पित्तानंनोत्पत्र
जनीयक्षणे चानुमितिर्वृत्ता तत्र परामर्शरूपज्ञानस्यैवानुमित्यव्यवहितपूर्वक्षणावृत्तित्वविरहस्यानुमित्यव्यवहितप्राक्क्षणे सत्त्वाज्ज्ञानत्वमप्ये
क्ष्यसविषयकत्वनिवेशनमफलमित्यतो ज्ञानत्वमेवात्र निवेशितं अत्रानुयोगित्वस्वत्वात्तर्भावे तानननुगमकतानापादकतेनोपपः पूर्वकल्पदूषितत्वात्सत्वान्त
गौरवस्य काधिक्यात् अननुगमास्तहिस्तु गंधानुतत्तद्व्यक्तिनिष्ठतत्तद्व्यक्तिसमानाधिकरणानुमित्यव्यवहितपूर्वत्वानधिकरणसंबंधानामभावकूट
विशिष्टज्ञानत्वेन कारणत्वमस्त्विति वोध्यं न चोपदर्शितसकलरूपोपपक्षपालिंगता। परामर्शत्वस्य पुतमति नैवंरूपेण परामर्शहेतुत्वमवितमिनिनम
ति वंघवकामारति ताव्युत्क्रमरूपेण हेतुत्वे कारणतहिरहदृशापामनुक्तरूपावच्छिन्नविरहेणो वानुमितिवारणं संभवात् कारणांतरस्याकल्पनी
यत पालिंगपरामर्शत्वापेक्षयाऽन्तछ्रीरगौरवस्याकिंचित्करत्वात् ननुपन्न घटज्ञानाही द्वितीयक्षणे लिंगपरामर्शस्तदुत्पन्नानुमितिस्तत्र परामर्शो
ऽसति द्वाक्षणेपि अनुमितिप्रसंगः प्रथमक्षणमपेक्ष्य द्वितीयस्यैव द्वितीयक्षणमपेक्ष्य ततीयस्यापि क्षणस्याव्यवहितोत्तरत्वेन तादृशघट

एम०
४८

त्तानादेः स्वक्षणाव्यवहितोत्तरक्षणोत्पन्नानुमितिकत्वादिसत्त्वादाह: अव्यवहितोत्तरश्चेति द्वितीयक्षण एवेति अव्यवहितोत्तरत्वमध्ये स्वक्षणस्य
नमातिरिक्तरूपेणानिवेश्यः किं तु स्वाधिकरणकालत्वेन तथा च स्वाधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणत्वसामान्याभावस्य स्वद्वि
तीयक्षणे सत्त्वात्तत्तत्स्याव्यवहितोत्तरत्वमिति भावः पूर्वरूपस्तत्र प्रतानत्वमपेक्ष्यतविषयकत्वविशेषणप्रयोजनं स्फुटयितुमाशंकते न चा
रिमे विति शिपकत्वे विनश्यदवस्थपरामर्शजन्यानुमितिस्थलेऽप्यव्यवहित एवं क्षणाहतित्वविशिष्टस्य परामर्शस्यैवानुमित्सव्यवहित
पूर्वं क्षणे सत्त्वान्नानुपपत्तिरित्यत आह इमेशिष्टुकं अत एवान्वादितिद्वितीयक्षणेऽनुमित्यनुत्पत्तात्तत्कारणतावच्छेदकानाक्रान्तत्वादुत्प
तिकालावच्छिन्नत्वस्यानुमित्यव्यवहितप्राक्क्षणे सत्त्वाच्चेत्यर्थः अनुमित्युत्पत्तिक्षणार्वदर्शितस्थले अनुमितिपूर्वमपि परामर्शेनमति
वधादनुत्पत्त्यसाध्यादिनैतत्समर्हतीति: शंकानिरासायान्ऽभिरासायानुमितिसामग्र्याविरोधिन्याविरहेणेति। परामर्शमात्रं न प्रतिबंधकमपि
त्वनुमितिसामग्र्येव तदा न तत्सामग्री तस्याः फलाव्यवहितप्राक्त्वलएव सत्त्वादिति तदानीं तादृशपरामर्शद्वितीयक्षणेऽनुस्यवृत्तापदि
रिसादिनासत्रिहृष्ट एवस्त्वेतरत्तानपरिग्रहः ननु यत्र परामर्शसत्त्विकाले समानविषये लौकिकचाक्षुषादिप्रत्यक्षस्याभिन्नविषये च श्रा

ग॰टी॰ ५०

द्बोधस्य सामग्र्यासीत् तत्र द्वितीयक्षणे विनिगमनाविरहेण किमपि ज्ञानं न जायते सकलज्ञानसामग्रीषु प्रतिबंधकसमवधानस्य तुल्यत्वात् ततस्तत्र द्वितीयक्षणे प्रत्यक्षादिसामग्र्या विगमे तत्तृतीयक्षणे नानुमितिः स्यात् उक्तकारणतावच्छेदकाक्रांतज्ञानाभावादित्यत आह अंततरिति। कथंचित् ज्ञानानुत्पादेपीत्यर्थः संस्कारादिति। तस्यापि सविषयकत्वघटिततत्कारणतावच्छेदकाक्रांतत्वादिति भावः न च तत्र परामर्शादिरूपज्ञानात्मकस्यात्र का गतिरिति वाच्यं फलानुरोधेन तत्रैव संस्कारकल्पनाया आवश्यकत्वेन परामर्शादिरूपे ज्ञानत्वस्यैवासिद्धेः नन्वनुमितेः संस्कारजत्वस्योपगमे तस्याः स्मृतित्वापत्तिः संस्कारजन्यज्ञानत्वात् स्मृतित्वप्रयोजकत्वात् आह संस्कारजन्यत्वेनेति निरासादिति। संस्कारत्वेन संस्कारजन्यत्वस्यैव स्मृतित्वप्रयोजकत्वात् अन्यथा कालोपाधिविधयज्ञानांतरेपित्वापमानलिंगकारणतामते संस्कारलिंगकानुमितौ संस्कारस्य हेतुत्वेनातिप्रसंगादिति भावः प्रकृतसामग्र्यापकार्यानुत्पत्तिनिर्वाह्यतावच्छेदकरूपेण प्रतिबंधकत्वमेव प्रकंजयति स्वसामानाधिकरोति। पदत्या एतिरनुमित्यव्यवहितपूर्ववर्तिसिद्धिविशिष्टसिध्यभावपक्षतावद्धेव्याप्तिः सिध्यभावपक्षतावद्धेव्याप्तिस्वात्मकपरामर्शानंतरं सिषाधयिषोत्पत्तिकाले सर्वत्र तदात्मसमवेतधर्मनाशस्याप्रामाणिकत्वेपक्रनन्नाशस्तत्र प्रथमप्रतिबंधकतावच्छेदकावच्छिन्नस्यासत्वेनातिप्रसंगसम्भवात् अस्यांतरमाह स्वसमानविषकरोति। उक्तस्थले परामर्शादिरनुमित्यव्य

रा॰म॰ ५०

वहितपूर्वक्षणावृत्तित्वेपि तदुत्तरक्षणस्यानुमित्यव्यवहितपूर्वत्वानधिकरणतापाताद्वृत्तित्वविशिष्टत्वेन तस्य प्रशरीरे च प्रतिबंधकत्वान्नात्र कस्येतादृशासंले
सिषाधयिषोत्पत्तिकालेऽनुमितिप्रसंग इति भावः अत्रानुमितेरव्यवहितपूर्वत्वं वक्ष्यमाणतदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वं अत्र क्षणत्वानि
वेशेऽनुमित्युत्पत्त्यधिकरणमहाकालाद्युत्पत्तिकध्वंसमादाय क्षणमात्रस्यैवाव्यवहितपूर्वत्वं स्यादिति क्षणत्वनिवेशनमावश्यकं एवं चेत्तद
पेक्षयातोऽशानुमित्युत्पत्त्यनधिकरणसमयोत्पत्तिकध्वंसप्रतियोगिक्षणवृत्तित्वविशिष्टत्वेन प्रतिबंधकत्वमेवोचितं अनुमित्युत्पत्त्यनधिक
रणसमयस्य क्षणत्वेनानिवेशोपि क्षतिविरहात् अनुमित्युत्पत्त्यनधिकरणस्थूलकालोत्पत्तिकध्वंसप्रतियोगित्वस्यानुमित्यव्यवहितपूर्वक्ष
णाभिन्नक्षणएवसत्वाच्चरमक्षणे क्षणत्वनिवेशनं चोभयत्रैवावश्यकं अनुमित्यव्यवहितमाद्यक्षणोपि तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्र
तियोगित्वानधिकरणमहाकालादिवृत्तित्वविशिष्टसत्वेन अनुमितिसमयानधिकरणसमयोत्पन्नध्वंसप्रतियोगिस्थूलकालविशेष
वृत्तित्वविशिष्टत्वे न चानुमितेर्नुपपत्तिरित्याशयेनाह तत्समानाधिकरणेति। पद्विवपूर्वकत्वे क्षणत्वनिवेशनमित्सुमत्सुपलक्षितकालो
त्पत्तिकत्वनिवेशेन क्षणावान्यकालावच्छेदेनानुमित्युत्पत्त्यधिकरणमहाकालाद्युत्पत्तिकध्वंसमादायातिप्रसंगः ननु तदुत्पत्तिविशि

गदा०
५१

ष्टोत्पत्तिकत्वनिवेशोतथाच क्षणत्वमनुत्पत्त्यधिकरणकालेननिवेश्यमेवेत्युच्यते तथाप्युपलक्षितोत्पत्तिकत्वापेक्षया विशिष्टोत्पत्तिकत्वस्य गुरुशरीरत्वेप्येव
कत्वान्तरानुसरणं स्वगतिः नचैतत्कालेप्यनुमित्युत्पत्तिविरहविशिष्टसमयोत्पत्तिकत्वमेव ध्वंसे निवेश्यं अनुमित्युत्यधिकरणभिन्नोत्पत्ति
कत्वनिवेशे यत्रानुमित्यात्मकपरामर्शअनंतरजातानुमित्यंतरेच्छावलात्पुनरनुमितिः तत्रानुमित्सोत्पादककालस्य तत्त्वेपरतोवावश्या
नावश्यकतया अनुमित्युत्पत्त्यधिकरणत्वनियमेन प्रथमानुमित्युत्पत्तिक्षणस्यानुमित्युत्पत्त्यनधिकरणस्थूलकालकालोत्पत्तिकध्वंस
प्रतियोगितायादुर्घटतया अनुमित्सोत्पादकालेनुमित्यापत्तेः। अनुमित्युत्पत्त्यभावोपलक्षितसमयोत्पत्तिकत्वनिवेशे अनुमित्सत्ववह्निमा
वक्षणस्थापितहुत्वस्यभावाधिकध्वंसप्रतियोगितायादुर्घटतया अनुमित्सोत्पादकालेनुमित्यापत्तेः। अनुमित्युत्पत्त्यभावोपलक्षित
समयोत्पत्तिकत्वनिवेशे अनुमित्पत्ववह्निमावक्षणस्थापितहुत्वस्यभावाधिकरणस्थूलकालोत्पत्तिकध्वंसप्रतियोगितयान
हृतिपरामर्शादेरनुमितिविरोधितायत्नेः न यावत्साम्यमिति वाच्यं क्षणिकस्मरणाभ्युपगमेऽनुमित्युत्पत्त्यनधिकरणत्वोपलक्षित रम०
समयोत्पत्तिकत्वनिवेशोपि द्वित्रिस्थलेनुमित्सोत्पत्तिक्षणस्यानुमित्युत्पादानधिकरणतयोक्तदोषानवकाशादेतत्कल्पेलाघ ५१

वसंभवात्त्रनुमित्सनधिकरणत्वस्य समयविशेषणत्वेनुमित्सुत्पत्तिक्षणस्याप्यनुमित्साधिकरणसमयविशेषं प्रत्येवाव्यवहितपूर्ववर्त्तित्वात्तदुत्त
रमनुमित्सायति, तत्तदुत्पत्त्यनधिकरणत्वपर्यन्तं निवेशः समयस्याव्यवहितपूर्वत्वं समयोत्पत्तिकध्वंसप्रतियोगित्वमेव न तु वक्ष्यमाणात्तदु
त्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वं तदुत्पत्तिक्षणानिवेशे प्रयोजनाभावात् प्रागभावानभ्युपगन्तृमतेन तदुत्पत्तिकालीनध्वंसप्रति
योगित्वं तत्पूर्वत्वं तथा च तदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तिध्वंसाप्रतियोगित्वं तु अव्यवहितत्वस्य स्वातन्त्र्येणानिवेशनमफ
ले तदुत्पत्तिकालीनत्वस्य स्थले तदुत्पत्तिकालोत्पत्तिकत्वानिवेशने एव व्यवहितपूर्वकालवारणसंभवादिमाशयेनानुमित्साव्यवहित
पूर्वत्वमनुमित्सुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपमेव वाच्यमित्याहुः तदव्यवहितेति अनुमितिस्थितिक्षणोत्पन्नध्वंसप्र
तियोगित्वमनुमित्सुत्पत्तिक्षणासाधारणमतस्तद्वृत्तित्वविशिष्टस्य विरोधित्वोपपत्तये प्रथमोत्पत्तिनिवेशः उत्पत्तिविशिष्टोत्पत्तिक
त्वनिवेशे तत्क्षाभावैव क्षणपदं द्वितीयकल्पानुसरणवीजभूतप्रथमकल्पदोषकथंचिदुद्धर्तुमाशंकते चन्नेति। सिसाधयिषित्व
निकलिकस्य चिरात्मवृत्तिधर्मस्य नाप्येतस्येवानुसरणवीजीभूतप्रथमकल्पदोषकं कथंचिदुद्धर्तुमाशंकते चन्नेति सिसाधयिषी

त्पतिकालिकस्यचिरात्महानिति धर्मस्यनाशेतस्यैवानुमित्तिपूर्ववर्त्तिभिन्नत्वे नविरोधितयानरिष्टां यद्यपियोत्पत्तिकालेऽनुमित्यापत्तिंसंभव इति
तद्विनाशस्यलानुसरणांऽन्यहौपधर्मनाशेपितेनधर्मिणामसासन्नतणाऽन्यहोफन्मितिप्रतिबंधासंभवान्तरंनपुरुषापस्येत्सु
क्षें।यद्यपिपरामर्शानंतरंसिषाधयिषोत्पादस्थलेपरामर्शाव्यवहितंमावक्षणेफलेच्छावश्यमेवरवीकापतिस्याएवसिषाधयि
षोत्पत्तिकालेवश्यंविनाशःतथाप्यपेक्षाबुद्ध्यात्मकफलत्तानाघंदिपरामर्शोत्पत्तिकालेफलेच्छासीत्रिपतेतद्वापद्यपरामर्शस्यति
द्वितीयक्षणेआत्मधर्मविनाशःसंभवतीत्यभिप्रायेणेदंअनुमितौसुखत्वभ्रमदशायांफलेच्छामंतरणोवस्तुत्वप्रकारिणा
नुमितीच्छांसंभवतीत्यभिप्रायेणवासिषाधयिषानंतरमनुमित्यनुत्पादेतत्पूर्वोत्पन्नपरामर्शादेरेवानुमित्यव्यवहितपूर्ववर्त्तिभि
न्नतयाविरोधित्वेननापत्तिःसंभवत्यतस्तदनंतरमनुमितिरित्युक्तं·अनवरतेति·अनवरतपरिस्पंदमानानामपरमितयवनादि
परमाणूनांन्वेतनेनात्मनासमंपःसयोगसंतानःसंयोगधारातदंतर्गतस्यक्षीनांप्रतिक्षणमेवनाशादिमाना नामपरमित
यवनादिपरमाणूनांन्वेतनेनात्मनासमंपःसयोगसंतानः।संयोगधारा।तदंतर्गतस्यक्षीनांप्रतिक्षणमेवनाशादिसर्वः।अप

रिमितानामपिघटादीनामिवस्थिरत्वेसहागतिस्वभावानामपिएकद्व्यादिरूपत्वेमतिक्षणानांसंयोगात्विनाशासंभवस्यपरिक्षितोताम
तिक्षणमात्मसमवेतसंयोगादिनाशस्यसंभवेपिनप्रामाणिकतेत्याशंक्याहः फलानुसारितिः कल्पनासंभवादिति। अनुमितिसुत्पन्नी
रूककारणसंत्वस्याआवश्यकत्वादनुत्पादत्वादस्यासंयोगादिनाशमंतरेणानुपपद्यमानत्वात्इतिभावः ननुतत्रानुमित्युत्पादइतिसा
हायासित्स्वभावादिरूपकारणांतरमेवकल्प्यतांतद्विरहेणापितत्रतदुपत्तेरित्यतआह कारणांतरेणेति नन्वनुमित्यव्यवहितपू
र्ववर्त्तिभिन्नत्वावच्छिन्नाभावस्यकारणतासिद्धौउक्तस्थलेअनुमित्युत्पादनिर्वाहायतत्सदृशकारणाभावोयादृकःसंयोगादिना
शःकल्पनीयःप्रथमंचतादृशकारणताग्रहणअन्यस्थलेवनसंभवतिउक्तस्थलेतदानींतादृशाभावरूपकारणसत्त्वस्यसंदिग्ध
तयाअन्वयव्यभिचारसंदेहादित्यतआहः अन्वयव्यभिचारेति।ककारणत्वग्रहाविरोधित्वादिति।कारणतायाःकार्यव्यापकताग
र्भायाग्रहेयासाभावावगाहितयाव्यतिरेकव्यभिचारग्रहस्यैवविरोधित्वात्तस्यामन्योनिष्ठकार्यव्याप्यत्वेःकार्यकारणभावाघटक
तयातादृशस्यापिविरोध्यन्वयव्यभिचारग्रहस्यकार्यकारणभावग्रहविरोधित्वेमानाभावादितिभावः ननुमतिक्षणमात्मनिसंयो

गदा०
५३

गादिविनाशेपि यत्र दर्शितस्थले सिद्धिरनुमितिस्स्यात्तत्र द्वितीयक्षणाविनष्टसंयोगादेरनुमितिपूर्वमपि सत्वेनाविरोधितयाउक्तापत्तिस्तद
वस्थैवेत्यत आह इपादीयंताद्येति प्रतिबंधकतयात्वोक्तियंताभिसर्थः समयविशेषः यद्यत्रात्मन्यनुमितिर्नोत्पद्यते तत्क्षणाव्यवहितत्पू
र्वक्षणरूपतत्संबंधस्यानुमित्यव्यवहितपूर्वमभावात् एवं च सति प्रतिबंधकतास्वरूपसंबंधेनैव वाच्यः सर्वत्र क्षणविशेषसंबंधस्यै
वप्रतिबंधकतासंभवेन सिद्ध्यादिसाधारण्याभावेपि न क्षतिः क्षणसंबंधस्य स्वरूपातिरिक्तत्वमभ्युपेत्येदं अनतिरिक्तत्वाभिप्राये
णांनुगतेन भेदकूटाघटितलघुरूपांतरेण कारणतां प्रसंजयति: भवेदेति एकपुरुषीयानुमित्युत्पादक्षणे सर्वात्मन्यनुमित्या
पत्तेर्वारणाय पुरुषीयत्वनिवेशः क्षणस्य कारणतावः यद्वा तादृशक्षणस्तदुत्तरं कार्यमिति कालिकप्रत्यासत्त्या बोध्या परामर्शे
साधारण्यानुरोधेनाह: यादृशेति । तदीयानुमित्यव्यवहितपूर्वत्वार्थः यद्यत्र पूर्वोपदर्शितस्वसामानाधिकरण्यस्यानुमितिविशे
षणतयाप्यतिप्रसंगाशंक्यवारणात्तथापि तदवस्थः त्वांतभविनानुगममाशंक्य तत्पुरुषीयत्वघटिते तत्कल्पानुसारेण बोध्यं न चैवं
पुरुषभेदेन कारणताभेदात्सामानाधिकरण्यप्रत्यासत्त्या लिंगपरामर्शत्वसिद्ध्यभावत्वादिना कारणताकल्पनमेवोचितमिति वा

राम०
५३

थं लिंगपरामर्शादेः न कारणताभेदात् सामानाधिकरण्यप्रत्यासत्त्या लिंगपरामर्शत्वमिध्यभावत्वादिना कारणतावत्त्वं नमेवोचितमिति
रणताभेदस्यावश्यकत्वात् पुरुषविसर्प्यालिंगादिनामेव भ्रमत्वात् इत्थंरूपेण कारणतास्वीकारे दोषं प्रदर्शयति तथा चेति उ
पमानादेरित्यादिना शब्दपरिग्रहः प्रमाणान्तरत्वं त्वनुमानबहिर्भूतप्रमाणत्वं सर्वत्रेति उपमानादिस्थले लिंगपरामर्शादिघटि
तानुमितिसामग्र्यनियमात्तत्र प्रमित्यन्तरमुत्पाद्यते अतः उपमानादेः प्रमाणान्तरता अनुमितित्वस्य प्रमितिमात्रवृत्तित्वस्वीकारे कारणस्या
नुमितिसामग्रीत्वेन तस्याः सर्वत्रैव संभवेनोपमित्यादिरूपविलक्षणप्रमितौ वाधित्वापत्तेरिति भावः तन्न सर्वत्रैकजातीयप्रमि
तिसामग्रीसंभवेप्युपमितौ भिन्नरूपेणानुमितौ मोसु नभवसाक्षिकमीमतिवैलक्षण्यं दुर्वारमेवेति नोपमानादेः प्रमाणा
न्तरताभंग इत्यतोन्यद् निश्चमाह विलक्षणेति उक्तरूपेण परामर्शादेरपि कारणत्वात् परामर्शत्वादिनेति अनुमितेस्तु बहि
र्भूतपूर्ववर्तिभिन्नत्वादिना वाधादेरपि प्रतिबंधकत्वादिनेति। कार्यान्तरेषु प्रत्यक्षादिषु कारणानां सर्वेषामादिसिद्धेः कारण
तावच्छेदकेन्द्रियसन्निकर्षत्वाद्यवच्छिन्नानां प्रतिबंधकानां सर्वसंमतप्रतिबंधकतावच्छेदकदोषविशेषत्वाद्यवच्छिन्नानाम

ग॰व्या॰ तथात्वमकारणत्वाभिमतिवंघकत्वं चाप्रसक्तानां अकारणत्वादिना सर्वानुमतानां कार्याव्यवहितपूर्ववर्त्तित्वमपि त्रानामुदासीनवस्तूनां
५४ तथात्वं कारणत्वादिकं प्रसज्येतेति तेषामप्युक्तकारणतावच्छेदकरूपाक्रांतत्वादितिभावः अत एवेति अनुमित्यव्यवहितपूर्ववा-
र्त्ति सिद्धिभिन्नसिद्धेर्नां नतद्यक्तित्वावच्छिन्नाभावस्य हेतुत्वे अनंतकारणताप्रसंगात तादृशसिद्धिभिन्नसिद्धित्वावच्छिन्नाभावहे
तुत्वे तस्यानुमितुस्वरूपधीनतया अन्योन्याश्रयात तत्सिद्धिभेदकूटवत्सिद्धित्वावच्छिन्नाभावहेतुत्वे सिद्धिभेदानां विशेष्यविशेषणभावे
विनिगमनाविरहादेवेत्यर्थः एतन्मतेधिकदूषणमाह वैयर्थ्याच्चेति अनुमित्याव्यवहितपूर्ववर्त्तिमित्रत्वावच्छिन्नाभावस्यैव कारणत्वसं
भवात बाधबुध्यादेरभावस्य परामर्शादेः कारणत्वांजरविलयप्रसंगस्यैवैत्वादितिभावः एतन्मतरवदर्शिततृतीयलक्षणस्याधार
णाव्यवहितोत्तरत्वघटितलक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिद्ध्यभावरूपपक्षतायक्षेपिपूर्वोक्तसिद्धि
पदव्याहतसंगतेस्तद्धैपर्य्यवोध्यनचत्तानेकोपायौगपद्ये सिषाधयिषाकालोत्पन्नानुमितिपूर्ववर्त्तिपरामर्शादिः सिषाधयिषा राम॰
विरहविशिष्टाव्यवहितोत्तरक्षणोत्पन्नानुमितिकभिन्नतया पूर्वं सिषाधयिषाविरहविशिष्टतया चानुमितिविरोधितास्यादितित ५४

त्सार्थकतेति वाच्यं ज्ञानेच्छयोर्यौगपद्ये सिद्ध्युपादानेपि यत्र पूर्वं सिद्धिस्तत्र सिषाधयिषा चतुर्थक्षणे सिद्ध्यनंतरं पुनः सिषाधयिषानुमिति
श्च युगपज्जन्म सिद्धेर्विवरणोक्तेतापत्तेर्हेतुचरित्वात्तन्न च तत्र सिद्ध्युपादाने सिषाधयिषाविरहविशेषणस्यापि वैयर्थ्यमापति
त। यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र सिद्धेरनुमितिविरोधित्वेपि सिषाधयिषोत्पत्तिकाले विनष्टफलेच्छादीनां वि
रोधितयैव सिषाधयिषोत्पत्तिक्षणोऽनुमितिकारणासंभवादिति वाच्यं सिद्धेरनुमितिरूपत्वे इच्छाकालविनिष्टस्य फलेच्छादे
रनुमित्यव्यवहितपूर्ववर्त्तित्वे विरोधित्वासंभवादिति समानविषयकप्रत्यक्षादिसामग्रीकाले पक्षताविरहेणानुमितिं
वारयितुं मूलस्थसाधकमानपदं सिद्धिसाधकमानविशेषणान्यतरपरतया वर्णयतः उपाध्यायस्य मतमाहुः सिषाधयिषे
ति सिद्ध्याविनसाधकमानेप्यनुमित्साया उत्तेजकत्वात्प्रत्येकं तदभावविशेषणत्वे गौरवमिति अन्यतरानवच्छिन्नेनेमलद्विशेष
णतालाभाय समासमनुपेक्षितः अनुमितिपूर्वमनुमानरूपस्यैव साधकमानस्य नियमेन सत्त्वात्सिषाधयिषाविनाकृतस्यानुमि
तिर्न स्यादित्यनुमानातिरिक्तत्वं साधकमानविशेषणं। साधकपदार्थघटकरिष्याधर्म्मेत्यत्रत्व विशेषणं पर्यवसितं। इदं च ला

गदा॰ घवमाशंक्याग्रेनिराकांर्येसाधकमानपदार्थेवितर्क्येइष्यतिसाधकमांनहीतितादृगुपहितंतास्तुतन्मसिद्धिविशिष्टं।तत्सामग्रीसिद्धिकारणस
५५ मुद्दायः अनुमित्सासत्वेतद्भावविशिष्टसाधकमानाभावस्यास्तत्वात्विनानुमित्सामितिअनुमित्सभावप्रसंगावैसिद्धिकारं।।दि
तिकान्निकप्रमासत्सामतिवंधकत्वमिमायोगासमवायेनप्रतिवंधकत्वेआत्मनिसर्वदैववक्ष्यरहिप्रमाणाभावादितिप्रसंगोवोध्यः
अपक्षसामग्रीसत्वेअनुत्पत्तेप्रसक्षइतिशेषः ननुत्रानुमितिवारणायात्मेदेवमतिवंधकमास्थेयंसिस्व्याभावपक्षतामतेपित
द्दावश्यकत्वादित्यतआह अनुमानातिरिक्तेति।तथासतिपक्षताशरीरेअनुमानातिरिक्तसाधकमानानतर्भावस्यानिष्फलत्वादि
त्यर्थः सिस्व्याप्रमवहितसामग्रीदशायामनुमितिवारणस्यैवतत्फलत्वात्साधकमानपदेनसिस्व्युपहितविवक्षणेचतदनि
र्वाहादितिभावः केचित्तुयथाश्रुतानुरोधेनानुमानातिरिक्तेतितन्मात्रपरमेवनचसामान्याःपृथक्प्रतिवंधकत्वेसाधकमा
नपदार्थेस्यसिस्व्युपहितास्यापिनिवेशनमफलमेवेतिवाच्यंप्रत्यक्षविषयेप्रत्यक्षाद्युपहितसन्निकर्षादिघटितप्रत्यक्षादिसा गम॰
मग्रीदशायामेवपरामर्शादिसमवधानेतत्रानुमितिवारणायगादेशसाधकमानस्यैवपक्षतांपनिवेशयितुमुचितत्वात्न ५५

च तत्रापि सिद्धिप्रतिबंधकतयैवोपपत्तौ मित्स्युपहितनिवेशनमफलमिति वाच्यं शाब्दसिद्धिकाले शाब्दज्ञानं जायतामितीच्छाबलादनुमित्सु
पपत्तये सिद्धौ तादृशेच्छाया आवश्यकत्वे जनकत्वोपगमान्न तथाविधेच्छावत्त्वाद्युपदर्शितप्रत्यक्षसामग्र्यनंतरंमनुमितेर्वारणाय सा
धकमानांतर्भावसार्थक्यात् न च मित्स्युपहितचक्षुःसंयोगादिसत्त्वे आलोकसमवधानाद्यसत्त्वे तादृशेच्छाबलादनुमित्सु
मत्वात् साधकमानेपि तादृशेच्छाया आवश्यकत्वात्प्रत्यक्षतायां तदंतर्भावेप्युक्तापत्तिवारणासंभव इति वाच्यं यत्र विषयविशेषे
प्रत्यक्षोपहितचक्षुःसंयोगादिसत्त्वे इतरकारणासमुदायसत्त्व एवाशाब्दज्ञानं जायतामितीच्छा न तु इतरकारणाभावविशिष्ट
तादृशचक्षुःसंयोगादिसत्त्वे तत्र तादृशेच्छाभावस्य प्रत्यक्षोपहितचक्षुःसंयोगादिरूपसाधकमानविशेषणत्वानुपगमान्
तादृशविषयविशेषीयप्रत्यक्षतायामेव तथाविधसाधकमानांतर्भावस्य सार्थक्यादित्यप्याहुः अनुमितिसामग्र्यभावे
न प्रत्यक्षकारणत्वमिति। अन्यथा अनुमित्साधीनानुमित्सुसारकाले प्रत्यक्षापत्तेरिति भावः प्रत्यक्षसामग्र्यभावत्वेन सि
द्धिप्रत्यक्षसामग्र्यन्यतराभावत्वे अन्योन्याश्रयादिति। अनुमितिसामग्र्यभावे प्रत्यक्षकारणकल्पयोगेनमत्तात्वात्प्रत्यक्षसा

गदा० ५६

मग्र्या अज्ञानान्न तद्ज्ञाने च तदभावघटितानुमितिसामग्र्या अज्ञाने तदभावाज्ञानानादिति भावः अथवा कारणसमुदायत्वेन सामग्र्या नि
वेशे समुदायभेदस्य सत्त्वे कं सकलकारणौघे च सत्त्वा व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकभेदानुपगमे सामग्र्यां सामग्रीभिन्नभिन्नत्वं
दुर्घटमिति कार्याव्यवहितप्राक्क्षणावच्छिन्नत्वेनैव सामग्रीनिवेशना अव्याप्यवृत्तिधर्मावच्छिन्नभेदस्याव्याप्यवृत्तितामभ्युपेत्य अ
न्यदा कार्याव्यवहितप्राक्क्षणावच्छिन्नभेदवत्त्वं कार्याव्यवहितप्राक्क्षणे च तादृशभेदावच्छिन्नभेदवत्त्वं फलोपधायकस्योपपा
दनीयं तथा च परामर्शादिसत्त्वे प्रत्यक्षोत्पत्तिकाले अनुमित्यनुत्पादप्रत्यक्षोत्पादनिर्वाह्यः उक्तानुमितिप्रतिबन्धकस्य प्रत्यक्षो
त्पत्तिमन्तरेणानिर्वाहात् प्रत्यक्षोत्पत्तिरप्यनुमित्यनुत्पादमपेक्षते तदुत्पादे अनुमित्यव्यवहितप्राक्क्षणावच्छिन्नस्य प्रत्य
क्षप्रतिबन्धकस्यैवावश्यसत्त्वादित्यन्योन्याश्रय इति भावः अत्रैव कल्पे अन्येषां दूषणमुपन्यस्यति स्याद्गुणत्वाभावेजिज्ञासो
क्तेरोघस्याप्येतदनुमतत्तन्पाचकारसंगतिः पत्रविशेषदर्शनानन्तरक्षणजातमति योग्यारोपात्स्याद्गुणत्वाभावप्रत्यक्षं तत्रैवा
ह्निं तदभावानुमित्यापत्तेः स्याद्गुणत्वाभावानुमित्यापत्तेः नेथा च अनुमित्सासिद्धिसामग्र्याभावस्य कार्यकालवृत्तिः न यापृथंमि

राम० ५६

वकारणत्वमावश्यकमीति भावः प्रतियोग्यारोपकास्त्राज्ञातायाः स्वासंमततया केचिदिति ननु पक्षताघटकस्य सामग्री नानुमितिसाम
ग्र्यभावघटितकारणसमुदायरूपा अपि तु इतिरिक्ता न साक्षासाधारणाकारणसमुदायरूपेनेवास्या। अनुमित्साविशिष्टसमानावि
षयकानुमितिसामग्रीदशायां सिषाधयिषाद्वयोः तेन जनकत्वात्तदैवानुमित्युत्पत्तेः एवं प्रत्यक्षं प्रत्यनुमितिसामग्रीप्रतिबंधकता
यामपि निरुक्तपक्षता न निवेश्यते अपि तु लाघवादनुमित्सावैशिष्ट्यमेवास्याः सावकाशः एवं सामग्र्याः कार्याव्यवहितमावश्य
रणावच्छिन्नत्वेन प्रतिबंधकत्वेपि समानविषयप्रत्यक्षप्रतिबंधकतायां अनुमित्सावैशिष्ट्यं निवेश्यते तथा चोक्तस्थले प्रत्य
क्षोत्पत्तिनानुमित्यनुत्पादप्रयोजकवति अनुमित्सुतादृश्यनुमित्साविरहेणाप्रत्यक्षप्रतिबंधकासत्त्वादपि त्वनुमित्सा
विरहयैवेति नापरोप्यस्योक्तान्वयः अन्यथा सामग्र्याः पक्षतायां अनंतर्भावेपि एवं प्रतिबंधकतया आवश्यकत्वेना
निस्तारहितसत आह वस्तुतस्त्विति स्वतंत्रान्वयव्यतिरेकशालित्वं। सिद्धित्वादिरूपमंतर्भावेपि एवं प्रतिबंधकतया आ
वश्यकत्वेनानिस्तारहितसत आह वस्तुतस्त्विति। स्वतंत्रान्वयव्यतिरेकशालित्वं। सिद्धित्वादिरूपमस्येकहृतिधर्मावच्छे

गदा०
५८

देन कार्यानुत्पादे प्रत्येकव्यतिरेकानुविधायित्वं न त्वन्यतरत्वेन प्रतिबंधकत्वेपि तन्नियतसिद्धित्वावच्छिन्नस्य कार्यानुत्पादान्वयनियतत्वं तत एव
च्छिन्नव्यतिरेकस्य च कारणांतरपरामर्शादिसहितस्य कार्योत्पादनियतत्वं संभवतीति न तावता सिद्धित्वादिना प्रतिबंधकतासिद्धिरित्यतो हे
त्वंतरमाहः नियमेनेति। प्रथमोपस्थितत्वात्मकरूपावच्छिन्नस्य तदवच्छिन्नान्यतरत्वापेक्षया प्रथममुपस्थितत्वात् उपस्थितिलाघवमु
क्तौ शरीरलाघवमाहः लाघवादिति उक्तरूपद्वयमप्यपेक्ष्य तदुपघटितस्याधिकभेदादिघटितत्वाद्गुरुत्वादिति भावः प्रत्येकं सिद्धित्वादि
ना तथात्वे प्रतिबंधकत्वे अन्यथा। प्रतिबंधकत्वैक्यानुरोधेन नानाधर्मावच्छिन्नानां तत्तदवच्छिन्नभिन्नभिन्नत्वेन प्रतिबंधकत्वे वाक्षदेरि
त्यादिना सत्प्रतिपक्षादिपरिग्रहः अत्रैव पक्षतायामेव अंतर्भावप्रसंगात् घटकताप्रसंगात् सिद्धिबाधसामग्रीविशेषाद्यन्यतमत्वा
वच्छिन्नाभावस्य पक्षतात्वप्रसंगादिति सम्प्रदायार्थः अन्यथा बाधबुध्याद्यभावस्य कारणत्वांतरकल्पनापत्तेरिति भावः न च बाधा
दिनिश्चयप्रवध्यायामपि वह्निमान्पर्वतो घटवानित्याद्यनुमितौ वह्न्यभावादिनिश्चयस्य प्रतिबंधकतया वह्न्यादिप्रकारताघटि
तरूपावच्छिन्नं प्रति वह्न्यभावादिनिश्चयस्य पृथक्प्रतिबंधकत्वांतरमावश्यकमिति कथं साध्यतद्भावनिश्चयानामेकरूपेण प्र

राम०
५८

तिबंधकताप्रसक्तिरिति वाच्यं वह्न्यादिमत्कालानुमितौ वृत्त्यभावादिनिश्चयस्य पक्षस्य रथवृत्तिप्रतिबंधकत्वविरहेपि वह्निसामान्यवत्तो घटत्वादिना घटानु
मितिहेतुपक्षतायामव्याप्त्यापत्तिस्त्यादिनिश्चयांतर्भावे गौरवं तादृशानिश्चयदशायां तथाविधानुमितिवारणासंभवात् अवच्छेदकगौरवस्य
भवतैवाप्रयोजकीकृतत्वात् नच तथापि बाधकाले प्रत्यक्षादेरप्यनुत्पत्त्या विशिष्टबुद्धिसामान्यं प्रति बाधबुद्धेः प्रतिबंधकत्वांतरकल्पनमाव
श्यकमेवेति पक्षतायां तदंतर्भावो निरर्थक इति वाच्यं तत्रापि भिन्नविषयकानुमितिसामग्र्यादीनामावश्यकल्पनीयप्रतिबंधकतायां
वाक्षवृत्त्यादिसाधारणान्यतरत्वादेरवच्छेदकतयैवोपपत्तेः। बाधबुद्धेः सामान्यप्रतिबंधकत्वासिद्धेः प्रत्यक्षस्थले इच्छानामुत्तेजकतया
पितदसिद्धेः केचित्तु अत्रैतादृशप्रतिबंधकतायामेव प्रतिबंधकांतरसाधारणान्यतरत्वावच्छिन्नप्रतिबंधकतायामेवेति याव
त्तदंतर्भावप्रसंगात् अवच्छेदकघटकताप्रसंगात् तदभावव्याप्यवत्ताज्ञानादिसाधारणान्यतरत्वेनैव बाधादेः प्रतिबंधकताप्रसं
गादिति संप्रदायार्थः तथा च पक्षतायां बाधांतर्भावपरत्वाभावान्नोक्तातिप्रसंग इति व्याचक्रुः केचित्तु तदभावनिश्चयदशायां यादृशां
कुरं विशेषधर्मितावच्छेदकान्यानुमितेः कारणांतरविरहादेव नियमतो नसादृक्तत्साध्यकस्यत्वाभिप्रायक एवायं ग्रंथ इत्याहुः

नेनुसिद्धिसामग्रीविशेषयोरुभयोरेवानुमित्साया उत्तेजकतयोरनुगतरूपेणाप्रतिबंधकत्वेनुमित्साविरहस्यान्यतरत्वावच्छिन्नेसद्विशे
षणतयालाघवं अनुमित्साविरहविशिष्टसिद्धिसामग्र्यन्यतरत्वापेक्षया तद्विशिष्टसिद्धित्वतद्विशिष्टसिद्धिसामग्रीत्वयोर्द्वयोरेकस्या
पिविशेषणस्यद्विधानिवेशेनगौरवात् अन्यतरत्वघटकाधिकांशापेक्षया सिषाधयिषाविरहांशस्यगुरुतायाः स्फुटत्वात् अत
एवबाधायंतर्भावेणाप्रतिबंधेऽपिनावसरः बाधसिद्धितद्धितद्विशेषसामग्र्यन्यतमत्वेनप्रतिबंधकत्वेऽनुगतरूपावच्छिन्नांशेसिषा
धयिषाविरहविशेषणतया इत्यलाघवं चानवकाशात् विशिष्टबुद्धिसामान्ये बाधतदभावव्याप्यवत्ताज्ञानादीनां एकरूपेणाप्रति
बंधकत्वे उक्तदिशालाघवसंभवेनावच्छेदकगौरवस्य दुष्परिहरत्वात् नच प्रत्यक्षस्थले बाधबुद्धौ तदभावव्याप्यवत्तादिबुद्धौ चे
च्छाया उत्तेजकतया तत्रानुगतरूपेणातयोः प्रतिबंधकत्वेइच्छाविरहस्य सद्विशेषणतया लाघवमस्माकमेवेति वाच्यं बाधादौ
गत्युक्तेच्छाया उत्तेजकत्वेनानाप्रतिबंधकतायां संसर्गेणातदनभ्युपगमात् अनाहार्यत्वस्य प्रतिबध्यतावच्छेदकत्वमंगीकृत्यैव बाधादि
समपेक्ष्याहार्यप्रत्यक्षस्योपपादनीयत्वादित्याशंकांनिरस्यतिनस्यादिना गौरवमित्यंतमाशंकाअनुमितेत्वसाधारण्यादितिप्रत्यक्षादि

सामग्र्याः सत्त्वेनुमित्सुसत्त्वे वा तादृशेच्छाविषयसिद्धेरिति भावः अनुमितिविलणपकेच्छाविरहस्यानुमितित्वाप्रकारकतादृशेच्छासाधारणानुगत
रूपावच्छिन्नविरहस्य तादृशवरुपं प्रागेव वीरितं अनुमित्सनुत्पादादिति मनःसक्षोत्पापि तादृशेच्छाविषयसिद्धेरिति भावः अनुमितित्वादि
प्रकारकेच्छाविरहस्यानुमितित्वमपक्षाम्यत्तानत्वादिप्रकारकेच्छानामननुगतरूपावच्छिन्नाभाव एवान्यतरत्वावच्छिन्ने विशेषणतानाच्यं
।प्रसक्षसामग्रीरशापामुक्तेच्छावत्तादनुमितेवारणाय चानुमितिमिन्नलौकिकप्रत्यक्षान्यस्वविषयतावच्छेदकावच्छिन्नसामग्रीसमवं
हितान्यत्वेनेच्छाविशेषणीयात्मानुमितिसामग्र्या उपनीतभान उपभानसामवर्हितापारच्छायाः संग्रहाय भेदद्वयमवच्छिन्नांतविशेष
णां। अनुमितित्वादिप्रकारिकायाः प्रत्यक्षादिसामग्रीसमवहितेच्छायाः संग्रहायावच्छिन्नांतं। एवं चोक्तलाघवम्। इच्छायामेवेत्यत आ
हत्वनिवर्तकेति। निवर्तकत्वं विषयतयावोध्यं अतीव गौरवमिति अतिगुरुशरीरतादृशेच्छाविशेषणस्याधिकस्य निवेश्यादिति
भावः। नन्वेवमपि प्रतिबंधकतैक्यस्य निबंधनलाघवं दवारमेव प्रतिबंधकत्वांकल्पने एकत्रावच्छेदकगौरवस्याकिंचित्करत्वात् अनेक
त्रपक्षतहितुतायामेकैकविधवत्याभावादिति अयानामंतर्भावे अनंतस्थले अवच्छेदकगौरवात्स्यातं अगौरवं तस्य प्रतिबंधकताक

त्पन्नस्योचितत्वयाबाधाद्देश्यस्ततोतस्मांवप्रतिवंधनवकाशात्प्रतिवंदेरनुत्तरत्वाच्चेत्याशयेनान्यतरत्वेनप्रतिवंधकतामतेपिविनिगमनाविरहेणा
प्रतिवंधकताद्वयमायाद्यपत्तिरन्यतरत्वेनेति।अन्योन्याभावयोःसिद्धिभेदसामग्रीभेदयोःतथापिसिद्धिभेदविशिष्टसामग्रीभेदावच्छिन्न
भेदसामग्रीभेदविशिष्टसिद्धिभेदावच्छिन्नभेदस्याविनिगमनाविरहात्प्रतिवंधकतावच्छेदकमिति।अवच्छेदकभेदात्प्रतिवंधकताभेदआव
श्यकः नचताद्दशभेदयोःसमनियततयाअभेदात्तावच्छेदकभेदइतिवाच्यंताद्दशभेदाभेदेपितस्यसिद्धिभेदविशिष्टसामग्रीभेदावच्छि
न्नभेदत्वेनसामग्रीभेदविशिष्टसिद्धिभेदावच्छिन्नाभेदत्वेनवाविनिगमनाविरहेणावच्छेदकतायाःस्वीकरणीयतयाविशिष्टस्यावच्छेद
कत्वस्यावश्यंभेदात्तन्नचांतरंस्यात्तस्यस्वरूपतएवावच्छेदकतासमभवाद्कविशेषणपुरस्कारेणानावच्छेदकत्वमितिकथंविनिगम
नाविरहइतिवाच्यंअभावस्याखंडत्वेपिस्वरूपतोवच्छेदकतायाःसिद्धांतविरुद्धत्वात्तस्यस्वरूपतोभानेतस्यैवतयावच्छेद
कतायाःसिद्धांतसिद्धत्वात्तविशेषणपुरस्कारेणोपस्थितेवच्छेदकत्वग्रहस्यविशेषणावच्छिन्नेवच्छेदकत्वावगाहित्वनियमा
त्किंचिद्रूपेणाभासमानेस्वरूपतोवच्छेदकत्वस्यप्रमाणेनास्पर्शाच्चेनचैतद्धर्मित्वेनैवभेदस्यावच्छेदकत्वंननुस्वरूपतःतथा

चनोपदर्शितविनिगमनाविरहइतिवाच्यंभेदनिष्ठतद्व्यक्तित्वस्यभेदस्वरूपातिरिक्तस्यदुर्वचत्वात्भेदस्वरूपस्यचतस्यस्वरूपतोविशेषत्वासंभ
वात्रतिनास्त्वेऽस्यान्यतरत्वावच्छिन्नाभावस्यतद्व्यक्तित्वेनैवहेतुत्वमितियत्रास्तेपच्मिस्थिभेदसामग्र्योभेदयोःसामानाधिकरण्येचमि
योविशेषणाभावायत्रेयोर्नभेदप्रतियोगितावच्छेदकत्वेयेनविनिगमनाविरहःस्यात्अपितुधर्मिविशेषणतायत्रयोरेवव्यासज्य
वृत्त्यवच्छेदकत्वंतथाविधयोरप्यवच्छेदकतायपर्सिर्महानसीयवह्निर्नास्तीति।प्रतीतौसाऽवगाहनादिति।तदपिनमहानसीयवह्निर्ना
स्तीत्यादिबुद्धौवह्नित्वाद्येकधर्मितावच्छेदकावच्छिन्नएवमहानसीयत्वाद्यपरविशेषणभाननियमइत्यत्रानेकेषामवच्छेदकत्वेऽग्रा
ह्येधर्मितावच्छेदकावच्छिन्नविशेषणतायत्रस्यैवधर्मितावच्छेदकाग्रहःनतुधर्मितावच्छेदकज्ञानापत्रस्यावच्छेदकताग्रहइ
तिनियमेनग्रहणेकस्यधर्मितावच्छेदकतायत्रस्यकस्यवातदवच्छिन्नविशेषणतायत्रस्यावच्छेदकत्वेऽन्यत्रविनिगमनाविरहे
णावच्छेदकतायाभेदस्यावश्यकत्वात्अवच्छेदकविषयतावैलक्षण्यस्यावच्छेदकतावैलक्षण्यानियतत्वादित्यन्यत्रवि
स्तारःअन्यतरत्वेतोभयोरनुगमेपिप्रतियोगितावच्छेदकसंबंधाननुगमात्ननतयोरेकाभावस्य।कारणत्वंसंभवइत्याहुःआत्मनि

ग॰द्रा॰
६०

इतिसमवायसंबंधावच्छिन्नप्रतीयोगीताकमित्यभावश्चात्मप्रत्यासत्तितयाकारणं प्रत्यक्षासाधारणकारणाच्चक्षुःसंयोगादिरूपसामग्र्या
स्तुसाश्रयसंयुक्तमनःसंयोगादिरूपपरंपराभिन्नसंबंधावच्छिन्नाभावस्यात्मप्रत्यासत्तितयाकारणंवाच्यमतस्थैः विषयचक्षुःसंयो
गादेः समवायेनाभावस्यसर्वदैवात्मनि सत्त्वात्तादृशाभावकारणतायाश्चातिप्रसंगावारकत्वात् इति भावः ननुविषयचक्षुःसंयोगादे
र्नप्रतिबंधकत्वंस्वीक्रियतेनसंबंधानुगमः स्यात् किंतु चक्षुःसंयोगादिविशिष्टस्यमनोयोगस्यैवसमवायेनप्रतिबंधकत्वंवाच्यमतआ
हमारणीतिवन्हेरित्यनंतरंदाहप्रतीतीतिमनोयोगादेरित्यनंतरंप्रकृतइतिचपूरणीयंप्रतिबंधकत्वायोगादिति। मनोयोगस्यानुमिता
वपिहेतुत्वात्कारणस्यचप्रतिबंधकत्वायोगादितिभावः यद्यपि कारणस्यापिरूपांतरेणप्रतिबंधकत्वेक्षतिविरहः दाहप्रतिबंधकत्वेव
ह्नेः प्रयोजनविरहादेवानिवेशः प्रकृतेचसंबंध क्षान्तैधादेवमनोयोगादेरनुप्रवेशस्याकिंचित्करमेतत् तथापिमनोयोगस्याधिस्वनि
वेशनीवेशनीयगमागौरवमेवबाधकंबोध्यंतच्चसामग्र्यास्तुतत्रप्रतिबंधकतामतेपिआत्मनिष्ठतासंपत्तयेचचक्षुःसंयोगादेःसमवे
धतायामनोयोगादिप्रवेशस्यावश्यकत्वात्राभिन्नमेतन्मतेपिकालनिष्ठतयासामग्र्यभावस्यहेतुत्वेनतत्पुरुषीयत्वनिवेशस्यावश्यक

राम॰
६०

तयागौरवादितिवाच्यातथापिमनोगादिसंबंधस्याधिकस्यनिवेशनीयतयागौरवस्यदुर्वारत्वात्विषयभेदेनप्रतिबंधकताभेदाविरोधेनविष
यमत्वासत्त्वंतयाचस्मृःसंयोगादिप्रतिबंधकतायस्स्येवत्वंतत्रसामग्रीप्रतिबंधकजातादिभिरापन्नयगोयनयातत्रमनीम्रुयोगादेनि
वेशाभावाच्चतथाचेति। एवंरीत्याप्रतिबंधकतावच्छेदकसंबंधभेदस्यावश्यकत्वेचेत्सेर्थएवंप्रतियोगिःतावच्छेदकभेदेनसिद्धिस
मग्रीविशेषणयोःसिषाधयिषाविरहपदार्थयोर्भेदात्तन्निवेशनयार्थक्रमव्यवस्थापितमिहानीसंबंधभेदेनतद्विशेषणताभेदंव
चस्यापयतिराकालेति। एकक्षणावच्छिन्नमेकात्मसमवेतत्वमित्यर्थः यघपिसंबंधमध्येएकक्षणावच्छिन्नत्वानंतर्भावेपिसि
षाधयिषाकालेतद्विरहरूपविशेषणाभावायद्वतोविशिष्टाभावोक्षतएव। नचकालांतरांतर्भावेसिषाधयिषाकालेपिसिद्धौका
लांतरावच्छिन्नतद्विरहवत्यात्मनिपतित्वरूपवैशिष्टंसंवततेस्यात्मनिघटादेश्चतादृशविशेषणंचेतिविशिष्टसिद्धिसत्वमव्या
हतमितिकथंविशिष्टाभावेनवर्तितंत्व्यंकालांतर्भावेतादृशकालाभावान्नतदानींतद्घटितवैशिष्ट्यमितिविशिष्टासत्वोद्विशिष्टा
भावोक्षतइतिवाच्यं। सिषाधयिषाकालस्यतदधिकरणनिष्ठतदभावाधिकरणतानवच्छेदकतयातादृशाधिकरणताघटितसा

गदा०
६१

मानाधिकरण्यस्य तद्धिया समानाधिकरणसिद्धिनिष्ठवैशिष्ट्यानवच्छेदकत्वात् कालावच्छेदेन सिद्धिमत्त्वेपि तदिच्छाधिकरणाद्वच्छाविरहविशिष्ट
सिद्धिमत्त्वानुपपत्तेरन्यथा स्वाधिकरणकालावच्छिन्नत्वस्य स्वाधिकरणताविशेषणत्वेपि कालस्याप्यन्याधिकरणावच्छिन्नस्वाधिकरणत
याकालत्वविरहप्रयुक्तवैशिष्ट्यविरहस्यानिर्वाहात् न विशेष्यीभूततत्तत्स्वाधिकरणावच्छिन्नस्वाधिकरणकालत्वेन कालस्य संबंध
घटकत्वे चाननुगमादिति तथापि विभिन्नकाले विशेषणविशेष्ययोः सामानाधिकरण्यसत्त्वेपि एकक्षणावच्छेदेनः सामानाधिकर
ण्यस्यैव विशिष्टसत्त्वनिर्वाहकत्वमित्येतत्सूचनायैवैककालावच्छिन्नत्वकथनं केचित्तु। कालस्य विशिष्टाभावप्रतियोगितावच्छे
दकत्वघटकसंबंधाघटकत्वेन तदुपलक्षिताभावात् तद्विशिष्टाभाववैलक्षण्यानिर्वाहः प्रतियोगितावच्छेदकवैलक्षण्यायास्सर्वदे
देशरहितपुरुषाधिकरणेदंशोपलक्षितपुरुषाभावस्यैव एतेन पुरुषत्वादिमात्रस्य तत्प्रतियोगितावच्छेदकत्वासंभवान्न तादृ
शपुरुषात् व्यावर्तकानुगतधर्मान्तरविरहेण तत्त्वे वा प्रतियोगिकोटौ तस्याभाने प्रतियोगितावच्छेदके तदंतर्भावासंऽभवाहिसा
ऊम्तत्वविसे अन्यापहरणमिति। एवञ्च पीभूतान्यनुक्तपरंपरासंबंधेन संवहत्वतद्रूपमिसर्गः ननु पक्षतायारोरंगस्याहिंसामग्र

राम०
६१

नंतर्भावेतद्भावस्यानुमितौस्वतंत्रहेतुताकल्पनमावश्यकंतथाचतस्यैवपक्षपरामर्शवृत्तिनिमित्ततास्वीक्रियतांनतुसिध्यभाव
स्यतथाचपक्षपरामर्शवृत्तिनिमित्तंमिदमितिमूलविरोधरस्यसमतआहसामग्रीतिहीनत्वेपि।अनुमितिसाधारणकारणत्वेपि।ला
घवात्।ननुलाघवस्यपक्षपरामर्शवृत्तिनिमित्तत्वोपष्टंभकत्वेबाधाभावस्यैवतथात्वमुचितं।नत्वसिषाधयिषायाअप्रवेशात्।प
रिचसिद्धसाधनस्थलेपक्षव्यवहारोनास्तीतिसिध्यभावस्यतथात्वमित्यस्वरसोतेनेदृशबाधदशायामपितद्विरहात्सोपिनिविशता
मित्यतआहफलानुपहितेति।स्वविषयसिध्यनुपहितेत्यर्थः।एतच्चातिगौरवसूचनायसिद्धसाधनेसंलेसाध्यनिश्चयदशा
यांपक्षव्यवहारविरहे।पक्षव्यवहारविरहस्यसर्ववादिसिद्धत्वेनगौरवादिति।बाधस्थलेव्यवहारस्यसविवादतयागौ
रवसहिष्णुतायाअनाप्यत्वादितिभावः।ननुसमवायसंबंधावच्छिन्नसिध्यभावस्यात्मप्रत्यासन्नतयैवात्रानुमितिहेतुतयातस्य
पक्षपरामर्शवृत्तिनिमित्तत्वेआत्मन्येवपक्षव्यवहारप्रसंगइत्यतआहविशिष्टेतिसिषाधयिषाविरहविशिष्टेत्यर्थः।एतदभिधा
नचसिद्धेःपक्षनिष्ठायाउद्देश्यतासंबंधेनानुमितिप्रतिबंधकतासंभवप्रदर्शनायपर्वतेवह्निमनुमिनुयांमहानसेवह्निमनुमि

नुयमितिसाघाकारकानुमितिसामग्र्यामेकत्रोत्तेजकत्वेतिप्रसंगेनयद्यगेवोत्तेजकतयापक्षभेदेनकारणताभेदस्यावश्यकत्वात्तथाःत्मनिएमसासत्तेरेवोचि
मत्वात।अन्यथापुरुषविशेषाणामनंतर्भावनीयत्तपागोवास्तमानप्रकारिकायाःसमानविशेष्यकसिद्धेरनुमितिप्रतिबंधकत्वापिपक्षत्वनि
ष्टमत्वात्ससंभवोबोध्यःपरंयत्संबंधादिति।तत्प्रतियोगितावच्छेदककोटिप्रविष्टविशेष्यतावच्छेदकघटत्वरूपादिसाहित्यानचसिद्धिकाले
प्येतादृशसंबंधेनपक्षेसिद्ध्यभावोवर्ततेऽस्तेताभविसमनिसत्त्वादिसतिप्रसंगइतिवासांततदात्मकतित्वविशिष्टस्यैवसिद्ध्यभावसत्ता
दृशसंबंधेनतत्पुरुषंप्रतिपक्षव्यवहारनिर्वाहकत्वात्तन्निरुक्तविषयपक्षःसंयोगादिरूपायाःप्रसक्तसामग्र्याआत्मनिएमसासत्ता
नप्रतिबंधकत्वसंभवःउक्तपरंपरयातिप्रसक्तत्वात्तत्संबंधत्वेमानाभावाच्चतथाचयदातादृशसामग्री।तदुत्तरक्षणेनानुमितिरि
तिकालिकप्रत्यासत्त्यैवप्रतिबंधकत्वेकास्मनोयांतथाचपुरुषांतरियप्रसक्तसामग्र्याआअपिपुरुषांतरीयानुमितिप्रतिबंधः
स्यात्एवंत्रैकालिकसंबंधावच्छिन्नानुमित्साविरहस्यैवदैशिकसंबंधघटितसामानाधिकरण्यसंबंधेनसामग्र्याविशेषणात्स्वीका
र्यंतथाचपुरुषांतरीयानुमित्साकालेनपुरुषांतरीयप्रसक्तसामग्र्यास्तदीयानुमितिप्रतिबंधकत्वापत्तिरित्याशंकांचस्वसंयो

गाहे तत्स्वरूपीयत्वं मंतमात्येनिराकरोति किंस्येति। अनुमित्सन् साहाहित्यं तमुपलक्षणं। अन्यस्य प्रत्यक्षसामग्रीसत्वेऽन्यस्य तद्विरहिणो
नुमित्सतासाहाच्चेत्यापि दृष्टं। तत्स्वरूपीयानुमित्सा या कालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्य दैशिकसंबंधेनाधिकरणं यः
क्षणः तत्र कालिकसंबंधेन वर्तमानत्वं कालीनतार्थः सामग्रीविशेषणं। अपत्तासमवायावच्छिन्नप्रतियोगिताकतदात्मप्रतित्वं वि
शिष्टाभावावच्छेदकक्षणो कालिकसंबंधेन वृत्तिमत्वमेवनदर्थः ते न तत्तत्स्वरूपीयानुमित्साक्षणस्यापि अन्यदेशावच्छेदेन दैशि
कसंबंधेन कालिकसंबंधावच्छिन्नतद्विछिन्नभावत्वेपि न क्षतिः। तत्स्वरूपीयसिद्धिसामग्रीविशेषविरह इति कालिकसंबंधावच्छिन्न
प्रतियोगिताकः पक्षनिष्ठतद्रूपविशिष्टपसंनिकर्षविशिष्टसाध्यनिष्ठे तदिंद्रियादिसंनिकर्षादिविरह इत्यर्थः वैशिष्ट्यमेकका
लीनत्वमेवं विशेष्यविशेषणभावे विनिगमनाविरहान्नानाकारणताकल्पनमगत्या न दोषाय यावत्त्वेन तदसाधारणकारणता
सस्यसुहासस्ययप्रतिवंधकत्वपुनरनपादेयमेवयावत्वस्यानिर्वचत्वात्। पर्वतो वह्निमानित्याद्यनुमितिसमानविषयकचा
क्षुषादिसामग्र्याः प्रतिवंधकतायोरूपादिकनान्तर्भावनीयतत्रसाध्यपक्षयोरूपादिमत्वनियमेन तन्निवेशप्रयोजनाभावात्।

गदा०
५८३

त किंतु पर्वतो रत्नवान् इदं वह्निमत् इत्यं द्रव्यवत्तरसाधनमितौ र्वैघाहेन्द्रियसंनिकर्षस्याविरोधितोपपत्तेर्यथा योगं संयपक्षादौ
रूपादिमत्त्वनिवेशनीयं। अत्र प्रतिबंधकसामग्रीमध्यपि कालिकतदधिकरणादेरवच्छेदेन तदभाव-वत्त्वस्य सत्त्वमलादनुमित्यापत्तिः न च प्र
तिबंधकसत्तायाः कार्यानुत्पादप्रयोजकत्वात् तत्सत्त्वे कथं कार्योत्पत्तिरिति वाच्यं सामग्र्याः कार्योत्पत्तिप्रयोजिकायाः प्रतिबंधकसत्त्वेपि तदभा
वसत्त्वस्याक्षतत्वेन कार्योत्पत्तेर्दुर्वारत्वादिति चेन्नापादकरणताघटकनियमेऽध्यांतरावच्छेदेन व्याप्यसमानाधिकरणकारणाभा
वस्य व्यावर्तकं देशभेदानवच्छिन्नत्वविशेषणमभावे निवेश्यते यथा समवायादिसंबंधावच्छिन्नसंयोगत्वानादिनिष्ठकारणताघट
कनियमेन तदस्य कारणतावच्छेदकावच्छिन्नस्य देशानवच्छिन्नवृत्तिरेवाधिकरणे कार्योत्पत्तिप्रयोजिकाऽतः प्रतिबंधकाभावस्य कार
णतानतादृशी किंचिदवच्छेदेन तत्र प्रतिबंधकसत्त्व एव कार्यानुत्पादात् तद्देशाभावविशेषणप्रवेशने प्रयोजनाभावान्न तथा
च देशभेदानवच्छिन्नप्रतिबंधकाभाववलान्नात्मन्मित्यापत्तिः एतेनात्मनि शरीरविशेषावच्छेदेन सिद्ध्यादिरूपप्रतिबंधकसत्त्वे घटाद्यवच्छे
देन तदभाववलादनुमित्यापत्तिरपि निरस्ता न च सिद्ध्यादिसत्त्वात्मनि तत्काले घटाद्यवच्छिन्नाविशेषानदभावस्य वृत्तिस्तदस्य देशभेदानवच्छि

राम०
९३

ननु हेतोरप्रामाणिकतया सिध्यासत्वेप्यनुमित्साद्यनुपपत्तिर्वाच्यं तादृशपक्षस्यानभ्युपगमे सिध्याद्यसत्वदशायां तदभावस्यात्मनि दैशिकव्याप्यवृत्तितायाः
संवाऽभवसिद्ध्याः अनुपपत्तेः यदि च कायव्यूहस्थले एकदात्मनि शरीरांतरावछेदेन सिध्याद्यभावाभावस्य सिद्ध्यादेः सत्वेप्यन्यशरीरावछे
दनानुमित्साद्युत्पत्तिरिति: प्रामाणिकोत्र च सिध्यभावविशिष्टकारणताघटकनियमशरीरे: भावांशे उक्तविशेषणप्रवेशस्यावश्यकत्वात् घटाव
च्छिन्नसिध्यभावबलात् सिध्यादिदशायामनुमित्सापत्तेर्वारणाय गत्यंतरमेवानुसरणीयमिति दिक्॥ उत्तेजकाभिमतसिषाधयिबाधेयिषा
कारणतांशीकृत्य सिध्यभावस्य कारणतामाक्षिपति। अग्रे सादिना चेदित्यतेन रातावतै विना सिषाधयिषां सिध्यनंतरमनुमितेर्वारणासंभवा
दिति भावः प्रतिबंदिमाशंकते नचैवमिति उत्तेजकसमंत्रौषधविशेषादेः प्रतिबंदिमुद्धरति उत्तेजकानामिति: मण्यादिस्थलीयोत्तेजकमंत्रौ
षधादीनामित्यर्थः अननुगतत्वादिति: तथा चाननुगतकार्यप्रतिव्यभिचारेणाकारताकारणत्वासंभवादिति भावः इहापि। सिद्धिस्थले
पि। ईदृशीतरेति। यादृशपारशेच्छासत्वेऽस्यादिनेत्यादिः सिषाधयिषा इति उत्तेजको भक्ता यादृसादिं तथाचमुत्सन्मेतेजकाभावकूटविशि
ष्टायासिद्धेरभावएव दाहो मणेर्वा दाहाहारो मणेर्वा घभावबद्धेतुर्भविष्यतीति भावाः ननु मावरभावकूटविशिष्टसाध्यनिश्चयाभावेत्वाय

स्वपालत्वोल्लोपसानेतत्तावस्मान्यत्नेनैवानुगमसंभवं सीसाधयिषाणामिसंतं आह सिसुतरानुमितित्वं चेति। अनुगतस्य सिद्धिसमानकालीनप्राग
भावप्रतियोगित्वरूपस्यातिप्रसक्तस्य चततत्सिद्धिनाशकालीनतत्प्रागभावाप्रतियोगित्वे सतितत्सिद्धिसमानकालीनप्रागभावप्रतियोगिता
त्मकत्वस्यैवसंभवात् अनुगतानतिप्रसक्तैकैकभयपक्षमा– तं। तथा च प्रथमधर्मस्य कार्यतावच्छेदकत्वे सिषाधयिषामंतरेण सिद्धिनाशोत्तरकाले
तायमानायामनुमितौ सिषाधयिषाया व्यभिचारः। उत्तरस्य तथात्वे चानंतकार्यकारणभावप्रसंग इति भावः। सिद्धिस्थितिकालीनामिति।
स्वक्षणादितिप्रागभावप्रतियोगित्वस्वक्षणादितित्वोभयसंबंधेन सिध्यवच्छिन्नामित्यर्थः। लाघवादाह स्वोत्तरेति। स्वभिन्नत्वस्वक्षणाद
तित्वोभयसंबंधेन सिध्यवच्छिन्नामित्यर्थः इदन्तु पेक्ष्याहेति। स्फुटैवसंबंधविधया स्वक्षणादितित्वादीनां निवेशान्न स्वत्वाननुगमनिबंधनो दो
षः संबंधमध्ये स्वपदार्थानिवेशेपि अन्याधिकरणाद्युति। तादृशसंबंधत्वाभावेनातिप्रसंगविरहात् नाशकाले। नाशोन्यतिक्षणे। अनुमि
त्साहोदुर्वार इतिः सिद्धिनाशसमयोत्पन्नानुमितेरुक्तसिषाधयिषाकार्यतावच्छेदकानाक्रांतत्वादिति भावः। ननु स्वक्षणादितिप्रागभाव
प्रतियोगित्वस्वनाशक्षणादितिप्रागभावाप्रतियोगित्वोभयसंबंधेन सिध्यवच्छिन्नानुमितित्वमेव सिषाधयिषाजन्यतावच्छेदकं वा

ण्यं। एतच्च सिद्धिनाशकालोत्पन्नानुमितिसाधारणमेवेति नातिप्रसंगः न च सामान्यतो नाशस्य स्वरूपावृत्तिप्रागभावाप्रतियोगित्वं जन्यमात्रस्यैव न संभवती
ति यदधिकरणवृत्तिप्रागभावाप्रतियोगित्वं तद्व्यक्तिनाश एव विशिष्य निवेश्यः परं त्वननुगमतादवस्थ्यमिति वाच्यं। सर्वथाननुगमस्यादोषत्वा
त्। कथंचिदनुगमस्यापि संभवाच्चेत्यतो दोषान्तरमाह क्रमेणेति सिद्धिसत्वइति। अव्यवहितपूर्वकालस्तादृशः। अनुमित्सातादृप्रसंगइ
ति। पुरुषान्तरीयसिद्ध्यव्यवहितोत्तरोत्पन्नपुरुषान्तरीयानुमितेरप्युक्तसिद्ध्यवधिपक्षताजन्यतावच्छेदकधर्माक्रान्तत्वादिति भावः। समानाधि
करणपदस्याप्यधिकस्य दर्शितकार्यतावच्छेदकताघटकत्वेवं धर्म्येनिवेशेन पुरुषान्तरीयसिद्ध्यनन्तरोत्पन्नानुमितौ सिषाधयिषाया व्य
भिचारवारणसंभवात् दोषान्तरमाह अपिचेति। सामान्यसामग्रीतः अनुमितिसामान्ये हेतुभूतपरामर्शादितः न तु विशेषसामग्री
समवहिताया एव सामान्यसामग्र्याः कार्योत्पादकत्वान्नापत्तिरित्याशंकायामाह नहीति। ईदृशेति सिषाधयिषारूपेत्यर्थः जनकत्वं
उपधायकत्वं तास्तीति नहीत्यस्यान्वयः सिध्यसत्वे सिषाधयिषां विनापि परामर्शादेरनुमित्युत्पादकत्वादिति भावः तथा च तत्रैव सिद्धिद
शायामपि परामर्शादिसत्वे सिषाधयिषाविरहेन अनुमित्यनुत्पादप्रयोजकमिति पर्यवसितं ननु विशेषसामग्रीविरहकूटवत्सामान्यसा

गदा०
६५

मग्रीदशायांसामान्यकार्यानुसारप्रयोजकः सिध्यसत्वस्थलोसविशेषसामग्रीविरहघटितस्यकूटस्यचरिघायपिघाविरहसहकृतसिद्धिस्थलसत्वसं
लेनतुसिद्धिमात्रस्थलरत्तिनदोषइत्यतआहनचेति। अयमत्रापिसिध्यसत्वस्थलेपिविशेषसामग्र्यंतरमितिसिध्यभावस्यैतन्मतेअहेतुत्वादि
तिभावः। ततरनुमत्युसारकृत तत्परामर्शांस्यक्तौनोविशेषसामग्रीत्वेपिअनुमित्यसतिकालेपितत्रतत्सत्वेतरंनंतरमनुमित्यनुत्पादप्र
योजकविरहतत्तद्व्यक्तिविरहाणामनंतानांसामान्यकार्यानुत्पादप्रयोजकत्वेगौरवं· अन्यथावहुतरसामान्यकारणतापाउच्छेदप्र
संगरस्याशेयः। अत्राहुः। सिध्यनंतरानुमितौसिध्यभावस्यहेतुत्वांतरकल्पनेपैवेदशातिप्रसंगवारणासमवाद्विशिष्टसिध्यभावेहे
तुल्यमयुक्तंसिद्धिसिद्धिसिषाधयिषाविरहयोरप्यभावेविनिगमनाविरहेणप्रतिबंधकताद्वयस्यतन्मतेध्यावेरंयकत्वान्यपितिबंधकता
वच्छेदकगौरवस्याधिकाननचसिषाधयिषाहेतुतापक्षेपिकार्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशाधिक्येनगौरवमित्याशंक्यांत
ल्लिंगकेच्छाविरहविशिष्टसिध्यभावस्यपूर्वोपदर्शितसमूहालंबनजन्यानुमितौव्यभिचारवारणायाव्यवहितोत्तरत्वसंबंधेनतादृशसि
ध्यनवच्छिन्नानुमितिप्रत्येवहेतुतायाभवतापिवाच्यत्वादिति सिद्धिस्थलेविनापिसीषाधयिषासामान्यकार्योत्पत्तावपितादृशकार्यस्यो
क्तविशेषसामग्रीकार्यतावच्छेदकाक्रांतभास्यंतथाचविशेषसामग्रीविनातदुत्पत्तौतत्रतस्याः व्यभिचारात्कारणतैवव्याहन्येतद

राम०
६५

तिनतत्रतदुमसापत्तिरितिशंकते रहेति। कार्योत्पादप्रयोजकसामग्रीसत्त्वे प्रयोजनस्यतिनकार्योत्पत्तिं विरुणद्धि तथा च प्रकृते सिषाधयिषाघटिता या सामान्यकार्यप्रयोजकसामग्री सिद्धिकालेपि सत्त्वे विशेषसामग्रीविरहेणातत्कार्यतावच्छेदकावच्छिन्नायस्य संभवेपि सामान्यधर्मावच्छिन्नोत्पादप्रयोजकसामग्रीविरहं विनानुमितिप्रतिपक्षतामहितपरामर्शत्वे नैव हेतुत्विस्यानरूपकरणव्यापारत्वासंभवात् व्यापारतायाः फलजनकत्वगर्भःत्वात् तरसत्त्वे नविनिगमकस्य संभवादिति केषांचिन्मतं दूषयति। करणेत्यादिना। परामर्शस्येति। पक्षधर्मोपत्तिः तस्याः कारणतायामन्वः निश्चितकारणस्य सहादेः समवायिकारणत्वेति। कपालादिनिष्ठघटत्वाद्यवच्छिन्नकारणातेसर्थः समवायायाः तियमायत्कारणतायाश्चावश्यकत्वादिति भावः। जन्यसत्ताद्यवच्छिन्ननिरूपितायां समवायिकारणतायां द्रजहेत्वं भिन्नारेण प्रवेशासंभवात्। पद्यासंभवमित्यर्थः। कारणत्वनतदवच्छेदकत्वयोहृत्रुविगमकेन नियतत्वेपि सिद्ध्यभावसाहित्यपरामर्शत्वपर्येकविशिष्टस्यैवैकविशेष्यतावच्छेदकतायत्रस्यैव वावच्छेदकत्वं वाच्यं तत्र विनिगमनाविरहदुर्वारएवेति तत्त्वं। सिद्ध्यभावस्यानुमितिहेतुत्वेनुमित्साविनाकृताप्यनुमिति। नौत्सघेतमणिसमवधानोत्पत्तिकाले हाहानुससा प्रतिवधकाभावस्य कार्यकालसत्ताया

गदा०
६६६

कार्ये प्रधानप्रयोजकत्वात अनुमितिकाले च सिध्यभावासत्वादिसंगमात तस्य कारणतावच्छेदकत्वमेव न तु कारणत्वमित्याशंकते अथेतादृशेच्छारणा
वच्छेदेनापि कार्याधिकरणे नियतसत्वं यत्कारणताघटकं तत्कारणताश्रयस्यैव कार्योत्पत्तिक्षणे सत्वं कार्योत्पत्तिप्रयोजकरूपथापरामर्शभा
वाद्धेः सिध्याभावस्य प्रतिबंधकाभावत्वेपि नियतप्राक्सत्वमेव कारणताघटकं न तु क्रमयीति तस्य प्राक्कालसत्वमात्रेण फलोत्पत्तौ
तंत्रमिति नानुपपत्तिरिति समाधत्ते। अन्यथेति। सहचारदर्शनमात्रेण गौरवप्रतिबंधकाभावे कार्यसहभावेन हेतुतानियमसिद्धावित्य
र्थः। प्राक्सत्कारणेति। सहचारनिरूपककारणतावादिनरासादिः पुनरनुमितौ प्रत्यक्षसामग्र्याः प्रतिबंधकतान्तरकल्पने गौरवात तत्साम
ग्रीदशायां अनुमित्सापतिवारणायानुमित्सान्यसिध्यभावस्य कार्यकालवृत्तितया हेतुत्वमेव युक्तं अनुमित्साभावस्य च प्राक्सत्वमात्रेणाहे
तुत्वकल्पनामिति। तदसत्। सिषाधयिषानंतरजातसिद्धिद्वितीयक्षणेऽनुमित्सानाशादप्रसंगात तत्कार्यकालेऽनुमित्सानाशेन तदभाववि
शिष्टसिद्धिसत्वात। प्रत्यक्षादिसिद्धिसामत्वेऽससाचेत्तदिच्छासामग्र्यां वह्निज्ञानानंतरं जायतामितीच्छाबलादनुमित्साप्रसाऽनुमि
त्स्यसिद्धौ तादृशेच्छाया उत्तेजकत्वात तादृशेच्छाबलात्प्रत्यक्षादिसामग्र्यनंतरं प्रत्यक्षाद्युत्पादसमये अनुमित्सापत्तेः सिद्धावप्रामा

राम०
६६६

रापग्रहसत्त्वे प्रत्यक्षसाधकमाह समयेऽनुमित्सयपने श्चेति पक्षताया अनुमितिहेतुतानंगीकुर्वतां गुरूणां मतमाह। प्राभाकरास्त्विति अनुमित्सा
योग्यताया उत्तेजकत्वेह्नित्वादिप्रकारकेच्छाबलादनुमितिर्द्वितीयक्षणोत्पन्नपरामर्शात्तृतीयक्षणोऽनुमित्संजरोमादस्य पक्षताहेतुता
मतेपृथुयपज्ञेः विनानुमित्सामिति क्वचित्प्रतिबंधकाभावासत्त्वस्थले परामर्शानुमितिप्रवाहस्य क्रमोत्पन्नपरामर्शानुमितिसमूहस्यापत्ता
यनिराकरणाय समूहपर्यंतानुसरणं। पूर्वपूर्वानुमितिनाशे द्वितीयादिपरामर्शादनुमित्संजरो। मजौबाधकाभावादाह। अविरलय
सेति ननु तत्रागतासैकैकक्षणाविलंबेनैवानुमितयः स्वीकार्या इत्यत आह। कालभेदेति। मानाभावात्। पुनत्यभावात्तवात्। पक्षताहे
तुत्वस्यासिस्यागतत्त्वंतरविरहस्यैवासिद्धेरितिभावः नन्वेवंसिद्धसाधनस्यादूषणतया परार्थस्थले तदुद्भावनानुपपत्तिरित्यत आह।
।परार्थेति। अन्यथोन्तरेति सिद्धेर्थो। आकांक्षाविरहादिति भावः नच पक्षताया अनुमित्साहेतुत्वेऽनुमित्सानंतरंजातव्याप्तिरेकस्थले नो
त्पद्यते तद्वारणाय तत्तद्व्यक्तौ तत्प्रागभाववद्व्यक्तीनां विशिष्यानंतहेतुताकल्पने गौरवमिति वाच्यं॥ ननुतदनुमितिपदेतन्नाशा
सरन्ततोवाकदाचिन्नत्सा। मानविषयकानुमित्संजरोत्पादसमये तज्जन्यस्यापत्तिवारणाय तत्र परामर्शव्यक्तीनां विशिष्य हेतुताया

आवश्यकत्वात् तत एव तन्न द्वाभ्यां पुनरनुमाद्वारा संभवात् न च परामर्शानां तत्तद्व्यक्तित्वेन तत्तदनुमितिव्यक्तिहेतुत्वेपि विनश्यदवस्थान्त
हेत्वनुमिसव्यवहितपूर्वोत्पन्नपरामर्शाद्यनन्तरनुमितिप्रसंग इति वाच्यम् एतन्मते कार्यसहवर्तिनः फलाजनकत्वात् अनुमितित्वा
वच्छिन्नाभावहेतुतयापि तादृशापत्तिवारणसंभवान्नदनुरोधेन मतृणां प्रत्यक्षादिसाधारणानि श्रयत्वेन प्रतिबंधकत्वासिद्धेः अत्र
केचित्तु पक्षताया अनुमितिहेतुत्वमते विनापि वन्ध्यादिलिंगकचन्द्यनुमितीच्छां तादृशानुमितिप्रस्पात् तादृशपनुमितौ तादृशा
नुमितीच्छाविरहविशिष्टप्रत्यक्षादिसामग्र्यभावसकारणताधिक्याद्धेरेवं पक्षताहेतुतामते तादृशानुमितेरिच्छानिपतनया
तत्रेच्छाया लघीयस्या हेतुतयैवोपपत्तेः पक्षतापि तत्रेच्छैवेत्याहुः ॥ छ ॥ इति महामहोपाध्यायश्रीमद्गदाधरभट्टाचार्यविर
चितापक्षताटिप्पणी समाप्त रामजीदाहाय ॥ ॥ ॥ ॥ ॥

४१११

श्री ५ को सरकार

नागदीक्षा.

मन्त्रलक्षणं.

हींह्वाद्धेव.

पत्र.७

व्या॰पं॰
१

श्रीगणेशाय नमः ॥ समारब्ध इति. समारब्धं यदनुमानप्रामाण्यपरीक्षणं तत्कारणीभूतं यद्व्याप्तिग्रहोपायप्रतिपादनं तन्निदानं व्याप्तिस्वरूपनिरूप
णमित्यर्थः. तथा च प्रामाण्यव्यवस्थापनोपयोगितासंगत्या व्याप्तिस्वरूपनिरूपणमित्यर्थः. अव्याप्यवृत्तीति. कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिरित्य
र्थः. इदं च येन रूपेण येन संबंधेन च साध्यत्वं तदवच्छिन्नप्रतियोगिताकसाध्याभावस्य प्रवेशाभिप्रायम् अन्यथा तु अव्याप्यवृत्तिसाध्यकस्थलेऽपि विशिष्टाभावादि
कमादाय दोषो बोध्यः. अव्याप्यवृत्तिसाध्यकेऽप्याकाशादिहेतावव्याप्त्यभावादाह सद्धेताविति. वृत्तिमद्धेतावित्यर्थः. ननु साध्यवद्भिन्नो यः साध्याभाववानि
त्यर्थे साध्याभाववत्पदवैयर्थ्यं साध्यवद्भिन्नावृत्तित्वस्यैव सम्यक्त्वात् न चावृत्तित्वेन साध्यवद्भिन्नस्यान्वयाविवक्षणात् साध्याभाववत्तासम्भव एव तादात्म्येनान्व
यविवक्षणान्न वैयर्थ्यमिति वाच्यं तथा सति साध्यवद्भिन्नात्मकोपायपनुवर्थः. संबंधीनऽवृत्तित्वस्यैव सम्यक्त्वेन साध्याभाववत्पदव्यर्थताध्रौव्यात् अतः सप्तमीसमा
सं समर्थ्य व्याचष्टे साध्यवद्भिन्न इति. तथा च साध्यवद्भिन्नस्यावृत्तावनन्वयाद्यप्यासन्निवेशेन वैयर्थ्यम्. साध्याभावे साध्यवद्भिन्नवृत्तित्वविशेषणं त्वव्याप्यवृत्ति
साध्यकसंग्रहार्थमेवेत्याशयः. साध्यवद्भिन्नवृत्ति द्रव्यत्वादिमति धूमादेः सत्त्वादव्याप्तिरसंभवो वा स्यात् अतः साध्याभाव इति. न च कपिसंयोगी एतद्वृक्षत्वादित्या
देः संग्रहार्थमधिकरणभेदेनाभावभेदमादायैव लक्षणमिदं कार्यं तथा च साध्यवद्भिन्ने योऽभावस्तदवृत्तित्वमित्यस्यैव सम्यक्त्वात् साध्यपदं व्यर्थमिति वाच्यं प्रतियो
गितासंसर्गेण साध्यीयत्वेनैव साध्याभावस्य प्रवेशः. न च भावत्वेनापीति तद्वैयर्थ्यशङ्कानवकाशात्. वस्तुतस्तु स्वप्रतियोगितावच्छेदकसंसर्गेण साध्यवद्भिन्ने वर्तते
यः साध्यतावच्छेदकसंबन्धेन साध्यीयोऽभावस्तदवृत्तित्वमित्यर्थः. तथा च साध्यतावच्छेदकसंबन्धेन साध्यीयत्वार्थकस्य साध्यपदस्यानुक्तौ स्वप्रतियोगितावच्छे
दकीभूतसमवायादिसंसर्गेण वृक्षादिमतोऽपि पर्वतादौ वर्तते यः समवायसंबन्धावच्छिन्नवह्न्यभावस्तद्वृत्तिधूमादेः सत्त्वादव्याप्तिः स्यादतस्तदुपात्तमिति न
व्याः. केचित्तु व्याप्यवृत्तिताऽव्याप्यवृत्तित्वादिरूपविरुद्धधर्माध्यासात् संयोगाद्यभावस्यैव द्रव्यगुणाधिकरणभेदेन भेदो न तु गगनाद्यभावस्यापि मानाभावात्. त

थाच साध्यवद्भिन्नगगनाद्यभाववति धूमादेः सत्त्वादव्याप्तिरतः साध्यपदमित्याहुस्तन्मन्दं गुणे गगनाद्यभावे गुणत्वादिसामानाधिकरण्ये ननु द्रव्ये गगनाद्यभावेत
थात्वमित्यादिप्रतीत्या गुणत्वसामानाधिकरण्यतत्स्थाभावयोर्विरुद्धधर्मयोः संभवादिति दिक् । नच घटत्वघटाकाशसंयोगान्यतरत्वावच्छिन्नाभाववान्गगनत्वा
दिमानव्याप्तिः साध्यवद्भिन्ने घटे वर्त्तमानस्य गगनादिसंयोगान्यतरस्य साध्याभावस्याधिकरणे गगनत्वहेतोः सत्त्वादिति वाच्यम् । अभावाभावस्यातिरिक्तताम
तेऽप्येतेन लक्षणादरणादितिभावः । भिन्नत्व इति । द्रव्यनिष्ठसंयोगाभाववतो भिन्नत्वेत्यर्थः । नानाभावादिति । तथाचात्राव्याप्यवृत्तिसाध्यकसद्धेतावित्यर्थः । हेतोरिति ।
नच साध्यवत्प्रतियोगिताकान्योन्याभावस्य केवलान्वयित्वासंभव एव नञ्मुचितो नाव्याप्तिरिति वाच्यं वह्निमान्गगनादित्यत्र गगनादेर्हेतौ लक्षणस्य संभवात् । तस्यापि
पदेऽनुतया स्वयं वक्ष्यमाणत्वादितिभावः । साध्यपदस्य सिद्धिक्रमे तत्तद्व्यक्तिपरतया तत्तद्व्यक्त्यवच्छिन्नान्योन्याभावासामानाधिकरण्यरूपपर्यवसितार्थस्य द्रव्यं पृ
थिवीत्वादित्यादावेव लक्षणासंभवाद्द्रव्यवतो पृथिवीत्वादित्यादावव्याप्तिः कथमित्यपि वदन्ति । ननु सकलस्य साध्यप्रतियोगिकाभावस्याधिकरणाप्रसिद्ध्या क्वापि
चारित्यतिव्याप्तिवारणार्थं यदि साध्याभावस्य विशेषणं साकल्यं तदा वह्निमान्धूमादित्यादिसद्धेतावव्याप्तिः । तत्रापि तत्तद्विपक्षावृत्तित्वावच्छिन्नाभावरूपस्य तत्तत्स
पक्षवृत्तित्वावच्छिन्नाभावरूपस्य वा साध्यप्रतियोगिकाभावत्वोभयस्याधिकरणाप्रसिद्धेरत आह साकल्यं साध्याववतीति । तथाच साकल्यं न साध्याभावविशेष
णमतो नाप्रसिद्धिरितिभावः । नन्वेवमपि साध्याभाववन्निखिलान्तर्गतेमहानसादौ वर्त्तमानस्याभावस्य प्रतियोगित्वं धूमादेर्नास्तीत्यव्याप्तितादवस्थ्यमत आह
साध्ये चेति । तथाच सपक्षो महानसादिः न सकलसाध्यस्याभाववान् इत्यदोषः । प्राञ्चस्तु व्यभिचारित्यतिव्याप्तिवारणार्थं साध्याभाववन्निष्ठत्वविशेषणे दत्ते एव
साध्ये यावत्त्वमव्याप्तिवारकतया सार्थकं भवतीत्यतः साध्याभाववत्त्वेव साकल्यं प्राञ्चो जयति साकल्यमित्यादिनेत्यवतारयन्ति तन्मन्दं साध्याभाववति साकल्यानुक्त्या व्य
तिव्याप्तिवारकतयैव साध्ये साकल्यविशेषणस्य पृथगनतः सार्थक्यसंभवात् । अन्यथा गगनावृत्तिधर्मवान्द्रव्यत्वादित्यादौ पटत्वादिलक्षणतत्तत्साध्यव्यक्त्यभाववद्गुण

भा. प.
२

दितिच्छाभावप्रतियोगिनि द्रव्यत्वाद्यवृत्तिप्रसंगादिति ध्येयम्. ननु तादृशवत्त्वमपि घटत्वाद्यवच्छिन्नप्रतियोगिताकस्य सकलसाध्यप्रतियोगिताकाभावस्य सत्त्वादसंभवः किंच स
कलपदेन रसाध्यनाम्ना सकलसाध्यप्रतियोगिताकाभाववतोऽनुपस्थापनात्तेन समं सकलपदस्य कर्मधारयोप्यनुपपन्न इत्यत आह साध्याभावेति. तथा च साध्याभा
ववत्येव साकल्यं देयं न तु साध्येपीति भावः साध्याभाववृत्ति साकल्यस्य प्रयोजनमाह नेनेति विपक्षैकदेशः कश्चिद्विपक्षः साध्यनिष्ठसाकल्यस्य साध्यतावच्छेदकावच्छिन्ना
भावस्य चाविवक्षायाः फलमाह नचेति. एकव्यक्तिसाध्यके सकलसाध्योक्तावप्यव्याप्तिरेवास्यतीत्याशयेन नानेत्युक्तम् अव्याप्यवृत्तीति. कपिसंयोगे तत्त्वादित्या
दावित्यर्थः. यद्यप्यग्रे हेत्वभावस्यापि प्रतियोगिवैय्यधिकरण्यावच्छिन्नस्यैव निवेशः कर्तव्य इत्यव्याप्यवृत्तिहेतावव्याप्तिं संभवति. तथापि यथाश्रुतमूलस्य न तत्राव्याप्ति
रित्यावेदयितुं व्याप्यवृत्तिहेताविति. व्यभिचारिणीति. एतद्वृक्षत्ववान्कपिसंयोगादित्यादावित्यर्थः. अभावरूप इति. साध्याभावे हेत्वभावे चेत्यर्थः. अत्र च साध्या
भावे प्रतियोगिवैय्यधिकरण्यं साध्यताघटकसंबन्धेन प्रतियोगिनो यदनधिकरणं तद्वृत्तित्वं तेन धूमाद्यभाववतोप्ययःपिण्डादेः कालिकादिसंबन्धेन धूमादिमत्त्वेपि
नातिव्याप्तिः. हेत्वभावे प्रतियोगिवैय्यधिकरण्यं तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वघटितमिति वाच्यं तेनायमात्मा ज्ञानादित्यादौ साध्याभाव
वतो घटादेर्विषयतया हेत्वभावप्रतियोगिमत्त्वेपि नाव्याप्तिः. हेत्वभावेपीति. अपिना साध्याभावसमुच्चयस्तेन विशिष्टसत्तावान्जातेरित्यादौ नातिव्याप्तिः. यद्यपि सा
ध्याभावेपीत्येव क्रमानुरोधादुक्तमुचितमपि शब्दादेव हेत्वभावस्य लाभसंभवात्. तथापि तत्प्रतियोगित्वं चेत्यग्रे तत्र तत्पदेनानिर्दिष्टहेत्वभावपरामर्शासंभवाद्धे
त्वभावप्रतियोगित्वं चेत्य[illegible]भिधाने च ग्रन्थगौरवं स्यादितीत्थमभिधानम्. प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगीति. प्रतियोगिपदं प्रतियोगितावच्छेदकताघ
टकसंबन्धेनावच्छेदकस्य वैशिष्ट्यलाभाय तेन हृदादेः कालिकादिसंबन्धेन धूमत्वाद्यवच्छिन्नस्य काष्ठादेः संयोगसंबन्धेन सत्त्वेपि नाव्याप्तिः. तत्प्रतियोगित्वं हेत्वभावप्र
तियोगित्वम्. हेतुतावच्छेदकरूपेणेति. हेतुतावच्छेदकसंबन्धेनेत्यपि बोध्यम्. तेनात्मभिन्नं द्रव्यत्वादित्यादौ साध्याभाववत्यात्मनि वर्त्तमानस्य प्रतियोगितावच्छेदकसंब

२

न्धेन प्रतियोगिव्यधिकरणस्य कालिकादिसंबन्धावच्छिन्नद्रव्यत्वत्वावच्छिन्नाभावस्य प्रतियोगित्वेपि द्रव्यत्वस्य नातिव्याप्तिः नच हेतुतावच्छेदकसंबन्धेन प्रतियोगि
वैयधिकरण्याभावे तस्यैवातिव्याप्तिवारणसंभवाद्धेतुतावच्छेदकसंबन्धेन प्रतियोगित्वविवक्षा व्यर्थेति वाच्यं तथा सति निर्धूमत्वव्याप्यवान्वह्नेरित्यादौ निर्धूमत्वभे
दस्यादायैव जलसमवायेन संभवेपि धूमत्वव्याप्यत्वगुणस्य घेवक्ष्यमाणव्याप्त्यनवच्छेदकतापत्तेरिति ध्येयम्. हेत्वभावेपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधि
करण्यविवक्षायाः फलमाह नेन द्रव्यत्वादाविति. अन्यथा साध्याभाववन्निरूपणदोषविशिष्टसत्ताभावस्य सत्तारूपप्रतियोगिसमानाधिकरणत्वादव्याप्तिरेव स्यादि
ति भावः. अत्र द्रव्यत्वस्य पक्षधर्मतायां सकलसाध्यप्रसिद्ध्या व्याप्तेरज्ञविवक्षया व्याप्यप्रतीकारादिपि इदंतेन गुणवत्त्वादिसाध्यस्योपसंग्रहः. द्रव्येतरसमवेतमात्र
वा प्रकृते द्रव्यत्वमिति ध्येयम्. हेतुतावच्छेदकरूपेण हेत्वभावप्रतियोगित्वविवक्षायाः फलमाह नवेति. सत्त्वादाविति. द्रव्यत्वादौ साध्ये इत्यनुवर्तते. यत्रैकव्यक्तिकमिति.
तथा च द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः. तत्र सकलसाध्यप्रसिद्धेरित्यर्थः. ननु तोप्यस्वरूपात्साध्यसामान्यस्यैव निवेशितत्वात्साध्यसाकल्यं न देयमेवेत्यत आह वि
पक्षोवेति. एकव्यक्तिकमित्यनुषज्यते. तथा च यत्रैकव्यक्तिरेव साध्याभाववती तत्र गगनादिर्निधर्मवान् गगनत्वादित्यादावव्याप्तिः. साध्याभाववतः साकल्याप्रसि
द्धेरित्यर्थः. ननु साध्यादिभेदेन व्याप्तिभेदात् यत्रैकस्य विपक्षस्तत्र स्थलस्वरेण साध्याभाववति साकल्यविशेषणं न देयमस्तो पक्षत्वरूपं वा साकल्यं निवेश्यमतो दोषान्तरमाह नि
र्धूमत्वव्याप्य इति. निर्धूमत्वस्य साध्यत्वे यत्रैकव्यक्तिकमित्यनेनैव गतार्थत्वात्स्यादतो व्याप्यपदं तं निर्धूमत्वव्याप्यस्यापि ह्रदादेः स्वेहत्वादिना साध्यत्वे वह्न्यभावस्य समभि
व्यापित्वादसंग्रहेण दोषापेत्यत उक्तं तत्त्वेन साध्ये इति. निर्धूमत्वव्याप्यत्वेन साध्य इत्यर्थः. प्रत्येकमिति. तथा च हेत्वभावस्य महानसीयवह्नेः साध्याभाववत्सकलान्त
र्गतपर्वताद्यवृत्तित्वादव्याप्तिरिति भावः. अत्र निरुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नसाध्याभाववद्वृत्तितावच्छेदकं निरुक्तवैयधिकरण्यावच्छिन्नमद्धर्माव
च्छिन्नाभावत्वं तद्धर्मवत्त्वं व्याप्तिरित्युक्तौ नु नैष दोष इति ध्येयम्. ननु साध्यवत्प्रतियोगिकान्यतरस्य धूमादिमात्रसत्त्वादव्याप्तिरत आह अत्रेति. तथा च साध्यवद्भे

आ॰ पं॰
३

ननिरूढलक्षणयोपस्थापितस्य साध्यतावच्छेदकविशिष्टसाध्यकत्वावच्छिन्नप्रतियोगिताकस्यान्यपदार्थैकदेशेऽन्वयेन तादात्म्येनान्वयात् साध्यवति च विशिष्टसाध्यकत्वावच्छिन्न
प्रतियोगिताकभेदासत्त्वान्नाव्याप्तिः गुरुधर्मस्यावच्छेदकत्वोपगमाच्च द्रव्यं पृथिवीत्वादित्यादौ द्रव्यत्वत्वविशिष्टद्रव्यत्वावच्छिन्नभेदाप्रसिद्ध्या नाव्याप्तिरिति भावः यद्धर्म
विशिष्टबोधकपदसमभिव्याहृतेनान्यादिपदेनोपस्थापितेन्यत्वादौ तद्धर्मावच्छिन्नप्रतियोगिताकत्वप्रकारेणैव तादात्म्येनान्वयो न तु तद्धर्माश्रयप्रतियोगिताकत्वेनेत्यत्र व्यु
त्पत्तौ प्रमाणमाह नीलेति तथा च तादृशव्युत्पत्त्यस्वीकारे नीलघटे घटप्रतियोगिकभेदसत्त्वान्नीलो घटो घटान्य इत्यपि व्यवहारः स्यादिति भावः अत्र च द्रव्यं घटान्य
दित्याद्यप्रयोगात् यन्निष्ठप्रतियोगिताकत्वेनान्यादिपदेन भेदो बोध्यते तद्वृत्तिधर्मस्यैवानुयोगितावच्छेदकत्वात् तत एव घटो घटान्य इत्यवारणसंभवात् नीलघटत्व
स्यानुयोगितावच्छेदकत्वपर्यन्तानुधावनमिति मन्तव्यं नीलो घटो घटान्य इत्येव सम्यक्पाठः तथैव प्रकृतोपयोगित्वसंगतेः घटान्य इति पाठस्तु साध्यवदन्येत्यत्र पञ्च
मीसमासे तु प्रविभक्तिस्मारितप्रतियोगित्वे प्रकृत्यर्थतावच्छेदकावच्छिन्नत्वस्य संसर्गमर्यादया भानमाहृत्य कथंचित् संगमनीयः घटः पटो नेत्यादौ तु पटपदं स्वार्थपर
मेव न तु प्रकृत एव पटत्वावच्छिन्नप्रतियोगिताकपरं निपातातिरिक्तस्थल एव नामार्थयोरभेदातिरिक्तान्वयाव्युत्पन्नतया नञोपस्थापिते भेदे पटत्वावच्छिन्नप्रतियो
गिताकत्वसंसर्गेणैव पटस्यान्वयसंभवात् पटत्वावच्छिन्नप्रतियोगिताकत्वं तु पटत्वमवच्छिन्नत्वं प्रतियोगित्वं चेति त्रितयमेव विशेष्यविशेषणभावापन्नं संस
र्गः न तु वस्तुगत्या पटत्वावच्छिन्नं यत्प्रतियोगित्वं तन्मात्रं पटो नेत्यत्र पटत्वावच्छिन्नत्वस्याप्यनुभवसिद्धत्वात् अन्यथा प्रतियोगिताव्यक्तिभिरेव तत्तद्विशिष्टबु
द्ध्युपपत्तौ पटत्वादेस्तदवच्छेदकत्वकल्पनमेव न स्यात् मानाभावात् अतएव केवलान्वयिग्रन्थे वह्निर्नास्तीत्यत्र वह्नित्वमवच्छिन्नत्वं प्रतियोगित्वं च संसर्गम
र्यादया भासत इति स्वयमप्युक्तम् इत्थमेव च प्रमेयं नास्ति कम्बुग्रीवादिमान्नास्तीत्यादिशाब्दबोधानां संसर्गकोटावेव प्रतियोगितायां प्रमेयत्वावच्छिन्नत्वावगा
हितया भ्रमत्वं संसर्गप्रकारसाधारणविशेष्यविशेषणभावस्यैव भ्रमत्वप्रयोजकत्वात् अन्यथा स्वरूपसंबन्धेन प्रमेयत्वावच्छिन्नप्रतियोगित्वस्याऽलीकतयाऽख

३

र्छिन्नत्वसंबन्धेन प्रमेयस्याभावे धर्मिण्यन्वयासंभवेन भ्रमत्वानुपपत्तेः॰ सदुपरागेणाप्यसत्त्वः संसर्गमर्यादया भानस्यानङ्गीकारात्॰ कुप्रेन पटत्वावछिन्नप्रतियोगित्वसंबन्धेन चाभावे प्रमेयस्य सत्त्वेन तादृशसंबन्धेन भ्रमत्वस्य वक्तुमशक्यत्वात्॰ पटत्वादेरन्वयितानवछेदकतया तदवछिन्नप्रतियोगित्वसंबन्धेन प्रमेयत्वादिविशिष्टस्यान्वये निराकांक्षत्वाच्च॰ अन्यथा घटवत्यपि घटो नास्तीत्यादेः प्रमाणत्वापत्तेः॰ तन्न घटत्वावछिन्नप्रतियोगित्वसंबन्धेन घटविशिष्टस्य घटविशेषाभावस्य तत्र सत्त्वात्॰ एतेन सत्तासमवायिन्यपि गुणादौ विशिष्टसत्तात्वावछिन्नस्य समवायेनासत्त्ववत् घटत्वावछिन्नप्रतियोगित्वसंबन्धेन घटत्वावछिन्नवतोपि घटाद्यभावस्य न तादृशसंबन्धेन प्रमेयत्वावछिन्नवत्त्वमतः प्रमेयं नास्तीत्यादौ घटत्वावछिन्नप्रतियोगित्वसंबन्धेन प्रमेयत्वावछिन्नस्यैवाभावांशे भ्रमत्वमित्यपि प्रत्युक्तं घटत्वादेरन्वयितानवछेदकतया तदवछिन्नप्रतियोगित्वसंबन्धेन प्रमेयत्वविशिष्टस्यान्वये निराकांक्षतया तथा ज्ञानस्यासंभवादिति ध्येयम्॰ नीलो घटो नास्तीत्यादौ तु नीलघटत्वस्यान्वयितावछेदकत्वेन तादृशधर्मावछिन्नप्रतियोगित्वमेव संसर्गो न तु नीलत्वघटत्वादिप्रत्येकावछिन्नप्रतियोगित्वं नीलपटस्य पीतघटस्य चाधिकरणे तादृशप्रयोगापलापापत्तेः॰ नीलोपलक्षितस्य घटत्वमात्रस्यान्वयितावछेदकत्वे तु घटत्वावछिन्नप्रतियोगित्वमेव तथा संयोगेन घटो नास्तीत्यादौ तु तृतीयाविभक्तेरवछिन्नत्वमर्थः संसर्गभिन्नप्रतियोगितायां तदन्वयासंभवात् द्वित्त्ववछिन्नप्रतियोगिताकत्वं प्रतियोगित्वमात्रं वावछिन्नत्वं संसर्गेण संयोगादेः तत्रान्वयोद्देश्यविशिष्टलाभसंभवात्॰ न चैवं संयोगेन घटाभावस्यैव समवायेन घटविशिष्टद्रव्यत्वाभाववत्तया समवायेन कपाले घटो नास्तीति व्यवहारापत्तिः॰ तृतीयान्तसमभिव्याहारस्थले तदुपस्थाप्यप्रतियोगित्वस्यैव संसर्गतया प्रत्यपन्नत्वात्॰ समवायावछिन्नघटप्रतियोगिकाभावस्य च कपाले विरहात्॰ अस्तु वा घटत्वावछिन्नस्यैव संयोगसंबन्धावछिन्नत्वस्यापि प्रतियोगित्वांशे संसर्गमर्यादयैव भानं तृतीयान्तसमभिव्याहारस्य नियामकत्वाच्च नातिप्रसंगः॰ घटानधिकरणं भूतलमित्यादौ तु लक्ष्याधिकरणपदमेव घटाधिकरणार्थकं घटपदं तात्पर्यग्राहकमन्यथा नञधिकरणपदेनाधिकरणसामान्यभिन्नत्वोक्तौ भ्र

तत्त्वेन स्वबाधः स्यात्. न च घटान्वितस्यैवाधिकरणभेदस्तत्र नञा बोधनीयः समासान्तर्गतनञो मुख्यस्वपदार्थमात्रान्वयित्वव्युत्पत्तेः अन्यथा नीलघटो पट इत्यादौ नीलघ
टान्यस्य घटत्वं नीलाप्रमेयः पट इत्यादौ च नीलप्रमेयान्यस्य पटत्वं प्रतीयेत. वस्तुतः ससंबन्धिकपदस्थले व्युत्पत्तिवैचित्र्यात् प्रतियोगितानवच्छेदकं घटानधिकरणं भूतल
मित्यादौ घटपदान्वितस्यैवाधिकरणादेर्भेदोऽवभासते अन्यत्रापि पदतत्पुरुषानुपगमेपि घटस्यानधिकरणं प्रतियोगितायानावच्छेदकं मित्यादिरीत्यापि पदतत्पुरुषेण विशि
ष्टतामसंभवादिति तु परमार्थः. पीतः शंखो नास्तीत्यादौ शाब्दबोधस्तु नञ् शंखत्वावच्छिन्नतया प्रतियोगित्वमवगाहते तन्मात्रस्यान्वयितानवच्छेदकत्वात् शंखवत्तयानि
श्चिते धर्मिण्यपि तादृशप्रयोगात्. परंतु पीतशंखत्वावच्छिन्नप्रतियोगितात्वेन संसर्गमर्यादया प्रतियोगित्वमवगाहते. नञादिपदानां यद्धर्मविशिष्टवैशिष्ट्यावगा
हि स्वोपस्थाप्याभावधर्मिकान्वयबोधजनकत्वं तद्धर्मावच्छिन्नप्रतियोगितात्वेन प्रतियोगितासंसर्गकान्वयबोधजनकत्वव्युत्पत्तेः. इयांस्तु विशेषः. घटो नास्तीति
शाब्दे सांसर्गिकी प्रतियोगितावगाहिता प्रसिद्धेन घटत्वावच्छिन्नप्रतियोगितात्वेन निरूपिता. पीतः शंखो नास्तीत्यादौ तु पीतशंखत्वावच्छिन्नप्रतियोगितात्वेनाप्रसिद्धे
नैवेत्यादिकं बहुतरमूहनीयम् ॥ इति जागदीशी पंचलक्षणी संपूर्णा ॥ ॥श्रीगणेशाय नमः॥ साध्यसामानाधिकरण्यपदस्य साध्यवद्भिन्नवृत्तित्वार्थकत्वे साध्यवै
यधिकरण्येनादिउक्तलक्षणेनापौनरुक्त्यापत्तिरतो व्याचष्टे साध्यसमानाधिकरणं यस्येति तच्च मितिपदेनान्वयः. वह्निमात्रस्यैव व्यधिकरणतत्तद्धूमसमानाधि
करणत्वात् वह्निमान् धूमादित्यादावव्याप्तेराह यदधिकरणेति. यदधिकरणमनधिकरणं यस्येति व्युत्पत्त्या यस्याधिकरणं साध्यानधिकरणं न तत्त्वमित्यर्थः. तत्तद्धूमाधि
करणं तु न वह्निसामान्यानधिकरणमतो नाव्याप्तिरिति भावः. ननु घटादिस्वरूपं यत्किंचिद्घटाद्यधिकरणं साध्याभिमतधूमाद्यनधिकरणं तद्व्यक्तित्वानधिकरणत्वं व
ह्न्यादेरप्यतो धूमवान्वह्नेरित्यादावतिव्याप्तिः यद्घटाद्यधिकरणं साध्यानधिकरणं तत्तद्व्यक्तित्वानधिकरणत्वोक्तौ तु गौरवमत आह साध्यनिष्ठेति. साध्यनिष्ठाभा
वप्रतियोगित्वं संसर्गेणाप्यस्तीत्यतः सामानाधिकरण्याभाव उक्तः. न च साध्यनिष्ठस्य सामानाधिकरण्याभावस्य प्रतियोगित्वं सामानाधिकरण्यस्यैव ननु वह्न्यादावित्यसद्धेता

वृत्तिव्याप्तिः। साध्यनिष्ठाभावप्रतियोगिवृत्तित्वनिरूपकाधिकरणवृत्तित्वस्य विवक्षितत्वात्। वस्तुतः असमानाधिकरण्यं सामानाधिकरण्यसंबंधेनाभाव इति
परमार्थः। न चैवं द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः सामानाधिकरण्याभावस्याव्याप्यवृत्तित्वेन साध्यनिष्ठत्वात्। एतदस्वरसेनैव वा कल्पान्तरानुसरणमित्यपरे।
नन्वेवमपि वह्निमान्धूमादित्यादि विषमव्याप्ते हेतावव्याप्तिः महानसीयवह्निनिष्ठस्य पर्वतवृत्तित्वाद्यभावस्य प्रतियोगीभूतं यदाधेयत्वं तन्निरूपके पर्वतादौ धूमादे
र्वर्त्तमानत्वात् साध्यसामान्यनिष्ठाभावप्रतियोग्याधेयतानिरूपकाधिकरणवृत्तित्वोक्तौ च महागौरवमत आह साध्यनिष्ठाधेयत्वेति। अत्राधेयत्वं साध्यताघटकसंब
न्धेन ग्राह्यं तेन रूपवान्महाकालत्वादित्यादौ संबन्धसामान्येन रूपनिष्ठाधेयत्वानिरूपके गगनादौ हेतोर्वृत्तित्वेपि नातिव्याप्तिः। सद्धेतौ साध्यवद्भिन्नवृत्तौ। ननु सा
ध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमवश्यं हेतुताघटकसंबन्धेन वाच्यमन्यथा वह्निनिष्ठाधेयत्वानिरूपके स्वावयवे समवायादिना धूमादेः सत्त्वादव्याप्त्याप
त्तेः। तथा च सत्तावान्द्रव्यत्वाद्धूमाद्वेत्यादावव्याप्तिः साध्यनिष्ठाधेयत्वानिरूपके जात्यादौ समवायेन संयोगेन वा हेत्वप्रसिद्धेः। किं च द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः।
द्रव्यत्वनिष्ठाधेयत्वानिरूपकगुणादिवृत्तित्वस्य विशिष्टसत्तायां सत्त्वादत आह साध्यनिष्ठेति। धूमनिष्ठाधेयत्वानिरूपके जलादौ वह्न्याद्यधिकरणत्वाभावसत्त्वाद्धूमि
चारिण्यतिव्याप्तिरतो व्यापकेति। व्यापकत्वं तु प्रतियोगिवैयधिकरण्यघटितमेव ग्राह्यं तेन संयोगेन वह्न्यधिकरणत्वस्याव्याप्यवृत्तितया तदभावस्य तत्राप्यवृत्ति
त्वेपि नातिव्याप्तिः। वह्न्यधिकरणत्वगगनोभयत्वावच्छिन्नाभावस्य धूमनिष्ठाधेयतानिरूपकाधिकरणत्वव्यापकत्वादतिव्याप्तिस्तु सामान्यपदम्। तथा च हेतुताव
च्छेदकसंबन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वसामान्याभावत्वेन साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वं तद्धर्मवत्त्वमर्थः। तेन वह्निनिष्ठा
धेयत्वानिरूपकाधिकरणजलादौ कालिकसंबन्धेन धूमाधिकरणतायाः सत्त्वेपि नाव्याप्तिः। न वा वह्न्यधिकरणत्वाभावस्यापि प्रमेयत्वादिना धूमनि
ष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वेप्यतिव्याप्तिः। न च हेतुतावच्छेदकसंबन्धेन यद्धर्मावच्छिन्नाभावत्वेन तादृशाधिकरणताव्यापकत्वमित्यस्यैव सम्य

गा.दी.व्या. ५

त्केधिकरणत्वाभावपर्यन्तानुप्रवेशो व्यर्थ इति वाच्यं तत्र नियामकसंबन्धेन हेतुतायामव्याप्तिप्रसंगात्. तादृशसंबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः. अस्माकं तु तादृशसंबन्धित्वं तत्स्वरूपसंबन्धावच्छिन्नाभावप्रतियोगित्वमादाय लक्षणसंभवात्. किंचाधिकरणत्वाप्रवेशे वह्न्यादेः साध्यत्वे संयोगादिसंबन्धेन रूपादेरेवातिव्याप्तिः. संयोगेन रूपाद्यभावस्य केवलान्वयितया वह्निनिष्ठाधेयतानिरूपकाधिकरणत्वव्यापकत्वादिति भावः. साध्यवद्भिन्नेति. अत्रापि साध्यवद्भिन्नत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षो बोध्यः. तेन सत्तावान् द्रव्यत्वादित्यादौ नाव्याप्तिः. ननु प्रागुक्तस्यार्थस्य शब्दान्तरेणाभिधानमनुवादः. स चात्रासंभवी साध्यं यदधिकरणानधिकरणं तत्त्वानधिकरणत्वस्य साध्यवद्भिन्नवृत्तित्वानधिकरणत्वस्य च प्रागुक्तस्य साध्यानधिकरणानधिकरणत्वशब्देनाबोधनादत आह चरमेति. तत्त्वाधिकरणत्वाभावे तत्त्वाभावस्याप्रवेशाद्वैयर्थ्यमसंभवीत्यत उक्तमनतिप्रयोजकतयेति. तथा च प्रकृतलक्षणवाक्यस्य साध्यं यदधिकरणानधिकरणं तत्त्वाभावे साध्यस्य यदनधिकरणं तद्वृत्तित्वाभाव एव च तात्पर्यात्. प्रागभिप्रेतार्थस्य शब्दान्तरेणाभिधानमेवानुवादः. स चात्र संभवत्येवेति भावः. साध्यमित्यादि. साध्यानधिकरणेत्यादौ मध्यवर्त्तिनञो व्यापासेन चरमाधिकरणत्वांशेन सहान्वयादेव न साम्य इत्याशयः. केवलान्वयिनीति. अव्याप्तिरिति परेणान्वयः. अव्याप्तेर्हेतुमाह साध्यनिष्ठेति. नानाव्यक्तिसाध्यके चेति मूलोक्तप्रमेहेतुमभिप्रेत्य तेन शब्दवान् गगनत्वादित्यादौ नानाव्यक्तिसाध्यकाव्याप्तिविरहेपि न क्षतिः. एतन्तां परिहरन्ति केचिदिति. विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरित्यर्थः. विशिष्टधर्मावच्छिन्नाधिकरणत्वस्यैव न [illegible]न्नाधेयतस्यानतिरिक्तत्वादिति भावः. यत्किंचिदिति. साध्यवत्तन्न वृत्तित्वावच्छिन्न इत्यर्थः. नानाधिकरणसाध्यकेति. यत्र साध्यतावच्छेदकावच्छिन्नाधिकरणं नाना तत्रेत्यर्थः. तेन कस्याश्चिदपि वह्निव्यक्तेर्नानाधिकरणवृत्तित्वविरहेपि न वह्निसाध्यकधूमाद्यसंग्रहः. सर्वत्र केवलान्वयिनि तद्भिन्ने च सार्वभौममतमुत्थापयन्ति केचित्त्विति. हेत्वधिकरण इति सप्तम्यर्थो वच्छेदकत्वं तच्च साध्यवद्वृत्तित्वाभावेन्वितम्. तेनैवेति. हेतुतावच्छेदकसंबन्धेनैवेत्यर्थः. तस्य च साध्यवद्वृत्तित्वेन सहान्वयः. साध्यकत्वमपि येन संबन्धेन येन रूपेण साध्यता तत्संबन्धेन तद्रूपाव

च्छिन्नवत्त्वंबोध्यम्॰ तेनसमवायेनवह्नेःसाध्यत्वेधूमविशिष्टसत्त्वसाध्यकेसत्त्वादौनातिव्याप्तिः॰ तदधिकरणाभिन्नत्वमिति॰ तदत्यन्ताभावत्वोक्तौद्रव्यंसत्त्वादित्यादाव
तिव्याप्तिः॰ गुणाद्यवच्छेदेनद्रव्यवृत्तित्वाभावस्यैवद्रव्यावच्छेदेनसत्तायामभावसत्त्वादतोपिभिन्नत्वपर्यन्तानुसरणंभेदस्तुनाव्याप्यवृत्तिः तदव्याप्यवृत्तित्वेतुतादृशाद
नित्वाभाववतीयावतीव्यक्तिस्तत्तद्भेदकूटवत्त्वंवक्तव्यमितिभावः॰ हेतुतावच्छेदकसंबन्धेनहेत्वधिकरणइत्यस्यफलमाहस्वावयवेसंयोगेनेति॰ अवृत्तावपिनक्षतिरि
त्यन्वयः॰ तथाचतादृशसंबन्धेनहेत्वधिकरणत्वाप्रवेशेस्वावयवावच्छेदेनधूमस्यवह्निमत्संयुक्तत्वाभाववत्त्वाद्वह्निमान्धूमादित्यादावव्याप्तिःस्यान्नपुनरसंभवः॰ इ
दंवाच्यंज्ञेयत्वादित्यादिकेवलान्वयिनिलक्षणासंभवादितिभावः॰ अत्रचोत्पत्तिकालावच्छिन्नेघटेपृथिवीत्वेरूपवद्वृत्तित्वंनेत्यादिप्रतीत्याघटाद्यवच्छेदेनपृथिवीत्वादे
रूपवद्वृत्तित्वाभावाभ्युपगमेहेत्वधिकरणनिष्ठमवच्छेदकत्वंनिरवच्छिन्नंग्राह्यंतेनरूपवान्पृथिवीत्वादित्यादौनाव्याप्तिः॰ तत्रघटनिष्ठावच्छेदकत्वस्योत्पत्तिका
लेनावच्छिन्नत्वादितिध्येयम्॰ तेनैवेत्यस्यफलमाहवह्निमानितिचसमवायेनेति॰ हेतुतावच्छेदकसंबन्धेनसाध्यवद्वृत्तित्वानुक्तौसंबन्धसामान्येनहेत्वधिकरणावच्छे
द्यसाध्यवद्वृत्तित्वसामान्याभावोननिवेश्यः साधनाधिकरणाद्यवच्छेद्यत्वाद्यभावस्याप्रसिद्धेः॰ किंतुयत्किंचित्संबन्धेनसाध्यवद्वृत्तित्वाभावःप्रवेशनीयः॰ तथाच
हेत्वधिकरणपर्वताद्यवच्छेदेनधूमादौवह्निमत्समवेतत्वाद्यभावसत्त्वादसंभवतादवस्थ्यंयदितेनैवसंबन्धेनसाध्यवद्वृत्तित्वप्रवेशोनस्यादितिभावः॰ ननुहेत्वधि
करणावच्छेद्यघटत्वविशिष्टस्यसाध्यवद्वृत्तित्वाभावस्याधिकरणप्रसिद्ध्यालक्षणासंभवेनतदधिकरणस्यैवतन्निष्ठधर्मावच्छेदकतयागगनजलत्वादेवह्निमत्स
मवेतसंयुक्तत्वाभावस्यधूमवत्पर्वतानवच्छेद्यत्वादतआह तादृशाभावश्चेति॰ हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावश्चेत्यर्थः॰ संबन्धान्तरेणहेतुतावच्छेदकसं
बन्धान्यसंबन्धेन तथाचहेतुमत्पर्वतावच्छेदेनघटत्वविशिष्टस्यवह्निमत्संयुक्तत्वाद्यभावस्याधिकरणत्वंपर्वतीयरूपादावेवप्रसिद्धमितिभावः॰ यद्यपिरूपादौवह्निमत्सं
युक्तत्वाद्यभावस्याव्याप्यवृत्तित्वात् तत्रपर्वतादिर्नावच्छेदकंभावाभावयोरेकत्रवृत्त्यर्थमेवावच्छेदकस्वीकारादित्यप्रसिद्धितादवस्थ्यम्॰ नचमहानसादिसंयुक्ते

सि॰ व्या॰
६

कालिकादिसंबन्धेन पर्वतादिनिष्ठयत्किंचिद्वह्निमत्संयुक्तत्वाभावस्य पर्वतावच्छेदकत्वप्रसिद्ध्या न दोष इति वाच्यम् । इत्थमपि एतद्रूपवत्तेन रूपीत्यादावेतत्त्वाधिक-
रणावच्छेदेन एतद्रूपवत्समवेतत्वाभावस्याप्रसिद्धेर्दुर्वारत्वात् । तथापि पर्वतावच्छेदेन नदीयरूपेन वह्निमत्संयुक्तत्वमित्यादिप्रतीत्या व्याप्यवृत्तेरवच्छेदकत्वस्वीकारादित्थ-
मभिधानं हेतुतावच्छेदकसंबन्धेन साध्यवद्भिन्नत्वाभावविशिष्टस्य यस्याधिकरणं तदन्यत्वे वागुप्ततात्पर्यं तथा च व्याप्यवृत्तेरवच्छेदकत्वास्वीकारेऽपि साध्यवद्भिन्नत्वाभाव-
विशिष्टस्य यस्याधिकरणं तद्भिन्नत्वमादायैव लक्षणसंगतिः । न च वस्तुगत्या साध्यवद्भिन्नत्वाभावविशिष्टस्य यस्याधिकरणं तदन्यत्वोक्तौ वह्निमान् धूमादित्यादावव्या-
प्तिः । स्वावयवावच्छेदेन वह्निमत्संयुक्तत्वाभाववतो धूमस्याधिकरणतायाः साधनवत्पर्वतादौ सत्त्वात् । साध्यवद्भिन्नत्वाभावविशिष्टयद्वृत्तित्वावच्छिन्नाधिकरणत्वं हे-
तुमत्तदन्यत्वोक्तौ तु वह्निमान् धूमादिदं वाच्यं ज्ञेयत्वादिना दोषे सर्वत्रैवासंभवः साध्यवत्संयुक्तत्वादिविशिष्टतत्तद्रूपादिव्यक्तेः तस्य गहनतया प्रमेयरूपत्वावच्छिन्नायाः
तियोगिताया इव तत्त्वावच्छिन्नाधिकरणत्वाप्रसिद्धेः । केवलस्यातिप्रसंगादेतद्विशिष्टधर्मस्याधिकरणतानिरूपकतावच्छेदकत्वकल्पनादिनिवाच्यं सार्वभौमानां मते प्र-
तियोगिताया इवाधिकरणताया अपि गुरुधर्मावच्छेद्यत्वोपगमात् । अन्यथा तत्समवेतत्वादिकमपेक्ष्य सत्तावत्समवेतत्वत्वस्य गुरुतया साध्यवद्भिन्नत्वावच्छिन्न-
प्रतियोगिताकाभावाप्रसिद्ध्या सत्तावान् द्रव्यत्वादित्यादावव्याप्तिप्रसंगात् । ननु साध्यसामानाधिकरण्यवतोनन्तरभाववत्त्वमतो द्रव्यं सत्त्वादित्यादि व्यभिचारिण्यतिप्रसं-
ग इत्यत आह व्यभिचारिण्यस्त्विति । तादृशीति । हेतुतावच्छेदकसंबन्धेन हेतुमतीत्यर्थः । तादृशाभाववत्त्वं साध्यवद्भिन्नत्वाभाववत्त्वं मन्नैवानुभवप्रमाणयति सत्तायामि-
त्यादि । एवं सत्तायामपि द्रव्यत्वसामानाधिकरण्यविरहे विशिष्टसत्त्व इति । विशिष्टसत्त्वशब्दप्रतिपाद्यहेतावित्यर्थः । यथाश्रुते गुणकर्मान्यत्वविशिष्टसत्ताव्यक्ताव-
व्याप्त्याशंकाया अनुत्तरग्रन्थेन तन्निरासाद् असंगत्यापत्तेः । अतिरिक्तत्वादिति । विशेष्यविशेषणाभ्यां भिन्नत्वादित्यर्थः । तथा च गुणादिकं न हेत्वधिकरणमतो
नाव्याप्तिः । उभयत्वमपि एकविशिष्टापरत्वमेव न त्वतिरिक्तमेव नातः स्पर्शवान् मूर्तत्वभूतत्वोभयस्मादित्यादावव्याप्तिरिति भावः । यद्यपि हेतुतावच्छेदकविशि-

६

एतेन्वधिकरणावच्छेदेन तु क्वापि विशिष्टसत्तादिहेतौ नाव्याप्तिः। न च धूमाधिकरणमहानसावच्छेदेन पर्वतीयादिधूमे वह्निमत्संयुक्तत्वाभावस्य चालनीन्याये
नसत्त्वा[illegible]व्याप्तिः महानसादेरपि कालिकादिसंबन्धेन पर्वतीयधूमाधिकरणत्वात्। तत्र साध्याभाववद्वृत्तित्वाभाववत्तायामवच्छेदकत्वाश्रितिवाच्यं स्वावच्छिन्ना
धिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभाववद्वृत्तिधर्मवत्त्वमित्यस्यैव फलितार्थस्य तत्तद्धूमत्वधर्ममादायैव लक्षणसंभवेन धूमत्वस्य हेतुतावच्छेदकत्वेपि क्षत्यभावा
त्। तथापि विशिष्टस्यातिरिक्तत्वात्तत एवाव्याप्तिवारणसंभवे हेतुतावच्छेदकावच्छिन्नाधिकरणत्वप्रवेशो गौरवमसंभवो वा विशिष्टनिरूपकाधिकरणत्वाप्रसिद्धेः।
एवं धूमत्वादेर्व्याप्यतानवच्छेदकत्वेन तद्रूपेण कथायां हेतोरुपन्यासो न स्यादित्याशयः। ननु विशिष्टसत्त्वस्यातिरिक्तत्वे मानाभावः। न च गुणो विशिष्टसत्तावानिति प्रती
त्यभावप्रमाणं गुणस्य विशिष्टनिरूपिताधिकरणत्वविरहादेव तादृशप्रतीत्यसंभवात्। न च विशिष्टनिरूपितमधिकरणत्वं यद्यतिरिक्तं तदा विशिष्टमेवातिरिक्तमस्तु
विशिष्टाधिकरणतायाः स्वरूपाधिकरणतास्वरूपत्वाभ्युपगमात्। किंच विशिष्टस्यातिरिक्तत्वे द्रव्यं विशिष्टसत्तावदिति निर्णयदशायामपि द्रव्यं न सत्तावदितिप्रत्यय
प्रसंगः। सत्ताभावबुद्धिं प्रति सत्तानिश्चयस्यैव विरोधितया तदसत्त्वात्। स्वातन्त्र्येण विरोधितान्तरकल्पने गौरवात्। एवं विशेषणविशेष्योभयग्राहकसामग्रीविरहेपि वि
शिष्टग्रहप्रसंगः। तदुभयग्राहकसामान्याविशिष्टस्य ग्रहे हेतुत्वकल्पनेपि गौरवान्तरं स्फुटमेवेत्यत आह अनतिरिक्तत्वेविति। गुरवस्तु विशिष्टस्यातिरिक्तत्वादिति ग्रन्थस्य विशि
ष्टनिरूपिताधिकरणत्वस्यातिरिक्तत्वादित्यर्थः। तथा च हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेन तादृशवृत्तित्वाभाववत्त्वमपि निवेश्यमतो नाव्याप्तिरित्याशयः। ननु
विशिष्टाधिकरणत्वं यदि नातिरिक्तं विशिष्टसत्तावानिति प्रतीतेः प्रत्येकनिरूपिताधिकरणताद्वयावगाहितयैवोपपत्तेः। अन्यथा विशेषणाभावनिर्णयदशायामपि विशि
ष्टसत्तावत्त्वप्रतीत्यापत्तेः। विशिष्टसत्ताबुद्धौ विशेषणाभाववत्ताज्ञानस्य प्रतिबन्धकतायाः स्वातन्त्र्येण कल्पनापातादित्युच्यते तत्राह अनतिरिक्तत्वेतीति प्राहुः।
विशेषणेति। विशेषणं तु गुणकर्मान्यत्वं विशेष्यं सत्ता तयोः सामानाधिकरण्यात्मकसंबन्धस्यैवेत्यर्थः। तादात्म्यसंबन्धेन तस्याव्यभिचारित्वादाह परंपरयेति। अवच्छेदकतारूपस्वरू

नं २

पसंबन्धेनेत्यर्थः॰ सत्त्वगुणकर्मान्यत्वयोर्द्रव्येएवसामानाधिकरण्यमितिप्रतीत्यावच्छेदकतासंबन्धेनतदुभयसामानाधिकरण्यस्यद्रव्येसत्त्वान्नव्यभिचारइतिभावः॰ नन्वेवंज्ञेयत्वाधिकरणघटपटावच्छेदेनवाच्यत्ववद्भिन्नत्वाभावस्यपटीयरूपादावेवसत्त्वात्तदधिकरणभिन्नत्वमस्येवज्ञेयत्वादिहेतौतत्पक्षेकेवलान्वयित्वस्याप्रसिद्धप्रदर्शनमसंगतमत आह केवलान्वयिनीति॰ द्वितीयेति तत्रसाध्यवद्भिन्नस्याप्रसिद्धत्वादितिभावः॰ यद्यपीदंवाच्यंप्रमेयादित्यादौतादात्म्येनकेवलान्वयिनिहेतौप्रथमलक्षणेव्याप्तिःसंभवति॰( प्रमेयावच्छेदेनवाच्यत्ववत्तादात्म्यकत्वविरहस्याप्रसिद्धेः॰ नचघटपटावच्छेदेनवाच्यत्ववत्तादात्म्यविरहोघटत्वादौसुलभः॰ तथासतिघटत्वंघटेनवाच्यमितिप्रतीत्यापत्तेः॰ तथापिस्वाधिकरणनिरूपितहेतुतावच्छेदकसंबन्धेनसाध्यवद्भिन्नत्वाभावोलक्षणघटकइत्यभिप्रायेणद्वितीयलक्षणाभिधानंस्वपदस्यतत्तत्साधनव्यक्तिपरतयातादात्म्येनघटवदधिकरणीभूतपटव्यक्तिनिरूपिततादात्म्येवाच्यत्ववत्तादात्म्यकत्वाभावस्यपटावच्छेदेनघटत्वादावेवप्रसिद्धेः॰ वस्तुतस्तुकेवलान्वयित्वंवृत्तिमदत्यन्ताभावाप्रतियोगित्वमात्रंनत्ववच्छेदकगर्भंतथाचतादात्म्येनकिंचिदपिप्रमेयंनकेवलान्वयीतिद्वितीयलक्षणेएतादृशकेवलान्वयिन्यव्याप्तिसंभवात्॰ यथाश्रुतमेवसम्यगितिध्येयम्॰ नव्यास्तुकेवलान्वयिनिव्याप्तेरितिकेवलान्वयिसामान्येव्याप्तेरभिधानंद्वितीयलक्षणाभिप्रायेणेत्यर्थः॰ प्रथमलक्षणेयत्किंचित्केवलान्वयिनितादात्म्येनप्रमेयादिहेतावव्याप्तावपिनक्षतिरित्याहुः॰ सत्तायांगुणेनद्रव्यत्वसामानाधिकरण्यमितिप्रतीतिःसत्तानिष्ठद्रव्यत्वसामानाधिकरण्यस्यावच्छेदकताभावंगुणादवगाहते इत्यत्रसमानाकारकप्रतीतिंदृष्टान्तयतिद्रव्यत्वेगुणइति॰ नन्वुक्तप्रतीतौगुणावच्छेदेनद्रव्यत्वेपृथिवीत्वसामानाधिकरण्याभावोविषयःगुणस्यद्रव्यत्वानधिकरणतयातन्निष्ठपृथिवीवृत्तित्वाभावावच्छेदकत्वासंभवात्किंतुद्रव्यत्वनिष्ठंयत्पृथिवीत्वसामानाधिकरण्यंतदवच्छेदकत्वाभावएवगुणेविषयइतिनद्विपमपीतिभावः॰ अवच्छेदकताभावमिति॰ प्रात्यक्षिकप्रत्ययाभिप्रायेणेदंसत्तायांगुणेनद्रव्यत्वसामानाधिकरण्यमित्यादिशाब्दस्थलेवच्छेदकत्वोपस्थापकपदान्तरविरहात्तदभावस्यगुणादौबोधयितुमशक्यत्वात्॰ किंतुसत्तानिष्ठंद्रव्यत्वसामानाधिकरण्यंनगुणावच्छेद्यमित्याकारकएवतत्रबोधः॰ गुणादावित्यत्रसप्तम्यर्थस्यनञर्थे

न्वयादिति ध्येयम्· नन्वेवं तादृशप्रतीतेः सामानाधिकरण्याभावविषयकत्वमनुभवसिद्धं विरुद्धेन सामानाधिकरण्यव्याप्यवृत्तित्वेन तदवच्छेदकत्वाप्रसिद्ध्या तादृशाव
च्छेदकत्वाभावविषयकप्रतीतेर्भ्रमत्वापत्तिश्च स्यादत आह परंपरासंबन्धेनेति· निरूपकताख्यस्वरूपसंबन्धेनेत्यर्थः· न त्ववच्छेदकताख्यस्वरूपसंबन्धेनेत्यर्थः·
तथासति सत्तायां द्रव्येन द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिप्रसंगात्· सामानाधिकरण्यस्य व्याप्यवृत्तितया कुत्राप्यवच्छेदकत्वसंबन्धेन तस्यासत्त्वात्· नन्विति·
तथाच द्रव्ये सत्त्वादित्यादावतिव्याप्तिरिति भावः· ननूक्तदृष्टान्तस्थले बाधकसत्त्वादवच्छेदकत्वाभावोऽस्तु प्रतीतेर्विषयः प्रकृते तु साक्षात्सामानाधिकरण्याभावविष
यकत्वे न किंचिद्बाधकमस्तीत्यतो बाधकमाह सत्तानेति· तथाच सत्तायां द्रव्यवृत्तित्वाभावसत्त्वे द्रव्यवृत्तित्वाभाववद्भिन्नत्वधीस्तत्र न स्यादिति भावः· ननु द्रव्यवृत्तित्वा
भावोऽव्याप्यवृत्तिरेवेति तद्वद्भेदोऽप्यव्याप्यवृत्तिर्वाच्यः तथाच द्रव्यगुणात्मकविभिन्नावच्छेदेन तयोः सत्तायां समावेशात्कुतो विरोध इत्यत आह द्रव्यवृत्तित्वाभा
व इति· नन्वेवं मूलेन कपिसंयोगीति प्रतीत्या वृक्षादौ कपिसंयोगाभावोऽपि न सिद्ध्येत्· तत्रापि वृक्षनिष्ठसंयोगावच्छेदकत्वाभावस्य मूलेऽवगाहनसंभवादत आह
बाधकाभावादिति· कपिसंयोगाभावो न वृक्षवृत्तिरित्यादिप्रत्ययस्यासंभवादिति भावः· ननु द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरिति प्रतीतिरेवासिद्धा द्रव्यवृत्तित्वाभा
वो गुणावच्छेदेन सत्तावृत्तिरिति प्रत्ययात्· एकदेशिषस्य वस्तुमत्ता[illegible]त्वादतो दोषान्तरमाह अतीन्द्रियेति· मनस्त्ववद्गुणत्वादित्यादावित्यर्थः· तत्र अतीन्द्रियसा
ध्यके असद्धेतौ ननु प्रत्यक्षासंभवेन प्रमाणत्वं मनस्त्वसामानाधिकरण्याभाववन्मनस्त्वाभाववद्वृत्तित्वात् पृथिवीत्ववदित्यनुमानेनैव तत्र सामानाधिकरण्याभावः
सेत्स्यतीत्यत आह न चेति· तद्वद्वृत्तीति· साध्यवद्वृत्तिभिन्नत्वस्येत्यर्थः· तथाचोक्तानुमाने मनस्त्ववद्वृत्तिभिन्नत्वमुपाधिः तस्य च साध्यव्यापकत्वं घटत्वादौ साध
नाव्यापकत्वं द्रव्यत्वादौ ग्राह्यं भेदस्याव्याप्यवृत्तित्वे तु साध्यवद्वृत्तितत्तद्व्यक्तित्वावच्छिन्नभेदकूट उपाधिर्बोध्यः· ननूक्तोपाध्यप्रतिसंधानदशायामुक्तानुमाना
देव साध्यवद्वृत्तित्वाभावसिद्धिस्तत्र भविष्यतीति· अन्यथाव्याप्यतारस्यापि तत्रातिप्रसंगादित्यत आह किं चेदमित्यादि· तथाच कालो गोमानो त्वादित्यादौ त्रैकालिकसं

बन्धेन हेतावव्याप्तिः. कालिकसंबन्धेन हेतुमति महाकाले तेन संबन्धेन कालवृत्तित्वाभावस्य वृत्त्याप्यसत्त्वात्. न च कालावच्छेदेन गगनादावेव साध्यवद्वृत्तित्वाभावस्य प्र
सिद्धिः. कालस्य गगनाद्यनधिकरणत्वेन तन्निष्ठवृत्तित्वाभावे कालावच्छेद्यत्वासंभवात् कालिकसंबन्धेन गगनादेर्वृत्तिमत्त्वस्वीकारे च. यद्यपि गोत्वाद्यधिकरणतत्
क्षणावच्छिन्नकालवृत्तित्वाभावस्य तत्क्षणसमानकालीनेन तत्क्षणगोचरज्ञाने प्रसिद्धिः. तत्क्षणस्यापि विषयतया स्वविषयकज्ञानाधिकरणतया तन्निष्ठता
दृशवृत्तित्वाभाववत्तायामवच्छेदकत्वसंभवात्. तथापि महाकाल एव कालिकसंबन्धेनाधिकरणं कृपाधीनानुतत्तद्वृत्तितायामवच्छेदकत्वमात्रमिति प्राचीनसि
द्धान्तमनुरुध्येत्. महाकालनिरूपितविशेषणतया वा हेतावव्याप्तिर्द्रष्टव्या. इदमिदानीमित्याकारकप्रतीतिनियामकविशेषतायां यो विशेषस्तेन हेतुतायामिति व्या
ख्यया तादृशविशेषणतायाः प्राप्तेः. सामान्यत एव विभिन्नकालीनयोर्नाधाराधेयभाव इति मते नानुपपत्तिगन्धोऽपि स्वसमानकालीनस्वविषयतयाप्यनधिक
रणत्वेन तत्त्वावच्छेदेन ज्ञाने साध्यवद्वृत्तित्वाभावाप्रसिद्ध्यसंभवादिति ध्येयम्. अत्र हेतुतावच्छेदकसंबन्धेन स्वाधिकरणे स्वनिरूपितहेतुतावच्छेदक
संबन्धेन साध्यवद्वृत्तित्वाभावस्य विवक्षणायां न क्वापि दोषः. साधनगोत्वाधिकरणमहाकालावच्छिन्नगोत्वनिरूपितकालिकसंबन्धेन साध्यवद्वृत्ति
त्वाभावस्य घटादावेव प्रसिद्धत्वात्. साध्यसामानाधिकरण्यत्व यद्धर्मावच्छिन्नाधिकरणावच्छेद्ययत्तद्वृत्तिकात्यन्ताभावप्रतियोगितानवच्छेदकं त
द्धर्मवत्त्वं वा विवक्षितम्. इत्थं च वाच्यं प्रमेयादिसाध्ये प्रमेयव्यक्तीनां भेदेऽपि न व्याप्तिभेद इत्यस्मद्गुरुचरणाः. केचित्तु स्वनिष्ठं यत्साध्यवद्वृत्तित्वं हेत्वधि
करणावच्छेद्यतदभावाधिकरणभिन्नत्वमित्यर्थः. तादृशाभावाधिकरणत्वं सद्धेतुस्थले स्वभिन्नव्यक्तावेव प्रसिद्धमतो नाव्याप्तिरित्याहुः. साध्यवद्वृत्ति
त्वाभावाधिकरणत्वसामान्ये यन्निष्ठत्वयदधिकरणावच्छेद्यत्वोभयाभाववत्त्वं व्याप्तिः. पर्वतीयरूपनिष्ठं यत्पर्वतावच्छेदेन वह्निमत्त्वं प्रकृतत्वाभावाधिकरण
त्वं न तद्धूमनिष्ठं यच्च धूमनिष्ठं न तद्धूमाधिकरणावच्छेद्यमधिकरणभेदेन तस्य नानात्वात्. अन्यथा पर्वतेतरदीयरूपेण वह्निमत्संयुक्तत्वमिति पर्वते धूमेन वह्निमत्त्वं प्रकृ

४११२

मा॰ पं॰ श्रीगणेशायनमः ॥ ॥ अनुमानप्रामाण्यनिरूपणानन्तरं व्याप्तिस्वरूपनिरूपणमारभते· नन्वित्यादिना·
१ अनुमितिहेत्विति· अनुमाननिष्ठप्रामाण्यानुमितिहेत्वित्यर्थः· व्याप्तिज्ञान इत्यत्र विषयत्वं सप्तम्यर्थः
तथाचानुमाननिष्ठप्रामाण्यानुमितिहेतुव्याप्तिज्ञानविषयीभूता व्याप्तिः केत्यर्थः· अनुमान
निष्ठप्रामाण्यानुमितिहेत्वित्यनेन व्याप्तेरनुमानप्रामाण्योपपादकत्वकथनादनुमानप्रामा
ण्यनिरूपणानन्तरं व्याप्तिनिरूपणेऽपोद्घातःसङ्गतिरिति सूचितम्· उपपादकं चात्र ज्ञापकत्वं·
केचित्तु अनुमितिपदं अनुमितिनिष्ठेतरभेदानुमितिपरम्· तथाचानुमितिनिष्ठेतरभेदानुमितौयो
हेतुः प्रागुक्तव्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानस्वरूपः तद्घटकव्याप्तिज्ञानं तदंशेविशेषणी रामः
१

घटकत्वार्थकसप्तम्यास्तत्पुरुषसमासात् तथा च प्राग्रूपो ह्यातस्य सङ्गतिरिति सूचितम् इत्याहुः न तावदिति तावदिति वाक्या
लक्षणे अव्यभिचारितत्वं अभिचारि तत्वशब्दप्रतिपाद्यं अत्र हेतुमाह तद्धीत्यादि हि यस्मादव्यभिचरितत्वं तेनेति सर्वस्मिंल्ल
क्षणे प्रसज्यते तदव्यभिचरितत्वशब्दप्रतिपाद्यं तथा च व्याप्तियत्तः साध्याभाववदवृत्तित्वरूपाव्यभिचरितत्व
प्रतिपाद्यान अतः अव्यभिचरितत्वशब्दप्रतिपाद्यस्वरूपान इत्यर्थे पर्यवसितम् विशेषाभावकूट स्व
सामान्याभावहेतुत्वं प्रसिद्धमतस्व न तदद्वयमपि सार्थकम् साध्याभाववदवृत्तित्वमिति वृत्ते
वृत्तिः भावे निष्ठाप्रत्ययः वृत्तस्याभावोऽवृत्तं वृत्त्यभाव इति यावत् साध्याभाववतोऽवृत्तं साध्याभाववदवृत्तं सा
ध्याभाववद्वृत्त्यभाव इति यावत् तद्यस्यास्तीति साध्याभाववदवृत्ती मत्वर्थीयेन प्रत्ययः तस्य भावः साध्याभाववद
वृत्तित्वं तथा च साध्याभाववद्वृत्त्यभाववत्त्वं फलितमिति प्राञ्चः तदसत् न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चे
त्तदर्थप्रतिपत्तिकर इत्यनुशासनविरोधात् तत्र कर्मधारयपदस्य बहुव्रीहीतरसमासपरत्वात् तच्चा

व्या० पं० गुणवत्त्वमिति साधर्म्यव्याख्यानावसरे गुणप्रकाशरहस्ये दीधितिरहस्ये च स्फुटम् अव्ययीभावसमासोत्तरपदार्थेन
२ तत्समासानिविष्टपदार्थानामन्वयस्याव्युत्पन्नत्वाच्च अन्यथा भूतलोपकुम्भं भूतला घटमित्यादौ भूतलवृत्तिघट
समीपतदन्यत्वाभावप्रतीत्यापत्तेः एतेन वृत्तेरभावोऽवृत्तीत्यव्ययीभावानन्तरं साध्याभाववतोऽवृत्तिर्यस्येति बहुव्रीहि
रित्यपि प्रत्युक्तं वृत्तौ साध्याभाववतोऽनन्वयापत्तेः अव्ययीभावसमासस्याव्ययतया तेन समं समासान्तरासम्भवाच्च
ननु पाठ्यादिरूपाव्ययविशेषाणामेव समस्यमानत्वेन परिगणितत्वात् वस्तुतस्तु साध्याभाववतो न वृत्तिर्यस्येति व्य
पदव्यधिकरणबहुव्रीह्यनन्तरं त्वप्रत्ययः साध्याभाववत इत्यत्र निरूपितत्वं षष्ठ्यर्थः अन्वयश्चास्य वृत्तौ तथा च
साध्याभावाधिकरणनिरूपितवृत्त्यभाववत्त्वमव्यभिचरितत्वमिति फलितम् न च व्यधिकरणबहुव्रीहिर्न सर्वत्र
साधुरिति वाच्यम् अयं हेतुः साध्याभाववदवृत्तिरित्यादौ व्यधिकरणबहुव्रीहिं विना गत्यन्तराभावादेव व्यधिकरणब
हुव्रीहेः साधुत्वात् साध्याभावाधिकरणवृत्तित्वाभावश्च तादृशवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावो बोध्यः ऽसंभाव्या २
तेन धूमवान् वह्नेरित्यादौ धूमाभाववज्जलह्रदवृत्तित्वाभावस्य धूमाभाववद्वृत्तित्वजलत्वोभयाभावस्य च वह्नौ सत्त्वेऽ हरिः
२

नि
पिनो व्याप्तिः साध्याभाववद्वृत्तित्वं च हेतुतावच्छेदकसम्बन्धेन विवक्षणीयम् तेन वह्न्यभाववद्धूमावयवे जलह्रदादौ च सम
वायकालिकविशेषणतादिना धूमस्य वृत्तावपि न क्षतिः साध्याभाववत्त्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्-
छेदकावच्छिन्नप्रतियोगिताको बोध्यः तेन वह्निमान्धूमादित्यादौ समवायादिसम्बन्धेन वह्निसामान्याभाववति संयो
गसम्बन्धेन तद्वह्नित्ववह्निजलत्वावच्छिन्नाभाववति च पर्वतादौ संयोगसम्बन्धेन धूमस्य वृत्तावपि न क्षतिः ननु
तथापि गुणत्ववान् ज्ञानत्वात् सत्तावान् जातेरित्यादौ विषयितया व्याप्यत्वादिसम्बन्धेन तादृशसाध्याभाववति ज्ञानादौ
ज्ञानत्वादेर्वर्तमानत्वादव्याप्तिः न च साध्याभावाधिकरणत्वं स्वभावीयविशेषणताविशेषेण विवक्षितमिति वा-
च्यम् तथा सति घटत्वात्यन्ताभाववान् घटान्योन्याभाववान् वा पटत्वादित्यादौ साध्याभावस्य घटत्वादेर्विशेषण
ताविशेषेणाधिकरणाप्रसिद्ध्याऽव्याप्तिरिति चेन्न अत्यन्ताभावान्योन्याभावयोरभावस्य प्रतियोगितत्त्वावच्छेदक
योरतिरिक्तत्वानभ्युपगमात् तस्य तत्स्वरूपत्वे तु साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभा
ववति साध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्याभावाधिकरणत्वं विवक्षितम् यत्र च प्रतियोगिता

न्या०पी० विशेषणांशात्सम्ब[illegible]र्वं वह्निमान्धूमादित्यादिभावसाध्यकस्थले विशेषणताविशेषस्वघटत्वाभाववान्पटत्वा
३ दित्याद्यभावसाध्यकस्थले समवायादेरेव. समवायविषयित्वादिसम्बन्धेन प्रमेयादिसाध्यकज्ञानत्वादिहेतौ
साध्यतावच्छेदकसमवायादिसम्बन्धावच्छिन्नप्रमेयाद्यभावस्य कालिकसम्बन्धेन योऽभावः सोऽपि प्रमेयतया
साध्यान्तर्गततदीयप्रतियोगितावच्छेदककालिकादिसम्बन्धेन साध्याभावाधिकरणे ज्ञाने ज्ञानत्वादेर्वृत्तेरव्या
प्तिवारणाय सामान्यपदोपादानं. साध्यसामान्यीयत्वं च यावत्साध्यनिरूपितत्वं. स्वनिरूपकसाध्यकभिन्नत्वमि
त्याकरः अस्यैकोक्तिमात्रपरतया गौरवस्यादोषत्वात्. कारणतावच्छेदके च भावसाध्यकस्थले अभावीयवि
शेषणताविशेषसम्बन्धेन साध्याभावाधिकरणत्वं अभावसाध्यकस्थले च यथायथं समवायादिसम्बन्धेन
साध्याभावाधिकरणत्वमुपादेयं साध्यभेदेन कार्यकारणभावभेदात् न च तथापि घटान्योन्याभावसाध्यके घट करी
त्वादिरूपे साध्याभावे न साध्यप्रतियोगित्वं न वा समवायादिसम्बन्धस्य तदवच्छेदकता तादात्म्यस्यैव तदवच्छेद २

कत्वाद्वियव्याप्तिस्तदवस्थैवेतिवाच्यम्· अत्यन्ताभावाभावस्यप्रतियोगिस्वरूपत्वेघटान्योन्याभावस्यघटभेदा-
त्यन्ताभावस्यघटभेदात्यन्ताभावत्वावच्छिन्नाभावरूपतयाघटभेदात्यन्ताभावरूपस्यघटभेदप्रतियोगि-
तावच्छेदकीभूतघटत्वस्यापिसमवायसम्बन्धेनघटभेदप्रतियोगित्वात्· नचान्यत्रात्यन्ताभावस्यप्र-
तियोगिस्वरूपत्वेपिघटादिभेदात्यन्ताभावाभावोनघटभेदादिस्वरूपः किन्तुप्रतियोगितावच्छेदकीभूत-
घटत्वात्यन्ताभावस्वरूपएवेतिसिद्धान्तइतिवाच्यम्· यथाहिघटत्वावच्छिन्नघटवत्ताग्रहेघटात्यन्ताभावा-
ग्रहात् घटात्यन्ताभावाभावव्यवहारश्चघटात्यन्ताभावाभावोघटस्वरूपस्तथाघटभेदवत्त्वग्रहेघटभेदाभा-
वाग्रहात् घटभेदाभावाभावव्यवहारश्चघटभेदस्वतदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभावइतितत्सिद्धा-
न्तोनयुक्तिसहः विनिगमकाभावेनघटत्ववत्त्वावच्छिन्नप्रतियोगिताकात्यन्ताभावत्ववत् घटभेदस्या-
पिघटभेदात्यन्ताभावाभावत्वसिद्धेरप्रत्यूहत्वाच्च· अतएवतादृशसिद्धान्तोनोपाध्यायसम्मतः· अत

एवाभावविरहात्मत्वं वस्तुनः प्रतियोगिता इत्याचार्याः अन्यथा घटभेदाभावप्रतियोगिनि घटभेदे तल्लक्षणाव्याप्तेः
अन्योन्याभावप्रतियोगितावच्छेदके तल्लक्षणस्यातिव्याप्त्यापत्ते[illegible] अन्योन्याभावप्रतियोगितावच्छेदके घटत्वा
त्यन्ताभावे तल्लक्षणस्यातिव्याप्त्यापत्तेरित्यपि पाठः न चैवं घटत्वावच्छिन्नप्रतियोगिताकघटत्वात्यन्ताभावस्यापि
घटभेदस्वरूपत्वापत्तिरिति वाच्यम् तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभावस्यैव तत्स्वरूपत्वाभ्युपगमात्
त्वेन तादृशतदत्यन्ताभावस्यैव व्यवहारात् उपाध्याये घटत्वावच्छिन्नप्रतियोगिताकघटत्वात्यन्ताभावस्यापि घट
भेदस्वरूपत्वाभ्युपगमाच्च न चैवं साध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेनैव साध्याभावाधिकरणत्वं विवक्षि
तं किं साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तित्वस्य प्रतियोगिताविशेषणेनो निवे[illegible]भः कालिकसम्बन्धा
वच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्याविशेषणताविशेषेण साध्यत्वे आत्मत्वादिहेतावव्याप्त्यापत्तेः कालिक
सम्बन्धावच्छिन्नसाध्याभावस्य विशेषणताविशेषसम्बन्धेनात्यन्ताभावत्वस्यापि साध्यरूपतया कालिकसम्बन्धवांछेरो

घटाताविशेषोपिसाध्यीयप्रतियोगितावच्छेदकसम्बन्धस्तेनसम्बन्धेनआत्मत्वप्रकारकप्रमाविशेष्यत्वरूपसा
ध्याभाववत्यात्मनिहेतोरात्मत्वस्यवृत्तेः·प्रतियोगितावच्छेदकवत्प्रतियोग्यप्यन्योन्याभावाभावः तेनतादात्म्ये
नसाध्यतायांसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तिसाध्यीयप्रतियोगित्वस्यनाप्रसिद्धिः इत्यथवात्य
न्ताभावनिरूपितत्वेनापिसाध्यसामान्यीयप्रतियोगिताविशेषणीया·अन्यथाघटान्योन्याभाववान्घटत्वादि
त्यादावव्याप्त्यापत्तेः·तादात्म्यसम्बन्धस्यापिसाध्याभाववृत्तिसाध्यीयप्रतियोगितावच्छेदकत्वात्·यद्वा·साध्यतावच्छेद
कसम्बन्धावच्छिन्नसाध्याभाववृत्तिसाध्यसामान्यीयनिरुक्तप्रतियोगित्वतदवच्छेदकत्वान्यतराव[illegible]सम्बन्धत्वेनैव
साध्याभावाधिकरणत्वंविवक्षणीयम्·इत्यन्तं अन्यतराविशेषणं·एवंचघटान्योन्याभाव[illegible]घटत्वादित्यादौसाध्याभा
वस्यघटत्वादेःसाध्यप्रतियोगित्वविरहेपिनक्षतिः·तादृशान्यतरस्यप्रतियोगितावच्छेदकत्वस्यैवतत्रसत्वात्·न
चतथापिकपिसंयोगीएतद्वृक्षत्वादित्याद्यव्याप्यवृत्तिसाध्यकसद्धेतौअव्याप्तिरितिवाच्यम्·निरुक्तसाध्या

भावत्वविशिष्टनिरूपितायानिरुक्तसंसर्गकनिरवच्छिन्नाधिकरणता तदाश्रयावृत्तित्वस्याविवक्षितत्वात्:
गुणकर्मान्यत्वविशिष्टसत्ताभाववान् गुणत्वादित्यादौ सत्त्वात्मकसाध्याभावाधिकरणत्वस्य गुणादिवृ-
त्तित्वेपि साध्याभावत्वविशिष्टनिरूपिताधिकरणत्वस्य गुणावृत्तित्वान्नाव्याप्तिः नचैवं कपिसंयोगाभाववान्
सत्त्वादित्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वाप्रसिद्ध्याऽव्याप्तिः अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादि-
नये केवलान्वय्यनन्तर्गतत्वादिति ध्येयम्. अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादिनये अन्योन्याभावान्तरा-
तावच्छेदक भावस्य प्रतियोगिस्वरूपत्वेपि अव्याप्यवृत्तिमदन्योन्याभावाभावस्य व्याप्यवृत्तिस्वरूपस्यातिरिक्तस्याभ्युपग-
मात्. तत्राग्रे स्फुटीभविष्यति. ननु तथापि समवायादिना गगनादेरवृत्ते इदं वह्निमद्गगनादित्यादावतिव्याप्तिः
वह्न्यभाववति समवायादिना गगनादेरवृत्तेः

भावत्वविशिष्टनिरूपितायानिरुक्तसंसर्गकनिरवच्छिन्नाधिकरणता तदाश्रयावृत्तित्वस्याविवक्षितत्वात्:
गुणकर्मान्यत्वविशिष्टसत्ताभाववान् गुणत्वादित्यादौ सत्त्वात्मकसाध्याभावाधिकरणत्वस्य गुणादिवृ-
त्तित्वेपि साध्याभाववत्त्वविशिष्टनिरूपिताधिकरणत्वस्य गुणावृत्तित्वान्नाव्याप्तिः · नचैवं कपिसंयोगाभाववानात्-
मत्वादित्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वाप्रसिद्ध्याऽव्याप्तिः अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादि-
नये केवलान्वय्यनङ्गीतत्वादिति वाच्यम् · अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादिनये अन्योन्याभावान्तरा-
तावच्छेदक भावस्य प्रतियोगिस्वरूपत्वेपि अव्याप्यवृत्तिमदन्योन्याभावाभावस्य व्याप्यवृत्तिस्वरूपस्यातिरिक्तस्याभ्युपग-
मात् · तच्चाग्रे स्फुटीभविष्यति · ननु तथापि समवायादिना गगनादेर्वृत्तित्वे इदं वह्निमद्गगनादित्यादावतिव्याप्तिः
वह्न्यभाववति समवायादिना गगनादेरवृत्तेः

ना·अ·
१४

द्रव्यत्वसमनियतानां गुणत्वकर्मत्वविशिष्टसत्तादीनामित्यर्थः अव्याप्तिमुपपादयति गुणादाविति· ननु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वं यत्किंचिन्मात्रं न तु घटि
त्वेनाभावस्य द्रव्यत्वमेव साध्यतावच्छेदकं द्रव्यांशेति वेद्यमतेनोक्तदोष इत्यत आह तत्तदिति· यद्यपि तत्तदवच्छेदकत्वं पक्षेपि स्वस्वप्रतियोगिव्यधिकरणाभावघटितं
व्याप्तत्वप्रतियोगितावच्छेदकगर्भत्वेन दुर्ज्ञेयत्वं तथापि व्याप्यवृत्तिसाध्यकस्थलीयव्याप्त्यभिप्रायेणेदं तत्प्रतियोगिवैयधिकरण्यांशवैयर्थ्यान्निरवच्छिन्नं हेतुमधि
करणे तन्निष्ठाभावप्रतियोगितानवच्छेदकत्वमेव सर्वत्र व्याप्तिप्रविष्टमित्याशयेनेदमिति तु परमार्थः· तेन व्याप्यवृत्तिसाध्यकस्थलेपि न दुर्ज्ञेयतापत्तिरिति ध्ये
यम्· द्रव्यत्वत्वेति· द्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्वं त्वोपेक्षया द्रव्यत्वत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्वं तस्य गुरुतमात्रत्वाद्यवच्छिन्नाभावा
प्रसिद्धेरिति भावः· ननु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतयत्किंचिद्धर्मावच्छिन्नाभाववत्संबद्धत्वविशिष्टसामान्यभिन्नं स्वविशिष्टसंबन्धिनिष्ठाभाव
प्रतियोगितावच्छेदकीभूततादृशधर्मभिन्नं वा यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यत्र हेतुमन्निष्ठाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगि
तानात्मकपदार्थविशिष्टसंबन्धिनिष्ठाभावीयतादृशप्रतियोगितानवच्छेदकत्वं घटं नास्ति साधनेन दुर्भावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यत्र वा दुर्ज्ञेयत्वाभावात्
यैव व्याप्तिर्वाच्येत्यत आह गुरुधर्मेति· सत्तादिनि· आदिपदग्राह्यतापर्यवसन्नसत्तत्वावच्छेदकत्वाभावगर्भसामान्यलक्षणोपगृहः अत एव गुरोरवच्छेदकत्वानादरसंग्रहे
इति· अन्यथा गुरुलाघवानपेक्षयावच्छेदकत्वेन गुणगुणत्वाद्यवच्छिन्नाभावप्रसिद्ध्याऽनवच्छिन्नत्वरूपं व्यभिचारित्वं तत्र नास्त्यादिति भावः· अन्यथापि साध्यतावच्छेदकधर्मा
वच्छिन्नाभाववत्त्ववृत्तित्वमेव व्यभिचारः सत्तागुणत्वाद्यवच्छिन्नाभाववद्वृत्तित्वेनैव तत्र सुलभत्वमपि तत्तुं ज्ञानेनेत तथापि तदुद्देशः अत्र तत्साध्यानुपिनयविलेपितया हेत्वाभासतानं
·यद्यपि पक्षत्वेनुपादानुमानादिस्थलेपि नत्वं
स्वत्वतथातादृशेति भावः॥

श्रीः
१४

न प्रमाणमिति । कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावभ्रमे कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावप्रकारकत्वेन तादृशान्वयबोधो भ्रम
इति तादृशशाब्दस्य जनकत्वेनाप्रमाणत्वं तन्मते कंबुग्रीवादिमत्प्रतियोगिताकाभावभ्रमतापादकस्याभावात्तादृशप्रतीतेर्न भ्रमत्वमिति तादृशशा
ब्दोप्यप्रमाणं न स्यादित्यर्थः । ननु भ्रमत्वस्य प्रकारभेदेन भिन्नत्वात्सर्वत्र तदभाववद्विशेष्यकत्वं न भ्रमत्वघटकं समवायेन गगनादिभ्रमे तद्वि
शेषवैयर्थ्यात् । तथा च तत्रैव प्रकृतेपि कंबुग्रीवादिमत्प्रतियोगिकाभावप्रकारतामात्रेण तादृशान्वयबोधो भ्रमो भविष्यतीत्यत आह
प्रमाणञ्चेति । केचित्तु ननूक्ततयाऽवच्छेदकत्वस्य कम्बुग्रीवादिमत्त्वस्यावच्छेदकत्वावगाहनादेव तादृशाक्षेपे न प्रमाणमित्यत
आह तथा च कम्बुग्रीवादिमान्नास्तीति शाब्दः प्रमाणं न स्यादित्यकामेनापि प्रकृते भ्रमत्वं तदभाववद्विशेष्यकत्वघटितं वाच्यमिति भावः
धूमो न वह्निव्याप्य इत्यादिजन्यो वाक्यस्य वह्निव्याप्याभावकगर्थकत्वं च कंबुग्रीवादिमान्नास्तीत्यादिवाक्यस्यापि कंबुग्रीवादिमत्प्रतियोगिताकाभा
वकत्वे बोधकत्वादेव तादृशशाब्दस्याप्रामाण्यानुपपत्तेः । अन्यथा धूमालोकसाधारणानुगतव्याप्यत्वाभावादालोकगर्भव्याप्यत्वावच्छिन्नाभावस्य धूमे स
त्त्वात्तन्मात्रस्य धूमो न वह्निव्याप्य इत्यादिवाक्यस्य प्रामाण्यापत्तेः । एवं गुरुधर्मस्यानवच्छेदकतया तादृशधर्मावच्छिन्नस्य विशिष्टबुद्धिं प्रति न तादृशधर्माश्रय
प्रतियोगिकाभावत्वरूपत्वानिरूपत्वे नैतान्न सङ्गत्या विशेषितत्वकल्पना कंबुग्रीवादिमान्नास्तीति प्रतीतिरूपायां कंबुग्रीवादिमान्नास्तीति ज्ञानविरोधो
पि स्फुट एवेति प्राचीनमतनिरासे तो गुरुधर्मस्यानवच्छेदकत्वव्याप्तेरपि दुर्वचत्वमित्याह न चैवमिति । लघ्विति । कंगुरुणापि शिष्टसत्त्वादित्यादेऽप्र

भावत्वविशिष्टनिरूपितायानिरुक्तसंसर्गकनिरवच्छिन्नाधिकरणता तदाश्रयावृत्तित्वस्याविवक्षितत्वात्
गुणकर्मान्यत्वविशिष्टसत्ताभाववान् गुणत्वादित्यादौ सत्तात्मकसाध्याभावाधिकरणत्वस्य गुणादिवृ
त्तित्वेपि साध्याभावत्वविशिष्टनिरूपिताधिकरणत्वस्य गुणावृत्तित्वान्नाव्याप्तिः · नचैवं कपिसंयोगाभाववान्
सत्त्वादित्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वाप्रसिद्ध्याऽव्याप्तिः अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादि
नये केवलान्वयिनगगनाभावादीति वाच्यम् · अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादिनये अन्योन्याभावान्तरा
तावच्छेदक भावस्य प्रतियोगिस्वरूपत्वेपि अव्याप्यवृत्तिमदन्योन्याभावाभावस्य व्याप्यवृत्तित्वरूपस्यातिरिक्तस्याभ्युपग
मात् · न चाग्रे स्फुटीभविष्यति · ननु तथापि समवायादिना गगनादेरवृत्तेरिदं वह्निमद्गगनादित्यादावतिव्याप्तिः
वह्न्यभाववति समवायादिना गगनादेरवृत्तेः

४११०

श्री ५ को सरकार
[illegible] संकलन शाखा

[illegible]

दीर्घयात्रिः

~~[illegible]~~

रघुदेवकृतम्

पत्र.१४

श्रीगणेशाय नमः॥ ॥संसर्गाभावोऽन्योन्याभावश्च नञर्थः· तत्राऽन्वयितावछेदकावछिन्नप्रतियोगिताकत्वमिति व्युत्पत्तिवलसिद्धमिति नीलघटवति न घटो नीलो घटो न घट इत्याद्यव्यवहारादिति· इह पीतघटवति न नीलो घटः पीतो घटो न नीलो घट इत्यादिव्यवहाराच्च· प्रतियोग्यभावान्वयो तुल्ययोगक्षेमो तेन यत्पदोपस्थापितस्य प्रतियोगिन अनुयोगिन्याधाराधेयभावसंबन्धेनान्वयबोधः· तत्र तत्संसर्गाभावस्यापि तथा· यथा पचति चैत्रो न पचति चैत्रः चैत्रस्येदं चैत्रस्य नेदमित्यादिति· ऽर्थस्य कृत्यादेः प्रथमान्तपदोपस्थित एव तत्र तथेति· तदभावस्यापि तथा· षष्ठ्यादेश्चैत्रादिनिरूपितस्वत्वादिकमर्थः· ननु तन्निष्ठस्वामित्वादि तस्य धनाद्यवृत्तित्वेन चैत्रीयेऽपि धने नेदं चैत्रस्येति प्रत्ययप्रसंगात्· निरूपकत्वादेः संबन्धस्य प्रतियोगितानवछेदकत्वादित्येषादिक्· यत्र चाधाराधेयभावेन संसर्गमर्यादावललभ्यस्य त्रानुयोगिपदे सप्तम्यपेक्षा यथा भूतले घटो भूतले न घट इति अत्र च तात्पर्यवशात् क्वचिद्भूतलादेर्घटाद्यभावः क्वचिच्च घटादेर्भूतलादिवृत्तित्वाभावः प्रतीयते· अत एव पृथिव्यां गन्धो न जल इत्यादौ प्रतीतेः· अत एव भूतले घटो नास्ति घटौ न स्तः घटा न सन्ति इत्यादौ घटो नास्तीत्यादाविव वचनैक्यनियमः· तेषां जले न सत्तेत्यत्र गतिश्चिन्तनीया जातिसमवेतत्वस्याप्रसिद्धत्वात्· संबन्धान्तरेण जातिवृत्तित्वस्य सत्तायां सत्त्वात्· सप्तम्यर्थान्वितनाभावस्य विशेषणतया प्रतियोगिन्यन्वय इत्यपि केचित्· यत्र विशेषणविशेष्ययोरभेदेनान्वयो व्युत्पन्नस्तत्रान्योन्याभावो नञा प्रत्याय्यते यथायं घटो नीलो नायं घटो नील इत्यत्र विशेषणविशेष्यपदयोः समानविभक्तिकत्वं विरुद्धविभक्तिविरहो वा तन्त्रमत एव

यजतिषु येयजामहं करोति नानुयाजेषु इत्यादावेकवाक्यतानुरोधाद्येयजामह इत्यादेरनुषंगगौरवाच्च. यजतिष्वनुयाजभेदो बोध्यते विशेषवि-
भक्तिस्तत्र प्रयोगसाधुत्वार्था नामार्थयोर्भेदेनान्वयबोध एव प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वात् लाघवेन तयोरन्वयबोधमात्र एव तथात्वं
विशेषणविभक्तिस्त्वभेदार्थिका नीलोत्पलं चित्रगुरित्यादौ लुप्ताया विभक्तेरनुसन्धानमिति मतेपि नराज्ञ इत्यत्र षष्ठ्यर्थस्यैवात्रापि सप्तम्यर्थस्या-
भेदस्याभावे बोध्यताम्. यत्तु करणनिषेधे विकल्पापत्तेर्भेदपरत्वेति तदसत्. विशेषनिषेधे सामान्यविधेस्तदितरपरतया ब्राह्मणेभ्यो दधि दात-
व्यं कौण्डिन्याय न दातव्यमित्यादौ व्युत्पत्तिसिद्धत्वेन विकल्पानवकाशात्. न च तत्रापि कौण्डिन्यभेदो बोध्यः कौण्डिन्यपदस्य विरुद्धैकवचनत्वात्.
न खलु महतो राज्ञो न महतो राज्ञ इत्यत्रेव महतां राज्ञो न महतां राज्ञ इत्यत्रापि राजनि महदभेदो प्रतीयते एकोन द्वावित्यादिवत्कथंचित्समर्थने
पि द्वितीयस्य दातव्यमित्यस्यानन्वयप्रसंगाच्च. अत एव राज्ञो श्राद्धं न कुर्यादित्यादौ करणनिषेधेपि न विकल्पावकाशः. नहि तत्रापि राज्ञेतरपरता
राज्ञि भिन्ने श्राद्धविधावप्यभावात्सायंपितृभ्यो दद्यादित्यादितो राज्ञो प्रसक्तेर्दुर्वारत्वात्. न खलु क्रियारहितमपि श्राद्धविधायकवाक्यमस्ति येनेदं
तेन सममेकवाक्यतां संसादयेत् नापीदं नानुयाजेष्वित्यादिवत्स्वार्थक्रियारहितम्. अथ राज्ञो श्राद्धस्य प्रसक्तौ विकल्पापत्तिः. अप्रसक्तौ नि-
षेधानुपपत्तिः. प्रसक्तं हि प्रतिषिध्यते इति चेत्साधीयानयं मन्त्रपाठे यद्दुलाज्जलह्रदे वह्निर्नास्तीत्यादौ न्याद्बाधेपि परमप्रयत्नेन तत्र वह्नि-
रूपादीयते निषेधविधिवैयर्थ्यमिति चेन्न तात्पर्यानवबोधनिवन्धन राज्ञि श्राद्धकरणवारणस्य तदर्थत्वात्. एकविषयतया पुनरनन्यथा

दी. अ. वि.
२

निकतया षोडशिग्रहणाग्रहणविकल्प इति अत्र षोडशिग्रहणं नेष्टसाधनमित्यादिनार्थः ग्रहणविधिविरोधात्. अपितु षोडशिग्रहणाभाव इष्ट
साधनमित्यादि श्रुत्यन्तरम् नञ्समभिव्याहृतधात्वर्थस्याभावेपि विभक्त्यर्थान्वयः -अत एव प्राभाकराः अपि न कलञ्जं भक्षयेदिति श्रुतेः क
लञ्जभक्षणाभावविषयकं कार्यमित्यर्थमाहुः · नियमस्तु तात्पर्यवशात् प्रत्यवायफलाजनकत्वेपि यागस्य परमापूर्वे तत्पेऽसम्भवेनेष्टसाधनत्व
मविरुद्धं गर्हविध्यन्यथानुपपत्त्या च षोडशिग्रहणे रतिक्रापि न परमापूर्वं न तस्माद्यातिरिक्तं प्रत्यवायफलमपीति कल्प्यत इति सर्वं समञ्जसम्. प्रति
योग्यभावयोः प्रतियोग्यनुभावेऽभावाधिकरणयोराधाराधेयभावसंबन्धस्य संबन्धनियमाभावस्तेनैव निपातातिरिक्तस्थल एव प्रातिपदिकार्थ
योर्भेदेनान्वयबोधे प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वात् अत एव इव एवाद्यन्वयबोधे न षष्ठ्याद्यपेक्षा अघटं भूतलमसमादेशे इत्या
दौ समासे समानाधिकरण्यानुरोधात् नञोऽभाववत्परता · केचित्तु प्रतियोगिपदोत्तरसुपः प्रतियोगित्वे अनुयोगित्वे वा नञुत्तरस्य वाधिक
रणत्वेन नञो वा अभाववति लक्षणा · विभक्त्यर्थानुयोगिसमानविभक्तिकार्थयोरन्योन्याभावसंसर्गाभावबोधने नञोऽसामर्थ्यं पचतेन नेन८
एव इत्यादौ घटत्वादेरन्योन्याभावो भूतलं न घट इत्यादौ घटादेः संसर्गाभावो न प्रतीयत इत्याहुः · इति श्रीमद्रघुनाथश्रीभट्टाचार्यशिरो
मणिविरचितो नञ्विवेकः समाप्तिमगमत् ॥ श्रीसाम्बसदाशिवाय नमः ॥ ॥

न२

श्रीगणेशाय नमः॥ शिवं प्रणम्य नत्वाऽस्मात्तर्कवागीश्वरं गुरुम्। क्रियते रघुदेवेन नञोर्थस्य विवेचनम्॥१॥ नञः शक्यतावच्छेदकं व्यवस्थापयति संसर्गा
भावत्वेति संसर्गाभावत्वमन्योन्याभावत्वं नञः शक्यतावच्छेदकमित्यर्थः। संसर्गाभावत्वं च ध्वंसप्रागभावादौ संसर्गाभाव इति प्रतीतिसाक्षिकोऽतिरिक्तो
खंडोपाधिः। केचित्तु संसर्गाभावत्वं संसर्गारोपजन्यप्रतीतिविषयाभावत्वम्। न चाभावबुद्धौ प्रतियोगिसंसर्गारोपस्य हेतुत्वे मानाभावान्नैवमिति वाच्यं
तथाविधकार्यकारणभावाकल्पने प्रतियोगिज्ञानकाले सर्वत्रैकदा नानासंबन्धावच्छिन्नप्रतियोगिताकनानाभावलौकिकप्रत्यक्षापत्तेः तत्तत्सं
बंधावच्छिन्नतत्तत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकाभावलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति तत्तत्प्रतियोगितावच्छेदकावच्छिन्नीयतत्तत्सं
सर्गज्ञानस्य हेतुत्वे तु प्रतियोगिज्ञानकाले सर्वत्रैकदा नानासंबन्धावच्छिन्नप्रतियोगिताकनानाभावलौकिकप्रत्यक्षापत्त्यसंभव इति। तथाविध
कार्यकारणभावकल्पनाया आवश्यकत्वात्। न चैवं सत्यभावलौकिकप्रत्यक्षं प्रति प्रतियोगितावच्छेदकप्रकारकज्ञानस्य हेतुताविलयप्रसंगः प्रति
योगितावच्छेदकप्रकारकज्ञानध्वंसकाले तथाविधसंसर्गज्ञानाभावादेव लौकिकप्रत्यक्षापत्तिवारणसंभवादिति वाच्यं संसर्गज्ञानजनकतावच्छेदक
कोटौ प्रतियोगितावच्छेदकप्रकारकज्ञानस्य हेतुत्वनिवेशप्रयोजनाभावेन द्रव्यत्वप्रकारकघटत्वावच्छिन्नीयसंसर्गज्ञानकाले घटत्वप्रकारकज्ञानाभा
वदशायां घटत्वावच्छिन्नप्रतियोगिताकाभावलौकिकप्रत्यक्षापत्तेर्दुर्वारत्वेन तादृशकार्यकारणभावकल्पनाया आवश्यकत्वादित्यवधेयमिति तन्न।
अतीन्द्रियसंसर्गाभावेनाद्यधर्माभावेन नञ्शक्यतावच्छेदकतत्साधारण्यानुपपत्तेः। एवमन्योन्याभावत्वमप्यखण्डोपाधिः। न च ताद

त्य संबंधावच्छिन्नप्रतियोगिताकाभावत्वं तत्र संयोगिनात्मस्य संयोगरूपतया संयोगिनोत्यन्ताभावेतिव्याप्तेः संबंधविधया तादात्म्यनिष्ठावच्छेदकतापनिषे
धेपि संयोगसंबंधावच्छिन्नसंयोगावच्छिन्नप्रतियोगिताकाभावेतिव्याप्तेर्दुष्परिहरत्वात् वस्तुतस्तु अन्योन्याभावस्य प्रतियोगितावच्छेदकसंबंधसत्त्वे माना
भावेन तादात्म्यस्य तत्प्रतियोगितावच्छेदकसंबंधत्वाभावात् तादृशलक्षणमसंभवदुक्तिकमेव न चैवमभावमात्रस्य प्रतियोगितावच्छेदकसंबंधसद्भावे
प्रमाणाभाव इति वाच्यम् अत्यंताभावस्य प्रतियोगितावच्छेदकसंबंधानंगीकारे बाधबुद्धिप्रतिबध्यतावच्छेदकनिर्वचनानुपपत्तेः तथाहि घटाभावप्रकारक
ज्ञानस्य प्रतिबध्यतावच्छेदकं न घटप्रकारकज्ञानत्वं घटाभाववत्ताज्ञानकाले कदाचित्केनचित्संबंधेन घटप्रकारकज्ञानस्योत्पत्तेः येनकेनचित्संबंधेन तत्त्वेति
नियमानुपपत्तेः तथा च तादृशनियमानुरोधेन तेन संबंधेन तत्प्रकारकबुद्धिं प्रति तत्संबंधावच्छिन्नतन्निष्ठप्रतियोगिताकाभाववत्तानिर्णयस्य प्रतिबंधकता
या अवश्यं वक्तव्यत्वेनात्यंताभावप्रतियोगितावच्छेदकसंबंधसिद्धिः न चैवमन्योन्याभावस्यापि तत्सिद्धिः प्रक्रियास्तुल्येति वाच्यं घटत्वप्रकारकबुद्धिं प्रति घ
टान्योन्याभाववत्तानिर्णयत्वेन प्रतिबंधकताकल्पने नैव सामंजस्ये विनान्योन्याभावप्रतियोगितावच्छेदकसंबंधं प्रतिबध्यप्रतिबंधकभावानुपपत्ति
रूपबाधकाभावेन प्रकृते तौल्यात् ननूभयधर्मस्य नञ्वाच्यतावच्छेदकत्वे गौरवेण लाघवादभावत्वरूपैकधर्मस्यैवात्र नञ्पदावच्छेदकत्वस्वीकार उचि
त इति संसर्गाभावत्वादिरप्रयोजक इति चेन्न घटो नास्तीत्यादौ संसर्गाभावत्वप्रकारकधीत्वानुभवानुरोधेन घटः पटो नेत्यादौ अन्योन्याभावत्वप्र
कारकधीत्वानुभवानुरोधेन तथोक्तत्वात् वस्तुतस्तु घटो नास्तीत्यादौ घटात्यंताभावत्वमेव नञः शक्यतावच्छेदकं ननु संसर्गाभावत्वमपि न चैवं संसर्गाभावे

निरुक्तविरोधः स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन संसर्गविशिष्टाभावस्य नञर्थत्वात् तादृशाभावस्योपदर्शितरीत्या वस्तुगत्यात्यंताभाव एवात्यंताभावत्व
स्य नञः शक्यतावच्छेदकत्वे क्षतिविरहः ननु तथानुभवानंगीकारे ऽभावत्वस्य नञः शक्यतावच्छेदकत्वौचित्येन तादृशधर्मरूपेण नञः शक्यतावच्छेदकता
भ्युपगमो निरर्थकः संसर्गाभावेति ग्रंथस्तु शक्यप्रदर्शनपरो न तु शक्यतावच्छेदकप्रदर्शनपर इति नानुपपन्नग्रन्थोपीति चेन्न अत्यंताभावत्वातिरिक्ता
भावत्वे प्रमाणाभावेन तथावक्तुमशक्यत्वात् अभाव इत्याकारकप्रतीतेरत्यंताभावत्वान्योन्याभावत्वध्वंसत्वाद्यन्यतमविषयकत्वाभ्युपगमेन तद्विषयतया
पि तत्सिद्ध्यभावात् न चैवं लाघवान्नञः शक्यतावच्छेदकं तथा तत्सिद्धिरिति वाच्यं लाघवानुरोधेन शक्यतावच्छेदकतयातिरिक्तधर्मस्वीकारे विभुपद
शक्यतावच्छेदकतयापि विभुत्वरूपपदार्थान्तरसंयोगात् नानार्थोच्छेदप्रसंगात् तत्रापि सर्वसाधारणातिरिक्तधर्मविशेषं स्वीकृत्य तस्यैव शक्यता
वच्छेदकत्वस्वीकारौचित्यात् एवमभावत्वस्य नञः शक्यतावच्छेदकत्वेन नञ्पदादेकदा यावदभावोपस्थितिकल्पनागौरवमपि दुष्परिहरमेव अत्यं
ताभावत्वान्योन्याभावत्वयोः नञः शक्यतावच्छेदकत्वे तु अत्यंताभावत्वविशिष्टे शक्तिज्ञानकाले ऽत्यंताभावसमुपस्थितिः अन्योन्याभावत्वविशि
ष्टे शक्तिज्ञानकाले च अन्योन्याभावानामुपस्थितिर्न तु कदापि सर्वेषां यावदभावविषयकोपस्थितिरिति लाघवमखंडितमेवेति नन्वेवं सति घटो ना
स्तीत्यादिसमभिव्याहारज्ञानकार्यतावच्छेदकं घटप्रतियोगिकात्यंताभावादिप्रकारकशाब्दबुद्धित्वं ननु घटत्वावच्छिन्नप्रतियोगिकाभावत्वं त
दवच्छिन्नत्वादिविशेषप्रयोजनाभावाद्गौरवात् तथा च यत्किंचिद्घटवति भूतलादौ घटो नास्तीति वाक्यात् तथाविधप्रमात्मकबोधोत्पादे बाधका

भावेन नञ्समभिव्याहृतवाक्यप्रमाण्यापत्तिरित्यत आह न चेति नञर्थसंसर्गाभावे योग्याभावे चेत्यर्थः नञ्पदजन्यज्ञानबोधेऽभावविशेषणीभूतप्रतियोगिविशेष
णावच्छिन्नप्रतियोगितासंबन्धावच्छिन्नप्रतियोगिप्रकारताकत्वमित्यर्थः नञ्समभिव्याहृतेन नञ्पदज्ञानस्य प्रयोज्यत्वमित्यर्थः नञ्समभिव्याहृते
नञ्पदज्ञानात्तथाविधज्ञानद्बोधस्य बोधघटेऽतिनि नञन्यादिसिद्धमित्यंतनस्य पर्यवसितार्थः अन्यथा दूषणमाह नीलो नेति घेति इत्यादिवाक्याच्छाब्दप्र
मात्मकवोधानुस्यादित्यर्थः तथाच गौरवसत्त्वेऽपि उपदर्शितसमभिव्याहारज्ञानकार्यतावच्छेदकमुपदर्शितप्रकारकत्वमवश्यं वक्तव्यंमन्यथोपदर्शि
तवाधस्याविद्यमानत्वात् तथा यत्किंचिद्घटवति घटत्वावच्छिन्नप्रतियोगिताकाभावसत्त्वेन तत्र घटो नास्तीति वाक्यात् प्रमात्मकवोधानुस्यात् न
चतत्र तादृशवाक्यस्य प्रामाण्यमिति भावः दूषणान्तरमप्याह इह पीतघटवतीत्यादि [illegible] रत्नादौ नीलघटत्वावच्छिन्नप्रतियोगिताकाभाव
विषयकवोधस्यानुभवात् तथाच नञ्जन्यतावच्छेदककोटौ अन्वयितावच्छेदकावच्छिन्नप्रतियोगित्वविषयताया अनिवेशेन तादृशानुभवापलाप
इति भावः अत्रेदं तत्त्वं यत्र चान्वयितावच्छेदकावच्छिन्नप्रतियोगित्वं प्रसिद्धं तत्रान्वयितावच्छेदकावच्छिन्नप्रतियोगितासंबन्धावच्छिन्नताद
शप्रकारताया एव तादृशसमभिव्याहारज्ञानकार्यतावच्छेदकत्वं कंबुग्रीवादिमान्नास्तीत्यादौ तु नञ्समभिव्याहारज्ञानकार्यतावच्छेदकं न
कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितासंबन्धावच्छिन्नतथाविधप्रकारताशालित्वं तद्धर्मेऽभावप्रतियोगितावच्छेदकत्वाभावेन कंबुग्रीवा
दिमत्त्वावच्छिन्नप्रतियोगिताया अप्रसिद्धत्वेन तथा वक्तुमशक्यत्वात् किंतु तत्र कंबुग्रीवादिमत्त्वावच्छिन्नत्वनिष्ठसांसर्गिकविषयतानिरूपित

प्रतियोगित्वनिष्ठसांसर्गिकीविषयाऽवच्छिन्नत्वं तथात्वेपि नानुपपत्तिः नाऽस्तावाक्यजन्यबोधे प्रतियोगित्वांशे कंबुग्रीवादिमत्त्वावच्छिन्नत्वस्य भ्रमत्वस्वी
कारात्. नन्विदमयुक्तं भ्रमत्वं हि तदभाववति तत्प्रकारकत्वं तथा च सांसर्गिकविषयतायां प्रकारत्वविशेष्यत्वाभावेन संबंधभ्रमत्वं दुरुपपादमेवं न च त
दभाववन्निष्ठविषयतानिरूपिततन्निष्ठविषयताशालिज्ञानत्वमेव भ्रमत्वमिति वाच्यं तथासति इदं रजतमिति ज्ञाने इदमंशे भ्रमत्वापत्तेरिति चेन्न सां
सर्गिकीविषयतायामपि प्रकारतात्वविषयतात्वंगीकारात् न चैवं प्रतियोगितायां कंबुग्रीवादिमत्त्वावच्छिन्नत्वाभावनिर्णयदशायां कंबुग्रीवादिमान्नास्ती
तिप्रतीत्यनुपपत्तिः भवन्मते तस्यास्तादृशबाधप्रतिबध्यतावच्छेदकाक्रान्तत्वादिति वाच्यमिष्टापत्तेः. वा बाधप्रतिबध्यतावच्छेदककोटौ प्रकारतायां
सांसर्गिकीविषयताभिन्नत्वस्य निवेशात्. केचित्तु कंबुग्रीवादिमान्नास्तीत्यादौ अभावांशे घटत्वावच्छिन्नप्रतियोगितासंबंधेन कंबुग्रीवादिमत्त्ववि
शिष्टस्य भानमुपेयते तथा चैवं प्रतीतिः कंबुग्रीवादिमत्त्वविशिष्टांशे भ्रमात्मिका अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यैव अन्वयितावच्छे
दकविशिष्टस्य संबंधतांगीकारेण प्रकृते घटत्वावच्छिन्नप्रतियोगितायां कंबुग्रीवादिमत्त्वविशिष्टस्य संबंधत्वाभावेन तेन संबंधेन तादृशाभाववति अभावे
तत्प्रकारकत्वस्याविद्यमानत्वात्. अथवाऽभावबुद्धौ सर्वत्राभावांशे प्रतियोगितासंबंधेन प्रतियोगिनो भानवत् अवच्छिन्नप्रतियोगिताकत्वसंबंधे
नान्वयितावच्छेदकत्वस्यापि भानांगीकारः तथा च कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताया अप्रसिद्धत्वेन कंबुग्रीवादिमान्नास्तीत्यादौ घटत्वावच्छि
न्नप्रतियोगिताकत्वसंबंधेनैव कंबुग्रीवादिमत्त्वस्य भानाभ्युपगमेन तस्याः कंबुग्रीवादिमत्त्वांशे भ्रमत्वमुपेयते. घटत्वावच्छिन्नप्रतियोगिताया घट

त्वस्यैव संबन्धत्वेन तद्धनेन संबन्धेन कंबुग्रीवादिमत्त्वाभाववति अभावे कंबुग्रीवादिमत्त्वप्रकारकस्य सत्त्वात् न चैवं सर्वत्राभावप्रतीतौ स्वावच्छिन्नप्रतियोगिताकत्वसं
बन्धेनात्वघितावच्छेदकभानांगीकारे घटो नास्तीति प्रतीतेर्घटत्वं नास्तीत्याकारकतापत्तिः अभावांशे घटत्वविषयकज्ञानस्य तत्प्रकारकतादिति वाच्यं यत्र स्वात
न्त्र्येणाभावांशे घटत्वं भासते तेन स्यैव तदाकारत्वेन पुष्ट तेवाभावांशे पारतन्त्र्येणैव घटत्वभानांगीकारात् नादृशप्रतीतेस्तदाकारत्वाभावात् नचैवं स्वातन्त्र्ये
णैव घटत्वभानं नाम अभावातिरिक्तं अप्रकारीभूय भासमानं तथा च यत्र घटो नास्ति घटत्वं च नास्तीति समूहालंबनात्मिका प्रतीतिस्तत्र तस्यां घटत्वं ना
स्तीत्याकारकतानुपपत्तिः तत्राभावातिरिक्तांशे घटे घटत्वस्य प्रकारतात्वेन तत्र तस्य स्वातन्त्र्येण प्रकारत्वादिति वाच्यं घटनिष्ठविषयतानिरूपितसम
वायसंबन्धावच्छिन्नघटत्वविषयताभिन्नाऽभावविषयतानिरूपिता घटत्वविषयता या एव स्वातन्त्र्येण घटत्वभानपदार्थत्वात् उक्तसमूहालंबने च
घटविषयतानिरूपित घटत्वविषयतातो भिन्नापि अभावविषयतानिरूपित घटत्वविषयतांगीक्रियते इति तथाविधविषयताभिन्नाभावविषयता
निरूपित घटत्वविषयतारूपस्वतन्त्र घटत्वभानपदार्थस्य सत्त्वेन तथाकारतायां बाधकाभावात् घटो नास्तीत्यादौ तु घटविषयतानिरूपितघटत्व
प्रकारताया अभावनिष्ठविषयतानिरूपितप्रकारतायाश्चैक्येन तद्भिन्नत्वाभावान्न स्वातन्त्र्येण घटत्वभानमिति न घटत्वं नास्तीत्याकारकतापत्तिर
त्याहुः एवं लोहितो वह्निर्नास्तीत्यादौ वह्नित्वावच्छिन्नप्रतियोगित्वमेव संबन्धविधया भासते न तु लौहित्यविशिष्टवह्नित्वावच्छिन्नप्रतियोगित्वं लौहि
त्यविशिष्टवह्नित्वस्याप्रसिद्धत्वादिति न चैवमन्वयितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसंबन्धेनाभावांशे प्रतियोगिनो भानस्य नत्र

दजन्यबोधे नियमान्नैवेति संभवतीति वाच्यं मन्वयितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगित्वं प्रसिद्धं यत्र तत्रैतादृशनियमांगीकारेणानुपपत्त्यभावादित्यादिर्बहुतरमूहनीयम्. यत्तु नीलघटो नास्तीत्यादावभावोपरि नीलघटत्वावच्छिन्नप्रतियोगितासंबन्धेन नीलघटं विषयीकृत्य बोधोत्पादस्तु तत्र धर्मस्य प्रतियोगितावच्छेदकत्वांगीकारेण अन्यथानन्वयितावच्छेदकीभूतं यद्भेदस्तत्समवायसंबन्धघटितसामानाधिकरण्यसंबन्धेन नीलविशिष्टं घटत्वं तस्य समवायसंबन्धघटितसामानाधिकरण्यसंबन्धेन नीलरूपविशिष्टं यद्घटत्वं तदपेक्षयातिरिक्ततयाऽभावप्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नप्रतियोगिताया अप्रसिद्धत्वेन तेन संबन्धेन तत्र नीलघटाभावस्यासंभवादिति तन्नातद्धर्मस्य प्रतियोगितानवच्छेदकत्वेपि कंबुग्रीवादिमान्नास्तीत्यादाविवोपदर्शितरीत्यां नापि बोधसंभवेनानुपपत्त्यभावात्. ननु भूतलं न घट इत्यादौ नञ्जन्यशाब्दबोधे कथं न घटसंसर्गाभावो भासते न च नञ्जन्यसंसर्गाभावविषयकबुद्धित्वावच्छिन्नं प्रति अनुयोगिपदसमभिव्याहृतसप्तमीपदज्ञानत्वेन हेतुत्वाच्च न तत्र तथा बोधापत्तिरिति वाच्यं चैत्रो न पचतीत्यादिवाक्यजन्यपाकानुकूलकृत्यभावविषयकशाब्दबोधे व्यभिचारेण तथोक्तेरसंभवत्वादित्यत आह प्रतियोग्यभावान्वयावित्यादि. अभावान्वयः प्रतियोग्यन्वयेन तुल्ययोगक्षेम इत्यर्थः. यत्र प्रतियोगिनिरूपितसंबन्धः संबन्धविधया भासते नञ्समभिव्याहारे सति तत्र तदभावसंबन्धोपि संबन्धविधया भासते. यत्र यत्प्रतियोगिसंबन्धः प्रकारविधया भासते नञ्समभिव्याहारे सति तदभावसंबन्धोपि तथैवेति पर्यवसितोर्थः. अत्र प्रथमोक्तमत्रघोदाहरणे नैनेति. तेनऽपदर्शिते तुल्ययोगक्षेमनियमेन आधाराधेयभावसंबन्धेनैवान्वयः आधाराधेयभावसंबन्धविधयैवान्वयः संसर्गाभावस्य संसर्गाभावसंबन्धस्य तथा सं

न्.सा.
५

बन्धविधयैवान्वयः । तथा इत्यंतरमिति फलितमिति पूरणीयम् उपदर्शितफलितार्थस्योदाहरणं यथा पचति चैत्र इत्यादिवैयाकरणमते आख्यातस्य क
र्तृवाचकतया न पचति चैत्र इत्यादौ पाकानुकूलकर्तुरन्योन्याभाव एव प्रतीयते इत्युपदर्शितार्थोदाहरणं न संभवति नतोदाहरणान्तरमाह चैत्रस्येदं चैत्रस्य
नेदमिति । प्रथमान्तपदोपस्थापिते चैत्रादौ आधाराधेयभावसंबन्धस्य संबन्धविधयान्वयः । नञ्भावस्यापि निरुक्तपदोपस्थापितेन तदभावस्यापि तथा संबन्धस्यासं
बन्धविधयान्वयः । तथा च यद्विशेष्यकयत्संसर्गकयत्प्रकारकशाब्दबुद्धिं प्रति यादृशसमभिव्याहारज्ञानं कारणं तद्विशेष्यकतत्संबन्धावच्छिन्नतत्प्रतियोगि
ताकतदभावप्रकारकविशेषणताविशेषसंसर्गकशाब्दबुद्धिं प्रति तादृशसमभिव्याहृतनञ्समभिव्याहारज्ञानस्य हेतुत्वकल्पनाद् भूतले न घट इत्यादौ न घटसं
सर्गाभावबोधः । अत्र नञ्समभिव्याहृततथाविधसमभिव्याहारविशिष्टपदज्ञानहेतोरभावादिति भावः । ननु नेदं चैत्रस्येत्यादावाधाराधेयभावसंबन्धावच्छि
न्नप्रतियोगिताकाभावान्वयबोधोदाहरणमुपदर्शितमसंगतं तत्र षष्ठ्यर्थस्य स्वामित्वरूपतया तस्य निरूपकत्वसंबन्धावच्छिन्नप्रतियोगिताकाभावस्यैव बो
धादित्यत आह षष्ठ्यादेरित्यादि । स्वत्वे चैत्रनिरूपितत्वप्रदर्शनं तु तेन संबन्धेन चैत्रान्वयप्रदर्शनाय । तन्निष्ठं चैत्रादिनिष्ठं । तस्य चैत्रादिनिष्ठस्वामित्वस्य । न
नु षष्ठ्यर्थस्वामित्वस्य तेन निरूपकत्वसंबन्धावच्छिन्नप्रतियोगिताकतदभावस्य नेदं चैत्रस्येत्यादौ बोधनान्नोक्तानुपपत्तिरित्यत आह निरूपकत्वादेः
संबन्धस्येति । वृत्त्यनियामकसंबन्धतयेति शेषः । तथा च वृत्त्यनियामकसंबन्धस्यैवाभावप्रतियोगितानवच्छेदकत्वेन निरूपकत्वसंबन्धस्य वृत्त्यनिया
मकसंबन्धतया तत्संबन्धावच्छिन्नप्रतियोगिताकस्वामित्वाभावस्याप्रसिद्ध्या नेदं चैत्रस्येत्यादौ तथा बोधासंभवेन अधिकरणतासंबन्धावच्छिन्नप्रतियो

न६

गिताकस्वामित्वाभाववोधस्यैवाभ्युपगमे चैत्रधनेपि नेदं चैत्रस्येति व्यवहारापत्तेर्दुरुद्धरतया षष्ठ्याः स्वत्वार्थकत्वांगीकारस्यावश्यकतया नेदं चैत्रस्ये
त्यादौ आधाराधेयभावसंवन्धावच्छिन्नप्रतियोगिताकाभावान्वयवोधोदाहरणत्वमूलं नासंगतमिति भावः । इदं तु वृत्त्यनियामकसंवन्धस्या
भावप्रतियोगितानवच्छेदकत्वांगीकर्तुः प्राचीनस्य मते उक्तं स्वमते तु वृत्त्यनियामकसंवन्धस्याप्यभावप्रतियोगितावच्छेदकतया निरूपकत्वसंवन्धा
वच्छिन्नप्रतियोगिताकस्वामित्वाभावस्यापि प्रसिद्धतया नेदं चैत्रस्येत्यादौ निरूपकतासंवन्धावच्छिन्नप्रतियोगिताकस्वामित्वाभावस्यापि प्रसिद्धत
या नेदं चैत्रस्येत्यादौ निरूपकतासंवन्धावच्छिन्नप्रतियोगिताकस्वामित्वाभाववोधोदाहरणमुपदर्शितस्थले संगतमेवेति । वस्तुतस्तु षष्ठ्याः स्वामित्वार्थ
कत्वमतेपि विनिगमनाविरहेण स्वत्वार्थकत्वस्यापि संभवे नेदं चैत्रस्येत्यादावाधाराधेयभावसंवन्धावच्छिन्नप्रतियोगिताकस्वत्वाभावस्यापि वोधसंभवेन न तत्र त
थोदाहरणदर्शनं नासंगतमिति ध्येयम् । यत्र प्रतियोगिनः संवन्धः प्रकारविधया भासते तेन नञ्समभिव्याहारे तत्प्रतियोगिकाभावस्यापि संवन्धः प्रकारवि
धया भासते इत्येतन्निर्वाहकं कार्यकारणभावकथनपरं समुदाहरणमाह यत्र चेत्यादिना । न संवन्धमर्यादया बललभ्य इत्यनन्तरं अपितु प्रकारविधयैव भास
ते इति पूरणीयं तत्र चानुयोगिपदे सप्तम्यपेक्षा इत्यनन्तरमपि अभावसंवन्धप्रकारकवोधेपि अनुयोगिवाचकपदे सप्तम्यपेक्षेति पूरणीयं तथा च यत्र
प्रतियोगिन आधाराधेयभावसंवन्धः प्रकारविधया भासते तेन नञा तत्प्रकारकशाब्दबुद्धिं प्रति अनुयोगिवाचकपदोत्तरसप्तमीज्ञानं कारणमिति तत्प्रतियो
ग्यभावप्रकारकशाब्दबुद्धिं प्रत्यपि अनुयोगिवाचकपदोत्तरनञ्समभिव्याहृतसप्तमीपदज्ञानं कारणमित्यर्थः । अन्यथा यत्र प्रतियोगिनः संवन्धः प्रकारवि

यथाभासत्वेनतत्तदभावसंबन्धेपिप्रकारविधयाभासत्वेइतिनियमानुपपत्तिरितिभावः॥एतेनभूतलंनघटइत्यादौघटाभावसंबन्धप्रकारकबोधापत्तिर्निरस्ता।
तत्तन्नञ्समभिव्याहृतानुयोगिवाचकपदोत्तरसप्तमीपदज्ञानरूपकारणाभावेनतथाबोधोत्पादासंभवादिति।अत्रचघटाभावादिविशेष्यकभूतलवृत्तित्वप्र
कारकशाब्दबुद्धिंप्रतिघटबोधकपदसमभिव्याहृतंयद्भूतलोत्तरसप्तमीपदसमभिव्याहृतनञ्पदंतज्ज्ञानत्वेनहेतुत्वमित्येवंरीत्याकार्यकारणभावोबोध्यः॥
ननुअभावसंबन्धप्रकारकबोधोदाहरणंभूतलेनघटइत्यादौनसंभवतितत्रघटादेर्भूतलवृत्तित्वाभावप्रकारकबोधस्यैवोदयादित्यतआहअत्रैवे
त्यादिना।तथाचभूतलेनघटइत्यादौयत्रभूतलवृत्तित्वप्रकारघटाभावविशेष्यकबोधेनतात्पर्यंतदातस्माद्भूतलवृत्तिर्घटाभावइत्याकारकबोधस्यै
वोत्पत्त्यानतत्रतथोदाहरणमसंगतमितिभावः॥तादृशवाक्यात्कदाचिद्घटविशेष्यकभूतलवृत्तित्वाभावप्रकारकबोधउत्पद्यतेइत्यत्रयुक्तिमाहअतए
वेत्यादिना।अतएवअनुयोगिवाचकपदोत्तरसप्तमीपदसमभिव्याहृतनञ्स्थलेकदाचित्प्रतियोगिविशेष्यकःअनुयोगिवृत्तित्वाभावप्रकारकबो
धोत्पादस्यैव।एकविशेष्यकत्वानुभवःएकविशेष्यकत्वानुभवोप्युपपन्नः॥तथाचतादृशस्थलेकदाचित्तादृशबोधोत्पादानभ्युपगमेपृथिव्यांगंधोन
जलेइत्यादौगन्धादिविशेष्यकपृथिवीवृत्तित्वप्रकारकजलवृत्तित्वाभावप्रकारकबोधस्यानुभवोव्याहन्येतेतिभावः॥यत्तुभूतलेनघटइत्यादौनघटाभा
वादिविशेष्यकभूतलवृत्तित्वादिप्रकारकबोधउत्पद्यतेअपितुघटोभूतलवृत्त्यभावीयइत्याकारकबोधस्तन्मतंप्रदर्शयतिसप्तम्यर्थान्वयिनइत्यादि
ना।प्रतियोग्यंशेसप्तम्यर्थान्वयिनोऽभावस्यविशेषणत्वेनैवतादृशवाक्यजन्यशाब्दबोधेभानमित्यर्थः॥तादृशवाक्याद्घटादिविशेष्यकप्रतियोगि

तासंबन्धेन भूतलादिवृत्तित्वविशिष्टाभावप्रकारकघटादिबोध एवोत्पद्यते इति पर्यवसितार्थः। अत्र केचिदित्यनेन नञ्जन्यघटाद्बोधे अन्वयितावच्छेदका
वच्छिन्नप्रतियोगिताकत्वसंबन्धेन प्रतियोगी अभावे परिभासते इति नियमभंगोऽस्वरसः सूचितः। नञ्समभिव्याहारस्थले यद्विशेष्ये यादृशविशेषण
स्यान्वयबोधः नञ्समभिव्याहारस्थले नञा तद्विशेष्ये न तद्विशेषणाभावो बोध्यते इति नियमवादिनां मतमाह केचिच्चिति। सर्वत्रेत्यादि। नञसमभिव्या न १३
हारस्थले यद्विशेष्ये यादृशविशेषणस्यान्वयबोधः नञ्समभिव्याहारस्थलेपि नञा न तद्विशेष्ये न तद्विशेषणाभावो बोध्यत इत्यर्थः। उपदर्शितनियमबलादि
तिभावः। अत्रानुकूलतर्कमाह अत एवेति। नञसमभिव्याहारस्थले यद्विशेष्ये यादृशविशेषणबोधः नञ्समभिव्याहारस्थलेपि नञा तद्विशेष्ये तादृशवि
शेषणाभावः प्रतीयते इति नियमादेवेत्यर्थः। वचनैक्यनियम इति। क्रियापदघटपदयोः समानवचनत्वनियमोप्युपपन्न इत्यर्थः। अन्यथोपदर्शि
तनियममनुपेत्याभावविशेष्यकबोधांगीकारे घटौ न स्त इत्यादौ द्विवचनाद्यनुपपत्तिः क्रियापदोत्तरे द्विवचनासंभवात्। एवं न तत्र क्रियापदोत्तरमे
कवचनापत्तिः विशेष्यवृत्ति एकत्वबोधस्थले क्रियापदोत्तरं द्विवचनादिकं भावनादिविशेष्यवृत्तिद्वित्वादिबोधस्थल एव संभवतीति नियमे
न तत्राभावरूपे विशेष्ये द्वित्वादिबोधाभावेन क्रियापदोत्तरमेकवचननियमात्। नन्वनेन तत्र विशेष्यीभूतघटे द्वित्वादिबोधेन क्रियापदोत्त
रमपि द्विवचनाद्युपपत्तिः। एवं तत्र क्रियापदोत्तरमेकवचनापत्तिरपि न संभवति तत्र विशेष्यीभूतघटादौ एकत्वाबोधनादिति भावः। यत्त्वेतन्मते
तत्र द्विवचनाद्यनुपपत्तिरुक्तस्थैव तथापि तन्मते भूतले घटौ न स्त इत्यादौ सप्तम्या निरूपितत्वार्थकतया अस्थाने विद्यमानत्वार्थकतया व्याख्यातस्या

श्रयत्वार्थकतयानञोभावबोधकतयाभूतलनिरूपितविद्यमानत्वाश्रयत्वाभाववान्घटइत्यादिबोधउत्पद्यतेतथाचनञःक्रियापदेनसहैकवचनानुपपत्तिरत्र
भावनाविशेष्यत्वादेरवबोधनात्. घटइत्यादेस्तद्विशेष्यत्वाभावादितिनञ्पदंपरंघटइत्यादेरपिभावनाविशेष्यत्वेनानुपपत्त्यभावात्. उपदर्शितनियमे
साक्षात्परंपरयाधात्वर्थविशेष्यत्वनिवेशात्. केचित्तुमतंदूषयन्तितेषामिमादिना. गतिश्चिन्त्यमीयासत्तापदस्यसत्तासमवायेलक्षणांविनागत्यभावइ
त्यर्थः. तथाचैतन्मतेतत्रसत्तापदस्यलक्षणाकल्पनापत्तिः. मन्मतेतुसानसत्ताभावेजातिवृत्तित्वबोधेबाधकाभावादितिभावः. नञ्लक्षणाकल्पनां
विनागत्यभावमेवोपपादयतिजातिसमवेतत्वस्येत्यादिना. संबन्धान्तरेणएकार्थसमवायसंबन्धेननचसत्तायांस्वरूपसंबन्धावच्छिन्नजातिवृत्तित्वाभाव
बोधेबाधकाभावइतिवाच्यंतथासतिजातौनसन्नेत्यादिवत्घटादौनसन्नेत्यादिप्रयोगापत्तिरितिध्येयम्. ननुभूतलेघटोनास्तीत्यादावभावविशेष्यकबो
धांगीकारेउपदर्शितयुक्त्याद्विवचनाद्यनुपपत्तिर्दुर्वारैवेतिचेन्नक्रियापदस्यविशेष्यवाचकपदसमानवचनत्वनियमस्यनञ्समभिव्याहृतक्रियापद
स्थलेक्रियापदस्यप्रतियोगिवाचकपदसमानवचनत्वनियमान्तरस्यकल्पनेनानुपपत्त्यभावादिति. ननुनञ्समभिव्याहारस्थलेऽभावविशेष्यकबोधां
गीकर्तृमतेभूतलेघटोनास्तीत्यादौकथमन्वयबोधः. नतावद्भूतलवृत्तित्वविशिष्टस्यघटत्वस्याभावोऽस्तित्वाश्रयइत्याकारकबोधउत्पत्तुमर्हति.
घटत्ववृत्तिभूतलेघटोनास्तिइतिप्रयोगापत्तिः. एतद्भूतलवृत्तिघटत्वस्याभावस्यपर्वतादावेववर्तमानत्वात्. नापितत्रसप्तम्यानिरूपितत्वार्थकतया
एतद्भूतलनिरूपितविद्यमानत्वाश्रयत्ववान्घटत्वाभावइत्याकारकबोधःसंभवतिसप्तम्यानिरूपितत्वेलक्षणाकल्पनापत्तेरितिचेन्न. भूतलवृत्ति

त्वविशेषावच्छि॰ न घट इति प्रतियोगिताकाभावो ऽभिलाप्य इत्याकारकबोधाभ्युपगमादिति दिक्. ननु भूतले घटो नास्तीत्यादौ कथं नान्योन्याभावबो
ध इत्यत आह यत्र चेत्यादिना. अभेदेन अभेदसंबन्धेन. ननु नञ्किं नियामकमित आह नञ्चेति. नञ्पदजन्यान्योन्याभावबोधे चेत्यर्थः. समानवि
भक्तिकत्वं तन्त्रमिति. विशेषणवाचकपदसमानविभक्तिकविशेष्यवाचकपदप्रयोजकमित्यर्थः. तथा च नञ्पदजन्यान्योन्याभावबोधे तादृशस
मभिव्याहृते नञ्समभिव्याहारज्ञानस्य हेतुत्वकल्पना नोपपद्यत इति स्थले नञा ऽन्योन्याभावबोधः. दधि सुन्दरमित्यादौ लुप्तविभक्तेरनुसन्धानादेव बो
ध इति भावः. ननूपदर्शितकार्यकारणभावासंभवः. न स्तोकं पचतीत्यादौ पाके स्तोकान्योन्याभावबोधे व्यभिचारेण विशेष्यवाचकपदोत्तरसु
ब्विभक्तेरभावात्. एवं च वैयाकरणमते चैत्रो न पचतीत्यादौ चैत्रे पाककर्तृभेदान्वयबोधोऽस्त्यतस्तत्रापि व्यभिचारः. न तत्रापि विशेषणवाचकाख्यातपदोत्त
रविभक्तेरभावेनोपदर्शितकारणाभावादित्यत आह विरुद्धविभक्तिविरहो वेति. अत्र विरुद्धविभक्तिशब्दार्थं च कञ्चिद्विशेष्यपदोत्तरविभक्तिवृत्तिप्रथ
मात्वाद्यभाववती विभक्तिः. कञ्चिद्विशेषणवाचकपदोत्तरविभक्तिवृत्तिप्रथमात्वाद्यभाववती सुब्विभक्तिः. तथा चान्योन्याभावबोधे कञ्चिद्विशेष्यबो
धकपदोत्तरविभक्तिवृत्तिप्रथमात्वाद्यभाववद्विभक्त्यभावविशिष्टविशेषणबोधकपदे नञ्समभिव्याहारज्ञानं कारणं कञ्चिद्विशेषणबोधकपदोत्तर
विभक्तिवृत्तिप्रथमात्वाद्यभाववत्सुब्विभक्त्यभावविशिष्टविशेष्यबोधकपदनञ्समभिव्याहारज्ञानं कारणमिति रीत्या कार्यकारणभावो बोध्यः. एतेन
विरुद्धविभक्तिविरहो वेत्यादिना नञ्पदजन्यान्योन्याभावबोधे सर्वविशेषणबोधकपदोत्तरविभक्तिवृत्तिप्रथमात्वाद्यभाववद्विभक्त्यभाववद्विशेष्यबो

न.वा.
९

धर्मपदेन समभिव्याहारज्ञानं कारणं विशेष्यबोधकपदोत्तरविभक्तिर्हि प्रथमान्तार्थभाववद्भिन्नस्य भाक्तविशिष्टविशेषणबोधकपदेन समभिव्याहा
रज्ञानं कारणमिति पूर्वोक्तं नम्. इदन्तु न संभवति नीलो घटं पचतीत्यादौ वैयाकरणमते चैत्रो न पचतीत्यादौ च व्यभिचारादिति निरस्तम्. विषयव्यवस्थ
या उपदर्शितरीत्या कार्यकारणभावकल्पनेनानुपपन्नभावादिति असंबद्धं नजस्यनेनेति जनस्यैवेति. नञ्पदजन्याभावबोधे विशेषणवाचकपदस
मानविभक्तिकविशेष्यवाचकपदादौ नञ्समभिव्याहारज्ञानस्य हेतुत्वादेवेत्यर्थः. यजतिषु इत्यादिना नुयाजेष्वित्यादाविमन्त्रस्य यजतिषु अनुयाज
भेदेनैवोच्यते इत्यन्वयः. तथा च यजतिषु येयजामहं करोति नानुयाजेष्वित्यादौ अनुयाजान्ययागविशेषभिन्नयागेषु येयजामहपदवन्मं
त्रं करोतीत्याकारकबोधजनक इत्यर्थः. कारणसत्त्वे कार्यस्यावश्यंभावादिति भावः. अत्र नञा निषेधबोधने बाधकमाह एकवाक्यतेति
एकविधेयार्थकत्वानुरोधादित्यर्थः. अत्र नञान्योन्याभावबोधने ऽनुयाजभिन्नेषु यागेषु येयजामहवन्मंत्रकरणरूपैकार्थविधानसंभवेन एक
विधेयार्थकत्वरूपैकवाक्यत्वं संभवति न तु नञा निषेधबोधनेन नैवं यागेषु येयजामहपदवन्मंत्रकरणविधानमनुयाजेषु तन्निषेधविधानमिति
विधेयीभूतार्थद्वैविध्यात् वाक्यस्य तु विधेयीभूतार्थैकत्वस्य संभवेन नानाविधेयार्थकत्वरूपविभिन्नवाक्यकल्पनाया अन्याय्यत्वेनेष्टापत्तिक
रणस्याशक्यत्वादिति भावः. अत्र नञा निषेधबोधने दूषणान्तरमाह येयजामह इत्यादेरित्यादि. अत्रादिना करोतीत्यस्य परिग्रहः. तथा चात्र नञा
निषेधबोधने यागेषु येयजामहं करोति नानुयाजेषु येयजामहं करोतीत्याकारकबोधानुरोधात् करोतिपदस्य येयजामहपदस्य चानुषंगकल्पने

२९

गौरवादित्यर्थः॰ अनुषंगकल्पनं विना नञा इष्टबोधो न संभवतीति स लघुरितीत्यादि व्युत्पत्तिभंगप्रसंगादिति भावः॰ नन्वत्र नञा निषेधबोधनेनानुया-
जेष्वित्यत्र सप्तम्याः सार्थकत्वं भवति अनुयाजाधिकरणताकत्वनिषेधबोधात्॰ तेनान्योन्याभावबोधने च न तथा इति सप्तम्या नैरर्थक्यभयेन प्र-
वृत्तिदोषद्वयमभ्युपेत्य अत्र नञो निषेधबोधकत्वमेवोपपद्यत इत्यत आह विशेषणविभक्तिस्त्वभेदेति॰ तथा चात्र नञान्योन्याभावबोधनेऽपि विशे-
षणविभक्तेः प्रयोगसाधुत्वरूपप्रयोजनसंभवेन नैरर्थक्यमिति भावः॰ ननु सर्वत्र विशेषणविभक्तेः साधुत्वे नीलो घट इत्यादावभेदसंबन्धेन घटे नी-
लस्यान्वयबोधः स च न संभवति नामार्थयोः साक्षादन्वयस्याव्युत्पन्नत्वात्॰ इत्यत आह नामार्थयोरित्यादि॰ अभेदेन अभेदातिरिक्तसंबन्धेन॰ तं-
गत्वान्नेहेतुत्वात्॰ न चाभेदसंबन्धेन तत्र तादृशशाब्दबोधांगीकारेऽपि अभेदसंबन्धावच्छिन्नप्रतियोगिताकनीलाभावप्रकारकघटविशेष्यकमान-
संप्रति उपदर्शितरीत्या तादृशशाब्दसामग्र्याः प्रतिबन्धकत्वासंभवेन लाघवस्यानपायात् तुल्यमतत्वमपीति वाच्यं तथापि अभेदविशेष्यक-
निरूपितत्वसंबन्धावच्छिन्ननीलनिष्ठप्रतियोगिताकाभावप्रकारकमानसंप्रति तादृशशाब्दबोधसामग्र्या उपदर्शितरीत्या प्रतिबन्धकत्वाकल्पने नै-
तन्मते लाघवानपायादित्यलमनल्पजल्पनेन॰ न राज्ञ इत्यादि न राज्ञः पुरुष इत्यादौ यथा पुरुषे षष्ठ्यर्थस्य स्वत्वस्याभावः प्रतीयते तथापि यागे सप्तम्य-
र्थाभेदाभावः प्रतीयत इत्यर्थः॰ न चैवं सत्येतन्मते नञोऽन्याभावत्वरूपेण शक्तिकल्पनमनर्थकं सर्वत्र संसर्गाभाव एव नञः शक्तिः तत एव नञजन्यशाब्द-
बोधनिर्वाहात्॰ भूतलं न घट इत्यादौ विशेषणविभक्त्यर्थाभेदस्य संसर्गाभाव एव नञा प्रतीयते इत्यभ्युपगमादिति वाच्यं तत्र अभेदत्वप्रकारकशा-

न. वा.
१०

दबोधस्यानुभवसिद्धस्यापलापमात्रेणनिराकरणासंभवेनतेनरूपेणाविनिगमनाविरहात्कल्पनावश्यकत्वादिति. केचित्तुयजतिषुयेयजामहंकरोतिनानुयाजेष्वित्या
दौनञोनिषेधबोधकत्वेऽनुयाजेषुयेयजामहपदवन्मंत्रस्यविकल्पापत्तिः यजतिषुयेयजामहंकरोतीत्यनेनयागसामान्येतत्प्राप्तेस्तद्गतानुयाजेष्वपि
तत्प्राप्तत्वात्. नानुयाजेष्वित्यनेनतत्रतस्यपुनर्निषिद्धत्वाच्चेति. तत्रनञोननिषेधबोधकत्वंकिंतुभेदबोधकत्वमिति नानुयाजेष्वित्यादौनञोभेदबोध
कत्वेयुक्तिमाह तन्मतंदूषयितुंतदुपन्यस्यतियत्त्विति. करणनिषेधइति. नानुयाजेष्वित्यादौनञोयेयजामहपदवन्मंत्रकरणनिषेधबोधनइत्य
र्थः. विकल्पापत्तेरिति. अनुयाजेनादृष्टमंत्रस्यकरणाकरणापत्तेरित्यर्थः. उपदर्शितेति एतावतात्रतादृशमंत्रकरणस्यविहितप्रतिषिद्धत्वादितिभा
वः. विशेषनिषेधइत्यादि. ब्राह्मणेभ्योदधिदातव्यंनकौण्डिन्यायदातव्यमित्यादौविशेषनिषेधस्थलेयथाब्राह्मणेभ्योदधिदातव्यमितिसामान्यवि
धेः कौण्डिन्यातिरिक्तब्राह्मणसंप्रदानकदधिदानबोधकत्वंतथात्रनैवयजतिषुयेयजामहंकरोतीतिसामान्यविधेरपिअनुयाजातिरिक्तयाजेयेयजा
महपदवन्मंत्रकरणप्रतिपादकत्वेनानुयाजेतादृशमंत्रकरणस्याप्राप्त्याविकल्पासंभवादितिभावः. ननुब्राह्मणेभ्योदधिदातव्यंनकौण्डिन्याय
दातव्यमित्यादावपिसामान्यविधेर्विशेषेतरपरत्वंनचतथासतिकौण्डिन्यस्यापिदधिदानप्रसक्त्याविकल्पापत्तिरितिवाच्यंतत्रापिनञोभेदबोध
कत्वमुपेत्यवाक्यैकवाक्यतयाकौण्डिन्यातिरिक्तब्राह्मणसंप्रदानकदधिदानप्रतिपादनाभ्युपगमेनकौण्डिन्येतन्निषेधप्राप्त्याचविकल्पानवका
शात्. तथाचसामान्यविधेर्विशेषेतरपरत्वस्यनिर्युक्तिकत्वात्प्रकृतस्थलेनञोनिषेधबोधकत्वाभ्युपगमेविकल्पापत्तिर्दुरुद्धरैवेत्यतआहनचेति.

चे१

न१०

विरुद्धैकवचनत्वादिति. यथैकनामार्थे ऽपरनामार्थान्योन्याभावबोधकत्वस्थले विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वं तंत्रं तथा च
समानवचनत्वस्यापि तंत्रत्वेन प्रकृते तदभावात्तथाबोधासंभव इति भावः. नन्वेकनामार्थे ऽपरनामार्थान्योन्याभावबोधे विशेषणवाचकपदवि
शेष्यवाचकपदयोः समानवचनत्वस्य तंत्रत्वे प्रमाणाभाव इत्यत आह न खल्वित्यादि. नामार्थयोरभेदान्वयबोधे विशेषणबोधकविशेष्यबो
धकपदयोः समानवचनत्वस्य तंत्रत्वे एव नञ्जन्यान्योन्याभावबोधे तयोस्तथायाति. नञ्जन्यान्योन्याभावविषयकशाब्दबोधं प्रति एकपदार्थे ऽ
परपदार्थस्याभेदान्वयबोधकैकपदसमभिव्याहृतापरपदेन नञः समभिव्याहारज्ञानस्य हेतुत्वादित्यत स्तत्प्रदर्शितं महतोएत्र इत्यनेन. नन्वे
कपदार्थे ऽपरपदार्थान्योन्याभावविषयकशाब्दबुद्धिं प्रति विशेषणबोधकपदविशेष्यबोधकपदयोः समानवचनकत्वस्य नियामकत्वकल्पने ए
कोनद्वावित्यादौ नञान्योन्याभावविषयकशाब्दबोधानुत्पादप्रसंग इति न तत्र तत्कल्पनम आवश्यकः. तथा च ब्राह्मणेभ्यो दधि दातव्यं न कौण्डि
न्याय दातव्यमित्यादौ नञान्योन्याभावबोधने बाधकाभाव इत्यतः पूर्वोक्तदोषोद्धारेऽस्वरसं दोषान्तरमाह एकोनद्वावित्यादिना. अत्र नित्यद्विव
चनानां शब्दातिरिक्तस्थले तथाविधनियमस्वीकारे तु तथाविधदोषस्यैव दुरुद्धरत्वेनेति सूचनार्थमुक्तं कथंचिदिति ब्राह्मणेभ्यो दधि दातव्यं
न कौण्डिन्यायेत्यत्रैव कौण्डिन्यभिन्नब्राह्मणसंप्रदानकदधिदानसंभवाद्द्वितीयदातव्यपदं निरर्थकमिति भावः. अत एवेति. नियत एव विशेष
निषेधस्थले सामान्यविधेर्विशेषेण परत्वं मत एवेत्यर्थः. अन्यथाऽमावास्यायां पितृभ्यो दद्यादित्यनेन गौड्रब्राह्मणप्राप्तौ गौड्रं

न॰ वा
५१

नकुर्वीतेत्यनेनतत्रश्राद्धकरणनिषेधस्यचप्राप्तावश्यकरणत्वस्यविहितप्रतिषिद्धत्वाभ्यांविकल्पापत्तेर्दुर्वारत्वादितिभावः॰ननुतत्रापिनञोन्यो
न्याभावार्थकतयारात्रीतरकालेश्राद्धकरणस्यविधानसंभवेनैवसर्वसामंजस्येपर्यंतत्रनञोनिषेधार्थकत्वमित्यतआहनइति॰रात्रौश्राद्धंनकुर्वी
तेत्यत्रापिरात्रीतरपरतोनञोन्योन्याभावार्थकतयारात्रीतरकालेश्राद्धकरणस्यबोधकतेत्यर्थः॰तथाचपर्यंतत्रनञोनिषेधार्थकत्वमिति
भावः॰रात्रिमित्यादि॰रात्रौश्राद्धंनकुर्वीतेत्यादौनञोन्योन्याभावार्थकतयारात्रीतरकालेश्राद्धकरणविधायकताभ्युपगमेऽमावास्या
यांपितृभ्योदद्यादित्यनेनरात्रौश्राद्धप्राप्तेर्दुर्वारतयातत्रतत्करणापत्तेर्दुर्वारत्वादित्यर्थः॰ननुतथाविधवाक्ययोरैकवाक्यतयारात्री
तरामावास्यायांश्राद्धंकुर्वीतेत्यर्थकत्वाभ्युपगमेनपूर्वोक्तकल्पेउक्तदोषइत्यतआहनखलुक्रियेत्यादि॰इदंरात्रौश्राद्धंनकुर्वीतेतिवा
क्यंतेनक्रियारहितंश्राद्धविधायकवाक्येननापीदंरात्रौश्राद्धंनकुर्वीतेतिवाक्यंपृथक्क्रियारहितम्‌आनुषंगिकक्रियातिरिक्तक्रिया
रहितंकेवलक्रियारहितमित्युक्तेनानुयाजेष्वितिवद्दृष्टान्तासंगतिः॰तत्रानुषंगिकक्रियावत्वात्तः पृथगितितथाचतयोरेक
वाक्यतापन्नयोरन्यतरत्क्रियारहितंभवतिअन्यथातयोःकेवलयोःक्रियापदवैयर्थ्यापत्तेः॰एवंचतत्रश्राद्धकरणप्रापकवाक्यान्तरस्याभावेनपृथगेवा
क्यद्वयस्यैवक्रियापदवत्तयाएकवाक्यत्वासंभवेनपूर्वोक्तकल्पेपूर्वोक्तदोषोदुरुद्धरएवेतितन्मतेविशेषनिषेधस्थलेसामान्यविधिविशेषेतर
परत्वनियमेनअमावास्यायांपितृभ्योदद्यादितिसामान्यविधेःरात्रीतरामावास्याकालेश्राद्धकरणस्यविधायकत्वेनतत्रश्राद्धकरणप्रापक

वाक्यांतरस्य चाभावेन तत्र तस्याप्रवृत्तत्वात्· प्रदर्शितसामान्यविधेर्विशेषेतरपरत्वमनभ्युपेत्यते न तत्र तत्प्राप्तिप्रकारः किंतु विकल्पापत्तिरित्याशंकते अ
थ एत्रावित्यादिना· उपहासपूर्वकं समाधानमाह साधीयानित्यादि· तथा च प्रवृत्तं प्रतिषिध्यते इति नियमे प्रमाणाभावेन अप्रवृत्तस्यापि निषेधे बाध
काभावाद्रात्रौ श्राद्धं न कुर्वीतेत्यादौ न नञो निषेधबोधकत्वाभ्युपगमेऽप्यक्षतिविरह इति भावः· निषेधविधेरिति· नाद्यो नियमस्वीकृत्या प्रवृत्तस्यापि
निषेधाभ्युपगमे प्रवृत्तस्यैव प्रतिषिद्धत्वमिति नियमेन तत्र तदकरणस्यैव निषेधविधेः प्रयोजनत्वसंभव इति नाद्यो नियमाभ्युपगम आवश्य
कः तस्य च विधिविषयविशेषनियंत्रिततया न दोष इति भावः· तात्पर्यानवबोधेति· एतेनैतदमावास्याकालाधिकरणकश्राद्धकरणबोधतात्पर्यानिलस्य
दुर्लभत्वापत्तिरित्यत आह एकविषयितयेत्यादि· अनन्यगतिकतया विकल्पं विना गत्यंतराभावतया· तथा च तत्र विकल्पं विना प्रकारांतरासंभवेनाव
श्यं तत्र विकल्पस्वीकारेणातिविकल्पस्थले दुर्लभत्वापत्तिरिति भावः· ननु नातिरात्रे षोडशिनं गृह्णातीत्यत्र नञा इष्टसाधनत्वस्यैवाभावः प्रती
यते प्रकारांतरस्यासंभवात् न च तन्न संभवति षोडशिग्रहणविधिविरोधात्· अतस्तत्र विकल्प एवोपपाद्य इति अत्र चेति· नषोडशिनं गृह्णातीत्यत्र
चेत्यर्थः· ननु धात्वर्थान्वितनञर्थाभावेन विभक्त्यर्थस्यान्वयोऽनुपपन्न इत्यत आह प्रत्ययस्येति· तथा च नात्र प्रत्ययविकल्पे प्रमाणाभाव इति
भावः· अत एव नादृष्टमुत्पन्नेऽभावादेव· ननु क्वचिद्धात्वर्थेपि विभक्त्यर्थप्रतियोगिकाभावस्यान्वयेन धात्वर्थाभावे विभक्त्यर्थान्वये नियाम
काभाव इत्यत आह नियमश्चेत्यादि· तथा च यत्र धात्वर्थे विभक्त्यर्थाभावबोधे तात्पर्यं तिष्ठति विरोधोपि नास्ति तत्र तथाबोधः· यत्र तु धात्वर्थाभा

न॰ वा॰
१२

वि॰बृ॰टी॰ २

नेविभक्त्यर्थान्वयबोधेनात्पर्येण तन्नये वान्वयबोध इत्यनेनानियम इति भावः॥ ननु षोडशिग्रहणस्यांगत्वेनेष्टसाधनत्वाभावान्नातिरात्रे षोडशिनं गृह्णाति
षोडशिगृहणे इष्टसाधनत्वाभावबोधने विनगृहणविधिविरोधः। किं तु बाधेन तत्रेष्टसाधनत्वस्यान्वयबोधासंभवः तथा च कथं तत्र गृहणविधेन
धात्वर्थाभावे इष्टसाधनत्वान्वयबोधांगीकार इत्यत आह इष्टरूपफलाजनकत्वेपि चेत्यादि। तथा च तत्रेष्टसाधनत्वाभावान्वयबोधस्वीकारेपि गृ
हणविरोधो दुरुद्धर इति भावः॥ ननु गृहणागृहणयोस्तुल्यफलजनकत्वेन कथं विकल्पः एवमाद्ये षोडशिगृहणं प्रसज्येत्यत आह गृहणवि
ध्यन्यथानुपपत्त्या चेति। तथा च तयोस्तुल्यफलाभावेन नोक्तरूपावकाश इति भावः॥ प्रतियोग्यभावयोरित्यादि। प्रतियोग्यनुयोगिभावः
प्रतियोगित्वमनुयोगित्वम्। आधाराधेयभावः आधारत्वमाधेयत्वम्। उभयत्र उभयोः क्रमेण तुल्यमिति वैयर्थ्याभिप्रायेण। ननु नञोऽभा
वार्थकत्वे कथं भूतलं न घट इत्यादौ भूतलेऽधिकरणतासंबन्धेन नञर्थान्योन्याभावस्यान्वय अन्योन्याभावे च प्रतियोगितासंबन्धेन घटस्यैवा
न्वयः॥ नामार्थयोर्भेदेनान्वयबोधानंगीकारादित्यत आह निपातातिरिक्तेति। अव्ययनिपातातिरिक्तेत्यर्थः। तथा च फलबलात् निपाता
व्ययजन्यशाब्दबुद्धिं प्रति प्रकारीभूतविभक्त्यर्थोपस्थितेर्हेतुत्वस्याकल्पनेनानुपपत्त्यभावादिति भावः॥ अत एवेति। यत एव फलबलान्नि
पाताव्ययजन्यशाब्दबुद्धिं प्रति प्रकारीभूतविभक्त्यर्थोपस्थितेर्न हेतुत्वमत एवेत्यर्थः॥ इवाद्यन्वयबोधे चंद्र इव मुखमित्यादौ ननु कथं ना
नाधर्माभ्यामेकधर्मिबोधकत्वरूपसामानाधिकरण्योपस्थितिरित्यत आह अघटं भूतलमित्यादि। संसर्गान्योन्याभावार्थकनञ्भेदेनोदाहरण

वा १२

ढ्यम् । अघटमित्यत्र नपुंसकलिंगनिर्देशस्तु न विद्यते घटो यत्रेति बहुव्रीहिसमासस्य स्पष्टीकरणाय अन्यथा अघट इत्युक्तेन घटोऽघट नञ्तत्पुरुषेपित
था प्रयोगसंभवेन तत्र नञोऽन्योन्याभाववदर्थकतया संसर्गाभाववत्त्वालाभात्किन्तूदाहरणासंभव इति ध्येयम् । अभाववत्त्वतो अभाववद्वृत्तिधर्मता-
यन्तु बहुव्रीहिसमासे सर्वत्रोत्तरपदे एव लक्षणा अत एव चित्रगुरित्यादौ गवादिपदे एव न तथा प्रत्यादिन मेवं वाघटं भूतलमित्यादौ अपि घटपदस्यैव घटा-
भाववति लक्षणा वक्तुमुचिता ततश्च नञ्पदोऽभाववति लक्षणोक्तिः संगतेति तदसत् चित्रगुरित्यादौ चित्रपदस्य लक्षणांगीकारे स्वाश्रयाभिन्नगो-
स्वामित्वात्मकपरंपरासंबन्धरूपस्यास्य संबन्धात्मकलक्षणाकल्पने गौरवमिति लाघवात्तद्गोपदस्य लक्षणाकल्पनात् । लाघवं च स्वस्वामित्वात्मक-
साक्षात्संबन्धरूपलक्षणांगीकारेण तथा लाघवसंभवः । अपितु तद्धियपरंपरासंबन्धरूपलक्षणाकल्पने गौरवमिति लाघवान्नपदे एव तत्र स्वशक्य-
संबन्धित्वरूपलघुतरस्य संबन्धात्मकलक्षणाकल्पनमुचितमिति । यन्तु निपातजन्यशाब्दबुद्धिं प्रत्यपि प्रकारीभूतविभक्त्यर्थोपस्थितेर्हेतुत्वमुपेय-
ते तन्मतेनाह केचित्तु प्रतियोगिपदोत्तरसुप इति । भूतलं न घट इत्यादौ घटादिबोधकपदोत्तरसुप इति भूतलं न घट इत्यादौ घटादिबोधकपदोत्तरसु-
प इत्यर्थः ॥ ननु सर्वत्रप्रतियोगित्वस्य नञ्समभिव्याहृतप्रतियोगिबोधकपदोत्तरसुबर्थत्वे घटीयोऽभावो न घटस्येति प्रयोगापत्तिः ॥ तत्रापि घटनि-
ष्ठप्रतियोगित्वस्य स्वरूपसंबन्धेनाभावस्य घटाभावे विद्यमानत्वात् । न घटस्येत्यत्र निरूपकतासंबन्धावच्छिन्नघटनिष्ठप्रतियोगितांकाभावबो-
धाभ्युपगमात् न तथा प्रयोगः घटनिष्ठप्रतियोगितायाः निरूपकतासंबन्धेन घटाभावे विद्यमानत्वादिति वाच्यं स्वनिष्ठात्मकसंबन्धस्याभावप्र-

नियोगितावच्छेदकत्वानंगीकारेण तथोक्तेरसम्भवादित्यत आह अनुयोगित्वे चेति· चकारो व्यवस्थितविकल्पसंपादकः तथा च कश्चित्प्रतियोगित्वं तथा
विधत्वमर्थः· कश्चिदनुयोगित्वं चेति लभ्यम्· अतएव घटेन घटाभावस्याकाशे घटे घटाभावप्रतियोगित्वाभाववोधस्यानुभवोपि सदुपपाद इति ध्ये
यम्· ननु नञः सुयोगिकरणे नार्थकत्वे सर्वत्र नञ्नरसुपोऽनुसंधानकल्पनं तस्य नञ्लक्षणाकल्पनं चेत्युभयकल्पने गौरवं तदपेक्षया नञ्
एवाभाववति लक्षणाकल्पनमुचितमित्याशयेनाह नञो वेति· ननु नञ अन्योन्याभाववोधने विशेषणवाचकपदविशेष्यवाचकपदयोर्वि
रुद्धविभक्तिराहित्यं नञ्प्रमिति पूर्वमुक्तं न च विरुद्धविभक्तिकत्वं विरुद्धार्थप्रतिपादकविभक्तिकत्वम् अन्यथा व्युत्पत्त्यनुसरणस्थले क
र्मत्वाद्यर्थकप्रथमान्तपदार्थान्वयबोधापत्तेः· तथा च प्रतियोगिवाचकपदोत्तरसुपः प्रतियोगित्वाद्यर्थकत्वे भूतलं न घट इत्यादेर्न
ञोन्योन्याभाववोधकत्वासंभवः· न च विशेष्यवाचकपदोत्तरैकत्वप्रतिपादकविभक्तेर्विशेषणवाचकपदोत्तरविभक्त्यर्थप्रतियोगित्वादिरूपविरुद्धार्थ
कत्वात्· एवं नञर्थसंसर्गाभावे भेदे नञ्नरपदार्थान्वयानुभवे अनुयोगिवाचकपदोत्तरं सप्तम्यपेक्षा इत्थंसूर्युक्तं तदपि नञ्नरसुपोऽधिकरणत्वल
क्षणयैव संभवति· ननु नञो भाववल्लाक्षणिकत्वेन तल्ये तथाविधकार्यकारणभावकल्पनं पूर्वमतेप्यावश्यकमित्याह नञो वेति· तथाविधभे
दान्वयबोधाप्रसिद्धेः तथाविधभेदान्वयबोधाप्रसिद्धेः· तथाविधभेदान्वयबोधे तु तादृशसप्तम्यपेक्षा न संभवति अघटं भूतलमित्यादौ तदभा
वात्· एवं च नञः कश्चिदन्योन्याभावः प्रतिपाद्यते कश्चित्संसर्गाभाव इत्यत्र नियामकाभावात्सर्वत्रात उभयबोधप्रसंग इत्यत आह विभक्त्यर्थे इति·

४१०७

जागदीशी
अवच्छेदकत्वनिरुक्तिः

श्री ५ को सरकार
वाल्मीकि संस्कृत महाविद्यालय

पत्र: १४

श्रीगणेशायनमः॥ ॥नन्विति· इद् अनवच्छेदकमित्यत्र· अवच्छेदकत्वमवच्छेदकपदार्थः· विशिष्टसत्तात्वस्यसमनियतस्यसत्तात्वस्यलघुनोपिनविशि
ष्टसत्ताभावप्रतियोगितावच्छेदकत्वंगुणादावपिसत्तानास्तीतिप्रत्ययप्रसंगात्· पृथिवीसमवेतत्वासमनियतस्यापिसमवेतत्वस्यपृथिवीसमवेताभावप्रतियो
गितावच्छेदकत्वमननतिप्रसंगात्· एवंघटरूपत्वस्यासमनियतमपिरूपत्वंस्वाधिकरणसंयोगादिसंबन्धावच्छिन्नघटरूपाद्यभावस्यप्रतियोगितावच्छेदकमतः
समनैयत्यमकिंचित्करं यस्यावच्छेदकत्वस्वीकारेऽतिप्रसंगाद्यभावःसएवावच्छेदकइत्याशयेनाहसंभवतीति· अतिप्रसंगाद्यनापादकलघोसंभवतीत्यर्थः·प्र
मेयधूमत्वस्यतादृशप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधूमत्वानतिरेकादाहकंबुग्रीवादिमत्त्वेति· नचकंबुग्रीवादिमत्त्वंकंबुग्रीवादिव्यक्तिरेवसाचप्र
त्येकंहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकंचैवेतिकुतोनातिव्याप्तिरितिवाच्यंपरंपरयासंस्थानगतकंबुग्रीवात्वादिजातिमत्त्वस्यैवसाध्यतावच्छेदकत्वात्तस्यच
परंपरयावच्छेदकत्वमपेक्ष्यलाघवाद्घटत्वस्यैवसाक्षात्तथात्वमितिभावः· ननुपृथिवीत्वतेजस्त्वादिनासांकर्याद्घटत्वंयदिनानातदानैकमपिघटत्वंकंबुग्रीवा
दिमत्त्वसमनियतमतआहघ्राणग्राह्यगुणत्वेति· घ्राणग्राह्यगुणत्वापेक्ष्यालाघवाद्गन्धत्वस्यैवप्रतियोगितावच्छेदकत्वंबोध्यम्· गन्धत्वस्यपरमाणोग
न्धत्वेनसहघ्राणग्राह्यगुणत्वस्यसमनियतत्वाभावाद्गन्धत्वस्यप्रतियोगितानवच्छेदकत्वादितिभावः· घ्राणग्राह्यगुणत्वंघ्राणग्राह्यवृत्तिगुणत्वव्याप्यजाति
मत्त्वंतेनगन्धत्वस्यलघुनःसमनियतत्वेतात्पर्यमित्यपिकश्चित्· व्यभिचारिणीति· प्रमेयत्वादौ· तेनविरुद्धेहेतौसाध्यसामानाधिकरण्याभावादतिव्याप्त्यभावेपि
नक्षतिरितिध्येयम्· नापीति· तादृशप्रतियोगितायास्तत्तद्व्यक्तित्वावच्छिन्नाभाववद्वृत्तित्वमपिनेत्यर्थः· तेनप्रतियोगिताप्रतियोगिकाभाववद्वृत्तितया धूमत्वादे

रवच्छेदकत्वाभावादिति प्रसंगसंभवात्स्वरूपसंबन्धात्मिकाया इत्यस्य नवैयर्थ्यं न चोक्तग्रन्थविरोध इति ध्येयम्· स्वरूपसंबन्धात्मिकाया इति· प्रतिव्यक्तिभिन्नत्वे
हेतुः· तत्तदभावप्रतियोग्युभयस्वरूपाया इत्यर्थः· तत्तत्प्रतियोगिमात्रस्वरूपत्वे सामान्याभावविशेषाभावयोः प्रतियोगितायामविशेषापत्तेरिति ध्येयम्· धूमत्वाद
रपीति· तथा च धूमवान्वह्नेरित्यादौ व्याप्तिलक्षणातिव्याप्तिरिति भावः· न चेति· वाच्यमित्यनेनान्वितम्· तथाविधेति· यत्किंचित्सद्व्याप्यवृत्तिसाध्यकस्थलीयलक्षणा
भिप्रायेण· तथाविधो हेतुसमानाधिकरणो यो यत्किंचिदभावस्तत्प्रतियोगितात्वावच्छिन्नाभाववदवृत्तित्वं तत्रार्थः· तथाविधाभावीयप्रतियोगिताभिन्नत्वमप्रसि
द्धं सर्वस्यैव यत्तु नस्मादृशायावत्त्वावच्छिन्नाभावप्रतियोगितावत्त्वादनुक्तं यत्किंचिदिति· समनियताभावयोरैक्यानुपगमाद्धूमादिसामान्याभावस्यैव धूमत्वादि
संयोगादिसंबन्धेन प्रमेयादिसामान्याभावतया पुनरप्रसिद्धिः· एकधर्मावच्छिन्नार्थकं चैकपदमव्याप्यवृत्तिसाध्यकस्थलीयनिरुक्त्यभिप्रायेण· तथा च तथा
विधा एकधर्मावच्छिन्ना प्रतियोगिता तत्सामान्यभिन्नत्वमिति योजनीयम्· यत्प्रतियोगिताया अवच्छेदकीभूतधर्मावच्छिन्नानधिकरणत्वं हेतुमतस्तत्प्रतियो
गिताया अवच्छेदकीभूतधर्मावच्छिन्नप्रतियोगितासामान्यभिन्नावृत्तित्वं तत्रार्थ इति वस्तुगतिः· एकपदस्थं गगारकनयात्तत्तदभावप्रवेशार्थ इति तु रिक्तं वचस्तन्नि
वेशवैयर्थ्यात्· यत्किंचित्पदेनैव तद्बोधनादिति ध्येयम्· यद्यपि प्रमेयवान्वाच्यत्वादित्यादौ समवायेन साध्यतायामतिव्याप्तिः· प्रमेयत्वावच्छिन्नाभावप्रतियोगितासा
मान्यभिन्नत्वाप्रसिद्धेः· तादृशाभावानवस्थानिरुक्तप्रतियोगितानवच्छेदकतायाः प्रमेयत्वे सत्त्वात्· तथापि तादृशयत्किंचिदभावप्रतियोगितात्वं यद्धर्मव्यापकताव
च्छेदकं तत्त्वं विवक्षितम्· अस्ति च प्रमेयत्वव्यापकत्वं प्रमेयसामान्याभावप्रतियोगितायामिति दोषः· तदवच्छेदकत्वम्· अत एवेति· यत्किंचिदेताभावमत्ते प्र

देशादेवेत्यर्थः. यदिसामान्याभावोनाश्रितस्तदावह्निमन्निष्ठतत्तद्धूमाभावप्रतियोगितासामान्यधूमेधूमान्तरेवर्त्तमानतयाधूमत्वस्यनिरुक्तावच्छेदकत्वंनस्यादिति
व्याप्तिलक्षणमितिव्याप्तिनिर्सार्थमेवसामान्याभावःसाधयिष्यते. अन्यथावह्निसमानाधिकरणतत्तदभावकूटप्रतियोगितावच्छेदकत्वेनैवनातिप्रसंगः. तत्साध
नंव्यर्थमेवस्यात्. तथाचधूमसामान्याभावस्यैवहेतुसमानाधिकरणस्यप्रतियोगिताश्रयेघटादाववृत्त्याधूमत्वस्यावच्छेदकत्वमितिभावः. ननुतादृशप्रति
योगिताऽन्यूनानतिरिक्तवृत्तित्वंवाच्यंवह्नित्वंतुनघटवृत्तिनादृशप्रतियोगिताऽन्यूनवृत्तीत्यतआहतार्णतार्णेति. अतिप्रसंगादिति. तथाचव्याप्तिलक्षण
संभवइतिभावः. एतेनेतिक्वाचित्कःपाठः. तत्रएतेनतार्णतार्णोभयाभावमादायदन्तदोषेणसामान्याभावप्रतियोगित्वमेकमेवसकलवृत्तीति. तदनतिरि
क्तवृत्तिधूमत्वमतोनोक्तातिव्याप्तिरिति. प्रगल्भोक्तंदूषयति अतएवेति. उक्तरीत्यावह्नित्वादावच्छेदकत्वप्रसंगादेवेत्यर्थः. ननुप्रतियोगितानवच्छेदकमित्यत्रा
वच्छेदकत्वंस्वरूपसंबन्धरूपंवाच्यंस्वावच्छेद्यप्रतियोगिताकत्वेनसाध्यतावच्छेदकत्वंपुनर्विशेषणीयमतोगुरुरूपेणव्यभिचारिणिनातिव्याप्तिरतआहलघु
रूपेणेति. ननुघटत्वोन्मज्जकालत्वादिरूपादावव्याप्तिभिरेवगुरुरूपेणसाध्यतायामतिव्याप्तिभियापिप्रतियोगिताधर्मिकोभयाभावघटितंवाच्यमतस्तद्दूषयति
लघुरूपेणेत्यपिकेचित्. वह्नित्वादिलघुरूपसमनियतंयत्प्रमेयवह्नित्वादितद्रूपेणसाध्यतायांधूमादावव्याप्तिरिति. तादृशेति. स्वावच्छेद्यप्रतियोगिताकसाध्यताव
च्छेदकाप्रसिद्धेरित्यर्थः. प्रतियोगितावच्छेदकेति. हेतुसमानाधिकरणाभावप्रतियोगितायायदवच्छेदकंतदभाववद्वृत्तित्वस्यमूलस्थप्रतियोगितावच्छेदका
नेनविवक्षितत्वादित्यर्थः. अत्रचयेनसंबन्धेनप्रतियोगितावच्छेदकत्वंतेनैवतदभावोग्राह्यः. अन्यथाधूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकस्यघटत्वा

देः कालिकसंबन्धेनाभाववत्त्वात्मतादौ समवायेनावृत्त्यानवच्छेदकत्वं न वा धूमत्वादेः संयोगादिसंबन्धेन स्वाभाववति समवेतत्वेनावच्छेदकत्वहानिः यत्तु सा
ध्यतावच्छेदकताघटकेनैव संबन्धेन तदभावो ग्राह्य इति तन्न धूमत्वप्रकारकप्रमाविशेष्यवान्वह्नेरित्यादावतिव्याप्तिः लघुतया हेतुमन्निष्ठतादृशप्रमाविशे
ष्याभावप्रतियोगितावच्छेदकीभूतधूमत्वादेः स्वरूपसंबन्धेनाभाववति धूमस्य वृत्ता तादृशप्रमाविशेष्यत्वस्य वृत्तेः तद्वृत्तित्वं च स्वरूपसंबन्धेन तद्वृत्तिसाध्य
तावच्छेदकताघटकसंबन्धेनावर्तमानत्वं नातो धूमत्वाभावस्यैव कालिकसंबन्धेनाश्रये धूमे समवायेन स्वरूपसंबन्धेन च तदाश्रये स्पन्दादौ कालिकतया धू
मत्वस्य वर्तमानत्वेपि अवच्छेदकत्वहानिः न च समवायेन प्रमेयस्य साध्यतायां भाववत्तावति व्याप्तिः प्रमेयत्वरूपस्यावच्छेदकस्याभावाप्रसिद्ध्या प्रमेयाभावस्य ल
क्षणाघटकत्वादिति वाच्यं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धर्मान्यूनवृत्तित्वमित्यस्यैव विवक्षितत्वात् अत एव समवायेन सत्ताश्रयस्य साध्यत्वेना
दृशावच्छेदकीभूतसत्त्वस्याभाववति सामान्यादौ साध्यतावच्छेदकताघटकीभूतसमवायसंबन्धेन वृत्तेः प्रसिद्धावपि भाववत्त्वादिहेतौ नातिव्याप्तिः इदन्तु चि
न्त्यने तादृशप्रतियोगितावच्छेदकानतिरिक्तवृत्तिभिन्नत्वापेक्षया नञर्थद्वयाप्रवेशेन लाघवात्तादृशावच्छेदकं यत्तत्त्वुत्पेकानतिरिक्तवृत्तित्वं साध्यतावच्छे
दकस्य विशेषणं वक्तुमुचितमिति. ननु धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकं यावद्द्रव्यादिनिष्ठयावत्त्वं तार्णतार्णोभयत्वं वा तदनतिरिक्तवृत्त्येव वह्नि
त्वादिकमिति व्याप्तिलक्षणमसंभवीत्यत आह स्वसमानेति. स्वमनतिरिक्तवृत्तित्वेनाभिमतं तथा च स्वसमानवृत्तिकं यद्धेतुमन्निष्ठाभावप्रतियोगितावच्छे
दकं तदनतिरिक्तवृत्तित्वमर्थः. यावत्त्वस्य वह्नित्वव्यापकत्वेपि वह्नित्वसमानवृत्तिकत्वाभावादेव न तस्य तादृशावच्छेदकत्वमिति भावः ननु स्वसमानवृत्ति

कत्वं स्वन्यूनानतिरिक्तवृत्तित्वं तथाच वह्निनिष्ठयावत्त्वादेरपि समवायादिना स्वावच्छिन्नप्रतियोगितासंबन्धेन वा वह्नित्वादिसमानवृत्तिकत्वमेव. नच स्वस
मानवृत्तिकत्वमित्यत्र एकसंबन्धेन वृत्तिकत्वमिति तदर्थः. वह्नित्वादेः अपर्याप्तभावान्नेयावत्त्वस्य स्वसमानवृत्तिकत्वमिति वाच्यम्. वह्नित्वादेरपि पर्याप्त्य
ङ्गीकारादत आह तत्त्वं चेति. स्वपर्याप्तीति. नच स्वपर्याप्त्यधिकरणे यावति वह्नौ वह्निवृत्तियावत्त्वादेः पर्याप्तत्वाद्वह्नित्वस्यावच्छेदकत्वं दुर्वारमिति वाच्यम्. स्वप
र्याप्त्यवच्छेदकधर्मावच्छिन्नपर्याप्तिकत्वस्योक्तत्वात्. वह्नित्वस्य पर्याप्त्यवच्छेदकीभूततत्तद्वह्नित्वावच्छेदेन यावत्त्वादेरपर्याप्तत्वात्. नचैवमनतिरिक्तवृत्तित्वा
द्यस्य वैयर्थ्यं वह्नित्वपर्याप्त्यवच्छेदकधर्मावच्छिन्नपर्याप्तिकं तत्तद्वह्नित्वादिकमादाय वह्नित्वस्यापि परिभाषितावच्छेदकत्वापत्तेरिति भावः. यावत्त्वादिकमि
ति. आदिना तारगततारोभयत्वादिपरिग्रहः. न तथेति. न वह्नित्वपर्याप्त्यधिकरणपर्याप्तिवृत्तिकत्वमित्यर्थः. ननु पर्याप्तिः समवायः सा च तारगततारोभ
यत्वादावप्यक्षतैवेत्यत आह पर्याप्तिश्चेति. एको घट इति. एकमात्रवृत्तिधर्मावच्छेदेन घटत्वस्य पर्याप्तिं दर्शयित्वेमौ द्वाविति उभयवृत्तिधर्मावच्छेदेनैव वह्नित्वस्य प
र्याप्तिं दर्शयितुम्. अन्यथा वह्नित्ववानिति प्रतीत्योरविशेषप्रसंगादिति भावः. नचायमेक इति प्रतीतेः समवायेनैवोपपत्तावेकत्ववह्नित्वादेः पर्याप्तिसंबन्धेना
नाभावात्तद्रूपेण साध्यतायां व्यभिचारित्वापत्तिव्याप्तिरिति वाच्यम्. एकत्वावच्छिन्ने वह्नित्वमेकत्वं च पर्याप्तं न तु द्वित्वमित्याद्यनुभवबलादेव तदभ्युपगमादिति
भावः. आसज्यवृत्तित्वतदन्यत्वान्यतररूपेणैव स्वसमानवृत्तिकत्वोक्त्यापि वह्नित्वादिवारणसंभवे स्वपर्याप्तीत्यादिपर्यन्तानुधावनस्य प्रयोजनमाह त्रित्वादि
कमिति. तथाच धूमवन्निष्ठाभावप्रतियोगितावच्छेदकस्य वह्निधूमघटत्रित्वस्य व्यासज्यवृत्तितया स्वसमानवृत्तिकस्य तस्यैवानतिरिक्तवृत्तित्वं तादृशसमा

न वृत्तिकृतोक्तौ वह्निधूमोभयवान् धूमादित्यादौ व्याप्तिलक्षणाव्याप्तिरिति भावः ॥ यद्यपि तार्णतार्णोभयत्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकसंबन्धः पर्याप्तिरेव न तु समवायस्तार्णमात्रसत्त्वेऽपि तार्णतार्णोभयं नास्तीति प्रतीतेः ॥ तथा च प्रतियोगितावच्छेदकतानिर्वाहकपर्याप्तिसंबन्धेन तादृशोभयत्वाभाववति प्रत्येकवह्नौ वह्नित्वादेः सत्त्वादेव वह्नित्वादेरवच्छेदकत्वसंभवात्समानवृत्तिकेति व्यर्थं तथापि प्रत्येकवह्नौ पर्याप्तिसंबन्धेनापि न तार्णतार्णोभयत्वादेरभावः किंतु घटादावेव ॥ अन्यथा तत्संबन्धेन प्रत्येकवृत्तिधर्मस्य तत्संबन्धेन समुदायावृत्तित्वनियमादुभयत्रैव प्रत्येकं द्वित्वाभावसत्त्वादेको न द्वाविति प्रतीत्यापत्तेः ॥ न चैवमयं द्वाविति प्रतीतिः प्रमा स्यादेकमात्रावपि द्वित्वस्य पर्याप्तिसंबन्धसत्त्वादिति वाच्यं मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यादिप्रतीतेः मूलावच्छेदेन समवाये न कपिसंयोगावगाहित्ववदस्याः प्रतीतेरपि इदंत्वावच्छेदकपर्याप्तिसंबन्धेनैव द्वित्वावगाहितया प्रमात्वायोगात् ॥ एकव्यक्तौ इदंत्वावच्छेदकपर्याप्तिसंबन्धेन द्वित्वरहितत्वात् ॥ अत एवायं न द्वाविति प्रतीतेः प्रमात्वमप्युपपद्यते ॥ इदंत्वावच्छेदकपर्याप्तिसंबन्धेन तयोर्द्वित्वस्याभावस्य [illegible] अवगाहित्वात् ॥ न चेदंत्वावच्छेदकपर्या[illegible]सिद्धिः ॥ एकत्ववह्नित्वादेस्तत्सौलभ्यात् ॥ एकत्ववह्नित्वादिकं चेदंत्वावच्छिन्ने पर्याप्तं न तु द्वित्वादिकमित्यस्य सर्वसंमतत्वात् ॥ न चैकस्य द्वित्वपर्याप्त्यधिकरणत्वे घटद्वयवृत्त्यन्येऽपि गृहादावत्र पटाविति प्रतिप्रतीतिः स्यादिति वाच्यम् ॥ न गुरुनिष्ठेऽपि घटे पटद्वयत्वावच्छिन्ननिरूपितवृत्तित्वविरहात् ॥ तादृशघटद्वयत्वावच्छेदेन तन्निरूपवृत्तित्वावगाहिन्याः प्रतीतेर्भ्रमत्वात् ॥ अत एव घटौ न गुरुनिष्ठाविति येव धीस्तत्र प्रमा तत्र स्थितस्यापि पटस्य घटद्वयत्वावच्छेदेन तन्निष्ठत्वासंभवात् ॥ घटपटयोर्न घटत्वमित्यादिप्रतीतेः प्रमात्वानुरोधेन व्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणतायाः प्रतियोगिमत्यपि तदभावस्य सर्वसंमतत्वात् ॥ न च

प्रो०क०२

घटत्वादौ घटपटोभयवृत्तित्वाभाववत्त्वज्ञानप्रतीतेर्विषयः। सामान्यघटयोर्न समवायेन घटत्वमित्यादौ सामान्यघटोभयसमवेतत्वाप्रसिद्ध्या तदभावस्याभा
नासंभवादिति संप्रदायविदः। परे तु न तन्निरिक्तवृत्तित्वमित्यत्र न तदभाववद्वृत्तित्वं तथा सति हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्वह्निधूमोभयत्वं
प्रत्येकं तदभाववान् वह्निधूमयोरिति तदुभयवृत्तित्वस्यैव वह्निधूमोभयत्वे सत्त्वात् तादृप्येण साध्यतायां वह्न्यादिहेतावतिव्याप्त्यापत्तेः। किन्तु तादृशप्रतियोगिताव
च्छेदकवति यावती व्यक्तिः सत्ता तद्भेदकूटवद्वृत्तित्वमेव तथा चासंभवः न च वह्निमान् धूमादित्यादावव्याप्तिरेव तादृशावच्छेदकीभूतं यत्तार्णतारोभयत्वादिकं
न तद्वतो निखिलवह्नेः प्रत्येकभेदकूटवति वह्नित्वस्यावृत्तेः। अतः स्वसमानवृत्तिक इति वर्णितं तत्तुच्छं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धूमत्वं तदभाव
वति पर्याप्तिसंबन्धेन वह्निधूमोभयत्वस्यावृत्तित्वादेव तादृप्येण साध्यतायां वह्निहेतावतिव्याप्त्यभावाद्भेदकूटनिवेशव्यर्थतापातादिति। केचित्तु तार्णतारोभ
यं नास्तीति प्रतीत्या प्रतियोगितावच्छेदकतानिर्वाहकसमवाय एव संबन्धो भासते न तु पर्याप्तिः। इदं द्वित्वपर्याप्त्याश्रयस्य सत्त्वे तदवच्छिन्नाभाववत्ता तादृशोभयत्वा
श्रयतार्णमात्रस्य सत्त्वेऽपि तादृशोभयत्वावच्छिन्नाभावो न विरुद्धः तदवच्छिन्नाधिकरणतयाऽसार्द्धं तस्य विरोधात्। एवं च यथाश्रुतमेव सम्यगित्याहुस्तत्तुच्छं
त्वं समवायेन तद्वतोऽधिकरणे तदवच्छिन्नानधिकरणत्वस्यासंभवात्। वस्तुतः समवायेन प्रमेयसाध्यकभाववत्त्वहेतावतिव्याप्तिवारणार्थमिदं प्रतियोगि
तावच्छेदकानतिरिक्तवृत्तित्वमित्यस्य हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यदन्यूनवृत्तित्वमर्थो बोध्यः। तत्र चान्यूनवृत्तित्वं न प्रतियोगितावच्छेदकता
घटकसंबन्धेन ग्राह्यम्। वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः। हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्वह्निधूमोभयत्वं न स्वतादृशोभयत्वं पर्याप्त

धिकरणं यद्वह्निधूमोभयं तन्मेदनिष्ठस्य पर्याप्तिसंबन्धावच्छिन्नाभावस्य प्रतियोगित्वं तन्न्यूनवृत्तित्वात्. किंतु स्वावच्छिन्नप्रतियोगित्वसंबन्धेनैव तथात्वं वा
च्यं तथा च वह्निनिष्ठयावत्त्वतार्णतारोभयत्वादेरपि स्वावच्छिन्नप्रतियोगित्वसंबन्धेन वह्न्यादिकं प्रत्यन्यूनवृत्तित्वाद्वह्निमान्धूमादित्यादौ वह्नित्वादेरवच्छे
दकत्ववारणाय स्वसमानवृत्तिकेनावच्छेदकं विशेष्यमिति युक्तमुत्पश्यामः. ननु प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमित्यत्र प्रतियोगितावच्छेदकत्वं य
दि प्रतियोगितानतिरिक्तवृत्तित्वरूपं तदा तार्णतारोभयत्वावच्छिन्नाभावप्रतियोगितामादाय वह्निमान्धूमादित्यादौ वह्नित्वमपि पारिभाषिकावच्छेदकं स्या
दत आह घटकमिति. प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे तद्रूपेण साध्यतायामव्याप्तिमपाकर्तुमाह एवं चेति. स्वसमानवृत्तिकत्वविवक्षणे चेत्यर्थः.
ननु धूमत्वमेकस्मिन्नेव पर्याप्तमित्यादिप्रतीतेः प्रत्येकवृत्तिधर्मावच्छिन्नाधिकरणताकत्वावगाहितयैवोपपत्तौ धूमत्वादेः पर्याप्तिसंबन्धेनाभाव इति धूमवान्वह्नेरि
त्यादावतिव्याप्तिः स्वपदेन धूमत्वग्रहीतुमशक्यत्वात्. एवं सत्तात्वस्य विशिष्टसत्तानतिरिक्तवृत्तितया सत्तासाध्यकजातिमत्त्वादित्यादावव्याप्तेरित्यत आह वस्तुत
स्त्विति. तदवच्छिन्नेति. हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूततत्तद्धर्मावच्छिन्नाभाववत्त्वसंबन्धेन यद्धर्मविशिष्टसामान्यं तदेव पारिभाषिकावच्छेदकमित्य
र्थः. अत्र न तादृश्यप्रतियोगिकाभावेत्युक्तौ तादृशधूमत्वाद्यप्रतियोगिकोभयाभावादिमादाय प्रमेयधूमत्वादिविशिष्टस्य संबद्धतयावच्छेदकत्वं न स्यात्. किंतु ग
गनत्वादेरेव तथात्वं स्यादत उक्तं तदवच्छिन्नेति. प्रतियोगित्वं साध्यतावच्छेदकसंबन्धेन ग्राह्यं तेनायं पटः एतत्वादित्यादौ समवायेन हेतुमन्निष्ठाभावप्रतियोगिता
वच्छेदकं यद्धूमत्वं संबन्धसामान्येन कालिकसंबन्धेन वा तदवच्छिन्नाभाववति गगनादौ घटत्वविशिष्टस्यासंबद्धत्वेपि नाव्याप्तिः. पर्वतादेरुत्पत्तिकालावच्छेदेन संयो

गसंबन्धावच्छिन्नधूमसामान्याभाववत्त्वात्तत्र धूमत्वविशिष्टस्य संबन्धत्वात्तत्संबद्धत्वविशिष्टसामान्यवद्गगनत्वादिकमुपादाय धूमवान्वह्नेरित्यादावतिव्याप्तिर
तः प्रतियोगिव्यधिकरणत्वेन तदवच्छिन्नाभावो विशेष्यः. प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नासंबन्धी तदवच्छिन्नाभाववान्ग्राह्य
इति तु पर्यवसितोऽर्थः. तेन संयोगसंबन्धावच्छिन्नधूमाभावस्यैव धूमवन्नवृत्तादेः समवायादिसंबन्धेन प्रतियोगिव्यधिकरणेऽपि धूमत्वस्य तनावच्छेदकत्वेह
निः. नवा द्रव्यं घटत्वादित्यादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्गुणभिन्नद्रव्यत्वं तत्प्रयोग्यनधिकरणे तदवच्छिन्नाभाववति गुणादौ द्रव्यत्वत्वविशिष्ट
स्यासत्त्वेऽप्यव्याप्तिः. वस्तुतो निरुक्तप्रतियोग्यनधिकरणत्वमेव तदवच्छिन्नाभाववतः साध्यतावच्छेदकसंबन्धेन वा यं न नु प्रतियोगितायां तत्संबच्छिन्नत्वं तु निया
मकसंबन्धेन साध्यतायां तत्संबन्धावच्छिन्नप्रतियोगिताप्रसिद्ध्याऽव्याप्तिप्रसंगादिति ध्येयम्. न च घटवान्महाकालत्वादित्यादौ तादृशप्रतियोगितावच्छेदकं गगनत्वं
तदवच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्याप्रसिद्ध्याऽव्याप्तिरिति वाच्यम्. अत्रापि साध्यतावच्छेदकसंबन्धसामानाधिकरण्येन तादृशधर्मावच्छिन्नप्रतियोगिकत्वप
दनुयोगिकत्वोभयाभाववत्तत्संबद्धत्वस्य विवक्षितत्वात्. तत्संबद्धत्वमपि साध्यतावच्छेदकसंबन्धेन बोध्यं तेन घटत्वाद्यवच्छिन्नाभाववति घटत्वगगनत्वादि
विशिष्टस्यापि यथाकथंचित्तादात्म्यादिना संबद्धतया न पारिभाषिकावच्छेदकताप्रसिद्धिनिबन्धनो व्याप्तिलक्षणसंभवः. धूमवन्निष्ठाभावप्रतियोगिताव
च्छेदकीभूततत्तद्वह्नित्वावच्छिन्नाभाववति वह्नित्वविशिष्टस्य तत्र तद्वृत्तिसंबद्धत्वाद्वह्निमान्धूमान्धूमादित्यादौ वह्नित्वमप्यवच्छेदकं स्यादतस्सामान्यपदम्.
ननु कालिकसंबन्धेन गगनत्वादिविशिष्टघटादेनस्यतादृशप्रतियोगितावच्छेदकीभूतगगनत्वाद्यवच्छिन्नाभाववति साध्यताघटकसंयोगसंबन्धेन संबद्धत्वात्सा

रिभाषिकावच्छेदकावच्छेदकाप्रसिद्ध्या व्याप्तिलक्षणासंभवः॰ ननु साध्यतावच्छेदकताघटकसंबंधेन स्ववैशिष्ट्याभिधानान्नैष दोषः॰ दण्डवतः कालिकसंबंधेन सा
ध्यतायां महाकालत्वादिनावव्याप्त्यापत्तेः॰ गगनत्वादेः पुरुषनिष्ठसंयोगसंबंधेनाहत्यापारिभाषिकावच्छेदकत्वाप्रसिद्धेः॰ नच हेतुमन्निष्ठाभावप्रतियोगि
तावच्छेदकत्वं यादृशसंबंधावच्छिन्नं तेनैव संबंधेन स्ववैशिष्ट्याभिधानाद्गुरुत्वगगनत्वादौ पारिभाषिकावच्छेदकत्वं सुलभमिति वाच्यं धूमत्वप्रकारकप्रमा
विशेष्यत्वान्वयैरित्यादौ साध्यतावच्छेदकमपेक्ष्य लघोर्धूमत्वस्यैव समवायेन हेतुमन्निष्ठसंयोगसंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकतया समवायेन
धूमत्वप्रकारकप्रमाविशेष्यत्वस्यादृशस्यातस्य पारिभाषिकावच्छेदकत्वाप्रसंगात्॰ न च साध्यत्वतादृशप्रतियोगित्वयोरन्यतरावच्छेदकताघटकसंबंधेनैव स्ववै
शिष्ट्यस्य विवक्षणान्नोक्ताव्याप्तिव्याप्त्योः प्रसंग इति वाच्यं तादात्म्येन धूमवतः संयोगेन साध्यतायां द्रव्यत्वादावतिव्याप्त्यापत्तेः॰ धूमापेक्षया लघुत्वेन हेतुम
न्निष्ठाभावप्रतियोगितावच्छेदकं धूमत्वं तदवच्छिन्नाभाववत्तिप्रतियोगितावच्छेदकताघटकसमवायसंबंधेन धूमविशिष्टस्य परमाणोः साध्यताघटकसंबंधेन सं
बद्धतया धूमत्वस्य पारिभाषिकावच्छेदकत्वविरहादिति चेदत्राहुः॰ यत्संबंधेन यद्धर्मविशिष्टसामान्यं निरुक्तधर्मावच्छिन्नाभाववत्ति साध्यतावच्छेदकसंबंधे
नासंबद्धं तत्तत्संबंधेन तत्तद्धर्मावच्छिन्नविशेष्यताभिन्नं यत्साध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकताकविशेष्यत्वं तदवच्छेदकसाध्यतावच्छेदकधर्म
वत्त्वस्य विवक्षितत्वान्नोक्तोपि दोषः॰ समवायेन वह्नित्वावच्छिन्नविशेष्यतायाः स्वरूपादिसंबंधेन गगनत्वाद्यवच्छिन्नविशेष्यताभिन्नत्वादेवावच्छेदकाप्रसिद्धिनिब
न्धनासंभवमुद्धरन्तीति॰ नन्वेवमपि विशिष्टसत्तावाञ्जातेरित्यादावतिव्याप्तिः॰ तादृशद्रव्यत्वाद्यभाववत्यपि गुणादौ विशिष्टसत्त्वस्यासंबद्धत्वात् स्वस्य तादृशध

आ.अ.
५

मीवच्छिन्नाभाववन्निष्ठसंबन्धितानवच्छेदकत्वविवक्षया कथंचित्तद्वारणेपि सत्तावान्भावत्वादित्यादावतिव्याप्तिः सत्तात्वाद्यवच्छिन्नाभाववत्सामान्यादेः साध्यता
घटकसमवायसंबन्धेन संबन्धित्वाप्रसिद्धेः सत्तात्वस्य निरुक्तावच्छेदकत्वाभावात् न च साध्यतावच्छेदकसंबन्धसामान्येन यद्वच्छिन्नाभाववदनुयोगिकत्वं यद्धर्मा
वच्छिन्नप्रतियोगिकत्वोभयाभाववत्त्वं विवक्षितमतो नोक्तदोषः तथा सति प्रमेयधूमवान्वह्नेरित्यादावतिव्याप्त्यापत्तेः धूमत्वघटिततादृशोभयत्वमपेक्ष्य
प्रमेयधूमत्वघटिततादृशोभयत्वस्य गुरुतया तदवच्छिन्नप्रतियोगिताकत्वाप्रसिद्धेरित्यस्वरसादाह स्वविशिष्टेति स्वं पारिभाषिकावच्छेदकत्वेनाभिमतं त
था च हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्विशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं स एव पारिभाषिकावच्छेदकस्तद्भिन्नत्वं साध्यताव
च्छेदकविशेषणमिति भावः अत्र स्वविशिष्टसंबन्धित्वं साध्यतावच्छेदकसंबन्धेन ग्राह्यं तेन प्रतियोगितावच्छेदकसामान्ये च यथाकथंचित्संबन्धेन यत्स्वविशिष्टसं
बन्धितन्निष्ठाभावप्रतियोगितावच्छेदकत्वेपि न पारिभाषिकावच्छेदकाप्रसिद्धिः अभावश्च प्रतियोगिव्यधिकरणो बोध्यः तेन घटत्वाद्यवच्छेदकमात्रस्यैव स्वविशि
ष्टसंबन्धिनिष्ठसंयोगसंबन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वात्पारिभाषिकावच्छेदकत्वाप्रसिद्ध्या वह्निमान्धूमादित्यादौ नाव्याप्तिः प्रतियोगितावच्छेद
कसंबन्धेन प्रतियोगितावच्छेदकविशिष्टप्रतियोगिसंबन्धित्वं स्वविशिष्टसंबन्धिनो विशेषणं देयमिति तु फलितार्थः तेनाभावमात्रस्यैव यथाकथंचित्कालिका
लिकादिसंबन्धेन प्रतियोगिनः संबन्धिनि वृत्तावपि न क्षतिः न वा हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतस्वविशिष्टसत्तावादेः सत्तात्वाद्यवच्छिन्नसंबन्धि
निष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वेपि सत्तावाञ्जातेरित्यादावव्याप्तिः तादृशाभावप्रतियोगित्वं तु साध्यतावच्छेदकसंबन्धेन ग्राह्यं तेन घ

त्वादेरपि स्वविशिष्टसंबन्धिनिष्ठसमवायाद्यवच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदकत्वेपि न वह्निमान्धूमादित्यादाववच्छेदकाप्रसिद्धिनिब
न्धनो दोषः वस्तुतः पूर्ववदिहापि साध्यतावच्छेदकसंबन्धेन निरुक्तप्रतियोग्यसंबन्धित्वमेव स्वविशिष्टसंबन्धिनो वाच्यं तेन वृत्त्यनियामकसंबन्धेन साध्यतायां ता
दृशसंबन्धावच्छिन्नप्रतियोगिताप्रसिद्धावपि नाव्याप्तिः न च तादृशस्य पारिभाषिकावच्छेदकत्वस्य प्रवेशे मूलोक्तप्रतियोगिव्यधिकरणपदस्य प्रतियोगिता
वच्छेदकावच्छिन्नप्रतियोग्यनधिकरणतार्थकत्वं विफलं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्य ऽव्यक्तत्वादेर्विशिष्टसत्ताद्यवच्छिन्नवन्निष्ठाभावप्र
तियोगितानवच्छेदकत्वादेव विशिष्टसत्ताभावा जातेरित्यादावतिव्याप्त्यभावात् न च संयोगेन घटघटाभावस्य तत्तत्समनियतघटविशिष्टत्वाद्यभावत्वान्न
त्प्रतियोगितावच्छेदकस्य वा अत्वस्य सर्वत्र सत्त्वात्प्रतियोगिव्यधिकरणाभावस्यैवाप्रसिद्धिः स्यात् यदि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यस्य प्र
वेशो न स्यादिति वाच्यं यत्प्रतियोगिताविशिष्टस्यानधिकरणं तत्प्रतियोगितावच्छेदकभिन्नधर्मो यद्विशिष्टसंबन्धिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियो
गितानवच्छेदकत्वम्पारिभाषिकावच्छेदकत्वमित्यस्यादोषत्वात् घटाभावस्य घटत्वविशिष्टवाजन्याभावस्वरूपत्वेपि न स्याद्घटत्वविशिष्टं यत्प्रतियोगित्वं तदाश्रय
व्यधिकरणत्वस्य तत्र सुलभत्वादिति न चात्रावच्छेदकभेदेपि प्रतियोगित्वैक्यं युक्तं घटपटाभावानामप्येकप्रतियोगितापत्तेरिति चेदत्र प्राञ्चः प्रतियोगिताश्र
यानधिकरणहेत्वधिकरणं तत्प्रतियोगितावच्छेदकत्वाद्यभिधाने वह्निमान्धूमादित्यत्राव्याप्तिः स्वरूपसंबन्धात्मिकायाः प्रतियोगितायाः प्रतिव्यक्ति भिन्नत्वा
द्वह्नित्वावच्छिन्नाभावीयमहानसीयवह्निनिष्ठं यत्प्रतियोगित्वं तदवच्छिन्नानधिकरणहेतुमत्पर्वतादिनिष्ठवह्नित्वसामान्याभावप्रतियोगितावच्छेदकीभूतव

आ·अ·
७

ह्नित्वादेः स्वविशिष्टसंबन्धिनिष्ठनिरुक्तप्रतियोग्यधिकरणाभावप्रतियोगितानवच्छेदकत्वात् · प्रतियोगितावच्छेदकावच्छिन्नवैय्यधिकरण्यप्रवेशे तु प्रतियोगितायाअवच्छेदकं यद्वह्नित्वादिकं तदवच्छिन्नानधिकरणत्वं न हेतुमतः पर्वतादेरित्यदोषप्रसङ्गः · परे तु प्रतियोगिभेदे येन धर्मावच्छिन्नप्रतियोगिता लाघवादेकैवेति मते वह्निमान्धूमादित्यादौ नाव्याप्तिः परं तु तद्रूपान्यत्वविशिष्टसत्तावान् रूपत्वादित्यादावतिव्याप्तिरेव स्याद्यदि प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणाभावो मौलो न स्यात् प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्य घटत्वादेः सर्वस्यैव तद्रूपान्यत्वविशिष्टसत्तात्वावच्छिन्नसंबन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वेन तादृशसत्तात्वस्य पारिभाषिकानवच्छेदकत्वादिति प्राहुः · इदन्त्ववधातव्यमत्रापि लक्षणे हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्यत्संबन्धेन यादृशयादृशधर्मविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं तत्तत्संबन्धेन तादृशतादृशधर्मावच्छिन्नविशेष्यतान्यसाध्यतावच्छेदकताघटकसंबन्धावच्छिन्नविशेष्यतावच्छेदकत्वमेव साध्यतावच्छेदके दृष्टव्यं नातः प्रागुक्तदोषः पारणाय वह्न्यंशेन नामसत्तानसीयवह्नित्वादेः पारिभाषिकावच्छेदकत्वं तथा च तदन्यत्वस्य वह्नित्वादावसत्त्वेऽपि वह्निमान्धूमादित्यादौ नाव्याप्तिः · विशिष्टवह्नित्वाभिन्नस्यापि वह्नित्वस्य विशिष्टवह्नित्वावच्छिन्नविशेष्यतान्यविशेष्यतानवच्छेदकत्वानपायादिति · ननु घटवान्महाकालत्वादित्यादावव्याप्तिः · गगनत्वादिविशिष्टस्य कालिकसंबन्धेन संबन्धप्रसिद्ध्या पारिभाषिकावच्छेदकासंभवात् · न च साध्यतावच्छेदकसंबन्धसामान्येन तादृशधर्मावच्छिन्नाभाववदनुयोगित्वतद्धर्मिविशिष्टप्रतियोगिकत्वोभयाभाववत्त्वं विवक्षितमतो गगनत्वादेः सुलभमिति वाच्यम् · तथा सति प्रमेयधूमवान्वह्नेरित्यादावतिव्याप्त्यापत्तेरित्युक्तत्वात् · धूमत्वविशिष्टप्रतियोगित्वघटितताद्दशो

धूमत्वापेक्षया गुरुत्वेन धूमत्वविशिष्टप्रतियोगित्वघटिततादृशाभावत्वस्य गुरुत्वेन तदवच्छिन्नप्रतियोगिकत्वाप्रसिद्धेरिति चेन्न वदन्ति· स्वविशिष्टप्रतियोगिकत्वानि विशेष्योपादाय साध्यतावच्छेदकसंबन्धसामान्ये हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकीभूततत्तद्धर्मावच्छिन्नाभाववदनुयोगिकत्वस्य धूमे विशिष्टप्रतियोगिकत्वस्य कोनांशुत्वेकस्य च द्वयोर्व्यतिरेकः स धर्मः पारिभाषिकावच्छेदकः· प्रमेयधूमत्वावच्छिन्नप्रतियोगिकत्वघटितोभयत्वस्य गुरुतया प्रतियोगितानवच्छेदकतेन तत्तद्रूपप्रतियोगिकत्वघटितोभयाभावकूटमादायैवानतिव्याप्तिः· कालो घटवान्महाकालत्वादित्यादौ च गगनत्वमेव तादृशावच्छेदकत्वमादाय लक्षणसमन्वयः· वह्निमिति तादात्म्यसाध्यताघटकान्तरसंबन्धेन यः स्वविशिष्टसंबन्धी तन्निष्ठो यः तदन्तरसंबन्धेन प्रतियोगिव्यधिकरणाभाववत्प्रतियोगितानवच्छेदकस्तत्कत्वमुक्तलक्षणार्थः· तादृशान्यतरतादात्म्यसंबन्धेन गगनत्वविशिष्टसंबन्धिन्याकाशे वर्त्तमानोऽपि गगनाभावो नैतादृशान्यतरसंबन्धे प्रतियोगिव्यधिकरणस्तस्य तादात्म्येन प्रतियोगिसमानाधिकरणत्वात्· किंतु घटघभाव एव तथेति तत्प्रतियोगितानवच्छेदकमेव हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतं गगनत्वमिति तदादायैव कालो घटवान्महाकालत्वादित्यादौ संगतिः· न चैवं धूमगगनाभावान्यतरस्य संयोगेन साध्यत्वे वह्न्यादावतिव्याप्तिः· तादृशान्यतरत्वापेक्षया लघुत्वेन धूमत्वस्यैव हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वात् तस्य च संयोगतादात्म्यान्यतरसंबन्धेन यस्तदन्यतरत्वविशिष्टसंबन्धि गगनाभाववत्तन्निष्ठस्य तादात्म्यसंयोगान्यतरसंबन्धेन प्रतियोगिव्यधिकरणस्य धूमाभावस्य प्रतियोगितावच्छेदकतया धूमगगनाभावान्यतरत्वस्य पारिभाषिकावच्छेदकत्वविरहादिति वाच्यम्· धूमगगनाभावान्यतरत्वस्याप्यखण्डस्य धूमत्वतुल्यतया तस्यैव हेतुमन्निष्ठाभा

वप्रतियोगितावच्छेदकस्य स्वविशिष्टसंबन्धिनिष्ठतादृशसंबन्धावच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकतया पारिभाषिकावच्छेदकत्वेनाति
व्याप्तिविरहादित्याहुस्तन्मतं रूपवान् घटत्वादित्यादावव्याप्तिप्रसंगात् हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपत्वद्रव्यान्यत्वं तस्य रूपत्वविशि
ष्टसंबन्धिनिष्ठतादृशसंबन्धावच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वेन रूपत्वस्यापि पारिभाषिकावच्छेदकत्वात् तथाहि तादात्म्यस
मवायान्यतरसंबन्धेन यद्रूपत्वविशिष्टस्य स्वसंबन्धि रूपं पृथिव्यादिकं वा तत्र तादात्म्यसमवायान्यतरसंबन्धेन प्रतियोगिव्यधिकरणो न रूपत्वद्रव्यान्यतर
त्वावच्छिन्नाभावः समवायेन रूपे रूपत्वाख्यप्रतियोगिनस्तादात्म्येन च पृथिव्यादौ द्रव्यात्मकप्रतियोगिनः संबद्धत्वात् किंतु रूपत्वविशिष्टस्य तथाविध
संबन्धिनिष्ठघटाद्यभाव एव तादृशप्रतियोगिव्यधिकरणो रूपत्वद्रव्यान्यतरत्वस्य तत्प्रतियोगितानवच्छेदकत्वं ध्रौव्यात् न च हेतुसमानाधिकरणाभाव
स्यापि तादृशान्यतरसंबन्धेन प्रतियोगिव्यधिकरणस्य वक्तव्यत्वान्नैष दोषः तथा सति समवायेन घटत्वस्य प्रमेयस्य वा साध्यत्वे तादात्म्येन हेतौ घटत्वे प्रमे
येवातिव्याप्तिप्रसंगादिति दिक् अत एवेति वस्तुतस्त्वित्यादिकस्यास्मादृतत्वादेवेत्यर्थः यथाश्रुतस्यावच्छेदकानतिरिक्तवृत्तित्वस्यादरे तु सत्तावाञ्जा
तेरित्यादावव्याप्तिः स्यादेवेति भावः जातिमन्निष्ठाभावीयप्रतियोगितायास्सत्तात्वान्यूनवृत्तित्वविशिष्टसत्तात्वावच्छेद्यत्वसमवायसंबन्धावच्छेद्यत्वोभ
यसत्तात्वावच्छेद्यताघटितलक्षणस्यापि प्रागुक्तस्य सत्तावाञ्जातेरित्यत्राव्याप्तिरतस्तदपि परिष्कृतेति एवमिति स्वसाध्यतावच्छेदकम् अत्र स्ववैशिष्ट्यं साध्य
तावच्छेदकताघटकसंबन्धेन बोध्यं तेन धूमत्वादीनां कालिकादिसंबन्धेन धूमत्वादिविशिष्टस्य घटादेः संयोगिनि वर्त्तमानस्याभावस्य प्रतियोगितावच्छेदक

तेपि धूमवान्वह्नेरित्यादेर्नातिव्याप्तिः॰ स्वविशिष्टसंबन्धित्वं तु साध्यतावच्छेदकसंबन्धेन ग्राह्यं तेन धूमत्वावच्छिन्नप्रतियोगितायां कालिकादिसंबन्धेन धूमत्वादिविशिष्टस्य संबन्धितन्निष्ठाभावप्रतियोगितानवच्छेदकतावच्छेदकत्वविरहेऽपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः॰ न च सामान्यतो धूमसंबन्धिनि संयोगेन सर्वस्यैवाभावसत्त्वात् धूमवन्निष्ठसंयोगसंबन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वाप्रसिद्ध्या कथमतिव्याप्तिरिति वाच्यं गोत्वत्वघटाभावत्वादेरेव प्रसिद्धेः॰ संयोगसंबन्धावच्छिन्नगोत्वाद्यभावप्रतियोगितायाः लाघवेन गवेतरासमवेतत्वाभाववत्त्वादिभिरेवावच्छेदात्॰ न चैवमपि तदवच्छेदकत्वाप्रसिद्ध्यैव नातिव्याप्तिः॰ गोत्वादिभेदप्रतियोगितायां तत्त्वालम्भात्॰ न हि सापि गवेतरासमवेतत्वमात्रावच्छिन्ना गोरूपादौ गोत्वभेदासत्त्वप्रसंगात्॰ वह्निश्च गोत्वत्वाद्यवच्छेदकत्वसंयोगसंबन्धावच्छेदकत्वोभयत्वावच्छिन्नाभावाप्रसिद्ध्यैव नातिव्याप्तिः॰ गवेतरासमवेतत्वाद्यवच्छेदकत्वमादाय घटिततादृशोभयत्वस्यैव लघुत्वेन प्रतियोगितावच्छेदकत्वादिति विभाव्यन्ते न तादृकरीत्या वह्निमान्धूमादित्यादावव्याप्तिवारणाय धर्मिवत्साध्यतावच्छेदकसंबन्धेन स्वविशिष्टस्य संबन्धित्वं निवेश्यमित्थं च वह्नित्वप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्य एव साध्यवन्निष्ठाभावीयसंयोगसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतगोत्वत्वाद्यवच्छेदकत्वसंयोगसंबन्धावच्छेदकत्वोभयत्वावच्छिन्नाभावसत्त्वात् धूमवान्वह्नेरित्यत्रैवातिव्याप्तिः॰ उक्तनयोक्तक्रमेण तादृशोभयत्वावच्छिन्नाभावाप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्तिर्वा स्यादतः प्रतियोग्यसंबन्धित्वेनापि स्वविशिष्टसंबन्धी विशेषणीयस्तत्त्वं च प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नासंबन्धित्वं तेन संबन्धसामान्येन यः प्रतियोगितावच्छेदकावच्छिन्नासंबन्धी वह्नित्व

गा॰ ३५॰
६

विशिष्टसंबन्धिपर्वतादिवृत्तिनिष्ठस्य प्रलयप्रवेत्यन्तकर्मात्यन्ताभावस्य प्रतियोगितानवच्छेदकं यद्घटत्वादिकं तदवच्छेदकत्वसंयोगसंबन्धावच्छे[illegible]
साधनवन्निष्ठाभावप्रतियोगितायां सत्त्वेपि वह्निमान्धूमादित्यादेनाव्याप्तिः नवा प्रतियोग्यसंबन्धिसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदक[illegible]
प२ ष्टसत्तात्वावच्छेदकत्वसमवायसंबन्धावच्छेदकत्वयोः साधनवन्निष्ठाभावप्रतियोगितायां सत्त्वेपि सत्तावाञ्जातेरित्यादावप्रसंगः प्रतियोगितावच्छे[illegible]
बन्धेन प्रतियोग्यसंबन्धी यः साध्यतावच्छेदकावच्छिन्नसंबन्धी तन्निष्ठाभावप्रतियोगितानवच्छेदकं न घटाभावत्वगोत्वत्वादिकं तस्यापि साध्यवन्नि[illegible]
स्याभेदादि प्रतियोगितावच्छेदकत्वात् किं तु लप्रसमनियतं प्रमेयधूमत्वादिकमेव तथा न था च न स्ववच्छेदकताप्रसिद्ध्या वह्निमान्धूमादित्यादाव[illegible]
प्रिवैयर्थः साध्यवन्निष्ठाभावप्रतियोगित्वमपि साध्यतावच्छेदकसंबन्धावच्छिन्नं ग्राह्यं तेन न संयोगसंबन्धावच्छिन्नप्रतियोगितानवच्छेद[illegible]
वच्छेदकत्वप्रसिद्धिवलक्षणसंभवः वस्तुतः [illegible] तत्रापि साध्यतावच्छेदकसंबन्धेन निरुक्तप्रतियोग्यसंबन्धित्वमेव साध्यतावच्छे[illegible]
च्छिन्नोक्तमेव नतु प्रतियोगितानां तत्संबन्धेन ग्राह्या नन्वेवमपि साध्यतावच्छेदकसंबन्धेन प्रतियोग्यसंबन्धिसाध्यतावच्छेदकावच्छि[illegible]
भावाप्रसिद्ध्या विभुत्वविशिष्टघटत्वान्महाकालत्वादित्यादावव्याप्तिः महाकालान्यत्वविशिष्टघटत्वावच्छिन्नस्यैवाभावस्यै[illegible]
एकाले प्रसिद्धानत्राव्याप्तिवारणेपि न[illegible]संयोगेन वृत्तेः साध्यतायां सद्धेतावव्याप्तिस्तत्संबन्धेन यत्प्रतियोगिसंबन्धितदन्यत्वस्य न[illegible]
त॰ महाकालनिरूपितविशेषणतया घटादेः साध्यतायां महाकालत्वादिहेतावुक्तक्रमेण व्याप्तिवारणसंभवाच्च तेन संबन्धेन यः प्रति[illegible]

तद्व्यत्वस्यपतावालेविरसात्. नचसाध्यतावच्छेदकसंबन्धसामान्ये साध्यतावच्छेदकावच्छिन्नसंबन्धित्वं यत्किंचिद्व्यक्त्यनुयोगिकत्वयाद्याप्रतियोगि
तावच्छेदकावच्छिन्नप्रतियोगिकत्वोभयाभावस्याप्रतियोगितानवच्छेदकताकघटत्वं निवेश्यमतो गगनाभाववत्तादैवप्रसिद्धेरितिवाच्यम्. स्वरू
पसंबन्धेन गगनादेरपि तत्त्वपक्षे एव प्रतियोगिताधर्मिकोभयाभावविरहस्यापत्तेर्गगनाभावमादाय प्रसिद्धिसंभवात्. कालिकविशेषणतायां गग
नत्वावच्छिन्नप्रतियोगिकत्वसाध्यवन्महाकालानुयोगिकत्वयोः सत्त्वादिति चेत् तदस्वरसेनैव प्रतियोगित्वयोरित्यादिना प्रतियोगिवैयधिकरण्यप्र
पेक्षलक्षगगनादेरवश्यतत्त्वेऽपि. परे तु निरुक्तप्रतियोग्यसंबन्धी प्रकृतसाध्यवन्निष्ठाभावप्रतियोगितायां यद्रूपावच्छिन्नत्वसाध्यतावच्छेदकसंबन्धा
वच्छिन्नत्वोभयाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणप्रकृतहेतुमन्निष्ठाभावप्रतियोगितासामान्ये तादृशोभयाभाववत्त्वं
विवक्षितमाहुरिव समवायाद्यवच्छिन्नघटाभावप्रतियोगितायां च कालिकसंबन्धावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभाववत्त्वं तद्वत्प्रतियोग्य
नधिकरणमहाकालनिष्ठाभावप्रतियोगितासामान्येऽपीति घटवान्महाकालत्वादित्यादौ नाव्याप्तिः. यद्यपीति वीसादृगन्निहेतुकप्रतियोग्यधि
करणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये गगनत्वाद्यवच्छिन्नत्वसंयोगसंबन्धावच्छिन्नत्वोभयाभाववत्त्वेऽपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः. धूमत्वा
वच्छिन्नत्वसंयोगसंबन्धावच्छिन्नत्वोभयाभावस्यापि तादृशत्वेन तस्यैव प्रतियोग्यनधिकरणवह्निमन्निष्ठाभावप्रतियोगितासामान्ये विरहात् संयोगसंब
न्धावच्छिन्नधूमाभावप्रतियोगितायां तदसत्त्वादित्याहुः. ननु स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकमित्यत्रानवच्छेदकत्वं ननाद्रूप्येव

च्छेदकप्रतियोगिकभेदस्यानंतधर्म्मानामस्यैव तादृशापत्तिश्चिदवच्छेदकभिन्नत्वेन व्याप्तिलक्षणासंभवप्रसंगात्. किंतु तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकोभेदः. तथा चावच्छेदकत्वगर्भयानिरुक्तेः प्रमेयधूमवान्वह्नेरित्यादावतिव्याप्तिः. अवच्छेदकत्वगर्भयास्तु प्रमेयवह्निमान्धूमादित्यादावव्याप्तिः. प्रमेयवह्नित्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्व इति प्रतियोगितायालाघवेन वह्निमन्निष्ठाभावप्रतियोगितावच्छेदकत्वे नैवावच्छेदकत्वादत आह प्रतियोगिताश्चेति. तादृशावच्छेदकनिष्ठप्रतियोगिताव्यक्तयो विशिष्य तत्तदवच्छेदकत्वावच्छिन्नत्वेन प्रवेशनीयाः. नन्वनुगततादृशावच्छेदकत्वावच्छिन्नत्वेन यत्किंचिद्धर्मस्यानवच्छेदकत्वे व्याप्तेर्दुर्वचत्वं स्यादित्यर्थः. स्वविशिष्टसंबन्धिनिष्ठाभावीयप्रतियोगिताव्यक्तिविशेष्योपादेयनेन तत्प्रतियोगितावच्छेदकत्वावच्छिन्नभेदकूटवत्त्वं निवेशनीयमिति तद्व्याख्यानं तत्तत्प्रतियोगिताविशेषितावच्छेदकत्वमर्कीमांसीवकृतेनदवच्छेदकत्वव्यक्तेरपेक्ष्यगुरुत्वेन तत्तत्प्रतियोगितानिरूपितावच्छेदकत्वावच्छिन्नभेदानामप्यप्रसिद्ध्या दुर्वचतादवस्थ्यात्. यदि च समनियतनानाधर्मावच्छिन्नप्रतियोगित्वस्य भेदे मानाभावः. तदा तत्तत्प्रतियोगितावच्छेदकतावच्छिन्नभेदकूटस्य प्रवेशेऽपि न क्षतिः. तत्तत्प्रतियोगितावच्छेदकत्वस्य तत्तदवच्छेदकत्वसमनैयत्याभावेन गुरुत्वस्याकिंचित्करत्वादिति ध्येयम्. संबन्धभेदमिति. इदं च प्रागेव निरुक्तिव्याख्यायां प्रपञ्चितम्. ननु प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितायाः संयोगत्वावच्छेद्यत्वेऽपि संयोगत्वस्य स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वाभावात् संयोगिसत्वादित्यत्राव्याप्तिरत आह अभावश्चेति. निरुक्तित्रयेपीति शेषः. तथा च प्रतियोग्यनधिकरणस्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छे

दकत्वं संयोगत्वेप्यक्षतमिति हेतुमन्निष्ठाभावप्रतियोगितायास्तदवच्छेद्यत्वादेव नातिव्याप्तिरिति भावः॥ नन्वेवं गोमान्महाकालत्वादित्यत्राव्याप्तिः गोत्ववि
शिष्टसंबन्धिनिष्ठाभावमात्रस्यैव सत्ताघटादेः कालिकसंबन्धेन महाकाले प्रतियोगिसमानाधिकरणतया स्वविशिष्टसंबन्धिनिष्ठप्रतियोग्यसमा
नाधिकरणाभावप्रतियोगितावच्छेदकत्वाप्रसिद्धेरत आह कालिकेति। तथा च स्वावच्छिन्नानधिकरणसाध्यवत्कृत्स्नकालनिष्ठाभावप्रतियोगितावच्छे
दकतयैव तत्तद्व्यक्तित्वे निरुक्तावच्छेदकत्वसुलभमिति भावः॥ ननु हेतुमन्निष्ठाभावीयसंयोगसंबन्धावच्छिन्नप्रतियोगितावच्छेदकमात्रस्यैव घटत्वा
दिविशिष्टसंबन्धिनिष्ठाभावीयसंयोगसंबन्धावच्छिन्नप्रतियोगितावच्छेदकत्वान्यादिभाषिकाप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिवारकं द्वितीयनिरुक्ता
भावे प्रतियोगिवैयधिकरण्यनिवेशप्रतामवच्छेद्यताघटिततृतीयनिरुक्तावपि हेतुमन्निष्ठाभावप्रतियोगितासामान्ये धूमत्वविशिष्टसंबन्धिनिष्ठाभावीयसं
योगसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतगोत्वत्वाद्यवच्छेद्यत्वाद्यवच्छेद्यत्वाभावात् धूमवान्वह्नेरित्यादावतिव्याप्तिवारणार्थमभावे तद्विशेषणदेयतापृथ
मनिरुक्तौ तु प्रतियोगिवैयधिकरण्यमभावविशेषणं किमर्थमित्याशङ्क्य तेन चेति। वाच्यमिति परेणान्वयः॥ संयोगी द्रव्यत्वादित्यादावव्याप्तिवारणमेतस्य फ
लमन्यथोपपादयति संगत्वाद्यवच्छिन्नेति। वृत्तेरिति अव्याप्त्यनवकाशादित्यग्रेऽन्वयः॥ संयोगी सत्त्वादित्यादावतिव्याप्तिवारणमिदमीयस्य फलमन्यथा
कुरुतेरगादीति। द्रव्यत्वं द्रव्यान्यासमवेतत्वविशिष्टसकलद्रव्यसमवेतत्वं तत्तु न समवायेनाभावस्य प्रतियोगितावच्छेदकं लाघवेन द्रव्यासमवेतत्व
स्यैव तथात्वादित्यतस्तथैवाह द्रव्यमात्रेति। द्रव्यान्यासमवेतत्वेत्यर्थः॥ अवृत्तेरिति अतिव्याप्त्यनवकाशादिति योजना। धूमवानिति। द्रव्याणामव्याप्यवृ

त्तिनया धूमत्वाद्यवच्छिन्नाभाववत्यपि धूमत्वादिविशिष्टस्य संबद्धत्वादिति भावः. ननु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्योगोलकासंयुक्तत्वं
धूमत्वविशिष्टस्य तद्वह्निन्याभाववद्वृत्तित्वादेव नातिव्याप्तिरत आह नहीति. इत्थं चावच्छेदकतानिरूपितप्रतियोगिवैयधिकरण्यप्रवेशे मूलोक्त
हेतुसमानाधिकरणाभावेन दत्वस्य निवेशमन्यथा हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकीभूतसंयोगत्वाद्यवच्छिन्नाभावस्य प्रतियोगिवैयधिक
रण्याद्वह्निनस्याधिकरणे गुणादौ संयोगत्वादिविशिष्टस्यावृत्तेः संयोगी द्रव्यत्वादित्यत्राव्याप्तिरिति भावः. लाघवमभिप्रेत्याह प्रतियोगित्वयोरिति. मो
लेऽस्मीयप्रतियोगित्वयोरित्यर्थः. तथा च हेतुमन्निष्ठाभावीययत्संबन्धावच्छिन्नप्रतियोगितावच्छेदकीभूतयत्किंचिद्धर्मावच्छिन्नतत्तत्संबन्धाव
च्छिन्नप्रतियोगिताकाभाववदसंबद्धत्वविशिष्टसामान्यकत्वं प्रथमस्य द्वितीयस्य तु स्वविशिष्टसंबन्धिनिष्ठाभावीययत्संबन्धावच्छिन्नप्रतियोगितान
वच्छेदकीभूतहेतुसमानाधिकरणाभावीयतत्तत्संबन्धावच्छिन्नप्रतियोगितावच्छेदकधर्मकत्वमर्थः. तत्संबन्धावच्छिन्नत्वपर्यवसन्नस्यैकसंबन्धावच्छि
न्नत्वस्याननुगमाद्विशेषणताविशेषावच्छिन्नत्वप्रवेशावश्यकत्वेन संबन्धान्तरप्रवेशगौरवात्. तदपेक्षया लाघवादाह विशेषणतेति. अभावीयविशे
षणताया लक्षणघटकत्वमभिप्रेत्याह तदन्यत्वप्रकारकेत्यादि. साध्यवत्त्वस्यावश्योपस्थिततया तद्धर्मोपस्थितिलाघवात्तमादायैवातिव्याप्ति
वारणं तु घटमित्यादिनापेनाह साध्यवत्त्वेत्यादि. नन्वेवं हेतुमन्निष्ठाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितासामान्ये यद्धर्मविशिष्टसंबन्धिनिष्ठा
भावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकीभूतधर्मानवच्छिन्नत्वसाध्यतावच्छेदकसंबन्धावच्छिन्नत्वोभयाभावः साध्यतावच्छेदकसंबन्धेन

तद्धर्मावच्छिन्नो हेतुव्यापक इत्युक्तक्रमेण तृतीयस्यार्थः फलितः तथा च विशेषणताविशेषावच्छिन्नप्रतियोगितासामान्ये एव साध्यतावच्छेदकीभूतसंयोग
संबन्धावच्छिन्नत्वाभावेन तादृशोभयाभावसत्त्वाद्धूमवान्वह्नेरित्यत्रातिव्याप्तिः नच हेतुमन्निष्ठाभावीयप्रतियोगितायां विशेषणताविशेषावच्छिन्नत्वं न दे
यमिति वाच्यं वह्निमत्त्वप्रकारकप्रमाविशेष्यतादीनां संयोगादिसंबन्धेनाभावस्य हेतुमति सत्त्वेन वह्निमान्धूमादित्यादौ सर्वत्राव्याप्तिप्रसङ्गादित्यतः साध्यता
वच्छेदकसंबन्धावच्छिन्नत्वांशपरित्यागेन तृतीयस्यार्थं निष्कृष्य दर्शयति तथा चेत्यादिना पद्मेति यत्पदं साध्यतावच्छेदकपरम् तत्संबन्धावच्छिन्ने
ति विशेषणताविशेषसंबन्धावच्छिन्ने इत्यर्थः अत्र प्रतिपदव्यावृत्तिर्निरुक्तदिशा बोध्या नच निरुक्तप्रतियोगितासामान्ये यद्धर्मविशिष्टसंबन्धिनिष्ठा
भावीयविशेषणताविशेषावच्छिन्नप्रतियोगितावच्छेदकावच्छेद्यत्वं साधने तद्धर्मावच्छिन्नसामानाधिकरण्यमेव लाघवाद्ग्राह्यमुचितमिति वाच्यं सामान्यप
दस्य व्यापकतावधित्वेन निरुक्तप्रतियोगितात्वव्यापकतावच्छेदकयद्धर्मावच्छिन्नं वह्निनिष्ठविशेषणताविशेषावच्छिन्नाभावप्रतियोगितावच्छेदकावच्छे
द्यतात्वमित्यर्थपर्यवसानेन प्रमेयधूमवान्वह्नेरित्यादावतिव्याप्त्यापत्तेः प्रमेयधूमवन्निष्ठाभावप्रतियोगितावच्छेदकावच्छेद्यतात्वस्य तद्धर्मतया वह्नि
मन्निष्ठाभावप्रतियोगितात्ववन्निष्ठाभावप्रतियोगितानवच्छेदकत्वेन तादृशप्रतियोगितात्वव्यापकतावच्छेदकत्वात् अस्माकं तु प्रमेयधूमत्वावच्छिन्न
वन्निष्ठाभावप्रतियोगितानवच्छेदकं यदयःपिण्डभेदत्वं तदवच्छेद्यत्वाभावस्यैव साधनवन्निष्ठाभावप्रतियोगितात्वव्यापकत्वाभावेनातिव्याप्त्यसंभवात् एते
न साधनसमानाधिकरणाभावसामान्ये यद्धर्मावच्छिन्नसमानाधिकरणाभावत्वं तादृशप्रतियोगितासामान्ये वा यद्धर्मावच्छिन्नसमानाधिकरणाभावप्र

नियोगितात्वं साधनेतद्धर्मावच्छिन्नसामानाधिकरण्यमेव व्याप्तिर्लाघवादित्यपि प्रत्युक्तमिति ध्येयम्. साध्यसाधनभेदेन व्याप्तेर्भिन्नत्वेन प्रमेयवत्त्वा
दिना गुरुधर्मेण साध्यतास्थले एव साध्यतावच्छेदकावच्छेदेन व्याप्तिग्रहोक्तक्रमेण व्याप्तिर्वाच्या वह्निमान्धूमादित्यादौ तु लघुधर्मेण साध्यतास्थले हेतुमन्नि
ष्ठाभावप्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावप्रतियोगितैव सा वक्तव्या शाब्दे स्यस्याकिंचित्करत्वादित्याहुः यत्तु सद्धेतुविशेषणमिति.
नत्वमनतिप्रयोज्यस्यातिगौरवेति. यादृशप्रतीत्या गुरोरवच्छेदकत्वसिद्धिस्तादृशप्रतीतौ गौरवज्ञानस्य यदि विरोधित्वं स्यात्तदा प्रमाणाभावात् गुरोरवच्छेदकत्वं
नेध न स्यान्न चैवमस्तीति भावः. यद्यपि प्रतिबन्धकत्वेपि तत्प्रतिसन्धानकाले समनन्तरं कम्बुग्रीवादिमान्नास्तीति प्रतीतेरवच्छेदकत्वं सेत्स्यतीति तत्प्रतिपादनमफ
लं तथापि तस्य प्रतिबन्धकत्वे विरोधिविषयकत्वेनैव ज्ञानस्य प्रतिबन्धकतया गुरुत्वस्यावच्छेदकत्वविरोधित्वे सिद्धे न तत्प्रतिसन्धानदशायां तत्प्रतीते
रपि भ्रमत्वसिद्धेनावच्छेदकत्वसिद्धिरिति न तथा प्रतिपादितमिति ध्येयम्. यद्यपि गौरवज्ञानमात्रं नावच्छेदकत्वधीप्रतिबन्धकं विशिष्टसत्तात्वस्य द्रव्यत
त्वापेक्षया गुरुत्वे गुरोरपि विशिष्टसत्तानास्तीति प्रतीत्या तदवच्छेदकत्वग्रहस्य प्राचैरपि स्वीकारात्. न च तद्धर्मसमानाधिकरणधर्मधर्मिकस्वापेक्षया
लघुतरगुरुतरधर्मस्यावच्छेदकत्वधीप्रतिबन्धकः. नीलधूमत्वसमानाधिकरणधूमत्वेन स्वापेक्षया लघुत्वग्रहेपि नीलधूमो नास्तीति प्रतीत्या नीलधूम
त्वस्यावच्छेदकत्वावगाहनस्य सर्वसंमतत्वात्. नापि तद्धर्मसमनियतधर्मधर्मिकतद्धर्मापेक्षया लघुत्वग्रहस्तद्धर्मस्यावच्छेदकत्वधीप्रतिबन्धक इति
सांप्रतं घटज्ञानत्वापेक्षया लघुनोपि ज्ञानत्वस्य घटज्ञानत्वसमनियतत्वाभावात् गुरुत्वेऽपि घटज्ञानत्वस्य संयोगसंबन्धावच्छिन्नघटज्ञानाभावस्य प्रतियो

+अंशे कंबुग्रीवादिमान्नास्तीति निश्चयोक्तधर्मिनिश्चयविषयकाविशिष्टधीविरोधित्वानुपपत्तेः कंबुग्रीवादिमत्तावच्छिन्नस्य विशिष्टबुद्धौ तदवच्छिन्नप्रतियोगिताकत्वेनाभावनिश्चयस्यापि विरो
धित्वादिति ध्येयम् +

गितावच्छेदकत्वापत्तेस्तथापि संसर्गमर्यादया प्रतियोगितावच्छेदकत्वग्रहं विनैतादृश्येन कंबुग्रीवादिमत्त्वेन तत्तद्रूपधर्मैः प्रतिबन्धकमिति न कुत्रापि ते
प्रसंसर्गमर्यादयावच्छेदकत्वग्रह इति प्राचां तात्पर्यम्। वस्तुतः संसर्गविधया कंबुग्रीवाद्यवच्छेद्यप्रतियोगिताकत्वावगाहिन्यां प्रति समानविशेष्यत
प्रत्यासत्त्या कंबुग्रीवादिमत्त्वापेक्षया लघुधर्मावच्छेद्यप्रतियोगिताकत्वज्ञानत्वेनैव प्रतिबन्धकत्वं प्राचामभिप्रेतं तथा च जलादौ निर्वह्नित्वस्याग्रहदशा
यां वह्निमत्त्वधर्मस्येवोक्ककमेरुगौरवस्याग्रहदशायामपि कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकत्वेनापि तादृशग्रहे जायत एव। अन्यथा तदानी
मत्त्वस्य कंबुग्रीवादिमान्नास्तीति प्रत्ययस्य बाधनिश्चयविधया कंबुग्रीवादिमत्त्वावच्छिन्नस्य विशिष्टबुद्धौ प्रतिबन्धकतानुपपत्तेः। कंबुग्रीवादिमत्प्र
तियोगिताकाभाववत्त्वेन निश्चयस्य न प्रतिबन्धकत्वादिति ध्येयम्+ प्रतीतेर्वैलक्षण्यमवच्छेदकत्वावगाहित्वं न गृह्णातीति। तथा च स्वरूपसंबन्धरूपावच्छेदक
त्वघटितं मल्लोक यथाश्रुतमेव व्याप्तिलक्षणं सम्यक् प्रमेयधर्मत्वादेरपि तादृशावच्छेदकत्वेन न व्यभिचारिस्पर्शि व्याप्तिनिरुक्तं पारिभाषिकावच्छेदक
त्वनिर्वचनमिति भावः। ननु कक्कमेरुगौरवज्ञानस्य विरोधित्वात्तादृशप्रतीत्यावच्छेदकत्वं नावगाह्यते किं तु कंबुग्रीवादिमन्निष्ठप्रतियोगिताकाभा
वमात्रमित्याशंक्य निषेधयति न चेति। अवलम्बनं विषयः। तथाविधेति। कंबुग्रीवादिमत्प्रत्यय इत्यर्थः। तादृशप्रतीतेः कंबुग्रीवादिमान्नास्तीत्या
कारकप्रतीतेः अनुदयादिति। तथा च तन्मते कंबुग्रीवादिमदन्तरस्यावसादयनदृश्यप्रसंग इति भावः। ननु तथाविधप्रत्यक्षे किं विशिष्टनिर्णये स एव प्र
तिबन्धकः अन्यथा विशेषादर्शनदर्शनदशायामपि कंबुग्रीवादिमान्नास्तीति प्रतीतौ तज्जायत एवेत्यत आह अत एवेति। गुरुधर्मस्यावच्छेदकत्वादेवेत्यर्थः।

भा२

भा॰अ॰
९२

न प्रमाणमिति । कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभाववत्त्वे कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावप्रकारकत्वेन तादृशान्वयबोधो भ्रम
इति तादृशशाब्दस्य जनकत्वेनाप्रमाणत्वं तन्मते कंबुग्रीवादिमत्प्रतियोगिताकाभावस्य तावत्पटत्वस्य भावात्तादृशप्रतीतेर्भ्रमत्वमिति तादृशशा
ब्दस्याप्रमाणत्वं न स्यादित्यर्थः । ननु भ्रमत्वस्य प्रकारभेदेन भिन्नत्वात् सर्वत्र तदभाववद्विशेष्यकत्वं न भ्रमत्वघटकं समवायेन गगनादिभ्रमे तद्वि
शेष्याप्रसिद्धेः । तथा च तत्रैव प्रकृतेऽपि कंबुग्रीवादिमत्प्रतियोगिकाभावप्रकारतामात्रेण तादृशान्वयबोधो भ्रमो भविष्यतीत्यत आह
प्रमाणं चेति । केचित्तु ननु उक्तरूपावच्छेदकत्वस्य कम्बुग्रीवादिमत्त्वस्यावच्छेदकत्वावगाहनादेव तादृशशाब्दे न प्रमाणमित्यत
आह तथा च कम्बुग्रीवादिमान्नास्तीति शाब्दः प्रमाणं न स्यादित्यकामेनापि प्रकृते भ्रमत्वं तदभाववद्विशेष्यकत्वे तत्प्रकारकत्वमिति भावः
धूमो न वह्निमान् पर्वतादिर्नो वा वाक्यस्य वह्न्याद्यभावकत्वार्थकत्ववत् कंबुग्रीवादिमान्नास्तीत्यादिवाक्यस्यापि कंबुग्रीवादिमत्प्रतियोगिताकाभा
वबोधकत्वादेव तादृशशाब्दस्याप्रामाण्यापत्तिः । अन्यथा धूमालोकसाधारणानुगतधर्माभावादालोकत्वधूमत्वावच्छिन्नाभावस्य धूमेऽस
त्त्वान्मानाभावाच्च धूमो न वह्निमानित्यादिवाक्यस्य प्रामाण्यापत्तेः । एवं च रूपधर्मस्यानवच्छेदकतया तादृशधर्मावच्छिन्नस्य विशिष्टवत्त्वं प्रति तादृशधर्माश्रय
प्रतियोगिकाभावप्रकारकत्वनियमत्वे नैव न संगत्या विशेषितत्वकल्पनात् कंबुग्रीवादिमान्नास्तीति प्रतीतिप्रामाण्ये कंबुग्रीवादिमान्नास्तीति ज्ञानविरोधो
॥॰॥ पि स्वघट एवेति प्राचीनमतनिरासः । तत्रोक्तरूपधर्मस्यानवच्छेदकत्वव्याप्तेरपि दुर्वचत्वमित्याह न चैवमिति । नघटेति । कंबुग्रीवादिविशिष्टसत्त्वादित्यादेरुक्त

१३
१२

आ·अ·
९८

द्रव्यत्वसमनियतानां गुणवत्त्वविशिष्टसत्तादीनामित्यर्थः अव्याप्तिमुपपादयति गुणादाविति· ननु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वं यत्किञ्चिन्नं न घटि-
त्वेनाभावस्य एकत्वमेव साध्यतावच्छेदकांशे निवेश्यमतो नोक्तदोष इत्यत आह तत्तदिति· यद्यपि तेरवच्छेदकत्वपर्सेपि स्वस्वप्रतियोगिव्यधिकरणाभावघटित-
त्वाद्वृत्तित्वप्रतियोगितावच्छिन्नगर्भत्वेन दुर्ग्रहत्वं तथापि व्याप्यवृत्तिसाध्यकस्थले पर्याप्तमभिप्रायेणेदं न तु प्रतियोगिवैयधिकरण्याद्यवेशान्निरवच्छिन्नहेत्वधि-
करणेऽनिरूपाभावप्रतियोगितानवच्छेदकत्वमेव सर्वत्र व्याप्तिप्रविष्टमित्याशयेनेदमिति नुपपत्त्यर्थः तेन व्याप्यवृत्तिसाध्यकस्थलेपि न दुर्ग्रहता व्याप्तेरिति भे-
यम्· द्रव्यत्वत्वेति· द्रव्यनिष्ठाभावप्रतियोगितानवच्छेदकत्वत्वापेक्षया द्रव्यत्वत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य गुरुत्वमानत्वावच्छिन्नाभावा-
प्रसिद्धेरिति भावः· ननु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतपर्याप्तिविशिष्टमीनावच्छिन्नाभाववत्संबद्धत्वविशिष्टसामान्यत्वभिन्नं स्वविशिष्टसंबन्धिनिष्ठाभाव-
प्रतियोगितावच्छेदकीभूततादृशधर्मभिन्नं वा पक्षतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यत्र हेतुमन्निष्ठाभावीयविशेषणतया विशेषावच्छिन्नप्रतियोगि-
तानामेव पर्याप्तिविशिष्टसंबन्धिनिष्ठाभावीयतादृशप्रतियोगितानवच्छेदकत्वावच्छेदकं तन्नास्ति साध्यनेन धूमावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यत्र वा दुर्ग्रहत्वाभावात्
पैव व्याप्तिर्वाच्येत्यत आह उपदर्शितेति· सत्तादिनि· आदिपदग्राह्यकतापर्यवसन्नसत्तत्वच्छेदकत्वाभावगर्भसामान्यलक्षणोपपत्तेः अत एव गौरवच्छेदकत्वादेरसंगच्छते
इति· अन्यथा गुणगुणवत्त्वापेक्षया गुरुत्वेन गुणगुणवत्त्वगुरुत्वावच्छिन्नाभावप्रसिद्धेर्न तिनलक्षणं व्यभिचारित्वं तत्त्वनस्यादिति भावः· अन्यथापि साध्यव्यापकतावच्छेदकधर्मा-
वच्छिन्नाभाववत्त्वनिष्ठत्वमेव व्यभिचारः सत्तागुणगुणवत्त्वावच्छिन्नाभाववत्त्वनिष्ठत्वेनैव तत्र सत्त्वस्यापि नर्जुत्वमतेन तथापि तदुर्दोषः प्रकृतसाध्याद्युपमित्यविलोपितनयाहेत्वाभासत्वम्

·पर्वतत्वेन पक्षत्वेनानुमानेऽपि तत्त्वं
मेयत्वतथात्वादिति भावः॥

श्रीः
१४

४११४

श्री ५ को सरकार
संस्कृत

जागदीशी
व्याप्त्यनुगम
ग्रन्थप्रारम्भः

श्रीगुरुचरणानिविजयन्ते ॥ ॥ असमानाधिकरणत्वादीत्यादिपदेन निष्कृष्टार्थस्य हेत्वधिकरणे प्रतियोग्यन
धिकरणत्वविशेषणस्य परिग्रहः । तत्रापि । अन्योन्याभावगर्भव्याप्तिग्रहेपि । तदिति । प्रतियोगिनस्तादा
त्म्येन यः सम्बन्धी तद्वृत्तिभिन्नत्वादिरूपं प्रतियोग्यसामानाधिकरण्यादिकं विषयतया प्रवेश्यमित्यर्थः । त
टस्थः शङ्कते । नन्वेवमिति । प्रतियोगिवैयधिकरण्यविषयकत्वालभावेन हेतुत्वइत्यर्थः उपाध्यायम
तमाशङ्क्य निषेधति । नन्वेति । हेतुमन्निष्ठघटाद्यभावप्रतियोगितानवच्छेदकं वह्नित्वमित्यादिग्रहाद
पिवह्निमान्रासभादित्यादावनुमित्युत्पत्त्यर्थः यावन्त इति । तादृशाभावा इति । निरुक्तावच्छेद
कत्वाभावग्रहोहीत्यर्थः । तदसम्भवात् । हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकं संयो
गत्वमित्यादिग्रहासम्भवात् । सामान्यघटितविशेषवत्तानिश्चयस्यापि सामान्याभावबुद्धौ विरोधि
त्वादिति भावः । प्रातिस्विकेति । तत्तदभावप्रतियोगितावच्छेदकत्वस्वरूपेणेत्यर्थः । रूपान्तरेणे
ति । हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वघटितेनेत्यादि तेन मेयत्वादिनात

व्या.नु.जा.

१

[illegible]योगिताग्रहेत्वातिप्रसङ्गः भ्रमेणोत्पन्नमित्यापत्तिव्युदासाय। नचेति। तथाच वन्ह्यभावस्यापि हेतुसमानाधिकरण
त्वेन ज्ञायमानत्वात् तत्प्रतियोगितानवच्छेदकत्वाग्रहदेवतदानानुमितिरिति भावः। उक्तरूपेणेति। वन्हित्वानवच्छिन्नधूमव
न्निष्ठाभावप्रतियोगितावच्छेदकत्वरूपेणेत्यर्थः। सम्भवादिति। समानप्रकारकत्वेनैव ज्ञानस्य विरोधित्वात् तथा
च ततोऽप्यनुमितिः स्यादिति भावः। ननु प्राचां मते समानविषयत्वेनैव ज्ञानस्य विरोधित्वात् वन्हित्वे धूमवन्निष्ठरासभाभाव
प्रतियोगितावच्छेदकत्वभ्रमदशायां वन्हित्वानवच्छिन्नधूमवन्निष्ठाभावप्रतियोगितानवच्छेदकं वन्हित्वमिति ग्रह एवास
म्भवीत्यतो दोषान्तरमाह। धूमाधिकरणेति। रासभशून्यधूमाधिकरणानुपस्थितावित्यर्थः। नाहरणेति। रासभ नाए६
त्वं धूमवन्निष्ठरासभत्वानवच्छिन्नाभावप्रतियोगितानवच्छेदकं वन्हित्वं धूमवन्निष्ठवन्हित्वानवच्छिन्नाभावप्रतियोगिता
नवच्छेदकमित्येवंप्रमोत्पादेपीत्यर्थः रासभशून्यधूमाधिकरणोपस्थितिदशायां रासभत्वे निरुक्तानवच्छेदकत्वं दुर्ग्र
हमतोऽनुपस्थितावित्यर्थः। उक्तज्ञानादनुमितौ कदाचिदित्यापत्तिं कुर्यादित्यतो दोषान्तरमाह। एवमिति। वन्हेः
शुद्धत्वग्रहे वन्ह्यभावस्यापि शुद्धप्रतियोगिकत्वग्रहसम्भवात् वन्हित्वं धूमवन्निष्ठशुद्धप्रतियोगिकाभावप्रतियोगि

तानवच्छेदकमित्येवं ग्रहेन सम्भवतीति गुरुदशायामित्यन्तः शुद्धप्रतियोगिकेत्यनेन न वन्ह्यभावस्य वन्हीतर प्रतियोगि
केत्यनेन न एतस्याभावाभावस्य निरुक्त याव[illegible]न्तर्गतस्य सङ्ग्रहः । ग्रहणीते । अनुमानाद्येत्यनुषज्यते तथा च तत्राप्यनुमितिः
स्यादिति भावः । इदमुपलक्षणं ज्ञायमानत्वाज्ञायमानत्वयोः सामान्यतः प्रवेशेतिप्रसङ्गः तत्तत्काले तत्तत्पुरुषज्ञायमानत्व
प्रवेशे तु प्रतियोगिवैयधिकरण्यानुपस्थितिकालीनव्याप्तिग्रहासङ्ग्रहः प्रकृतपर्वताद्यननुगमादननुगमहेतुत्वात्तन्मते
स्यापि दुष्टत्वं । नन्वेवमित्यत्र सिद्धान्ते मैवमिति । तेषामिति । प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगि

तावच्छेदकभेदवत्त्वात्यन्ताभाव हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकभेदवत्त्वात्यन्ताभावानामित्यर्थः
ननु तादृशगुरुविरोधिगुरुविषयस्य तत्तदभावस्य यादृशज्ञानमात्रे हेतुत्वं तदा प्रमेयत्वादिनापि तस्य ज्ञानादनुमित्या
पत्तिः तत्तद्रूपेण ज्ञानस्य हेतुत्वे तु अननुगमतादवस्थ्यमित्यत आह । तादृशावच्छेदकत्वेति । तद्वृत्तीनामिति । ता
दृशावच्छेदकत्वाद्यभाववृत्तीनामित्यर्थः । अत्र च प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्व
प्रकारिताव्यापकप्रकारित्वावच्छिन्नं प्रतिविरोधित्वमेव प्रवेश्यं तेन दैवात् घटवद्भूतलादिविषयकस्य तादृशाव

च्छेदकत्वग्रहस्य विरोधिघटाभाववद्भूतलत्वज्ञानमादाय नातिप्रसङ्गः घटवद्भूतलविषयितायास्तादृशावच्छेदकत्वविषयित्वाव्याप्यकत्वात्। यत्तु निरुक्तावच्छेदकत्वमात्रविषयिणीं किञ्चिद्रूपज्ञानव्यक्तिमादाय तद्धर्मिकत्वोक्ति विरोधित्वेनैवानुगमान्नोक्तदोषः इति। तन्न। तथासति प्रतियोगिवैयधिकरण्यादेः कारणतावच्छेदककोटिप्रविष्टतया सत्यमित्यादिना वक्ष्यमाणस्यान्योन्याभावगर्भव्याप्तिज्ञानहेतुताया लाघवस्यासङ्गतत्वापत्तेः। यद्यपि प्रतियोगितानवच्छेदकवन्हित्वाश्रयवान्धूमादित्यादौ प्रतियोगितानवच्छेदकवन्हित्वं प्रतियोगिव्यधिकरणधूमवन्निष्ठाभावप्रतियोगितावच्छेदकमित्याकारग्रहस्याहार्यस्यैव सम्भवान्न तद्विरोधित्वाप्रसिद्ध्या न तत्रानुगमो दुर्घटः। न च तादृशावच्छेदकत्वग्रहसमानविशेष्यकग्रहविरोधित्वं प्रवेश्यं। तथा च विशिष्टवन्हित्वधर्मिकाहार्यतादृशावच्छेदकत्वग्रहस्य विशेष्यं यद्वन्हित्वं तद्विशेष्यकस्यानाहार्यज्ञानस्य विरोधित्वप्रसिद्ध्या न दोष इति वाच्यं। तथासति वन्हित्वे निरुक्तप्रतियोगितानवच्छेदकमित्याकारकज्ञानवतोऽपि प्रतियोगितानवच्छेदकवन्हित्वप्रकारेणानुमित्यापत्तेः। तथापि प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहस्य प्रतिबन्धकतावच्छेदकीभूतप्र

कारित्वावच्छिन्नसाध्यतावच्छेदकविशेष्यताकज्ञानत्वेनानुगमान्नदो[illegible]· परत्वादिधर्मिकतादृशावच्छेदकत्वग्रहंप्र
ति विशेषितावच्छेदके यद्धूमवन्निष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वप्रकारित्वं तत्साध्ये
वप्रतियोगितानवच्छेदकवन्हित्वविशिष्टशेष्यकव्यापकतावच्छेदकत्वज्ञानसौलभ्यं॰ । इदमनुचिन्त्यते प्रतियो
गिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहविशेषिज्ञानत्वेन धूमलिङ्गकवन्ह्यनुमितौ न व्याप्ति
व्या·नु·ता· ज्ञानं हेतुर्मानाभावाद्वन्हिज्ञानत्वादिनैव हेतुत्वसम्भवात्· न चोक्तावच्छेदकत्वग्रहविशेषिधूमवत्पर्वतनिश्च
यत्वेनानुगतरूपेण प्रतियोगिवैयधिकरण्यादिविषय[illegible]कपरामर्शोऽनुमितिहेतुः· धूमव्यापको वन्हिः धूमवांश्च ३
पर्वत इत्यादिसमूहालम्बनादपि पर्वतो वन्हिमानित्यनुमित्यापत्तेः· किञ्च प्रतियोगिवैयधिकरणत्वमत्र स्व
प्रतियोगिवैयधिकरणत्वमवश्यं वाच्यं तथाच स्वस्वस्यैकस्याभावादेकं स्वमादाय प्रतियोगिव्यधिकर
णहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहविशेषितत्वेनानुगमे तादृशाभावान्तरप्रतियोगितावच्छे
[illegible]दकत्वग्रहदशायामनुमित्यापत्तेः· किञ्चोक्तग्रहविशेषितावच्छेदकीभूतप्रकारितावन्हि[illegible]श्चयत्वे

नैव तत्र हेतुत्वं वाच्यं तथा च तन्निश्चयत्वस्य तत्तत्प्रकारादिगर्भतया. ननुगमो दुर्वार इति दिक्. हेतुमन्निष्ठाभाव
प्रतियोगितानवच्छेदकत्वं ज्ञातुं तद्ग्रहविरोधित्वे सङ्गमयति । विरुद्धस्येति । सामान्यघटितेति । तेन द्रव्यसा
मान्याभावग्रहेपि घटवत्वग्रहोत्पत्त्यानक्षतिः । घटो नास्तीति । भूतल इत्यादि. एवेति । तत्कस्य हेतोरिति । उत्त
रयति तद्विशिष्टेति । घटत्वविशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रत्येव घटत्वावच्छिन्नाभावनिश्चयत्वेन प्रतिबन्ध
कत्वं घटवदित्याकारकबुद्धि[illegible] नीलघटवदित्याकारकबुद्धेः घटत्वविशिष्टवैशिष्ट्यावगाहित्वेनेति भावः अ
तएवानुक्रमेण विरोधित्वानुगमादेव. अन्यथा अवच्छेदकभेदमात्रप्रवेशेऽवच्छेदकत्वात्यन्ताभावबुद्ध्यसं
ग्रहापत्तिरिति भावः. ननु प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहविरोधित्वं ता
दृशावच्छेदकत्वाभावव्याप्यवत्वग्रहस्यापि तथा तादृशावच्छेदकत्वव्यावर्तकधर्मदर्शनस्यापि एवमभा
वादौ हेतुसामानाधिकरण्याभावग्रहस्यापि इति ततोप्यनुमित्यापत्तिरित्यत आह । हेत्वाभासेचेति ।
प तथा च यथा व्याप्तिग्रहविरोधित्वादिरूपेण सव्यभिचारत्वादिलक्षणे विरोधप्रसिद्धादावतिव्याप्ति

वारणार्थं साध्यतावच्छेदकादिमात्रग्रहविरोधित्वान्यत्वेन विशिष्यते तथात्रापि तादृशावच्छेदकत्वग्रहविरोधित्वे तादृशावच्छेदकत्वाभावव्याप्यवत्त्वादिविषयकत्वाद्यनवच्छिन्नविरोधिताभिन्नत्वेन विशेषणीयमिति भावः अनवच्छेदकत्वादीत्यादिपदेन प्रतियोगितानवच्छेदकत्वादेः संग्रहः केवलान्वयित्वग्रहस्यानुमितिहेतुतामङ्गीकुर्वतामत्रानुमितिरेवेत्यावेदयितुं · यदिचेत्तुनं म। · तादृशावच्छेदकत्वग्रहाविरोधित्वेनेति । तथाविधावच्छेदकत्वग्रहविरोधितान्यत्वेनेत्यर्थः । विशेषणीयमिति । निरुक्तविरोधित्वमिति शेषः । तेन प्रतियोगितानवच्छेदकं प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकश्चैव वह्नित्वमिति समूहालम्बनज्ञानस्य नानुपग्रहः । नचैवमप्यभावो न हेतुसमानाधिकरण इत्यादिज्ञानेऽतिप्रसङ्गः, अभावादेर्हेतुसामानाधिकरण्यग्रहाविरोधित्वेनापि विशेषणीयत्वात् । वस्तुतो हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वप्रकारिताशून्यज्ञानवृत्तिप्रकारितानवच्छिन्नत्वेनैव प्रतिबध्यत्वं विशेष्यं, तावतैव प्रतियोगितानवच्छेदकं वह्नित्वमित्यादिबुद्धेरपि व्युदासादिति ध्येयं॥ विशेषणस्य प्रतियोग्यसमाना

धिकरणस्वरूपस्य दानमित्यर्थः। प्रतियोग्यवृत्तित्वस्यैवेत्येवकारेण प्रतियोग्यधिकरणावृत्तित्वस्य गुरो
र्व्यवच्छेदः। ननु यत्समानाधिकरणात्यन्ताभावीयविशेषणता~~विशेषकत्वसामान्यविशेष्यतासामान्यविशेष्यता~~विशेष्या
वच्छिन्नप्रतियोगितासामान्ये साध्यसमानाधिकरणात्यन्ताभावीयविशेषणताविशेष्यावच्छिन्नप्रतियोगि
तानवच्छेदकधर्मावच्छेद्यत्वं नास्ति तत्त्वमित्यत्यन्ताभावगर्भव्याप्तौ निरुक्तायां प्रतियोगिवैयधिकरण्या
प्रवेशान्नैष दोष इत्यत आह। नन्वेति। तथा च यत्समानाधिकरणान्योन्याभावप्रतियोगितासा
न्योन्या
मान्ये साध्यसमानाधिकरणात्यन्ताभावीयविशेषणताविशेष्यावच्छिन्नप्रतियोगितानवच्छेदकधर्मा
वच्छेद्यत्वं नास्ति तत्त्वमित्यन्योन्याभावगर्भव्याप्तौ प्रतियोगितांशे सम्बन्धविशेषाप्रवेशाल्लाघवमुक्त्वा
यामत्यन्ताभावगर्भायान्तु विशेषणताविशेष्यावच्छिन्नत्वेन प्रतियोगितानिवेशगौरवमित्येवमन्योन्या
भावगर्भाया हेतुत्वे विनिगमकमिति भावः। अन्योन्याभावत्वमपि यदि तादात्म्यसम्बन्धावच्छिन्नप्र
तियोगिताकाभावत्वं नत्वखण्डोपाधिस्तदा तद्घटितव्याप्तावपि सम्बन्धविशेषनिवेशाल्लाघवस्या

नवकाशेन वस्तुनोऽन्योन्य त्यन्ता न्योन्याभावघटितयोर्द्वयोरपि व्याप्त्योर्नानुमित्युपयोगित्वमिति तयोः साध्यव
दन्यावृत्तित्वेऽस्यैवाग्रे तथात्वस्य वक्ष्यमाणत्वादित्याशयेन यथाश्रुतेत्युक्तं · अपरे तु मूलग्रन्थानुरोधेन इत्यर्थः ।·इत्यु
येति ।· तथा च द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति चक्षुःसंयोगादेर्व्यभिचारेऽपि द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव यथा चक्षुःसंयोगत्वादिना
हेतुत्वं तथानुमितित्वावच्छिन्नं प्रत्युक्तान्योन्याभावगर्भव्याप्यवत्तापरामर्शस्य हेतुतायां व्यभिचारसत्त्वेऽप्यत्यन्ताभाव
व्या·नु·जा· गर्भव्याप्यवत्तापरामर्शनाश्यानुमितित्वावच्छिन्नं प्रत्येवात्यन्ताभावगर्भव्याप्तिज्ञानत्वादिना हेतुत्वं वाच्यमिति भावः· ५
।·तद्रूपेति ।· तथा च साध्यतावच्छेदके साध्ये साध्यवत्ताग्रहविरोध्यभावग्रहविषयतावच्छेदकत्वेनानुगमय्य हेतुध
र्मिकतदवच्छिन्नाभावसामानाधिकरण्यग्रहविरोधित्वेनैव व्याप्तिधियोऽनुमितिहेतुत्वमिति भावः· तद्रहस्य ।·सा
ध्यतद्वतोरत्यन्तान्योन्याभावग्रहस्य· कथञ्चित् ।· अभावान्तरेऽपि प्रतियोगितासम्बन्धेन वाच्यत्वाद्यवगाहित्वेन अत्र
साध्यभेदस्य साध्यवदत्यन्ताभावस्य च साध्यवत्ताग्रहविरोधितावच्छेदकरूपावच्छिन्नाभावत्वात्सामानाधिकर
ण्यग्रहविरोधिनः साध्यभेदासामानाधिकरण्यस्य साध्यवदत्यन्ताभावासामानाधिकरण्यस्य वा ग्रहे सत्यप्यनु

मित्यापत्तिः। किञ्च भिन्नविषयकग्रहस्याविरोधित्वे साध्यवद्भेदान्तर्भावेनानुगमो व्यर्थः साध्याभावाभावसामानाधिकरण्यग्रहविरोधित्वेनैवान्योन्याभावगर्भव्याप्तिज्ञानस्याप्यनुगमसम्भवादविरोधित्वे तेन साध्यवद्भेदग्रहस्य साध्यवत्ताग्रहविरोधित्वादुक्तक्रमेणानुगमाशक्यत्वमित्यस्वरसेनाह। तद्भिन्नस्यामिति। चिन्तावीजन्तु यत्तत्त्वयोरननुगतत्वेनाननुगमतादवस्थ्यमिति ध्येयम्। मतान्तरमाह। साध्यतावच्छेदकेत्यादि वदन्तीत्यन्तेन। नव्यमते अस्यतान्योन्याभावगर्भव्यापकताज्ञानयोरन्योन्यास्यताभावगर्भव्यापकत्वग्रहे प्रत्यविरोधित्वादुभयसङ्ग्रहार्थमवगाहितादृशोक्तिः। ननु साध्यतावच्छेदके तादृशावच्छेदकत्वावगाही साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वे च तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वावगाही यो ग्रहस्तद्विरोधित्वेनानुगमे गौरवमत आह। साध्याभावेति। तथा चात्र कल्पे साधनस्यैव विशेष्यतया निवेशे ननु साध्यतावच्छेदकभेदवच्छिन्नसाध्ययोर्विशेष्यतया निवेश इति लाघवमिति भावः। केचित्तु साध्यव्यापकताज्ञानं नानुमितिहेतुः साधनभेदेन नानात्वात् किन्तु साध्याभाववदवृत्तित्वस्य साध्यवदन्यावृत्तित्वस्य च द्वयोरेव ज्ञानं हेतुः साधनभेदेऽप्यभेदादस्मादेव च केवलान्वय्यनुमितिरिति नव्यमतमनुसृत्याह। साध्याभावेति।

धिन्य

साधनधर्मिकेत्यादि· अत्राप्युभयप्रवेशफलं पूर्ववत्· विरोधित्वादिकमित्यादिना तत्तदभावकूटावगाहिग्रहविरोधि
त्वादेः परिग्रहः· ननु जातिमान् द्रव्यत्वादित्यादौ हेतुतावच्छेदकसमवायादिसम्बन्धेन साध्याभाववद्वृत्तित्वाप्रसिद्ध्या तदव
गाहिग्रहविरोधित्वं दुर्वचमत आह· प्रसिद्धेरिति· तथा च समवेतत्वे साध्याभाववदीयत्वावगाही भ्रमरूप एव
ग्रहो धर्तव्य इति भावः· ननु व्यभिचारव्यावर्तकधर्मवत्त्वज्ञानस्यापि व्यभिचारग्रहविरोधित्वान्नतातिप्रसङ्ग इत्यत आह·
व्या·तु·जा· अधिकमिति· तादृशज्ञानव्यावृत्तौ विरोधिताविशेषण एव निवेशनीय इति भावः· ननूक्तक्रमेणान्यतराभावगर्भ
व्याप्तेरनुमितिहेतुत्वे अन्योन्याभावगर्भैक्यव्याप्तिरित्यादिमूलग्रन्थासङ्गतिरित्यत आह· ग्रन्थस्त्विति· अन्योन्या ६
भावगर्भपदस्यानौपाधिकत्वान्यपरत्वादिति भावः· अनौपाधिकत्वमात्रव्यवच्छेदे मूलस्वरसं दर्शयति· यदित्यादि·
अन्यथानौपाधिकत्वादिकं तु तल्लक्षणमित्येव ब्रूयादिति भावः· अत्रोक्तग्रहविरोधित्वमात्रेण हेतुत्वे, नौपाधिक
त्वज्ञानस्यापि कारणत्वापत्तिस्तस्यापि सोपाधिकत्वमन्तर्भाव्य व्यभिचारग्रहत्वाद्विरोधित्वेनोक्तरूपत्वात्· नच
तादृशग्रहत्वाव्यापकविषयिताश्रयान्यग्रहविरोधिज्ञानत्वेनैव हेतुत्वं सोपाधित्वविषयितायां तु तादृशग्रहत्वाव्यापि

देवेति नातिप्रसङ्ग इति भावः। ज्ञानभेदेनैर्भिन्नानां सर्वेषामेव विषयितानां तादृशग्रहस्य व्यापकत्वेनैव तत्कृत्यग्रहप्रसिद्धेरुक्तक्रमेण हेतुसापेक्षया लाघवेन सोपाधिकत्वविषयकं यत्किञ्चिद्गुरुग्रहमुपादाय तद्व्याप्तिविरोधित्वेनैव हेतुसाधने। न चैवमापत्तिस्तथैव ग्रन्थतात्पर्य्यसम्भवादिति वाच्यं। तथा सति तादृशज्ञानव्यक्तीरुपादाय प्रत्येकं तत्तद्ग्रहविरोधित्वेनानुमितिहेतुतायामनन्तकार्य्यकारणभावापत्तेर्विरोधितावच्छेदकभेदेनैव विरोधित्वस्याभिन्नत्वात्तद्रूपेणानुगमासम्भवात्तस्य स्वरसादुदनीतत्वं। अज्ञानरूपासिद्ध्युपजीव्यतया व्यभिचारस्य नाभासत्वं किन्तु व्याप्तिधीविरोधित्वेन तत्सोपाधित्वज्ञानस्य नास्तीत्यसौ नाभास इति मूलाभिप्रायप्रकाशयन्नाह। व्यभिचारज्ञानस्येति। ननूपाधिधर्म्मिकसाध्यव्यापकत्वादिज्ञानस्य भिन्नधर्म्मिकतया हेतौ व्याप्तिग्रहविरोधित्वेपि हेतुधर्म्मिकसोपाधित्वज्ञानस्य व्याप्तिधीविरोधित्वसम्भवान्न हेत्वन्यस्येत्यादि मूलमयुक्तमतस्तदुपपादयति। सोपाधित्वेति। न व्याप्तीति। न साक्षाद्व्याप्तिधीविरोधी स्वार्थः। विरोध्यविषयत्वात्। विरोधिविषयताशून्यत्वादित्यर्थः। ननु परम्पराविरोधिन एव सोपाधित्वस्य कुतो नाभासत्वमत आह। वक्ष्यतीति।

।। तच्चात्मोपाधिकत्व इत्यादिमूलेस्य हेत्वनभिधाना–न्यूनत्वमपाकर्तुमाह ।। निरुपाधिकस्येति । तथात्वेपि ।। निरु
पाधित्वघटिताव्याप्तिग्राहकसत्वेपि ।। उपाध्यासत्वायोगादिति ।। अनुमितौ तत्कारणपरामर्शे वा तस्याविरोधित्वादि
ति भावः ।। तद्घटितेति ।। हेतुमन्निष्ठाभावघटितेत्यर्थः ।। केवलान्वयित्वादिति ।। तथा च तस्य प्रतियोगिवृत्तित्वाद्धेतुस
मानाधिकरणोयः प्रतियोग्यवृत्ति घटघटत्वान्योन्याभावस्तत्प्रतियोगितानवच्छेदकमेव साध्यं च मतः संयोगीस
त्वादित्यत्रातिव्याप्तिरिति भावः । यद्यपि प्रकृतलक्षणे हेतुसमानाधिकरणस्य द्रव्यभेदस्यैव पारिभाषिकप्रति
योगितावच्छेदकं संयोगवत्वमतो नातिप्रसङ्गस्तथापि यत्रासद्धेतुविशेषे साध्यतावच्छेदकं न प्रतियोगिताव
च्छेदकं तत्रैव पारिभाषिकावच्छेदकानुप्रवेशेन सर्वत्रैवेत्यभिप्रेत्य गुरुधर्मस्यापि वा प्रतियोगितावच्छेदकत्वम
दृस्येदमुक्तं म। इत्यनुचिन्त्यते । स्वप्रतियोगितावच्छिन्नभिन्नं यद्धेत्वधिकरणं तन्निष्ठान्योन्याभावे स्वीकृते न कोपि
दोषः । वृक्षोसंयोगिभेदसत्वेपि तत्प्रतियोगितावच्छिन्नभेदाविरहादेव संयोगीत्वादित्यादावव्याप्तिविरह
वृक्षः संयोगिभेदप्रतियोगीत्यप्रत्ययात् प्रतियोगिभेदेपि लाघवेन प्रतियोगित्वस्यैकत्वात् सत्ववत्तिगुण

दौ च संयोगिभेदप्रतियोगितावच्छिन्नस्यापि भेदस्य सत्त्वात् संयोगी सत्त्वादित्यादावतिव्याप्तेर्नवकाशात्। अस्तु वा यद्य
स्वप्रतियोगितत्तद्व्यक्तित्वावच्छिन्नभेदकूटवद्वृत्त्यधिकरणवृत्तिर्योन्योन्याभावो व्याप्तिर्घटवत्तथापि न क्षतिः।
संयोगिभेदप्रतियोगितत्तद्व्यक्तेरेव[illegible]दस्य तद्वृक्षेऽविरहेण संयोगी तत्त्वादित्यादावव्याप्तिस्तदसादिति। साध्या
दिभेदेन व्याप्तिभेदस्यावश्यकत्वात् सर्वत्रैव निरुक्ताभावेऽपि न क्षतिरित्याशयेन शङ्कते।। अर्थेति।। स्वव्यापकेति।। हे
तुमन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकीभूतसाध्यसामानाधिकरण्यमित्यर्थः।। स्वव्यापकेति।। स्वप्र
कृतसाध्यं तद्व्यापकतावच्छेदकं तद्वन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकतानवच्छेदकं यद्रूपमधिकरणतानि
रूपकतावच्छेदको धर्म्मस्तदवच्छिन्नात्यन्ताभावासामानाधिकरण्यमित्यर्थः। तेन नान्योन्याभावगर्भत्वहा
निः। गगनत्वादेर्निरुक्तव्यापकतावच्छेदकत्वेऽप्यधिकरणतानिरूपकतावच्छेदकत्वविरहात् तद्रूपपदेनैव वा
रणमतस्तदवच्छिन्नाभावसामानाधिकरण्यस्य धूमादौ सत्त्वेऽपि वह्निमान् धूमादित्यादौ नाव्याप्तिः। उक्तापेक्षया
लाघवादाह।। तादृशरूपविशिष्टेति।। साध्यव्यापकतावच्छेदकरूपावच्छिन्नविशिष्टेत्यर्थः तथा च साध्यवन्नि

ष्टान्योन्याभावप्रतियोगितानवच्छेदकरूपावच्छिन्नान्योन्याभावासामानाधिकरण्यं फलितं । न च तादृशपृथिव्या
न्योन्याभाववति कालिकसम्बन्धेन धूमादेः सत्त्वाद्वह्निमान् धूमादित्यादावव्याप्तिः हेतुतावच्छेदकसम्बन्धेन वृ
त्तित्वे तु सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः सदन्यसमवेतत्वाप्रसिद्धेरिति वाच्यं तादृशरूपावच्छिन्नान्योन्या
भावाधिकरणवृत्त्यधिकरणताकत्वस्य विवक्षितत्वात् एवञ्च विशिष्टसत्ताया द्रव्यान्यवृत्तित्वेपि द्रव्ये विशि
ष्टसत्त्वादित्यादौ नाव्याप्तिः विशिष्टनिरूपिताधिकरणत्वस्य द्रव्यान्यवृत्तित्वाभावात् संयोगी सत्त्वादित्यादौ
तादृशसाध्यव्यापकतावच्छेदकीभूतद्रव्यत्वावच्छिन्नान्योन्याभाववत्तित्वस्यैव सत्ताधिकरणसत्तायां स
त्त्वान्नातिप्रसङ्ग इति भावः । स्मृतीत्यादि । स्मृतिविषयत्वे संस्कारविषयत्वे जन्यज्ञानाविषयत्वस्य वच्छे
दकत्वान्न व्याप्ति महाकालत्वावच्छेदेन परमाणुसत्त्वादव्याप्यवृत्त्येव प्रलये परमाण्वादिर्न स्मर्यत इ
त्यादिव्यवहारात् तथा च तत्र साध्यवद्द्रव्यत्वादिहेतावव्याप्यवृत्तिसाध्यकस्थलीयलक्षणयोरव्
याप्तिः प्रध्वंसाभावत्वादेरेव साध्यव्यापकतावच्छेदकतया तदवच्छिन्नात्यन्ताभावाप्रसिद्धेः । द्वितीये चा

भावत्वादेरेव निरुक्तसाध्यव्यापकतावच्छेदकत्वादवच्छिन्नान्योन्याभावाप्रसिद्धेरिति भावः । नह्येवं धूमनियम्यायाः स्मृतेः सार्वत्रिकत्वे मानाभावात्संस्कारविषयत्वोपादानं । नियमतोपेक्षाग्रहविषयत्वेन संस्कारविषयस्यापि वस्तुतः सम्भवित्वाज्जन्यज्ञानविषयत्वानुधावनं । सर्वदैव सर्वत्र नियतज्ञानविषयतासत्त्वादव्याप्यवृत्तित्वसम्पत्तये जन्यज्ञानपदं । का गतिः । कथमव्याप्त्युद्धारः । स्वाधिकरणेति । स्वं हेतुः संयोगिसत्त्वादिस्यादौ संयोगवत्त्वस्यापि साधनाधिकरणद्रव्यवृत्तित्वात्तदवच्छिन्नभेदमादायातिव्याप्तिवारणं न स्यादतो यत्किञ्चिदिति । तथा च संयोगवत्त्वावच्छिन्नभेदस्यापि साधनवद्गुणवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वान्न प्रतियोगितावच्छेदकमेव साध्यमतो नातिप्रसङ्गः । न च यत्किञ्चित्त्वस्यैकस्याभावात्साधनाधिकरणद्रव्यमन्तर्भाव्यातिव्याप्तितादवस्थ्यं संयोगिभेदस्य साधनाधिकरणैकव्यक्तिवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वेपि तादृशव्यक्त्यन्तरवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वे बाधकाभावात् साधनाधिकरणतत्तद्व्यक्तिवृत्तिधर्मानवच्छिन्नप्रतियोगिताकान्योन्याभावप्रतियोगितावच्छेदकत्वाभावकूटवत्त्वस्यैव निविष्टत्वाददोषः इति कश्चित् । साधनाधिकरणयत्किञ्चिद्व्यक्तिवृत्तिधर्मावच्छि

न्नप्रतियोगिताकत्वोक्तौ संयोगी वृक्षत्वादित्यत्राव्याप्तिः संयोगवत्त्वावच्छिन्नभेदस्य वृक्षावृत्तिसंयोगेनाप्यवच्छि
न्नप्रतियोगिताकत्वादतस्तत्परित्यागः । यद्यपि चैवमपि रूपाभाववान् घटत्वादित्यत्राव्याप्तिः रूपसामान्याभावव
त्त्वावच्छिन्नान्योन्याभावात्मकरूपस्यैव समवेतसामान्याभाववत्त्वावच्छिन्नप्रतियोगिताकतया साधनवदवृत्ति
धर्मानवच्छिन्नप्रतियोगिताकत्वात् । तथापि स्वाधिकरणयत्किञ्चिद्व्यक्तिवृत्तिधर्मानवच्छिन्नं यदन्योन्याभाव
आ· [illegible] ना प्रतियोगित्वं तदनवच्छेदकसाध्यवत्त्वे तात्पर्य्यं । साध्यवत्त्वं चात्र साध्यतावच्छेदकावच्छिन्नाधिकरणत्वं साध्या ६
धिकरणभेदेपि अभिन्नमेवेति प्रतेतेदं । अन्यथा वह्नित्वावच्छिन्नाधिकरणत्वस्य प्रतिव्यक्तिभिन्नत्वेन तादृशान्यो
न्याभावप्रतियोगितानवच्छेदकताध्रौव्यात् वह्निमान्धूमादित्यादावव्याप्त्यापत्तेः । वस्तुतः साध्यतावच्छेदकधर्मा
वच्छिन्नसाध्यमात्र । ननु तदवच्छिन्नाधिकरणत्वं तथा सति देशिकविशेषणतया हेत्वधिकरणवृत्तित्वैकै
निवेशस्यैव निर्दोषत्वेन वक्ष्यमाणातिव्याप्त्यसङ्गत्यापत्तेरिति ध्येयं । नन्विदं संयोगिविशिष्टसत्त्वादित्या
दावव्याप्तिः संयोगवत्त्वावच्छिन्नभेदस्य साधनीभूतसत्ताधिकरणीभूतगुणवृत्तिधर्मानवच्छिन्नप्रति

योगिताकत्वादत आह ।तद्धर्मविशिष्टेति ।।प्रकृतहेतुतावच्छेदकविशिष्टेत्यर्थः निरुक्तसाध्यव्यापकत्वं श
सम्भवादिसाधारण्यमत उक्तं तद्धर्मविशिष्टेति ।।स्वरूपसम्बन्धेनेति ।।कालिकसम्बन्धेनेत्यर्थः ।।तादृशेति
हेत्वधिकरणयत्किञ्चिद्विद्यमानस्पन्दवृत्तिधर्मानवच्छिन्नप्रतियोगिताको यश्चिरातीतघटादिभेदस्त
त्प्रतियोगितानवच्छेदकत्वादित्यर्थः ।।जातिमत्त्वेनेति ।।तथा च हेत्वधिकरणं यद्घटादिकं तत्समवेतान
वच्छिन्नप्रतियोगिताकस्य घटादिभेदस्य प्रतियोगितानवच्छेदकमेव जातिमत्त्वमित्यतिव्याप्तिरिति भावः
त्वेनेति ।।व्याख्यातो दृश्यत्वेन तथा च ग्राह्यताप्रसिद्ध्या ग्रहस्य प्रमात्वं कुत्रापि न स्यादिति भावः ।तथात्वे अ
न्योन्याभावस्याव्याप्यवृत्तित्वे ।।अव्यापकमेवेति ।।संयोगवत्त्वावच्छिन्नत्वभेदस्याप्युत्पत्तिकालावच्छेदेन घ
टादौ सत्त्वादिति भावः ।प्रतियोग्यधिकरणं यद्घस्तत्र घटत्वावच्छिन्नभेदकूटत्वेन हेत्वधिकरणवृत्तस्य प्रवे
शेन नैष दोष इत्यवधेयं ।।स्वाधिकरणेत्यादि ।।प्रकृतहेत्वधिकरणयत्किञ्चिन्निष्ठाधिकरणता
निरूपकतावच्छेदकधर्मानवच्छिन्नं यदत्यन्ताभावप्रतियोगित्वं तदनवच्छेदकीभूतसाध्यतावच्छेदक

धर्मावच्छिन्नसामानाधिकरण्यमित्यर्थः. तेन सत्ताया गुणादावृत्तित्वेपि विशिष्टसत्तावाञ्जातेरित्यादौ नाति
व्याप्तिर्नवा प्रागुक्तरीत्या रूपसामान्याभाववान्घटत्वादित्यादावव्याप्तिः। पूर्ववदिति। सामान्येन हेत्व
धिकरणवृत्तित्वस्योक्तौ गुणःस्पन्दत्वादित्यत्र साध्यतावच्छेदकसम्बन्धेन तथात्वोक्तौ च जातिमान्मेयत्वा
दित्यत्रातिव्याप्तिरिति भावः। स्वप्रतियोगीति। स्वावच्छेदकधर्मावच्छिन्नाधेयत्वानिरूपकहेत्वधिकर
व्या·नु·जा· णनिष्ठाभावीयं यत्प्रतियोगित्वं तदनवच्छेदकमित्यर्थः. तेन विशिष्टसत्तावाञ्जातेरित्यादौ नातिव्याप्तिः. १०
आधेयत्वञ्च साध्यतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यं. म। नातो गुणःस्पन्दत्वादित्यादावव्याप्तिः। जन्यानामि ति
ति। संयोगनिष्ठाधेयत्वानिरूपकत्वोपगमे इत्यन्वयः. द्रव्यत्वस्य हेतुतास्थले ऽत्यन्तप्रलयावच्छेदे
नैव हेतुमतः साध्यनिष्ठाधेयत्वानिरूपकत्वं सम्भवत्यतो यादृशहेतुस्थले प्रलयावच्छेदेनैव न हेतुः सा
ध्यनिष्ठाधेयत्वानिरूपकस्तान्मुदाहरन्ति। कालपरिमाणेति। संयोगसाध्यक इत्यनुषज्यते. यावत्सा
ध्यव्यापकसाधनव्यापकस्वरूपानौपाधिकत्वव्याप्तिं निष्कृष्य सिद्धान्तयति। साध्यसमानाधिकर

रोत्यादिना ।। अत्र प्रतिपदव्याहत्तिर्व्याप्तिवादएव प्रागुक्ता . अनवच्छेदकत्वेऽस्यत्वाभावद्वयप्रवेशे गौरवा
दाह ।। स्वसमानाधिकरणेत्यादि ।। तत्सम्बन्धावच्छिन्नेत्यादेरप्रवेशे लाघवादाह ।। स्वसमानाधिकर
णः सर्व इत्यादि ।। यद्धर्मावच्छिन्नसामानाधिकरण्यत्वं हेतुसामानाधिकरण्यवन्निष्ठात्यन्ताभावप्रति
योगितानवच्छेदकं तद्धर्मावच्छिन्नसामानाधिकरण्यमित्यर्थः . व्यापकत्वं विना यावत्त्वस्य दुर्वचत्वादिति
ध्येयं . मा अत्र सामानाधिकरण्यस्याव्याप्यवृत्तितायाः प्रामाणिकत्वे धूमादिसमानाधिकरणस्य घटा
भावादेर्वन्ह्याद्यनधिकरणदेशावच्छेदेन वन्हित्वाद्यवच्छिन्नसामानाधिकरण्यविरहाद्वन्हिमान्धूमा
दित्यादावव्याप्तिः . न च हेतुसमानाधिकरणत्वं निरवच्छिन्नविशेषणतया वाच्यमतो नोक्तदोषः
साधनीभूतधूमाद्यधिकरणावच्छेदेनैव वन्हीनां तत्सामानाधिकरण्यवत्त्वेन निरवच्छिन्नविशेष
णतया धूमसामानाधिकरण्यस्यैवाप्रसिद्धेरतो गुर्वपि लक्षणान्तरमाह ।। साध्यसामानाधिक
रण्याभावेति ।। अत्र व्यापकतानवच्छेदकं साध्यसामानाधिकरण्याभावत्वं निरवच्छिन्नविशेषण

निरवच्छिन्नसामानाधिकरण्यप्रतियोगितावच्छे
न निरवच्छिन्नविशेषण[illegible]सामानाधिक
ण्याभावप्रतियोगित्व

।। [illegible] ।। ।। [illegible]

णताविशेषेणाग्राह्यं. तेन घटाद्यभावस्य वन्ह्यनधिकरणदेशावच्छेदेन वन्ह्यादिसामानाधिकरण्याभावत्वे
पि वन्हिमान्धूमादित्यादौ नाव्याप्तिः. धूमवान्वह्नेरित्यादौ निरवच्छिन्नविशेषणतया साध्यसामानाधिक
रण्याभावस्याश्रये तप्तायःपिण्डादौ तत्प्रकारकप्रमाविषयत्वादौ वा हेतुसामानाधिकरण्यस्याभाव
विरहान्नातिव्याप्तिर्ध्येयं।। साध्यतेति।। तेन घटत्ववान्मेयत्वादित्यादौ कालिकसम्बन्धेन यत्साध्यसा
सा.तु.ना. धिकरणं तदवृत्तिरवृत्तिरेवेति तत्र मेयत्वस्य सामानाधिकरण्याभाववत्त्वान्नातिव्याप्तिरिति।। हेतुते
ति।। तेन रूपवान् घटत्वादित्यादौ साध्यसमानाधिकरणस्य महाकालत्वादेः कालिकसम्बन्धेन य
द्घटत्वाद्यधिकरणं तदवृत्तित्वेपि नाव्याप्तिः. ननु द्रव्यं सत्त्वादित्यादावव्याप्तिः साध्यवत्कालवृत्तित्वाभाव
स्यावृत्तिगगनादेरेव सत्त्वेन तत्र हेतुसामानाधिकरण्यस्यापि सत्त्वात्. न च दैशिकविशेषणतासम्बन्धे
नैव साध्यवद्वृत्तित्वं निवेश्यमिति नोक्तदोषः. तथा सति तादृशवृत्तित्वाभाववति पर्वतत्वादौ समवायादिना
हेतुमद्वृत्तित्वस्य सत्त्वेन वन्हिमान्धूमादित्यादावव्याप्त्यापत्तेरत आह।। वृत्तिद्वयञ्चेति।। साध्याधिकरण
वृत्तित्वहेत्वधिकरणवृत्तित्वञ्चेत्यर्थः॥ एकेति।। यत्सम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वं लक्षणघटकं तत्सम्बन्धाव
च्छिन्नमेव हेतुमद्वृत्तित्वं निवेश्यमित्यर्थः. यत्तदर्थयोरननुगततया समवायेन तादृशवृत्तिद्वयस्याभावमादा

य सत्तावान्मेयत्वादित्यादावव्याप्ते [illegible]

इति श्रीजगदीशभट्टाचार्यविरचितो व्याप्त्यनु [illegible]

सं १९५२ आषाढकृष्ण ३० शनौ। लिखितं सोमना
थशर्मणेति शम्।

११

४११५

श्रीरमायनमः॥ द्रव्यं पृथिवीत्वादित्यादावव्याप्यभावादाह नानाव्यक्तीति ज्ञानत्वेन शब्दत्वेन वा नानाव्यक्तेः साध्यतायामव्याप्यभावाद्रूपादी
त्युक्तेः रूपवान् रसादित्यादेर्यद्रूपव्यक्तेः प्रतियोगिव्यधिकरणयद्रूपवन्निष्ठाभावप्रतियोगित्वं तद्रूपसामानाधिकरण्यस्य तद्रूपव्यक्तौ व्याप्तित्व
सम्भवादाह एकव्यक्तीति रूपवान् रूपरसादित्यादावेकव्यक्तिहेतावव्याप्तिविरहात्पृथिवीत्वादित्युक्तेः अव्याप्तिरिति रूपत्वादेरेव चालनीयन्यायेन
तत्त्वपृथिवीनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगित्वादिति भावः नचेति वा अभिमतत्वेपि रूपवत्वं रूपाधिकरणत्वं तदव्यधिकरणभेदाद्भिन्नमेवे
त्युक्तेरेव तादवस्थ्यादाह नन्विति रूपत्वपृथिवीत्वयोः साक्षात्सामानाधिकरण्याभावात्कथं तयोर्व्याप्तिरत आह परंपरयेति स्वाश्रयाधिकरणत्व
रूपपरम्परासम्बन्धेनेत्यर्थः ननु पृथिवीत्ववति समवायेन रूपत्वस्याभावसत्वेन कथं तन्निष्ठाभावाप्रतियोगित्वमत आह तेन चेति परम्पर
सम्बन्धेन चेत्यर्थः तदभावः रूपत्वादेरभावः प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिताश्रयानधिकरणे भूत हेतुमन्निष्ठाभावस्य साध्यतावच्छे
दकसम्बन्धा[illegible]वच्छिन्नायाः एव प्रतियोगिताया लक्षणघटकत्वादिति भावः असाध्यत्वं अनुमित्यविधेयत्वं ननूक्तव्याप्तिज्ञाना
द्रूपत्वावच्छिन्नसाध्यकैवानुमितिर्व्याप्यन्तरज्ञानादेव रूपादिसाध्यकानुमितेः सम्भवात् स्वघटितरूपत्वावच्छिन्नवत्वसम्बन्धेन रूपादेः साध्यतायामु
क्तव्याप्तिज्ञानादपि रूपादिसाध्यकानुमित्युत्पादे बाधकाभावादित्यत आह द्रव्यत्वेति अव्याप्तिरिति व्याप्यवृत्तिसाध्यकस्थले प्रतियोगिवै
यधिकरणस्यानुपादेयत्वात् तत्रस्थलक्षणस्याव्याप्तिरित्यर्थः ननु तत्र हेतुमन्निष्ठाभावस्य प्रतियोगित्वं वैशिष्ट्यानवच्छिन्नं वा अभिमतो

जा॰टि॰वि॰
व्या॰

नाव्याप्तिरित्यत आह· अन्यथेति· ननु विशेष्यवति विशिष्टाभावो विशेषणाभावस्वरूप एवेति द्रव्यनिष्ठस्य द्रव्यान्यत्वविशिष्टसत्ताभावस्य प्रतियोगित्वं द्रव्यान्यत्वादौ विशेषण एव न तु विशिष्टे सत्तायामतो नाव्याप्तिरत आह· गुणादाविवेत्यत इति· विशिष्टाभावस्तावदतिरिक्तो ऽभावो द्रव्ये न द्रव्यत्वविशिष्टसत्ता नास्तीति प्रतीतिबलात् द्रव्यनिष्ठाभावस्य वैशिष्ट्यावच्छिन्नप्रतियोगित्वं पुनः सत्तायामेवेत्युपक्रमे अन्यथा विशिष्टसत्तावानात्मेत्यादावतिव्याप्त्यापत्तेरिति भावः· केचित्तु· ननु विशेषणविशेष्ययोः सत्त्वे या भावपर्यवसन्नस्य विशिष्टाभावस्य प्रतियोगित्वं तदुभयोः सत्त्वे च एव न तु विशेष्य इति नाव्याप्तिरवकाश इत्यत आह· अन्यथेति· विशेष्यस्य विशिष्टाभावाप्रतियोगित्व इत्यर्थः· ननु लक्षणातिप्रसङ्गवारणान्यथानुपपत्तिर्न वस्तु साधिकेत्यत आह गुणादाविवेत्यत इतीत्याहुः· ननु साध्यतावच्छेदकावहिर्भावेन पदेऽपि व्यावृत्तिं प्रतियोगित्वेन तदन्यत्वेन हेतुमन्निष्ठाभावप्रतियोगित्वं विशेषणीयमतो नोक्ताव्याप्तिर्व्याप्तेरवकाश इत्यत आह· द्रव्यत्वादीति· तथा च सत्ताद्रव्यत्वोभयाभावस्य द्रव्ये सत्त्वात् तमादाय सत्तावान् द्रव्यत्वादित्यादावव्याप्तिरिति भावः· यद्यपि साध्यतावच्छेदकभिन्नो यः साध्यवृत्तिधर्मस्तदनवच्छिन्नैव हेतुमन्निष्ठाभावस्य प्रतियोगिता निवेशनीयेत्युक्ताव्याप्त्युद्धारस्तथापि प्रमेयवान् वाच्यत्वादित्यादावव्याप्तिः पर्वते घटत्वावच्छिन्नाभावस्य तादृशधर्मावच्छिन्नत्वात् प्रमेयत्वावच्छिन्नाभावस्य चाप्रसिद्धत्वादिति भावः· सार्वभौममतमनुसृत्याह यदीति· अथेति· अप्रतियोगित्वं स्वनिरूपकप्रतियोगितावत्त्वस्यार्थः· प्रतियोगित्वाभावः· हेतुमन्निष्ठाभावप्रतियोगित्वाभावः· ननु तादृशाप्रतियोगिसामान्यत्वे भेदमात्रस्यैव व्याप्यवृत्तित्वेन तदवच्छेदकत्वोक्त्यसम्भवात्· नन्वेवं न रूपवान् पृथिवीत्वादित्यादावतिव्याप्तिः रूपेऽपि [illegible]त्वावच्छेदेन तादृशाप्रतियोगित्वाभावसत्त्वात् तौ धर्मविशेषमन्तर्भाव्य पाति· एवं १

ति॰ तथा च हेतुमन्निष्ठाभावप्रतियोगितावच्छेदको यो धर्मस्तदवच्छिन्नसामानाधिकरण्यमेव तद्धर्मावच्छिन्नस्य व्याप्तिरिति भावः॰ रूपवान्पृथिवीत्वादित्यादाव
व्याप्तिमुद्धरति॰ अस्ति चेति॰ अयं रूपत्वावच्छेद्यः पृथिवीत्वादिमन्निष्ठाभावप्रतियोगित्वाभावो रूपादावस्तीत्यर्थः॰ प्रमाणमाह॰ रूपत्वादिनेति॰ प्रतियोगिताया इ
ति॰ पृथिवीनिष्ठाभावप्रतियोगिताया इत्यर्थः॰ अवच्छेदकत्वाभाव इति॰ प्रात्यक्षिकप्रतीत्यभिप्रायेण॰ तथाविधशाब्दस्य तु तादृशप्रतियोगित्वं न रूपत्वा
वच्छेद्यमित्यर्थो ग्राह्यः॰ तदभावेति॰ तादृशप्रतियोगित्वाभावेत्यर्थः तथा चोक्तलक्षणप्रसिद्धिरिति भावः॰ रूपत्वावच्छेदेन तादृशप्रतियोगित्वा
भावे बाधकमाह॰ अन्यथेति॰ घटजनकत्वं दण्डत्वेन तु द्रव्यत्वादिना घटाभावप्रतियोगित्वं घटत्वेन तु पटत्वादिनेत्यादिप्रतीत्या द्रव्यत्वावच्छेदेन
दण्डादौ घटजनकत्वाद्यभावः पटत्वावच्छेदेन घटाभावप्रतियोगित्वाभावश्च घटादौ सिद्ध्येदिति भावः तथा च दण्डो न घटजनकः घटो न
घटाभावप्रतियोगीत्यादिप्रतीत्यापत्तिः॰ प्रतिबन्धे तु नरत्वादाह॰ प्रमेयेति॰ सुवचत्वाद्वेति॰ तथा च प्रमेयधूमवान्वह्नेरित्यादावतिव्याप्तिरिति भावः॰
अर्थेति॰ तथा च साधननिष्ठसामानाधिकरण्यनिरूपकतावच्छेदकयद्धर्मावच्छेदेन हेतुमन्निष्ठाभावप्रतियोगित्वाभावस्तद्धर्मावच्छिन्नसामानाधि
करण्यं व्याप्तिरित्यर्थः॰ अत्र साधननिष्ठसामानाधिकरण्यनिरूपकतायाः अवच्छेदकत्वमनतिरिक्तवृत्तित्वविशिष्टस्वरूपसम्बन्धः स्वरूपसम्ब
न्धमात्रं वा॰ प्रथमे॰ असमानेति॰ असमानाधिकरणो धूमो यस्य तद्रूपः पिण्डस्य वह्नेस्तद्वृत्तितयेत्यर्थः॰ न तदवच्छेदकं॰ न धूमनिष्ठसामाना
धिकरण्यनिरूपकतानतिरिक्तवृत्तिः तथा च वह्निमान्धूमादित्यादावव्याप्तिरिति भावः॰ द्वितीये॰ कम्बुग्रीवेत्यादि॰ असाधनत्वं॰ अव्यापकत्वं॰

घटत्वापेक्षया गुरुतरं कम्बुग्रीवादिमत्त्वावच्छिन्नाधिकरणत्वाप्रसिद्धमात्र स्वसामानाधिकरण्यनिरूपकतानवच्छेदकत्वादिति भावः । अत एव लघुसमनियतगुरुरूपेण
साध्यतायामव्याप्तेरेव । न निस्तार इति । प्रमेयधूमसाध्यकेऽव्यभिचारित्वनिव्याप्तेर्निरासेऽपि तत्साध्यकसद्धेतावव्याप्तितादवस्थ्यादिति भावः । न च पूर्वलक्षण इवात्रा
पि साधनवन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगित्वाभावावच्छेदकं तद्भिन्नधर्मवत्तासामानाधिकरण्यं व्याप्ति
रित्युक्तौ निस्तार इति वाच्यं । तादृशप्रतियोगित्वाभावस्याप्यविशिष्टत्वेन तत्प्रतियोगित्वाभावकूटत्वेन निवेश्योऽन्यथा गुरोरवच्छेदकत्वं विना दुर्वचत्वापत्ते
स्तथा च वह्निमान् धूमादित्यत्रैवाव्याप्तिः धूमवन्निष्ठाभावप्रतियोगितावच्छेदकीभूतस्य घटत्वादेः स्वविशिष्टसंबन्धिनिष्ठपटाद्यभावीयप्रतियो
गित्वाभावानवच्छेदकत्वेन पारिभाषिकावच्छेदकाप्रसिद्धेः घटादौ पटाद्यभावीयप्रतियोगित्वाभावस्य व्याप्यवृत्तित्वेनावच्छेदकानपेक्षणात् ।
न च तादृशयत्किञ्चित्प्रतियोगित्वाभावस्यैवावच्छेदकं निवेश्यं तथा च घटत्वादेः स्वविशिष्टसम्बन्धिनिष्ठस्वतन्त्रघटाद्यभावस्य प्रतियोगित्वाभावावच्छेदकतयैव
पारिभाषिकावच्छेदकत्वमिति वाच्यं । तथा सति धूमवन्निष्ठाभावप्रतियोगितावच्छेदकस्य घटत्वादेर्वह्नित्वादिविशिष्टसंबन्धिनिष्ठतत्तद्घटाभावप्रति
योगित्वाभावावच्छेदकत्वात् वह्निमान् धूमादित्यादौ वह्नित्वादेरपि पारिभाषिकावच्छेदकत्वापत्तेरिति भावः । वस्तुतस्तु प्रकृतसाध्यवत्तानिरूपितविशेषणतावि
शेषसम्बन्धेन यदभावप्रतियोग्यधिकरणत्वाभाववत्त्वं हेतुमतः तदभावाप्रतियोगिवृत्तिसाध्यतावच्छेदकवह्नित्वसामानाधिकरण्यं व्याप्तिरि
ति मूलतात्पर्यमतो रूपवान् पृथिवीत्वादित्यादौ नाव्याप्तिः न वा सत्तावान् जातेरित्यादौ विशिष्टसत्ताभावमादायाव्याप्तिः सत्ताधिकरणतानिरूपित

जा॰टि॰
वि॰व्या॰

२

विशेषणता विशेषसम्बन्धेन विशिष्टसत्ताभावप्रतियोगिमत्त्वं स्वगुणादौ सत्त्वात्· विशिष्टसत्तावाञ्जातेरित्यादौ विशिष्टसत्ताभावप्रतियोगिमत्त्वस्य विशिष्ट
सत्तात्वरूपसाध्यभावच्छेदकावच्छिन्नाधिकरणतीयविशेषणसम्बन्धेन गुणादावसत्त्वात्· विशिष्टसत्ताभावो लक्षणघटक इति नातिव्याप्तिः· तादृशेति· हेतुसमाना
धिकरणाभावीयेत्यर्थः· पौनरुक्त्यमपाकर्तुमाह· अत्यन्ताभावगर्भेति· सामान्यविशेषेति· स्वव्यापकसाध्यसमानाधिकरणसाधनजातीयत्वं सामान्यं
तत्साधननिष्ठतादृशसाध्यसामानाधिकरण्यं विशेषः· तादृशमभिप्रेत्य द्वितीयमवतारयति· प्रथम इति· तथा च साधनवन्निष्ठान्योन्याभावाप्रति
योगिस्वाश्रयकसाध्यसामानाधिकरण्यरूपस्य प्रथमलक्षणार्थस्य साध्याधिकरणताद्युपनिवेशेन गुरुतया तदपेक्षया लाघवादेव साधनवन्निष्ठा
न्योन्याभावाप्रतियोगिसाध्यवद्वृत्तित्वपर्यवसितं द्वितीयलक्षणमित्यर्थः· तद्रूपवान्धूमादित्याद्येकव्यक्तिसाध्यकस्थलेऽन्योन्याभावस्य प्रतियोऽप्र
वृत्तित्वविवक्षयाप्यव्याप्तिवारणसम्भवादाह· नानाव्यक्तीति· नानैव व्यक्तिराश्रयो यस्य तादृशसाध्यक इत्यर्थः· तथा च न द्रव्यभेदमादाय वह्निमान्धूमाद्द्र
व्यं पृथिवीत्वादित्यादावव्याप्तिरिति भावः· ननु हेतुसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वविवक्षणेनैव दोषद्वयं न आ
न ह· तत्साध्यवत्त्वस्य चेति· तदवच्छेदकत्वादित्यन्वयः· तथा च वह्निमान्धूमात् रूपत्वाव्यापकजातिमान् रूपत्वादित्यादौ तत्तद्वह्निमत्त्वावच्छिन्नभेदं नील
पीतत्वाद्यवच्छिन्नभेदं चादायाव्याप्तिरिति भावः· यद्रूपेति· अधिकरणभेदेप्येकधर्मावच्छिन्नाधिकरणत्वस्यैक्यमतेनेदमन्यथा वह्नित्वावच्छिन्नवत्त्व
स्यापि पर्वतादौ नानात्वेन दोषतादवस्थ्यापत्तेः· हेतुमन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वसामान्यं यद्रूपानवच्छिन्नं तद्रूपावच्छिन्नसा

मानाधिकरण्येवातात्पर्यं· ननु यद्रूपावच्छिन्नत्वमित्यत्र यत्पदस्य सखण्डधर्मपरत्वे वह्निमान्धूमादित्यादावव्याप्तिर्वह्नित्वादेरखण्डत्वात्· अखण्ड
धर्मपरत्वे च वह्निसंयोगवान्धूमादित्यादौ तथेत्यत आह· वह्न्यादाविति· तद्वदादौ· वह्निसंयोगवदादौ· वह्नित्वादिकमेवेति· तथा च सर्वत्रैव यत्पदेना
खण्डधर्मो धर्तव्य इति भावः· तादृशेति· हेतुसमानाधिकरणेत्यर्थः· न त्वेवं वह्निसंयोगीत्यनुमितिर्न स्यात्तादृशसंयोगत्वस्य व्यापकतानवच्छेदक
त्वेनानुमितेस्तदवच्छिन्नविधेयताकत्वादतः साध्यसाधनभेदेन व्याप्तेर्नानात्वादननुगमेव सा वाच्येत्याह· यदित्यादिना· यदिति· द्रव्यं पृथिवी·
जा·टि·
वि·व्या·
त्वादित्यादौ यत्साध्यं तादृशान्योन्याभावप्रतियोगितानवच्छेदकमित्येव वक्तव्यं· अत एवेदं द्रव्यमित्यनुमितौ निरवच्छिन्नद्रव्यत्वनिष्ठविधेय
ताकत्वमपि सर्वसिद्धं संगच्छते· निरुक्तव्याप्तेस्तादृशानुमितावेव प्रयोजकत्वादिति भावः· वह्निमान्धूमादिकमभिप्रेत्याह· यद्रूपावच्छिन्नमिति·
अधिकरणत्वमिति शेषः· तेन न प्रागुक्तदोषः· एवमग्रेऽपि· वह्निसंयोगवानित्यादिकमभिप्रेत्याह· यादृशेति· उक्तरीत्येति· रूपादिसाध्यकपृ ३
थिवीत्वादावव्याप्तिमित्यर्थः· आकिञ्चित्करं· व्यधिकरणयोर्व्याप्त्यभावाप्रयोजकं· तात्पर्यमिति· तथा चासामानाधिकरण्याव्यापक
त्वेनैव तादृशप्रतियोगित्वोपन्यास इति भावः· व्यधिकरणयोर्दैशिकव्याप्त्यसम्भवात्· तादृशव्याप्तेर्युगपदुत्पादविनाशयोः किञ्चि
त्करत्वादाह व्याप्तिरेवेत्यस्यापीति· अर्थान्तरत्वमपाकर्तुमवतारयति· अन्योन्येति· लक्षणस्येत्यवश्यकत्वमविवक्षितं· ननु भेदस्यापि प्रत्य
भिज्ञानानत्वकागतिरित्याह· तथा चेति· अभेदस्याबाधितत्वेनेत्यर्थः· अनुभूयमानेति· अनुव्यवसीयमानसंयोगिभेदावगाहि

पि

नाकाया इत्यर्थः शिखीत्यादि यथाशिखिनो धर्मिणः सत्त्वेपि शिखी विनष्ट इति प्रतीत्या विशेषणीभूतशिखाया एव ध्वंसरूपोऽभावो गृह्यते न तथा संयोग्यभेदेन संयोगीति प्रतीत्या विशेषणस्य संयोगस्यैवाभावो गृह्यत इति भावः नन्वेवं गुणेन संयोगीति प्रतीतेरपि संयोगाभाव एव विषयोस्तु न संयोगिभेदः तथा च संयोगी सत्त्वादित्यादौ निरुक्तलक्षणातिव्याप्तिरत आह यत्रचेति तत्सिद्धिः संयोगिनो भेदसिद्धिः भेदवत् संयोगिभेदवत् तदभावस्य संयोगिभेदाभावस्य तदुपपत्तेरिति एकत्र धर्मिणि संयोगिभेदतदभावयोर्निश्चयोपपत्तेरित्यर्थः वस्तुतः प्रत्यक्षमणौ संयोगिभेदस्यापि अव्याप्यवृत्तित्वोपगमात् वृक्षे संयोगित्वावच्छिन्नभेदसत्त्वेपि न क्षतिः अत्यन्ताभावगर्भायां प्रतियोग्यनधिकरणत्वेनेवान्योन्याभावगर्भायामपि व्याप्तौ स्वप्रतियोगित्वावच्छिन्नभिन्नस्यैव हेत्वधिकरणविशेषणादेव कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्त्यसम्भवात् न चैवं न चान्योन्याभावस्येत्यादिमूलासंगतिः कपिसंयोगित्वावच्छिन्नभेदस्यैव कपिसंयोगिभेदप्रतियोगित्वावच्छिन्नभेदस्यापि मूलावच्छेदेन वृक्षे सत्त्वमाशंक्यैव तदवतारात् अभेदस्येत्यादिमूलस्यापि संयोगिभेदप्रतियोगित्वावच्छिन्नाभेदस्येत्यर्थकत्वादित्यस्मद्गुरुचरणाः ननु भेदस्यात्यन्ताभावो न प्रतियोगितावच्छेदकीभूतसंयोगादिस्वरूपो येनाव्याप्यवृत्तेस्तस्य भेदेन संभवविरोधो न स्यात् किन्त्वतिरिक्त एवेति तद्विरोधो दुर्वार इत्यत आह यथाहीति ननु यद्वत्त्वज्ञाने यदत्यन्ताभावाग्रहस्तस्यैव तदत्यन्ताभावविरहत्वे प्रतियोगिव्याप्यवत्त्वस्यापि तथात्वापत्तिरित्यत आह अभावेति तदत्यन्ताभावस्याभावव्यवहारश्चेत्यर्थः स एव प्रतियोगितावच्छेदकावच्छिन्न एव ननु बहूनां संयोगव्यक्तीनां संयोगिभेदाभावत्वकल्पने गौरवा~~[illegible]~~ दभावत्वक्लृप्तेः प्रमाणानुरोधादतिरिक्त एव संयोगिभेदाभावः कल्पनार्ह इत्यत आह आधिक्येपीति अव्याप्यवृत्तित्वादिति तथाचैकत्र भेदतदभावयोः संभवान्न मिथो बाधकत्वमिति भावः अतए

जा॰टि॰
दि॰व्या॰

व॰भेदस्याव्याप्यवृत्तित्वादेव तथा भेदबाधकं॰ असम्भवादिति॰ कपिसंयोगाद्यात्मकस्यातिरिक्तस्य वा संयोगिभेदाभावं स्य मूलाद्यवच्छेद्यत्वासम्भवादित्यर्थः॰त
था चोक्तप्रतीतेर्विषयबाधः॰ स्वरूपबाधमप्याह॰ असिद्धेश्चेति॰ मूलावच्छेदेन भेदस्यैव प्रत्ययान्मूले वृक्षः कपिसंयोग्यभिन्न इति ज्ञानस्यैवासिद्धेरित्यर्थः॰ज्ञा
नमिति॰ तथेति पूर्वेणान्वयः॰ एवमग्रेपि॰ तद्वृत्तित्वस्यैव वृक्षवृत्तित्वस्यैव॰ तज्ज्ञानं॰ कपिसंयोगिभिन्नभेदज्ञानं॰ असिद्धेरिति॰ मूलावच्छेदेन भेदस्यैव प्रत्यया
त्तादृशाभिन्नभेदज्ञानस्यैवासिद्धेरित्यर्थः॰ तथा च स्वरूपबाधः॰ विषयबाधमप्याह॰ तद्धर्मवदित्यादि॰ ननु प्रतियोगितावच्छेदकधर्मस्याभिन्नभेदत्वे तद्दृष्टचरम
तेआह॰ नहीति॰ न च घटस्यैकत्वे न घटभिन्नभेदत्वोपगमेपि संयोगव्यक्तीनामनेकत्वात्तेषु संयोगिभिन्नभेदत्वापेक्षयालाघवादतिरिक्त एव संयोगिभिन्नभे ४
दोयुक्त इति वाच्यं॰ तथात्वेपि तस्याव्याप्यवृत्तित्वादन्यथा मूले वृक्षः कपिसंयोगिभिन्नो न इति प्रतीतेः प्रमात्वापत्तेरिति भावः॰ सर्वत्रेति॰ नानाप्रतियोगिकाभावस्थ
ले॰ अत एवेति॰ परास्तमित्यग्रेन्वयः॰ आद्ययोरन्यतराभावप्रतियोगिनोः॰ सविरोधः॰ सङ्कोच्यतां॰ अंशतो भ्रमविषयत्वेन कल्प्यतां॰ ननु मूले वृक्षे न संयोग इति
प्रतीतेः संयोगवद्भेदविषयकत्वमेव कल्प्यतामित्याद्ययोः संकोचे मानाभाव इत्यत आह॰ नहीति॰ संयोगस्यैव तद्वृत्तोपि क्वचिदुपस्थितिसम्भवान्नियमत
इत्युक्तं॰ अनुपस्थितेरिति॰ तथा च कारणबाधादेव तादृशप्रतीतेर्न संयोगिभेदावगाहित्वमिति भावः॰ अनुभवबाधमप्याह॰ प्रतियोगीति॰ अभावांशे सा
क्षात्परस्परया वा प्रकारत्वेन संयोगवतोनुव्यवसायेनाग्रहणाच्चेत्यर्थः॰ भासमानं॰ प्रागुपस्थितं यद्विशेषणं संयोगस्तदभावविषयकत्वेनेत्यर्थः॰ अनियम
योः॰ अन्योन्याभावप्रतियोगितावच्छेदकयोः॰ सङ्कोच्यतामिति पूर्वेणान्वयः॰ विशेष एवेति॰ तथा च घटभेदघटत्वादीनां विरोधस्य क्लृप्तत्वेपि संयो

गगनादेर्द्वयोस्तथात्वेमानाभावात्तस्याव्याप्यवृत्तित्वेबाधकाभावइतिभावः·ननुसंयोगिभेदोनावच्छिन्नवृत्तिकःअन्योन्याभावत्वात्घटभेदवदित्य
नुमानात्संयोगिभेदस्याव्याप्यवृत्तित्वसिद्धावर्थवशात्सम्पन्नस्वरूपसंयोगेनसमतस्यविरोधःसंयोगिभेदोनसंयोगावद्वृत्तिःसंयोगिभेदत्वात्घटत्वा
द्यभाववदितिव्यतिरेकिणातस्याव्याप्यवृत्तित्वसाधनमित्यतआह·अन्यतमाभावेति·अवाधितेनेति·विभिन्नावच्छेदेनेत्यादितथाचसंयोगिभेदोऽवच्छिन्न
वृत्तिकस्तत्वेनप्रतीयमानत्वादित्यनेनप्रतिबन्ध्यादवच्छिन्नवृत्तिकत्वाद्यभावकल्पनमेवदुःशक्यमितिभावः·मूलेवृक्षोनसंयोगीतिप्रतीतेःशिखीवि
नष्टइतिवद्भासमानविशेषणाभावविषयत्वंयदुक्तंतत्रदृष्टान्तवैषम्यमाह·किंचेति·विशेष्येति·शिखिनि·तदाधानात्·साक्षात्ध्वंसबाधात्·विशेषणा
ध्वंसइति·तथाचशिखीविनष्टइत्यत्रस्ववृत्तिशिखानिष्ठप्रतियोगित्वरूपपरम्परासम्बन्धेनैवशिखिनोपिध्वंसेप्रकारत्वमित्याशयः·नचैवंसत्य
पिपुरुषेशिखीविनष्टइतिवत्पुरुषोविनष्टइत्यपिप्रतीतिःस्यादितिवाच्यं·तत्तद्विशेषणध्वंसादौतत्तद्विशेषणाद्यवच्छिन्नस्यैवनिरुक्तपरम्परया
संसर्गत्वादतएवायंघटःश्यामोभविष्यतीत्यादौश्यामरूपनिष्ठप्रतियोगितायाःप्रागभावेश्यामरूपावच्छिन्नस्यसंसर्गत्वेपिनघटत्वविशि
ष्टस्यसंसर्गत्वंअतएवतत्रैवघटोभविष्यतीत्यादिकोनप्रत्ययइतिध्येयम्·विशिष्टभेदमित्यस्यभेदत्वेनेतिशेषः·कथमिति·तादृशप्रतीताव
न्यतमाभावत्वानुल्लेखादितिभावः·एकोल्लेखिप्रत्ययस्यान्यावगाहित्वोपगमेभ्रममात्रस्योच्छेदइत्याह·नखल्विति·बाधकैः·कारण
बाधादिभिः·शक्यतइति·अन्यथाशुक्तौरजतत्वादिप्रतीत्यपलापादेवान्यथाख्यातिनिरसनेनजितंप्राभाकरादिभिरितिभावः॰

जा॰ टि॰
वि॰ व्या॰

तस्याः न संयोगीति प्रतीतेः॰ विषय इति॰ स्ववृत्तिसंयोगनिष्ठप्रतियोगित्वसम्बन्धेनैव संयोगिनो भेदे प्रकारत्वादिति भावः॰ अग्र इति॰ न च संयोगभेदपर्यवसन्नत्वस्योक्तपरम्परया संयोगिभेदस्य वृक्षे सत्त्वेपि तस्य व्याप्यवृत्तित्वेनाग्रानवच्छेद्यत्वादेव न तादृशप्रत्ययप्रसङ्ग इति वाच्यं॰ तथा सत्युक्तक्रमेणासंयोगिभेदस्य मूलानवच्छेद्यत्वान्मूले न संयोगीति प्रत्ययापलापापत्तेरिति भावः॰ शब्दविशेषाणां प्रामाण्यानुरोधादपि भेदस्याव्याप्यवृत्तित्वं वाच्यमित्याह॰ गुणत्वे चेति॰ पिठरपाकानुपगमे रक्तघटस्य श्यामान्यत्वं व्याप्यवृत्त्येव अन्यथोक्तं दण्डादीभि॰ श्यामपदस्य गुणोपस्थापकत्वात्तदन्यताभावबोधने धर्म्मोपसर्जनत्वनिबन्धननिराकाङ्क्षत्वासम्भवादाह दण्डादीति इति तु कश्चिन्न॰ व्यवहारः॰ प्रमाणमिति शेषः॰ नत्र॰ घटो न श्याम इत्यादौ॰ विशेषणस्य॰ श्यामत्वदण्डादेः॰ अनुयोगिनीति॰ तत्र नञा संसर्गाभावबोधने तदर्थकसप्तम्याः सत्त्वादिति भावः॰ तदेव द्रढयति॰ न खल्विति॰ ननूक्तस्थले संसर्गाभावबोधने काङ्क्षाविरहत आह॰ तथात्वे चेति॰ प्रसङ्गादिति॰ घटेपि घटान्यताभावस्य सत्त्वादिति भावः॰ ननु यत्र नञ्रहितयोः प्रतियोग्यनुयोगिनोः साकाङ्क्षत्वं तत्रैव नञा अभावबोधने प्रकृते च घटो घट इत्यस्य निराकाङ्क्षत्वेन नापि घटे घटस्य भेद इव संसर्गाभावोपि न बोध्यते कम्बुग्रीवादिमान्न घट इत्यादिकं तु भूतलं न घट इत्यादिभिः समानमित्यत आह॰ अपि चेति॰ यद्यपि नञा प्रत्ययार्थविशेषणतानापन्नस्यैवान्यताभावबोधकत्वमनुयोगिनि सप्रत्ययपदापेक्षा वक्तव्या न तु तद्विशेषणतापन्नस्येति यदि ब्रूयात्तदाप्याह अपि चेति॰ एतेन घटो घटान्य इत्यादौ नञ्रहितयोः प्रतियोग्यनुयोगिनोर्निराकाङ्क्षत्वेपि नञाभावबोधनात्तत्रैव घटो न घट इ

५

भि

त्यत्रापि अभावबोधनेन बाधकाभाव इत्यपास्तम्। विशिष्टवाचकेति। विशिष्टबोधके इत्यर्थः दण्डीत्यादेर्वाक्यत्वेन वाचकत्वासंभवात्। यद्वा वैयाकरणमतेनेदं।
धर्मीति। मतुवर्थसम्बन्धि विशेषणतयोपस्थितस्येत्यर्थः उपस्थितस्येत्यस्य वृत्तिशब्दादित्यादिः तेन नीलो घटः पटश्चेत्यादौ घटविशेषणतयोपस्थितस्या
पि नीलादेः पटेऽन्वयः नीलघटः पटश्चेत्यादौ तु वृत्तिशब्दादेव नीलस्य तथोपस्थितिरतः पटे तस्य नान्वयः। विशेषणमात्रेति। तथा च चैत्रो न दण्डीत्यत्र मतु
पः पदसाधुत्वं फलं न तु तदर्थानुप्रवेश इति भावः। दुर्वारत्वादिति। यद्यपि मूलेन घट इत्यत्रैव चैत्रो न दण्ड इत्यादावपि पूर्वपक्षिणा दण्डात्यन्ताभावबुद्धा।
विरापत्तिः कर्तुश्च क्यतस्यैव तथापि तन्त्रासार्थस्य नञोऽत्यन्ताभावबोधने तन्नाम्नः प्रथमान्तत्वं प्रथमासाकाङ्क्षत्वं वा तन्त्रं अन्यथा गृहे दण्डस्य नेत्यत्रापि द
ण्डात्यन्ताभावप्रतीत्यापत्तेरतश्चैत्रो न दण्डीत्यादौ दण्डपदस्य प्रथमान्तत्वस्य प्रथमासाकाङ्क्षत्वस्य वाऽभावान्नात्यन्ताभावबोधोऽत आह दुर्घटः। चैत्रमैत्रयोर्दण्डघ
टौ नेत्यादि यथासंख्यस्थले चैत्रधर्मिकदण्डात्यन्ताभावबोधे दण्डपदस्य प्रथमान्तत्वव्यभिचारेऽपि प्रथमासाकाङ्क्षत्वमस्त्येव द्वन्द्वोत्तरप्रथमायाः सकलप्र
कृत्यर्थान्वयित्वादिति दिक्। एतेनेति। चैत्रो न दण्ड इत्यादौ दण्डात्यन्ताभावाप्रत्ययेनेत्यर्थः। विनैवेति। यत्राधिकरणाभावयोराधाराधेयभावः संसर्गस्तत्रैव सप्तम्य
पेक्षणं चैत्रो न दण्डीत्यत्र दण्डाभाववत्तादात्म्यस्यैव चैत्रे संसर्गत्वान्न सप्तम्यपेक्षेति भावः। ननु चैत्रो न पचतीत्यादौ पाककर्तरीव चैत्रो न दण्डीत्यादावपि दण्ड
स्यात्यन्ताभावः सप्तमीं विनापि प्रतीयतामत आह एवञ्चेति। चैत्रो न दण्ड इत्यादौ संसर्गाभावप्रतीतिभिया सप्तम्यपेक्षणे चेत्यर्थः। शक्त्येति। शाब्दिकानां मते
न। न्यायमतेनाह। लक्षणया वेति। भेदो भासत इति। तथा च दण्डस्य नाप्रसिद्धिरिति भावः। नन्वेवं अनुभवसिद्धस्य कृत्यत्यन्ताभावबोधस्यापलाप इत्यत आ

जा·दि·
विव्या·

हवत्तुतइत्यादि· स्यादित्यादिभेदेनविभक्तेर्द्वैविध्यादुदाहरणद्वयं· प्रातिपदिकार्थस्येति अभावान्वयबोधनेइत्यनुषज्यते· निपुणतरमिति· यत्रानुयोगितिप्रतियो
ग्यन्वयेसम्बन्ध्यपेक्षानतुवैवन्नज्ञानदन्यताभावबोधनेतदनुयोगितिसम्बन्ध्यपेक्ष्यतेनतुसर्वत्रेतिनञ्यादेवक्ष्यमाणत्वादितिभावः· भेदस्यव्याप्यवृत्तित्ववादिनां
प्राचांमतेरक्ततादशायांनश्यामइत्यादिव्यवहारमुपपादयति· ननुइत्यादिना· ननुवैधर्म्यमपिभेदएवेतितद्वत्त्वंनञ्वाच्यमितिमतआह·वैधर्म्यंचेति· तद्वै
शिष्ट्यकालावच्छेदेनतद्वतिवर्त्तमानस्याभावस्यप्रतियोगिधर्मवत्त्वंतद्धर्मविशिष्टस्यवैधर्म्यंतथाचरक्तोनश्यामइत्यत्रश्यामत्ववैशिष्ट्यकाला
वच्छेदेनश्यामवद्वृत्त्यभावप्रतियोगिधर्मवान्रक्तइत्याकारकस्तत्रबोधः· ननुपृथक्· ननुभिन्नः· ननुविशिष्टधीजनकत्वादिगर्भस्यसम्बन्धस्यप्रवेशेव्या
प्त्याश्रयादिरेवेत्यतआह· निरूपितेति· साध्यवान्नुयस्येतिविग्रहेसाध्यवत्येवसाधनसम्बन्धोनेरूपकःसवाधिकरणत्वंतनुव्याप्तेस्तत्रप्रवेशइतिप्रागेवोक्तमिति
भावः· मूलेकस्येतिकुत्रेत्यादि· तथाचकिंहेतुकंकिंसाध्यकानुमितिजनकतावच्छेदिकाव्याप्तिरित्यर्थः·· ननुतद्धेतुसाध्यकानुमितिप्रत्ययितद्धेतुसाध्यकनाना
विधव्याप्तिज्ञानानांहेतुत्वादित्थमप्यननुगमस्यइत्यतआह· दीधितावित्थंचेति· इत्थमपीत्यर्थः· वक्ष्यतइति· तद्धेतुसाध्यकव्यभिचारधीविरोधिधीविष
यत्वेनतद्धेतुसाध्यकनिखिलव्याप्तिरनुगमय्यतद्गोचरज्ञानत्वेनैवतद्धेतुसाध्यकानुमितिंप्रतिहेतुत्वंव्याप्तिग्रहोपायेवक्ष्यतइत्यर्थः· लक्षणत्रयस्यैवयथा
श्रुतस्याव्याप्तिसम्भवादेतेइत्यनेनलक्षणद्वयाभिधानमसङ्गतमतोव्याचष्टे· एतेइति तथाचान्योन्याभावगर्भत्वेनद्वयोरैक्यादेवद्विवचनोपपत्तिरिति
भावः· धर्मिणःसिद्ध्यसिद्धिपराहतत्वादीतिरिक्तंहिबाधवद्वृत्त्यभावस्यासत्त्वंशङ्कितमहाव्यभिचारित्वन्यथावितर्कयति· नन्वित्यादिना· नभवतीत्यस्या

६

भिप्राय इत्यनुगमेणान्वयः स्वाश्रयत्वादिना समानाधिकरणं यद् घटत्वपटत्वादि तदवच्छिन्नाभावावगाहीत्यर्थः द्वित्वस्य घटपटावित्यादि तथा च घटो नास्ती
त्यादिप्रत्ययात् घटपटौ न स्त इत्यादिप्रत्ययस्य वैलक्षण्यं विषयभेदं विना अनुपपद्यमानं द्वित्वस्यावच्छेदकत्वं साधयतीति भावः ननु द्वित्ववैशिष्ट्या
घटिकावगाहित्वेनैव वैलक्षण्यमुपपन्नमत आह ग्रहेति· तथा च भूतले घटपटौ न स्त इति प्रतीतेर्घटत्वादिप्रत्येकधर्मावच्छिन्नाभावगोचरत्वे भूतले घटो
न वेति संशयो न स्याद्बाधनिर्णयसत्त्वादित्यर्थः इन्द्रियेण द्वित्वावच्छिन्नाभावस्यानिर्णयदशायां सन्निकृष्टत्वेन घटत्वादिप्रत्येकधर्मावच्छिन्नाभावत्या
प्यवच्छेदनिर्णय इति तदानीं संशयानुत्पादस्य सर्वसिद्धत्वाद्दृष्टादिनेत्युक्तं· ननु घटपटौ न स्त इत्यादिनो द्वित्वाश्रयवृत्तिघटत्वादिरूपेणाभावनिर्णय
तदानीं भूतले घटो न वेति संशये बाधकाभावः घटत्वप्रकारेणाभावनिश्चयस्यैव तद्विरोधित्वादत आह विषयेति· घटपटप्रत्येकाभावस्याननुगतत्वा
दिति भावः· विशेषणतावच्छेदकानुगमादेव घटपटौ न स्त इत्यादिप्रत्ययस्यानुगताकारत्वमित्यभिप्रायेण शङ्कते न चेति· द्वित्वाधिकरणेति· तथा च घटपटप
र्याप्तद्वित्वाश्रयप्रतियोगिकाभावत्वेनैव घटपटादिप्रत्येकाभावस्यानुगमः· ननु घटपटौ न स्त इति प्रतीतेः कुत्रचिद्धर्मावच्छेदकत्वावगाहित्वस्यानुभव
सिद्धत्वान्नोक्तक्रमेण तन्निर्वाह इत्यत आह द्वित्वसमानेति· मात्रपदेनाद्वित्वस्यावच्छेदकत्वव्युदासः· द्वयमित्यस्य घटपटेत्यादि· शङ्कां निरस्यति· नाहद्वौ
ति· तथा च यत्र क्वचिद् घटपटोभयशून्ये घटपटोभयवत्यपि घटपटौ न स्त इत्यादिप्रतीत्यापत्तिरिति भावः· न च घटत्वपटत्वान्यतरनिरूपितसमवा
येनैव घटपटौ न स्त इत्यत्र धर्मस्य द्वित्वसामानाधिकरण्यं निवेश्यम् एवं कुण्डकुण्डलौ न स्त इत्यादावपि यथायोगं तद्ग्राह्यं अतो द्वित्वाद्यवच्छेदेना

जा·टि·
वि·व्या·

यदेवइत्यतआह· छिन्नसामानाधिकरण्येनेति· अनन्वयेति· यदुपस्थितिदशायां याद्दशप्रतीतिस्तदवगाहित्वस्य नाद्यप्रतीतावसंभवादेवेत्यर्थः· परम्परयेति·
स्वपर्याप्त्यधिकरणवृत्तिसम्बन्धेनेत्यर्थः· नास्तीत्यादिरिति· घटपटवृत्तिद्वित्वेत्यर्थः· तावत्त्वस्य घटपटादिवृत्त्यादि· द्वयोःप्रतियोगिन्योल्लेखे विशेषितत्वं तत्राह· छिन्ना
देरिति· घटपटयोर्द्वित्ववत्ताप्रत्यक्षेण तुल्यवित्तिवेद्यतया द्वित्वे घटपटवृत्तित्वावगाहनेपि नियमतस्तद्विषयकत्वस्थले तदसंभवादस्माकं तु नील
घटो नास्तीत्यादौ नीलत्वघटत्वाभ्यामिव घटपटौ न स्त इत्यादिस्थले घटत्वपटत्वद्वित्वैरवच्छिन्नप्रतियोगिताकस्यातिरिक्ताभावस्य बोध
नानानुपपत्तिः अवच्छेदकत्वस्थितिनय एव पर्याप्त्यादिनिभावः· अनस्व वैशिष्ट्यानुपस्थितावप्युक्तप्रतीतेरेव· नन्वेकविशिष्टापरत्वेनैवो
भयत्वमिति वैशिष्ट्यानुपस्थितौ घटपटोभयं नास्तीति प्रतीतिरसिद्धैवेत्यत आह· विरुद्धकोटीति· इदं च विरोधितानियामकसम्बन्धेन वैशिष्ट्याप्र
सिद्धिमूलत्वनापक्षत्वात् दुष्टप्रायत्वात्· तेन घटत्वपटत्वयोरेव द्वित्वेनाभावस्य प्रतीतेः सिद्धान्तनिरुक्तावुक्तत्वेपि न क्षतिः· घटस्य घटत्वपटत्वाव
च्छिन्नाभावस्यैव प्रतियोगितावच्छेदकद्वित्वमित्यनतिकल्पनं निरस्यति· नान्यत्रेति· तथात्वेपि· द्वित्वादेः घटपटप्रत्येकाभावप्रतियोगितावच्छेदकत्वेपि·
नाद्दशाभावेति· साधनवत्तिवृत्त्यत्यन्ताभावइत्यर्थः· ननु नैते हेतुमन्निष्ठाभावं साध्यतावच्छेदकातिरिक्तपदस्य हेतुधर्मानवच्छिन्नत्वेन प्रतियोगि
त्वेविवक्षणीयं तावता चाव्याप्तिनिरासः अनुगमेपि नगत्यो ना अतिरिक्ताभावमङ्गीकृत्य सिद्धान्तग्रन्थोनोचित इत्यतस्तत्रापि व्यवस्थापयति· अनारे
णाचेति· अभावान्तरमिति· घटद्वयत्वावच्छिन्नप्रतियोगिताकमित्यादिः एकैकेति· तथा च न घटत्वावच्छिन्नाभावेन तदन्यथासिद्धिः· घट ७

द्वयेति॰ तथा च तत्तद्घटत्वावच्छिन्नाभावेनापि तत्तदन्यथासिद्धिरिति भावः॰ पटघटोभयाभावेनो घटा॰ भिन्नस्येवं तत्तद्घटान्यघटत्वावच्छिन्नाभावेष्वेवं कूपे तु घट
द्वयत्वावच्छिन्नप्रतियोगिताकत्वकल्पने घटद्वयवति घटौ न स्त इत्यस्य न प्रसङ्गः॰ न वा एकघटवति तादृशप्रसङ्गस्तथाप्यनन्तेष्वभावेष्वेतादृशप्रतियो
गिताकत्वकल्पनापेक्षया तथाविधप्रतियोगिताकत्वेनैकस्यातिरिक्ताभावस्य कल्पनेदलघीयसी सामान्याभावस्थले वस्तुकैल्प्यत्वादिति भावः॰ न च
घटविशिष्टघटत्वावच्छिन्नाभावस्यैव घटद्वयत्वावच्छिन्नप्रतियोगिताकत्वकल्प्यं ननु तत्तद्घटान्यघटत्वावच्छिन्नाभावेषु घटानामानन्त्यात् तच्च घटवि
शिष्टत्वं स्वनिष्ठभेदप्रतियोगित्वस्वसामानाधिकरण्योभयसम्बन्धेन वक्तव्यमतो घटद्वयवति घटौ न स्त इत्यस्य न प्रसङ्गः॰ नैकघटवति तादृशप्र
सङ्ग इति वाच्यं॰ इष्टकपाले समवायेन घटौ न स्त इति प्रतीतेस्तादृशाभावेनाप्यन्यथाकर्तुमशक्यत्वात् स्वाधिकरणसमवेतत्वस्वनिष्ठभेदप्रतियोगि
त्वोभयसम्बन्धेन घटविशिष्टघटान्तरस्याप्रसिद्धत्वादिति भावः॰ वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वोपगमे स्वपर्याप्त्यधिकरणवत्त्वस
म्बन्धेन घटपर्याप्तद्वित्वाभावस्यैव घटद्वयत्वावच्छिन्नप्रतियोगिताकत्वकल्पनसम्भवादन्तरेणेत्यादिकमयुक्तमिति विभावनीयम्॰ ननु तथाप्यप्रति
योगित्वगर्भोक्तियथाश्रुतलक्षणान्यव्याप्त्यैवेत्यत आह॰ अभ्युपगमादिति॰ अप्रतियोगिपदस्य प्रतियोगितानवच्छेदकधर्मवत्परत्वादिति भावः॰ केचि
त्तु प्रतियोगितानवच्छेदकगर्भे तु समस्तलक्षणे प्रतियोगितानतिरिक्तवृत्तित्वरूपं तदवच्छेदकत्वमभिप्रेत्याशङ्कितं मूले॰ अयोगीति॰ स्वरूपसम्बन्धावि
शेषरूपमवच्छेदकत्वं निविष्टमित्याशयेन परिहृतं॰ अभ्युपगमेवेति॰ तदुभयमित्यादौ तु सर्वत्र धर्मपरो निर्देश इत्याहुः॰ स्वपदस्य साध्यपरत्वेव्यभि

जा·टि·
वि·व्या·

चारणयति व्याप्तिरित्याह स्वीयेति · अप्रतियोगित्वयोरेकसम्बन्धावच्छिन्नत्वं विशेषणताविशेषसम्बन्धावच्छिन्नत्वं वा वक्तव्यं तेनायोगोलकभेदत्वादेर्वि
षयितया धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेपि नाव्याप्तिः न च तथापि विषयितया योगोलकभेदत्ववद्ज्ञानस्य विशेषणतया यो
भावत्तस्य धूमसमानाधिकरणत्वादतिव्याप्तिरिति वाच्यं · तादृग्व्यधिकरणसम्बन्धावच्छिन्नाभावे लाघवात्किंचित्पदार्थस्यैव विषयितया अवच्छे
दकता न गुरुधर्मस्यावच्छेदकत्वस्वीकारे तु प्रतियोगितावच्छेदकताप्येकसम्बन्धेनाविवक्षणीया · यथाश्रुतार्थत्यागे बीजमाह एतेनेति · प्रकृत
मित्यग्रेऽन्वयः · तादृशे साधनवन्निष्ठाभावप्रतियोगितावच्छेदके · अवच्छिन्नस्येति · अप्रसिद्धमित्यग्रेऽन्वयः तथा च यावत्त्वं नावच्छेदविशेषणमि
तिभावः · तादृशावच्छेदकावच्छिन्नस्यापि यावत्त्वं न विशेषणमित्याह · तादृशावच्छिन्नयावदिति · प्रतियोगिकस्येति · अवाच्यप्रसिद्धिरित्यग्रेऽन्वयः
ननु तादृशयावत्प्रतियोगिकोयावत्त्वावच्छिन्नाभावस्याप्रसिद्धिरित्यत आह · अतिप्रसङ्गकादिति · तथा च यावत्त्वावच्छिन्नतादृशाभावमादाय धूमवान्वह्ने
रित्यत्रातिव्याप्तिर्भिन्नयावत्त्वावच्छिन्नाभावस्यैव लक्षणे निवेश्य इति तदप्रसिद्ध्या वह्निमान्धूमादित्यादावसम्भव इति भावः · ननु द्वितीयान्य
त्वाभावस्य यावत्त्वेन विवक्षितः समासनिविष्टतयापि तेन व्युत्पत्तिवैचित्र्याद्यावत्पदस्याभेदान्वयबोधकत्वसम्भवादत आह · तादृशावच्छि
न्नेति · तथाऽप्रसिद्धिः तथा च तन्यर्थेनाघन्यत्वाभावकूटाधिकरणाप्रसिद्ध्या नानाव्यक्तिघटितसाध्यके द्रव्यं पृथिवीत्वादित्यादावव्याप्तिरिति
भावः · अत्र च वह्निमान्धूमादित्यादौ व्यधिकरणयोर्ग्राह्यस्वीकारात्पर्वतीयधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छि

८

न्यतमत्ववतान्यत्वाभावकूटस्याधिकरणं पर्वत एवेति नाव्याप्तिरिति ध्येयम्· वाच्यं गगनत्वादित्यादावेकव्यक्तिसाध्यके तादृशयावदभावघटत्वं सा
धनवत्येव प्रसिद्धमतः प्रायश इत्युक्तं ननु तादृशयावदभावानां प्रत्येकाधिकरणवृत्तित्वं साध्यवाच्यमतो नोक्ताप्रसिद्धिरत आह· रूपवद्धेति· ता
दृशेति· न च ह्रदान्यत्वाभावकूटस्यापि निरुक्ताभाववत्तया तत्प्रत्येकसामानाधिकरण्यस्य कुत्रापि रूपे सत्वात्· न च तादृशयावदभावानां प्रत्येक
समानाधिकरणवृत्तित्वं साध्यतावच्छेदकस्य वाच्यमतो नोक्तदोषः दण्डिमान्दण्डिसंयोगादित्यादावेवाव्याप्तिरिति भावः· यद्यपि तादृशयावद
भावानां प्रत्येकाधिकरणं यद्धर्मावच्छिन्नस्याधिकरणं हेतौ तद्धर्मावच्छिन्नसामानाधिकरण्यविवक्षायां नोक्तदोषस्तथाप्येतस्यैव फलतः
कल्पान्तरेणाग्रे वक्ष्यमाणत्वान्नाशङ्कितमिति भावः· ननु यावन्तः साधनसमानाधिकरणाभावप्रतियोगिनो यत्समानाधिकरणाभावप्रति
योगिन इत्यस्यैव सम्यक्त्वेऽवच्छेदकद्वयोपादानं व्यर्थमतः पिंडभेदस्यैव साधनाव्यापकस्य साध्यवन्निष्ठाभावप्रतियोगित्वविरहाद्धूमवान्व
ह्नेरित्यादिसोपाधावव्याप्त्यभावादत आह· सर्वत्रेति· धर्मान्तरेति· साध्यन्यूनवृत्तिघटत्वादिविशिष्टत्वेनेत्यर्थः· विशिष्टस्यातिरिक्तत्वे
गुरुत्वायुः पिंडभेदस्य विशिष्टाभावप्रतियोगित्वासंभवाद्धूमवान्वह्नेरित्यादावतिव्याप्त्यभावादाह· आदिनेति· तेनाह्नित्वावच्छिन्नतदभावस्य
संग्र[illegible]वत्साधनवन्निष्ठाभावप्रतियोगिनः यावन्तः साध्यवन्निष्ठाभावप्रतियोगिनः स्वरूपा इत्युक्तौ नैष दोषः तथापि पिंडभेदत्वावच्छिन्नप्रतियो
गिनां व्यक्तेर्धूमवावच्छिन्नवन्निष्ठाभावप्रतियोगितानात्मकत्वादतिव्याप्त्यसम्भवादिति ध्येयम्· मतान्तरमाह· साधनसमानेत्यादिना· अभा

जा· टि·
सि· व्या·

वायद्धर्मावच्छिन्नेति · तथा च मूले तादृशप्रतियोगिकात्यन्ताभावः समानाधिकरणो यस्येति बहुव्रीहिः · नाव्याप्तिरिति · न च रूपसामान्याभावाभावत्वस्य
रूपइवरूपध्वंसप्रागभावयोरपि प्राचीनमते सत्त्वात्तयो भावभिन्नयोरपि निखिलयोर्जलत्वसामानाधिकरण्याभावादेव मण्युक्ताव्याप्तिताद
वस्थ्यमिति वाच्यं · यद्धर्मावच्छिन्नाभावत्वावच्छेदेनाभावभिन्नत्वं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूततद्धर्मावच्छिन्नाभावो ग्राह्य इत्यत्र भावभिन्नो
ग्राह्य इत्यस्य तात्पर्यात् न च रूपसामान्याभावत्वावच्छिन्नाभावत्वावच्छेदेन भावभिन्नत्वं रूपध्वंसे व्यभिचारात् अत एव रूपप्रागभावसामान्याभा
वत्वावच्छिन्नाभावस्वरूपान्रूपप्रागभावानादाय न दोषः तादृशप्रागभावसामान्याभावत्वावच्छेदेन प्राचीनमते भावभिन्नत्वविरहाद्रूपस्यापि तथा
त्वादिति भावः · न च तथापि स्नेहसमानाधिकरणाभावप्रतियोगितावच्छेदकं जलान्यत्वविशिष्टसत्तात्यन्ताभावतेजोन्यत्वविशिष्टसत्तात्यन्ताभा
वान्यतरत्वावच्छिन्नाभावत्वं न तदवच्छिन्नाभावस्य तेजोन्यत्वविशिष्टसत्ताभावस्य जलत्वसामानाधिकरण्याभावादव्याप्तिरिति वाच्यं · जलतेजोन्य
त्वविशिष्टसत्ताया एव तादृशान्यतरत्वावच्छिन्नाभावतया जलतेजोन्यत्वविशिष्टसत्ताभावस्यैव तदवच्छिन्नाभावत्वात्तस्य च जलत्वसामानाधिकर
ण्यसत्त्वेनाव्याप्तेरनवकाशात् तादृशान्यतरत्वावच्छिन्नाभावस्याभावरूपत्वेपि तदवच्छिन्नाभावत्वस्यैकस्मिन्नेवोक्तविशिष्टाभावे कल्पयितुमुचितत्वात्·
ननु घटध्वंस[illegible]ध्वंसत्वादिनाव्याप्तिः घटध्वंसत्वत्वस्य हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेपि तदवच्छिन्नाभावत्वावच्छेदेनाभावभिन्नत्ववि
रहेण घटध्वंसत्वसामान्याभावस्य लक्षणाघटकत्वात् जन्याभावत्वलक्षणध्वंसत्वस्य जन्यत्वविशिष्टभावभेदस्वरूपत्वादभावप्रतियोगिकाभा

९

वमात्रस्यैवत्वाधिकरणस्वरूपत्वोपगमात् भूतलादिनिष्ठस्य घटध्वंसत्वाभावस्य भूतलादिभावे पर्यवसानात् घटत्वावच्छिन्नाभावस्य तादृशयावदन्तर्गतस्य
साध्यसामानाधिकरण्यादत आह· घटध्वंस इति· भावाभाववृत्तिरिति· तथा चाभावनिष्ठत्वमभावप्रतियोगिकत्वं वा नानाधिकरणस्वरूपत्वेऽनं न
त्रं अपितु तत्तद्भावमात्रनिष्ठत्वं स्वेनैव तादात्म्येन स्वमात्रवृत्त्यभावस्य विशिष्टवृत्त्यनुपपत्तेः तत्तदभावभिन्नत्वाद्यभावस्यातिरिक्तस्य कल्पने मानाभावा
दिति भावः· स्नेहवत्त्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यज्जलत्वाभावत्वाभावान्यतरत्वावच्छिन्नाभावत्वं तदवच्छिन्नप्रतियोगिताको यो
निरुक्तान्यतररूपो भावभिन्नो भावस्तज्जलत्वाभावश्च तयोर्न साध्यसामानाधिकरण्यं सत्त्वाभावस्य जलत्वविरुद्धत्वादित्यादिक्रमेण जलं स्ने
हवत्त्वाद्वह्निमान्धूमादित्यादावव्याप्तिरित्यस्[illegible]ते नवदन्तीत्युक्तं· साम्प्रदायिकास्तु· भावभिन्न इत्यस्य स्ववान्यत्वाभावो ग्राह्य इत्यर्थः तेन रूप
ध्वंसान्यत्वाभावत्वावच्छिन्नाभावानां रूपप्रागभावध्वंसात्मकानां भावभिन्नानां जलत्वसामानाधिकरण्याभावेऽपि जलं स्नेहवत्त्वादित्यत्र
नाव्याप्तितादवस्थ्यं· ननु घटध्वंसो ध्वंसत्वादित्यत्रातिव्याप्तिः अभावप्रतियोगिकाभावमात्रस्याधिकरणस्वरूपतया घटात्यन्ताभावादि
वृत्तेर्घटध्वंसत्वात्यन्ताभावस्य घटात्यन्ताभावादिस्वरूपस्य घटध्वंसत्वसामानाधिकरण्यात् घटध्वंसादिनिष्ठस्य च घटध्वंसत्वा[illegible]स्य प
टध्वंसात्मकस्य वा स्ववान्यत्वाभावत्वविरहेण लक्षणघटकत्वादत आह· घटध्वंस इत्यादीत्याहुः तन्मन्दं· अभावप्रतियोगिकाभावाना
मधिकरणस्वरूपतामाश्रित्य घटध्वंसेत्यादेरवतारणे धूमवन्निष्ठाभावप्रतियोगितावच्छेदकीभूतघटध्वंसत्वत्वावच्छिन्नाभावस्य द्रव्यत्वा

भावनिष्ठव्याप्तिरत्यन्तन्मा द्रव्यत्वाभावात्मकस्य वह्निसामानाधिकरण्याभावाद्वह्निमान्धूमादित्यादावव्याप्तेरेवसम्भवे घटध्वंसो ध्वंसत्वादि
त्यादावतिव्याप्तिपर्यन्तानुसरणस्यसन्दर्भविरोधापत्तेः नव्यास्तु भावभिन्नः इत्यत्र भावेनभिन्नः प्रतियोगिविधया संभिन्नोभावमात्रप्रतियो
गिक इति यावत् तेन स्नेहवत्त्वसमानाधिकरणस्य हिमावृत्तिस्वरूपस्याभावस्य प्रतियोगितावच्छेदकं यद्धिमावृत्तेरभावत्वं तदवच्छिन्नप्रतियो
गिताकस्य यावद्धिमावृत्त्यन्तर्गतस्य जलत्वाभावस्य साध्यासामानाधिकरण्येऽपि जलं स्नेहवत्वादित्यादौ नाव्याप्तिर्हिमावृत्तेरभावत्वस्य
भावत्वाभावेऽपि सत्त्वात् तदवच्छिन्नाभावस्य भावमात्रप्रतियोगिकत्वाभावात्· नन्वेवं घटध्वंसो [illegible] ध्वंसत्वादित्यादावतिव्याप्तिः व्य
भिचारनिरूपकाधिकरणघटध्वंसान्यत्वाभावादेर्घटध्वंसत्वाभावादेर्वा भावप्रतियोगिकत्वविरहेण लक्षणाघटकत्वात् अन्यत्वे सति
भावभिन्नत्वपर्यवसितस्य ध्वंसत्वस्याभावत्वविरहाद्घटान्यत्वाभावादेश्च तादृशस्य साध्यसमानाधिकरणत्वादत आह· घटध्वंस इत्यादि·
न भावभिन्नो विशिष्टअन्यत्वमेव ध्वंसत्वमखण्डधर्मान्तरमेव वा तत्· तथा च घटध्वंसत्वाभावस्यैव भावमात्रप्रतियोगिकत्वात्तेनैव नातिव्या
प्तिवारणं सम्भवतीत्याशयेनाह· घटध्वंसत्वादेरिति· आदिना घटप्रागभावः प्रागभावत्वादित्यादौ घटप्रागभावत्वादेः परिग्रहः जन्यत्वे
सति भावभिन्नत्वं ध्वंसत्वमित्युक्तावपि नक्षतिः अभावान्तरमादायैवातिव्याप्तेर्निरासः सम्भवतीत्याशयेनाह· तत्प्रकारकेति· भावाभा
वत्त्वानिरूपणेनानुगतप्रतीतिप्रमाणकत्वं तादृशाभावस्याविरुद्धं· अतिरिक्तोऽभावः· भावमात्रप्रतियोगिक इत्यर्थः· अत्र तादृशध्वं

सत्वाभावस्यापि जन्यत्वविशिष्टभावभेदाभाववनिरूक्तयावदभावप्रतियोगिकत्वं तस्येति पूर्वग्रन्थासंगतिश्चेति निर्वचनं· ननु यावन्तः स्वस्वव्यभिचारिणस्तत्तद्व्यभिचारिसाध्यमित्युक्तौ वह्निमान्धूमादित्यादौ सर्वत्रासम्भवः साधनव्यभिचारिणः प्रमेयत्वद्रव्यत्वादेर्व्यभिचारित्वस्य साध्ये विरहादत आह स्वाभाविति· यत्पदस्य साध्यनपरत्वे सोपाधिप्रसंगादाह साध्यत्वेति· साध्यव्यापकप्रतियोगिकस्येत्यत्र पादक्षात्साध्याभावकूटस्याधिकरणाप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्तेराह· तुल्यसमप्रमाकत्वेति· तथा च यावन्ति तद्व्यापकस्याभावे यस्यासामानाधिकरण्यं तस्य तत्त्वमेव व्याप्तिरिति भावः· विशेषणाभेदान्वयसाकाङ्क्षत्वेन पदस्याविशेषणत्वाभावेपि न क्षतिः· वस्तुमात्रस्यैव साध्यवन्निष्ठाभावप्रतियोगित्वाप्रसिद्धेः व्यापकत्वादतिरिक्तं यावत्वं दुर्वचमित्यतो निष्कर्षमाह· तथा चेति· एतस्यार्थः प्रागेव प्रपञ्चितः· नन्वेकव्यक्तिवृत्तयो यावन्तः साध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावास्तेषामसामानाधिकरण्यमेवार्थः कुतो न कृतस्तत्राह विपक्षाद्यन्यत्वाभावकूटस्यैकव्यक्तिवृत्तित्वाभावादेतेषामधिकरणाप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्त्यसंभवादाह· केवलान्वयिनि चेति· तथाविधः साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकः तथा च तदधिकरणाप्रसिद्ध्या प्रमेयं वाच्यत्वादित्यादावव्याप्तिरभिप्रेयेव तादृशार्थत्वकृद् इति भावः· अत्र वह्निमान्धूमादित्यादावव्याप्तिः वह्निव्यापकस्य द्रव्यत्वविशिष्टद्रव्यत्वाभावस्य यो भावो द्रव्यत्वादिस्तत्र धूमादेः सामानाधिकरण्यस्यैव सत्वादभावविरहात्मकत्वलक्षणप्रतियोगित्वान्यथानुपपत्त्या द्रव्यत्वस्यैव विशिष्टद्रव्यत्वाभावाभावत्वादन्यथा गगनस्यापि स्वाभावाभावत्वे प्रमाणाभावात्केवलान्वयिन्यव्याप्त्यापत्तेश्चेत्यस्वरसः सम्प्रदायदृष्ट्यनेन सूचितः· अतएवैतद्दोषं निरस्यतां मतमाह· केचित्विति· साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावसामान्याभाववत्वेन यदधिकरणेनाव्यापकत्वं तत्त्वमि

त्यर्थः सामान्याभावत्वाश्रयीयत्वोपादाने तेन तादृशाभावानां यावत्त्वाघटितवह्न्यभावस्य केवलान्वयित्वेपि न धूमवान्वह्नेरित्यादावतिप्रसङ्गः । न चेति । वाच्यमि
त्यग्रेणान्वयः । तादृशेति । साध्यवन्निष्ठाभावीयेत्यर्थः । अनन्तेति । साध्यव्यापकानां यावत्त्वेनाप्रवेशादित्यर्थः असंभवादिति भावः । ऐकाधिकरण्येनेति । तेषां प्र
त्येकाश्रयत्वस्याप्रवेशे तु तादृशान्तर्गतस्य धूमाधिकरणत्वाव्यापकत्वादव्याप्तिरसंभवो वेति भावः । रूपान्तरेणेति । यत्किंचिद्विशिष्टत्वादिना तथा च तादृशाप्रति
योग्यप्रसिद्धेर्वावच्छेदकत्वांशे निवेशनादिति भावः । अवान्तरनयस्य स्वाभावविरहत्वेनाभावः स्वरूपसम्बन्धविशेषस्यैव प्रतियोगितावादतः केवलान्वयिन्यव्या
प्तिरित्यस्वरसः केचिदित्यनेन सूचितः स्वमते तु साध्यव्यापकतावच्छेदकाः यावन्तो धर्माः यद्धर्मावच्छिन्नव्यापकतावच्छेदकास्तद्धर्मवत्त्वस्यैवानौपाधिकत्वं प्रागेव पू
र्वपक्षग्रन्थे विवेचितमिति ध्येयं । लक्षणयोः पौनरुक्त्यमपाकर्तुं विकल्पयति । अवच्छिन्नमित्यादिना । ननु व्याप्यतावच्छेदकस्य धूमत्वादेः सामानाधिकरण्यावच्छेद
कधर्मरूपव्याप्तित्वानुपपत्तिः विभिन्नयोरेवावच्छेद्यावच्छेदकभावादत आह । इत्थं चेति । दण्डत्वादेरिति । तथा चोक्तनियमो व्यभिचारीति भावः । ननु इत्तेपि बाधका
कारणत्वमतिरिक्तः पदार्थ इति च दण्डत्वादेस्तदवच्छेदकत्वं सुघटमेवेत्यत आह । उपहितेति । विशिष्टाविशिष्टेत्यर्थः । समर्थनीयमिति । धूमत्वादेर्व्याप्यतावच्छेदकत्व
मितिपूर्वेणान्वयः । भेदादिति । ल्यब्लोपे पञ्चमी भेदमङ्गीकृत्येत्यर्थः । तथा च धूमत्वं व्याप्यतावच्छेदकं सामानाधिकरण्यावच्छेदकत्वोपहितं च तदवच्छेद्यमतः
केवले विशिष्टे पर्यवसानासङ्गतिरिति भावः । नन्वनयोर्भेदे स्वमतेनावच्छेदकपरामर्शे द्वितीयलक्षणाभेदप्रसंगादित्यतो व्याचष्टे । स्वसम्बन्धिनेति । एवं च मू
ले यस्याः सम्बन्धितायाश्चावच्छेदकरूपवत्त्वं पक्षे इत्येवमन्वयो बोध्यः । जनकत्वादिरूपायाः सम्बन्धितायाः व्याप्तित्वविरहादाह । सामानाधिकरण्येनेति । जनकं

त्वादीत्यादिना जन्यत्वादेः परिग्रहः । विशिष्टेति । विशिष्टसत्तात्वाद्यवच्छिन्नस्य गुणादिसामानाधिकरण्येन ह्नतः सत्त्वादेरित्यर्थः । गुणाद्यनुमित्यापत्ति
रिति । सत्तायां गुणव्यभिचारज्ञाने धीत्यादिः कर्मादावित्यनुषज्यते गुणव्याप्तिमतः सत्त्वस्य कर्मणि पक्षधर्मत्वानपायादिति भावः । ननु व्याप्यवच्छिन्नस्य
पक्षधर्मताज्ञानमनुमितिहेतुरतः साध्यसामानाधिकरण्यविशिष्टसत्त्वादेः कर्मणि परामर्शे व्यभिचारधीदशायामनुमितिरिष्यत एवेत्यत आह सा
ध्यसामानेति । प्रागिति । तथा च पक्षे साध्यनिर्णयश्रौव्यौ विनाप्यनुमित्सां कथ्यिदप्यनुमितिर्न स्यादिति भावः । ननु यत्तद्धर्मावच्छिन्नसाध्यसामानाधि
करण्यं व्याप्तिस्तद्धर्मप्रकारेण पक्षधर्मतानिश्चयोऽनुमितिहेतुर्वाच्यस्तथा च कर्मणि तादृशविशिष्टसत्तात्वरूपेण पक्षधर्मत्वानिश्चयान्नो
क्तदोषः संभवतीत्यत आह अयमित्यादि । अयं पक्षश्चेति । विशेष्येति । तथा च धूमत्वादिप्रकारेण पक्षधर्मतासन्देहदशायामुक्तप्रकारेणास
म्भवात्तदानीमनुमित्युत्पत्त्यर्थमपि द्वितीयकल्पानुसरणमिति भावः । सामान्यतः साध्यसम्बन्धितावच्छेदकत्वप्रकारेण । इत्थं च स्वरूपस
म्बन्धस्यैवावच्छेदकमित्याशयेन प्रकारान्तरेणावच्छेदकत्वोक्तौ तद्धर्मनिवेशस्यावश्यकत्वादिति द्रष्टव्यं । आद्ये दूषणमाह प्रमेयत्वादाविति ।
तथा च वह्निमान्प्रमेयादित्यादौ व्याप्तिलक्षणातिव्याप्तिरिति भावः । उभयत्र तदाह धूमत्वादाविति । वह्न्यादेः साध्य इत्यनुषज्यते तथा च वह्नि
मान्धूमादित्यत्र व्याप्तिलक्षणाव्याप्तिरिति भावः । कर्मादिवृत्तित्वेति । कर्मादिसमवेतत्वाद्यवच्छेदेनेत्यर्थः । कर्मावच्छेदेनेत्युक्तौ कर्मणि सत्तायां गु
णसामानाधिकरण्यवदिदानीं सत्त्वादौ न गुणसामानाधिकरण्यमित्यपि प्रतीतिः स्यात् कर्मण एवेदानीं कालत्वादतो वृत्तिविशेषणं धावनेतेन

कालिकसम्बन्धेनयत्कर्मवृत्तित्वंतदवच्छेदेनगुणसामानाधिकरण्यस्यैवसत्त्वान्नोक्तप्रतीत्यापत्तिरितिभावः·ननथा·नसमवेतत्वंगुणसम्बन्धित्वाभाववदवृत्ति·विशिष्टेति·कर्मवदवृत्तित्वाद्यवच्छेदेनगुणसामानाधिकरण्याभाववत्त्वंसत्तायांवर्तमानत्वाद्विशिष्टसत्तात्वमवच्छेदकंतस्यात्तथाचगुणवान्विशिष्टसत्त्वादित्यादावव्याप्तिरितिभावः·ननुसामानाधिकरण्यस्याव्याप्यवृत्तित्वमङ्गीकुर्वतांसार्वभौमेस्वमतेविशिष्टस्यातिरिक्तत्वान्नैषदोषइत्यतआह·प्रामीति·तथाचस्वावयवेधूमेनवह्निसामानाधिकरण्यमितिप्रतीतेर्धूमेवह्निसामानाधिकरण्याभावाद्धूमत्वमपवच्छेदकंतस्यादित्यर्थः·नचहेतुताघटकसम्बन्धेनयद्धेत्वधिकरणंतदवच्छेदेनसाध्यसामानाधिकरण्यस्याभावस्यनिवेशान्नैषदोषःतथासं नियोगत्ववानभ्रत्वादित्यादौसहकालनिरूपितविशेषणतयाहेतुतायामव्याप्त्यापत्तेः·हेतुमहाकालावच्छेदेनतादृशसम्बन्धेनवृत्त्यभावस्याप्रसिद्धेरितिभावः·अतिरिक्तइत्यस्यसाध्यसामानाधिकरण्येत्यादि·ननुधूमासमानाधिकरणघटत्वादेर्वह्नित्वविशिष्टाधिकरणपर्वतावृत्तित्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिरतआह·साध्यासमानेति·स्वपदंसाध्यतावच्छेदकीभूतधूमत्वादिपरं·वह्नित्वविशिष्टाधिकरणपर्वतवृत्तित्वस्यधूमासमानाधिकरणवृत्तित्वादतिव्याप्तिरतः·सामान्येति·तथाचवह्निमदयोगोलकवृत्तित्वस्यैवधूमासमानाधिकरणवृत्तित्वान्नातिव्याप्तिरितिभावः·वृत्तिमद्पानन्तभावेनपूर्वापेक्षयालघुतरमाह·स्वविशिष्टेति·गुणवत्सत्त्वादित्यादौप्रागुक्तामतिव्याप्तिमुद्धरति·सत्तात्वेत्यादिना·तथैवगुणविशिष्टसत्त्वादित्यत्रोक्तामव्याप्तिंनिरस्यति·कर्मान्यत्वेति·यथाश्रुतस्यातिरिक्तवृत्तित्वरूपस्यावच्छेदकत्वापेक्षा

यांवीजमाह· एवंचेति· उपपत्तेरिति· अन्यथावाच्यत्वसामानाधिकरण्याभाववतिगगनादौप्रमेयत्वादेः सत्वाद्वाच्यंप्रमेयादित्यादावव्याप्तिरेवस्या
दितिभावः· भ्रममनुपन्यस्यनिरस्यति· यत्वेति· ननुप्रमेयत्वंयदितद्वन्नव्याप्तिलदोदाहरणादौताद्रूप्येणाहेतोस्तस्यसाध्योऽपिनः तस्यव्याप्त्युपस्थितिमात्रेफ
लकत्वादतआह· नत्विहेति· तथाचव्याप्त्यनुरोधादिनाभिवप्रमेयत्वादिल्लविशेष्यकव्याप्तिग्रहार्थमेवहेतोःप्रमेयत्वोदाहरणाद्युपन्यासइतिभावः· यदिव्याप्ति
विरहिवृत्तित्वेनाप्युदाहरणादितो व्याप्तिग्रहःप्रामाणिककलदायोद्रव्यत्वात्सवह्निमानित्यप्युदाहरणंस्याद्द्रव्यत्वस्यापिवह्निव्याप्तिविरहिवृत्तित्वादिविशे
षादित्यभिप्रेत्याह· व्याप्तिविरहीत्यादि· स्वमतेप्रमेयत्वस्यापिव्याप्तिविरहिवृत्तित्वाभावाद्भूलमारोनेत्युक्तं· व्याप्तिग्रहेत्यस्योदाहरणादित्यादि· अन्योदाहरण
स्यव्याप्तिविरहिवृत्तिरूपेणव्याप्तिग्राहकत्वेपिनक्षतिः व्यभिचारिवृत्तिरूपेणव्याप्यग्राहकत्वनियमादेवयोयोद्रव्यवान्सवह्निमानित्यादिवाक्यस्योदाह
रणत्वासंभवादितिचिन्त्यं· यत्तुप्रमेयत्वादिप्रकारेणगगनादौनिरुक्तव्याप्यभावनिश्चयदशायांताद्रूप्येणधूमादौव्याप्तिग्रहोनस्यात्समानरूपेणावि
रोधित्वनिश्चयस्यैववैशिष्ट्यधीविरोधित्वादन्यथावह्निर्नधूमव्याप्यइतिनिर्णयेपिवह्निर्धूमव्याप्यइतिज्ञानापत्तेरित्यर्थमाहुस्तन्मन्दं· प्रमेयत्वावच्छेदेनैव
बाधनिश्चयस्याविरोधितया तत्सामानाधिकरण्येनबाधेपिताद्रूप्येणव्याप्तिग्रहसंभवात् अन्यथाव्याप्यत्वान्यप्रमेयंनित्यमितिधीदशायांव्याप्यप्रमे
यंजन्यमितिग्रहस्यापत्त्यापत्तेरितिदिक्· साध्येति· तानः समवायेनवह्नेः साध्यत्वेसंयोगेनधूमादिहेतावतिव्याप्तिः· उभयत्रैवहेतुतावच्छेदकसम्बन्धे
नावर्तमानत्वेनाभिमतत्वेनद्रव्याभिन्नगुणत्वादित्यादावतिव्याप्तिःस्यादतः येनयेनेति· यथाश्रुतस्यद्रव्यंसत्वादित्यादावतिव्याप्तेरितिभावः· हेतुनेति·

तेन संयोगेन वह्निमति समवायेनावर्तमानस्य धूमावयवत्वादेः समवायेन धूमवति तत्सम्बन्धेन वर्तमानत्वेपि वह्निमान् धूमादित्यादौ नाव्याप्तिरिति भावः॥ इदमापाततः वस्तुतो लाघवादावश्यकत्वाच्च साध्यसाधनयोरधिकरणे विशेषणताविशेषेणावर्तमानत्वं प्रागुक्तमिहाप्यनुसन्धेयं· वारणीयत्वेति· वस्तुतः स्वमते नीलधूमत्वमपि व्याप्तिरेव तादृशेण हेतुप्रयोगेधिकेनैव निग्रहस्थानेन प्रकृते निगमनदर्शनभावः॥ स्वेति· स्वं साध्यसम्बन्धित्वेनाभिमतं स्वसमानाधिकरणं यत्तादृशं साध्यसम्बन्धितावच्छेदकीभूतधर्मान्तरं तद्घटितत्वेनेत्यर्थः तथा च नीलधूमत्वस्यापि तादृशधूमत्वघटितत्वादेव गुरुत्वात्॥ इत्थं गुणघटत्वे सति सत्त्वादित्यादौ विशिष्टसत्तात्वस्य स्वसमानाधिकरणं यद्गुणान्यत्वं धर्मान्तरं तद्घटितत्वादव्याप्तिरतस्तादृशेति· तथा च गुणान्यत्वस्य साध्यसंबन्धितानवच्छेदकत्वात्तद्घटितत्वेप्यदोषः॥ न च सत्ताकालनिरूपितविशेषणताविशेषेण दिक्कृतविशेषणतया वा गुणान्यस्य हेतुतायां गुणान्यत्वस्यापि द्रव्यत्वसम्बन्धितावच्छेदकत्वादुक्तदोषतादवस्थ्यं प्रकृतहेतुतावच्छेदकसम्बन्धेन यत्साध्यसंबन्धित्वं तदवच्छेदकधर्मान्तराघटितत्वस्यैव प्रवेश्यत्वात् धूमत्वादेरपि स्वेनैव साध्यसम्बन्धितावच्छेदकधर्मेणाघटितत्वादवच्छेदकत्वं न स्यादित्यन्तरपदं· न चैवं नीलधूमत्वं नीलत्वविशिष्टधूमत्वं तत्तावच्छेदकं स्याद्धूमत्वविशिष्टधूमत्वाभिन्नत्वाद्धर्मान्तरत्वाभावादिति वाच्यं· स्वानवच्छिन्नप्रकारतावच्छेदकस्य धर्मान्तरपदेन विवक्षितत्वादिति भावः॥ धूमप्रागभावत्वमिति· ननु धूमत्वस्य साध्यसम्बन्धितावच्छेदकत्वेपि हेतुताघटकसम्बन्धेन यत्साध्यसंबन्धित्वं तदवच्छेदकत्वेन धूमप्रागभावत्वस्य तद्घटितत्वे

पि न क्षतिरित्यत आह आधेति· तेन धूमविशिष्टरासभत्वादेः परिग्रहः· अत्र धर्मस्य स्वसामानाधिकरण्यं हेतुतावच्छेदकताघटकसम्बन्धेन यत्स्वाधि
करणं तत्र साध्यसम्बन्धितावच्छेदकताघटकसम्बन्धेन वर्त्तमानत्वरूपं ग्राह्यं तेन यथाकथञ्चित्सम्बन्धेन धूमत्व धूमप्रागभावत्वयोर्मिथः सामा
नाधिकरण्येऽपि न क्षतिः हेतुतावच्छेदकताघटकसम्बन्धेन स्वाधिकरणे तेनैव सम्बन्धेन वर्त्तमानत्वं तु तथा वाच्यं धूमत्वप्रकारकप्रमाविशेष्यत्वादे
रपि व्याप्यतावच्छेदकत्वापत्तेः तद्घटितत्वं तद्विषयकप्रतीत्यविषयत्वं तदन्यत्वं वा तद्घटितत्वमित्यभावद्वयप्रवेशे गौरवादाह· तद्घटित
त्वं चेति· भिन्नस्य मतान्तरसम्पन्नस्येति· स्वरूपेत्यादिना· अतएवेति· अतिप्रसक्तत्वविशिष्टेऽपि स्वरूपसम्बन्धरूपावच्छेदकत्वधीसम्भ
वेन तयोर्विरोधप्रतिपत्त्यर्थमेव तद्दूष्यावतारणादिति भावः· अन्यथेति· यद्यनतिरिक्तवृत्तित्वमेवावच्छेदकत्वपदार्थस्तदेत्यर्थः· अति
प्रसक्तेस्त्वावच्छिन्ने नतिप्रसक्तत्वस्य· अनतिप्रसक्तत्वज्ञानस्य· अप्रसक्तत्वेनानाहार्यज्ञानासम्भवेन तन्निरूपकरणायोगादित्यर्थः· गुणवत्त्व
त्वादित्यादौ सत्तात्वादेः साध्यसम्बन्धितावच्छेदकत्वमपाकर्त्तुं भूमिकामाह· विरुद्धयोरित्यादि· एकस्य· एकरूपावच्छिन्नस्य· तेन धूमवान्वह्नेरि
त्यादौ वह्निव्यक्तीनां नानात्वेऽपि न वह्नित्वस्य धूमसम्बन्धितावच्छेदकत्वसम्पत्तिः· ननु क्रमेणावच्छेदकभेदापेक्षायामपसिद्धान्त इ
त्यत आह· अनन्यथेति· विरोधादिति· एकस्यावच्छेदकत्वकल्पने विनिगमकप्रमाणाभावादिति भावः· विरुद्धयोरित्युक्तेः फलमाह·
अव्याप्यवृत्तेरिति· तदभावस्य· संयोगाद्यभावस्य· अविरुद्धत्वाद्वृक्षत्वादेः साध्यसामानाधिकरण्यावच्छेदकत्वविरोध इत्यग्रिमा

प्यामन्वयः अथैवं सति संयोगीसत्त्वादित्यादावविरुद्धयोः संयोगतदभावयोः सामानाधिकरण्यावच्छेदकत्वं सत्तात्वस्य दुर्वारमिति [illegible]· ननु लीलावतिकृन्मते संयोगस्याव्याप्यवृत्तित्वात्तदभावो न तत्क्षणादावतः स्थानान्तरे विरुद्धयोरित्यस्य फलमाह संयोगेन चेति. तदभावस्य यत्स्वभावस्य· एकैकसम्बन्धेनेत्यस्य फलमाह वह्निमतीति· ननूक्तव्याप्तेरनुमित्युपयुक्तत्वे साध्यवदन्यवृत्तित्वलक्षणव्यभिचारज्ञानस्य तज्ज्ञानविरोधित्वाद्धेत्वाभासत्वं न स्यादत आह· व्यभिचारेति· ग्रहयोग्यात्· ग्रहानुमतेः तथा चानुभववलाद्व्याप्तिविषयकमपि ज्ञानं प्रतिबन्धकमिति भावः· स्वसमानविषयकमेव ज्ञानं प्रतिबन्धकमिति नव्यानां मतमनुसृत्याह अस्तु वेति· साक्षात् ग्राह्याभावनिर्णयविधया. नन्वेवं व्याप्तिग्रहप्रतिबन्धायकथकानां व्यभिचारान्तरस्योपन्यासो न स्यादत आह· व्यभिचारान्तरेति· परस्परेति· तथा च प्रकृतव्याप्त्यभावावच्छेदकधर्मविधयैवोपाधेरिव व्यभिचारान्तरोपन्यासः कथायामिति भावः· स्वसमानाधिकरणत्वाहत्य धर्मेत्यादिविशेषणाप्रक्षेपेण पूर्वकल्पेऽनामेव माविष्करोति· नीलधूमत्वेति· गौरवादिति· लघुसम्भवे स्वरूपसम्बन्धरूपावच्छेदकत्वस्य तत्रैवावस्थितिः स्वाभाव्यादिति भावः· ननु गुरोरवच्छेदकत्वे घटवान्कम्बुग्रीवादिमत इत्यादौ कम्बुग्रीवादिमत्त्वावच्छेदेनापि व्याप्तिर्न स्यात् घटत्वस्यैव लघोस्तथात्वसम्भवादतस्तत्रेष्टापत्तिमाह· एवं चेति· ननु गुरुधर्मस्यानवच्छेदकत्वे तदवच्छेदेन व्याप्तिग्रहो भ्रमः स्यात् एवं गुरुरूपेण व्यभिचारिसाधारणे नापि धर्मेण कथायां हेतोरुपन्यासः स्यात् व्याप्यतानवच्छेदकत्वस्याविशेषत्वादत आह· तेन चेति· कम्बुग्रीवादिमत्त्वादिना चेत्यर्थः तदवच्छिन्नविशेष्यकस्य व्याप्तिग्रहे तु तत्र साध्यसम्बन्धितावच्छेदकत्वावगाहित्वेनो न भ्रमत्वानुयोगः सम्भवतीत्यतः कथायामित्युक्तं

प्रकारान्तरेति· व्यापकसामानाधिकरण्यादिव्याप्तिप्रकादिनामपि स्वरूपसम्बन्धातिरिक्तस्य व्याप्त्यवच्छेदकत्वस्य दुर्वारत्वादिति भावः· समानइति
यदि च व्याप्तिनियतधर्मान्तराघटितत्वेन व्याप्तिनियतरूपेणैव हेतूपन्यासइति साम्प्रदायिकाइष्यते तदा ममापि तुल्यन्याय इति भावः· ननु गु
रुगौरवस्यैकाश्रयगौरवस्यापि कल्पनापरिपन्थित्वाद्द्रव्यत्वादौ साध्ये रूपत्वरसत्वादीनां बहूनामप्यवच्छेदकत्वेन स्याल्लाघवे
न गुणत्वस्यैव तथात्वादित्यतस्तत्रेष्टापत्तिमाह· एवमिति· ननु रूपत्वादिकमिव गुणत्वमपि न सर्वसम्बन्धिसाधारणमत आह·
द्रव्यादीति· आदिपदेन गुणकर्मघटत्वपटत्वादीनां परिग्रहः· द्रव्यसमवेतत्वस्य साध्यतदभावसहचरितसत्तात्मकत्वेन सत्तात्व
स्यैव साध्यसम्बन्धितावच्छेदकत्वादाह· गुणसमवेतत्वे सतीति· न च रूपरसादीनां प्रत्येकासमवेतत्वे सतीत्युक्तावपि सत्तावार
णसम्भवात् विनिगमकाभावेन तेषामनन्तानां गुरुशरीरगुणमवच्छेदकत्वप्रसक्तौ तदपेक्ष्य लघुशरीराणां रूपत्वरसत्वादीना·
मेव बहूनां तथात्वौचित्यमिति वाच्यं· गुरुशरीरगुणस्यापि रूपरसादिप्रत्येकासमवेतत्वे सति द्रव्यसमवेतानां सर्वेषामेव घटपटा
दिद्रव्यघटत्वपटत्वादिजातिविशेषपदार्थसाधारण्यान्तरोध्याप्तिनिगमनाविरहेणावच्छेदकत्वस्य प्रामाणिकत्वात् रूपत्व
रसत्वगुणत्वादीनामखण्डानामपि द्रव्यजात्यादिसाधारण्यविरहेणावच्छेदकत्वाकल्पनादिति भावः· नानात्वं· नावच्छेदक
त्वं तु यद्द्रव्यत्वे साध्ये रूपरसादिप्रत्येकासमवेतत्वे सति द्रव्यसमवेतत्वेन साध्यसम्बन्धितावच्छेदके किन्तु द्रव्येतरासमवेत

त्वमात्रं लाघवाभावेनैव घटादिद्रव्यगुणकर्मघटत्वादिजातिविशेषपदार्थानामुपसंग्रहसंभवादिनाचेन्नमूः मतमिदं दूषय
ति· विरुद्धत्वादिना· कथं विरोध इति· तथाच सत्तात्वावच्छेदेनैव गुणतदभावयोः सामानाधिकरण्यसंभवाद्गुणवान्सत्वादित्या
दावतिव्याप्तिरिति भावः· नन्वेकावच्छेदेन विरुद्धभावाभावयोः सामानाधिकरण्याप्रतीतेरेव विरोधः कल्प्य इत्यत आह· कथंवे
ति· साध्यसम्बन्धितानवच्छेदकप्रकारेणापि हेतुप्रयोगे द्रव्यं प्रमेयादित्यपि प्रयोगापत्तेरिति भावः· ननु तत्प्रकारेण हेतुप्रयोगे तत्कर्म
ता·टि· स्य साध्यसम्बन्धितावच्छेदकत्वं न तन्त्रं किन्तु प्रकृतव्याप्तिनियतधर्म्यन्तराघटितत्वे सति प्रकृतव्याप्तिनियतत्वं न च स्वरूपत्वादेरप्यक्ष
वि·व्या· तं ननु प्रमेयत्वादेरतो नातिव्याप्तिरित्यत आह· तथापरामर्शादेति· स्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिपरामर्शादित्यर्थः कथ २५
मित्यनुषज्यते· अनुमितिरिति· यदि धूमत्वादौ स्वरूपसम्बन्धात्मकमवच्छेदकत्वं नाम वस्तु स्यात्तदा तद्गोचरपरामर्शसंभवादतो
नुमितिः सम्भाव्येत वस्तुतस्तत्रैव मानाभावः· नहि धूमो वन्हिसमानाधिकरण इति प्रतीतिर्धूमो द्रव्यमित्यादिबोधव्याहृतं धूमत्वे
सामानाधिकरण्यावच्छेदकत्वमवगाहत इति कस्याप्यनुभवसिद्धमिति भावः· यद्धर्मविशिष्टहेत्वधिकरणत्वे यद्धर्मावच्छिन्नाधिकर
णत्वं तनु हेतुमत्त्वस्य साध्यसम्बन्धितावच्छेदकत्वे धूमत्वादेर्हेतुतावच्छेदकस्य तथात्वप्रदर्शनं मूलं फलतो विरुद्धमत आह· ग्रन्थस्त्वि
ति· धूम एव मात्रो धर्मो यस्येति व्युत्पत्त्या धूममात्रपदाद्धूमवत्तालाभसम्भवान्न· [illegible]रित्यत्रैव वन्हेस्त्विति पाठे व्याचष्टे· वन्हिमतस्त्व

नि· इत्यादौत्यादिपदान्नवन्हित्वमित्यादावपि नवन्हिमत्वमित्याद्यर्थः· विरुद्धेति· साध्यविरुद्धदिगवच्छिन्नवृत्तिकस्य साध्यविरुद्धकालावच्छिन्नवृत्तिकस्य च साध
नस्याधिकरणतायां स्वरूपसम्बन्धरूपस्य साध्याधिकरणतावच्छेदकत्वस्याभावात्तदनवच्छेदकदिगाद्यवच्छिन्नवृत्तिकस्य तदनवच्छेदकत्वनियमात्
तथा च भूगोलकं उदयगिरिमत्व अस्ताचलवत्वात् कपालं तद्घटवत्तद्घटध्वंसवत्वादित्यादावव्याप्तिरिति भावः· न्यूनेति· साध्यन्यूनदेशवृत्तिकस्य साध्य
न्यूनकालवृत्तिकस्य च हेतोरधिकरणतायां साध्याधिकरणतावच्छेदकत्वासम्भवात्तन्न्यूनदेशादिवृत्तिकस्य तदनवच्छेदकत्वनियमात्तथा चायं व
न्हिमान्धूमादिदन्द्रव्यं पृथिवीत्वात् कालो घटत्ववान्घटादित्यादावव्याप्तिरिति भावः· ननूक्तनियमद्वयमप्रयोजकमत आह· तुल्यवृत्तिकयोश्चेति· चका
रेण तुल्यवृत्तिकयोः परिग्रहः· अवच्छेद्येति· स्वरूपसम्बन्धरूपावच्छेद्यावच्छेदकभावस्येत्यर्थः· नियन्तुं अवधारयितुं· अशक्यत्वादिति· तथा च तद्रूपव
त्वावच्छेदेन तद्ध्वंसवत्वमित्यादिप्रतीत्याऽनतिरिक्तवृत्तित्वस्यैव क्लृप्तस्यावगाहनात्तेन साध्याधिकरणत्वयोः स्वरूपसम्बन्धरूपावच्छेदकत्वे मानाभावाद
प्रसिद्धिरेव लक्षणस्येति भावः· नापीति· अपिनान्यूनानतिरिक्तवृत्तित्वस्य परिग्रहः॥ अन्यत्रापि दूषणमाह· न्यूनवृत्तिकधूमादेरिति· ननु वाच्यं ज्ञेयत्वादि
त्यादौ साध्याधिकरणातिरिक्ताप्रसिद्धिरत आह· स्वान्यूनेति· स्वं स्वीयं तथा च स्वीयाधिकरणत्वान्यूनवृत्ति साध्याधिकरणतावत्त्वमर्थः· गोत्वस्या-
श्वत्वन्यूनवृत्तिभिन्नत्वादयं गौरश्वत्वादित्यादावतिव्याप्तेराह· स्वव्यापकेति· अग्रेति· साध्यवदन्योन्याभावगर्भैव व्याप्तिरित्यादिग्रन्थ इत्यर्थः॥ इति
श्रीजगदीशतर्कालङ्कारविरचितव्याप्तिविशेषव्याप्तिशिरोमणिटीका समाप्ता· शुभमस्तु भूयात्॥ ✽ ॥ १९५६ ☼ संवत्सरे॥ सोमनाथविदुषः॥ अक्षरविन्यासः अयं॥

४११६

श्री ५ को सरकार
वाल्मीकि संस्कृत महाविद्यालय

गादाधरी.
साधारण.
ग्रन्थप्रारम्भः.

श्रीगुरुः ॥ ॥ सर्वमनित्यं प्रमेयत्वादित्यादेः स्वमते साधारणत्वात्तत्रातिव्याप्तिप्रदर्शनासङ्गतेराह ।. सम्प्रदायेति ।. तन्मते निश्चितसाध्यतदभाववद्भिन्नैरेव साधारणता, यथा उक्तहेत्वोरनुपसंहार्यत्वासाधारणत्वदशायामलक्ष्यत्वमेवेति भावः. न नु मणिकारमते वास्तवसाध्याभाववद्भिन्नैरेव साधारणं इत्येव कुतोऽवधारितमित्यत आह ।. असत्त्वेति ।. स्वमते तस्स लक्ष्यत्वादेवेत्यर्थः ।. अग्रे ।. सिद्धान्तग्रन्थे. निश्चितसाध्यवत्तदन्यवृत्तित्वमित्यत्र तत्पदस्य प्रक्रान्त [illegible] निश्चितसाध्यवत्परामर्शकत्वे साध्यसंशयविषयीभूतपक्षे सपक्षे च वर्तमाने सद्धेतावतिप्रसङ्ग इत्यतस्तस्य साध्यवन्मात्रपरतां स्पष्टयितुं व्याचष्टे ।. निश्चित इति ।. साध्यादिमत्तया निश्चित इत्यर्थः. एतच्च साध्यवद्भिन्नेऽप्यन्वेति. अन्यथा निश्चिते साध्यवतीत्यसमासेन लक्षणस्य परित्यागे वीजाभावात्. न चानुपसंहार्यसाधारणयोरतिव्याप्तेः साध्यवति तद्विशेषणेनैव वारणात्साध्यवद्भिन्नेतस्य विशेषणत्वमप्रयोजकमिति वाच्यं. साध्यवदन्यत्वसंशयविषयवृत्तित्वज्ञानस्याप्रतिवन्धकत्वात् स्वरूपसन्निश्चयघटितस्यैव दोषत्वमित्यभिप्रायेण तदुपादानात् साध्यवति तद्विशेषणोपादानञ्च शब्दोऽनित्यः शब्दाकाशान्यतरत्वादित्यादेरनवगत

[illegible] उत्तरलक्षणे [illegible] निश्चयांश [illegible] पौनरुक्त्यं [illegible]
वक्ष्यते इति [illegible] उभयत्रापि [illegible]
तात्पर्यमिति. [illegible]

साध्यसहचारत्वे सत्यवगतसाध्याभावसहचरिततया विरुद्धत्वमेव. ननु साधारणत्वमिति मताभिप्रायेण तद्वारणाय. उभयत्र विकल्पेन तादृशविशेषणं प्रक्षिप्य लक्षणद्वयं करणीयमित्यभिप्रायेण समासोपेक्षणमिति. पुनरयुक्तं. तथा सति सपक्षविपक्षगतत्वरूपाग्रिमलक्षणे सपक्षत्वविपक्षत्वोभयशरीरे निश्चयांशपरित्याग एव पौनरुक्त्यपरिहारसंभवात् सपक्षत्वमात्रस्य च तद्धर्मतानिराकरणासङ्गतेः. मूले इत्येवोद्भाव्यत इत्यत्र इतीत्यनन्तरं रीत्या विपक्षवृत्तित्वमिति पूरणीयं. अयोगोलके [illegible]नैकान्तिको वह्निरित्यत्र साध्यवदन्याधेयत्वमनैकान्तिकपदार्थः. तत्रैव च तृतीयांतार्थायोगोलकनिरूपितत्वादेरन्वयो बोध्यः. ननु तन्मात्रोद्भावनान्नवादिनिवृत्तिरिति न तन्मात्रं दोष इत्याशङ्कां निराकरोति.। ततएवेति.। एवकारव्यवच्छेद्यं स्फुटयति.। नत्विति.। सपक्षगतत्वमपीति उद्भाव्यत इत्यनुषज्यते. अनुपसंहार्ये सर्वमनित्यं प्रमेयत्वादित्यादौ निश्चितसाध्यवदन्यवृत्तित्वदलासत्त्वात् सपक्षगतत्वमात्रस्य न तद्व्यावर्तकता अतः सपक्षगतत्वनिश्चितत्वरूपसाध्यवदन्यविशेषणयोरन्यतरसा

र्थकशब्दपरत्वमनुपसंहार्य इतिमूलस्य स्फुटयितुं निश्चयाघटितसाध्यवदन्यवृत्तित्वस्यतत्साधारण्यमाह·
दीधितौ·।·साध्यवदन्येति·।· तत्रापि·अनुपसंहार्येपि·।·ननिश्चयगर्भमिति·।·ननिश्चितसाध्यवद्वृत्तित्वरूपम
पितु साध्यवद्वृत्तित्वरूपमेवेत्यर्थः·।·नाभेद इति·।·ननिश्चितसाध्यवद्वृत्त्युक्तलक्षणाभेद इत्यर्थः· घटोतिस्वो
घटाकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यस्य केवलान्वयिधर्मावच्छिन्नपक्षकत्वाभावेनानुपसंहारित्वाभावा
गा·दी·सा·र· दित्यनुपसंहार्यस्येतिमूलासङ्गतिमाशङ्क्यान्तरा पूरयति·।·इत्यस्यविरुद्धस्येति·।·विरुद्धत्वञ्चास्यानवगत २
साध्यसहचारत्वेसत्यवगतसाध्याभावसहचारी विरुद्ध इतिमते· अनुपसंहार्यस्यविशिष्यानभिधौक्तस्ये
स्याकाङ्क्षायामाह·।·प्रसिद्धस्येति·।·सर्वमनित्यंप्रमेयत्वादित्यादेरित्यर्थः· विरुद्धस्येत्यस्यविरुद्धसामा
न्यपरत्वेदर्शितद्वित्वरूपविरुद्धहेतोः पृथगुपादानानुपपत्तिरतोऽयङ्गौरश्वत्वादित्यादिसर्वगादिसिद्ध
विरुद्धपरतयातद्व्याचष्टे·।·विरुद्धान्तरस्येति·।·तादृशद्वित्वरूपविरुद्धस्यपक्षातिरिक्तसाध्यवद्वृत्तित्वरू
पसमुदायविशेषणेनविरुद्धान्तरस्यचपक्षान्यत्वमनन्तर्भाव्यापिसाध्यवद्वृत्तित्वविशेषणेनव्यावृत्ति

रितिप्रदर्शनाय भेदेनोपादानमिति भावः॥ केवलान्वयिधर्मावच्छिन्नपक्षकत्वं नानुपसंहारित्वं किन्तु प्रतीतव्याप्तिग्रहानुकू
लसहचारत्वमिति मते कथितादृशत्वमनुपसंहार्य्येवेति तन्मतमालम्ब्य यथाश्रुतमूलमुपपादयतो मतमाह॥ अन्वय
तइति॥ साध्यवद्वृत्तित्वांशव्यावर्त्यस्य विरुद्धस्येव पक्षा[illegible]न्यवृत्तित्वांशव्यावर्त्यस्य सर्वमनित्यं प्रमेयत्वादिसाध
नुपसंहार्य्यस्याप्युपादानौचित्यादनुपसंहार्य्यविशेषस्योपादानं निर्वीजमित्यस्वरससूचनाय कश्चिदिति॥ सि
द्धान्तलक्षणे विपक्षपदस्य निश्चितसाध्याभाववदर्थकताभ्रमं निराकरोति॥ अ[illegible]ति॥ निश्चयांशानिवेशमू
लस्यापि सम्मतिमादर्शयति॥ अनुपदमेवेति॥ स्फुटतरमभिधानात्। वास्तवसाध्याभाववद्वृत्तित्वस्य साधा
रणरूपता स्फुटीकरणात्॥ ननु निश्चयगर्भं विपक्षत्वं सम्भ[illegible]वदुक्तिकमपीति शेषः॥ तज्ज्ञानस्य। निश्चयांशज्ञा
नस्य। अप्रतिबन्धकत्वा[illegible]व्याप्तेर्निश्चितसाध्याभाववद्वृत्तित्वाघटितत्वादिति भावः॥ ननु निश्चयांशज्ञानस्याप्रति
कत्वे बन्धेऽपि स्वरूपसत्साध्याभावनिश्चयविषयधर्मिवृत्तित्वज्ञानत्वेन प्रतिबन्धकतया तादृशधर्मिवृत्तित्वं साधा
रणरूपहेत्वाभासो भवेत्। न च निश्चयघटितस्य विशिष्टस्य प्रतिबन्धकज्ञानाविषयत्वेन सामान्यलक्षण

नाज्ञानतया न हेत्वाभासत्वेति वाच्यं । मणिकारोक्तदोषसामान्यलक्षणस्य यथाश्रुतार्थपरतया अनेनैव परिष्कारान्तरप
रिष्कारे कथञ्चिदेतत्साधारण्यस्यापि संभवात् । वस्तुतस्तु साध्याभावनिश्चयविषयीभूतायोगोलकादिधर्मिवृत्ति
त्वस्यायोगोलकादिधर्मिवृत्तितात्वेनैव रूपेण दोषता । तद्रूपविशिष्टविषयकज्ञानस्यायोगोलकादिधर्मिकसा
ध्याभाववन्निश्चयविशिष्टत्वेन प्रतिबन्धकत्वात् । तथा च साध्याभाववन्निश्चयविषयवृत्तित्वेन ज्ञानस्याप्रतिब
न्धकत्वेपि न क्षतिः तेन रूपेण दोषत्वानुपगमात् । न चायोगोलकादिवृत्तिताज्ञानस्योक्तनिश्चयाविशिष्टत्वे
न प्रतिबन्धकत्वेपि तद्विषयकत्वस्य तादृशप्रतिबन्धकताशून्यतादृशनिश्चयाविशिष्टज्ञानसाधारण्य
तानतिरिक्तवृत्तित्वरूपं प्रतिबन्धकतावच्छेदकत्वमिति हेत्वाभाससामान्यलक्षणताज्ञानत्वमिति वाच्यं ।
सामानाधिकरण्यसम्बन्धेन यस्य यस्य यादृशप्रतिबन्धकतावच्छेदकत्वं तत्तदवच्छेदकविशिष्टयावद्
विशिष्टविषयकनिश्चयत्वस्य तत्प्रतिबन्धकतानतिरिक्तवृत्तित्वमिति सामान्यलक्षणस्योक्तसाधारण्य
संभवात् । बाधादिबुद्धिप्रतिबन्धकतायामप्रामाण्यग्रहाभाव एव सामानाधिकरण्यसम्बन्धेनावच्छेदकः प

सिद्धइतिकथञ्चिदेतत्साधारण्यस्यापिसम्भवात्· नचैवंतुल्ययुक्त्याहेतुमत्ताज्ञानविषयधर्मिवृत्तिसाध्याभावादिक
मपितथास्यादितिवाच्य·भिन्नत्वात्·अथैवंमहानसादौवन्ह्यभावभ्रमदशायांहृदादौधूमादिभ्रमदशायाञ्च
तादृशभ्रमविषयेधूमवन्ह्यभावादेर्वृत्तेर्वन्ह्यादिसाध्यकधूमादेःसाधारण्यंस्यादितिचे·न्नदपीष्टमेव·न
चैवंसाधारण्यस्यनित्यदोषताप्रवादविरोधः·उक्तरूपेणसाध्याभाववद्वृत्तित्वरूपविशिष्टविषयकज्ञा
नस्यापिप्रतिबन्धकतयातादृशविशिष्टविषयस्यचाप्रतिबन्धकज्ञानाविषयत्वेननित्यदोषतयात
दविरोधात् सद्धेतुनिष्ठसाध्याभावभ्रमविषयवृत्तित्वादिरूपस्यचतस्यानित्यदोषताया एवोपग
मात्· नचैवंसद्धेतौपक्षतावच्छेदकादिभ्रमविषयवृत्तिसाध्याभावादिकमपिबाधःस्यादविशेषादि
तिवाच्यं·प्रतिबन्धकप्रमाविषयस्यैवदोषत्वोपगमात् तादृशस्यसाध्याभावादिविषयकप्रतिबन्ध
कीभूतज्ञानस्यपक्षतावच्छेदकाद्यंशेभ्रमत्वनियमात्· प्रकृतेचज्ञानद्वयस्यापिमिलितस्यप्रतिबन्धकत
याएकप्रतिबन्धकतयैकज्ञानस्यभ्रमत्वेपिप्रमात्मकापरज्ञानविषयस्यापिदोषतासंभवात्·अत
एवसद्धेतौपक्षवृत्तिसाध्याभावव्याप्यस्याप्रसिद्धावपिपक्षवृत्तित्वेनभ्रमविषयनिष्ठसाध्याभावव्या

प्यत्वादेः सत्प्रतिपक्षतया तस्यानित्यदोषत्वं. मिलितयोः समानधर्मिकसाध्याभाववत्ताग्रहहेतुमत्ताग्रहयोर्व्याप्ति
वुद्ध्योरिव मिलितयोरेकधर्मिकसाध्याभावव्याप्तिपक्षधर्मतावुद्ध्योरनुमितौ विरोधित्वात्. तदुभयैकतरप्रमारू
पैकज्ञानविषयस्य विशिष्टस्य दोषत्वे बाधकाभावात्. नचैवं विरोधिव्याप्त्यादेरज्ञायमानतादशायामपि
सद्धेतौ दुष्टत्वापत्तिरिति वाच्यं. ज्ञानद्वयस्य यत्र प्रतिवन्धकता तत्र प्रतिवन्धकीभूतज्ञानाधिकरणका
गा॰टी॰सा॰र॰ लावच्छिन्नस्यैव विषयस्य दोषत्वादिति. नच ज्ञानान्तरविशिष्टस्य यादृशविशिष्टज्ञानस्य प्रतिवन्धकत्वं ४
तादृशविशिष्टविषयकत्वस्य प्रतिवन्धकतातिरिक्तवृत्तित्वान्न दोषसामान्यलक्षणाक्रान्तत्वमिति वाच्यं. सा
मान्यलक्षणे स्वरूपसम्बन्धरूपावच्छेदकताया एव निवेशनीयत्वात् एकदेशानित्या। प्रेर्यादृशविशिष्टविष
यितासामान्यं प्रतिवन्धकतावच्छेदकमिति विवक्षयैव वारणात्. नचानित्यदोषस्य वाधादेः सर्वदा दोष
तया तदनिर्वाहभयेन प्रतिवन्धकज्ञानाधिकरणक्षणावच्छिन्नत्वस्य सामान्यलक्षणे दुर्निवेशतयाऽनि
त्याभासमपि दोषाणां सर्वदा दोषतापत्तेर्दुर्वारैवेति वाच्यं. यादृशज्ञानान्तरविशिष्टत्वेन यादृशविशि

ष्टज्ञाविषयकज्ञानस्यप्रतिवन्धकतातादृशज्ञानसहिततादृशविशिष्टज्ञानानधिकरणक्षणवृत्तित्ववि
शिष्टतादृशविशिष्टपर्याप्तविषयताविरहविशिष्टत्वेसति यादृशविशिष्टनिरूपितविषयतासामा
न्यमनुमितिप्रतिवन्धकतावच्छेदकंतादृशविशिष्टत्वस्यसामान्यलक्षणतयानित्यदोषेचविशे(
षीभूतनिरुक्तविषयताविरहेणतादृशज्ञानानधिकरणक्षणवृत्तित्वविशिष्टतादृशविषयताविर
हस्यसर्वदैवसत्त्वेनानित्यदोषेचप्रतिवन्धकज्ञानदशायामेवतादृशलक्षणरूपविशेषणविरहेण
तादृशविरहस्यासत्त्वेनसामञ्जस्यात् विशिष्टाभावप्रविष्टलक्षणेनिरुक्तज्ञान[illegible]योरेकतरानधिक
रणत्वमात्रस्यनिवेशेपर्वतोवन्हिमान्धूमादित्यादौमहानसादौवन्ह्यभावादिभ्रमशून्यतादृशाया
मपिधूमादौमहानसादिवृत्तित्वज्ञानमादायव्यभिचारित्वापत्तिः प्रतिहेतौविरोधिव्याप्तिपक्षधर्मता
ज्ञानयोरेकतरमात्रसत्त्वेपिसत्प्रतिपक्षतापत्तिश्चेति विशिष्टाभावघटितयौगिकार्थेउक्तैकज्ञानस
हितापरज्ञानानधिकरणक्षणनिवेशः [illegible]सद्धेतोरधिकरणेसाध्याभावस्यभ्रमसत्त्वेपिहेतो

तदधिकरणवृत्तित्वाज्ञानदशायां न तस्य सव्यभिचारत्वं अपि तु उभयज्ञानदशायामेवेति मिश्रानुयायि
नामाशङ्कां निराकर्तुं साधारण्यस्थले ज्ञानद्वयप्रतिबन्धकतां खण्डयति ।। नन्वेति ।। न च अर्थः रूपान्तरेणे
ति द्रव्यं धूमाभाववत् अयोगोलकं वह्निमदिति ज्ञानेपि वन्हिर्धूमव्याप्यइति ज्ञानोत्पत्तेरित्यर्थः. तद्रूपा
वच्छेदेन साध्याभावनिश्चयसहितं तद्रूपावच्छिन्न विशेष्यकहेतुमत्ताज्ञानं प्रतिबन्धकमित्युक्तौ नायं
गा.दी.ला.र. दोष इति शङ्कते ।। नन्वेवमपीति ।। गौरवादिति ।। विशिष्टज्ञानत्वेन प्रतिबन्धकत्वापेक्षयेत्यादिः नन्
ज्ञानद्वयसत्त्वेपि फलानुत्पत्त्या तन्निर्वाहाय दर्शितरूपेण प्रतिबन्धकताया आवश्यकत्वे गौरवम
किञ्चित्करमेवानन्यगतिकत्वादित्यत आह ।। हेत्विति ।। ज्ञानद्वयस्थले ग्राह्यसाध्याभाववद्वृत्तित्वा
भावविरोधितानवच्छेदकसाध्याभावसामानाधिकरण्यत्वावच्छिन्नस्य हेतावभावेन व्याप्तिज्ञानोत्पा
देबाधकाभावादित्यर्थः तथा च तदानीं व्याप्तिज्ञानानुत्पादस्यैवासिद्धतया गुरुरूपेण प्रतिबन्धकत्व
मप्रामाणिकमेवेति भावः. दर्शितरूपेण प्रतिबन्धकत्वे सर्वथादि सिद्धप्रतिबन्धकताकस्य ग्राहक

विरोधितावच्छेदकप्रकारकज्ञानस्यासङ्ग्रह इत्यत आह । साध्याभावेति । अप्रतिबन्धकत्वापातादिति । साध्याभावग्रहस्य तदा
नीन्तनस्य निर्धर्मितावच्छेदकतया तादृशज्ञानस्योक्तप्रतिबन्धकतावच्छेदकानाक्रान्तत्वादिति भावः । प्रत्यक्षे स
न्निकर्षादिबलात्साध्याभावधर्मितावच्छेदकतया, योगोलकत्वादेरपि भानसम्भवाद्धुत्वानुधावनं । नच साध्याभावप्र
कारितानिरूपितविशेष्यतानिरूपितया स्वसमानकालीनज्ञानीयप्रकारतातदाश्रयधर्मावच्छिन्नवृत्तित्वा
वगाहिज्ञानत्वेन प्रतिबन्धकत्वोपगमादुक्तज्ञानसङ्ग्रहः साध्याभावधर्मितावच्छेदकस्यैव साध्याभावस्यापि
निरुक्तप्रकारताश्रयत्वादिति वाच्यं । द्रव्यत्वादिसामानाधिकरण्येन साध्याभावग्रहकालीनस्य द्रव्यवा
न्निर्हेतुरित्यादिज्ञानस्य प्रतिबन्धकत्वापातात् धर्मितावच्छेदकावच्छेदेन साध्याभावावगाहिज्ञानस्य नि
वेशे निर्धर्मितावच्छेदकसाध्याभावज्ञानकालीनज्ञानस्य दुःसङ्ग्रहत्वात् । विपक्षत्वं निश्चितसाध्याभा
ववत्त्वमेव निश्चयज्ञानस्याविरोधित्वेपि न क्षतिः तदघटितसाध्याभाववद्वृत्तित्वस्यैव दोषत्वोपगमात् ।
साध्याभावे निश्चितत्वाभिधानस्य व्यभिचारज्ञानप्रतिबन्धकतायां तदंश एव निश्चयत्वप्रवेशाद्

स्येतत्प्रदर्शनमात्रार्थत्वा देवश्च साधारण्यस्यनालिस्यदोषनाप्रसक्तिरपीति मिश्राणां द्वितीयमतं दूषयितुमुपन्यस्य
ति।। यत्त्विति।। साध्याभावांशे निश्चयरूपमिति। अथागवि निश्चयत्वं न सामान्यतः साध्याभावसंशयान्यसाध्या
भावज्ञानत्वं महानसं धूमवन्नवा धूमाभाववदयोगोलकं वह्निर्निर्वह्निरित्येतादृशज्ञानासङ्ग्रहात्। नापि हेत्वधिक
रणप्रकारीभूतयत्किञ्चिद्धर्मावच्छिन्नविशेष्यकसाध्याभावसंशयान्यतज्ज्ञानत्वं यत्किञ्चित्त्वनिवेशात् वह्नि
मान्पर्वतो धूमवान्नवा धूमाभाववदयोगोलकं वह्निर्निर्वह्निरिति ज्ञानसङ्ग्रहे तस्यैतादृशायोगोलकस्वरूप
गा॰टी॰ सा॰र॰ यत्किञ्चिद्धर्मावच्छिन्नविशेष्यकसंशयान्यत्वादिति निर्देशः साध्याभावांशे निर्धर्मितावच्छेदकस्य साध्या ६
भाववद्वह्निर्हेतुरिति ज्ञानस्यासङ्ग्रहात् तत्र हेत्वधिकरणांशे साध्याभावमात्रस्य प्रकारकत्वात् तदव
च्छिन्नविशेष्यताकसाध्याभावसंशयस्याप्रसिद्धेः यत्किञ्चित्त्वनिवेशेनाननुगमाच्चेति। अत्राहुः। आ
धेयताविशेषसत्तापन्नस्याधिकरणस्य या संशयत्वनिरूपकविशेष्यतान्यविशेष्यता तन्निरूपित
साध्याभावप्रकारताशालित्वं तन्निश्चयत्वं संशयत्वनिरूपिका च विपरीतकोटिधर्मितावच्छेदकता

पन्नधर्म्मावच्छिन्नाविशेष्यता तदन्यत्वञ्च साध्याभाववद्वह्निधूमइत्यादिज्ञानीयधर्म्मितावच्छेदकानवच्छिन्नवि
शेष्यतादावक्षतमेव. संशयेतु प्रत्येककोटिस्य इतिनिश्चयीयविशेष्यताभ्यामतिरिक्तैव विशेष्यता॰
अतोनिश्चयीयधर्म्मितावच्छेदकावच्छिन्नविशेष्यतायांतदन्यत्वमेवाधिकमत्रानुसन्धेयं. ।शेषां
शे ।आधेयत्वांशे ।संशयसाधारणं ।निश्चयस्यविशेषणानवच्छिन्नं ।अन्यथा ।साध्या
भावांशेनिश्चयत्वात्तिरेश. सन्दिग्धानैकान्तिकत्वापत्ते: पक्षांशेसाध्याभावसंशयात्स्वप
क्षवृत्तित्वावगाहिव्यभिचारज्ञानादनुमितिमात्रोच्छेदापत्ते: साध्याभावसंशयविषयहेतु।
मत्त्वाज्ञानस्याविरोधित्वेप्राचीनसंवादमाह ।नहीति ।पक्षे ।सन्दिग्धसाध्यकप्रकृत
धर्म्मिणि ।पक्षसमे ।सन्दिग्धसाध्यकधर्म्म्यन्तरे ।व्यभिचारे ।व्यभिचारग्रह: प्रतिव
न्धकइतिशेष: व्याप्तिनिश्चये हेतुमतिपक्षादौसाध्याभावसंशयानवतारदशायां
निश्चितायाव्याप्ते: स्मरणे व्यभिचारसंशयायोगात् इतिपक्ष: साध्यवान्नवापक्षह

त्तिर्हेतुरिति विश्रृङ्खलविषयकज्ञानं नाविरोधि विरोधितावच्छेदकरूपाप्रकारकत्वात् किन्तु साध्याभाववद्वृत्तित्व
त्वावच्छिन्नप्रकारकज्ञानमेव. तच्च व्याप्तिनिश्चयप्रतिबन्धकमेवेति न तस्योत्पत्त्यसंभवादित्यर्थः. यत्र व्याप्ति
ग्राहकसहचारदर्शनादिदशायामेव क्वचन हेतुमति साध्याभावसंशय आसीत्तत्र तन्मते पूर्वव्याप्तेरनिश्च
येन पक्षे हेतुदर्शनदशायां व्याप्तिस्मरणासंभवात् पक्षान्तर्भावेन व्यभिचारसंशयसत्त्वात्प्रत्यक्षतन्निश्चय
गा.दी.सा.र. स्यासंभवादनुमितिर्न स्यादित्यत्रेष्टापत्तिमाह ।। तदनिश्चयदशायां त्विति ।। पूर्वव्याप्तेरनिश्चयेऽपि पक्षे सा ८
ध्यसंशयदशायामनुकूलतर्कावतारेण परिभूय व्याप्तिनिश्चयसंभवात् अनुकूलतर्कस्य विशेषदर्शनव
त्संशयप्रतिबन्धकतायामुत्तेजकत्वादत आह ।। अनुकूलतर्कास्फूर्तौ वेति ।। अस्फूर्तिरनवतारः अवगा
हितयैवेत्येवकारेण निश्चयत्वस्य प्रतिबन्धकतावच्छेदकघटकत्वव्यवच्छेदः तथा च साध्याभावांशे सं
शयात्मकमपि ज्ञानं व्यभिचारज्ञानं प्रतिबन्धकमिति भावः संशयायोगादिष्टत्वादित्यत्र हृदयस्यात्रे
व हेतुत्वं बोध्यं. अत एव साध्याभावांशे संशयसाधारणव्यभिचारज्ञानस्य प्रतिबन्धकत्वादेव. पक्ष

इत्यादि शब्दो नित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवानित्वादय इत्यर्थः । बाधप्रतिरोधयोरनवतारेपि विप्रतिपत्तिदशायां
शब्दादावनित्यत्व तद्व्याप्तिविशिष्टयोरनिश्चयेपि अप्रयोजकता । नित्यत्वोसाधकता गीयते तान्त्रिकैरिति शेषः । दाहानुकूले
त्यादयः इति दाहानुकूलादृष्टवानतीन्द्रियधर्मसमवायी दाहजनकत्वादृष्टविशेषवद्वृत्त्यादय इत्यर्थः भर्जनकपालस्थवह्नि
निष्ठानुकूलरूपमादाय सिद्धसाधनवारणाय दाहानुकूलेति । अदृष्टवदात्मसंयोगमादाय सिद्धसाधनवारणा
यादृष्टेति । उष्णस्पर्शमादाय सिद्धसाधनवारणायातीन्द्रियेति । अन्यथा । तादृशव्यभिचारज्ञानस्याप्र
तिबन्धकत्वे पक्षातिरिक्ते साध्यसंशयाविषये सर्वत्र हेतुमति साध्यवत्तानिश्चयात् क्वापि हेतुमति साध्या
भावानिश्चयेन व्याप्तिग्रहस्य दुर्वारत्वात् । एतेन द्वितीयानुमाने वह्निरूपपक्षातिरिक्ते करतलानलसंयो
गादौ दण्डादौ च दाहानुकूलातीन्द्रियधर्मानिश्चयेपि न दोषः पक्षविपक्षान्यतरत्वादिना पर्वतह्रदा
न्यतरत्व तदुभयविशेष्यकप्रमाविषयत्वादिना सर्वत्र पर्वतो वह्निमान् धूमादित्यादिसद्धेतौ सत्प्र
तिपक्षप्रसङ्गात् अनुमितिप्रतिरोधप्रसङ्गात् । तादृशस्यान्यतरत्वादेरधिकरणे क्वचिदपि वह्न्यादे

रनिश्चयेनप्रतिवन्धकतावच्छेदकत्वस्याभावादिव्याप्तेस्तत्रसुग्रहत्वादितिभावः एतच्चसर्वंप्रत्यक्षनि
श्चयेग्राह्यसंशयस्यप्रतिवन्धकत्वमेतेनाभिहितं अन्यथापुनर्ग्राह्यान्तरविशिष्टबुद्धौग्राह्याभावज्ञा
नस्येवाव्यभिचारबुद्धावपिव्यभिचारग्रहस्यापिनिश्चयत्वेनैवप्रतिवन्धकता निश्चयत्वावच्छिन्नं
प्रतिज्ञानत्वेनप्रतिवन्धकत्वेसंशयेनिश्चयत्वावच्छिन्नस्यापरप्रतिवन्धकतायाआवश्यकत्वात्
गा.टी.सा.र. संशयानन्तरंसंशयोदयाज्ज्ञानत्वावच्छिन्नंप्रतिज्ञानत्वेनप्रतिवन्धकत्वासंभवात् निश्चयत्वञ्च ८
वृत्त्यंशइवसाध्याभावांशेपिनिवेश्यं अधिकरणसावृत्तित्वांशे निश्चयात्मकस्य अधिकरणत्वांशे
साध्याभावरूपविशेषणसंशयस्यापिविशिष्टसंशयसमानशीलतयाविशिष्टाभावसंश
याविरोधित्वात् एवमप्यनुकूलतर्कविरहिणांमुक्तानुमानानामप्रयोजकत्वमुपपद्यतएव
व्यभिचारसंशयसामग्रीसत्त्वेनव्याप्तिनिश्चयोत्पत्त्यसम्भवात्निश्चयत्वघटकश्चविपरीत
कोटिप्रकारकत्वेविपरीतकोटिभानप्रयोजकाभावस्यप्रयोजकत्वात् अनुकूलतर्कस्यचविपरीतज्ञा

नविरोधिनस्सत्प्रयोजकसामग्रीविघटनेनैवव्याप्तिनिश्चयोपयोगितेत्यवधेयं. एकोपादाने. एकमात्रवृत्तिसाध्या
त्यन्ताभाववद्वृत्तित्वादेः साधारणलक्षणत्वे. अन्यतराव्याप्तिः॰ साध्यवदन्यवृत्तित्वादावव्याप्तिः. एतच्चान्यो
न्यात्यन्ताभावगर्भव्याप्तिद्वयस्यैवानुमितिप्रयोजकतामते एकाभावघटितव्याप्तेरेव तथात्वे अपराभा
वघटितव्यभिचारस्य व्यभिचारान्तरोन्नायकतयैव विरोधितया हेत्वाभासत्वाविरहात्। साध्यवत्ता.
ज्ञानेति। धर्मितावच्छेदकावच्छिन्ने यद्रूपविशिष्टप्रकारकनिश्चयत्वं साध्यतावच्छेदकावच्छिन्नवत्ता.
ज्ञानप्रतिबन्धकतावच्छेदकं तद्रूपावच्छिन्नत्वेन साध्यतद्वदत्यन्तान्योन्याभावावनुगमय्य तादृश
विशिष्टवद्वृत्तित्वं साधारण्यमित्युक्तावपीत्यर्थः. तादृशाभाववत्त्वस्य. साध्यतद्वदत्यन्तान्योन्या.
भाववत्त्वस्य. एतत्सर्वमसमानप्रकारकज्ञानस्यापि प्रतिबन्धकतामते. अन्यथा साध्याभा
ववद्वृत्तिहेतुरित्यादिज्ञाने हेतुमति साध्याभाववदित्यादिज्ञानस्यासमानप्रकारकत्वेनावि

रोधितयातद्विषयस्यानुमितौ तज्जनकज्ञानेच साक्षादविरोधितया हेत्वाभासत्वाभावेन साधारण्यरूपतानुपप
त्तेः. साध्यतद्वदादेः साध्यतावच्छेदकविशिष्टतद्वदादेः. आदिपदात्साध्यतावच्छेदकतदवच्छिन्नपरिग्रहः प्रति
योगित्वादेरित्यादिनातदवच्छेदकत्वपरिग्रहः। प्रकृतेति। विशिष्टसाध्यविशिष्टसाधनसामानाधिकरण्य
ग्रहत्वावच्छिन्नप्रतिवध्यतानिरूपितप्रतिवन्धकतावच्छेदकविषयताशून्यनिश्चयनिष्ठविषयितायां
निरूपितत्वसम्बन्धेन विशेषणीभूयान्वयव्याप्तिग्रहत्वावच्छिन्नप्रतिवध्यतानिरूपितप्रतिवन्धकता
वच्छेदकत्वेनेत्यर्थः तादृशप्रतिवन्धकतावच्छेदकीभूततथाविधनिश्चयत्वविशिष्टस्वनिरूपितविष
यिताकत्वमितियावत्. अन्वयव्याप्तिनिवेशाद्व्यतिरेकव्याप्तिग्रहविरोधिन्यनुपसंहारित्वेनाति
व्याप्तिः अन्वयव्याप्तिनिवेशश्च स्वव्यापकसामानाधिकरण्यं. व्यभिचारिणि तदप्रसिद्धावपितद्घटव
पदार्थानां परस्परोपश्लेषावगाहिज्ञाननिवेशान्नानुपपत्तिः असमानप्रकारकहेत्वादिधर्मिक
साध्याभावसामानाधिकरण्यादिज्ञानस्यापि तादृशव्याप्तिधीविरोधित्वेतिनतदसङ्ग्रहः तस्यतदवि

गा॰टी॰सा॰र॰

९

रोधित्वे व्यापकसामानाधिकरण्यसाध्याभावासामानाधिकरण्याद्यवगाहिसमूहालम्बनज्ञानविरोधित्वमेव निवेशनीयं
तावद्व्याप्तिग्रहत्वस्य व्यभिचारधीप्रतिवध्यतायां स्वरूपसम्बन्धरूपावच्छेदकत्वविरहेपि न क्षतिः अनतिरिक्तवृत्तित्वरू
पावच्छेदकेनायास्ववदिवक्षणीयत्वात् साध्यसाधनसामानाधिकरण्यग्रहत्वावच्छिन्नप्रतिवन्धकताशरीरेपि तादृशा
मेवावच्छेदकत्वनिवेशनीयं अतः साध्याप्रसिद्ध्यादेर्ग्रहस्याविशिष्टसाध्यग्रहत्वावच्छिन्नाप्रतिवन्धकत्वेपि न तस्या
विरोध्यत्वव्यावर्त्यतानुपपत्तिः शेषं पूर्ववत् साध्याप्रसिद्ध्यादीनामित्यादिना साध्यानिष्ठावृत्तित्वस्य व्याप्य
त्वासिद्धिविशेष[illegible]स्य साधनाप्रसिद्धेः साधननिष्ठावृत्तित्वस्य स्वरूपासिद्धिप्रभेदस्य साध्यसाधनयोः
परस्परासामानाधिकरण्यस्य विरोधात्मकस्यासाधारण्यरूपस्य वा परिग्रहः विशिष्टसाध्याद्युपादानस्य
यथायथं साध्याप्रसिद्ध्यादिवारणप्रयोजनकत्वं बोध्यं धूमवान्धूमाभाववद्वृत्तिवह्नेरित्यादौ धूमा
भाववद्वृत्तित्वादिकमसिद्धिरेव न तु साधारण्यं अतो न तत्संग्रहः क्षतिमावहति साध्याभाववद्वृत्ति
त्वाद्यवगाहिसमूहालम्बनव्याप्तिग्रहनिवेशपक्षे साध्यादेरत्यन्ताभावाप्रतियोगित्वादिकमनुपसं
हारित्वं साध्यादावत्यन्ताभावप्रतियोगित्वाद्यग्रहाविरोधित्वविशेषणं प्रक्षिप्य वारणीयं। नान्य

तद्गर्भव्याप्तिग्रहविरोधित्वमिति।। ग्राह्याभावानवगाहित्वे मणिमन्त्रादिन्यायेन विरोधित्वे मानाभावादिति भावः
सामानाधिकरण्यघटितत्वेनानुमितिजनकतावच्छेदकीभूतहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितसामा
नाधिकरण्यप्रकारताया स्वरूपसाधारणे धर्मेण। अन्वयव्याप्तयः अन्वयव्याप्तिप्रकारताः अन्योन्यात्यन्ताभाव
घटितव्यापकतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यप्रकारताः तत्तदभावघटितव्यभिचाराभावविशिष्ट
गा.टी.सा.र. साध्यसामानाधिकरण्यप्रकारता इति यावत्। अनुगमनीयाः प्रतिबध्यग्रहविशेषणतया निवेशनीयाः।
अतो नैकाभावघटितव्याप्त्युपादाने न्यघटितव्यभिचारसङ्ग्रहस्यावकाश इति शेषः। यथाश्रुतग्रन्थलभ्यो १०
विषयानुगमो नोपादेयः गौरवात् व्यभिचारिणि हेतुव्यापकसाध्यसामानाधिकरण्यरूपविशिष्टव्याप्तिप्रसि
द्धेश्च। ननु उक्तरूपेण नानाविधव्याप्तिविषयतानामनुगमे सम्भवः एकाभावघटितव्यभिचारज्ञानप्र
तिबध्यताया अन्याभावघटितव्याप्तिज्ञाने सत्त्वेन कस्या अपि व्यभिचारज्ञानप्रतिबध्यताया निरुक्तप्रका
रताशालिग्रहत्वव्यापकत्वासम्भवात्। सामानाधिकरण्यानवगाहिव्यापकत्वादिज्ञानस्यापि व्यभिचा
रज्ञानप्रतिबध्यतया सामानाधिकरण्यविषयतायाः स्वरूपसम्बन्धरूपतदवच्छेदकतानाश्रयत्वेन ता

दृशप्रकारताशालिग्रहत्वेअनतिरिक्तवृत्तिस्वरूपायाः प्रतिबध्यतावच्छेदकतायाएवनिवेशनीयत्वात्· यदि
चस्वरूपसम्बन्धरूपप्रतिबध्यतावच्छेदकताघटितसाध्यसामानाधिकरण्यविषयताघटितधर्मावच्छिन्ना
नुमितिकारणतावच्छेदकत्वोपलक्षितविषयतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकस्वविषयि
ताकत्वंविवक्ष्यते तदा पक्षधर्मत्वविषयत्वावच्छिन्नधीविरोधिन्यास्वरूपासिद्धावतिव्याप्तिः हेतुपक्षोभ
यवैशिष्ट्यविषयतावहिर्भूतस्यजनकतावच्छेदकविषयितायानिवेशेप्रयासाधिक्यमितितत्स्वपरि
सज्ञसमूहालम्बनव्याप्तिधीविरोधित्वेनसकलव्यभिचारान्गृह्णाति।· प्रातिस्विकरूपेणेति।· ननुव्या
प्तित्वेनेत्यर्थः तथाचसमूहालम्बनताघटव्याप्तिबुद्धौसकलव्यभिचारधियोविरोधित्वात्सर्वत्रलक्षणस
मन्वयइतिभावः· ननुसाध्याप्रसिद्धिसाधनाप्रसिद्धिवारणानुरोधेनविशिष्टसाध्यसाधनसामाना
धिकरण्यग्रहाविरोधित्वपर्यन्तस्यार्थे· विरोधानीतिप्रसङ्गस्यसामानाधिकरण्याविषयकतावद्व्यभि
चारावगाहिज्ञानत्वेनोपादानेनैवसम्भवादित्यतआह।· साध्येति।· तथाचाव्यभिचरितसामा

नाधिकरण्याभावस्य साधारण्यान्तर्गतस्य संग्रहाय सामानाधिकरण्यविषयकज्ञानमेवोपादेयं. एवं
च विरोधीति व्याप्तिवारणायैव तावत्पर्यन्तं सार्थकमिति भावः. अव्यभिचारविशिष्टसामानाधिकरण्यरूप
व्याप्त्यंशभानविरोधिनि तद्धरे हेऽतिव्याप्तिं लक्ष्यतोपगमेन परिहरति. साध्येति।। व्याप्येप्रसिद्धस्ये स
नेन वन्हिव्यापकधूमसामानाधिकरण्यादिरूपव्याप्तेरप्रसिद्ध्या वन्ह्यादिनिष्ठतदभावप्रसिद्धतया
नातिव्याप्तिप्रसक्तिरिति सूचितं. एतद्दोषः साधारण्यविशेषव्याप्यत्वासिद्धिस्तु साध्याप्रसिद्ध्या
दिरेवेति भावः. अथ व्याप्तिश्च साध्याभाववदवृत्तित्वविशिष्टसाध्यसामानाधिकरण्यरूपा तद्
साध्याभाववदवृत्तित्वेऽ व्याप्तिमज्ज्ञानस्य हेतुतावच्छेदकावच्छिन्नांशेऽव्यभिचारप्रकारकतात्वेन त
दवच्छिन्नधर्मिकव्यभिचारज्ञानाप्रतिवध्यतया व्यभिचारदोषतानुपपत्तिः हेतुविशेषणतापन्नस्याव्य
व्यभिचारसाध्यसामानाधिकरण्यरूपदलद्वयस्य व्याप्तित्वे हेतौ तदुभयप्रकारकज्ञानेऽप्रकारतावच्छे
दकप्रत्येकधर्मावच्छिन्नाभाववज्ज्ञानस्यैव प्रतिवन्धकतया एकविशेषणाभावस्य दोषतानुपप
त्तिरिति चेन्न. तादृशव्याप्तिज्ञानाविरोधित्वात् साध्याभाववदवृत्तित्वसाध्यसामानाधिकरण्योभय

चेद्व्याप्तिस्तदाविशिष्टाभावस्य कथं साधारण्यमुरीकृतं. यदि चाविनिगमनाविरहात्साध्याव्यभिचरितत्वविशिष्टसाध्यसामानाधिकरण्यमिव साध्यसामानाधिकरण्यविशिष्टसाध्याव्यभिचरितत्वमपि व्याप्तिरस्तुभयसङ्ग्रह इत्युच्यते तथाप्यनुमितिं प्रति विशिष्टप्रकारकज्ञानस्य गौरवेण हेतुत्वासंभवादेकत्र द्वयमिति रीत्योभयप्रकारकज्ञानस्य हेतुत्वं वाच्यं तथा च विशिष्टाभावज्ञानस्य जनकज्ञानाविरोधितया तद्विषयविशिष्टाभावस्य कथं हेत्वाभासत्वसामान्यलक्षणाक्रान्तत्वमिति चेन्न. यतो विशिष्टाभावपदमुभयाभावपरं हेतुतावच्छेदकावच्छिन्नविशेषणतापन्नाव्यभिचारसामानाधिकरण्यमुभयमेव व्याप्तिः उभयाभावज्ञानस्य चोभयत्वप्रकारतामनिवेश्योभयप्रकारतानिरूपितैकविशेष्यताशालिज्ञानं प्रत्येव प्रतिबन्धकत्वं लाघवात्कल्प्यते. तादृशज्ञानमुभयत्वप्रकारकमिव तदप्रकारकमपीति. अनुमितिहेतुभूतयुगपदुभयविशेषितहेतुविषयकज्ञानप्रतिविरोधितया तदुभयाभावस्य हेत्वाभासत्वं साधारण्यरूपता चेति न काप्यनुपपत्तिः. विशिष्टव्याप्तेरुपादाने सामानाधिकरण्यांशनिवेशे प्रयोजनविरहः व्यापकतांशमात्रोपादाने नैव सकलसाधारण्यसङ्ग्रहसम्भवात्. तथा चा

५= अत्र चाव्यभिचरितत्वावच्छिन्नप्रकारताविशिष्टहेतुतावच्छेदकावच्छिन्नविशेष्यताशालिबुद्धित्वं प्रतिबध्यतावच्छेदकमणीया वैशिष्ट्यं च. स्वनिरूपितत्व. स्वविशिष्टसाध्यसामानाधिकरण्यत्वावच्छिन्नप्रकारतानिरूपितत्वोभयसम्बन्धेन. स्ववैशिष्ट्यं च. स्वावच्छिन्नविशेष्यतानिरूपितव्याप्यत्वाभिमतावच्छेदकधर्मावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छिन्नत्व. स्वभिन्नत्व. एतदन्यतरसंबन्धेन. इति विवक्षणीयम्. अव्यभिचरितत्वप्रकारकसामानाधिकरण्यप्रकारकबुद्धित्वेन प्रतिबध्यत्वे उभयप्रकारकतदप्रकारकयोः सङ्ग्रहेपि साध्याव्यभिचरितत्वात्मकसामानाधिकरण्यानित्यादावव्याप्तिप्रसक्तेः इति दिक्. ५

व्यभिचरितसामानाधिकरण्याभावो व्याप्यत्वासिद्धिरेव. साध्यसाधनसामानाधिकरण्यग्रहवि
रोधित्वपर्य्यन्तानिवेशेऽपि न विरोधीति व्याप्तिरहस्याशयेनाह। विशिष्टेति।। साध्यतावच्छेदकविशि
ष्टस्यार्थः आक्षेपदशायां साधनतावच्छेदकवैशिष्ट्यस्य साधनविशेषणवैयर्थ्यं. वस्तुतः साधनपदमेव
साधनतावच्छेदकविशिष्टपरं. साध्यपदपूर्वविशिष्टपदार्थस्य साध्ये साधनपदयोर्द्वन्द्वाश्रयण
गा.टी. सा.र. एव साधनान्वयसंभवात् तथा च सति द्वन्द्वापरं [illegible] प्रमाणमत्वर्थस्य साध्येनाप्यन्वयस्यावश्य १३
कत्वापातात्. न च साध्यवत्त्वमपि घटकविशेषणं तथाविवक्षितं साध्यवत्त्वस्य व्यापकत्वाघटक
धान. तया साध्यस्याप्रसिद्धेः अतिप्रसङ्गानवकाशेनानिष्प्रयोजनकत्वात्. एवाह अभिगगनादिवारकं
हेतुमत्त्वमपि व्यापकतायां घटकमिति तत्सार्थक्यमभिमतमस्य. अनुमितौ हेतुमत्त्वघटितव्याप
तानवगाहित्वेन हेतुत्वेऽपि प्रकृतलक्षणे तद्घटितव्यापकतानिवेश्य साध्यवत्त्वग्रहविरो
धित्वनिवेशस्य प्रक्षालनाद्धीति न्यायेनायुक्तत्वात्. साध्याप्रसिद्धेः साधनाप्रसिद्धौ वा

घटक ३

रणाय साध्यतावच्छेदकादेर्वैशिष्ट्यनिवेशनं व्यापकताघटकसाधनवत्संग्रहः विरोधिनः साधननिष्ठावृत्तित्व
स्य वारणाय साधनवद्वृत्तिपर्य्यन्तानुधावनं साध्याभाववद्वृत्तित्वज्ञानस्य व्यापकताज्ञानाविरोधित्वे सा
ध्याभाववद्वृत्तित्वादिविषयकसमूहालम्बनरूपव्यापकताग्रहे विवक्षणीये. अथवा व्यापकताव
च्छिन्नव्याप्तिधीरेवानुमितिहेतुः, ननु साध्याभाववद्वृत्तित्वादिधीसत्त्वे साध्यतावच्छेदके हेतुसमा
नाधिकरणाभावप्रतियोगितावच्छेदकत्वादिकमेव व्यभिचारः ननु हेतौ साध्याभाववद्वृत्तित्वादिकः
साक्षादनुमितिजनकज्ञानाविरोधि आदिमतेनायं कल्पः. ननु अत्यन्तान्योन्याभावगर्भव्यापक
तयोरेकोपादानेऽन्यतरगर्भव्यभिचारासंग्रहः एकाभावगर्भव्यापकताबुद्धावन्यतरगर्भव्यभि
चारज्ञानस्य ग्राह्याभावानवगाहित्वेनाविरोधित्वादित्यत आह । शेषं पूर्ववदिति । अनुमित्यौप
यिकसाध्यविशेष्यतानिरूपितप्रकारतात्वेन द्विविधव्यापकत्वप्रकारत्वं अनुगमनीये प्रा
तिस्विकरूपेण वा तत्तद्व्यापकताप्रकारकत्वं ज्ञाने निवेशनीयमित्यर्थः साध्याभाववद

वृत्तित्वसाध्यवदन्यावृत्तित्वरूपव्याप्तिद्वयमेवानुमित्यौपयिकं ननु व्यापकताघटितमिति मते हे
तौ साध्याभाववद्वृत्तित्वादिकमेव दोषः ननु साध्यतावच्छेदकहेतुव्यापकतावच्छेदकत्वे परमुखनिरीक्षक
त्वान्नन्मते चोक्तलक्षणे तस्यापरिग्रहे लक्ष्यपरिग्रहश्चेति तत्परित्यज्य साध्यात्यन्ताभाववद्वृत्तित्व
स्वसाध्यक[illegible]ति सङ्ग्राहकलक्षण[illegible]। [illegible]लोपरिति। साध्याभावव्याप्यहेतुसा
गा.टी.सा.र. मानाधिकरण्यादिवारणाय साध्याभावव्याप्यादिव्याहृतेनेति। आदिपदात्साध्याभावावच्छे १३
दकादिपरिग्रहः [illegible] तादृशाविरोधिना अर्थे यो हेतुसामानाधिकरण्याभावग्रहः तद्विरोधित्वं १२
तदभावादिव्याहृतेन तज्ज्ञानविरोधित्वं च तद्वत्तानिश्चयप्रतिबध्यतावच्छेदिकासती तद्वत्ताज्ञान
प्रतिबन्धकतावच्छेदिकाया प्रकारतात दाश्रयत्वं तदभावव्याप्यवत्ताज्ञानस्य तद्वत्तानिश्चया
प्रतिबध्यतया तद्विषयत्वुदासः वन्हिव्याप्यसाध्यकस्थले वन्ह्यभावहेतुसामानाधिकरण्यवा
रणाय प्रतिबन्धकतानिवेशः अथ घटाभावादेरपि वन्ह्यभावत्वादिना ज्ञानस्य वन्हिमत्ताज्ञान

विरोधित्वाद्घटाभावादिसामानाधिकरण्येपि वन्ह्यादिसाध्यके व्यभिचारित्वस्यात् साध्यवत्ताज्ञान
विरोधितावच्छेदकीभूतविषयतानिरूपितहेतुसामानाधिकरण्याभावविषयताशालिग्रहविरो
धितानिवेशेन॥ धर्मितावच्छेदकावच्छिन्नविषयतानिरूपितसाध्याभावप्रकारताया एव
साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकतया साध्याभाववेन हेतुसमानाधिकरणज्ञाते ज्ञानीय
साध्याभावविषयतायाऽत्र भास्वादीनत्वेन. फलीभूतज्ञानधर्मितावच्छेदकावच्छिन्नविशे
ष्यतानिरूपितयद्रूपावच्छिन्नप्रकारताशालिनिश्चयत्वेन यद्धर्मावच्छिन्नविशेष्यकसाध्यव
त्ताज्ञानप्रतिबन्धकता तद्रूपावच्छिन्नाश्रयहेतुसामानाधिकरण्यग्रहविरोधितानिवेशेना।
तिप्रसङ्गाभावात् साध्याभावत्वादेरेव तथात्वात्. काञ्चनमयधूमवान्वह्नेरित्यादौ धूमो
न काञ्चनमय इति ज्ञानस्यापि साध्यतावच्छेदकविशिष्टसाध्यवत्ताज्ञानविरोधित्वात् का।
ञ्चनमयत्वाभावसामानाधिकरण्येनातिप्रसङ्गः साध्यतावच्छेदकविशिष्टसाध्यवत्ता।
ज्ञानत्वेन यद्रूपावच्छिन्नप्रकारकनिश्चयप्रतिबध्यतेत्युक्तौ तत्र विशेष्यधूमाभावसामा

नाधिकरण्यासङ्ग्रहः धूमत्वावच्छिन्नाभावप्रतिवध्यताव ध्यतावच्छेदककोटौ काञ्चनमयत्वविषयता
याअनिवेशात् यत्किञ्चिद्धर्मावच्छिन्नविशेष्यताक विशिष्टसाध्यवत्ताज्ञानत्वव्यापकप्रतिवध्यतानिवेशे धू
मो न काञ्चनमय इति ज्ञानप्रतिवध्यतायाः काञ्चनमयत्वविशिष्टधूमादिमत्ताज्ञानत्वव्यापकतया
ऽतिप्रसङ्गस्य दुर्वारतेत्यतः फलीभूतज्ञानधर्मितावच्छेदकावच्छिन्नविशेष्यतानिवेशः यद्यपि धू
मत्वादेरपि काञ्चनमयत्वादिविशिष्टधूमादिमत्ताज्ञानधर्मितावच्छेदकत्वमक्षतमेव काञ्चनम
यद्धूमवान् धूम इत्येतादृशज्ञानस्यापि कदाचित्स्यादतः तथापि विशिष्टसाध्यवत्ताज्ञानधर्मिता
वच्छेदको यो यो धर्मस्तत्तद्धर्मावच्छिन्नविशेष्यतानिरूपित यद्रूपावच्छिन्नप्रकारतातद्धर्मावच्छिन्न
विशेष्यक विशिष्टसाध्यवत्ताज्ञानप्रतिवन्धकतावच्छेदिका तद्रूपावच्छिन्नत्वस्य विवक्षितत्वान्ना
तिप्रसङ्गः हेत्वसामानाधिकरण्य विषयतानिरूपितसाध्यवत्ताधीविरोधितावच्छेदकत्वोपल
क्षितधर्मावच्छिन्नविषयतायाः स्वरूपसम्बन्धरूपप्रतिवध्यतावच्छेदकत्वमेव निवेश्यं.

---

५ = तथापीत्यादेरयं निष्कर्षोऽर्थः- साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकत्वव्यापक
हेत्वसामानाधिकरण्यग्रहविरोधित्वं व्यापकत्वञ्च स्वावच्छिन्नप्रकारतानिरूपितविशेष्यताशालि
निश्चयत्वावच्छिन्नप्रतिवन्धकतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिबुद्धित्वावच्छिन्न
प्रतिवध्यतावच्छेदकविशेष्यतावच्छेदकत्वसंबन्धेनेति. यथाश्रुते यत्र तत्र घटितत्वेनाननुगमात् = ५

नत्वनतिरिक्तवृत्तित्वं. तेनान्योन्याभावघटितव्यभिचारधियोत्यन्ताभावघटितव्यभिचारधियश्च प्र
त्येकप्रतिबध्यतायास्तादृशविषयितात्वावच्छिन्नव्यापकताविरहेपि न क्षतिः अत एव साधनाप्रसिद्ध्या
दावपि नातिप्रसङ्गः साध्याभावादिविषयतायास्तत्प्रतिबध्यतावच्छेदकयोरनिवेशात्. हेतुसा
मानाधिकरण्यविषयतायाश्च धर्मितावच्छेदकताभिन्नत्वमुपलक्षणविधया निवेश्यं. तेन धूमा
समानाधिकरणवन्ह्यभावेन घटसमानाधिकरणज्ञानाविरोधिनि धूमासमानाधिकरणव
न्ह्यभावादौ घटादिसामानाधिकरण्ये नातिप्रसङ्गः॥ साध्याभावव्याप्यसाध्याभावावच्छेदकादिसा
मानाधिकरण्यवारणाय प्रदर्शितप्रकारापेक्षया लघुप्रकारान्तरमाह।। साध्यवतीति।। तादृशा
भावेति।। हेतुसामानाधिकरण्याभाव इत्यर्थः।। हेत्वाभासतेति।। दोषतेत्यर्थः. विशेष्यदलप्रयोज
नं स्फुटयति।। साध्याभावेति।। अविरोधित्वात्।। अनुमितिजनकज्ञानाविरोधित्वात्. अत्र च
प्रकृतानुमितिजनकज्ञानविरोधित्वमेवाभासत्वं. ननु तत्र धूमादिसाधारण्याद्यनुगमनप्रका

रघटितं तस्य योजनाभावात् अनुमितिजनकज्ञानस्याप्यनुमितिजनकतावच्छेदककोटिप्रविष्टवि
षयतावच्छिन्नत्वेन निवेशः ननु विशिष्टपक्षे विशिष्टसाध्यव्याप्यविशिष्टहेतुवैशिष्ट्यावगाहिज्ञा
नत्वेन तथा सत्यनन्तान्योन्याभावघटितनानाव्याप्तीनामननुगमेन तादृशनानाविधव्यभिचारसं
ग्रहासम्भवात् तावद्व्याप्त्यवगाहिसमूहालम्बनानुमितिनिवेशेन तत्संग्रहसम्भवेपि पक्षधर्म
त्वाद्यवगाहितायाः प्रयोजनाविरहेण निवेशप्रसङ्गे न तादृशाभावग्रहविरोधित्वविशेषणवैय
र्थ्याच्च· नन्वेतत्कल्पे धूमाभावव्याप्यासमानाधिकरणवन्हिमान्धूमवान्वन्हेरित्यादौ वन्हिनिष्ठधूमाभाव
व्याप्यसामानाधिकरण्यरूपासिद्ध्यादावतिव्याप्तिरित्यत आह।। विरोधित्वमिति।। पूर्वोक्तदिशेति·
विशिष्टपक्षाद्यग्रहाद्यविरोधिज्ञानस्य विषयतयेत्यर्थः यत्तु धूमवान्धूमाभावसमानाधिकर
णवन्हेरित्यादौ हेतुतावच्छेदकधूमाभावसामानाधिकरण्यादिविशिष्टवन्ह्यसामानाधिकरण्यस्य
धूमाद्यभावानाहार्यज्ञानाप्रसिद्धेस्तत्स्थलीयसाधारण्येऽव्याप्तिरित्याशङ्कायां विरोधित्वमि
त्यादिकमवतार्य निर्वन्हिर्वन्हिमानित्यादिस्थलीयदोषसामान्यलक्षणाव्याप्तिवारकपूर्वोक्त

प्रकारानुसरणपरतया तद्व्याख्यानं· तन्न शोभनं· पूर्वमेवं विधेवरीतिः उत्तरत्र सर्वत्र सव्यभिचारादिलक्षणेऽनुसर्तव्या इत्यभिधानेनैव पौनरुक्त्यापातात्· ननु व्यभिचरितत्वविशिष्टसामानाधिकरण्याभावस्याव्यभिचारज्ञानाविरोधित्वाद्व्याप्तिरित्याशङ्कां तस्या लक्ष्यतामङ्गीकृत्य परिहरति·। स्पष्टदर्शितेति·। व्याप्तिग्रहे संशयसाधारणव्यभिचारधियो विरोधित्वाज्ञानत्वेन प्रतिबन्धकत्वमेव लक्षणे प्रवेश्यं· अतो न साधनाप्रसिद्धादावतिव्याप्तिः तेषां निश्चयस्यैव विशिष्टसाधनादिग्रहे विरोधित्वादित्याशयेन विशिष्टसाधनवत्त्वादिग्रहविरोधित्वमनिवेश्य लक्षणं कुर्वतां मतमाह·। व्याप्तिग्रहेति·। अत्र व्याप्तिग्रहकारणत्वमेवाभावे निवेश्यं न तु तादृशसहचारदर्शनसहकारित्वमव्यावर्तकत्वात् तदभिधानञ्च सहचारदर्शनस्य यथा व्यापकताप्रत्यक्षे स्वातन्त्र्येण कारणता तादृशीया संशयसाधारणज्ञानाभावकारणता सैवात्र निवेश्या· ननु ग्राह्याभावनिश्चयाभावविधया कारणतेति प्रदर्शनाय· व्याप्तिश्च विशिष्योपादेया मणिमन्त्रादिन्यायेन प्रतिबन्धकतामते एकैकविधव्याप्तिज्ञानं प्रत्यपि नानाविधव्यभिचारधियो विरोधित्वादित्यवधेयं· मणिमन्त्रादिन्यायेन विरोधितायामस्वरसात्[illegible]मिति·।।

॥ इति श्रीगदाधरभट्टाचार्यविरचितः
साधारणग्रन्थः समाप्तः शुभमस्तु भूयात्
लिखितं· सोमनाथशर्मणा· ज्ये· कृ· १० रवौ

सं.१९५८.

गा· सा· निः प्रो·　　४११७

~~श्रीगुरवोविजयन्ते~~ ।। ❀ ।। तत्रानुमितिपदमनुमितिनिष्ठकार्यतानिरूपकसम्बन्धित्वेनानुमितिनिष्ठकारणज्ञानपरमिति शिरोमणिः ॥ तत्रनि
रूपकत्वं यदि प्रतियोगित्वं तदा कार्यस्य कार्यस्य कार्यताप्रतियोगित्वाभावादनुमित्यसंग्रहो ऽतः सम्बन्धिपदं सम्बन्धिद्वयसाधारण
स्य तत्साक्षात्कारजनकसाक्षात्कारविषयतात्मकनिरूपकत्वस्य लाभाय अयम्पर्वतो वन्हिमान्हृदश्चतथेत्यादिसमूहालम्ब
नानुमितिविरोधिहृदनिष्ठवन्ह्यभावादिरूपबाधादेः पर्वतादौ धूमादिनावन्ह्यादिसाधने दोषताप्रसङ्ग इत्यादिदूषणं द्वि
तीयकल्पानुसरणवीजमुक्तं भट्टाचार्येण ।। अत्रेदमालोचयामः । अत्रत्यावच्छेदकत्वस्वनिरूपितकारणतावच्छेदकता
न्यतरसम्बन्धेन प्रकृतपक्षसाध्यकानुमितित्वावच्छिन्नकार्यताविशिष्टं यद्विषयत्वं तदवच्छिन्नप्रतिबध्यतानिवेशे तु
स्वदोष इति पूर्वकल्पस्यैव निर्दोषत्वे कल्पान्तरानुसरणं व्यर्थमिति चेन्न । एवमपि एकत्र द्वयमिति रीत्या वन्हिव्याप्यधूम
घटवान्पर्वत इत्याकारकपरामर्शविरोधिज्ञानविषये घटाभाववत्पर्वते वन्हिव्याप्यधूमघटोभयाभाववत्पर्व
ते ऽतिव्याप्तेः । न च निरुक्तान्यतरसम्बन्धेन तादृशकार्यताविशिष्टान्यविषयताशून्यज्ञानीयत्वस्य प्रतिबध्य
ताविशेषणत्वेन नोक्तदोष इति वाच्यं । परामर्शाव्यवहितोत्तरत्वस्य कार्यतावच्छेदकत्वे पक्षसाध्यादिविशेषितायाः
प्रयोजनविरहेण कार्यतावच्छेदककोटावप्रवेशकल्पे बाधादेरसंग्रहापत्तेः बाधनिश्चयप्रतिबध्यतायां ता

दृशगविषयिताशून्यज्ञानीयत्वाभावादिति· एतेनप्रकृतपरामर्शजन्यतावच्छेदककोटौप्रविष्टविषयित्वावच्छिन्नत्वंप्रति वध्यतायांनिवेश्यभट्टाचार्योक्तदोषवारणमित्यपिनिरस्तं·। यत्पक्षकयत्साध्यकस्थले एकेनैवलिङ्गेनानुमितिस त्रप्रकृतपरामर्शाव्यवहितोत्तरत्वस्यापिकार्यतावच्छेदककोटावप्रवेशेन व्यभिचारतादवस्थ्याच्च· नचप्रकृत पक्षसाध्यकानुमितित्वव्यापकप्रतिवध्यत्वंयत्र यत्पक्षप्रकृतपक्षसाध्यहेतुकपरामर्शत्वव्यापकप्रतिवध्य त्वमेतदन्यतरनिरूपितप्रतिवन्धकतानिवेशेनकोपिदोषइतिवाच्यं· व्यापकत्वस्यद्विधानिवेशेगौरवा दित्यालोच्यप्रकृतपक्षेप्रकृतसाध्यप्रकारकसाध्यव्याप्यहेतुप्रकारकसमूहालम्बनानुमितित्वव्यापक प्रतिवध्यतांनिवेश्यकल्पान्तरमुक्तंदीधितिकृता·॥ नचतत्कल्पेवह्निव्याप्याभाववद्ह्रदादावतिव्याप्तिः तस्यहेतुमत्ताग्रहविरोधितया स्वरूपासिद्ध्यात्मकत्वादितिवाच्यं। तस्यापिव्याप्यत्वासिद्धित्वेनलक्ष्यतया, सिद्धिग्रन्थेमथुरानाथेनोक्तत्वात्· यत्तुप्रकृतपक्षसाध्यकानुमितित्वावच्छिन्नकार्यतासाक्षात्कार त्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितावद्विषयित्वावच्छिन्नत्वंप्रतिवध्यतायांनिवेश्यं· अतः पूर्वकल्पेव्याप्तिव्याप्योरनवकाशेनकल्पान्तरानुसरणंनिर्वीजमिति· तन्न· तथापिचकार्यतासाक्षा

त्कारत्वावच्छिन्नं प्रति अनुमित्यात्मकसंम्बन्धिव्यक्तिसाक्षात्कारत्वेन परामर्शसाक्षात्कारत्वेन च हेतुत्वं सम्बन्धिद्वय
साक्षात्कारस्य वाच्यं अतो नुमितिविषयितायाः परामर्शविषयितायाश्च तथाविधसाक्षात्कारजनकतावच्छेदकवि
षयतावत्ताभावात् तादृशविषयितावह्निविषयित्वावच्छिन्नप्रतिवध्यताकप्रतिवन्धकतावच्छेदकविषयिताशून्य
त्वान्नुमाद्यादावव्याप्तितादवस्थ्यात् ' किञ्चानुमित्यादिविषयितायास्तथाविधसाक्षात्कारजनकतावच्छेदक
विषयतावत्त्वेपि एकवद्द्वयमिति रीत्या प्राग्रुक्तज्ञानमादाय घटाभाववत्पर्वतादावतिव्याप्तितादवस्थ्यात्.
न च तथापि जनकतावच्छेदकविषयित्वाभाववह्निविषयताशून्यज्ञानीयप्रतिवध्यतानिवेशेन कोपि दोष इ
तिवाच्यं ' एवमपि परामर्शविषयितात्वेन घटादिविषयित्वावगाहिनो निरुक्तसम्बन्धिद्वयसाक्षात्कार
स्यापि तथाविधकार्यतासाक्षात्कारजनकतया घटादिविषयितायाअपि तादृशजनकतावच्छेदकवि
षयतावत्वेन घटाभाववत्पर्वतादावतिव्याप्तेरिति कृतं पल्लवितेन. ॥०॥ स्वव्यधिकरणप्रकारावच्छि
न्नायायाविषयता तन्निरूपकत्वरूपं सर्वांशेभ्रमत्वभिन्नत्वं भट्टाचार्येण विवक्षितं ।। अथात्रस्वा
धिकरणावृत्तित्वं स्वनिरूपितप्रकारतासंम्बन्धेन वाच्यं ' अन्यथा संयोगेन वन्हिमान्हृद इत्यादिज्ञान

वच्छेदक

स्यापि प्रमात्वापत्तेर्वन्ह्यादेः कालिकादिसम्बन्धेन ह्रदादिवृत्तित्वात् । एवञ्च गुणो गुणान्यत्वविशिष्टसत्तावान् संयोगो
न गुणो गुणवानित्यादिज्ञानस्य च प्रमात्वापत्तेः । आद्ये विशेष्यवृत्तिपदार्थस्य विशिष्टानुयोगिकाभावानभ्यु
पगमेन सत्तावृत्तिगुणवृत्तित्वाभावस्य विशिष्टसत्ताया मप्रसत्वात् । द्वितीये च स्वनिरूपितप्रकारतावच्छे
दकसंयोगसम्बन्धेन गुणवृत्तित्वाप्रसिद्धेरिति । नच स्वनिरूपितत्वस्यावच्छेदकीभूतधर्मावच्छिन्नाभावव
द्वृत्तित्व एतदुभयसम्बन्धेन प्रकारताविशिष्टविशेष्यत्वस्यानिरूपकत्वमेव सर्वांशे भ्रमभिन्नत्वं वाच्यं ।
अतो नोक्तदोष इति वाच्यं । एवमपि रङ्गे स्वरूपतो रजतत्वप्रकारकस्येदं रजतमित्याकारकज्ञानस्य भ्रमभि
न्नत्वापत्ते रजतत्वावच्छेदकधर्मप्रसिद्ध्या स्वपदेन रजतत्वप्रकारताया धर्तुमशक्यत्वात् । नच स्वावच्छे
दकसम्बन्धावच्छिन्नस्वावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्व स्वनिरूपितत्वोभयसम्बन्धेन प्रका
रता~~विशिष्ट~~विशिष्टविशेष्यत्वानिरूपकत्वमेव भ्रमभिन्नत्वं वाच्यं । गुणादौ विशिष्टसत्तात्वविशि
ष्टवैशिष्ट्यबोधस्य तन्नियामकीभूतविशिष्टनिरूपितसमवायरूपस्वावच्छेदकसम्बन्धावच्छिन्न
प्रतियोगिताकाभाववद्वृत्तित्वघटितदर्शितोभयसम्बन्धेन विशिष्टसत्तात्वावच्छिन्नप्रकारताविशिष्ट

विशेष्यताकत्वेन भ्रमत्वं निर्वहत्विति रङ्गे स्वरूपतो रजतत्वप्रकारकज्ञानस्यापि दर्शितोभयसम्बन्धेन तादृशप्रकारताविशिष्टविशेष्यता
शालित्वाद्भ्रमत्वनिर्वाह इति वाच्यं तावतापि विषयितासम्बन्धेन प्रकारत्वेन घटत्वानवगाहि घटत्वत्वेन घटत्वावगाहिज्ञानधर्मि
कस्य विषयितया घटत्वत्वेन घटत्वप्रकारकज्ञानस्य स्वावच्छेदकीभूतविषयित्वसम्बन्धावच्छिन्नस्वावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्व
घटितदर्शितोभयसम्बन्धेन प्रकारताविशिष्टविशेष्यताशालित्वाद्भ्रमत्वापत्तेः विषयितया प्रकारत्वेन घटत्वावगाहिज्ञाने विषयित्व
सम्बन्धेन प्रकारत्वावच्छिन्नाभावासत्वेन तद्धर्मिकस्य विषयितासम्बन्धेन स्वरूपतो घटत्वादिप्रकारकभ्रमस्य दर्शितोभयस
म्बन्धेन प्रकारताविशिष्टविशेष्यताशून्यत्वात् यथार्थतापत्तेश्चेति मैवं स्वावच्छेदकसम्बन्धावच्छिन्नस्वावच्छेदकधर्मावच्छिन्ना
भाववद्वृत्तित्व स्वनिरूपितत्वोभयसम्बन्धेन प्रकारताविशिष्टविशेष्यताशून्यत्वे सति स्वनिरूपितत्व स्वाश्रयनिष्ठाधिकरणता
वत्त्वोभयसम्बन्धेन विशेष्यताविशिष्टनिरवच्छिन्नप्रकारताशून्यत्वस्य सामान्यतो भ्रमभिन्नत्वपदेन विवक्षितत्वात् तादृ
शाधिकरणतावत्त्वञ्च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेद
वत्त्वसम्बन्धेन ग्राह्यं स्वरूपतो घटत्वानवगाहि घटत्वत्वेन घटत्वावगाहिज्ञानधर्मिकविषयितया घटत्वत्वेन घटत्व
प्रकारकज्ञानस्य प्रमात्वसम्पादनाय प्रकारतायां निरवच्छिन्नत्वनिवेशः प्रकारत्वेन घटत्वावगाहिज्ञानधर्मिकस्य

स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वञ्च, स्वावच्छेदकसम्बन्धावच्छिन्नस्वाश्रय
निष्ठनिरवच्छिन्ननिरूपकताकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदव[illegible]
वत्त्वसम्बन्धेन +

३

विषयतयास्वरूपतोघटत्वप्रकारकज्ञानस्यप्रमात्वापत्तिवारणायसम्बन्धघटकनिरूपकतायांनिरवच्छिन्नत्वनिवेशः॥अथ
यद्रूपपदेनकिंधर्तव्यं अत्रयदि सामानाधिकरण्यसम्बन्धेन वन्ह्यभावविशिष्टह्रदत्वमुच्यते तदाधर्मितावच्छेदकवि
धयाह्रदत्वानवगाहिसामानाधिकरण्यसम्बन्धेनवन्ह्यभाववद्ध्रदत्ववानित्यादिज्ञानेऽपि यद्रूपावच्छिन्नविषयितायाः
सत्वेनानुमितिप्रतिबन्धकतातिरिक्तवृत्तित्वादसंभवः. यदिचवन्ह्यभावह्रदत्वेतदुभयमुच्यते तदाएकत्रद्वयमितिरी
त्यातदुभयावगाहिज्ञानेतदुभयविशिष्टनिरूपितविषयितायाःसत्वेनानुमितिप्रतिबन्धकतातिरिक्तवृत्तितयाअसं
भवःस्यादिति ॥ अत्रकेचित्. यद्रूपावच्छिन्नविषयित्वंयादृशयादृशधर्मावच्छिन्ननिरूपितंतादृशतादृशधर्मावच्छिन्न
विषयित्वाभावकूटवज्ज्ञानीयस्वरूपसम्बन्धरूपप्रतिबन्धकतावच्छेदकतावा. यद्रूपावच्छिन्नविषयित्वंप्रतिबन्ध
कतानतिरिक्तवृत्तितद्रूपवत्त्वं. लक्षणं. यद्रूपपदेनवन्ह्यभावह्रदत्वोभयमेवधर्त्तव्यं एकत्रद्वयमितिरीत्याज्ञानेयाद्वि
यित्वं तत्स्वरूपसम्बन्धरूपावच्छेदकतावदितितद्ध्रासः. वन्ह्यभावरूपैकदेशेऽपिनातिव्याप्तिः वन्ह्यभावत्वा
वच्छिन्नविषयित्वेवन्ह्यभावह्रदत्वोभयावच्छिन्ननिरूपितत्वंनवर्त्ततइतितादृशोभयावच्छिन्ननिरूपितविषयित्वा
भाववत्त्वेकेवलवन्ह्यभावविषयकज्ञानेतदीयविषयितायांस्वरूपसम्बन्धरूपावच्छेदकत्वाभावात्. एवञ्चजाति

इतिप्रथमलक्षणम्

प्रकृतानुमितिप्रतिबन्धकतानतिरिक्त
वृत्तित्वेनाभिमतं तद्रूपावच्छिन्नविषयित्वं ८ ५

५

मान्वन्ह्यभाववत्तित्वादि ज्ञानवारणाय व्यापकीभूतविषयताशून्यत्वमपि स्वतन्त्रं नास्ति पाषाणमयत्ववत्सर्वत्रेऽति व्याप्तिवार
णायातिरिक्तवृत्तित्वप्रवेश इत्याहुः. तदसत्. गोत्वाभावो गोत्ववानिति भ्रमात्मकज्ञानीयविषयतामादाय गोत्वाभावेऽति
व्याप्तेः गोत्वाभाववत्तावच्छिन्नविषयितायां गोत्वाद्यनिरूपितत्वासत्त्वात्. परे तु. ह्रदाद्यंशे ह्रदत्वाद्यवच्छिन्नानुयोगिताकस्व
विशिष्टस्वरूपसम्बन्धेन वन्ह्यभावघटित वन्ह्यभाववद्ह्रदत्वमेव यद्रूपपदेन वक्तव्यं. एवञ्च ह्रदयमिति रीत्या ज्ञाने ह्रदत्वाव
च्छिन्नानुयोगिताकस्वविशिष्टस्वरूपसम्बन्धेनत्वं ~~वन्ह्यभाववत्त्व~~मुल्लिख्यते अपि तु ह्रदत्वादि धर्मितावच्छेदकं ज्ञानमेवेति न कोपि
दोषः ~~[illegible]~~ प्राहुः. केचित्तु वन्हिधर्मितावच्छेदकतापन्नाभाववत्त्वावच्छिन्नधर्मितावच्छेदकतापन्नह्रदत्वमेव यद्रूपपदे
न वाच्यमिति. वदन्ति. तन्न. तथा सति वन्हिधर्मितावच्छेदकतापन्नाभाववत्त्वावच्छिन्नधर्मितावच्छेदकतापन्नपर्वत
त्वमादाय भ्रमविषयेऽतिव्याप्त्यापत्तेः. यदि च तादृशधर्मितावच्छेदकतापन्नं यद्वन्ह्यभाववद्ह्रदत्वादिकं तदेव यद्रू
पपदेनोच्यते. तदा न दोष इति ध्येयं. नव्यास्तु. प्रकृतानुमितिप्रतिबन्धकतावृत्तिरूपावच्छिन्नानुयोगिताकपर्याप्ति
कविषयितानिरूपकतावच्छेदकताश्रयरूपमेव यद्रूपं तादृशरूपवत्त्वं वा वन्ह्यभाववद्ह्रदत्वादिगतसमुदायत्वमेव
तादृशं समुदितलक्षणार्थः. प्रतिबन्धकतावृत्तिस्वत्व. स्वावच्छिन्नानुयोगिताकपर्याप्त्यवच्छेदकताकविषयित्वसमा

विशिष्टानुयोगिकवैशिष्ट्यबोधीयविषयतानिरूपकता
वच्छेदकधर्म एव यद्रूपपदेनाविवक्षितः विशिष्टानुयोगि
कवैशिष्ट्यावगाहिबोधे धर्मितावच्छेदकावच्छिन्नानुयोगि
कत्वस्य प्रकारसम्बन्धांशे नियतत्वादिति - उ: ६:

४ नाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वसम्बन्धेनबोध्यमिति प्राहुः ॥१०॥
यद्विषयकत्वेन यादृशविशिष्टविषयकत्वेन तेनानुमितिप्रतिबन्धकपक्षविशेष्यकभ्रमविषये साध्याभावादौ सद्धे
त्वादिनिष्ठे नातिप्रसङ्ग इति शिरोमणिः ॥ यत्सम्बन्धावच्छिन्नपक्षनिष्ठप्रकारताकत्वेनानुमितिप्रतिबन्धकत्वं तेन
सम्बन्धेन तद्वत्त्वस्य दुष्टताव्यवहारनियामकत्वोपगमे पर्वतविशेषणकवह्न्यभावज्ञानस्य विशेषणताविशेषा
वच्छिन्नाधेयतासंसर्गावच्छिन्नपर्वतादिनिष्ठप्रकारताकत्वेन विरोधित्वात् तत्सम्बन्धेन पर्वतादिसत्तायाः प
र्वतमहानसान्यतरत्वादिरूपसद्धेतौ सत्त्वेपि प्रसिद्धधूमादिहेतावसत्त्वाद्दुष्टताव्यवहारापत्तेरप्रयोग इति
तदनुरोधेन पक्षविशेष्यकेत्युक्तमिति गादाधरी ॥ अथ यत्सम्बन्धावच्छिन्नपक्षनिष्ठप्रकारताकत्वेनानुमिति
प्रतिबन्धकत्वं तेन सम्बन्धेन तद्वत्त्वस्य दुष्टताव्यवहारनियामकत्वोपगमे धूमत्ववान्पर्वतो वह्निमान्धूमादि यत्र धूमादेर्दुष्ट
तानुपपत्तिः स्वरूपसम्बन्धावच्छिन्नधूमत्वाभावप्रकारकत्वेनानुमितिप्रतिबन्धकतया तेन सम्बन्धेन धूमत्वा
भावादेर्धूमेऽसत्त्वात् । न च धूमत्वे पर्वतावृत्तित्वादिप्रकारकज्ञानस्यापि विरोधितया समवायसम्बन्धा
वच्छिन्नपर्वतवृत्तित्वाभावादेः स्वरूपसम्बन्धेन धूमादौ सत्त्वान्न तत्र दुष्टत्वानुपपत्तिरिति वाच्यं । तावतापि

रूपत्ववान्पर्वतो वह्निमान्तद्रूपादित्यादौ दुष्टतानुपपत्तिः यदि च रूपत्वनिष्ठाधेयतायां पर्वतनिरूपितत्वाभावस्यापि अनुमितिप्रति
बन्धकतावच्छेदकप्रकारत्वात्तमादायेन दुष्टत्वोपपत्तिस्तदा निरूपितत्वसम्बन्धेन पर्वतनिरूपिताधेयत्वनिरूपिताधेयत्व
वान्पर्वतो वह्निमान्वाच्यत्ववान्वा पर्वतनिरूपिताधेयत्वादित्यादौ दुष्टतानुपपत्तिः तत्र निरूपकत्वसम्बन्धावच्छिन्नप्रति
योगिताकतादृशपक्षतावच्छेदकाभावस्य तादृशपक्षतावच्छेदकनिष्ठनिरूपकत्वसम्बन्धावच्छिन्नपर्वतवृत्तित्वाभाव
स्य तादृशपक्षतावच्छेदकनिष्ठाधेयतायां पर्वतनिरूपितत्वाभावस्य च प्रकृतहेतावसत्त्वात्· न च तत्र पक्षनिष्ठाधिक
रणतायां तादृशपक्षतावच्छेदकनिरूपितत्वाभावस्यापि प्रतिबन्धकतावच्छेदकप्रकारत्वात्तद्वत्त्वस्य च हेतोस्सत्वात्तानु
पपत्तिरिति वाच्यं· तस्यापि पर्वततादृशाधेयतान्यतरस्य पक्षतावच्छेदकस्थत्वे प्रकृतहेतौ तादृशान्यतरनिरूपितत्वा
भावादेरसत्त्वाद्दुष्टतानुपपत्तिरेवेति चेन्न· रूपत्वाभावव्याप्यः पर्वतवृत्तिरित्यादिज्ञानप्रकारतापन्नपर्वतवृत्तित्वा
दिकमादाय तद्रूपस्य दुष्टतासम्भवादेवं तादृशाधेयतानिरूपिताधेयताभावव्याप्यः पर्वतवृत्तिरिति ज्ञानप्रकारता
पन्ननिरूपकत्वसम्बन्धावच्छिन्नपर्वतवृत्तित्वादिकमादाय पर्वतनिरूपिताधेयत्वस्य दुष्टत्वसम्भवात्· इति· न
चैवं वह्न्यभावव्याप्यः पर्वतवृत्तिरित्यादिपक्षविशेषणकज्ञानप्रकारतापन्नपर्वतवृत्तित्वादिकमादाय वह्निमान्द्रू

मादिति प्रसिद्धसद्धेतावपि दुष्टत्वप्रसक्तौ तद्ग्रन्थासङ्गतिरिति वाच्यं. तावतापि वाधभ्रमस्थले पक्षविशेष्यकभ्रममादायैव दुष्टताप
त्तिः सम्भवति इत्यंशुरपि विशेषोध्यवसायकर इति न्यायेन तद्ग्रन्थोक्तिसम्भवादिति ध्येयं. केचित्तु. तादृशदुष्टतास्थले पक्षतावच्छे
दकविशिष्टपक्षनिष्ठभेदप्रतियोगित्वबुद्धेरपि पक्षतावच्छेदकविशिष्टग्रह विरोधितायां तादृशप्रतियोगित्वमादाय दुष्टत्वसम्भवा
न्नानुपपत्तिरित्याहुः. तच्चिन्त्यं ॥१०॥ जातिमान्वन्ह्यभाववानित्यादिज्ञानमादाय वन्ह्यभाववद्ध्रदादावसम्भववारणार्थं यद्रूपावच्छि
न्नविषयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नविषयितात्वं तद्रूपावच्छिन्नविषयित्वशून्यत्वं यादृ
शविशिष्टविषयकनिश्चये निवेशितं भट्टाचार्य्येण ।। अथ ह्रदत्वसामानाधिकरण्येन वन्हेः साध्यतास्थले ह्रदत्वावच्छेदेन वन्ह्यभा
वादेरेव दोषतया जातिमान्वन्ह्यभाववानिति ज्ञाने ह्रदत्वव्यापकप्रतियोगिकस्वरूपसम्बन्धघटितवन्ह्यभाववद्ध्रदत्वविशिष्टविष
यितायाः असत्वेन तत्र लक्षणगमनात् भट्टाचार्य्येण कथमसम्भवो दर्शित इति. न च जातिमान्वन्ह्यभाववानिति ज्ञानएव तत्र ह्रदत्वव्यापक
प्रतियोगिकसम्बन्धावभासने तज्ज्ञानमादायापि तत्र लक्षणगमनासम्भव इति वाच्यं. भट्टाचार्य्येणैकदेशव्यापकत्वानभ्युप
गमात् जातिधर्म्मितावच्छेदककज्ञाने शुद्धह्रदत्वव्यापकत्वस्य संसर्गतया भानासम्भवादिति चेन्न. उक्तस्थलेपि प्रकारीभूतवन्ह्य
भावत्वांशे प्रमेयत्वाद्यवगाहि ह्रदो वन्हीयप्रमेयत्वविशिष्टवानित्यादिज्ञानमादाय तत्रापि लक्षणगमनासम्भवादिति ध्येयम्.

अथवादृशविशिष्टविषयकज्ञाने अव्यापकीभूतविषयिताशून्यत्वनिवेशेऽपि अभावत्वेन ह्रदत्वावगाहि अभाववान्वन्ह्यभाव
वानिति ज्ञानवारणमशक्यं. अभावत्वावच्छिन्नविषयितात्वस्य वन्ह्यभाववद्ध्रदत्वविशिष्टविषयित्वसमानाधिकरणाभावप्र
तियोगितानवच्छेदकत्वा■द्रूपपदेनाभावत्वस्य धर्तुमशक्यत्वात्. न च यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नवि
षयितात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपा
वच्छिन्नविषयिताशून्यत्वं ज्ञाने निवेश्यं. तथा चाभावत्वावच्छिन्नविषयितानिरूपितवन्ह्यभाववद्ध्रदत्वावच्छिन्नविषयिताकं
तादृशाभावप्रतियोगितावच्छेदकमेवेति तादृशविषयिताशून्यत्वं नोक्तज्ञानस्येति वाच्यं. अभावत्वावच्छिन्नविषयिता
निरूपितवन्ह्यभाववद्ध्रदत्वावच्छिन्नविषयितायाः अपि वन्ह्यभाववद्ध्रदादिविषयकज्ञानेऽपि सत्वेन तादृशविशिष्टवि
षयित्वव्यापकत्वाभावेन यद्रूपपदेनाभावत्वादेर्धर्तुमशक्यत्वात्. यदि च यद्रूपावच्छिन्नविषयितात्वावच्छिन्ननिरूपित
यद्रूपावच्छिन्नविषयितात्वं तादृशविशिष्टविषयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयि
तात्वावच्छिन्ननिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वस्य निवेशान्न दोषः. यतो वन्ह्यभाववद्ध्रदत्वावच्छिन्नविष
यितात्वावच्छिन्ननिरूपितत्वं न वन्ह्यभाववान्ह्रद इति ज्ञानीयाभावत्वावच्छिन्नविषयितायां किन्त्वभाववान्वन्ह्यभा

ववानिति तज्ज्ञानीयविषयितायामेवेति तज्ज्ञानव्युदास इत्युच्यते. तदैतादृशी या गोत्वाभावत्वावच्छिन्नविषयितात्वाव
च्छिन्ननिरूपितगोत्वत्वावच्छिन्नविषयितात्वस्य गोत्वाभावत्वविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगि
तावच्छेदकतया तादृशविषयितानां शून्यत्वस्य गोत्वाभावो गोत्ववानिति भ्रमे सत्वा तादृशभ्रममादाय गोत्वाभावादा
वतिव्याप्तिविरहेण वक्ष्यमाण सामान्यपदव्यावृत्त्यसङ्गतिः. एतेन भ्रमसामान्यभिन्नत्वमपि निविश्याभाववान्वन्ह्य
भाववानित्यादिज्ञानवारणायैतस्यापि निरस्तं. एतत्पाठस्य लक्षणस्य यथार्थत्वाघटिततया तत्कल्पे तस्यानुपादे
यत्वाच्च. न च यादृशगविषयितात्वं तादृशवैशिष्ट्यविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं
तादृशविषयितात्वावच्छिन्नशून्यत्वं विशेषणं देयं. तथाच वन्हित्वावच्छिन्नविषयितानिरूपिताभावत्वावच्छिन्न
विषयितानिरूपिता या ती अभावत्वावच्छिन्नावच्छेदकतानिरूपित याविषयिता तादृश विषयितात्वरूपतादृशवैशिष्ट्यविषयक
त्वसमानाधिकरणाभावप्रतियोगितावच्छेदकीभूतधर्मावच्छिन्नाभावासत्वेनोक्तज्ञानव्युदास इति वाच्यं. एव
मपि सामान्यपदस्य व्यावृत्त्यसङ्गतेः गोत्वविषयतानिरूपिताभावविषयितानिरूपितगोत्वविषयितात्वस्य
तादृशाभावप्रतियोगितावच्छेदकत्वात्. वन्ह्यभाववान्ह्रद इति ज्ञानेन निरूप्यनिरूपकभावापन्नह्रदत्वनिष्ठवि

जातित्वेन ह्रदत्वावगाहि ज्ञानानिष्ठ+

रवच्छिन्नावच्छेदकतानिरूपितविशेष्यतात्वरूपतादृशाभावप्रतियोगितावच्छेदकीभूतधर्मावच्छिन्नाभावासत्त्वेनासम्भवापत्ते
श्चेति । मैवं । स्वाभाववन्निष्ठविशेष्यतानिरूपितस्वनिष्ठप्रकारताकत्वस्वाश्रयनिष्ठविशेष्यतानिरूपितस्वनिष्ठप्रका
रताकत्वोभयसम्बन्धेन धर्मविशिष्टान्यत्वेन स्वाश्रयाभाववद्वृत्तित्वस्वनिरूपितत्वोभयसम्बन्धेनावच्छेदक
ताविशिष्टविषयताशालितान्यत्वेन वा यादृशविशिष्टविषयकनिश्चयस्य विशेषणीयतया, भाववान्वह्न्य
भाववानित्यादिज्ञानवारणसम्भवादिति ॥ केचित्तु यथाश्रुतव्यापकीभूतविषयिताशून्यत्वनिवेशे जाति
मान्वह्न्यभाववानिति ज्ञानव्यावर्त्तनेऽप्यभाववान्वह्न्यभाववानित्यादिज्ञानव्यावर्त्तनासम्भवः, एवं जाति
मान्वह्निमानित्यादौ वह्न्यभाववज्जातिमद्भेदे व्याप्तिः नाम नीत्या येन सर्गसामेव वह्न्यभाववज्जाति
मद्विषयतानां तादृशबाधविषयत्वाव्यापकत्वेन तादृशविषयिताशून्यत्वस्योक्तबाधविषयकज्ञानेऽस
त्त्वात् । अतो यद्रूपावच्छिन्ननिरूपितयत्किञ्चिद्विषयिताविशिष्टनिश्चयत्वव्यापकं प्रकृततावृत्तित्वव्या
पकं प्रकृतानुमितिप्रतिबन्धकत्वं तद्रूपवत्त्वमेव लक्षणं वाच्यं । वैशिष्ट्यं च स्वनिरूपकतावच्छेदकतापर्य्या
प्त्यधिकरणधर्मपर्य्याप्तावच्छेदकताकनिरूपकताकविषयत्वसमानाधिकरणभेदप्रतियोगितावच्छे

दयविषयिताशत्मत्वसम्बन्धेन, यत्किञ्चिद्विषयितायां यद्रूपावच्छिन्ननिरूपितत्वं च यद्रूपपर्याप्तावच्छेदकताव
निरूपकताकत्वं. तेन वह्न्यभाववान्ह्रद इत्यादिज्ञानीयवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयताया अपि ह्रदत्वाव
निरूपितत्वस- च्छिन्नत्वेन यत्किञ्चित्पदेन तादृशविषयत्वमादाय शुद्धह्रदे नातिव्याप्तिः जातिमान्वह्न्यभाववानिति ज्ञा
नीयविषयकत्वं च वह्न्यभाववद्ध्रदत्वावच्छिन्ननिरूपितयत्किञ्चिद्विषयतानिरूपकतावच्छेदकधर्माव
च्छिन्ननिरूपकतावच्छेदकताकविषयताशालि वह्न्यभाववान्ह्रद इति ज्ञानवृत्ति भेदप्रतियोगितावच्छेद
क[illegible]मेवेति नतत्वृत्यत्वं जातिमान्वह्न्यभाववानिति ज्ञाने. किन्तु वह्न्यभाववान्ह्रद इति निश्चय एवे
ति. तादृशनिश्चयत्वव्यापकत्वप्रयुक्तानुमितिप्रतिबन्धकतायामक्षतमेवेति यत्किञ्चित्पदेन ह्रदे
वह्न्यभाववानित्यादिज्ञानीयविषयतामादाय बाधादौ लक्षणसमन्वयः. एवं जातिमान्वह्न्य[illegible]
[illegible]वानित्यादावपि वह्न्यभाववज्जातिमद्ध्रदे नाव्याप्तिः जातित्वेन यत्किञ्चिज्जातित्वावगाहि वह्न्य
भाववज्जातिमदित्यादिज्ञानीयविषयताया एव यत्किञ्चिद्विषयतापदेनोपादीयमानतया तादृश
विषयताविशिष्टनिश्चयत्वव्यापकत्वस्य प्रतिबन्धकतायामक्षतत्वात्. अथवा यत्किञ्चिद्विषयता

विशिष्ट यद्रूपावच्छिन्नविषयता तादृशानुमितिप्रतिबन्धकतानतिरिक्तवृत्तिस्वरूपवत्त्वं दोषत्वं· यस्मिंश्चिद्विषयतावैशिष्ट्यं च· स्वतादात्म्य
स्वनिरूपकतावच्छेदकतापर्याप्त्यवच्छेदकीभूतधर्मावच्छिन्नपर्याप्तिकावच्छेदकताकनिरूपकताकमुख्यविशेष्यतासमानाधिकरण
भेदप्रतियोगितावच्छेदकविषयिताशून्यज्ञानीयत्वोभयसम्बन्धेन· तथा च· यस्मिंश्चित्पदेन ह्रदो वह्न्यभाववानित्यादिज्ञानीय
वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयतामादाय बाधादौ लक्षणसमन्वयः। जातिमान्वह्निमानित्यत्रापि जातित्वेन यस्मिंश्चिज्ज्ञा
सवगाहि जातिमान्वह्न्यभाववानिति ज्ञानीयविषयितामादाय वह्न्यभाववज्जातिमदादौ लक्षणसमन्वयः। ह्रदो वह्न्यभाव
वानित्यादिज्ञानीयवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितायाः स्वनिरूपकतावच्छेदक धर्मपर्याप्त्यवच्छेदकताकनिरूपकताक
विषयित्वसमानाधिकरणभेदप्रतियोगितावच्छेदकविषयिताशून्यज्ञानीयत्वसम्बन्धेन वह्न्यभावाद्येकदेशविषयितायामेव
सत्त्वात् तादृशविषयिताविशिष्ट वह्न्यभावाद्येकदेशविषयिताव्यापकत्वस्य च प्रतिबन्धकतायामक्षतत्वात् यस्मिंश्चिद्विषयिता
पदेन ह्रदो वह्न्यभाववानिति ज्ञानीयवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितामादायैकदेशेऽतिव्याप्तिरतः स्वतादात्म्यनिवेशः· केव
लस्वतादात्म्यनिवेशेऽपि ह्रदो वह्न्यभाववानिति ज्ञानीयैकदेशविषयितामादाय तत्रैवातिव्याप्तिरत उभयसम्बन्धनिवेशः·
तथा च ह्रदो वह्न्यभाववानित्यादिज्ञानीयैकदेशविषयितायां स्वतादात्म्यस्य सत्त्वेऽपि स्वनिरूपकतावच्छेदकीभूतं यद्वह्न्य

दत्वविषयितानाश्रयत्वसम्बन्धेन, यत्किञ्चिद्विषयितायां यद्रूपावच्छिन्ननिरूपितत्वं च यद्रूपपर्याप्तावच्छेदकताव
निरूपकताकत्वं. तेन वन्ह्यभाववान्ह्रद इत्यादिज्ञानीयवन्ह्यभाववद्ध्रदत्वावच्छिन्नविषयताया अपि ह्रदत्वाव
निरूपितत्वस- च्छिन्नत्वेन यत्किञ्चित्पदेन तादृशविषयत्वमादाय शुद्धह्रदे नातिव्याप्तिः. जातिमान्वन्ह्यभाववानिति ज्ञा
नीयविषयकत्वं च वन्ह्यभाववद्ध्रदत्वावच्छिन्ननिरूपितयत्किञ्चिद्विषयतानिरूपकतावच्छेदकधर्माव
च्छिन्ननिरूपकतावच्छेदकतावकविषयताशालि वन्ह्यभाववान्ह्रद इति ज्ञानवृत्ति भेदप्रतियोगितावच्छेद
क~~त्वे~~ मेवेति न तद्रूपत्वं जातिमान्वन्ह्यभाववानिति ज्ञाने. किन्तु. वन्ह्यभाववान्ह्रद इति निश्चय एवे
ति. तादृशनिश्चयत्वव्यापकत्वस्य प्रकृतानुमितिप्रतिबन्धकतायामक्षतमेवेति यत्किञ्चित्पदेन ह्रदे
वन्ह्यभाववानित्यादिज्ञानीयविषयतामादाय बाधादौ लक्षणसमन्वयः. एवं जातिमान्वन्ह्य
भाववानित्यादावपि वन्ह्यभाववज्जातिमदादौ नाव्याप्तिः जातित्वेन यत्किञ्चिज्जात्यवगाहि वन्ह्य
भाववज्जातिमदित्यादिज्ञानीयविषयताया एव यत्किञ्चिद्विषयतापदेनोपादीयमानतया तादृश
विषयताविशिष्टनिश्चयत्वव्यापकत्वस्य प्रतिबन्धकतामक्षतत्वात्. अथवा यत्किञ्चिद्विषयता

विशिष्टं यद्रूपावच्छिन्नविषयता तादृशानुमितिप्रतिबन्धकतानतिरिक्तवृत्तिस्वरूपवत्त्वं दोषत्वं । यत्किञ्चिद्विषयतावैशिष्ट्यं च । स्वतादात्म्य
स्वनिरूपकतावच्छेदकतापर्य्याप्त्यवच्छेदकीभूतधर्मावच्छिन्नपर्य्याप्त्यवच्छेदकताकनिरूपकताकमुख्यविशेष्यतासमानाधिकरण
भेदप्रतियोगितावच्छेदकविषयिताशून्यज्ञानीयत्वोभयसम्बन्धेन । तथा च । यत्किञ्चित्पदेन ह्रदो वह्न्यभाववानित्यादिज्ञानीय
वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयतामादाय बाधादौ लक्षणसमन्वयः । जातिमान्वह्निमानित्यत्रापि जातित्वेन यत्किञ्चिज्ज्ञा
नावगाहि जातिमान्वह्न्यभाववानितिज्ञानीयविषयितामादाय वह्न्यभाववज्जातिमदादौ लक्षणसमन्वयः । ह्रदो वह्न्यभाव
वानित्यादिज्ञानीयवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितायाः स्वनिरूपकतावच्छेदकधर्मपर्य्याप्त्यवच्छेदकताकनिरूपकताक
विषयित्वसमानाधिकरणभेदप्रतियोगितावच्छेदकविषयिताशून्यज्ञानीयत्वसम्बन्धेन वह्न्यभावाद्येकदेशविषयितायामेव
सत्त्वात् तादृशविषयिताविशिष्टवह्न्यभावाद्येकदेशविषयिताव्यापकत्वस्य च प्रतिबन्धकतायामक्षतत्वात् । यत्किञ्चिद्विषयिता
पदेन ह्रदो वह्न्यभाववानितिज्ञानीयवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितामादायैकदेशेऽतिव्याप्तिरतः स्वतादात्म्यनिवेशः । केव
लस्वतादात्म्यनिवेशेऽपि ह्रदो वह्न्यभाववानितिज्ञानीयैकदेशविषयितामादाय तत्रैवातिव्याप्तिरत उभयसम्बन्धनिवेशः ।
तथा च ह्रदो वह्न्यभाववानित्यादिज्ञानीयैकदेशविषयितायां स्वतादात्म्यस्य सत्त्वेऽपि स्वनिरूपकतावच्छेदकीभूतं यद्वह्न्य

८ भावत्वादिकं तत्पर्याप्तावच्छेदकतावन्निरूपकताकं यत्केवलवन्ह्यभाव इति ज्ञानविषयित्वं तत्समानाधिकरणभेदप्रतियोगितावच्छे
दकविषयताशून्यज्ञानीयत्वाभावान्नातिव्याप्तिः । न च दोषविषयकवन्ह्यभाव इत्यादिज्ञानीययत्किञ्चिद्विषयतायास्तादृशो
भयसम्बन्धेनाविषयताविशिष्टत्वादतिव्याप्तिस्तदवस्थैवेति वाच्यं प्रकृतानुमितिप्रतिबन्धकतायां तादृशविशिष्टविषयताव्या
पकत्वाभावादिति । हृदो वन्ह्यभाववानित्यादिज्ञानीयमुख्यविशेष्यतायामपि वन्ह्यभाववद्धृदवान्देश इत्यादिज्ञानीयानिरूप
कतावच्छेदकवन्ह्यभाववद्धृदत्वावच्छिन्ननिरूपकता [illegible] प्रकारितात्मकविषयित्वसमानाधिकरणभेदप्रतियोगिता
वच्छेदकतायास्तादृशभेदप्रतियोगितावच्छेदकविषयिताशून्यज्ञानीयत्वाभावेनानिरुक्तोभयसम्बन्धेन यत्किञ्चिद्विषयता
विशिष्टविषयित्वाप्रसिद्ध्याऽसंभवः अत उक्तसम्बन्धघटितमुख्यविशेष्यतानिवेशः हृदो वन्ह्यभाववानिति ज्ञानीयवन्ह्यभा
ववद्धृदत्वावच्छिन्नविषयितायां हृदत्वावच्छिन्नत्वस्यापि सत्त्वेन यत्किञ्चित्पदेन तादृशविषयितामादाय हृदत्वावच्छिन्ने
देशेऽतिव्याप्तिरतो यद्रूपावच्छिन्नविषयतापदेन यद्रूपपर्याप्तावच्छेदकताकनिरूपकताकविषयिता वाच्या । हृदो वन्ह्य
भाववानित्यादिज्ञानीयविषयितायाः स्वनिरूपकतावच्छेदकधर्मावच्छिन्ननिरूपकताकविषयिताशालिजातिमा
न्वन्ह्यभाववानित्यादिज्ञानवृत्तिभेदप्रतियोगितावच्छेदकत्वेनासम्भवः स्यादतः सम्बन्धघटकमुख्यविशेष्यतायां

हृदत्व

स्वनिरूपकतावच्छेदकधर्मपर्याप्तावच्छेदकताकनिरूपकताकत्वनिवेशः एवञ्च ह्रदयमितिरीत्या वन्ह्यभाववद्ध्रदविषयकज्ञा
नीयविषयितायां वन्ह्यभाववद्ध्रदत्वावच्छिन्नप्रतिबन्धकतावच्छेदकीभूतविषयितात्वन्निरूपकतावच्छेदकत्वं तापर्याप्त्यधि
करणधर्मपर्याप्तावच्छेदकताकनिरूपकताकत्वाभावान्न तमादाय दोषः . न च विषयभेदेन विषयताभेदा द्ध्रदत्वभाव
ह्रदो वन्ह्यभाववानित्यादि यत्किञ्चिद्ध्रदादिविषयकज्ञानीयविषयतायाः स्वनिरूपकतावच्छेदकीभूतधर्मावच्छिन्ननि
रूपकताकह्रदान्तरतादृशविषयताकतादृशज्ञानीयविषयत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वेन तद
न्यज्ञानीयत्वस्य स्वस्मिन्नसत्वादिति वाच्यं. स्वतादात्म्य स्वविशिष्टमुख्यविशेष्यत्वसमानाधिकरणभेदप्रति
योगितावच्छेदकविषयताशून्यज्ञानीयत्वोभयसम्बन्धेन यद्रूपपर्याप्तावच्छेदकताकविषयितायां यत्किञ्चि
द्विषयताविशिष्टत्वनिवेशात्. सम्बन्धघटकविषयितावैशिष्ट्यं च. स्वतादात्म्य स्वनिरूपकतावच्छेदकधर्म
पर्याप्तावच्छेदकताकनिरूपकतानिरूपितत्वोभयसम्बन्धेन ग्राह्यं. तथा च यत्किञ्चिद्रूपविषयज्ञानीयायां वि
षयतायां तन्निरूपकतानिरूपितत्वस्य ह्रदान्तरज्ञानीयविषयितायामसत्वान्नोक्तदोष इत्याहुः. तच्चिन्त्यं. स्वरू
पसम्बन्धरूपावच्छेदकताकत्वे वक्ष्यमाणसामान्यपदव्यावृत्त्यसङ्गतिः निश्चयत्वांशे वैयर्थ्यञ्चेति ध्येयं. वस्तु

८ तस्तु· अथैवं जातिमान्वन्ह्यभाववानित्यादिग्रन्थस्यैवापासतः· विषयितासम्बन्धेन यादृशविशिष्टव्यापकं प्रतिबन्धकत्वं तादृशस्वस्यैव सम्भवत्वात्· यत्र स्वरूपतोऽस्वरूपतो वा यादृशविशेषणघटितयादृशविशिष्टस्य दोषत्वं तत्र तादृशविशिष्टनिरूपितविषयिताया एव तादृशविशिष्टस्य संसर्गतास्वीक्रियते नत्वन्यविधाया इति जातिमद्वन्ह्यभाववद्ध्रदत्वविशिष्टविषयितायाः स्वरूपतो ह्रदत्वघटितस्य विशिष्टस्य संसर्गताविरहेण जातिमान्वन्ह्यभाववानित्यादिज्ञानमादायासंभवाभावात्· एतेनाभाववत्त्वेन ह्रदत्वावगाहिज्ञानवारणाय यथार्थपदस्यार्थस्य सम्भवेन दीधितिकृता यथार्थपदाघटितद्वितीयलक्षणावतारस्यविरोध इति परास्तं· अत एवानुमितिग्रन्थे परामर्शग्रन्थे च विशिष्टव्याप्तिप्रसिद्धिस्थले एवमग्रेऽपि विषयितामादाय विषयितासम्बन्धेन व्याप्तिविशिष्टस्यैव ज्ञाने निवेशः कृत इति· परे तु· अव्यापकीभूतविषयिताशून्यत्वस्यैव यद्रूपावच्छिन्नस्य यस्य यस्य तादृशविशिष्टघटकता तद्रूपावच्छिन्नतत्तद्विषयिताभिन्नकिञ्चिदवच्छिन्नविषयिताशून्यत्वरूपप्रागुक्तविशेषणमप्यस्ति· तथा चाभाववत्त्वेन ह्रदत्वस्य न विशिष्टघटकतेति· अभावत्वाद्यवच्छिन्नह्रदत्वादिविषयितामादाय तादृशविषयिताभिन्नैवेति· तद्रूपत्वं नाभाववान्वन्ह्यभाववानित्यादिज्ञा

तस्येति तादृशज्ञानमादाय न दोषः एवञ्चाभावपक्षकसंयोगेन वन्हिसाध्यकस्थले, भावो वन्हिमान्नवेति संशयमा
दाय वन्ह्यभाववदभावरूपे, व्याप्तिवारणाय निश्चयत्वनिवेशः गोत्वाभावोऽगोत्वाभाववानित्यत्र गोत्वाभावोऽगो
त्ववानिति भ्रममादाय गोत्वाभावेऽतिव्याप्तिवारणाय वक्ष्यमाणसामान्यपदसार्थक्यमिति वदन्ति ॥१०॥ अथ
यद्रूपावच्छिन्नविषयितात्वं स्वावच्छिन्नविषयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकमेयत्र स्वाव
च्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपा
वच्छिन्नविषयितात्वं तद्रूपावच्छिन्नविषयिताशून्यत्वमित्युक्तावेव सामञ्जस्ये विशिष्टान्तरघटितत्वाविशिष्ट
रूपाघटितत्वनिवेशो व्यर्थ इति। तथाहि मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नविषयिताया अपि मेयत्वाविशि
ष्टव्यभिचारत्वावच्छिन्नविषयितावच्छिन्नप्रतिबन्धकतावच्छेदकीभूतगुरुव्यभिचारत्वावच्छिन्नविषयित्वा
आपकत्वेन तदन्यत्वस्य मेयत्वाविशिष्टव्यभिचार इति ज्ञाने सत्वेन एवं वन्ह्यभाववज्जलादिमद्ध्रद इति ज्ञानत्व
ह्रदत्वावच्छिन्नविषयिताया अपि तादृशजलवद्ध्रदत्वावच्छिन्नविषयितावच्छिन्नप्रतिबन्धकतावच्छेदकीभूत
वन्ह्यभाववज्जलवत्कालीनजलवद्ध्रदत्वावच्छिन्नविषयित्वाव्यापकत्वेन तदन्यत्वस्य च तादृशजलवद्ध्रदविषयक

ज्ञानेऽसत्वादिति· नच व्यभिचारघटितबाधे व्याप्तिः· तादृशबाधविषयित्वस्य तादृशबाधविषयितावच्छिन्नप्रतिबन्धकतावच्छेदकव्यभिचारविषयिताव्यापकत्वेन तच्छून्यत्वस्य बाधविषयकज्ञानेऽसत्वात्· स्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयित्वसमानाधिकरणेस्त्वेव बाधविशेषे व्यभिचारादावतिव्याप्तिः· तादृशव्यभिचारविषयितावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकत्वस्य केवलबाधविषयितायां केवलव्यभिचारविषयितायाश्चासत्वादिति वाच्यं. स्वावच्छिन्नविषयितावच्छिन्नयत्किञ्चित्प्रतिबन्धकतावच्छेदकविषयित्वसमानाधिकरणाभावे स्वस्य विवक्षितत्वाद्यत्किञ्चित्प्रतिबन्धकतापदेन बाधप्रतिबन्धकतामादायैव व्यभिचारघटितबाधादौ लक्षणगमनादिति. अत्र केचित्. उक्तरीत्या अव्यापकीभूतविषयताशून्यत्वविशेषसत्प्रतिपक्षविषयितायाः प्रतिहेतुव्यापकसाध्याभावकालीनहेतुमत्पक्षविषयिताव्यापकत्वात्· न च स्वावच्छिन्नविषयिताव्यापकीभूतविषयिताशून्यज्ञानीयस्वावच्छिन्नविषयितावच्छिन्नयत्किञ्चित्प्रतिबन्धकतावच्छेदकीभूतस्वावच्छिन्नविषयिताव्यापकीभूतविषयताशून्यज्ञानीयविषयित्वाव्यापकीभूतविषयिताशून्यत्वमेवावश्यं वाच्यं. तथा च नोक्तसत्प्रतिपक्षाव्याप्तिः· कालीनत्व

घटितत्वविशिष्टविषयितायाः स्वावच्छिन्नविषयितात्वव्यापकीभूतविषयिताशून्यज्ञानीयत्वाभावात्. परन्तु वन्ह्यभाव
वज्जलवद्वृत्तिजलवद्ह्रदादावतिव्याप्तिवारणाय विशिष्टह्रदत्वघटितत्वनिवेशोस्तु विशिष्टह्रदत्वघटितत्वनिवेशस्तु व्य
र्थएवेति वाच्यं. यतः स्वावच्छिन्नविषयिताव्यापकविषयिताशून्यज्ञानीयस्वावच्छिन्नविषयितावच्छिन्नप्रति
बन्धकतावच्छेदकस्वावच्छिन्नविषयिताव्यापकविषयिताशून्यज्ञानीयत्वे सति स्वाव्यापकीभूतविषयिताशू
न्यत्वनिवेशायोगः किन्तु स्वावच्छिन्नविषयिताव्यापकीभूतविषयिताशून्यज्ञानीयस्वावच्छिन्नविषयिताव
च्छिन्नप्रतिबन्धकतावच्छेदकं यद्रूपावच्छिन्नविसयिताव्यापकीभूतविषयिताशून्यज्ञानीययद्रूपावच्छिन्नवि
षयित्वं तद्रूपावच्छिन्नविसयिताव्यापकीभूतविसयिताशून्यत्वमेव निवेश्यं. अन्यथा ह्रदो वन्हिमानित्यग
जातिमद्वन्ह्यभाववद्ह्रदेऽतिव्याप्त्यापत्तेः वन्ह्यभाववद्ह्रदत्वावच्छिन्नविसयितायाः अपि जातिमद्वन्ह्यभावव
द्ह्रदत्वावच्छिन्नविसयिताव्यापकीभूतविसयिताशून्यजातिमान्वन्ह्यभाववानिति ज्ञानेपि सत्त्वेन जातिमद्ह्र
दत्वावच्छिन्नविसयितावच्छिन्नप्रतिबन्धकतावच्छेदकत्वाभावात् तादृशप्रतिबन्धकतावच्छेदकजाति
मद्वन्ह्यभाववद्ह्रदत्वावच्छिन्नविसयिताव्यापकविसयिताशून्यत्वस्य च तादृशविसयकज्ञाने सत्त्वात्. एवं च

११

प्रसन्नसत्प्रतिपक्षाव्याप्तिर्दुर्वारैवेत्याहुः ॥३॥ ऽयद्रूपावच्छिन्नविषयितासामान्यमनुमितिप्रतिबन्धकतानिरूपितस्व
रूपसम्बन्धरूपावच्छेदकतावदित्यत्र सामान्यपदंव्यर्थं. ह्रदोवह्न्यभाववानितिज्ञानीयह्रदत्वावच्छिन्नैकदेशीय
विषयितायाःस्वरूपसम्बन्धरूपावच्छेदकत्वेपि तज्ज्ञानस्य ह्रदत्वादिविशिष्टविषयकत्वसमानाधिकरणाभाव
प्रतियोगितावच्छेदकं यद्वह्न्यभावत्वावच्छिन्नविषयितात्वं तद्रूपावच्छिन्नविषयिताशून्यत्वाभावादेववारण
सम्भवात्. अह्रदह्रद इत्यादिज्ञानीयविषयितायाश्च स्वरूपसम्बन्धरूपावच्छेदकत्वविरहादिति.।. नचाद्यकल्पे
तादृशविषयिताव्यापकीभूतविषयिताशून्यत्वनिवेशनीयं. वह्न्यभाववज्जातिमत्त्वावच्छिन्नविषयितायाअपि
जातिमान्वह्न्यभाववानित्यादिज्ञानकालीनस्य जातिमान्ह्रद इत्यादिज्ञानस्य ज्ञानवैशिष्ट्यावच्छिन्नाया ह्रदध
र्मिकवह्न्यनुमितिप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वादिति वाच्यं. ह्रदत्वसामानाधिक
रण्येन वह्न्यभावादौ व्याप्तिवारणाय तादृशव्यापकीभूतविषयिताशून्यत्वनिवेशस्यावश्यकत्वात्. तत्रजा
तिसामानाधिकरण्येन वह्न्यभावविषयितायाःस्वरूपसम्बन्धरूपावच्छेदकत्वाभावात्. नच संयोगः सं
योगाभाववानित्यादौ संयोगः संयोगवानित्याकारकभ्रमात्मकबाधज्ञानविषये संयोगेऽतिव्याप्तिः. तत्रसंयो

ज्ञानेसत्वादितिवाच्यम्·संयोगावच्छिन्नविषयितात्वस्यसंयोगत्वविशिष्टविषयितायास्तादृशविशिष्टविषयित्वा
व्यापकत्वेनतदवच्छिन्नत्वस्यसंयोगःसंयोगवानिति-उ·२·
नत्वावच्छिन्नविषयितात्वस्यसंयोगत्वविशिष्टविषयितासमानाधिकरणभेदप्रतियोगितावच्छेदकत्वाभावात्तादृशव्यापकीभूतविषयिताशू
न्यत्वस्यह्रदभ्रमात्मकबाधज्ञानेसत्वादितिचेन्न·गोत्वाभावोगोत्ववानित्यादौगोत्वाभावोगोत्ववानित्याकारकभ्रमात्मकबाधज्ञान
विषयेगोत्वाभावादावतिव्याप्तिवारणायसामान्यपदसार्थक्यात्·तत्रगोत्वाभावत्वविशिष्टविषयित्वसमानाधिकरणाभावप्र
तियोगितावच्छेदकत्वस्यगोत्वाद्यवच्छिन्नविषयित्वत्वादावसत्वात्·नचयत्संसर्गावच्छिन्नयद्रूपावच्छिन्नविषयितात्वं
तादृशविशिष्टविषयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकंतत्संसर्गावच्छिन्नतद्रूपावच्छिन्नविषयित्वशून्यत्व
विशेषणेनैवोक्तातिव्याप्तिवारणसम्भवः·गोत्वाभावत्वविशिष्टविषयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकंयत्समवायसम्बन्धावच्छिन्न
गोत्वत्वावच्छिन्नविषयितात्वंतदवच्छिन्नाभावस्यगोत्वाभावोगोत्ववानितिज्ञानेऽसत्वादितिवाच्यम्·तथासत्यपिगोत्ववत्समान
कालीनगोत्वाभाववत्पक्षकस्थलेतादृशगोत्वाभावेऽतिव्याप्तिर्दुर्वारत्वात्·अत्रसमवायावच्छिन्नगोत्वत्वावच्छिन्नविषयित्वस्यापिता
दृशविशिष्टविषयित्वाव्यापकत्वाभावात्जातिमज्जातित्वावच्छिन्नविषयितायाःसंसर्गानवच्छिन्नातथासंसर्गनिवेशेह्रदोज्ञात्वभा
ववानित्यत्रजातिमाञ्जातिमानितिज्ञानवारणासम्भवाच्च·नचयद्रूपावच्छिन्नसांसर्गिकविषयितानिरूपितयद्रूपावच्छिन्न
विषयित्वंविशिष्टविषयित्वाव्यापकंतद्रूपावच्छिन्नसांसर्गिकविषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वनिवेशेनोक्त
दोषःसमवायावच्छिन्नसांसर्गिकविषयितानिरूपितगोत्ववत्समानकालीनगोत्वाभावत्वावच्छिन्नविषयितायाविशिष्टवि

१२ सयित्वाव्यापकतयातद्रूपत्वस्य गोत्ववत्समानकालीनगोत्वाभावो गोत्ववानिति बाधभ्रमेऽसत्त्वादिति वाच्यम्· तावतापि गगनत्वव
त्कालीनगगनत्वाभावो गगनत्वाभाववानित्यत्र गगनवत्कालीनगगनत्वाभावो गगनत्ववानिति बाधभ्रमसमादाय गगनत्ववत्का
लीनगगनत्वाभावेऽतिव्याप्तिः तत्र स्वरूपत्वावच्छिन्नसांसर्गिकविषयतानिरूपितगगनत्ववत्कालीनगगनत्वाभावत्वावच्छिन्न
विसयितायाविशिष्टविसयित्वाव्यापकत्वाभावात्· नच यद्रूपावच्छिन्नविसयितात्वावच्छिन्ननिरूपितयद्रूपावच्छिन्नाविसयिता
त्वं तादृशविशिष्टविसयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविसयित्वत्वावच्छिन्ननिरूपिततद्रूपाव
च्छिन्नविसयिताशून्यत्वं निवेशनीयम्· तथा चोक्तस्थले बाधविसयकभ्रमे गगनत्ववत्कालीनगगनत्वाभावत्वावच्छिन्नविस
यितात्वावच्छिन्ननिरूपितगगनत्वावच्छिन्नविसयितारूपतादृशविशिष्टविसयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकी
भूतधर्मावच्छिन्नाभावसत्त्वेनोक्तस्थले नातिव्याप्तिरिति वाच्यम्· एवमपि यत्र संयोगवत्संयोगवत्संयोगाभावस्य साध्यता
संयोगवत्संयोगस्य पक्षता तत्र संयोगवत्संयोगः संयोगवत्संयोगवत्संयोगवानित्यादिबाधभ्रमविसयीभूते संयोगवत्संयो
गवत्संयोगरूपबाधैकदेशेऽतिव्याप्तिः तत्र साध्यघटकीभूतप्रथमसंयोगस्य वैशिष्ट्यं संयोगसम्बन्धेन द्वितीयस्य वैशिष्ट्यं
कालिकेन पक्षघटकसंयोगस्य वैशिष्ट्यमपि कालिकेन साध्यघटकप्रतियोगित्वं च कालिकसम्बन्धेन ग्राह्यं· नच यद्रूपाव

च्छिन्नसांसर्गिकविषयतानिरूपितयद्रूपावच्छिन्नविषयतात्वावच्छिन्ननिरूपितयद्रूपावच्छिन्नविषयित्वं विशिष्टविषयित्वाव्यापकं तद्रूपावच्छिन्नसांसर्गिकविषयतानिरूपिततद्रूपावच्छिन्नविषयितात्वावच्छिन्ननिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वविशेषणेनोक्तातिव्याप्तिः उक्तस्थलीयबाधभ्रमे तादृशाव्यापकीभूतसंयोगत्वावच्छिन्नसांसर्गिकविषयतानिरूपितसंयोगत्वावच्छिन्नविषयितात्वावच्छिन्ननिरूपितसंयोगत्वावच्छिन्नविषयताशून्यत्वविरहादितिवाच्यम्: गगनाभाववत्संयोगवत्संयोगपक्षकोक्तसाध्यकस्थले बाधभ्रममादाय संयोगवत्संयोगवत्संयोगवद्गगनाभाववत्संयोगवत्संयोगेऽतिव्याप्तिः अत्र साध्यताघटकप्रथमसंयोगवैशिष्ट्यं स्वरूपसम्बन्धेन द्वितीयादिवैशिष्ट्यन्तु पूर्ववत्: तथाच स्वरूपत्वावच्छिन्नसांसर्गिकविषयतानिरूपितसंयोगत्वावच्छिन्नविषयितात्वावच्छिन्ननिरूपितसंयोगत्वावच्छिन्नविषयित्वमपि नविशिष्टविषयत्वाव्यापकमिति तत्तदप्रामाण्यज्ञानाभावस्य तत्तदाहार्य्यभिन्नत्वस्य च तद्धर्मिकत्वेन निवेशे गौरवमतोऽनुगतरूपेण निवेशः कार्यः अनुगमस्तु स्वाभाववत्त्व स्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयितावत्त्वोभयसम्बन्धेनाभावविशिष्टान्यत्वं एवञ्च स्वतन्त्रनिश्चयत्वस्यापि लक्षणेऽनिवेशान्न संशयान्यत्वदलवैयर्थ्यम्: एतेन वह्न्यभाववद्वृत्तिवह्निजलवद्ध्रदविषयकनिश्चयधर्मिकाप्रामाण्यज्ञानाभावादेर्लक्षणेऽनिवेशेनैव तत्रातिव्याप्तिवारणसम्भवेऽ

१३ पि विशिष्टद्वयाघटितत्वप्रवेशो व्यर्थ इति परास्तम्ः सम्बन्धव्याप्तिनिरुक्त्यनुसृत्या. यादृशविशिष्टविषयकनिश्चयविशिष्टयादृश
विशिष्टविषयकनिश्चयत्वं अनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटितत्वमिति. अत्र एतादृशविशि
ष्टद्वयविषयिताशून्यत्वप्रवेशे ह्रदो वह्निमान्धूमादित्यादौ एकत्र द्वयमिति रीत्या ह्रदवृत्तित्व वह्निव्यापकीभूताभावप्रतियोगि
त्वोभयवदवृत्तित्वेऽ[illegible]ति व्याप्तिः तत्र तादृशोभयावच्छिन्नजलत्वावच्छिन्नविषयितायाः ऐक्येन तादृशविशिष्टविषयिताद्वय
शून्यप्रतीतिविषयतावच्छेदकीभूत-ह्रदवृत्तिवह्निव्यापकीभूताभावप्रतियोगित्वे जलवत्त्वात्. एवं तादृशविशिष्टविष
यिताशून्यत्वे सति तादृशविशिष्टविषयिताशून्यत्व निवेशे ह्रदो वह्निमाञ्जलादित्यादावपि वह्निव्यापकीभूताभावप्रति
योगिजलत्वरूपाऽसाधारण्येऽव्याप्तिः असाधारण्यस्यापि निरुक्तविशिष्टद्वयान्तर्गतत्वात्. अतो विशिष्टद्वयविषयिताशून्य
त्वमपहाय तादृशविशिष्टविषयिताविशिष्टतादृशविशिष्टविषयिताशून्यत्वमेव निवेशनीयम्. ॥ अथ वह्न्यभावव
द्ध्रदादावसम्भवः ह्रदत्वादिविशिष्टविषयकनिश्चयविशिष्ट वह्न्यभाववद्ध्रदत्वादिविशिष्टविषयकनिश्चयत्वस्याऽनुमि
तिप्रतिबन्धकतानतिरिक्तवृत्तितया तादृशविशिष्टद्वयघटितत्वादिति. न च परस्परं यादृशविशिष्टविषयकनिश्चय
विशिष्टयादृशविशिष्ट[illegible]विषयकनिश्चयत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्तितादृशविशिष्टद्वयाघटित

प्रकारतातिरिक्तविशेष्यताशून्यत्वे सति । विशेष्यताविशेष्यान्यानिरवच्छिन्नप्रकारताशून्यत्वं सर्वांशे भ्रमभिन्नत्वम् । प्रकारतावैशिष्ट्यं विशेष्यतायाम् स्वनिरूपितत्व, स्वावच्छेदकावच्छिन्नाभाववद्वृत्तित्व, एतदुभयसम्बन्धेन । विशेष्यतावैशिष्ट्यं च निरवच्छिन्नप्रकारतायां स्वनिरूपितत्व, स्वाधिकरणनिरूपितवृत्तितावत्त्व, एतदुभयसम्बन्धेन । वृत्तितावत्त्वं च स्वावच्छेदकसम्बन्धावच्छिन्नत्व, स्वानवच्छेदकानवच्छिन्नत्व, स्ववृत्तित्व, एतत्त्रितयसम्बन्धेन । स्वं वृत्ति च स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेनेति ॥

४११५

श्री ५ को सरकार

बौद्धधिक्कार १

श्रीगणेशाय नमः ॥ स्याम्यं यस्य निजं जगत्सु जनितं पादो ततः पालनं सुत्पतेः करणं हिताहितविधिव्यासेधसंभा-
वनं भूतोक्तिः सद्रुजा कृपा निरुपधिर्यत्नस्तदर्थात्मकं तस्मै पूर्वगुरूत्तमाय जगतामीशाय पित्रे नमः ॥ इह ख
लु निसर्गप्रतिकूलस्वभावं सर्वजनसंवेदनसिद्धं दुःखं जिहासवः सर्व एव तद्धानोपायमविद्वांसोऽनुसरन्तश्च स
र्वाध्यात्मविदेकवाक्यतया तत्त्वज्ञानमेव तदुपायमाकर्णयन्ति । न ततोऽन्यं प्रतियोग्यनुयोगितया चात्मैव
तत्त्वतो ज्ञेयः ॥ तथा हि यदि नैरात्म्यं यदि वा क्षणि॰वस्तुभूत आत्मा उभयथापि नैसर्गिकमात्मतत्त्वज्ञानमे
वेष्यत्राप्यविवादस्य वावादिनामत आत्मतत्त्वं विविच्यते । तत्र बाधकं भवदात्मनि क्षणभंगो वा बाह्या
र्थभंगो गुणगुणिभंगो वा । अनुपलंभो वा॰ तत्र न प्रथमः प्रमाणाभावात् । यत्सत्तत्क्षणिकं संश्चावि
वादास्पदीभूतः घटादिरिति चेन्न । प्रतिबंधाप्रसिद्धेः सामर्थ्यासमर्थ्यलक्षणविरुद्धसंसर्गेण भेदसि
द्धौ तत्सिद्धिरिति चेन्न । विरुद्धधर्मसंसर्गासिद्धेः असंगविपर्ययाभ्यां तत्सिद्धिरिति चेन्न॰ सामर्थ्यं हि
करणं योग्यता वा॰ नाद्यः ॥ साध्याविशिष्टत्वप्रसंगात् । व्याप्तिभेदादयमदोष इति चेन्न । तदनुपपत्तेः

रामः
१

वि२

व्यावर्त्यभेदेनविरोधोहितन्मूलंसचतावन्मिथोव्यावर्त्यप्रतिक्षेपात् । गोत्वाश्वत्ववत् । नथासतिवि[illegible]रोधादन्यतरा
पायेवाधासिद्ध्योरन्यतरप्रसंगात् । नापितदाक्षेपप्रतिक्षेपाभ्यांवृक्षत्वशिंशपात्ववत्परापरभावानभ्युपगमा
त्· अभ्युपगमेवासमर्थस्याप्यकरणमसमर्थस्यैकरणंप्रसज्येत । नाप्युपाधिभेदात्कार्यत्वानित्यत्ववत्तेनत
दभावात्· नचराहुमात्रमुपाधिः । पर्यायशब्दोच्छेदप्रसंगात् । नापिविकल्पभेदः । स्वरूपकृतस्यतस्यव्या
वृत्तिभेदकत्वेऽसमर्थव्यावृत्तेरपिभेदप्रसंगात् । विषयकृतस्यभेदकत्वेपरस्पराश्रयप्रसंगात्· नचनिर्मि
मित्तएवायंव्यावृत्तभेदव्यवहारोऽतिप्रसंगात् ॥ नापिद्वितीयः । साहिसहकारिसाकल्पंवाप्रातिस्विकी
वा· नतावदाद्यःपक्षः । सिद्धसाधनात् । परानभ्युपगमेनहेत्वसिद्धेश्चयत्सहकारिसमवधानंतद्धिकरोत्येवे
तिकोनामनाभ्युपगच्छति । यमुद्दिश्यसाध्यते· नचाकरणकालेसहकारिसमवधानवत्ताऽस्माभिरभ्युपेय
ते । यतःप्रसंगःप्रवर्तते । प्रातिस्विकीतुयोग्यता । अन्वयव्यतिरेकविषयीभूतंबीजत्वंवास्यात्· तदवान्तर
जातिभेदोवा· सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वंवा· नतावदाद्यः । अकुर्वतोबीजजातीयस्यतत्पक्ष

सिद्धत्वात्· न चापि तथा विकल्पितमिति पक्षः। नापि द्वितीयः। तस्य कुर्वत्त्वेपि मयानभ्युपगमेन दृष्टान्तस्य साधनविकलत्वात्·
को हि सुस्थात्मा प्रमाणाभावेप्यभ्युपगच्छेत्। नहि प्रत्यक्षेणानुभूयते तथानध्यवसायात्। नाप्यनुमानेन लिंगाभा
वात्· यदि न कश्चिद्विशेषः कथं करणाकरणे इति चेत्। क एवमाह नेति परं किं। जातिभेदरूपः सहकारि
लाभालाभरूपो [illegible]जातिभेदरूपो वेति नियामकं प्रमाणमनुसरन्तो न पश्यामः। तथापि योयं सहकारि
मध्यमध्यासीनोऽक्षेपकरणस्वभावो भावः [illegible]यदि प्रागप्यासीत्तदा प्रसह्य कार्यं कुर्वाणो गीर्वाणशापेनापि
नापहस्तयितुं शक्य इति चेत्· युक्तमेतत् यद्यक्षेपकरणस्वभावत्वं भावस्य प्रमाणगोचरः स्यात्तदेव कुतः सि
द्धमिति नाधिगच्छामः। प्रसंगविपर्ययाभ्यामिति चेन्न परस्पराश्रयप्रसंगात्। एवं स्वभावासिद्धौ हि तयोः प्रवृत्तिः
तत्प्रवृत्तौ च एवं स्वभावसिद्धिरिति। स्यादेतत्· कार्यजन्मैव तस्मिन्नर्थे प्रमाणं। विलंब[illegible]कारिस्वभावानुवृत्तौ सर्व
दा कार्यानुत्पत्तिरिति चेन्न· विलंबकारिस्वभावस्य सर्वदैवानुकरणे तत्स्वभावाघातात्। तस्माद्विलंबकारित्वस्य यावत्स
हकार्यसं[illegible]निधानं तावन्न करोतीत्यर्थः। एवं कार्यजन्म सामर्थ्यं प्रमाणयितुं शक्यते न तु जातिभेदे। ननु किं यथा

ग्रभवंविलंव[illegible]कारिस्वभावाः परंस्परंप्रत्यासत्त्याः कार्यंकुर्वंतः किंवा यथात्वन्परिकल्पनं क्षिप्रकारिस्वभावा इत्यत्र
कार्यजननमजागरूकमेवेति· नापितृतीयोविरोधात्· सहकार्यभावप्रयुक्तकार्याभाववांश्च सहकारिविरहेका
र्यवांश्चेति व्याहतं· तस्माद्यद्यद्भावएव यन्नकरोतितत्त[illegible]देतत्करोत्येवेतिस्यात्· एतच्चस्थैर्यसिद्धेरेवप
रंवीजसर्वस्वमिति· एतेनसमर्थव्यवहारगोचरत्वंहेतुरितिनिरस्तं· तादृशव्यवहारगोचरस्यापिवीजस्यांकुराक
रणादर्शनात्· नासो[illegible]मुख्यस्तत्रव्यवहारस्तस्यतज्जननानिमित्तत्वात्· अन्यथानियमप्रसंगात् इतिचेत्·। ख
कीदृशं पुनर्जननं· मुख्यसमर्थव्यवहारानिमित्तं नतावदक्षेपकरणं। तस्यासिद्धेः नियमस्यसहकारिसाकल्ये
सत्येवकरणाकरणमेवेत्येवंस्वभावत्वेप्युपपत्तेः। ततश्च जनननिर्वंधनहवार्यंव्यवहारोनव्याप्तिसिद्धिरिति
स्यादेतदेतावतापिभावस्यकः स्वभावः समर्थितो नह्यक्षेपाक्षेपाभ्यामन्यः प्रकार इतिचेन्न प्रथमावसरेक्षे
पाभावेनैवसंदिग्धासिद्धिनिर्वाहे कथापूर्वरूपपर्यवसानात्· उत्तरपक्षावसरेतु सोपिनदुर्वचः। तथाहि

करणंप्रत्यविलंबइतिकोर्थः।किमुत्पत्तेरनंतरमेवकरणंसहकारिसमवधानानंतरमेववाविलंबइत्यपिकोर्थः किं
यावन्नसहकारिसमवधानंतावदकरणंसर्वथैवाकरणंइतिवा।तत्रप्रथमचतुर्थयोः प्रमाणाभावादनिश्चयेपि
द्वितीयतृतीययोःप्रत्यक्षमेवप्रमाणंबीजजातीयस्यहिसहकारिसमवधानानंतरंएवकरणंकरणमेवेतिप्र
त्यक्षसिद्धमेवतथासहकारिसमवधानरहितस्याकरणमित्यपि।अत्रचभवानपिनविप्रतिपद्यतएवप्रमाण
सिद्धत्वात्तद्विपर्ययेबाधका[illegible]·तथाहियदिसहकारिविरहे[illegible]ऽकुर्वाणस्तत्समवधानेपिनकुर्यात्तज्जाती
यमकारणमेवस्यात्।समवधानासमधानयोरुभयोरप्यकरणात्·एवंयदितत्समधानविरहेपिकुर्यात्स
हकारिणोनकारणंस्युः।तानंतरैपिकरणात्तथाचानन्यथासिद्धान्वयव्यतिरेकवतामप्यकारणत्वेकार्यस्याक
स्मिकत्वप्रसंगः।तथाचकादाचित्कत्वव्याहतिरिति।एवंचद्वितीयपक्षविवक्षायामक्षेपकारित्वमेवभावस्यस्व
भावः।तृतीयपक्षविवक्षायांतुक्षेपकारित्वमेवभावस्यस्वरूपमितिनोभयप्रकारनिवृत्तिरिति।तथापिकिमसमर्थस्ये
वसहकारिविरहः।स्वरूपलाभानंतरंकर्तुरेवसहकारिसमवधानंअन्यथावेति।किंनियामकमितिचेत्।अत्रेदमु

यते।कुसूलस्थस्यांकुरानुकूलःशिलासकलाद्विशेषःकश्चिदस्तिनवा-नचेन्ननियमेनैकत्रप्रवृत्तिरपरस्मान्निवृत्तिस्तदर्थिनः
स्यात्।परंपर्यांकुरप्रसवसमर्थवीजक्षणजननादस्त्येवेतिचेत्।कदापुनःपरंपरयापितथाभूतंकरिष्यतीतितत्रसंदेहइतिचे
त्-सपुनःकिमाकारःकिंसहकारिवासमवहितेष्वपिकरिष्यतिनवेति-उतासमवहितेष्वपितेषुकरिष्यतिनवेति।अथयदा
सहकारिसमवधानंतदेवकरिष्यत्येवपरंकदातेषांसमवधानमितिसंदेहः।नतावत्पूर्वःसामान्यतःकारणत्वावधारणेत
स्यानवकाशात्।अवकाशेवाकारणत्वानवधारणात्।नापिद्वितीयः।सहकारिणांतत्त्वावधारणेतस्यानवकाशात्
अवकाशेतेषांतत्त्वानवधारणात्।तृतीयेतुसर्वएवसंतानांतःपातिनोवीजक्षणाःसमानशीलाःप्रादुर्भवंतियत्रतत्रत
सहकारिसंनिधानेसतिकारणनियमात्।सर्वत्रचसहकारिसमधानसंभवात्।समर्थएवक्षणःक्षित्यादिसमवधानमितिचे
त्-तत्किंसमर्थेसहकारिसमवधानमेवनास्तिसमवधानेवाननतस्मात्कार्यजन्मवा-नाद्यः।शिलादावपिक्षितिपवनतेजःस
लिलयोगदर्शनात्-नद्वितीयः।शिलासकलादिपकदाचित्सहकारिसाकल्यवतोपिवीजादंकुरानुत्पत्तिप्रसंगात्-एवम
पिस्यात्कोदोषइतिचेत्-नतावदिदमुपलब्धंआशंक्यतइतिचेत्-नतत्समवधानेस्थैर्यत्वकरणवत्तद्विरहेपिकरणमाशंक्येत-आ

सत्यं

बौद्धाधिकारः

तां क्लृप्तामिति चेत् · न हि वीजादेरहेतुत्वमाशंक्येत तथा च सति सामग्रीप्रत्यक्षानुपलंभबाधः स्यादेतत् · न वीजादीनां परस्परसमव
धानवतामेव कार्यकरणमंगीकृत्याशंक्यते येन समवधानानियमात् · सर्वेषां तज्जातीयानामेककरणतानिश्चयः स्यात् ना
पि यत्र तत्र समर्थो स्यादितिमंगीकृत्य येनाविकलेभ्यो विकलाच्च कार्यजन्मसंभावनायां प्रत्यक्षानुपलंभविरोधः स्यात् · किं ना
म वीजादिषु समवहितेषु यव्यवांतरजातिविशेषमाश्रित्यापि कार्यजन्म संभाव्यत इति · न च समवधानमात्रेणोपपत्तौ
१५ तत्कल्पनायां प्रमाणाभावात् · कल्पनागौरवप्रसंगप्रतिहतत्वात् · अतींद्रियादेर्लोपप्रसंगात् · विकल्पानुपपत्तेश्च वि
शेषस्यादिशेषणानतिप्रयोजकत्वाच्चेति · तथाहि उत्पत्तेरारभ्य मुद्गरप्रहारपर्यंतं घटस्तावज्जात्यंतरानाक्रांत एवानुभूय
मानः क्रमवत्सहकारिवैचित्र्यात् कार्यकोटीः मृद्रूपविरूपाः करोतीति तत्रैतावत्येव सर्वस्मिन्नसमंजसे ऽनुपलभ्यमानजातिकल्पनं केन प्र
माणेन केन वोपयोगेन येन कल्पनागौरवप्रसंगदोषो न स्यात् यो यदर्थी कल्प्यते तस्यान्यथासिद्धिरेव तस्याभाव इति भया
नेवाहेति । दृष्टं च जातिभेदंतिरस्कृत्य स्वभावभेदकल्पनमेव कार्योपपत्तौ सहकारिणोपि दृष्टत्वात् स्वीक्रियंते अतींद्रियेंद्रि
यादिकल्पनावत्तीयेत प्रमाणाभावात् · विकल्पानुपपत्तेश्च · स खलु जातिविशेषः शालित्वसंग्राहको वा स्यात् · तदतिक्षे
पको वा · आद्ये कुसूलस्थस्यापि शालेः कथं न तद्रूपत्वं द्वितीये त्वक्षिप्तस्यापि शालेः कथं न तद्रूपवत्त्वं एवं शालि

ष्टैमपि तस्य प्रतिक्षेपकं संग्राहकं वा आद्ये शालेरतत्वापत्तिः द्वितीये शालेरतत्वप्रसंगः नचनोभयमपीति
वाच्यम् विशेष्याविशेषयोः प्रकारांतराभावा व्यक्तिभेदेन संग्रहप्रतिक्षेपावविरुद्धाविति चेत् विलीनमि
दानीं तदतज्जातीयता विशेषेण परिदृश्यमान कतिपयव्यक्तिभेद प्रतिक्षेपेपि मिथः कश्चित्तुरगविहग
योरपि संभेदसंभवात् यश्चयस्य जातिविशेषः स चेत्तं व्यभिचरेत् व्यभिचरेदपि शिंशपा पादपमे
विशेषात् तथा च गतं स्वभावहेतुना। विपर्यये बाधकं विशेष इति चेन्न तस्येहापि सत्वात्। तदभावस्वभाव
त्वानुपपत्तेः। उपपत्तौ वा किं बाधकानुसरणव्यसनेनेति विशेषस्य विशेषं प्रति प्रयोजकत्वाच्च। तथाहि। का
र्यगतमंकुरत्वं प्रति बीजत्वस्याप्रयोजकत्वे बीजादपिदुत्पत्तिप्रसंगः बीजस्य विशेषः कथमबीजे भविष्यतीति
नाहि [illegible]के शालेर्विशेषः कथमशालौ भविष्यतीत्यशालेरंकुरानुत्पत्तिप्रसंगः अशालिवदबीजेपि भवत्वसो [illegible]वशे
षस्तथापि बीजकार्यसमवेत एवासोऽंकुरं प्रति प्रयोजक इति चेन्न शालित्वव्यभिचारे शालित्वैकार्थसमवा

यद्बीजत्वव्यभिचारे बीजत्वैकार्थसमवायेनापि निर्णेतुमशक्यमविशेषात्। तस्माद्यो यथाभूतो यथाभूतमात्
[illegible]त्मनोऽन्वयव्यतिरेकावनुकारयति तस्य तथाभूतस्यैव तथाभूते सामर्थ्यं तद्विशेषात्मकार्यविशेषं प्रयोजयं
तिशालिवाहितिप्रकृतमुत्पत्स्यामहे। कस्य पुनः प्रमाणस्यायं व्यापारकलाप इति चेत् तदुत्पत्तिनिश्चयहेतोः प्रत्य
क्षानुपलंभकस्येति ब्रूमहे। अथ न्यायेनानेनानन्तेन पारतोऽभ्युपगतमपि। यदंकुरं प्रत्यप्रयोजकं न तद्बीजजाती
यं यथा शिलाशकलं अंकुरं प्रत्यप्रयोजकं च कुसूलनिहितं बीजमप्येवं ते परैरिति व्यापकानुपलब्धेः प्रसंग
हेतुः। विपर्यये किं बाधकमिति चेत् अंकुरस्य जातिं प्रति नियमाकस्मिकत्वप्रसंग इत्युक्तं। बीजत्वं तस्य प्रत्य
क्षसिद्धमप्यव्यापकत्वमिति चेत्। अस्तु तर्हि विपर्ययः यद्बीजं तदंकुरं प्रति प्रयोजकं यथान्यसामग्रीमध्यमध्या
सीनं बीजं बीजं चेदं च वादपक्षमिति स्वभावहेतुः। अंकुरस्य जातिनियमो न तावन्निर्निमित्तः सार्वत्रिकत्वप्रसंगा
त्। नाप्यन्यनिमित्तकः तथाभूतस्य तस्याभावात्। सेयं नानिमित्तवत्ता विपक्षान्निवर्तमाना स्वव्याप्यमादाय बीज
प्रयोजकतायां विश्राम्यतीति प्रतिबंधसिद्धिः। अथवा कृतमंकुरग्रहेण बीजस्वभावत्वं कांचित्कार्यप्रयोजकं न वा

ऊर्द्ध२ वै वीज

गतन्न चेत्स्वभावं वीजं तेन रूपेण क्वचिदनुपयोगात् । एवं प्रत्यक्षसिद्धं स्वभावत्वं नास्ति सर्वप्रमाणागोचरत्व
विशेषोस्तीति विशेषोपाद्धिः क्वचिदुपयोगे त्वेकस्य तेन रूपेण सर्वेषामविशेषः ताद्रूप्यात्. तथा च किंचिदेव
वीजं कार्यं कुर्यान्नापराणि न च वस्तुमात्रं तत्कार्यमवीजात्तदनुत्पत्तिप्रसंगात्. नापि वीजमात्रं अंकुरकारि
णोपि तदुत्पत्तिप्रसंगात्. नाप्यंकुराद्यन्यतममात्रं प्रागपि तदुत्पत्तिप्रसंगात्. यदा यदुत्पन्नं सत् यत्कार्या
नुकूलसहकारिमध्यमध्यासीनं तदा तदेव कार्यं प्रति तस्य प्रयोजकत्वमभिमति चेत्. तत्किं अवांतरजातिभेदमु
पादाय वीजस्वभावेनैव वा. आद्ये स एव जातिभेदस्तत्र प्रयोजकः किं साधारणं वीजत्वं तस्य द्वितीये तु समानशी
लानामपि सहकारिवैकल्यादकारणानामपि साधारणं. तत्र सहकारिसाकल्ये सति तत्कार्यं प्रति प्रयोजकस्य
वीजत्वाभावस्य सर्वसाधारणत्वात्. अत्रापि प्रयोगः यत् येन रूपेणार्थक्रियासु नोपयुज्यते न तत्तद्रूपं यथा
अ२ वीजमंकुरत्वेन किंचिदप्यकुर्वन्नंकुरस्वभावं तथा च सामान्यादयः सामग्रीगर्भिता वीजत्वेनार्थक्रियासु नोपयुज्यं
न इति व्यापकानुपलब्धिः प्रसंगहेतुः तद्रूपता या अर्थक्रियां प्रति योग्यतया व्याप्तत्वात्. अन्यथातिप्रसंगात्. तद्रूप

बौद्ध
६

त्वमेतस्याप्रत्यक्षासिद्धत्वात्तदव्यापकत्वमितिचेन्न· असत्ताविपर्ययः यद्यद्रूपं तत्तेन रूपेणार्थक्रियासूपयुज्यते यथा
स्वभावेनसामग्रीनिवेशितोभावाः वीजरूपाश्चैते कुसूलस्थाद्यइति स्वभावहेतुः तद्रूपत्वमात्रानुबन्धित्वाद्योग्यतायास्तत
श्चाक्षिप्तं किंचित्कार्यं यत्र वीजत्वेन वीजमुपयुज्यत इति· वीजानुभवे साधारणं कार्यं यत्र वीजत्वं प्रयोजकं तच्च सर्वस्मादेव प॰३
वीजादुदेतीति किमनुपपन्नमिति चेन्न योगिकतदनुभवस्य तदन्तरेणाप्युपपत्तेः लौकिकत्वमिति चेत्सम्प्रेन तन्नान्वित
मवरूपसर्वस्माद्वीजाद्भवतीति इंद्रियादप्रत्यासत्तेरसदातनत्वात् असार्वत्रिकत्वाच्च न तच्च योग्यमपि सहकार्यसन्निधाने
न करोत्यर्थसिद्धं· कार्यान्तरमेवातीन्द्रियं सर्ववीजाव्यभिचारिभाविष्यतीति चेत् तन्न तावदुपादेयममूर्तस्य मूर्तानुपादेयत्वा
पटिर त् दृश्यमानमूर्तान्तरप्रतिहततयामूर्तान्तरस्य तद्देशत्वस्यानुपपत्तेः नापि सहकार्यमिथः सहकारिणामव्यभिचारानुपपत्तेः
अपि चैवं सति प्रयोजकस्वभावो नान्वयव्यतिरेकगोचरस्ततो वस्तु न प्रयोजकः दृश्यं च कार्यजातमदृश्येन वस्तुस्वभा
वेनाक्रियते दृश्येन तद्दृश्यमेव इति सोऽयं योधुवाणीत्यस्याविषयः अथवा व्यतिरेके प्रयोगः विवादाध्यासितं वीजं सहका
रिवैकल्यप्रयुक्तांकुरादिकार्यवैकल्यं तदुत्पत्तिनिश्चयाविषयीभूतवीजजातीयत्वात्· यत्पुनः सहकारिप्रयुक्तांकुरादिकार्यवै
कल्यं न भवति न तदेवंभूतवीजजातीयं यथा शिलाशकलमिति· न चाकिमुक्तसाधनव्याप्तेरुदाहरणात्रकिंवा

परंपरयार्पितधाभूतप्रसवसामर्थ्यविरहादितिव्यतिरेकसंदेहइतिवाच्यं।प्रागेवशंकाबीजस्यनिराकृतत्वात्।स्यादे
तत्।माभूत्सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्माध्यास:अस्तुचबीजमेवप्रयोजकंभवतुसहकारिसमवधानेसति
कर्तृत्वाभावंचाभावस्यतथात्वंतदसंनिधानेऽकरणमप्युपपद्यते।तथापितज्जातीयमात्रएवेयंव्यवस्था।नत्वेक
स्यांव्यक्तौकरणाकरणलक्षणविरुद्धधर्मसंसर्गस्यप्रत्यक्षसिद्धतयादुर्वारत्वादितिचेत्।नविरोधस्वरूपान
वबोधात्।सखलुधर्मयो:परस्पराभावरूपत्वंवास्यात्नित्यत्वानित्यत्ववत्।धर्मिणितद्घटकत्वंवाशीतोष्णत्ववत्
ना तद्वैवादंडिकुंडित्ववत्।नप्रथम:निर्विशेषस्यासिद्धेः।यावत्सत्त्वंकिंचित्करणाकविशेषैस्तुविरोधसिद्धावप्यधा रणा ६
मानुपपत्तेः।यद्यदकरणंहितत्तदकरणस्याभावोनत्वन्यदातदकरणस्य।नचैतयोरेकधर्मिसमावेशमातिष्ठाम
हे।नद्वितीयः।भावाभावव्यतिरिक्तयो:करणाकरणयोरसिद्धेः।व्यापारापरव्यपदेशसहकारिभावाभावौहिक
रणाकरणेकार्यभावाभावौवेतिअतिरेकासिद्धावपिस्वकालएवस्वाभावप्रतिक्षेपवदकरणाभावमाक्षिपेत्करणं
नतत्तदा।नहियोयदानास्तिसतदास्वाभावंप्रतिक्षेप्तुमर्हतिविरोधाभावंवाआक्षेप्तुंतथासतिनकदाचित्तत्स्यान्नचकदा
तं१ चिद्विरोधोभवेदितिनासतोविद्यतेभावोनाभावोविद्यतेसतइत्यायातंनचाविरोधः।नन्वेवंसतिपरमाणुभेदोपिकालभेदेन

बौन्याधि

किञ्चैतत्तन्नाप्येवं वक्तुं शक्यत्वात्· न बाधकबलेन कालभेदस्य तत्र विवक्षितत्वात्· तथा हि नारब्धद्रव्यैरेवावयवैर्द्रव्यान्तरमारभ्यते मूर्त्तत्व
समानदेशत्वयोरेकत्र विरोधात् तथा चारंभपक्षे पूर्वद्रव्यनिवृत्तिरनिवृत्तावरेनारंभः॥ तन्निवृत्तावाश्रयभेदादेव परिमाणभेदः॥ अनिवृत्तौ
तं योगिद्रव्यान्तरानुपपत्तेरेकपरिमाणाभेदोपलंभो यो विरोधमावहेत न तदुपपद्येत च एकपरिमाणान्तरोत्पत्तिरन्यथानुपपत्तेः॥ अत एव स्थौ
ल्यात्कार्श्यरूपयोरपि न भ्रान्तः॥ तस्मात्कालभेदेनापि परिमाणभेदे दृष्टे कस्मिन् धर्मिणि नोपहन्तुं शक्यते इत्यादि पदार्थचिंताचतुरैः
सह विचिंतनीयं· अन्तर्हीनापि बाधकबलं प्रसंगविपर्ययोपारक्तेवादिति चेत् तयोः सामर्थ्यासामर्थ्यविजयत्वात् तत्र चोक्तत्वात्
तांवा न तथापि ताभ्यां सामर्थ्यासामर्थ्ययोरविवक्षितकालभेदयोर्वा विरोधः साध्यते तथोपसंहर्त्तुमशक्यत्वात्· यदा तदेवापेक्ष्य यत्समर्थं
तत्करोत्येवेति चेत्· कालनियमाविवक्षायां यत्समर्थं तत्करोत्येव कदाचिदिति स्यात्· तथा च संभवद्विधेरत्वेनायोगो विरुद्धो न त्व
योगो नीलं सरोजं भवत्येवेतिवत्· ननु यदसमर्थं प्रथममासीत्तस्य सामर्थ्यं पश्चादपि कृत आयातं प्रथमं समर्थस्य वा पश्चात्कुत्र गतं॥
नैतदेवं· तत्र सहकारिमतः तत्कार्यकारित्वं हि सामर्थ्यं अनाहतस्वदन्यतो वा तदकर्तृत्वमसामर्थ्यमिदं चौत्पत्तिकमस्य रूपं ते
वसहकारिणः॥ स्वोपसर्पणकारणवशाद्भिन्नकाला इत्यर्थात्कार्याणामपि भिन्नकालतेति· तथाप्येककालस्य एवभावो ऽना
तनष्टसत्तातदा कार्यं करोति उत्पन्नकार्यमात्रस्य तत्स्वभावत्वादेकदेशस्थवदिति चेत् सेयं एककालस्थता स्वरूपापेक्षया सह

कारिसान्निध्यापेक्षया वा आद्ये न किंचिदनुपपन्नं नित्यानामप्येवंरूपत्वात् वर्त्तमानैकस्वभावत्वाद्भावानां तदेव तु कवि

वि२ त्सावधिकाश्चिन्निरवधीनिद्वीयः· सावधित्वेपि व्यापारफलप्रवाहप्रकर्षापकर्षाभ्यां विशेषः· द्वितीयस्तु स्यादपि यदि

तेषां योगपद्यं भवेत्· क्रमिणास्तु सहकारिण इत्युक्तं सहकारिसहितः स्वभावेन करोतीति वक्तरि जानन्नप्येवं करो-

त्विति तत्तत्प्रसंगो निवीन्तशेशावस्थेन्यत्फलमनेन तस्मात्कार्यस्य स एव कालः कार्यस्य स चान्यश्चेति संबंधिकाला २।४

पेक्षमाव्यवहारः· अपि च यदा तदेति स्थाने यत्र तत्रेति प्रक्षिप्य तयोरेव प्रसंगतद्विपर्यययोः को दोषः· न कश्चिदिति

चेत् तर्हि देशाद्वैतं वा कारणभेदो वा आपद्येत आपद्यतां तदा द्वययोगाचारनयनगरमेव प्रवेक्ष्याम इति चेन्न हेतु

फलवादे वैरिणामनपोह्य तत्र प्रवेष्टुमशक्यत्वात् न द्वयवादे वा सत्वाख्यसाधनशस्त्रसन्यासिनस्तव काह थोद

संग्रामभूमावपि कुतोभयं ननु यावेत्योर्थक्रियाभिन्नदेशालावद्वैदं कारणमस्तु को विरोध इति चेन्न तेषामपि

प्रत्येकं गगनसंगस्य तदवस्थत्वात् एवमेकस्य जगति वस्तुतत्वस्यानभिसाधिक्षणभंगसाधनपरिशुद्धिः· अस्तु

तर्हि दोष एव कश्चिदनयोरिति चेत्स पुनः कस्मिन्नंशे किं सामर्थ्यासामर्थ्ययोः किं वा तद्विरुद्धधर्माध्यासे

न भेदे आहोस्वित् देशान्यदेशान्योर्विरोधे नाद्यः· सावव सामर्थ्यं हि प्रसह्यकरणात् सर्वं गशको कचिदप-

करणात् । सर्वदेशसमानस्वभावत्वेप्यस्य स्वोपादानदेश एव तत्कार्यं करोत्ययमस्य स्वभावः । स्वकारणादायातेन
नियोगपर्यनुयोगावर्हतीति चेन्नाहि सर्वकालसमानस्वभावत्वेपि तत्सहकारिकाल एव करोत्ययमस्य स्वभावः
स्वकारणादायातः इति किं न रोचयेः । नाद्वितीयः विरुद्धधर्माध्यासेनाप्यभेदे भेदव्यवहारस्यानिर्निमित्तत्वप्र त्व
पि४ संगात् । अनैकांतिकश्च हेतुः कालतोऽनभेदं साधयेत् । न तृतीयः विरोधलक्षणायोगे बाधकसहस्रेणापि विरोधस्या
पनेतु~~मन्मन्ये~~मशक्यत्वात् । अयोगे वा तदेवायं यद्विधाने यस्य निषेधो यन्निषेधे च विधानं तयोरेकत्र धर्मिणि प
रस्परपरिहारावस्थितयोर्विरोधः स चेह नास्ति तद्देशकार्यकारित्वं तद्देशकार्याकारित्वेनाविरुद्धं तद्विधौ तस्यैवानि
षेधेनानिषेधात् । न पुनर्देशांतरेण तत्कार्याकारित्वेन तस्यानिषेधात् । न ह्यन्यत्र तत्करणमतत्करणं वा तत्र तत्कोऽस्या
स्वभावोपितु तत्र तदकरणमिति चेत् । हंतैवं भावविरोधलक्षणाव्याप्तिर्भिन्नकालत्वात्तस्य शीतोष्णयोरपीत्युक्तप्रायं तत्र ७
त्रसंदधीथाः तस्मात्प्रसंगतद्विपर्ययस्थितावव्याप्तिसिद्धो विरुद्धधर्माध्यासः । ननु यदेकदा यत्करोति तद्यावत्सत्त्वं करो
त्येव यथा कश्चिद्बुद्धः वाद्यंतरमिति प्रसंगो स्तद्विपर्ययस्तु यदेकदा यन्न करोति तत्सदैव तन्न करोति । यथा शिलाश
कलं अंकुरं न करोति चैकदा कुसूलस्थबीजं अंकुरमिति चेत् न तदेतज्जात्यभिप्रायेण वा स्याद्व्यक्त्यभिप्रायेण वा स्यात्
वा

प्रथमे द्वयमप्यनैकांतिकं तन्नियमदर्शनात्। द्वितीये द्वयमप्यन्यथासिद्धं एकांतासामर्थ्यप्रयुक्तत्वादनंताकरणस्य सामर्थ्ये सति
सहकारिसंनिधिप्रयुक्तत्वात् करणानियमस्य। एतेन यद्यत्करोति तत्तदुत्पन्नमात्रं यथा कर्मविभागं यदुत्पन्नमात्रं यन्न क-
रोति॰ तन्न कदाचिदपि यथा शिलाशकलमंकुरमिति निरस्तं। अत्रापि पूर्ववदनैकांतान्यथासिद्धी दोषाविति॰ नापि
तृतीयः कृतकत्वानित्यत्वयोरपि परस्पराभाववत्तामात्रेणाविरोधप्रसंगात् इति। अस्तु तर्हि तस्यैव तेनैव सहका-
रिणा संबंधो संबंधश्चेति विरोधः॰ न विकल्पानुपपत्तेः॰ तथा हि संबंधिनः संबंधांतरस्याभावस्याभाव्यं विरुद्धत्वं प्र- ने५
भावप्रतियोगित्वं वा तदैवेति साहित्यं वा तन्नैवेति साहित्यं वा उभयसाहित्यं वा तथैवेति साहित्यं वेति॰ न प्रथमोऽनभ्युपगमात्।
न द्वितीयः सत्कार्यप्रतिषेधात्। न तृतीयः प्रागभावप्रध्वंसाभावयोर्भावसमानकालत्वानभ्युपगमात्। न चतुर्थः साहित्यावस्- न
स्थितियौगपद्यनियमेन संबंधिनोरस्तु इत्यसिद्धेः। इत एव तत्र मिथोवि[illegible]तरेतराश्रय[illegible]नियमसिद्धौ हि विरोधसिद्धिस्त-
त्सिद्धौ च भेदे सति नियमसिद्धिरिति॰ न वान्यतरस्यास्तित्वे तदभावात्॰ अनियतोपसर्पणापसर्पणकारणप्रयुक्तत्वा-
क२ च॰ संबंधासंबंधयोः॰ नापि विनाशस्याहेतुकत्वादयं विरोधः सिध्यत्यर्थान्तरस्याप्यसिद्धेः। क्षणभावित्वे तु वक्ष्यामः। नापि पं-
चमः॰ न हि तदैव तन्नैव स एव सहकारी अस्ति नास्ति वेत्यभ्युपगच्छामः॰ ननु समवधानं नाम सहकारिणां धर्मः संयोगो

वारे

बौध
धिक्का
९

अथातिरिच्यते संवृत्तेभ्यो व्यतिरिक्तो व्याप्यवृत्तिश्चेत्तदापि तथा च सद्यवन्तदेव तद्वैयर्थ्यं वास्ति नास्ति वेति । अनतिरेके स्थिर
त्वादिनो वस्तान्यपि धीअं धूराणि धर्म्मान्तिरे वेति तेभ्योपि कार्योत्पत्तिप्रसंगः ॥ व्याप्यवृत्तित्वे च सर्वत्रैव विभ्रमः ॥ शब्दादिका
र्योत्पत्तिप्रसंगः । तस्मादसंयुक्तेभ्यो व्यावृत्तसंयुक्तस्वभावाः परमाणवो जाता इत्येष्टव्याः ॥ नैतदेवं क्षणिकपरमाणाव
स्प ४ प्यविरोधस्य दुर्वारत्वात् । तथा हि पूर्वदिगवस्थितः परमाणुर्यथा दिगवस्थितेन परमाणुना परदिगवच्छेदेनाहतस्तुपमन्त
किं स्तथैव पूर्वदिगवच्छेदेनापि न वा उभयथा [illegible] वा । आद्ये उभयतोनुपलब्धिप्रसंगः ॥ द्वितीये ऽभ्यन्तो प्रभवतोऽप्युपलंभाप
त्तिः ॥ तृतीये सह्यव दुरन्त एव विरोधः । सह्यतेनैवाहतो नाहतश्चेति विप्रकारभेदमुपादायादिविरोध इति चेत् कः पुनरसौ
ऽदिगन्तरावच्छेदः । यदि हि याद्दिगवच्छेदेनो संयुक्तस्तद्दिगवच्छेदेनासंयुक्तोपि ततो विरोधः स्यादहन्तु नैवमिति चेत्
हन्त संयोगसंयोगिनोर्भेदपक्षोपि यथा सिद्धान्तमहत्वांतः कीदृशो वा ॥ एतेन व्यतिरेकपक्षोपि निरस्तः । अ
मरे धिकश्चन वाश्रयहेतुदृष्टान्तासिद्धेः प्रमाणाभावः अवरुद्धे प्रमाणोदन्ते प्रमाणोदन्तावलीकत्वापत्तेः । एवं त
र्हि अव्यवहारे स्ववचनाविरोधः स्यादिति चेत् तत्किं स्ववचनविरोधेन नैव प्रमाणमुपदर्शितं भवति । व्यवहारनिषे
धकव्यवहारे विधायकोऽतः स्यात् । अप्रामाणिकोपि व्यवहारोऽवश्याभ्युपगन्तव्य इति वामदेवः । नगादत्प्रथमः ॥

र[illegible]दि २

३५
९

पि
नहिविरोधसहस्रेणास्थिरेनस्वक्रमादिविरहेवाशशशृंगेवाप्रमाणमुपदर्शयितुंशक्यंतथात्वेवाकर्तव्योनकलहे
नाहितीयास्तिव्यतएवप्रामाणिकैःअवचनंतर्हिप्राप्तंकिंकुर्याद्वचनंयत्रसर्वथैवानुपपन्नंतत्रावचनमेवश्रेयः॥त्वम
पिभावयतावत् ।निःप्रमाणकत्वेमूकवावदूकयोःकतरःप्रामाणिकइतिएवंविदुषामपिभवतामूकीभूयस्थि
तमपितिव्यवहारःप्रतिबिद्धएवासतीतिचेन्नसत्यंयथाऽप्रामाणिकःस्ववचनविरुद्धोऽर्थमप्रसांक्षीदितिमन्यमा
नेनत्वयाऽप्रामाणिकएवासन्तिव्यवहारःस्वीकृतः॥तथास्माभिरपिप्रमाणंविनायामप्रामाणिकोव्यवहारोम
प्रसांक्षीदितिमन्यमानैरप्रामाणिकएवस्ववचनविरोधःस्वीक्रियते।यदितूभयत्रापिभवान्समदृष्टिःस्यात्तन
वास्माभिरपिनाकिंचिदुच्यतेइतितृतीयेत्वप्रामाणिकश्चाभ्युपगंतव्यश्चेतिकस्येयमाज्ञेतिभवानेवप्रष्टव्यःव्यवहा
रस्यदुष्टनिरूढत्वादितिचेत्‌॥अप्रामाणिकःदुष्टनिरूढश्चेतिव्याघातः॥कथंचिदपिव्यवस्थितत्वादितिचेत्॥
अप्रामाणिकश्चेन्नकथंचिदपिव्यवतिष्ठेतअप्रामाणिकश्चेत्तदेवोच्यतामितिवादव्यवस्थाजल्पवितंडयोस्तु
पु १ पक्षादिप्रमाणप्रश्नप्रवृत्तस्यनस्ववचनविरोधःतत्रप्रमाणेनोत्तरमनिष्टमशक्यंवाप्रमाणेनतूत्तरेस्ववचनेनैवभं
मात्र स्वि

२

बोधाधि
१०

गः मदुक्तेषु पक्षादिषु प्रमाणं नास्तीति स्वयमेव स्वीकारात्। अनुत्तरे त्वप्रतिभैवेति। यदि व्यवहारस्वीकारे विरोधपरि
हारः स्यात् सोऽस्वीक्रियेतापि न त्वेवं। न खलु सकलव्यवहारभाजनं च नाभिधेयं भाजनं वा परस्परमविरोधि वा व्य ति
वहारमात्राभिप्रायेण भाजनत्ववादे कुतो विरोध इति चेन्न। हंत सकलविधिनिषेधव्यवहाराभाजनत्वेनाकिंचि
द्व्यवह्रियते न वा उभयथापि स्ववचनविरोधः उभयथाप्यवस्तु[illegible]नैव तेन भवितव्यं वस्तुनः सर्वव्यवहारविरहानुप
पत्तेः नेतिपक्षे सकलविधिनिषेधव्यवहारविरहीत्यनेनैव व्यवहारेणाविरोधात्। अव्यवहितस्य निषेधमश
क्यत्वात् व्यवह्रियते इति पक्षो विषयस्वरूपप[illegible]र्यालोचनाविरोधात्। नहि सर्वव्यवहारविरहविषयश्च व्यव
ह्रियते वेति। यदि चावस्तुनो निषेधव्यवहारगोचरत्वं विधिव्यवहारगोचरत्वमपि किं न स्यात्प्रमाणाभावस्यो
भयत्रापि तुल्यत्वात्। अवस्तुनस्त्ववस्तुत्वेऽचेतनत्वादिकमेव प्रमाणं वस्तुत्वे तु नाकिंचिदिति चेन्न। तत्रापि वस्तुन रामः
त्वस्यापि प्रमाणत्वादिति। नहि वंध्यायाः सुतो न सुतस्तथास्तीति स्ववचनाविरोधात्। वचनमात्रमेवैतन्न परमार्थ १०
तः सुतस्यासत्त्वादिति चेन्न। अचेतनस्याप्येवंरूपत्वात् चेतनादन्यस्य भावांतरमेव ह्यचेतनमित्युच्यते चैतन्यनिष्टत्निमा

व्याहतिरूपमपि तदेव गमकं। यदन्तस्मादेव यथाऽङ्गीयापाल्वं

त्रमेवविवक्षितमिह तत्रसंभवत्येवेतिचेन्न तत्राप्यक्तृ तत्त्वनिवृत्तिमात्रस्यैवविवक्षितत्वात्। अस्तुतत्त्वनिवृत्तिमात्रस्यैवस्वरूपेणाग्रा
हकतिरस्मात्त्रसामर्थ्यसमर्थमर्थांतरमध्यवसेयमनंतर्भाव्यकुतोहेतुत्वमितिचेन्न अचेतनत्वेप्यस्यन्यायस्यतुल्यत्वात्। नन्विदमचे
तनत्वमप्यस्यैवंरूपमेवनाहियथास्वतश्चेतनादिवदेवदत्तादेरचेतनादपिकाष्ठादेर्व्यावर्तते· वक्तृत्वंवस्त्वेकनियतोधर्मः सकथ
मवस्तुनिसाध्योविरोधादितिचेत्पुनरयंविरोधः कुतः प्रमाणात्सिद्धः किंवक्तृत्वविविक्तस्यावस्तुनोनियमेनोपलंभात्·
आहोस्विद्वस्तुविविक्तस्यवक्तृत्वस्यानुपलंभादिति· नतावदवस्तुकेनचित्प्रमाणेनोपलंभगोचरः। तथात्वेनावस्तुनाप्युत्तरः
समानत्वात्। नहिवक्तृत्वमिवावक्तृत्वमपिवस्तुविविक्तकस्यचित्प्रमाणविषयः नहिविविक्तविकल्पमात्रंतावदस्तीतिचेत्·
ननत्संसृष्टविकल्पेपिकोवारयिता ननुवक्तृत्वंवदनंप्रतिकर्तृत्वंतत्कथमवस्तुनितस्यसर्वसामर्थ्यविरहलक्षणत्वादिति
चेत्· अवक्तृत्वमपिकथंतचतस्यवचनेनकर्तृत्वलक्षणत्वात् सर्वसामर्थ्यविरहोनविरुद्धइतिचेन्न· अथसर्वसामर्थ्यवि
रहोवंध्यासुतस्यकुतः प्रमाणात्सिद्धः अवस्तुत्वादितिचेत्· नन्विदमपिकुतः सिद्धंसर्वसामर्थ्यविरहादितिचेत्सोयंकेवलैर्वच
नैरितरस्ततोनिर्धनाधमर्णिकवत्साधून्भ्रामयन्परस्पराश्रयदोषमपिपश्यति क्रमयोगपद्यविरहादितिचेन्नतद्विरहसि

वे

विरहेवचनसामर्थ्य

बौद्ध
११

भावपिप्रमाणानुपयोगस्यानुवृत्तेः। सुतत्त्वेवपरामृश्यमानेतद्विनाभूतसकलवस्तुत्वादिधर्मप्रसक्तौ कुतः क्रमयौगपद्यविरह
साधनस्यावकाशः कुतस्तरां वा वस्तुत्वसाधनस्य कुतस्तमां भावरूपत्वादि साधनानां तस्मात्प्रमाणमेव सीमा व्यवहारनियम
स्य न इति क्रमत्व नियमश्चेति· न ह्यप्रतीते देवदत्ते सगौरः कृष्णो वेति वैयात्यं विना ब्रूयात् तथापि यद्येकोऽप्रतीतपरामर्श
विषयस्योत्तरं ददाति न गौर इति अपरः किं न दद्यात् कृष्ण इति न चैवं सति कदाचिदर्थसिद्धिः प्रमाणाभावविरोधयोरुभय
त्रापि तुल्यत्वात्· नन्वप्रतीते व्यवहाराभाव इति युक्तं कूर्मरोमादयस्तु प्रतीयन्त एव नह्येते विकल्पाः कंचिद्धर्मविशेषं अनुलि
खंत एवोत्पद्यंते· न च प्रमाणास्पदमेव व्यवहारास्पदमिति तन्न युक्तं तथा हि शशविषाणमिति ज्ञानमन्यथाख्यातिर्वा स्या
दसत्ख्यातिर्वा न तावदाद्यस्ते रोचते तथा सति किंचिदारोप्यं किंचिदारोपविषयः स्यात् तथा चारोपविषयस्तत्रैवास्ति आरोप
णीयस्त्वन्यत्रैवेति जीर्णं नैयायिकैः नापि द्वितीयः कारणानुपपत्तेः इंद्रियस्य ज्ञानजनने विषयाधिपत्येनैव व्यापारान्न लिं
क
गशब्दाभासयोरप्यन्यथाख्यातिमात्रजननात्· अपह्नुतितस्वार्थयोश्चासत्ख्यातिजनकत्वे शशविषाणशब्दात्कूर्मरोमा ११
दिविकल्पानामप्युत्पत्तिप्रसंगात् नियामकाभावात् स हि संकेतो वा स्यात् शब्दस्वाभाव्यं वा आद्यस्तावत्संकेताविषयाप्रतीतेर्

वपराहतः। ततएवतत्प्रतीतावितरेतराश्रयत्वं पदसंकेतबले नैव तत्प्रतीतौ स्वार्थपरित्यागात्। तथा वानन्विताः पदार्था ए
वान्वितन्तया परिस्फुरंतीति विपरीतख्यातिरेवावर्तते· स्वार्थपरित्यागे तु पुनरप्यनियमः॥ असामयिकार्थप्रत्यायनाच्
शब्दस्याभाव्यानियमे उत्पन्नवदनुत्पन्नस्यापि तथाविधविकल्पोदयप्रसंगात्॥ वासनादिदोषादिति चेत्· अथा
मद्दृष्टौरिवनः प्रत्ययस्य वासनैव कारणमुत वासनापि न तावद्बाह्यः शशविषाणादिप्रत्ययानां सत्तानन्त्यप्रसंगात्
कदाचित्प्रबोधादिति चेत् प्रबोधोपि सहकार्यन्तरं वा अतिशयपरंपरापरिपाको वा· आद्ये वासनैवेति पक्षानुपपत्तिः
द्वितीये तु यदर्थान्तरप्रत्यासत्तेः तदा पूर्ववत्स्वसंततिमात्राधीनत्वे तु बाह्यवादव्याघातः नीलादिबुद्धीनामपि वासना
परिपाकादेवोत्पादात् वासनीयीति पक्षे तु तदन्यो कश्चिन्न हेतुर्वक्तव्यः सर्वो विचार्यमाणः पूर्वन्यायं नातिवर्तते इति
नच शशविषाणादिज्ञानामसदर्थैः सह संबंधावगमोपि· तथाहि परबुद्धीनामनध्यक्षत्वात्तद्विषयस्याप्यनध्यक्षत्व
एवं न वार्थक्रियादिदोषो व्याप्तियतो विषयस्य [illegible]वरोधमुन्नीयत तत्र संकेतो गृह्यतां· न च संकेतयितुरेव वचनात्तदवग
मः तद्विषयाणां वचनानां सर्वेषामप्रतीतिविषयत्वेनागृहीतसमयतया ऽप्रतिपादकत्वात्। न च शशविषाणाद

al Sanskrit University, Balmiki Campus, Kathmandu

ऽवारयतः कश्चिदभिप्रायो घटत्वादिविषयोऽस्त्वावाच्य इति ग्रहः समयग्रह इति वाच्यं · नह्येवमाकारः समयग्रहः गां बधानेत्युक्ते ऽ
प्रतीतवाच्यार्थस्यापि अभिप्रायमात्रप्रतीतौ समयग्रहप्रसंगात् । न च विरोधान्तरं विना कुतः कल्पनामात्रविषयोऽस्त्वा
व्यहारेष्टां प्रतं · घटकूर्मरोमादीनामपि तदर्थत्वप्रसंगात् · न च सर्वेऽपि प्रकाराः खखवासनया ऽसदर्थशब्दसंबंधप्र
तिपत्तिभाजस्तां प्रतं · परस्परवार्त्तानभिज्ञतया अपरार्थत्वप्रसंगात् · नहि त्वयं कृतसंकेतेन मया ह्वयित्वा परो व्यवहा
रयितुं शक्यते · न च व्यवहारोपदेशावन्तरेणाप्याह्वयितुमपि · न च गां बधानेति वृत्त्या शाबलेयापदार्थे व्यवहारः न चायम
सोऽश्व इति व्यपदेशः । न च यथा गौस्तथा गवय इति बहुपलक्षणातिदेशः न चेह प्रा[illegible]भिन्नकमलोदये [illegible]ऽनिमधुरः पि
प्रतीतिवत्प्रसिद्धपदसामानाधिकरण्यं तदमूः शाबलेयादिकल्पनानासंख्यातिरूपाः तथात्वे कारणाभावात्
मूकस्वप्नवदसंव्यवहारिकत्वप्रसंगात् तस्मादन्यथाख्यातिरूपा इत्येतिनैतदनुरोधेनाप्यवस्तुनो निषेधव्यवहारगोचरत्व
मिति · भवतु वा ऽस्तु ख्यातिस्तथापि न ततो व्यतिरेकः प्रामाणिकः तथाहि कोऽयं व्यतिरेको नाम यद्घटतो व्यतिरिक्ते
नैतस्य तत्त्वाभावो वा तदभावस्वभावत्वं वा तत्र न तावत्क्रमयोगपद्ययोः शशविषाणतोऽभावः प्रमाणगोचरः दृक्षरहि

तद्भूतले घटवत् कर्मयोगपद्यरहितस्य शशविषाणस्य प्रमाणागोचरत्वात्· नापि कर्मयोगपद्याभावरूपत्वं शशवि
षाणस्य प्रामाणिकं घटाभाववत्त्वं शशविषाणस्य प्रमाणेनानुपलम्भात्· घटाभावोपि न प्रमाणगोचर इति चेन्न तस्य
तद्विरहेतरस्वभावस्यापि प्रमाणेनैव सिद्धेः॰ असिद्धौ तन्नाम्ना व्यवहार इव घटस्यावतद्भावे विरहस्वभावः प्र
माणसिद्धः॰ तद्रूपेण कदाचिदनुपलम्भात्· एतावतैव तदभावोपि घटविरहस्वभावः सिद्धः॰ इति केन घटाभावस्य त वा २
दभावविरहस्वभावत्वे नभ्युपगमात्· तथान्यस्य स्वभावे प्रमाणागोचरे तदन्योपि सिद्धः स्यादिति प्रसंगात्· एवं भूतावे
व घटतदभावो यदेकस्य परिछित्तिरपरस्य व्यवस्थितिरिति चेन्न· घटवद् घटाभावस्यापि प्रामाणिकत्वानभ्युपगमे
स्वभाववादानवकाशात्· प्रमाणसिद्धो हि स्वभाववादालम्बनं न तु स्वभाववादालम्बनेनैवायं वस्तुव्यवस्थितिरिति भव
तामेव तत्र तत्र जयदुंदुभिः॰ न किंचिदनीस्याभावविरहस्वभावो घटः प्रमाणेनैव सिद्धः॰ न च घट एवमेतत्स्यात्पर
मार्थतः सोपि तद्विरहस्वभाव इति तथैव प्रमाणेनावेदितः॰ स्यात् न चैतदभ्युपगम्यते भवता तस्मात् घटवत्तदभाव
स्यापि प्रामाणिकत्वे नैतयोः परस्परविरहलक्षणव्यतिरेकासिद्धिः॰ अप्रामाणिकत्वे तु तयोरपि तथाभाव इति
शशविषाणादिवदपीयमेव गतिः। ननु काल्पनिकरूपसंपत्तिरेवास्त्वनुमानांगं तन्मात्रस्यापि सर्वत्र सुलभत्वात्· ननु

बौ क्ष

१३

पक्षसपक्षविपक्षास्तावद्वस्त्ववस्तुभावेनद्विरूपाः॥ तत्रयेकल्पनोपेतास्तत्रकाल्पनिकाहेतुपक्षधर्मत्वान्वयव्यतिरेकाः॥ समा
रोपदर्शितेषुप्रामाणिकाइत्येतिविभागः॥ नहिकाल्पनिकान्तरङ्गेर्थव्याप्तिप्रमेयत्वादेर्व्याप्तेःकाल्पनिकीसिद्धा·तथा
विप्रामाणिकाज्ञानकृताद्धेः प्रामाणिकीहेत्वेविनव्याप्तावनसिद्धेतिकुतः स्वस्वहेतुत्वं· एवंप्रामाणिकेसाध्येपक्षीकृतेप्रामा
त्व८ णिकएवहेतुस्तद्वाच्यकव्यः॥ नचासौचाक्षुषत्ववत्स्वासिद्धिसोपिकथंहेतुः एवंकृतकस्यापिवस्तुकानित्यस्यधर्मस्यवाभाव
एवान्वयोवक्तव्यः वस्तुनोविपक्षाद्व्यावृत्तावेवव्यतिरेकः॥ नचतस्मात्तस्तत्कथमसावपिहेतुरितिप्रलपितमेतत्·नहिनि
यामकमन्तरेणास्मदादिंप्रतिकल्पनात्वरतोविपर्ययंप्रतिनुविलम्बतेइतिवक्तुंशक्यं·तथावानिरग्निकमपिकूर्मरोमसधूमकमि
तिकल्पनामात्रेणविपक्षहानित्वाद्धूमोनाग्निंगमयेत्·वास्तवरूपसंपत्तौकिमनेनकाल्पनिकदोषेणेतिचेत्·वास्तव्यांसंपत्तौ तर्हि
किंकाल्पनिकयातयेतिसमानं·विरोधाविरोधौविशेषइतिचेत्कुतएतदुभयोरेकत्रवस्तुत्वादन्यत्रावस्तुत्वादितिचेत्तत्किं
काल्पनिकोपिवस्तुभूतोधूमोयेनकृशानोस्तेनसहविरोधः कश्चिद्वस्तुभूतइतिचेत्·निर्धूमत्वमपिकाचिद्वस्तुभूतमितिते
न नापिविरोधएवतस्माद्यथाकाल्पनिकीव्युत्पत्तिर्दोषायतथासंपत्तिरपिनगुणायेतिव्यतिरेकभंगः॥ ।अस्तुतर्हिध्रुव १३
भावित्वादिनापिहेतुत्वेनक्षणभंगः॥ नविकल्पानुपपत्तेः॥ तद्धितादात्म्यंवानिरूपाख्यत्वंवातत्कार्यत्वंवातद्व्यापक
स्या कं

त्वं वाऽभावत्वमेव वेति· न पूर्वः। निषेध्यनिषेधयोरेकत्वानुपपत्तेः। उपपत्तौ वा विश्ववैरूप्यानुपपत्तेः। ननु कालान्तरेऽर्थक्रियां प्रत्य
शक्तिरेवास्य नास्तितासावकालान्तरे समर्थेतरस्वभावत्वमेवेति चेत्· न त्वयमेव क्षणभंगः। तथा चासिद्धमसिद्धेन सा
धयतः कस्ते प्रतिमल्लः। अपि च देशान्तरकालान्तरानुषंगितयस्य नास्तिता· यद्ययमेव नूनमक्षणमिदमुक्तं· यदयमेव देशा
न्तरकालान्तरानुषंगीति· यदि वा स्वदेशकालवत्कालान्तरदेशान्तरयोरपि नास्तिता अनुषंगेऽस्तिताप्रसंगः तदानीमपि त
स्य ताद्रूप्यात्· अशक्तेः कथमसत्त्वशक्तेः सत्तालक्षणत्वादिति चेत्· अथ कालान्तरकार्यं प्रति स्वकाले शक्तिरसत्त्वं किं वा स्वका
र्यमपि प्रति कालान्तरेऽशक्तिरसत्त्वं। आद्ये स्वकालेऽप्यसत्त्वप्रसंगात् तदानीमपि तस्य ताद्रूप्यात्· कालान्तरकार्यं प्रत्येव
मिति चेत्· किमयं मंत्रपाठः। नहि यो यत्राशक्तः स तदपेक्षया नास्तीति व्यवक्रियते· नहि रासभापेक्षया धूमो जगति नास्ति
तत्कस्य हेतोः। न ह्यशक्तस्य स्वरूपं निवर्तत इति· द्वितीये तु यदि कालान्तराधारा शक्तिः कथं तदात्मिका न तदाधारत्वेन देवास
त्त्वप्रसंगः कालान्तरे तु विपर्ययः। तस्माद्विधिरात्मा स्वभावस्य निषेधस्तु ततः परः सोऽपि चात्मेति कः प्रेक्षः भूरावन्नापि नल
ब्जातैः। अस्तु भावरूपातिरिक्ता निवृत्तिर्नास्तीति वा कस्य सोपाख्येति शेषः। नन्वयमपि क्षणभंगस्योजारः सबाधा

पि

पि युगस्थितौ वर्त्तते· भवतु वा निवृत्तिरसमर्था तथाप्यहेतुकत्वेन स्यात्। किमायातं· तुच्छस्य कीदृशं जन्मेति चेत्· यादृशः
कालदेशानियमः सोऽपि तस्य कीदृश इति चेत्· एवं तर्हि घटनिवृत्तिर्न क्वापि कदापि सर्वदैव सदैव वेति स्यात्· भवतु तथमए

कफो। णि

क्षभं
१४

वेति चेत्· सोयंभावनाशिनाशस्वरूपप्रतिषेधेन नास्तिता स्वरूपानिरुक्तिर्वेति। आद्ये भावस्य सदातनत्वप्रसंगः। द्वितीये तु निरुक्तिरेवेति
अस्तु तर्हि तत्कार्यत्वमेव क्षणभावित्वं· न तस्यापि कार्यमिति पक्षे विरोधात् तस्यैव कार्यद्वयस्यासिद्धेः। तत्किं विद्युत्पन्नमात्रस्य कार्यं स ए
व तस्य नाश इति चेत् तर्हि यस्यासामर्थ्या यत्कार्यं तत्तदतिरिक्तानपेक्षमिति साधनार्थः तमिमं को नाम नानुमन्यते। कार्यमेव वि
नाश इति केन [illegible] षेधेनु व्यवहर्त्तव्यं किंवा· तद्विरहवत्त्वात्कार्यस्य किंवा तद्विरहरूपत्वात्· न तावत् पूर्वः सहकारित्वव्यवहा
रमपि तथा प्रसंगात्· व्यवहारस्य रूपानिरुक्तेश्च· नाद्वितीयः सहि कार्यकाले कारणस्य योग्यानुपलंभनियमाद्वाभवे व्यवहारानुरोधाद्
अतिरिक्तविनाशे बाधकानुरोधाद्वेति· न प्रथमः उपलभ्यं तेपि पटकालेपि वेमादयः न ते इति चेत् तत्किमत्र प्रमाणं [illegible] अभेदे पि कं प्रमा
व णमिति चेत् माभूत् तावत् दह स्थितावपि अनुपलब्धिमात्रालंबनो विलयात्· न द्वितीयः न हि पटो जात इत्युक्ते तंतवो नष्टा इति [illegible] कश्चि
भाव८ द्व्यवहरति पटस्यानतिरेकात् तंतुमात्र उत्पन्नविभेदाय व्यवहारः ई तेएव तास्मिन्नविरोधराश्रयत्वं· तथापि यद्येवं स्यात् कीदृशो दोषः
इति चेत् न कश्चित्· केवलं प्रमाणाभावो व्यवहारानुरोधेश्च तदसिद्धवापि सिद्धेर्त् इति चेत् न तर्हि व्यवहारालंबनमपि विभागसंततो
नाव्यवहारालंबनमस्तीति चेत् नैतदेवं· यदि हि तंतुमात्रे व्यवहारनिवृत्तिः कथं तदाश्रयत्वदात्मको व्यापारः गाग्· अन्य एवासाविति
चेत् न तावत् जातिकृतमन्यत्वमुपलभ्यते व्यक्तिकृतं तु नाद्यापि सिद्धमिति ×१ तन्निमित्तांतरानपेक्षणात्· अपि च तंतुविनाशः १४
सामान्यतः तंतुविरहस्वभावो वास्यात्तद्विपरीतो वा आद्ये कथं तंतंतरं नहि सामान्यतो नीलमनीलं विरुद्धस्वभावमनीलांत

रं· द्वितीयेतु कथं तद्विरोधि· नहि नीलं सामान्यतो नीलांतरविरोधि विशेषमात्रस्यवायं विरोध इति चेत् तर्हि किं सामान्यतोऽनुभय
स्वभावस्यवनाशः ओमिति ब्रुवतोऽन्यतरमुपादायविना शब्दव्यवहारानुपपत्तिः सामान्यस्यालीकत्वात्· तच्चविरोधोपि किंकारि
ष्यतीति चेत् ऽवि·निमित्तानां विरुद्धधर्माध्यासेन भेदप्रसाधनात्तस्य तदाश्रयत्वात्· नन्वतिरिक्ताभावपक्षे यथा पटः प
टांतराभाववान् न तज्जातीयश्च पटाभावो वा पटविरोधी पटांतरसहचरितश्चेति न कश्चिद्विरोधः तथा कार्याभावपक्षे विभावय
तीति· नैतदेवं प्रतियोगिना हि तादात्म्यैकसंसर्गैकजातीयत्वानि नेष्यंते अप्रतियोगित्वप्रसंगात्· भिन्नकालत्वात्· सामान्य
तो विरुद्धधर्मसंसर्गाद्य· अप्रतियोगिना तु संसर्गको दोषः नहि भेदविजातीयैककालताः संसर्गविरोधिन्यः तादात्म्यं हि सं
सर्गविरुद्धं विरोधित्वं च ते च नेष्यत एव नापि बाधकानुरोधस्तदभावात्· ननु घटाभावे घटोस्ति न वा आद्ये घटवांस्तदभावः क
पालेऽस्तीति तान्यपि तद्वति प्रसज्येरन्· नास्तीति पक्षे नवस्थाप्रसंगः अभावांतरमंतरेणास्तित्वनास्तिताव्यवहारे भावांतरेपि त
थाप्रसंगः न भावांतरस्य सजातीयत्वेनाविरुद्धजातीयत्वात्· विरुद्धजातीयत्वे वा सजातीयत्वानुपपत्तेः अन्यत्वमात्रेणात
थाव्यवहारे तद्वत्यपि प्रसंगात्· अभावस्य तु विरुद्धस्वभावत्वेप्यभावान्तरानुभवतर्कयोरभावादिति भिन्नाभावजन्मनि घटता
दवस्थ्यं दोष इति चेन्न· तादवस्थ्यं हि यदि घटत्वमेवाभिमतमेव तत् न त्वभावजन्मनि घटैर्घटतानमभ्युपेतीत्यभ्युपगमः तत्का
लसत्त्वं चेन्न· तर्हि भावो जातः कालांतरे घटानवस्थानस्वभाव एव हि तदभावः अस्तु तर्हि निरुपादानत्वं बाधकं· जन्मन उपाद

बौद्ध नव्याप्तत्वादिति चेन्न। धर्मिग्राहकप्रमाणाभावात् भावावच्छेदाव्याप्तेः॥ एतेनाविरूपादेयत्वं व्याख्यातं· गुणादिसिद्धौ वानैकादिति
अस्तु तर्हि व्यापकत्वं ध्रुवभावित्वमिति चेन्न· अतादात्म्यादतत्कारणत्वाच्च· अस्मदादिशाविव्याप्तिग्रहेण साहित्यनियमेन· विरोधितयावि
७५ षमसमयत्वात्· नापि जन्मानन्तर्यनियमेन तदसिद्धेः॥ सिद्धौ वा तत एव क्षणभंगसिद्धेः। किमनेनाभविष्यता मानाश्रेणाव्यापकत्वम
स्तीति चेत् अस्तु नत्वेतावता हेतुत्वं तदनपेक्षत्वसिद्धिः॥ अद्यतनघटस्य श्वस्तनकपालमालम्बेवानैकांतात्· एतेन सापेक्षत्वे
व्यभिचारोपिस्यात् विनाशहेतूनां प्रतिबन्धवैकल्यसंभवात् इति परास्तं· कपालसंततिसमानदेशत्वाद्विनाशस्येति· अस्तु त योग ५
वा र्हि विरमतः पक्षः॥ तथाहि विनाशो न जायते इति अभावत्वात् जातो निवर्त्तते जातत्वात् घटवत् नैतदेवं प्रागभावो जायते अभावत्वा
द्विनाशत्वाद्वेति प्रध्वंसवत् घटवद्वेति· अजातो वा न निवर्त्तते अजातत्वात् आकाशवत् शशविषाणवत् वेति विदसाधनत्वात्।
किमेतेनांदूषणमिति चेत् भावावच्छिन्नव्याप्तिकत्वात् प्रयोजकत्वं· प्राक्प्रध्वंसाभावग्राहकप्रत्यक्षबाधः प्राक्पश्चात्कालयोर्का २५
नुभा ४ ज्जनप्रसंगः प्रतिकूलतर्कहतत्वं च· अथोन्मज्जने को दोष इति चेत् कालविच्छेदप्रत्ययस्याप्रमात्वप्रसंगः॥ अयथार्थत्वे तस्य द्विचंद्र
दर्शनैकान्तेवं द्रदेशादिविच्छेदवत् सतः कालाविच्छेदे [redacted] भावस्य प्राक्प्रध्वंससहवृत्तित्वेनाविरोधप्रसंगात् यथार्थत्वे भेदस्थितौ न त
दुन्मज्जनानुपपत्तेः॥ एतेन प्रागभावकाले प्रध्वंसोन्मज्जनं तत्काले च प्रागभावोन्मज्जनं इत्यपास्तं। भावदभावयोरुभयाविरोधिस्वभा
वत्वादिति॥ कुतः पुनः स्थिरसिद्धिः॥ प्रत्यभिज्ञानात्। क्षणिकत्वानुपपत्तेश्च लक्षणाभेदेन व्यभिचारिज्ञानीयत्वात्· प्रत्यभिज्ञानमप्र

मानमिति चेन्न· अवांतरजात्याभेदेनाव्यभिचारनियमात्· किं तर्हीति चेत्· विरुद्धधर्मासंसृष्टविषयत्वं· सिद्धं तत्र च· एवंभूतम
पि कस्यचिद्व्यभिचारोस्तीति चेन्न· विरुद्धधर्माध्यासे हि तस्यैकत्वप्रत्ययस्य व्यभिचारे सर्वत्रैकत्वोच्छेदप्रसंगात् तथा चानेकत्वमपि न
स्यादिति भवति किं चन॥ तस्माद्देशभेदेनो अवयवं विरुद्धधर्मसंसर्गस्तत्संसर्गे वावयवभेदव्याप्तिरिति भेदाभेदव्यवहारमर्या
दानिकं प प्रदीपकुम्भेषु निपुणं निभालयंतो भिन्नविरुद्धसंसर्गमीक्षामहे· अथ प्रत्यभिज्ञानमवधूय तत्र भेद एव वदंति चेत्ते इ
च्छिचेत्· कस्य प्रमाणस्य बलेनाश्रयनाशस्य कृताशननाशानिमित्तत्वेन विज्ञातत्वात् तस्य चानपेक्षणमनुपलब्धेः॥ यतिभिलप्योक्त
शेनरम पद्यमानत्वात्· पूर्वस्य नाशः तत्तस्योत्पादेन्यायसिद्ध इति चेत्· नन्वयं प्रत्यनीकधर्मसंसर्ग एव न दृष्टा न दृष्योराश्रयना
शानाशयोर्वा एकत्र तेजस्यनुपपत्तेः॥ सोयं घातं शिरःछेदे भिन्नदशाति विंवाति वचकं तु गयच्छती लोकिमत्रभूमः॥ भविष्यतितरीहि
हापि विरुद्धधर्मसंसर्गो दुरूह इति चेत्· अथ सहचार्यं स्फटिक इत्यत्र प्रमाणप्रतीतसंसर्गाणां विरोध एव न युज्यते प्रतीतविरोधा
नांसंसर्गः॥ अथागतीतस्वरूपविरोधसंसर्ग एव केचिदिति रुद्धतपासंस्पष्टनयावेति न प्रथमः॥ प्रागेव निराकृतत्वात्· न द्वितीयः· योग्या
नामनुपलब्धिबाधितत्वात्· अयोग्यानामपि कारणाद्व्याप्यव्यापकविगमविलोकनव्यावर्त्तितत्वात्· न तृतीयः॥ तस्मात्तिसं
जकतया सर्वत्रैकत्वोच्छेदप्रसंगादिति· एतेन प्रत्यभिज्ञानादेव· तक्षणाभागया स्पष्टानुमानेन स्थैर्यसिद्धिः॥ तथा हि विवादाध्यासि
तो भावः कालभेदेपि न भिद्यते· तद्देशेपि विरुद्धधर्मासंसृष्टत्वात्· यो यद्देशेपि न विरुद्धधर्मसंसृष्टो नासौ तद्देशे भिद्यते। यथा प्र

न

बौ.धि. निःसंबंधिपरमाणुभेदेप्येकःपरमाणुःतथाचायंविवादःआस्तितोभावःतस्मात्कालभेदेपिनभिद्यतेइति·अर्थमात्रोनकश्चिद्विप्रतिपद्यते
१६ पक्षधर्मतानुप्रसाधितैवेति। ।क्षणिकत्वानुपपत्तिश्चानुगतव्यवहारस्यान्यथासिद्धेःवादलिंगाद्विकल्पात्साधारणरूपमनु
परमापयंतीनतृणकुब्जीकरणेपिसमर्थाइत्यविवादंवास्यार्थसिद्धेःस्थिरास्थिरविचारःतस्मात्क्षणिकंवाज्ञानाकारोवावाह्यं
न वस्तुवेतिचपक्षपक्षाःतत्रनप्रथमःतद्वैतावदनुभवादेवतथाविधस्याप्यं·तस्यालीकत्वानुपपत्तेरवात्·तथात्वेवाप्रवृत्तिविरोधात्
नत्वलीकमनुभूयमानमर्थक्रियार्थीप्रवर्तते·अन्यानिष्टाभिस्फुरणान्नोभयोरेवइतिचेत्·एतदेवासत्·विधिरूपस्यैवस्फुरणात्·न
हिशब्दलिंगाभ्यामिहमणिधरेहेतोअग्निर्नभवतीतिस्फुरणमपितस्यान्निरस्तीति·यद्यपिनिषेधनमहंप्रत्येमीतिनविकल्पः
तथापिनिषेधनपदार्थोत्रेखस्वनिहसुःस्वरवः।नसनंतर्भाविताविवक्षोचतादिविकावार्थप्रतीतिर्नाम अतोयथासामान्यमहंप्रत्ये
मीत्यनुभवद्वाशाभावेविसाधारणाकारपरिस्फुरणोविकल्पधीःसामान्यबुद्धिःपरेचतान्निषेधप्रत्ययास्तितानिषेधनबुद्धि तथाप्र
रस्माकमितिचेत्·हंतसाधारणाकारस्फुरणोपिविधिरूपतयायदिसामान्यबोधव्यवस्थाकिमायातमस्फुरदभावाकारे
चेतसिनिषेधप्रतीतिव्यवस्थायाःनहिगौरयमितिविकल्पःकिंतुगौरयमिति[illegible]ततोननिषेधनमहंप्रत्येमीत्येवमाकारभा त्ये
वेपिनिषेधनाकारस्फुरणंयदिस्यात्·कोनिषेधप्रतीतिमपलपेत्·अन्यथात्वप्रतिभासेत्वगतीनिव्यवहृतिरितिगवाकारेपि
तस्मिन्नुरगबोधवत्स्यात्·नचानिषेधनमात्रप्रतिभासेपिप्रवृत्तिसंभवःनह्ययंघटोनास्तीत्येवघटार्थीप्रवर्त्ततेअपितुघटोस्तीतिअ १६

घटस्यैव निषेध इति प्रतीतौ नायं दोष इति चेन्न· घटनिवृत्तस्य प्रतिक्षेपेपि यमस्यैवासिद्धेः· तत्प्रतिक्षेपे तु कस्ततोन्यो विधिः नि
षेधप्रतिक्षेपस्यैवाविधित्वात्· निषेधेस्फुरतो गां बधानेति चोदितोश्वं बध्नीयादिति चेत्· भवेदप्येवं यद्यपश्वोपि गौः
स्यात् किंतु गौर्गौरश्वोश्व इत्यन्यथा निषेध्यावपि कुतस्तवाश्वासः निषेध्यत्वराश्वेदनवस्था निषेध्यनिषेधान्ततदधिक
रणानां स्वरूपसांकर्यप्रवृत्तिसंकरः स्या। स्वरूपभेदेनैव नियमे विधिमात्रप्रतिभासेपि तथा किं न स्यात् स्वरूपभे
देदवान्यापोहेन्यापोहरूपत्वात् विधेरिति चेन्न· अलीकपक्षे तदभावात्· तस्य स्वरूपविधावनलीकत्वप्रसंगात् स्वल
क्षणस्य चाविकल्पानारोहात्· अपि च गां बधानेति चोदितो गवादिजहत्तोनाश्वेतदप्रतीतेः यदि वाश्वत्वमुपलक्ष्यते
तदा तत्र प्रवृत्तस्तुस्तुरवेविगोरश्वादं प्रतीत्यैवानिर्वर्त्स्यतीति किमनुपपन्नं· स्यादेतत्· न ह्यनुभवमभिभूय भवितुं क्ष
माम् इति को विधिस्फुरतामपकुर्तां तदुपसर्जनीभूतस्तु निषेधो विस्फुरत्येव अन्यथा विशेषणवच्छेदकत्वानुपपत्तेः· न ह्य
न्यतो विशेष्यमव्यावर्त्य यतो विशेषणत्वं नाम न चान्यतो व्यावर्तनं व्यवच्छित्तिप्रत्यायनादन्यत्र· अतो यथेंदीवरपुंडरी
कादिशब्देभ्यो गुणीभूतनीलधवलादिविधिरेव प्रतीतिस्तद्वदन्यव्यवच्छेदस्तु तद्गर्भीकायमानस्तथा सर्वत्रेति चेत्· अ
स्तु तावदेवं विधिस्तु स्फुरतीत्यत्र संप्रति नो निर्बंधः अन्यथा व्यवच्छेद्यावच्छेदकयोरप्रतीतेरवच्छित्तिरपि न स्यात्· य

बौध्द
७७

थोत्पत्तादेरेवनीलाद्यप्रतीतौ न वा निषेध्यमस्पृशंती प्रतीतिर्निषेधं स्प्रष्टुमर्हति तस्यौ निरूपणाधीननिरूपणत्वात्· निषेधांत तत्१
रमेव निषेध्यामितरेतराश्रयप्रसंगात्· परानपेक्षनिरूपणो नु विधौ नायं निषेधः ततः प्रतीतेरितरेतराश्रयत्वमुक्तं संकेते
संपाद्येत्· परिहृतं ज्ञानाश्रयानद्वैभाम्यजनसंधीकरणं गोलकादिवत्स्यानां तरसंचारणतस्फुरतु विध्यलीकमिति
येत न व्याघातात्किं विहितिया लीकार्थः अतद्रूपपरावृत्तिमात्रेणालीकत्वे स्वलक्षणस्याप्यलीकत्वप्रसंगात्· रूपमा
त्रपरावृत्तौ तु कथं विधिर्नाम विधिं प्रारभ्यारोपितत्वाद्यमदोष इति चेत्स्वलक्षणस्य विधेर्विकल्पासंस्पर्शनात्· सामान्यविधे
रप्यत्राप्यनभ्युपगमात् पारिशेष्यादलीकविधौ विरोधस्यैव स्थितेर्भेदाग्रहाद्विधिव्यवहारमात्रमेतदिति चेत्सत्यं भवेदे
तद्यदि स्वलक्षणमपि विधिविलमपरायपरिस्फुरेत् यदि चालीकमपि निषेधरूपतां परिहृत्य चकासीत· तयो[illegible]
वमुभयोरपि निरंतरतया ग्रकारांतरमुपाददानायथनात्· अप्रथमेत्स्यासंभवात्स्व· काल्पनिकस्याप्यरांविभा
वः स्यात्· एतस्मन्नेति निहितः कुठारः साधारणं चरूपं विकल्पगोचरेण चालीकं तथा भवितुमर्हति न[illegible] स्वहिदेशका
लानुगमो न स्वाभाविकस्तुछ्वात्तन्न काल्पनिकत्वस्याक्षणिकत्वात् नारोपितोन्यत्राप्यसिद्धेः भेदाग्रहादेकत्व राम४
मात्रमनुसंधीयत इति चेत्तन्न स्वाभाविकस्यभेदस्याभावत्वात्· भावे वा काल्पनिकत्वव्याघातात्· परमार्थोसत्त्वप ७७

रमार्थाभेदस्य पर्यवसायित्वात्। आरोपितस्याग्रहानुपपत्तेः अभेदारोपानवकाशाच्च· आरोपितासत्त्वस्य परमार्थ
सत्त्वप्रसंगात्· वस्तुः कोटिविनिर्मुक्तस्यातिप्रसंजकत्वात्· नदग्रहस्य त्रैलोक्येपि सुलभत्वात्· अन्यत्र परमार्थभेदग्र
हीतौ कथमभेदआरोप्यतामिति चेत्· एवं तर्हि यस्य प्रतिभासे यन्नारोप्यते नियमेन तस्यैवाप्रकारेण तदारोप्यं न
तु तन्नाशकमात्रमतिप्रसंजकत्वात्· अतएव न व्यधिकरणस्य सतोऽसतो वाभेदस्याग्रहो भेदारोपोपयोगीति
नापि त्याज्याद् अन्यापोहसिद्धिः तस्याभावात्· यद्वा भावाभावसाधारणं तदन्यव्यावृत्तिनिष्ठं यथा मूर्त्तत्वं· यच्चासत्ताव
लक्षणानां सालक्षण्यप्रवर्त्तकहेतुस्तदन्यव्यावृत्तिरूपा सा नित्यायोग्यप्रतिबंधेन कालकल्पयापदेशात्· नहि प्र
थमानस्यानिष्ठा न्यायसाधनानामप्रथमस्फुरितेन विधितमेवेति निष्कलं प्रयासः यदा वा नलीक एव एवं
न्यायस्यानुभवात्रासत्त्वतदेकरूपालीके नहि तस्याप्रतीयमानमपि किंचिदस्ति यन्न्यायेन साध्यमित्युक्तं किं
चेदं भावाभावसाधारण्यं न तावदुभयरूपत्वं विरोधात्· न तद्धर्मत्वमनभ्युपगमात्· नहि गोत्वमभावस्यापि धर्म
स्तदभ्युपगम्यते न तद्धर्मित्वमनेकान्तत्वात्· व्यक्तेरपि हि भावाभावधर्मवत्तालीन निषेधैकरूपेति न तदुभय
साधारण्यमसंभवात्· अतान्नितरस्यैव तथात्वे साध्याविशेषात्· नाप्यास्तिनास्तिसाधारण्यं विरोधात्· अन्यथासिद्ध
श्च नहि यदस्तीति तदेव नास्तीति प्रत्ययगोचरः स्यात्· प्रकारान्तरमाश्रित्य स्यादेवेति चेत्· एवं तर्हि तमेव प्रकार

बौ.५
१५

मेस्तु पातयविधिबन्धस्यार्थाकाङ्क्षोऽविरोधो येन प्रतिबंधः । असिद्धेः । तस्य विधिरूपतायामस्ति नाकिमधिकमुपनेयमिति येन
निषेधरूपत्वेपि नास्ति नाकिमधिकमुपनेयमिति समानम् । अत एव स्वाधारण्यमिति येन । तथापि किमेतदुभयात्मकमु
भयपरिहारो वेत्यप्रागभावेन तत्तस्मादस्ति नास्त्यनुपाधेस्तदेव संप्राप्तेः । गागोपाधिनियमो वेति सार्थकत्वं तयोः
तदेनहि धावावितुल्यं । शान्तागोषविशेषत्वाभावे नीकपक्षे कोपाध्यन्तरविधिः । तन्नियमो वेति विशेषदोषः । ततो गोत्व
दोगोत्वाकृतिकि हृद्याक्रमाभाभिधानपर्यवसितः । तासु विशेषकांक्षाकालदेशतयानार्थाकिंवार्थी सार्थनामनुभवनुमी
यातद्रुति । प्रतिपत्ताविशेषाकांक्षा । सा च तस्याः कांक्षा अस्ति गोत्वे कालाक्षीधेनुर्घटो श्रीमहाघटानन्दिनीत्यादिप्र
बौ नियामकेऽर्थि धापकैर्निवार्यते इति विधेर्नकश्चिद्विशेषः । गोत्वविशिष्टसदसत्प्रक्रिमात्रप्रतीते सदेव तस्मादि
पदप्रयोगवैयर्थ्यमिति येन । तावन्मात्र[illegible]गतिपत्यर्थमेतत् । अधिकं प्रतिपत्स्यर्थं तु तदुपयोगस्तस्य प्रागप्रतीतेरि
त्युक्तं । यत्तु निपुणम्मन्यो विकल्पमेव वक्ष्यति स्म । यज्ज्ञानं यत्तद्वाचाभावसाधारणप्रतिभासनं तेन तस्य विशेषधि
त्वं । यथा गोज्ञानस्याश्वे नेत्यादि । न यद् गोविकल्पस्याश्वविषयत्वमेतद्वाचाभावसाधारण्यं गव्यपि वा त्येतथा न रामः
नं च आत्मन इतरभिन्नत्वेनानुमानं तच्च भेदप्रतियोगीतरज्ञानसाध्यं तथा चेतरे एव के तदर्थं पदार्थनिरूपणं संक्षेपतः
सामान्यतः पदार्थो द्विविधः भावोऽभावश्च भावः षड्विधः द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् तत्र द्रव्यत्वगुण
त्वकर्मत्वानि जातयः सामान्यत्वादीन्युपाधयः द्रव्याणि नव पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि आकाश
त्वकालत्वदिक्त्वान्युपाधयः अन्यानि जातयः तत्र रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगु
रुत्वद्रवत्वसंस्काराश्चतुर्दश गुणाः पृथिव्यां तत्रैव गंधं विहाय स्नेहं विनियोज्य चतुर्दश जलस्य रूपस्पर्शसंख्यापरिमाण १

आत्मा इतरभिन्नः
नित्यज्ञानादिमत्त्वा
तथैवैषं तन्नैवं
[illegible]

४१२०

श्रीः॥ सुपर्णं वैनतेयंच नागारिं नागभीषणाम्· जितांतकं विषारिंच अजितं विश्वरूपिणां॥१ गरुत्मंतं खगश्रेष्ठं तार्क्ष्यं कश्यपनंद
नं· द्वादशैतानि नामानि गरुडस्य महात्मनः॥२ यःपठेत्प्रातरुत्थाय स्नाने वा शयनेपि वा· विषंनाक्रमते तस्य न च हिंसं
तिहिंसकाः॥३ संग्रामे व्यवहारे च विजयस्तस्य जायते· बन्धनान्मुक्तिमाप्नोति यात्रायां सिद्धिरेव च ४ इति मंत्रदेवप्रका
शिकायां गरुडस्तोत्रं सम्पूर्णं शुभम्॥

४९२१

दीधितेः
व्याधिकरणधर्म.
सिंहव्याघ्रलक्षणस्य.
अवच्छेदकत्वनिरुक्तेर्ग्रन्थस्य
च.

पत्रः ८

अथेदं वाच्यं ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वाभावो घट एव प्रसिद्धः. अधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात्. न चैवं घट एव व्यभिचारः. साध्यतावच्छेदकावच्छिन्न
प्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारः. न च वा वाच्यत्वाभावस्यादर्शनात् इति चेत् न हि तादृशसाध्याभाव सामानाधिकरण्यं हि व्याप्तिः. तथा चाप्रसिद्धिः. प्रतियोग्यवृत्तिधर्मेण प्र
तियोगितावच्छेदकः इति चिन्तामणौ. तद्विशिष्टज्ञानस्याभावज्ञानकारणत्वात्. अन्यथा निर्विकल्पकादपि घटो नास्तीत्यापत्तेः. गवि शशशृङ्गाभावप्रतीतेरसिद्धेः. शशशृङ्गं ना
स्तीति च शशीयशृङ्गाभाव इत्यर्थः इति च.

दी॰ग॰
१

श्रीगणेशाय नमः ॥ समवायितयेति. वाच्यत्वं न यथा समवायि तथा वक्ष्यते घटादि समवायितयेत्यर्थ इत्यप्याहुः. प्रमेयसाध्यके च भावत्वेनाभावा
नाम्. अभावत्वेन भावानाम्. वृत्तित्वेन निर्वृत्तेः. अवृत्तिमात्रवृत्तिगगनत्वादिना. विरुद्धरूपत्वपत्वाभ्यां च सर्वत्र प्रमेयमात्रसाध्याभावः सुलभः.
ननु प्रसिद्धाभावविदमेवात्र व्यभिचरितत्वं न तथाहि यत्समानाधिकरणः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभा
वाः प्रतियोगिसमानाधिकरणत्वं तत्त्वं सर्वत्र वाच्यत्वाद्यभावस्य तथात्वाभावात्तोपादानम्. अत एव भूतत्वमूर्त्तत्वोभयवान्मूर्त्तत्वादित्यादौ द्वि
त्वावच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येऽपि भूतत्वमनोन्यत्वाद्यभावस्य तथात्वान्नातिप्रसंगः. साधनसमानाधिकरणस्य गोत्वा
द्यभावस्य तत्तत्साध्यवत्त्वस्य भावस्य चानथात्वात्. साध्यतावच्छेदकेत्यादि येन संबन्धेन हेतुः तेनैव तदधिकरणं बोध्यं तेनात्मत्वे साध्ये समवा
येन हेतौ ज्ञानस्य विषयतयाऽधिकरणे घटादौ वर्त्तमानस्य साध्याभावस्यानथात्वेऽपि न क्षतिः. एवं द्रव्यान्तरेऽपि संबन्धभेदेन वा नो दोषः. सं
बन्धैक्यविवक्षया निरसनीयः. रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं सद्धेतुरेव. प्रलये परमाणुत्पत्तिकाले चावयविनि तत्सत्त्वात्.
न च प्रतियोगित्वं तत्प्रागभावयोरत्यन्ताभावविरोधित्वे मानाभावात्. अत एव अन्नरूपपाकरूपं रूपं नास्तीति प्रत्ययः. न चैवं रक्तिम
ध्वंसावगाही पूर्वापररक्तिमध्वंसप्रागभाववति रक्तेऽपि तथाप्रत्ययप्रसंगात्. तत्सामानाधिकरण्ये च स्वविशिष्टहेत्वधिकरणावच्छेदेन
बोध्यम्. तेन गोत्वजन्यद्रव्यत्वप्रलयावृत्तित्वादिना गवादेरभावस्य गवाद्यनधिकरणधर्म्मावच्छेदेन तद्वृत्तिकाले महाकाले वा वृत्तावपि प

द्गोत्वं तद्गौ यत्र कालत्वं तत्र जन्यद्रव्य द्रव्यम्· प्रलयावृत्तिर्वृत्त्यादेर्नातिप्रसंगः हेतुमति प्रलये तत्सामानाधिकरण्याभावात्· स्वविशि
ष्टेति विशेषणात् कपिसंयोगाभाववान्मेयत्वादित्यादौ संयोगाद्यात्मकस्य साध्याभावस्य सकलहेत्वधिकरणवृत्तित्वेपि नाव्याप्तिः· जला
दिवृत्तित्वविशिष्ट गोत्वाद्यभावस्याभावस्तु जलत्वाद्यभावो ननु धूमाद्यभावो जलादावपि तदभावप्रत्ययप्रसंगात्· यत्समानाधिकरण
नां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावदभावानां प्रतियोगितावच्छेदकावच्छिन्नसमानाधि
करण्यं तत्त्वं वा तत्· ज्ञेयत्वत्वादिना वाच्यत्वादिनामभावः सुलभ एव· शेषं दर्शितदिशावसेयमत आह प्रतियोग्यवृत्तिश्चेति· केचित्तु
व्याप्यवृत्तेर्हेतुसमानाधिकरणसाध्याभावस्य प्रतियोगिताया अनवच्छेदकम्· हेतुसमानाधिकरणस्य व्याप्यवृत्तेः· प्रतियोगिव्यधि
करणस्य वा· अभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिक
रण्यं व्याप्तिः· एवं च व्याप्तेरव्यभिचारि सम्बन्धरूपतापि सङ्गच्छते· हेतौ साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्ति
त्वस्यैव साध्यतावच्छेदके हेतुमन्निष्ठसाध्याभावप्रतियोगितानवच्छेदकत्वस्यापि व्यभिचारत्वात्· अवच्छेदकत्वञ्चेह तद
न्यव्याप्याधिकरणत्वं तेन विशिष्टवह्न्यभावस्य ह्रदत्ववह्नित्वोभयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेपि व
ह्नित्वस्य न क्षतिः· सत्त्ववति गुणादौ संयोगाद्यभावोपि व्याप्यवृत्तिः· वक्ष्यमाणं वा प्रतियोगितावच्छेदकानतिरिक्तवृ

सि.ल.टी.
२

नित्वमेव न त्ववच्छेदकत्वमित्यपि बोध्यम्. भवति च गुणत्वगुणावृत्तित्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिता-
क साध्यवदन्याभावप्रतियोगितावच्छेदकं गुणत्वाद्यनतिरिक्तवृत्त्येव संयोगत्वमित्याहुः. साध्यतावच्छेदकावच्छिन्नसा-
ध्यसामानाधिकरण्यावच्छेदकस्वसमानाधिकरणसाध्याभाववत्त्वकत्वं यत्समानाधिकरणसाध्याभाववत्प्रमायां साध्य-
वत्ताज्ञानप्रतिबन्धकत्वं नास्ति तत्त्वं वा व्याप्तिरिति तु न युक्तं सर्वत्र साध्याभाववत्पदवैयर्थ्यात्. यत्तु साध्याभाववति य-
द्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं व्याप्तिरिति तन्न. अनुमित्यविरोधित्वज्ञानस्यानुमितिजनकत्वे साध्याभावव-
द्वृत्तित्वज्ञानस्यानुमित्यविरोधितया व्यभिचारिण्यतिप्रसंगात्. केचित्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजा-
तीयाधेयतदधिकरणवृत्तित्वाभावास्तद्वत्त्वं तत्त्वम्. साजात्यं च समानासमानाधिकरणधर्मावच्छिन्नप्रतियोगिता-
कत्वान्यतररूपेण. साध्याभावश्च पूर्वोक्तद्वितीयरीत्या प्रत्येकं यो व्याप्यवृत्तिश्च प्रतियोगितावच्छेदकावच्छिन्नप्रतियो-
गिव्यधिकरणो वा. तेन तत्तत्साध्यकेरव्याप्यवृत्तेर्वा साध्यस्याभाववति वृत्तावपि हेतोर्न व्याप्तिः. तद्वद्वृत्तित्वाभाव-
श्च तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताको बोध्यः. तेन साध्याभाववद्वृत्ति-
विशेषवृत्तित्वस्य पार्थिवत्वादिविरोधितस्याद्वृत्त्याद्यवच्छिन्नस्य वा साध्याभाववद्वृत्तित्वस्याभावमादाय नातिप्रसंगः.

अत्र च हेतुतावच्छेदकसंबन्धेन साध्याभाववद्वृत्तित्वं बोध्यं तेन वह्न्यभाववति स्वावयवे धूमस्य वृत्तावपि न दोषः॥ इत्थञ्च
साध्याभावोपि हेतुतावच्छेदकसंबन्धेन कस्मिंश्चिदधिकरणे वर्त्तमानो ग्राह्यः॥ तेन जातिमान्सत्त्वादित्यादौ हेतुतावच्छे-
दकसंबन्धेन साध्याभाववद्वृत्तित्वस्याप्रसिद्धावपि न क्षतिः॥ यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तेषां सजाती-
यस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन धर्म्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते त-
द्रूपवत्त्वं तत्त्वं साधनस्य तादृशाभावप्रतियोगित्वं तदवच्छेदकत्वं वा. साधनतावच्छेदकस्येति तु न वक्तव्यम्. द्रव्यं सत्त्वा-
दित्यादौ सत्त्वादेस्तादृशाभावव्यापकगुणकर्मान्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नप्रतियोगिताकतादृशाभावप्रतियोगि-
त्वादतिव्याप्तेः॥ ज्ञेयं प्रमेयादित्यादौ प्रमेयत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वादव्याप्तेश्च. प्रमेयत्वव्यधिकरणप्र-
तियोगित्वस्याप्रसिद्धेः॥ यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तत्प्रतियोगितावच्छेदकेन धर्म्मेण यद्रूपावच्छिन्नं
प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं वा तत्त्वमित्याहुः॥ परे तु वृत्तिमद्भिन्नयो यावन्तः साध्याभाववद्वृत्तित्वाभावास्त-
द्वत्त्वं व्याप्तिः॥ येन संबन्धेन हेतुता तेनैव वृत्तिमत्त्वमपि बोध्यम्. तेन व्यधिकरणधर्म्मावच्छिन्नवह्न्यभाववति संयोगे-
न पाटजनितस्तदभावस्य जात्यादौ वर्त्तमानस्य धूमादेरवसत्त्वेपि न क्षतिः॥ साध्याभावश्च पूर्ववद्बोध्यः॥ तद्वद्वृत्तित्वाभा

दि.व्या.
३

ऽपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकः तत्र साध्याभाववद्वृत्तित्वातिरिक्तेन समानाधिकरणेन साध्याभाववद्वृत्तित्वघटितानागधर्म्मेणानवच्छिन्नप्रतियोगिताको बोध्यः। तेनालोकाभाववृत्तित्वेन रूपेण यो वह्निसामान्याभाववद्वृत्तित्वस्य यच्चेन्धनत्वाद्यवच्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभावस्तस्य धूमादौ स्वनिष्ठसाध्याभाववद्वृत्तित्वविरहस्य च हेत्वन्तरवृत्तेः स्वस्मिन्नसत्त्वेऽपि न क्षतिरित्याहुः। अन्ये तु वृत्तिमद्वृत्तयो यावन्तः साध्याभावसमुदायाधिकरणवृत्तिताभावास्तद्वत्त्वं तादृशवृत्तिताभावश्च स्वव्यापकतादृशवृत्तित्वत्वव्यापकप्रतियोगिताको बोध्यः। प्रयोजनं चोक्तप्रायम्। साध्याभावाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्वाधिकरणधर्मावच्छिन्नस्यैवाभावस्य वृत्तिमद्वृत्तित्वाद्व्यभिचारिण्यतिव्याप्तेः। समुदायेति। साध्याभावश्च साधनतावच्छेदकसंबन्धेन बोध्यः। तेन समवायेन वह्नेः साध्यत्वे धूमे संयोगेन च तथात्वे वह्न्यवयवत्वे पर्वतवृत्त्यवयवसंयोगे च पर्वतस्य वह्न्यवयवस्य च समवायावच्छिन्नवह्न्यभाववद्वृत्त्यानधिकरणत्वेऽपि नातिव्याप्तिः। तथा स्वव्यापकीभूतसाधनतावच्छेदकव्यापकप्रतियोगिताकोऽपि बोध्यः। तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्वृक्षादिभिन्नत्वाद्यवच्छिन्नप्रतियोगिताकाभावकूटाधिकरणमप्रसिद्धं तत्र सद्धेतौ पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववत्तिसामान्यादेरेव वर्त्तमानेऽन्त्यप्रकारकप्रमाविषयत्वादौ च नाव्याप्तिरतिव्याप्तिर्वा। नाप्यभावत्वादिना अभावादौ साध्ये तत्तत्साध्याभावकूटाधिकरणाप्रसिद्ध्या अव्याप्तिरित्याहुः तन्न। द्रव्यत्व

पृथिवीत्वोभयवान्द्रव्यत्वादित्यादौ तदुभयान्यतरत्वावच्छिन्नाभाववति द्रव्यत्वादेर्वृत्तेरतिव्याप्तेः· अपि चेदं पृथिव्यन्यत्व
विशिष्टद्रव्यत्ववद्द्रव्यत्वादित्यादौ द्रव्यत्वत्वावच्छिन्नाभावकूटाधिकरणगुणौघवृत्तित्वस्य द्रव्यत्वे सत्त्वादतिव्याप्तेः· द्रव्य
त्वत्वावच्छिन्नप्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात्· किञ्च रूपाभाववत्साध्यके सद्धेतौ साध्याभाव
समुदायनिविष्टसकलरूपसमष्ट्यधिकरणाप्रसिद्धेः· यावतामभावानामेकाधिकरणं तावतां समुदाये विवक्षितेपीदं पृ
थिवीवृत्तिगुणरूपत्वं सत्तान्यपृथिवीसमवेतभिन्नत्वं वा वायुत्वाद्रूपवदन्यत्वाद्वेत्यादावतिव्याप्तिः· तन्न तद्रूपाभावस्तो
मस्य नियमतो रूपादिघटितत्वेन तद्वृत्तितद्धेतोरवृत्तेः· वस्तुतो निखिलानामेव रूपाणां तद्रूपाभावसहस्रसमानाधि
करणत्वात्समानाधिकरणयावदभावाधिकरणाप्रसिद्धिर्दुर्वारैव· किञ्च हेतुतावच्छेदकसंबन्धेन यः साध्याभाववति
वृत्तिस्तदभावो वक्तव्यः· अन्यथा धूमादावव्याप्तिः· साध्यतावच्छेदकसंबन्धेन साध्याभाववति कालादौ वृत्तिमन्मात्र
स्यैव वृत्तेर्व्यभिचारिण्यतिप्रसंगो वा· तथा च सत्तादिसाध्यके संयोगेन समवायेन वा हेतावव्याप्तिः साध्याभाववति ते
न संबन्धेन वृत्तेरप्रसिद्धेः· साधनसमानाधिकरणत्वेन साध्याभावो विशेषणीय इति चेद्धेतोरुच्यतां तथापि भूतत्वमू
र्तत्वयोरन्यतरत्वेनाभावे साध्ये स्पर्शवदन्यत्वादावतिव्याप्तिः· तादृशसाध्याभावसमुदायवति पृथिव्यादौ तस्या वृत्तेः·

किंच महाकालान्यत्वादिसाध्यके व्यभिचारित्वं कालिकविशेषणाहेतावतिव्याप्तिः॰ तादृशसाध्याभावसमुदायवति महाकाले तेन संबन्धेन वृत्तिमन्मात्रस्यैव वृत्तेः॰ एतेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकव्याप्यवृत्तित्वसमानाधिकरणयावदभावाधिकरणवृत्तित्वाभावा यावन्तो वृत्तिमद्भिन्नयत्सत्त्वं व्याप्तिः॰ केवलान्वयिनः संयोगाद्यभावस्याभावाः संयोगादयो न व्याप्यवृत्तयः॰ एवं साध्यस्य गुणसामान्यस्याभावो द्रव्यत्वाधिकरणेऽप्यनिकालावच्छेदेन वर्त्तमानोऽपि न व्याप्यवृत्तिः॰ उक्तरूपावच्छिन्नप्रतियोगिताकः क्वचित्प्रसिद्ध्यादिसंपादकाः पुनरभावा न हेतुसमानाधिकरणाः॰ उक्तसमुदायाधिकरणवृत्तित्व तदभाववृत्तिमत्त्वानि पूर्वोक्तरीत्याप्रत्येतव्यानीत्यादिकमपास्तम्॰ नहि विशिष्टेति विशेषणतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वात्॰ अभावप्रत्यये हि घटत्वादिविशिष्टस्य घटादेः प्रतियोगित्वमवगाहमानो विशेषणस्यापि घटत्वादेस्तदवच्छेदकत्वमवगाहते न स्वातन्त्र्येण घटो नास्तीत्येव प्रतीतेः॰ नह्यभावप्रत्ययो यद्यधिकरणधर्मेण विशिष्टप्रतियोगिनं नावगाहते नावगाहत एव तदा तस्यापि प्रतियोगितावच्छेदकत्वम्॰ अभावगाहते न हि भ्रम एव न च नञोऽर्थसिद्धिरिति भावः॰ यदि पुनरानुभविको लोकानां स्वरसवाही घटत्वेन घटो नास्तीत्याकारप्रत्ययो न तदा तादृशाभावनिवारणं तु गौरवेणापि न शक्यमिति मन्तव्यम्॰ ॥शिवार्पणमस्तु॥

प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नंयन्नभवतितेनसमंतस्यसामानाधिकरण्यंव्याप्तिः

श्रीः॥ प्रतियोग्यसमानाधिकरणेति. प्रतियोग्यसमानाधिकरणयद्रूपविशिष्टसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकोयोधर्मस्तद्धर्मावच्छिन्नेनयेनकेनापिसमंसामानाधिकरण्यंतद्रूपविशिष्टस्यतद्धर्मावच्छिन्नयावन्निरूपिताव्याप्तिरित्यर्थः. दण्डादौसाध्येपरंपरासंबन्धेनदण्डत्वादिरूपेणसाध्यतावच्छेदकमनोनाव्याप्तिः. इत्थंचेदंद्रव्यंगुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौसत्त्वाधिकरणगुणादिनिष्ठात्यन्ताभावप्रतियोगित्वेऽपिद्रव्यत्वादेर्नव्याप्तिः. साधनस्यविशिष्टसत्त्वादेर्गुणादावृत्तेः. सामानाधिकरण्यव्यक्तीनांभेदेऽपिनिरूपकतावच्छेदकस्याधिकरणतावच्छेदकस्यैक्याद्व्याप्तेरैक्यंवस्तुतस्तुधूमत्वविशिष्टव्यापकवह्निसामानाधिकरण्यस्यरासभादिसाधारणत्वाद्धूमत्वादिमन्निनादृशसामानाधिकरण्यंनतदितिधूमत्वादिर्नव्याप्तिः. आद्याभिन्नाद्द्वितीयात्त्वभिन्नेनेतिध्येयम्. अयंकपिसंयोगीएतद्वृक्षत्वादित्यादिसंग्रहायसमानाधिकरणंतेन. यत्तुइदंसंयोगिद्रव्यत्वादित्यत्राव्याप्तिवारणायतत्तत्संयोगस्यशाखावच्छेदेनवृत्तेर्वृक्षत्वावच्छिन्नेदेशेसाध्याभाववृत्तौविरोधाभावात्तत्रचातीन्द्रियस्यापिसंयोगस्यसत्त्वात्परितःप्रतियोग्युपलब्धेर्दोषाद्वृक्षेनकपिसंयोगइत्यादिनाध्यक्षमितितन्न. संयोगसामान्याभावेमानाभावात्. नचयोयदीययावद्विशेषाभाववान्सतत्सामान्याभाववानितिव्याप्तेर्यावत्संयोगाभावएवमानंयत्तदर्थयोरननुगमात् एकावच्छेदेनयावद्विशेषाभाववत्त्वस्योपाधित्वाच्च. एतेनायंसंयोगसामान्याभाववान्संयोगयावद्विशेषाभाववत्त्वादितिपरास्तंव्यर्थविशेषणत्वादप्रयोजकत्वान्निर्गुणत्वादेरुपाधित्वाच्च. नचप्रतियोग्यनवच्छेदकतयैववृक्षत्वादेरभावावच्छेदकत्वंगुणाद्यनवच्छेदकप्रमेयत्वादेस्तदभावावच्छेदकत्वप्रसंगात्. यथाचघटपूर्ववर्त्तित्वस्यप्रतिदण्डंवह्निसामानाधिकरण्यस्यवाप्रतिधूमंभिन्नत्वेऽपिदण्डत्वंधूमत्वंवातत्सामान्यस्यावच्छेदकं

=

दी॰ सि तथा संयोगसामान्यस्यावच्छेदकद्रव्यत्वादिकमित्यस्यापि सुवचत्वादिति संप्रदायविदः॥ नवीनास्तूत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रलयाव
५ च्छेदेन गगनादौ संयोगस्य सामान्याभावो वर्त्तते तथा धूमवत्यपि विरलोदकस्य ह्रदस्य पर्वते नितम्बे तु नास्ति नो न शिखरे इति प्रतीतेः संयोगेन द्रव्यस्याव्या
१ प्यवृत्तित्वाद् इतरमाप्यवृत्तित्वेऽतिमतो व्याप्यवृत्तित्वस्यात्यन्तसंभावितत्वात्· एवं प्रतियोगिमतोरपि देशकालयोर्देशकालभेदावच्छेदेन तदभावः त
था च तत्तत्साध्यकाव्याप्तिवारणाय तत्तोपादेयं च सर्वथैव व्याप्यवृत्तिसाध्यके साध्यतावच्छेदभेदेन व्याप्तिभेदादिति वदन्ति· प्रतियोग्यसमानाधिक
रणत्वं च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यं तेनायं गुणकर्मान्यत्वविशिष्टसत्तावान् जातिमत्त्वाद् ज्ञानत्वमूर्त्तत्वोभयवान्मूर्त्तत्वादित्यादौ ना
तिप्रसङ्गः॥ न चोभयत्वमेकविशिष्टापरत्वं विशिष्टं च केवलात्स्यादिति तदभावो मनसि सहजत एव प्रतियोगिसमधिकरण इति वाच्यम्· उभयत्वं हि
विशिष्टानतिरिक्तं न वा तत्त्वावच्छिन्नाभावस्तदवच्छिन्नाभावाद्विशिष्टाधिकरणेऽपि घटत्वपटत्वयोरुभयत्वस्योभयत्वेन तदभावस्य प्रत्यक्षसिद्धत्वा
त्· न च तत्र व्याप्तिरेवोभयत्वाधिकरणस्य मूर्त्तत्वस्य मनसि सत्त्वादिति वाच्यम्· तथात्वेऽप्युभयत्वेन रूपेण तत्रासत्त्वान्नात्रोभयत्वमिति प्र
तीतेर्दुर्वारत्वात्· अत्यन्तपदं चात्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्यात्यन्ताभावत्वनिरूपकप्रतियोगितायाश्च ला
लाभाय· अन्यथा सर्वस्यैवाभावस्य स्वसमानाधिकरणाभावान्तराभिन्नत्वात्तद्देशस्य स्वस्वरूपानतिरेकतया प्रतियोग्यसमानाधिकरणत्वस्यै
व दुर्लभत्वापत्तेः॥ सर्वेषामेवाभावानां हेतुसमानाधिकरणात्यन्ताभावत्वनिरूपकप्रतियोग्यसमानाधिकरणात्यन्ताभावान्तराणमवृत्तस्य भे
दस्य प्रतियोगित्वादभावसाध्यकाऽव्याप्त्यापत्तिरिति संप्रदायः॥ अथ यद्गोमत्तत्तद्गोमदित्यत्रातिव्याप्तिः प्रलयस्य गोध्वंसवत्त्वेन गवात्यन्ताभावान

५

धिकरणत्वात् संसर्गाभावमात्रोक्तावपि यदा स्यात् तदा द्व्यणुकं यदाऽदृष्टं नदाजन्यं ज्ञानं दुःखं वा परस्य यस्मादृष्टं तस्यानश्यं ज्ञानमित्यादावतिव्याप्तिः॰
द्व्यणुकत्वादेः द्व्यणुकादिभिन्नत्वेऽप्रलयादिनिष्ठध्वंसप्रागभावप्रतियोगितानवच्छेदकत्वात्. न हि तयोः सामान्याभाववत्त्वमतेऽपि एकविशेष
प्रागभावविशेषान्तरध्वंसवत्यपि समये सामान्यावच्छिन्नध्वंसप्रागभावयोः संभव इति चेन्न. प्रतियोगिमत इव तद्ध्वंसादिमतोऽपि कालस्या
त्यन्ताभाववत्त्वे विरोधाभावात्. अन्यथात्यन्ताभावस्य कालमात्रावृत्तित्वप्रसंगात्. इयांस्तु विशेषो यदेकस्य देशभेदावच्छिन्नं तथात्वमप
रस्य यद्रूपावच्छिन्नमिति दिशि कालस्येव कालेऽपि देशस्यावच्छेदकत्वात्. नन्वेवं यत्कालेनाभावस्य प्रतियोगिव्यधिकरणत्वात्. न च संसर्गा
भावविशेषोऽत्यन्ताभावः संसर्गाभावत्वं च संसर्गारोपजन्यप्रतीतिविषयाभावत्वरूपं न ज्ञानत्वाघटकं नियमघटितमिति वाच्यं तद्रूपस्य प्र
तीत्वरूपनियमस्य तत्र घटकत्वात्. एवं तत्र नियमान्तरस्याप्रवेशेऽपि न क्षतिरित्याहुः. वक्ष्यते च नियमाघटितमेव संसर्गाभावादिलक्षण
मनुपदमेव विवेचयिष्यते. संसर्गाभावत्वप्रवेशप्रयोजनविरहोऽव्याप्तिश्च. अथ ज्ञानवान्मनस्त्वात् विशेषगुणवान्मनोऽन्यद्रव्यत्वात् ज्ञातिमान्मा
वत्वादित्यादौ समवायेन ज्ञानादेः साध्यतायामतिव्याप्तिः. साध्यशून्यानामपि हेतुमतां विशेषणत्वविशेषणतैकार्थसमवायैः साध्यवत्त्वात्. मेवं
प्रतियोगितानवच्छेदकसंबन्धेन प्रतियोगिनो यदधिकरणं संबन्धि वा तद्वृत्तित्वाभावस्योक्तत्वात्. भवति चैवमन्योन्याभावोऽपि प्रतियोग्यसमा
नाधिकरणस्तद्विशिष्टस्य च हेत्वधिकरणवृत्तित्वं वाच्यं तेन नाव्याप्यवृत्तिसाध्यकासंग्रहः. तद्वृत्तिभिन्नत्वं तु नार्थः अव्याप्यवृत्तिसाध्यक

व्यभिचारित्वनिप्रसंगात् । अत्र च सामानाधिकरण्यवतो ननुस्वभाववत्त्वं उक्तौ निरुक्तार्थे चोपपादितत्वादित्यस्वरसात्प्रतियोगिवैय्यधिकरणेत्यादिवि
शेषणं वक्ष्यति तन्मते स्वाधिकरणेवोध्यं प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावेतिप्रत्यभावात्तन्निष्कर्षः ॥ ननु प्रतियोगितावच्छेदकाव
च्छिन्नस्य पक्षसत्त्वस्य चित्तत्सामान्यस्य वा प्रतियोगितावच्छेदकीभूतपर्याप्तिविदवच्छिन्नस्य वानधिकरणत्वं नमाये ऽव्याप्यवृत्तिसाध्यकाव्याप्तिः ।
एकप्रतियोग्यधिकरणस्यापि तद्घटान्तरानधिकरणत्वाद्द्वितीये संयोगसामान्याभाववानुक्तत्वाभाववान्वा सत्त्वादित्यादावतिव्याप्तिः सा
ध्याभाववतो द्रव्यस्य तत्प्रतियोगिसंयोगपावच्छिन्नविशेषाभाववत्त्वान्नित्यत्वादिविशिष्टद्रव्यत्वाभावात्मकप्रतियोगिनोऽधिकरणत्वाच्च स्वाभावा
भावात्मकविशिष्टद्रव्यत्वस्य द्रव्यत्वानतिरेकात् । तृतीये कपिसंयोगाभाववानात्मत्वादित्यादावव्याप्तिः साध्याभाववतां कपिसंयोगानां गुण
नामधिकरणस्यात्मनस्तत्प्रतियोगितावच्छेदकगुणत्वसामान्याभाववत्त्वावच्छिन्नानधिकरणत्वात् मेवं यादृशप्रतियोगितावच्छेदकावच्छि
न्नानधिकरणं हेतुमत्तस्य तदवच्छेदकत्वस्योक्तत्वात् । अत्र ग्राह्यसामानाधिकरण्ये हेतोर्यादृशः संबन्धः प्रविष्टस्तेन संबन्धेनास्य हेतुमांस्त
त्रवर्त्तमानत्वमभावस्य साध्यस्य च यादृशः संबन्धस्तत्संबन्धावच्छिन्नायाः प्रतियोगितायाश्चानवच्छेदकत्वं बोध्यं तेन धूमसमवायि
निष्ठाभावस्य संयोगावच्छिन्नप्रतियोगिताया धूमसंयोगिनिष्ठाभावस्य च समवायावच्छिन्नप्रतियोगिताया अवच्छेदकत्वेपि वह्नित्व
स्यनक्षतिः । यादृशसाध्यतावच्छेदकसंबन्धेन प्रतियोग्यसंबन्धित्वं वक्तव्यं तथा च संबन्धभेदेन प्रतियोगितानविशेषणीया । एवं स्थि

नेसामानाधिकरण्यादौसंबन्धित्वंनिवेशनीयंतत्त्वाधिकरणत्वंतथाचधर्मिणोपिव्याप्यत्वंव्यापकत्वंचनिर्वहतितथाहितादात्म्येनसंबन्धेनधूमवतःसंबन्धिनिमहानसेवह्निमान्नेयोन्योन्याभाववत्त्वस्यतादात्म्यसंबन्धावच्छिन्नायाप्रतियोगितानवच्छेदकमह्निमत्त्वावच्छिन्नवह्निमत्तादात्म्येनसंबन्धिनिमहानसेधूमवत्तादात्म्येनसंबन्धित्वमेवंधर्मिणोधर्मव्याप्यत्वव्यापकत्वेबोध्ये अतएवजलादीनांपृथिवीत्वाभावव्याप्यत्वंनयतनोक्तंसंगच्छते·यथाचयादृशसंबन्धेनहेतोर्व्याप्यतागृहीतातादृशेनतत्पक्षविशिष्टज्ञानेयादृशेनसाध्यस्यव्यापकत्वमवगतंतादृशेनैवसाध्यपक्षयोर्विशिष्टानुमितिः·तेनसंयोगेनधूमाश्रयेनवासमवायेनपर्वतेवह्निधीः·नतुनैवावगतव्यापकताघटकसंबन्धेनव्यापकस्याभावग्रहेगृहीतव्याप्यताघटकसंबन्धेनव्याप्यस्याभावःसिध्यति·कथमन्यथासमवायेनवह्निविरहिणिमहानसेसंयोगेनवावह्निविरहिणिस्वावमवयेधूमःसमवायेननिवर्त्ततेनिवर्त्ततेच·संयोगेनवह्निविरहिस्वावयवेसंयोगेनेतिनियमउपपद्यते·तथाचतादात्म्यसंबन्धेनजलादीनांव्याप्यत्वग्रहप्रापकनिरुक्तानातादात्म्येनैवतेषामभावःसिध्यतिसएवचान्योन्याभावः·इत्थमेवचदर्शितंधूपपोर्व्याप्तिनिश्चयइतिसंगच्छते·अतएवगोत्वव्याप्यग्रहदशायांयगसास्नादिमान्गौरितितादात्म्येनगोर्व्यापकत्वग्रहेसास्नादिनागौस्तादात्म्येनगोर्व्यतिरेकात्सास्नादिव्यतिरेकःसिध्यति·एवंचसंयोगेनगगनादेरपिद्रव्यत्वव्याप्यत्वं

१२९.हे.
७
३

वृत्तिनिष्पादकसंयोगमात्रस्याभावप्रतियोगितावच्छेदकसंबन्धरूपत्वेसाध्यतावच्छेदकसंबन्धेनासंबन्धित्वाभिधाने
वापृथिवीत्वादिव्याप्यकत्वमपितदभाववतोपिपृथिव्यादेः संयोगेन तत्तत्संबन्धित्वात् सिद्धिरपितस्यतस्यतथैवन
तु वृत्तिनियामकसंबन्धेनैतेनासंबन्धित्वाद्व्यापकत्वाच्च स्फुटीभविष्यति चैतदुपरिष्टात्. नन्वेवं द्रव्यातिरि
क्तद्रव्यान्यकालत्वाद्यवृत्तिधर्मस्यविशेषणताविशेषेणव्याप्यवृत्तित्वमपिव्याप्यं न स्यात्. स्वावच्छेदकसंबन्धेनप्रतियो
गिनोसंबन्धिनिकालेवर्त्तमानस्याभावस्यप्रतियोगितायांतत्संबन्धावच्छिन्नत्वस्यतेनसंबन्धेनयत्प्रतियोगिसंबन्धितदन्य
त्वस्य चैककालेऽसंभवात्. न च तादृशासंबन्धेनहेत्वधिकरणीभूतमपि धिषु तस्यवृत्तिरितिप्रतियोगितावच्छेदकविशिष्टप्र
तियोगिसामान्यकत्वं वा यत्र तथा चावृत्तिगगनाद्यभावघटादिवैवनत्प्रसिद्धिः. सत्ताद्यधिकरणात्कर्मादेः समवायेन ज्ञानसा
मान्यसंयोगसामान्यस्य चावृत्तेर्व्याप्तिप्रसंगः. अतत्वमूर्त्तत्वोभयत्वविशिष्टगुणकर्मान्यत्वविशिष्टसत्त्वात्कविशिष्टादिकं
च न मनोगुणादिरिति संयोगसामान्यन्तु न किञ्चिद् व्यावृत्तिर्वाच्यम्. विशिष्टस्यानतिरिक्तत्वात्. समवायेन जातेः सा
ध्यत्वे मेयत्वादावतिव्याप्तिः. जातिमन्निष्ठतादृशाभावप्रतियोगितायाजातित्वेनानवच्छेदात्. जातिशून्ये च तादृ
शासम्बन्धेनवृत्तेरप्रसिद्धेः. संयोगादिसाध्यकद्रव्यकर्मान्यत्वादौ चातिव्याप्तिः. अद्यमेहेतुमतितादृशासंबन्धेन वृ

७

नेरप्रसिद्धत्वात्· द्रव्येच सयोगादेरपि वृत्तेः· नैवम्· साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगि
कत्वहेत्वधिकरणोभयत्वावच्छिन्नप्रत्यनुयोगिकत्वसामान्योभयाभावस्यैव विवक्षितत्वात्· धूमसंयोगे वह्न्यधिक
रणायोगोलकत्वस्य चैत्रान्यत्वविशिष्टेन दण्डसंयोगे दण्डाधिकरणचैत्रानुयोगिकत्वस्य गुणकर्मान्यत्वविशिष्टस
त्तासमवायेन जात्यधिकरणगुणानुयोगिकत्वस्य विरहान्नातिप्रसङ्गः· स्वरूपसंबन्धेन गगनादेर्हेतिमत्त्वेतु निरुक्तप्रतियोग्य
नधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन संबन्धेन तद्धर्माव
च्छिन्नस्य व्यापकत्वं बोध्यम्· समवायसंबन्धेन मेयसामान्याभावस्य सामान्यादौ सत्त्वात्प्रमेयत्वादेरप्यभावस्य प्रतियोगितावच्छे
दकत्वसुलभम्· अतएव समवायस्यैकत्वेन द्रव्यत्वादिप्रतियोगिकत्वगुणाद्यनुयोगिकत्वोभयवत्त्वेपि द्रव्यं जातेरित्यादौ वह्नि
धूमोभयवान् वह्नेरित्यादौ संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेपि च नातिव्याप्तिरित्यपि वदन्ति· प्रतियोगित्वादिश्च सम्ब
न्धविशेषो न संबन्धत्वेन निविष्टः· सामानाधिकरण्येपि संबन्धः संयोगत्वादिनैव निविशते दर्शितं च निरूपमा[illegible]नमपि संबन्ध
त्वम्· अभाववत्त्वं चेदमिह नास्ति· इदमिदं न भवति इति नियामको भावाभावसाधारणोस्वरूपसम्बन्धविशेषः· तदपि च नोपादेयं प्रयो
जनविरहात्· विषयतानन्त्वादिवत् प्रतियोगित्वाधिकरणसंबन्धत्वादयोऽतिरिक्ताः· पदार्था इत्येकदेशिनः ॥ श्रीरामः

द्वि॰ अ॰ नन्विहावच्छेदकत्वं निःस्वरूपसंबन्धविशेषः॰ संभवति लघोर्गुरोरेतदभावात् प्रमेयधूमत्वकम्बुग्रीवादिमत्त्वघ्राणग्राह्यगुणत्वादेस्तथात्वेन ते
८ न रूपेण साध्यतायां व्यभिचारित्वातिप्रसंगात्. नाप्यनतिरिक्तवृत्तित्वम्. प्रतियोगितायाः स्वरूपसंबन्धात्मिकायाः प्रतिव्यक्ति भिन्नत्वेन धू
१ मत्वादेरपि तदनतिरिक्तवृत्तित्वात्. न च तथाविधयत्किंचिदेकाभावप्रतियोगितासामान्यभिन्नावृत्तित्वं तत्. अत एवातिरिक्तसामान्याभावस्या
भावे धूमत्वादेरवच्छेदकत्वापातादग्नेस्तत्साधनमपि संगच्छत इति वाच्यम्. वह्निघटवृत्तिद्वित्वतार्णातार्णदहनवृत्तिद्वित्वावच्छिन्नप्रतियो
गिताकाभावप्रतियोगितानतिरिक्तवृत्तिवह्नित्वादावतिप्रसंगात्. एतेनान्यूनवृत्तित्वविशेषितमपि परास्तम्. अत एव नानाप्रतियोगिवृ
त्त्येकप्रतियोगितांगीकारेपि न निस्तारः. लघुरूपसमनियतगुरुरूपेण साध्यतायां सद्धेतावव्याप्तिस्तादृशानवच्छेद्यत्वाप्रसिद्धेरिति चे
न्न. प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्याविवक्षितत्वात्. स्वसमानवृत्तिकं चावच्छेदकं ग्राह्यम्. तत्त्वं च स्वपर्याप्त्यधिकरणप
र्याप्तिवृत्तिकत्वं यावत्त्वादिकं तु न तथा पर्याप्तिश्च अयमेको घटः इमौ द्वाविति प्रतीतिसाक्षिकः स्वरूपसंबन्धविशेषः. एवं त्रित्वादिकम
पि न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यतायां नाव्याप्तिः. घटकं चावच्छेदकं स्वरूपसंबन्धविशेषः. एवं च प्रयुक्तपदद्धर्मावच्छि त्वं ३
न्नेत्यत्र पदद्धर्मान्यूनवृत्तिधर्मावच्छिन्नेति वक्तव्यं तेनोक्ताव्याप्तिनिरासः. वस्तुतस्तु तदवच्छिन्नप्रतियोगिताकाभाववदसंबद्धस्वविशिष्ट
सामान्यकत्वं स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं तत्त्वं वा तदनतिरिक्तवृत्तित्वं वाच्यम्. अत एव सत्तावान् जातेरित्यादौ

८

जातिमन्निष्ठाभावप्रतियोगितावच्छेदकगुणान्यत्वविशिष्टसत्तात्वतुल्यवृत्तिकत्वेपि न क्षतिः। एवं स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगिता
नवच्छेदकावच्छेद्यत्वं बोध्यं तादृशप्रतियोगिताश्चाविशेषणापादेयाः। नातो गुणेरवच्छेदकं विनाऽर्वयम्। प्रतियोगित्वं संबन्धित्वं च साध्यता
वच्छेदकसंबन्धेन बोध्यम्। अतो न संबन्धभेदमादाय दोषः। अभावश्च प्रतियोगिव्यधिकरणो बोध्यः। कालिकविशेषणत्वेन साध्यतायां
तादृशप्रतियोगितावच्छेदकत्वमनित्यत्वनत्वघ्राणित्वेप्रसिद्धम्। न च मोक्षमिदमीयं च प्रतियोगिवैयधिकरण्यमनुपादेयं संयोगत्वाव
च्छिन्नाभाववति संयोगत्वादिविशिष्टस्य वृत्तेर्गुणादिनिष्ठाभावप्रतियोगितावच्छेदकद्रव्यत्वत्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभा
ववति चावृत्तेरव्याप्तिव्याप्त्योरनवकाशादिति वाच्यम्। धूमवान्वह्नेरित्यादावतिव्याप्तेः। न चोत्पत्तिकालावच्छेदेन महानसादौ कि
ञ्चित्संबन्धेन वर्त्तते येन वह्निमदयोगोलकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकायोगोलकवृत्तिद्रव्यत्वावच्छिन्नाभाववद्वृत्ति
त्वं धूमत्वविशिष्टस्य संभाव्येत प्रतियोगितयोरेकसंबन्धावच्छिन्नत्वस्य विशेषणविशेषावच्छिन्नत्वस्य वा विवक्षणे पुनरनुपाद
यमेव प्रतियोगिवैयधिकरण्यम्। यत्राधिकरणे व्यभिचारस्तदन्यत्वत्वतदन्यत्वप्रकारकप्रमाविषयत्वत्वसाध्यवत्त्वसाध्य
वत्त्वप्रकारकप्रमाविषयत्वत्वादीनां साध्यतावच्छेदकसाध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वात् हेतुतावच्छे
दकविशिष्टहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वाच्चातिव्याप्तेरनवकाशात्। तथा च विशेषणताविशेषावच्छिन्नयद्धर्मविशि

ष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं तत्संबन्धावच्छिन्नसाधनसमानाधिकरणात्यन्ताभावप्रतियोगितासामान्येनास्तिसा
धने तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरिति पर्यवसितोऽर्थः, यत्रसद्धेतुविशेषे साध्यतावच्छेदकं न प्रतियोगितावच्छेदकं तत्रैवे
यंरीतिरुपादेयेत्यपि वदन्ति. गौरवप्रतिसन्धानदशायामपि कम्बुग्रीवादिमान्नास्तीति प्रतीतिबलात् गुरुरपि धर्मोऽवच्छेदकः प्रति
योगितायाः. न चास्यास्तत्प्रतियोगिकाभावमात्रमवलम्बनम् तथाविधयत्किंचिद्घटसत्त्व एव तादृशप्रतीतेरनुदयात्. अत
एवैकघटवति भूतले कम्बुग्रीवादिमान्नास्तीति शब्दो न प्रमाणं प्रमाणं च घटसामान्याभावे. न चैवं लघुरूपसमनियतानां गुरू
णामव्याप्यतापत्तिः. गुणादिगुणकर्मान्यत्वविशिष्टसत्तादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठायाः प्रतियो
गितायालाघवेन द्रव्यादिनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वेनैवावच्छेदात्. न जात्यवच्छेदकत्वे व्यक्तीनां च प्रातिस्विकरूपे
णाभावानां प्रत्येकं सहस्रेणापि ज्ञातुमशक्यत्वात्. एवं द्रव्यवत्त्वादिविशिष्टद्रव्यत्वादेरव्याप्यत्वप्रसंगोऽप्यनुसन्धेयः. उपद
र्शितप्रकाराणामपि स्वत्वादिघटितत्वेन दुर्ज्ञेयत्वात्. अत एव प्रागभावत्वगुणत्वादिना साध्यतायां द्रव्यत्वादेर्व्यभिचारित्वं
साधु संगच्छत इत्यपि केचिदिति कृतं पल्लवितेन ॥ ॥

१

॥ ॥श्रीगणेशायनमः ननुनीलपीतादिनानारूपवदवयवारब्धेवयविनिकीदृशंरूपमुत्पद्यतेसामग्र्यविशेषेणनीलपी
ताद्येकतरमात्रोत्पादस्यवक्तुमशक्यत्वादितिचेदत्रप्रांचः।विनिगमकाभावादव्याप्यवृत्तीनिनीलपीतादिविजातीयनाना
रूपाण्येवतत्रावयविन्युत्पद्यंते अव्याप्यवृत्तित्वोपगमाच्चननीलावयवावच्छेदेनचक्षुःसन्निकर्षदशायांपीताद्युपलं
भः।पीतावयवावच्छेदेनचचक्षुःसन्निकर्षदशायांननीलाद्युपलंभः।चक्षुःसंयोगावच्छेदकावच्छिन्नसमवायसंबंधा
वच्छिन्नाधारतालक्षणसन्निकर्षस्यनिरूपकतासंबंधेनविषयनिष्ठतयाद्रव्यसमवेतचाक्षुषेहेतुत्वात् अन्यथा
मूलावच्छेदेनचक्षुःसंयोगादग्रावच्छिन्नसंयोगकर्म्मादिचाक्षुषापत्तेः।व्याप्यवृत्तिजात्यासाधारण्येस्याप्यवच्छेद
लु२ काभ्युपगमाच्चनव्याप्यवृत्तिजात्यादिचाक्षुषेव्यभिचारः।अस्तुवाद्रव्यसमवेताव्याप्यवृत्तिचाक्षुषंप्रतिचक्षुःसंयोगाव
च्छेदकावच्छिन्नसमवायसंबंधावच्छिन्नाधारताद्रव्यसमवेतव्याप्यवृत्तिचाक्षुषंप्रतिचक्षुःसंयुक्तनिष्ठसमवायसं

राम०

१

४१२३

श्री ५ को सरकार

चित्ररूपवादपुस्तकमिदं उपाध्यायहेमनारायणशर्मणाम्॥

श्री ५ को सरकार
संस्कृत पुस्तकालय

४१२२

(८)

वाक्यवादः

वाक्यवादपुस्तकम्.

श्री ५ को सरकार
संस्कृत [illegible]

वाक्यवाददर्पणम्:

वा. वा.
वा०टी०
१

श्रीगणेशायनमः ॥ ॥सुप्तिङन्तचयोवाक्यमितिप्रमाणानुसारेणसुबन्तचयत्वेसतितिङन्तचयत्वस्यमिलितस्यप्रत्येकंवासुबन्तचयत्वादेर्वाक्यलक्षणत्वेपरस्परमप्राप्तेः पदसमूहमित्यस्यगौरश्वः पुरुषोहस्तीत्यादावतिव्याप्तिरित्याशयेनपृच्छति अथेति इदंलोकेप्रसिद्धंवाक्यंवाक्यपदवाच्यंकिं जिज्ञासितंतथाचलोकेप्रसिद्धंवाक्यपदवाच्यंजिज्ञासाविषयीभूतमित्यन्वयबोधः नामेति वाक्यालंकारे एकतिङन्तमितिभाष्यादिति एकत्वेसतितिङन्तत्वंवाक्यमित्युक्तेपचतीत्यस्यापिवाक्यत्वापत्तिः एकतिङ्यस्मिन्निति ब

श्रीगणेशोजयति ॥ ॥अथकिमिदंवाक्यंनाम एकतिङ्वाक्यमितिभाष्यात् एकतिङन्तार्थमुख्यविशेष्यकबोधजनकपदसमुदायोवाक्यमितिवैयाकरणाः तेनपचतिभवतिपश्यमृगोधावतीत्यादौक्रियापदस्यानेकत्वेपिनैकवाक्यताव्याघातः ॥

उक्तीत्याश्रयणेएकतिङ्घटितपदसमुदायत्वंवाक्यमितिपर्यवसानं पचति भवतीत्यादावव्याप्तमित्याशयेनतदर्थमाह एकेति तेनेति एतादृशार्थकरणेनान्वयस्थास्यनेकवाक्यताव्याघातइत्यत्रतन्निषेधेपचतिभवतीत्यत्रविक्लित्त्यनुकूलेकाश्रयवृत्तिभावनाभिन्नेकाश्रयभवनानुकूलाभाववतेतिबोधः पश्यमृगोधावती८ त्यत्रमृगाभिन्नैकाश्रयवृत्त्युत्तरदेशसंयोगानुकूलवेगजन्यविलक्षणव्यापारकर्मकचाक्षुषानुकूलव्यापारस्तदभिन्नैका १

वा० कृष्णाचार्य्यकृती

अपद्वृत्तिरित्यन्वयबोधः नैकवाक्यतातिङन्तभेदप्रयुक्तानेकवाक्यतापत्तिर्नेत्यर्थः ननु क्रियाविनिर्मुक्तवाक्यस्यापिसत्वे नतत्रत
ल्लक्षणाप्राप्तिरित्याशंक्य तद्वाक्यस्यप्रमाणाविरुद्धत्वेनाप्यास्यभावादित्याह नहीत्यादिना ननु प्रयातिपुरुषस्तस्यचर
णावभिवादये इत्यादौ तच्छब्देन पुरुषपरामर्शानुरोधात् प्रथमान्तार्थस्यैव बोधमुख्यविशेष्यत्वस्वीकारेणानिरु
क्तलक्षणमयुक्तमित्याशयेन शंकते अस्तीत्यादिना समाधत्ते पश्य मृग इत्यादिना ननु पश्येत्यादौ प्रथमांतार्थमुख्यविशेष्य

नहि क्रियाविनिर्मुक्तं वाक्यमस्तीति भाष्यात् अस्तिर्भवतिपरः प्रथमपुरुष इति कात्यायनस्मरणाच्च सर्व
त्र समुचितः क्रियापदाध्याहारः नचास्तु क्रियापदाध्याहारस्तथापि बोधविशेष्यत्वं प्रथमान्तार्थ
स्यैवेति वाच्यं

कबोधस्वीकारेपि तमितिपदाध्याहारेण धावनानुकूलकृतिमान्मृगो मृगकर्मकदर्शनाश्रय
त्वमिति बोधो न स्वीक्रियते येन नानामुख्यविशेष्यताकबोधजनकत्वेन वाक्यभेदः स्यात् अपितु धावनानुकूलकृतिम
न्मृगनिष्ठकर्मतानिरूपकदर्शनाश्रयत्वमित्येव बोधस्तज्जनकतयैव वाक्यताक्षतेरभावात् कथमगतिस्तत्रेत्याशंक्य
मृगपदार्थस्य दर्शने कर्मतासंबंधेनान्वयबोधस्य नामार्थस्य धात्वर्थे भेदातिरिक्तसंबंधेनान्वयो बोधस्वीकारे तण्डुलः

वा० ६० पवतीत्यादौप्रयोगस्यसाधुत्वापत्त्यानामार्थप्रकारकभेदसंसर्गकबोधेविभक्तिजन्योपस्थितेःकारणत्वेनानुपपन्नत्वात्मृगप
दार्थस्यकर्मताबोधायमृगपदोत्तरंद्वितीयावश्यकीत्याशयेनाहमृगस्येत्यादि तत्रफलितमाहद्वितीयायांचेत्यादि
२ धावन्तंमृगंपश्येत्येवंस्यादित्यनेन ननुतथाप्रयोगेभवत्येवेति नदोषइत्याशंक्य धावंतंमृगंपश्येत्येवंस्यात् ननुपश्यमृगो
धावतीतिप्रयोगस्तथाचतस्योच्छेदएवानिष्टकरइत्याहतथाचेति ननुतत्रमृगमुख्यविशेष्यताकत्वंपदार्थमुख्यविशे

पश्यमृगोधावतीत्यादावगतेः प्रथमांतार्थस्यविशेष्यत्वेवाक्यभेदप्रसंगात् मृगस्यदर्शनक्रियायांक
र्मतयान्वयेमृगपदोत्तरंद्वितीयापत्तेः द्वितीयायांचसत्त्वांलटःशतृशानचावप्रथमासमानाधिकरणइ
त्यनुशासनाल्लटःशत्रादेशोधावंतंमृगंपश्येत्येवंस्यात् तथाचपश्यमृगोधावतीतिवाक्यस्योच्छेदापत्तेरस्त
मित्यध्याहारेवाक्यभेदोगौरवंच नचवाक्यभेदेक्षतिविरहइतिवाच्यंतथासतितिङ्ङतिङः इतिसूत्रेऽतिङः इत्य

~~ष्यताकत्वंपदार्थमुख्यविशे~~ष्यताबोधएवक्रियतेतमित्याध्याहारेणतथाचतस्योच्छेदइत्यतआहतमितिअध्याहारइत्यादिवाक्य २
भेदइत्यापत्तिमाशंक्यपरिहरति नचेति तथासतिअतिङन्तात्परंतिङन्तंनिहन्यतेइतितिङ्ङतिङ इतिसूत्रार्थः नन्वेकवाक्यताभा
वेपितिङन्तात्परस्यातिङ्ग्रहणाव्यावर्त्यत्वसंभवइत्याशंक्यसमानवाक्येनिघातयुष्मदस्मदादेशावक्तव्याइतिवचनेनतिङन्तस्ये
तिशेषः तिङन्तेनसहतिङन्तस्यैकवाक्यतायामेवातिङइतिनिघातप्रसक्तिस्तद्वारणायसत्येतद्ग्रहणांसत्यैकवाक्यत्वाभावेनिघात

प्रशक्तिरेव नेत्याह. निघातस्वरस्येत्यादि एकवाक्यताभावेतिङन्तेन सहतिङः तस्यैकवाक्यताभावे तदनुपपत्तेः तिङन्तात्परस्य निघातप्रशस्यानुपपत्तेस्तथा च अतिङ इति ग्रहणस्य वैयर्थ्यमिति भावः. ननु हरेरित्यादाववताराणां भूतभावित्वेन क्रियापदाध्याहाराभावेतन्तल्लक्षणप्राप्तिरित्याशंक्य लडर्थस्याविवक्षितत्वेन भवन्तीत्याध्याहारसंभव इत्याह. भवन्तीत्येवेत्यादि अविवक्षितत्वादित्यंतेन. हरिसंबंधिदशावताराभिन्नवृत्त्यावच्छिन्नाश्रयवृत्तिभवनानुकूलाभाववन्नेति बोधः लडर्थविवक्षायामपि वर्त्तमानसामीप्यवर्त्त

स्याभावस्याभावेन वैयर्थ्यापत्तेः निघातस्वरस्य चैकवाक्यस्याधीनत्वात्. एकवाक्यत्वाभावे तदनुपपत्तेः. ननु हरेर्दशावताराः इत्यत्र का क्रियाध्याहार्या भवन्तीत्येवेति. परन्तु यत्रायोग्यता न तत्र लडर्थवर्त्तमानत्वान्वयः. अविवक्षितत्वात् वर्त्तमानसामीप्ये वा लट् सामीप्यं च भूतभविष्यद्रूपम्. अत एव जयन्ति कृष्णस्य दशावताराः इति मुकुटः. वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः इत्यादौ न लडर्थवर्त्तमानविवक्षेति मिश्राः.

मानवद्वेति वचनेन वर्त्तमानसामीप्यान्यतरनिरूपितादशाभाववन्नेति बोध इत्याह वर्त्तमानसामीप्ये वेत्यादि. अत एव लडर्थाविवक्षणादेव सामीप्यार्थकत्वादेव वा. जयन्तीति. कृष्णसंबंधिदशावताराभिन्नवृत्त्यावच्छिन्नैकाश्रयवृत्ति वर्त्तमानसामीपानिरूपितोत्कर्षानुकूलाभाववन्नेति बोधः. अत एवैतस्य मिश्रा इत्यनेनान्वयः. वारिद इति. वारिदाभिन्नैकाश्रयवर्त्तिनी तृप्तिकर्मकप्राप्त्यनुकूलाभाववनावर्त्तमानकालिकीत्यन्वयबोधः आशयरीत्या स्ववनसंभवति सद्भावनाया भविष्यत्वात्. इहलोके पानीयदातुस्तु आशा

वा॰ भा॰
प॰ ६॰ तेस्यमुद्रपानेनविनाऽदर्शनात्तृप्तिः पारलौकिकीवक्तव्यातऽर्थौनाविवक्षितइतिभावः एवेति मधुसूदनठक्कुराः तत्रान्वयः अथ
शाब्दोनिरूप्यते इति चिंतामणिशास्थस्य पदस्य व्याख्यानरूपावलोकः नामपक्षधरमिश्रकर्तृकग्रंथस्य व्याख्याकंटकोद्धार इति म
३ धुसूदनकर्तृकोग्रन्थ इति बोध्यं त्रयः कालाइत्यत्र क्रियाविशिष्टाभिन्नाकालाइत्यन्वयबोधः पचतिभवतीत्यत्र पाकानुकूल
कृतिभवनाश्रयः इत्यन्वयबोधः चैत्रः पचतीत्यत्र पाकानुकूलकृतिमांश्चैत्रइत्यन्वयबोधः स्वार्थनिष्ठमुख्यविशेष्यतानिरूपि

वर्तमानार्थकलट्प्रत्ययांतत्वेनैतस्यालोकस्यतत्सामीप्यार्थकलट्प्रत्ययान्तत्वेनैवेति कंटकोद्धारेमधुसूदनठ
कुराः अत्रनैयायिकाः निष्क्रियस्यापिवाक्यस्यसत्वात् त्रिविधंवाक्यं तथाहि सुबन्तसमूहस्तिङन्तसमूहस्सु
बन्ततिङन्तसमूहश्च यथात्रयः कालाः पचतिभवति चैत्रः पचतीत्यादावेकवाक्यतात्वेकमुख्यविशेष्यकबोध
जनकत्वेन पश्यमृगोधावतीत्यादावपितस्याक्षतेः तथाहि धावनकर्तृकमृगकर्मकदर्शनाश्रयत्वमित्यन्वय
बोधात् प

तप्रकारताशालिबोधजनकपदसमभिव्याहृतपदत्वरूपस्य किंचित्पदार्थनिष्ठप्रकारतानिरूपितस्वार्थ
निष्ठविशेष्यताशालिबोधजनकतत्पदसमभिव्याहृतपदत्वरूपवाक्यत्वस्य पश्यमृगोधावतीत्यादावपिसत्वेन तम्मितिपदा ३
ध्याहाराभावादेकवाक्यत्वक्षतिविरह इत्याह पश्यमृगोधावतीत्यादावपीति तस्यएकवाक्यत्वस्य

ननुनामार्थप्रकारकभेदसंसर्गकबोधेविभक्तिजन्योपस्थितेःकारणत्वेनकथंधावतोमृगस्यकर्मतासंबंधेनदृशिक्रियायामन्वयस्तत्र
तज्जन्योपस्थितेरित्याशंक्यवाक्यस्यचार्थवत्वाभावेनतदर्थप्रकारकबोधस्यतज्जन्यतावच्छेदकानाक्रांतत्वान्नद्वितीयापत्तिरित्याह·वाक्या
स्यचार्थवत्वाभावेनेत्यादि·अर्थवत्वाभावेनअर्थनिरूपितशक्तिलक्षणान्यतरसंबंधाभावेनेत्यर्थस्तथाचअनुकूलसंबंधावच्छिन्नधा
वननिष्ठप्रकारतानिरूपितविशेष्यताऽभिन्नसमवायसम्बन्धावच्छिन्नकृतिनिष्ठप्रकारतानिरूपितविशेष्यत्वाऽभिन्नकर्मतासंबंधावच्छि

वाक्यार्थस्यकर्मतासंसर्गेणदर्शनक्रियायांभानंवाक्यस्यचार्थवत्वाभावेनाप्रातिपदिकत्वान्नद्वितीयापत्तिः·नचवा
क्यभेदप्रसंगः रभावादितरत्तदर्थद्वितीयापेक्षिता तथाचतादृशवाक्योच्छेदः किंचनहिक्रियाविनिर्मुक्तंवा
क्यमस्तीतिफणिनोधरणीभारविस्रम्भणाभरणातिरेवेतिभावः·तथाहि·अयःकालादित्यादावेवाक्रियाविनिर्मुक्तवा
क्यस्यसार्वजनीनत्वात् ॥

न्नमृगनिष्ठप्रकारतानिरूपितविशेष्यत्वाऽभिन्ननिरूपितत्वसंबंधावच्छिन्नदर्शननिष्ठप्रकारतानिरूपितविशेष्यताऽभिन्नस्वरूपसंबं
धावच्छिन्नाश्रयत्वनिष्ठप्रकारतानिरूपितत्वंपदार्थनिष्ठमुख्यविशेष्यताशालीबोधः·ननुक्रियाविनिर्मुक्तवाक्यस्यप्रमाणविरुद्धत्वेन
वाक्यत्वेविप्रमसंगतमित्याशंक्याह·किंचेत्यादिक्रियाविनिर्मुक्तंवाक्यमेवदर्शयति·नहीत्यादिना·सार्वजनीनत्वात्सर्वजनानुभवसिद्ध
त्वात्·नन्वत्रापिभवतीतिक्रियाध्याहारःशक्यःकर्तुमितिचेन्न·भूतभाविकालयोर्वर्तमानभवनाश्रयत्वबाधात्·नचजयन्तीत्यादा

च वर्त्तमानसामीप्यार्थकत्वं लट इति वाच्यं· वर्त्तमानसामीप्यस्य भूतभविष्यद्रूपस्य भूतभविष्यत्कालसंबंधिभवनान्वयेपि वर्त्तमानसंबंधिभवनेन तदन्वयासंभवात्· न च सामीप्यं वर्त्तमानाधारणं निर्वक्तुमशक्यं येन वर्त्तमानसंबंधिनोपि भवनस्य ग्रहणं स्यात्· न च लटो वर्त्तमानसामीप्यं वर्त्तमानत्वं चार्थ इति वाच्यं शक्तिलक्षणाभ्यामेकशब्देन युगपदेकार्थप्रतीतेः· न च गंगायां घोषमत्स्यौ स्तः इत्यत्र घोषमत्स्यानुरोधेन गंगापदेन प्रवाहतीरयोर्वृत्तिद्वयेनोपस्थितिदर्शनाल्लटा वर्त्तमानतत्सामीप्ययोस्तथैवोपस्थितिरस्त्विति वाच्यं·

न ह्यत्र कापि क्रियाध्याहर्त्तुं शक्या· अपि च क्रियाया विशेष्यत्वेपि प्रयाति पुरुषस्तस्य चरणावभिवादये इत्यादौ तच्छब्देन पुरुषपरामर्शो न स्यात् तस्याविशेषणत्वेनोपस्थापकत्वात्· अन्यथा दृष्टे राज्ञमातङ्गास्तस्मै वा मीतुरंगमा इत्यादेरपि साधुत्वापत्तेरित्याघनजल्पंजल्पन्तिस्म· अत्रेदं भावयामः· प्रत्यक्षमगो धावतीत्यचता दृश्यमगस्य दर्शनक्रियायां कर्मतासंबंधेना

युगपद्वृत्तिद्वयविरोध इति प्राचीनगाथाविरोधादित्येतदभिप्रेत्याह· न ह्यत्रेत्यादिना· ननु तत्र लडर्थो न विवक्षित एवं च यो भवति· तस्यैवेत्यत आह· अपि चेत्यादि· घटोयं तज्ज्ञातिरित्यादेः प्रामाण्यापत्तिवारणाय सर्वनाम्नामुत्सर्गतः प्रधानोपस्थापकत्वावश्यकत्वं तथा च पुरुषाभिन्ने कात्राश्रयवृत्तिप्रयाणानुकूलो व्यापार इति बोधे पुरुषस्याविशेषणतयाभावेन तस्य चरणावित्यत्र तच्छब्देन परामर्शो न स्यादतः प्रथमान्तार्थमुख्यविशेष्यकबोधस्यैव स्वीकर्त्तव्य इत्याह· क्रियाया अविशेष्यत्व इत्यादिना· अन्यथा सर्वनाम्नां विशेषणोपस्थापकत्वे नामार्थप्रकारकभेदसंसर्गकबोधे विभक्तिजन्योपस्थितेः कारणत्वेन तादृशमगस्य कर्मतया दर्शनेन्वयासंभव इत्याह· प्रत्यक्षमगो

धावतीत्यादिश्शिधातुज्ञानजन्यचाक्षुषज्ञानोत्तेसहकृतोयोधात्वाख्यातप्रातिपदिकजन्यगतिविशेषकृतिमृगोपस्थितिसहकृतधावतिमृ
गइतिवाक्यज्ञानजन्यधावनानुकूलकृतिमान्मृगइत्याकारकबोधस्तत्सहकृतेनपश्यपमृगोधावतीतिज्ञानेनकर्मतासंबंधावच्छिन्नधा
वनकृत्यवच्छिन्नमृगनिष्ठप्रकारतानिरूपितचाक्षुषज्ञाननिष्ठविशेष्यताशालिशाब्दस्यजननेनमृगादिपदजन्योपस्थितिःसहकारिणीभवतितु
तादृशोपस्थितिसहकृतधावतिमृगइतिसमभिव्याहारजन्यधावनकर्मकमृगविषयकबोधस्यसहकारित्वमितितादृशमृगस्यनामजन्योप
स्थितविषयत्वेनतस्यकर्मतयाधात्वर्थेऽन्वयेधात्वर्थनामार्थयोरभेदातिरिक्तसंबंधेनबोधोनुपपन्नइतिनियमभंगरूपदोषोनेत्याह तत्र
धावनेत्यादिना तथासतिवाक्यार्थस्यधावनकृतिविशिष्टमृगस्यकर्मतयाधात्वर्थेऽन्वयेसतिप्रथमान्तेतिसामान्यप्रतिषेधः मृगपदो

नामार्थधात्वर्थयोरभेदातिरिक्तसंबंधेनसाक्षादन्वयबोधस्याव्युत्पन्नत्वात् अन्यथातण्डुलः पचतीत्यादेरपिसाधुत्वा
पत्तिः नचतत्रधावनकृतिविशिष्टमृगस्यवाक्यार्थत्वेनामार्थत्वाभावान्नोक्तदोषइतिवाच्यं तथासतिमृगपदोत्तरंप्रथ
मापिनस्यात्तस्याअपिप्रातिपदिकाश्रयत्वात्

परंकापिविभक्तिर्नस्यादित्यर्थः तत्रचापदकमप्रातिपदिकत्वादिति
पूरणीयं तस्याअपीत्यादिग्रंथानुरोधात् यद्यपीदमापादकमसंगतं मृगपदस्यधातुप्रत्ययांतभिन्नत्वात् मृगत्वावच्छिन्नशक्तत्वे
नार्थवत्वाच्चअप्रातिपदिकत्वादित्यापादकसिद्धेस्तथापियादृशवाक्यार्थस्यधात्वर्थेऽन्वयस्तादृशवाक्योत्तरंविभक्तेरदर्शनेनदृशिधा
त्वर्थान्वयिनेनीलाभिन्नंघटमितिवाक्योत्तरमिवप्रकृतेपिधावनकृतिविशिष्टमृगार्थकमृगपदोत्तरंप्रथमापिनस्यादितिभावः ननुयादृशसाम
ग्रीसत्वेयत्कार्यंदृष्टंतदेवतत्रापाद्यं नीलंघटंपश्येत्यत्रतादृशसमभिव्याहारज्ञानादेवनीलघटकर्मकत्वनिरूपिकदर्शनान्वयबोधस्यदृष्ट

वा॰भा
५

त्वेन नीलं घटमिति वाक्योत्तरं विभक्तिर्मा भूत् · पश्य मृगो धावतीति प्रथमान्तपदसमभिव्याहारज्ञानादेव धावनकर्तृकमृगकर्मकदर्शनान्वयबोधो भवति ननु तद्विभक्तिव्यतिरेकत इति प्रथमाविनस्याहिति निर्युक्तमित्यत आह · किं चेति तच्च एकवाक्यत्वं च अनुपपन्नमेवेति · धावनकर्तृकमृगकर्मकदर्शनान्वयपरत्वमिति बोधस्वीकारे फणिविवक्षितैकवाक्यतानुपपत्तिरितिभावः · ननु मृगकर्तृकोत्कटधावनस्य दृशिक्रियायामन्वयः फणितात्पर्यविषय इत्येव कुतोवगम्यते इत्याशंक्य व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणमिति अभिप्रायेण भाष्यस्यस्य श्रीकर्त्री हेलाराजसंमतिमाह · फणिसंमतिस्त्विति · तेन मृग इति युवतं दर्शने विशेषणं मृगकर्तृकोत्कटधावनं दर्शने विशेषणमिति हेलारा

किं च मृगकर्मकोत्कटधावनस्य दृशिक्रियायां कर्मत्वेन विवक्षास्थले एव प्रयुक्तस्य पश्य मृगो धावतीत्यस्यैव
वाक्यत्वं फणिसंमतं · तच्चानुपपन्नमेव फणिसम्मतिस्तु हेलाराजेन स्पष्टीकृता · तथा हि सुबन्तं हि यथाऽनेकं ति
ङन्तस्य विशेषणम् · तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणमिति · तेन धावनक्रियायाः एव विवक्षायां न प्रतीका
र इत्याशयः अन्यथा धावन्तं मृगं पश्येत्येव ब्रूयात् ·

जेन स्पष्टीकरणे न एवकारोत्तरं कर्मतया दृशिक्रियायामन्वयस्येति विशेषः · न प्रतीकारः न निराकरणं तथा च तादृशमृगस्य कर्मतया तत्रान्वयस्वीकारेण फणिसम्मतवाक्यत्वानुपपत्तिरेव दोष इति भावः · ननु प्रकृतिप्रत्यययोः सहार्थं ब्रूतस्तयोर्मध्ये प्रत्ययार्थस्य प्राधान्यमिति नियमात् धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेनान्वयबुद्धिं प्रति विशेष्यतया प्रत्ययजन्योपस्थितिर्हेतुरिति कार्यकारणभावेन दर्शने प्रत्ययजन्योपस्थितेरभावेन धावनस्य तत्रान्वयो न संभवति इति मृगस्येव तत्रान्वयेन तार्किकपक्ष एव समीचीन इति चेन्न · निरुक्तनियमादेव प्रकृत्यर्थप्रकारकबोधे विशेष्य

राम
५

तथाप्रत्ययत्वेनोपस्थितेः कारणत्वेनकर्मत्वोपस्थित्यर्थंद्वितीयापेक्षितातथाचपश्यमृगोधावतीतिवाक्योच्छेदापत्तेरित्याह· अन्यथेति· कर्मत्वोपस्थि
त्यर्थंद्वितीयास्वीकारेइतितदर्थेस्तथाचसुबन्तस्थलेएतादृशान्यायस्वीकृतार्थत्वात्तिङन्तस्थलेधात्वर्थविशेष्यकान्वयबोधस्यस्वीकरणीयइतिल
डर्थविवक्षायामपिभूतभविष्यद्वर्तमानविषयकज्ञानेवर्त्तमानकालिकत्वान्वयसम्भवेनक्रियाविनिर्मुक्तवाक्यमसंगतमित्याह·किंचे
ति· प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकारेदोषान्तरमाह· किंचेति· शृणुगर्जतिमेघइत्यत्रगर्जनाश्रयमेघकर्तृकश्रवणाश्रयत्व
मितिनैयायिकमतेबोधः सचनसंभवतिशब्दस्यैवश्रावणत्वेमेघस्याश्रयत्वात् मेघाभिन्नैकाश्रयवृत्तिगर्जनकर्मश्रावणत्ववदभिन्नै
काश्रयकमितिवैयाकरणमतेबोधः सचसमीचीनमेवनटोगायतिशृणुवित्यत्रगायनाश्रयनटकर्मकश्रावणाश्रयत्वमितितार्कि

किंचत्रयःकालाइत्यत्रज्ञायन्तइतिक्रियान्वयसंभवात् क्रियाविनिर्मुक्तवाक्यमसंगतत्वापत्तेः किंच शृणुगर्जतिमेघः
नटोगायतिशृणुघटोनश्यत् पश्येत्यादावव्याप्तेश्च· एतेनप्रथमार्थोमृगकर्मत्वमित्यपास्तम्·

कमतेबोधः सचनसंभवतिनटस्याश्रयत्वात् नटाभिन्नैकाश्रयवृत्तिगानकर्मश्रावणत्ववदभिन्नैकाश्रयकमितिवैयाकरणमतेबोधः
सचयथार्थएवघटोनश्यत् पश्येत्यत्रचातीतोत्पत्तिकप्रतियोगीघटकर्मकदर्शनाश्रयत्वमितिन्यायमतेबोधः सचनसंभवतिघटस्यनष्टत्वे
दर्शनाभावात् घटाभिन्नैकप्रतियोगिकातीतोत्पत्तिकनाशविषयकदर्शनत्ववदभिन्नैकाश्रयकमितिवैयाकरणमतेबोधः सचसमे
वतथाचन्यायमतेतत्रतत्राव्याप्तिरेवेतिभावः एतेनशृणुगर्जतीत्यादेरयोग्यत्वापादनेनप्रथमार्थइति तथाचपश्यमृगोधावतीत्यत्रप्रथमा
न्तार्थमुख्यविशेष्यकबोधस्वीकारेपिनामार्थधात्वर्थयोरभेदातिरिक्तसंबंधेनान्वयबोधोनुपपन्नइतिनियमभंगोनास्तिधावनकर्तृमृग

वा० वा० निष्ठप्रथमार्थविषयतानिरूपकदर्शनाश्रयत्वमित्याकारकान्वयबोधस्वीकारेण कर्मतासंबंधेन धावनकर्तृमृगस्य दर्शनान्वयायाम
६ न्वयाहितिभावः नन्वाख्यातमुख्यविशेष्यकान्वयबोधस्वीकारे य यातिपुरुषस्तस्य चरणावभिवादये इत्यादौ तच्छब्दे न पुरुषपरामर्शो न स्या
त्प्रथमान्तार्थपुरुषस्याख्यातार्थविशेष्यत्वेन मुख्यविशेष्यत्वाभावात् घटो यं तज्ज्ञातेरित्यादेः प्रामाण्यापत्तिवारणाय तत्र घटस्य मुख्यविशेष्यो
पस्थापकत्वस्वीकारादतः प्रथमान्तार्थमुख्यविशेष्यकबोधस्य स्वीकर्तव्यत्वमित्यत आह किं चेति एवं धावनकर्तृमृगकर्मकदर्शनाश्रयत्व
मिति प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकारे कुतः संख्यान्वयस्तत्र न स्यादित्यत आह आख्यातोपस्थाप्येत्यादि तत्रायमभिप्रायस्तार्किकम
ते कृतेराख्यातार्थतया कर्तुरभिधानाद्देवदत्तेन पचतीत्यादिप्रयोगापत्तिवारणाय आख्यातार्थभावनान्वयिसंख्यायामनभिहितायामि

किं चैवं मृगे संख्यान्वयो न स्यात् आख्यातोपस्थाप्यसंख्याप्रकारकान्वयबोधं प्रति मु
ख्यविशेष्यतया प्रथमान्तपदजन्योपस्थितेर्हेतुत्वात्॥ ॥

तस्य कर्तृकरणयोस्तृतीयेत्यनभिहिताधिकारीयसूत्रार्थत्वस्वीकारेणाख्यातोक्तकर्तरि कर्मणि च तदुक्तसंख्यान्वय इति वक्तुमशक्य
त्वेन विशेष्यतयाख्यातोपस्थाप्यसंख्याप्रकारकान्वयबोधं प्रति प्रथमान्तपदजन्योपस्थितिरितरविशेषणत्वतात्पर्यविषयभूतार्थनिष्ठ रामः
विशेष्यतालक्षणमुख्यविशेष्यतासंबंधेन हेतुरिति स्वीकरणीयं तथा च पश्य मृगो धावतीत्यत्र मृगेतरविशेषणत्वतात्पर्यविषयीभूता ६
र्थत्वेन निरुक्तसंबंधेन तदुपस्थितेरभावात् मृगे संख्यान्वयानुपपत्तिर्दोष इति ननु वैयाकरणमतेऽपि मृगस्याभेदसंबंधेन तिङर्थविशेषण
त्वेन तदुपस्थाप्यसंख्यान्वयः कथमिति चेन्न तन्मते तथा कार्यकारणभावानंगीकारात् तन्मते कीदृशः कार्यकारणभाव इति चेदित्थं फ

लव्यापारयोर्धातुराश्रये तु तिङः स्मृताः फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् इत्यत्र फलं विक्लित्यादि व्यापारस्तु भावनाभिधा
साधुत्वेनाभिधीयमाना क्रिया धात्वर्थं निरूप्य तिङर्थमाह आश्रये त्विति फलाश्रयः कर्म व्यापाराश्रयः कर्ता तत्र फलव्या
पारयोर्धातुलभ्यत्वान्न तिङस्तदंशे शक्तिः पदार्थं निरूप्य वाक्यार्थं निरूपयति फलेत्यादि विक्लित्यादिफलं प्रति व्यापारः
प्रधानं विशेष्यमित्यर्थः तिङर्थाः कर्तृकर्मसंख्याः कालस्तत्र कर्तृव्यापारे विशेषणं कर्मणि फले विशेषणं संख्या कर्तृप्रत्यये क
र्तरि कर्मप्रत्यये कर्मणि विशेषणं कालस्तु व्यापारे विशेषणं न तु संख्यावत् कर्तृकर्मणोः अतीतभावनाके कर्तरि पचतीत्या
पत्तेः नापि फले फलानुत्पत्तिदशायां व्यापारसत्त्वे पचतीत्यनापत्तेस्तथा चाख्यातोपस्थाप्यसंख्याप्रकारकबोधं प्रत्याख्या
तजन्यकर्तृकर्मोपस्थितिहेतुरिति कार्यकारणभावः फलितः एवं च चैत्रस्तंडुलं पचतीत्यत्र चैत्राभिन्नैककर्तृकस्तंडुलाभ
तभ्नतकर्मनिष्ठविक्लित्यनुकूलवर्त्तमानकालिको व्यापार इति बोधः चैत्रेण तंडुलः पच्यते इत्यत्र तंडुलाभिन्नैककर्मनिष्ठ
विक्लित्यनुकूलवर्त्तमानकालिकचैत्रकर्तृको व्यापार इति बोधः इत्थं च प्रकृते मृगो धावतीत्यत्र मृगाभिन्नैककर्त्तरि तदुप
स्थितेः सत्त्वेन न तत्र संख्यान्वयानुपपत्तिरिति भावः ननु मुख्येत्यनिवेशे प्रथमान्तपदजन्योपस्थितिहेतुत्वस्वीकारात् न संख्या
न्वयानुपपत्तिरित्यत आह अन्यथेति मुख्यविशेष्यतासंबंधेन तादृशोपस्थितिहेतुत्वानंगीकारे इति तदर्थस्तथा च कार्त्ति

ग०बा० क्रमते तत्रसंख्यान्वयानुपपत्तिरेवसंख्यान्वयेइष्टापत्तिंवारयति म्लगइत्यादिसाधुत्वापत्तेरित्यनेनअयातिपुरुषस्तस्येत्य
७ त्रतच्छब्देनपुरुषपरामर्शोनस्यादितिदूषणंतुवर्त्ततएवेतिचेन्न तच्छब्दस्यविशेषणोपस्थापकत्वस्यापिकुत्रचिद्दृष्ट
त्वेनविशेषणीभूतस्यापिपुरुषस्यतच्छब्देनपरामर्शसंभवादित्याह किंचेति ननुतर्हिघटोयंतज्जातिरित्यादावपिजात्यारोपस्या
तत्रापितत्पदेनघटत्वपरामर्शसंभवादित्याह परंत्विति नपरामर्शोद्दृतिपदोपस्थितिप्रकारस्यतत्पदेनपरामर्शसंभवेपितद्भि

अन्यथाहंसीवधवलाकीर्त्तिरित्यत्राहंस्यामपिसंख्यान्वयप्रसंगः म्लेगोसंख्यानन्वयेइष्टापत्तौवपुषप
धावतिम्लगाइत्यादेरपिसाधुतापत्तेः किंचपटोलपत्रंपित्तघ्नंनाडीतस्यकफावहाइतिचैत्रोग्रामंग
तस्तत्रमैत्रः किंकुरुतेधुनाइत्यादिप्रयोगदर्शनात्तच्छब्देनविशेषणस्यापिपरामर्शः परेतुपदार्थताव
च्छेदकरूपविशेषणस्यक्वचिन्नपरामर्शस्तेनदृष्टौतेराजमातंगाइत्यादौनकाप्यनुपपत्तिः ॥

न्नविशेषणस्यतत्पदेनपरामर्शेबाधकाभावादितिभावः अन्यथादृष्टौतइत्यादौतस्यैवेतितच्छब्देनराजपरामर्शबाधका राम
भावेनतत्साधुत्वापत्तिरित्यत्रेष्टापत्तिमाह तेनेति पदोपस्थितिप्रकारभिन्नस्यविशेषणस्यापिपरामर्शसंभवेनेतित ७
दर्थः ननुपदार्थतावच्छेदकस्यतत्पदेनपरामर्शोनास्तीतुकंतर्हिदृष्टौतेराजमातंगाइत्यत्रराजपदस्यराजसंबं

धिलाक्षणिकतयाराज्ञः पदार्थतावच्छेदकत्वात् तत्पदेन तस्य कथं परामर्श इति चेत्तर्हि पटोलपत्रमित्यत्रापि पटोलपद
स्य पटोलसंबंधिलाक्षणिकतया पटोलस्य पदार्थतावच्छेदकत्वेन तस्येति तच्छब्देन परामर्शानुपपत्तिः नच तत्राविग्रहसमास
योः समानार्थकत्वानुरोधेन षष्ठीतत्पुरुषे पूर्वपदलक्षणाया अस्वीकारेण पटोलपदस्य पटोलमात्रपरतया पदार्थतावच्छे
दकत्वाभावात् तच्छब्देन परामर्शः संभवतीति वाच्यं प्रकृतेपि राजपदस्य राजमात्रपरतया पदार्थतावच्छेदकत्वाभावे न तच्छ
ब्देन परामर्शसंभवात् ननु पटोलस्य पत्रमिति विग्रहवाक्यात् पटोलसंबंधप्रकारकपटोलपदस्य बोधजनकत्वरूपसमानार्थ
कत्वभंगापत्तिस्तद्वारणाय पटोलसंबंधे लक्षणा एवं च पटोलस्य पदार्थतावच्छेदकत्वेन तस्येति तत्पदपरामर्शो न स्यात् नच
पटोलसंबंधः पत्रमितिवत् पटोलपत्रमित्यत्रापि पटोलपदार्थानन्वयापत्तिर्नामार्थयोरिति व्युत्पत्तेरिति वाच्यं घटः पटो न
चैत्र इव मैत्रो गच्छतीत्यादौ नञर्थे पटपदार्थस्य प्रतियोगित्वसंबंधेनेवार्थे चैत्रपदार्थस्य स्वनिरूपितत्वसंबंधेनान्व
यबोधस्वीकारेण निपातातिरिक्तनामार्थस्याभेदातिरिक्तसंबंधेन शाब्दबोधो व्युत्पन्न इति संकोचवत् समस्तनिपातातिरि
क्तनामार्थस्याभेदातिरिक्तसंबंधेनान्वयबोधो व्युत्पन्न इति नियमसंकोचस्वीकारात् नच निपातस्थले व्युत्पत्तिसंको
चेऽनुभवो मानं समासस्थले व्युत्पत्तिसंकोचे मानाभाव इति वाच्यं अत्रापि व्युत्पत्तिसंकोचे विग्रहसमासयोः समाना
र्थकत्वप्रवादस्यैव मानत्वात् तस्मात् पटोलपदस्य पटोलसंबंधलक्षणास्वीकारेण पटोलस्य पदार्थतावच्छेदक

तथा तस्यैवेति तत्पदेन परामर्शानुपपत्तिर्वृत्तेरेवेति चेन्न· घटमानयेत्यत्र कर्मतासंबंधेनानयनोपरि घटोऽन्वेतीति एकदेशि
स्वीकारेण पटोलस्य पत्रमित्यत्र पटोलसंबंधप्रकारकबोध इव पटोलप्रकारकपत्रविशेष्यकोऽप्यन्वयबोधो भवति तथा
च विग्रहसमासयोः पटोलप्रकारकपत्रविशेष्यकबोधस्यैव स्वीकारेण पटोलपत्रमित्यादौ पटोलादिपदस्य लक्षणाभा
वेन पटोलस्य पदार्थतावच्छेदकत्वाभावेन तत्पदेन तत्परामर्शानुपपत्तेरभावात्· एवं च दृष्टो ते राजमातंगा इत्यादौ तस्यैवेति
तत्पदेन राज्ञः पदार्थतावच्छेदकत्वाभावेन परामर्शः संभवतीति भावः· अथवा पटोलस्य पत्रं राज्ञो मातंगा इत्यादिव्यास
स्थले यथा प्रकृत्यर्थान्वितषष्ठ्यर्थप्रकारकबोधो जायते तथा पटोलपत्रं राजमातंगा इत्यादावपि लुप्तषष्ठीस्मरणेन प
टोलाद्यन्वितसंबंधप्रकारकपत्रादिविशेष्यकबोधस्वीकारेऽपि नामार्थयोरभेदेनैवान्वय इति नियमभंगो न· एवं च प
टोलादेः पदार्थतावच्छेदकत्वाभावेन तत्पदेन परामर्शासंभवः· वस्तुतस्तु नामार्थयोरभेदेनैवान्वय इति व्युत्पत्तेः संकोचेमा
नाभावेन लुप्तषष्ठीस्मरणस्य नैयत्याभावेन च संबंधिनि लक्षणाया आवश्यकत्वे समानविषयकबोधजनकत्व
मित्येव विग्रहसमासयोः समानार्थकत्वं न तु समानार्थप्रकारकबोधजनकत्वरूपं तत् आरूढवानरो वृक्ष इत्यत्रा
रूढो वानरो यमिति विग्रहात् यत्कर्मकारोहणकर्ता वानर इति बोधः समासाच्च वानरकर्तृकारोहणकर्मीभूतो वृक्ष इति बो
धः· एवं प्राप्तोदको ग्राम इत्यादावपि तत्र प्राप्तमुदकं यमिति विग्रहात् यत्कर्मकप्राप्तिकर्तृ उदकमिति बोधः समासाच्चो
[illegible]थो जायते पटोलपत्रमिति समासात्तु तत्र लक्षणास्वीकारे पटोलप्रकारक
बोधो जायते तथा च विग्रहवाक्यसमासवाक्ययोः समानप्रकारक॰

दककर्तृप्राप्तिकर्मीभूतोग्रामइत्यन्वयबोधः तथाचतत्रतत्रभिन्नप्रकारकबोधस्यैवोदयेन व्यभिचारात् अथबहुव्रीहे
रविग्रहतया नास्य विग्रहवाक्यत्वं चित्रगुरित्यत्रापिचित्रागौर्यस्येति हि समासार्थकथनं नतु विग्रहः समस्यमानपदैरेवा
र्थकथनस्यविग्रहत्वादिति चेन्न · नहितत्रविग्रहं नास्तीति समासारंभकवाक्यस्यैवविग्रहत्वात् · किंतु बहुव्रीहौतस्यासा
धुत्वं तत्र समस्यमानपदैरेव विग्रहस्यासाधुत्वात् अतएव बहुव्रीहौ विग्रहस्यासाधुत्वज्ञापनाय तत्र नित्यसमासत्वाभिधा
नं · अतएव अविग्रहोनित्यसमास अस्वपदविग्रहोवा नित्यसमास इति तल्लक्षणं तस्य समासघटकीभूतसमानार्थप
दांतरेणार्थप्रतिपत्त्यनुकूलो व्यापारोस्वपदविग्रहः नतुराजपुरुषइत्यादौ राजपदस्य संबंधिनि लक्षणास्वीकारे विशे
षणविशेष्यवाचकपदार्थयोरभेदान्वयबोधेनाभेदकर्मधारय इत्यनेन भेदबोधस्थले कर्मधारयविधानात् कर्मधा
रयापत्तिरिति चेन्न · समासएव विशेषणविशेष्यवाचकपदयोस्समानार्थयोर्यत्राभेदान्वयबोधकत्वं तत्रैव कर्मधा
रयविधानात् · एवं च पदार्थतावच्छेदकरूपविशेषणस्य शक्यतावच्छेदकरूपविशेषणस्येत्यर्थः · तेन शक्यतावच्छेदकभि रा
न्नविशेषणस्यापि परामर्शसंभवेन तथाचराजमातंगाइत्यादौ राजपदस्य राजसंबंधिनि लक्षणायां राज्ञः पदार्थतावच्छे
दकत्वेपि शक्यतावच्छेदकत्वाभावान्न परामर्शानुपपत्तिरिति भावः · नववैयाकरणमते राजपुरुष इति समुदायस्य

वा०वा० राजसंबंधिपुरुषेशक्तिरेव· एवंचराज्ञःशक्यतावच्छेदकत्वेनतत्रपरामर्शोनस्यादितिवाच्यंशक्यतावच्छेदकतात्पर्योप्यधिकर
९ राजरूपविशेषणास्येतस्यतदर्थत्वेनराज्ञस्तथाविशेषणत्वाभावात्तस्यैवेतितस्यदेनपरामर्शानुपपत्तेरभावात्·अतएवोक्तस्य
त्वेतत्पदेनविशेषणस्यापिपरामर्शादेवउत्सर्गोअतिवाधकेप्रवर्त्तमानोविधिःसतिवाधकेकृविरत्स्यतेनतनियमभंगइतित
अतएवोत्सर्गेपंनानियमः· तदुक्तंसर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वमितिदिक्· विवेचितंचेदमध
स्तादनुशिष्टंचोपरिष्टात्स्पष्टीभविष्यति॥ ॥इतिश्रीमहोपाध्यायमैथिलश्रीवंशमणेर्विमर्शः॥ ॥
मृगपदोत्तरंप्रथमापिनस्यादितिधावनक्रियाविशिष्टस्यमृगस्यवाक्यार्थत्वेननामार्थत्वाभावात्·

च्छेदेनमुख्यस्यैवपरामर्शइतिनेत्यर्थः· तत्रसंमतिमाह· तदुक्तमित्यादिना· अवशिष्टमितिविमर्शइत्यंतोग्रंथःस्पष्टः॥ श्री॥
एवंवैयाकरणाभिमतमुपपन्नस्यनैयायिकमतेवाक्यार्थस्यदृशिक्रियायाःकर्मतयान्वयेमृगपदोत्तरंप्रथमापिनस्यादित्युद्भा राम:
वितदूषणमुद्धर्त्तुमुपन्यस्यतिमृगपदोत्तरमित्यादिनस्यादित्यर्थइत्यंतेन· नैयायिकमतेकृतेराख्यातार्थतयाकर्त्तुरभिधानाद्दे ९
वदत्तेनपचतीतिप्रयोगवारणायविशेष्यसंबंधेनाख्यातोपस्थाप्यसंख्याप्रकारकान्वयबोधंप्रतिप्रथमांतपदजन्योपस्थिति

रितरविशेषणत्वतात्पर्यविषयीभूतानिष्ठविशेष्यसंबंधेनहेतुरितिस्वीकरणीयंतथाचमृगोधावतीत्यत्रधावनानुकूलकृतिरूपभा
वनान्वयिनिमृगेधावतीत्याख्याताभिहितसंख्यान्वयानुरोधेनप्रथमांतपदोपस्थाप्यावश्यकतयामृगपदोत्तरंप्रथमादुर्वारेत्याश
येनाह तत्रोच्यतेइत्यादिनामास्तुप्रथमानुपपत्तिरुदाहृतभाष्यकाराशयविरोधोहेलाराजसंमतिविरोधश्चदुर्वारइत्यतआह
यत्विति। ननुप्रकृतिप्रत्ययोसहार्थंब्रूतइत्यस्यन्यायः सुबंतस्थलएवतंडुलमित्यादौद्वितीयार्थकर्मत्वेप्रकृत्यर्थतंडुलप्रकार
प्रातिपदिकाश्रयीभूताप्रथमापिनस्यादित्यर्थस्तत्रोच्यते। मृगोधावतीत्याख्यातोक्तसंख्याकेकर्त्तरिनामार्थप्र
थमापश्चात्मश्पेतिक्रियांतरेवाक्यार्थतयान्वयेपिप्राथमिकीप्रातिपदिकसंज्ञाकर्तुंशक्येतिकोनामप्रथ
मांनिवारयितुमिष्टेइति। ननुमृगकर्तृकोत्कृष्टधावनस्यैवदृशिक्रियायांकर्मतयान्वयोनविवक्षितइतिभा
ष्यकृताशयवर्णनं यद्यपिसुबंतंहियथानेकंतिङंतस्यविशेषणं तथातिङन्तमप्याहुस्तिङंतस्यविशेषणमिति १८
हेलाराजसंमतिप्रदर्शनंतदुभयमविचारयाह प्रकृतिप्रत्ययोसहार्थंब्रूतस्तयोः प्रत्ययस्यैवप्राधान्यमितिनियमा
कान्वयबोधस्यविशेष्यतासंबंधेनोत्पादस्तत्रप्रत्ययभूतद्वितीयाजन्योपस्थितेःसत्वाच्चरितार्थइतितिङन्तस्थलेधात्वर्थविशेष्य
कान्वयबोधएवस्वीकरणीयः भावप्रधानमाख्यातमितिधावनामुख्यमुख्यविशेष्यकान्वयबोधतात्पर्यकतयास्वमुनिव

वनानुरोधादित्याशयेनाह· न चेति· भावप्र[illegible] प्रधानमाख्यातमित्यत्राख्यातपदं न तिङंते रूढं शास्त्रकारैस्तत्राप्रयोगात्प्रयोगे
वतत्रगौणत्वात्· तिङंत्वेच शास्त्रकाराणांप्र[illegible] सिद्धप्रयोगदर्शनात् धात्वर्थभावनामुख्यविशेष्यविशेषकान्वयबोध
स्यवनसंभवति नच भावप्रधानमाख्यातं[illegible] प्रधानानि नामानि जनकमाख्यातमिति वचनं भ्रांतप्रलपनमिति मना
नः सिद्धांते भावप्रधानमित्यस्य संख्याकालातिरिक्ताख्यातार्थस्यैव भावतया तादृशार्थविशेष्यकान्वयबोधं प्रत्याख्या

धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधे न शाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतया प्रत्ययजन्यो
पस्थितिर्हेतुरिति कार्यकारणभावात्· धात्वर्थप्रकारकापरधात्वर्थविशेष्यतान्वयबोधस्य च न संभवति·
नच भावप्रधानमाख्यातं सत्वप्रधानानि नामानीति यास्कमुनिविशेषवचनात् आख्यातस्थले प्रत्ययार्थप्राधान्यं
लभ्यते इति वाच्यं आख्यातपदं तिङ्क्ष्वेव रूढं· ननु तिङंतेष्वित्याख्यातेषु संख्यातार्थेषु संख्यावर्त्तमानत्वादिषु भाव

तं कारणमित्येवंविधकार्यकारणभावपरत्वात्· २॥ प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानमित्यस्य प्रत्ययार्थ
विशेष्यकशाब्दबोधं प्रति प्रत्ययः कारणमित्येवंविधकार्यकारणभावतया यास्कवचनगतस्याख्यातपदस्य तिङ्सुपसा
धारणरूपेण प्रत्ययत्वेन पर्यवसानमेव युक्तं· तदुक्तं पचतीत्यादौ द्वितीयार्थकर्मत्वविशेष्यकबोधस्य प्रत्ययार्थभावना

विशेष्यकवोधस्य च दर्शनादिसाध्यत्वानाह· आख्यातपदमिति नन्वेवमप्युक्तद्धावनस्यैव दृशिक्रियायां कर्मत्वं फलितात्पर्यविषयीभूतमिति तन्मते विरोध इत्यत आह· वस्तुतस्त्विति· नन्वेवं विशेष्यान्वयिनान्वयित्वरूपं विशेषणत्वं न भाष्यसंमतमिति तदुक्तद्धावनस्य साक्षाद्दर्शनक्रियायां विशेषणत्वमित्याशंक्य तादृशविशेषणत्वस्यापि तांत्रिकैः स्वीकारादित्याशयेनाह तांत्रिकमतसंमतिमाह· स्पष्टं चेदमिति पार्थसारथिमिश्रमते विभक्त्यर्थस्येष्टसाधनत्वरूपत्वात् यजेतेत्यादिस्थले याग इष्टसाधनमित्यन्वयवोधस्यैव संख्याकालातिरिक्तार्थस्यैव प्राधान्यमस्तीति नियमात्· वस्तुतस्तु प्रथमांतार्थप्राधान्येपि मृगकर्तृकोक्तद्धावनस्य कर्मतासंबंधेन दृशिक्रियायां विशेषणतयान्वयो न विरुध्यते· यतो हि विशेष्यान्वयिनान्वयित्वमत्र विशेषणत्वं धावनक्रियाविशेष्यो मृगस्तदन्वयिनी दर्शनक्रिया तदन्वयित्वरूपं विशेषणत्वं धावनक्रियाया अक्षितमिति न भाष्यकृदुक्तिविरोधो न वाहेत्वाराज्ञोक्तिविरोध इति त्वं स्पष्टं चेदं मीमांसायां लोष्णीषा ऋत्विजः प्रचरंतीति लोहितोष्णीषा ऋत्विजः प्रचरन्तीत्यादौ तथा हि पूर्ववाक्ये उष्णीषाणामपीष्टसाधनत्वे विशेषणतयान्वयस्तत्र विशेषणत्वेविकारेण दध्ना जुहोतीत्यत्र गुणविधौ दधीष्टसाधनमित्यन्वयवोधो धात्वर्थांशेनुवादः होमनिष्ठं दधिकरणत्वमिष्टसाधनमितिवान्वयवोधस्तथा च प्रकृते लोष्णीषा ऋत्विजः प्रचरन्तीत्यत्र प्रचरणांगभूताः लोष्णीषा ऋत्विज इष्टसाधनमित्यन्वयवोध

प्र०वा० स्वीकारे उष्णीषविशिष्टर्त्विजामिष्टसाधनान्वये उष्णीषस्यापीष्टसाधनत्वान्वयः एवं लोहितोष्णीषाद्युक्तत्रापि वरणांगभूता लोहितोष्णी
षविशिष्टर्त्विज इष्टसाधनामित्यन्वयबोधस्वीकारे लोहित्यविशिष्टोष्णीषस्य ऋत्विग्द्वारेष्टसाधनतान्वये लोहित्यस्यापीष्टसाध
११ नतान्वय इत्यंगीकारस्तथा च प्रकृतेपि धावनक्रियाविशिष्टमग्नस्य इष्टक्रियाकर्मत्वे धावनस्यापि इष्टक्रियाकर्मत्वं भाष्यसं

विशेषणान्वयिनान्वयित्वमेव उष्णीषाणां विशेष्यर्त्विजस्तदन्वयीष्टसाधनत्वं तदन्वयित्वमुष्णीषाणामिति
उत्तरवाक्ये तु एवं स्थले लब्धस्योष्णीषविशिष्टर्त्विककर्तृकरूपविशेष्यात् कर्तृवरणस्य नेष्टसाधनत्वेऽन्व
यः किंतु लोहितमात्र तत्रापि परंपरयोष्णीषद्वारा ऋत्विक्रूपविशेष्यान्वयिनेष्टसाधनत्वे न लोहित्यस्या
न्वयस्वीकारात् इति ·

मतमक्षतमेवेति भावः भट्टमतेपि सोमेन यजेतेत्यत्र सोमवता यागेनेष्टं भावयेदिति वाक्यार्थस्वीकारे सोमविशिष्टयागस्य
भावनायां कर्मत्वेनान्वये यागद्वारा सोमस्यापि करणत्वेनान्वये बाधकाभावेन विशेष्यान्वयित्वस्यन्वयित्वरूपं विशेषणा राम:
त्वमेषामपीष्टमेवेत्युदाहृतस्थले द्वयोरपि सोष्णीषैः ऋत्विग्भिः प्रचरणं भावयेल्लोहितोष्णीषैः ऋत्विग्भिः प्रचरणं भा ११
वयेदित्यन्वयबोधस्वीकारेण विशेषणीभूतोष्णीषस्य ऋत्विग्द्वारा लोहितस्य चोष्णीषद्वारा भावनाकरणत्वस्ये

ष्टत्वेन विशेष्यान्वय्यन्वयिरूपविशेषणत्वमस्याहतमिति धावनस्यापि मृगद्वारा दृशिक्रियायां कर्मतासंबंधेनान्वयित्वमिति
न विरोधः न च भट्टमते यजेतेत्यादौ यागस्यैव करणत्वं न तु सोमस्यापि अन्यथा यागस्य सोमवत्वं सोमेन यजेतेति वाक्यान्तरं
विना नोपपद्यते इत्यर्थाक्षिप्तवाक्ये सोमेन यागं भावयेदित्यन्वयबोधस्वीकारोनुपपन्नः स्यादिति वाच्यं विधानेनानुवादे वा या
गः करणमिष्यते इति वार्त्तिकेन दध्नाजुहोतीत्यादिस्थलेपि केवलगुणविधौ दधिमता होमेनेष्टं भावयेदिति वाक्यार्थबोधस्वी
कारस्तथा चात्रापि दधिमत्वं होमे दध्नाजुहोतीति वाक्यान्तरमन्तरेणधा नोपपद्यते इत्याक्षिप्तवाक्येनान्वयबोधेपि वार्त्तिकोक्तन्या
यानुसारेण धात्वर्थस्यैव करणत्वेन दध्यादिकरणकभावनाया अलाभेन स्वरूपमाणविध्यनुपपत्तिरिति विशिष्टस्य याग
स्य भावनायां करणत्वेनान्वये विशेषणस्यापि करणत्वेनान्वय इत्यंगीकारस्यैव युक्तस्यैव युक्तत्वात् वाक्यान्तरकल्पने
गौरवाच्चेति विशेष्यान्वयित्वरूपविशेषणत्वं मीमांसायां स्पष्टमित्यभिप्रेत्य विशेष्यान्वय्यन्वयिरूपं विशेषणत्वमाह तथा
हीस्मादिस्वीकारादित्थं तेनान्वयः तत्र पुत्तरथाकर्षोपि परंपरया स्वाश्रयत्वसंबंधेनान्वयश्चान्वयो ह्लीघद्वारा ऋत्विग्रूपवि
शेष्ये तथा च लोहित्यस्य स्वाश्रयाश्रयत्वसंबंधेन विशेष्यः ऋत्विग्पदार्थस्तदन्वयिनेष्टसाधनत्वेनान्वय इति फलितं ननु
धावनाश्रयमृगस्य दृशिक्रियायां कर्मत्वेनान्वये पश्य मृगो धावतीति न ब्रूयात् धावंतं मृगं पश्येत्येवं ब्रूयादित्याशयेना
क्षिपति यत्त्विति      यत्तु धावंतं मृगं पश्येत्येवं ब्रूयादिति तन्न पश्य्या      प्रादानां प्रयोगे वक्तु

वै०भा रिच्छाया एव नियामकत्वेनैशापत्तेः नीलं घटं पश्य नीलघटं पश्येति व्याससमासयोः प्रयोगे वक्तृतात्पर्यस्यैव
नियामकतयाऽदृष्टत्वात् पश्य मृगो धावति धावंतं मृगं पश्येति प्रयोगद्वैविध्येपि वाक्यार्थभेदस्यानियामकत्वाभावे वक्तुरि
१२ च्छाया एव नियामकत्वमित्याशयेन समाधत्ते, तत्र पर्यायेत्यादि नासति वक्तृतात्पर्ये धावंतं मृगं पश्येत्यत्रापि इष्टापत्ते नैवं तापश्य मृ
गोधावतीत्यस्य[illegible]ति नह्यभेदार्थकपर्यायाणां मध्ये एकः प्रयोगे सति परः प्रयोगः केनचिन्निषेद्धुं शक्यते इति भावः ननु धा
वंतं मृगं[illegible]पश्य पश्य[illegible]गो धावतीत्यनयोरेकत्र मृगान्वितकर्मत्वस्यापरत्र कर्मत्वसंबंधेन मृगस्य दर्शनक्रियायामन्व

सर्वथा तात्पर्याभावे मृगपदं नोच्चारयेत् किन्तु पश्य धावतीत्येवं ब्रूयादिति न काप्यनुपपत्तिः॥

यदि विवक्षेत्यर्थभेदोस्त्वेवेति धावनक्रियायाः कर्मत्वे नद[illegible]क्रियायामन्वयविवक्षायां पश्य मृगो धावतीत्येव प्रयो
गः कर्तव्य इत्यत आह सर्वथेति न काप्यनुपपत्तिरिति धावनविशिष्टमृगस्य कर्मत्वेनान्वये भाष्यकारविवक्षाविरोधो रामः
धावतीत्यत्र शत्रोपत्तिर्मृगपदोत्तरं द्वितीयापत्तिरित्येवं मायानुपपत्तिः कापि नास्तीति भावः नन्वेकतिङन्तार्थमुख्यविशेष्य १२
कबोधजनकपदसमुदायत्वं वाक्यत्वमित्यत्र तांत्रिकैस्तिङन्तसमूहः सुबन्तसमूह इत्यादिक्रमेण वाक्यं त्रिधा विभज्य त्रयः
काला इत्यादिक्रमेणोदाहृतत्रयः काला इत्यत्र तिङन्तपदाभावेनाव्याप्त्यावदिहितायां जायंत इति पदाध्याहारेणाचित्त

विशिष्टाभिन्नाकालाभिन्नाश्रयवृत्तिज्ञानमित्यन्वयबोधस्वीकारेण वैयाकरणोक्तवाक्यलक्षणस्य निर्दुष्टत्वात् पश्य मृगो धावतीत्य
त्रापि क्रियायाः कर्मतया दृष्टिक्रियायामन्वयेपि बाधकाभाव इत्याशंक्य समाधानमनुवदति स्वित्विति त्रयः कालाज्ञायन्त इत्यत्र
त्वदुक्तलक्षणस्याव्याप्त्यभावेपि कति काला इति प्रश्ने त्रयः काला इत्युत्तरं दृश्यते तत्र क्रियाध्याहारे प्रयोजनाभावाल्लक्षणमव्याप्तमि
त्याशयेनाह तन्नेति क्रियाविनिर्मुक्तत्वसंभवादिति न च कति कालास्त्रयः काला इति प्रश्नोत्तरवाक्ययोरपि भवन्ति ज्ञायंत इति पदाध्याहार

यत्तु त्रयः काला इत्यत्र ज्ञायन्त इति क्रियाध्याहारसंभवात् क्रियाविनिर्मुक्तवाक्यस्योदाहरणस्यासंगत्यापत्तिरिति तन्न
ज्ञानक्रियानाकांक्षयोः कति कालास्त्रयः काला इति प्रश्नोत्तरवाक्ययोः क्रियाविनिर्मुक्तत्वसंभवादिति ॥ 12

संभवान्नोक्तलक्षणमव्याप्तमिति वाच्यं कति काला इति कालत्वव्याप्यप्रकारविशेषजिज्ञासया प्रश्नकरणे मज्जिज्ञासानि
दे वर्तनीयप्रकारविशेषजनकोत्तरवाक्यस्यैवाकांक्षितत्वेनानाकांक्षितक्रियाध्याहारस्यानुचितत्वादिति भावः ----

४११८

सा. नि. को.

श्रीमत्तत्त्वरत्नसरोजेष्वस्तु नतिर्नतिशान्तपरिश्रान्तिः ॥ ॥ सम्बन्धिपदं सम्बन्धित्वसाधारणास्य तत्साक्षात्कारजनकेति ॥ तथा च प्रकृतपक्षतावच्छेदका
वच्छिन्नोद्देश्यकप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारकप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकानुमितिनिष्ठकार्यतात्साक्षात्कारजनकसाक्षात्का
रविषयताश्रयग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वमिति पर्यवसितं। अत्रानुमितिनिष्ठकार्य
तानिवेशे पर्वतो वह्निमानित्यत्र पर्वतो वह्निमान्ह्रदश्च तथेत्याकारकानुमितिनिष्ठवह्निमद्ध्रदविषयकानुमितित्वावच्छिन्नका
र्यतामादाय ह्रदो वह्निमानित्यसमूहालम्बनानुमितिप्रतिबन्धकप्रमाविषये वन्ह्यभाववद्ध्रदेऽतिव्याप्तिः। तादृशानुमितित्वव्यापक
कार्यतानिवेशे नानाविधव्याप्यवगाहिपरामर्शजन्यानुमितिनिष्ठैककार्यताविरहादसम्भवः अतस्तादृशानुमितित्वावच्छि
न्नकार्यता निवेश्या। अत्र च प्रकृतहेतुकत्वानिवेशे पर्वतो वह्निमान्धूमादित्यादौ वन्ह्यभाववति द्रव्येऽतिव्याप्तिः। पर्वत
पक्षकवह्निसाध्यकानुमितित्वावच्छिन्नाया वह्निव्याप्यद्रव्यवान्पर्वत इति परामर्शकार्यतातत्साक्षात्कारजनकसाक्षात्का
रविषयता तादृशपरामर्शप्रतिबन्धकप्रमाविषयत्वात्तस्य। तन्निवेशे तु न तादृशपरामर्शजनकसाक्षात्कारजनकसाक्षात्का
रविषय इति न दोषः। न चैवमपि वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यद्रव्यवांश्चेत्याकारकसमूहालम्बनपरामर्शोत्तरप
र्वतो वह्निमानित्याकारकानुमितीया कार्यता सा वह्निव्याप्यधूमवान्पर्वत इति परामर्शनिरूपिता वह्निव्याप्यद्रव्यवान्प

वं न इति परामर्शनिरूपिता चोभयलिङ्गकानुमितित्वावच्छिन्ने वेति तादृशसाक्षात्कारजनकसाक्षात्कारविषयो द्रव्यलिङ्गक
परामर्शोपीत्युक्तावतिव्याप्तिर्दुर्वारैवेति वाच्यं· प्रकृतहेतुकत्वावच्छिन्नत्वस्यानुमितिनिष्ठकार्यतायां निवेशनीयत्वात्· न च प्रकृ
तहेतुतावच्छेदकावच्छिन्न~~त्वस्यानुमितिनिष्ठकार्य~~ता प्रकारतानिष्ठनिरूपकतासम्बन्धावच्छिन्नावच्छेदकतानिरूप
निष्ठ
कीभूताया निश्चयीयत्वसम्बन्धावच्छिन्नावच्छेदकतातन्निरूपकत्वं तथा च धूमत्वावच्छिन्नप्रकारतानिष्ठावच्छेदकतानि
रूपकनिश्चयनिष्ठावच्छेदकतानिरूपकीभूता कार्यता तस्याः धूमलिङ्गकपरामर्शनिरूपिततया द्रव्यलिङ्गकपरामर्शनिरूपि
तत्वाभावेन तादृशपरामर्शस्योक्तकार्यतासाक्षात्कारजनकसाक्षात्कारविषयत्वात्· नन्वत्र प्रकृतहेतुकत्वावच्छिन्न
त्वस्य कार्यतायां निवेशे प्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकताक निश्चयनिष्ठावच्छेदकतानिरूपकी
भूताया प्रकृतपक्षतावच्छेदकावच्छिन्नोद्देश्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वावच्छि
न्नकार्यता तत्साक्षात्कारजनकसाक्षात्कारविषयेत्यादिलक्षणं पर्यवसितं· एवमपि पर्वतो वह्निमान् धूमादित्यादौ
काञ्चनमयत्वाभाववद्धूमादावतिव्याप्तिः· वह्निव्याप्यकाञ्चनमयधूमवान् पर्वत इति परामर्शनिरूपिता पर्वतो
वह्निमानित्यनुमितित्वावच्छिन्ना कार्यता तस्या अपि प्रकृतहेतुतावच्छेदकीभूतं धूमत्वावच्छिन्नप्रकारतानिष्ठावच्छे
दकतानिरूपकावच्छेदकतानिरूपकत्वात्· तत्साक्षात्कारजनकसाक्षात्कारविषयता तादृशपरामर्शेऽप्रतिबन्धकता

ञ्चनमयत्वाभाववान्धूम इति प्रमाविषयत्वात्तस्य· न च प्रकृतहेतुतावच्छेदकपर्याप्त्यवच्छेदकतानिरूपकप्रकारतानि
ष्ठावच्छेदकतानिरूपकावच्छेदकताकत्वेन कार्यतानिवेशनीया· काञ्चनमयधूमवान्पर्वत इति परामर्शोत्तरानुमि
तिविशेष्यतायां च काञ्चनमयत्वधूमत्वधर्मद्वयपर्याप्तावच्छेदकतानिरूपकप्रकारतानिष्ठावच्छेदकतानिरूपका
वच्छेदकताकः· ननु हेतुतावच्छेदकधूमत्वपर्याप्तावच्छेदकतानिरूपकप्रकारतानिष्ठावच्छेदकतानिरूपका
वच्छेदकताकेति नोक्तदोष इति वाच्यं। तर्दनपरामर्शनिष्ठजन्यानुमितिनिष्ठकार्यतावच्छेदकतानिरूपितप्रका
रतानिष्ठावच्छेदकतानिरूपितस्यावच्छेदकतात्वावच्छिन्नस्य हेतुतावच्छेदकव्याप्योरेव पर्याप्तत्वादसंभवा
पत्तेः· न च हेतुतावच्छेदकनिष्ठावच्छेदकताकनिरूपितत्वावच्छिन्नावच्छेदकताकत्वं कार्यतायां निवेशनीयमिति वाच्यं· ना
नाविधव्याप्तिष्वेकविधव्याप्तिनिवेशेऽन्वयव्यतिरेकव्याप्त्यन्यतरनिवेशेन साधारण्यानुपसंहारित्वादावतिव्याप्तेः·
सकलविधव्याप्तिनिरूपकावच्छेदकताभेदनिवेशे च वह्निमान्गगनादित्यादौ वह्निसमानाधिकरणवन्ह्यभावव्या
पकीभूताभावप्रतियोगिगगनेऽतिव्याप्तिः· गगनव्यापकवह्निसमानाधिकरणवन्ह्यभावव्यापकाभावप्रति
योगितागगनवानिति परामर्शस्य पर्वतो वह्निमानित्यनुमितिं प्रति कारणतया तादृशानुमितिनिष्ठकार्यत्वस्य तादृ
शपरामर्शनिरूपितस्य गगनान्वयव्याप्तिव्यतिरेकव्याप्तिनिष्ठावच्छेदकताभिन्नावच्छेदकतानिरूपकप्रकारतानिष्ठा·

हेतुतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वह्न्यभावे तद्वानवच्छिन्ना

वच्छेदकतानिरूपकनिश्चयनिष्ठावच्छेदकतानिरूपकत्वात्. तत्साक्षात्कारजनकसाक्षात्कारविषयपरामर्शनिष्ठवह्निसामानाधिकरण्यप्रकारकत्वसभावव्यापकाभावप्रतियोगिगगनत्वावच्छिन्नविशेष्यकबुद्धित्वावच्छिन्ननिरूपितप्रतिबन्धकताशालिप्रमाविषयत्वात्तादृशगगनस्येति चेन्न. प्रकृतहेतुतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकविशेष्यतातदवच्छिन्नत्वं प्रकारतानिष्ठावच्छेदकतानिरूपकनिश्चयनिष्ठावच्छेदकतानिरूपकत्वस्य कार्यतायां निवेशनीयत्वात्. तादृशधर्मवृत्तित्वं च विशेष्यतापर्याप्तिनिरूपितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन. तथा च काञ्चनमयधूमविषयकपरामर्शत्वसभावव्यापकाभावप्रतियोगिगगनविषयकपरामर्शनिष्ठकार्यतावच्छेदकतानवच्छेदकताश्रयीभूतायां धूमगगनादिनिष्ठप्रकारतानवच्छेदकतापि निरुक्तप्रकारतानिरूपितविशेष्यतात्वेन हेतुतावच्छेदकताकपर्याप्त्यनुयोगितावच्छेदकीभूतधूमत्वगगनत्वनिष्ठकत्वानिरुक्तविशेष्यतानवच्छिन्नेति नातिव्याप्तिः. ननु परामर्शाव्यवहितोत्तरत्वस्य कार्यतावच्छेदकघटकत्वे प्रकृतपक्षे साध्यकानुमितित्वस्य कार्यतावच्छेदकत्वे प्रयोजनाभावेन तदवच्छिन्नकार्यताघटितलक्षणस्यासम्भवः. न च परामर्शाव्यवहितोत्तरत्वावच्छिन्नं प्रति परामर्शस्य समवायघटितसामानाधिकरण्येन कारणत्वपदार्थत्वात् परामर्शसदात्वेति तदुत्तरं यद्धतत्समगतद्वित्वमु

त्वघतेनस्य घटेपि समवायेनोत्पत्त्यात्तत्परामर्शस्य व्यभिचार इति वाच्यं. अनुमितित्वस्य कार्यतावच्छेदकत्वमात्रेण
तादृशव्यभिचारवारणासंभवेन पक्षसाध्यविषयतायाः कार्यतावच्छेदककुक्षावप्रवेशादिति चेन्न. अप्रामाण्यज्ञाना
नां तत्तद्व्यक्त्यभावकूटस्य कारणतावच्छेदककुक्षौ निवेशात् पक्षे यत्र भावि ज्ञाने धूमाभाववति धूमप्रकारकमिति भ्र
मत्वज्ञानं तदनन्तरं च पर्वतो वह्निव्याप्यधूमवान् घट व्याप्यवत्स्यामिति परामर्शस्तदनन्तरं घटानुमितिवह्न्यनुमिती
तत्र परामर्शद्वितीयक्षणे वह्न्यनुमितितादृशाप्रामाण्यज्ञानव्यक्त्यभाव[illegible]घटितकूटस्यैव तादृशपरा
मर्शकारणतावच्छेदककुक्षौ निवेशनीयतया तादृशकारणतावच्छेदकावच्छिन्नधूमपरामर्शस्य तादृशे परामर्शद्वितीय
क्षणोत्पन्नघटानुमितौ व्यभिचारवारणाय तादृशाप्रामाण्यज्ञानव्यक्त्यभावकूटस्य कार्यतावच्छेदककोटावपि निवे
शनीयतया तादृशाप्रामाण्यज्ञानानास्कन्दितधूमालोकविषयकसमूहालम्बनपरामर्शोत्तरं पर्वते वह्न्यनुमितौ व्यभि
चारवारणाय तादृशाप्रामाण्यज्ञानव्यक्त्यभावानां कार्यतावच्छेदककोटिप्रविष्टकूटान्तर्भावेपि ऽन्यस्थले तद
निवेशेन बाधवारणाय पक्षसाध्यावगाहित्वस्य कार्यतावच्छेदककोटौ निवेशो विन्यात्. न चैवं सति तादृशकार्यतावच्छेद
कविषयत्वावच्छिन्नत्वेन प्रतिबध्यतानिवेशे नैवातिव्याप्तिवारणसम्भवे कार्यतासाक्षात्कारजनकसाक्षात्कार
विषयताशालिग्रहनिष्ठत्वेन प्रतिबध्यतानिवेशनं व्यर्थमुत्तरकल्पानुसरणस्यानुचितमिति चेन्न. पर्वतो वह्नि
मान्धूमादित्यादौ घटाभाववत्पर्वते ऽतिव्याप्तेः तत्र पर्वतो वह्निव्याप्यधूमघटवानित्येकत्र द्वयमिति रीत्या ज्ञानी
याया घटत्वावच्छिन्नप्रकारतानिरूपितविशेष्यता तस्या अपि वह्निव्याप्यधूमप्रकारतानिरूपितविशेष्यत्वावच्छिन्ना

याः कार्यतावच्छेदकतया तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताशालिप्रमाविषयत्वस्य तत्र सत्त्वात्। न चैवं तादृशकार्यतानवच्छेदकविषयत्वावच्छिन्नत्वस्य प्रतिबध्यतायां विवक्षणेनोक्तातिव्याप्तिः घटाभाववत्पर्वतविषयकनिश्चयनिरूपितप्रतिबध्यतायास्तादृशकार्यतानवच्छेदकघटत्वावच्छिन्नप्रकारकत्वावच्छिन्नत्वादिति वाच्यं। ह्रदो वह्निमान्धूमादित्यादौ वन्ह्यभाववद्ध्रदादावव्याप्त्यापत्तेः। तज्ज्ञानीयप्रतिबध्यतावच्छेदकत्वस्य महानसीयवह्निमान्ह्रद इत्याकारकज्ञानीयह्रदत्वावच्छिन्नविशेष्यतानिरूपितमहानसीयवह्नित्वावच्छिन्नप्रकारतायां सत्त्वात् तस्याश्च तादृशकार्यतायामनवच्छेदकत्वात्। एवं घटो गगनवानित्यादावपि गगनाद्यव्याप्तिः तादृशस्थले विषयकनिश्चयप्रतिबध्यत्वस्य तादृशकार्यतावच्छेदकविषयताशून्यनिर्धर्मितावच्छेदकज्ञानसाधारण्येन तया कार्यतानवच्छेदकविषयितानवच्छिन्नत्वाभावात्। न च तादृशकार्यतानवच्छेदकविषयताशून्यज्ञानीयविषयत्वावच्छिन्नत्वेन प्रतिबध्यताविशेषणम्। तथा च तादृशकार्यतानवच्छेदकमहानसीयवह्नित्वावच्छिन्नविषयताशून्यह्रदो वह्निमानित्यनुमितिमादाय तादृशनिर्धर्मितावच्छेदकज्ञानीयविषयताशून्यघटो गगनवानित्याकारकज्ञानमादाय च पूर्वोक्तस्थलद्वये च न दोषासमन्वयः। वह्निव्याप्यधूमघटवान्पर्वत इत्याकारकज्ञानीयघटत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताया उक्तज्ञानीयत्वाभावादेव तदवच्छिन्नप्रतिबध्यतानिरूपितत्वेनोक्तातिव्याप्तिश्चेति वाच्यं। तादृशकार्यतानवच्छेदनिरवच्छिन्नविशेष्यताशून्यत्वस्य क्वापि ज्ञानेऽसत्त्वेनाऽसम्भवापत्तेः। न च तथापि कार्यतानवच्छेदकविषयताशून्यत्वमि

त्येन कार्यतावच्छेदकविषयताविशिष्टान्यविषयताशून्यत्वस्य विवक्षणान्नासम्भवः विषयतावैशिष्ट्यं च स्वतादात्म्यस्वावच्छिन्नत्व
स्वनिरूपितत्वस्वनिरूपितावच्छेदकत्वस्वावच्छेद्यनिरूपितत्वस्वावच्छेद्यनिरूपितावच्छेदकत्वैतदन्यतमसम्बन्धेन अत्र प्रथम
द्वितीयसम्बन्धनिवेशाच्च ह्रदो वह्निमानित्यत्र ह्रदत्वावच्छिन्नविशेष्यतायाः ह्रदत्वनिरूपितनिरवच्छिन्नविशेष्यतायाश्च सं
ग्रहाय तृतीयचतुर्थसम्बन्धनिवेशाच्च धूमाभाववद्वृत्तिवह्निरूपव्यभिचारे व्याप्तिवारणाय अन्यथा धूमाभाववद
वृत्तिवह्निमान् तादृशालोकवान् धूमाभाववदवृत्तिमानित्यादिनानाहेतुतावच्छेदकावगाहि हेतुतावच्छेदकानवगाहि
नानाविधपरामर्शानामेकरूपेणैव कारणतया कार्यतावच्छेदककोटावेकधर्मावच्छिन्नप्रतिव्यापकसामाना
धिकरण्यघटितनानाविधव्याप्त्यवगाहिपरामर्शकारणतायां व्यभिचारवारणाय प्रवेशनीयाऽव्यवहितोत्तरत्व
शरीरे पूर्वोक्तपरामर्शानामेकरूपेणैव प्रवेशो [illegible] हेतुतावच्छेदकवह्नित्वादिनिष्ठा या निरवच्छिन्नविशेष्यता
निरूपितप्रकारतायाः व्याप्तिप्रकारतानिरूपितधर्मितावच्छेदकतायाश्च तादृशानुमितिनिष्ठकार्यतानवच्छेदक
तया तच्छून्यत्वस्य तादृशव्यभिचारज्ञानप्रतिबध्यज्ञानाहान्नेनयोऽव्याप्त्यापत्तेः पञ्चमषष्ठसम्बन्धनिवेशाच्च प
र्वतो वह्न्यभाववानित्यादौ वह्निमत्पर्वतरूपबाधसंग्रहाय अन्यथा वह्न्यभावव्याप्यहेतुमत्तापरामर्शस्यत्वाद्य
वादवच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यतावच्छि
न्नविधेयताकत्वेन वह्न्यभावत्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्नं प्रत्येव कारणतया वह्निनिष्ठ
वह्नित्वनिरूपितनिरवच्छिन्नविशेष्यत्वप्रकारतानिरूपितविशेष्यत्वादेः कार्यतानवच्छेदकत्वयातकून

तस्य तादृशबाधज्ञानप्रतिबध्यज्ञाने सत्वेन, व्याप्त्यापत्तेरिति वाच्यं. पर्वतो धूमवान् गगनादित्यादावाधेयत्वप्रतियोगि
त्वोभयाभाववद्गगने अतिव्याप्त्यापत्तेस्तादृशकार्यतानवच्छेदकविषयिता धूमत्वस्य गगनव्यापकधूमसामा
नाधिकरण्यधूमाभावव्यापकीभूताभावप्रतियोगित्ववद्गगनवान्पर्वत इत्याकारके व्याप्तिरूपांशे एकत्र द्वय
मितिरीत्या परामर्शे तादृशानुमितिकारणे सत्वेन तज्ज्ञानप्रतिबन्धकज्ञानविषयत्वस्य पक्षे सत्वात्. यत्कि
ञ्चित्कार्यतानवच्छेदकविषयता धूमत्वस्य ज्ञानविशेषणत्वेन न दोषवारणेपि ह्रदो वह्निमान् धूमादित्यादौ व
ह्न्यभाववद्वृत्तिधूमतादृशेतरोभयाभाववद्ध्रदेऽतिव्याप्तिरशक्यपरिहारा एकत्र द्वयमितिरीत्या वन्ह्यभा
ववद्वृत्तिधूमान्योकयानुमितिज्ञानेऽभयसाधारणसाध्याभाववद्वृत्तित्वावच्छिन्नप्रकारताशालिनिश्च
याप्यवह्नितोन्तरत्वघटितधर्मावच्छिन्नयत्किञ्चित्कार्यतानवच्छेदकविषयता धूमत्वस्याक्षततया: एवमव्या
वह्नितोन्तरत्वस्य कार्यतावच्छेदककोटौ निवेशनीयतया, प्रामाण्यज्ञानानामननुगतरूपेणोत्तेजकतामते प
क्षसाध्यविषयितायाः प्रवेशनाविरहेण कार्यतावच्छेदककुक्षावप्रवेशेन तादृशकार्यत्वाप्रसिद्ध्या, सम्भव
स्य दुर्वारत्वाद्दोषाच्चेति दिक् । अनुमितिनिष्ठकार्यतासाक्षात्कारजनकसाक्षात्कारीयविषयताश्रयग्रहनिष्ठ
प्रतिबध्यतानिवेशे प्रकृतानुमितिनिष्ठकार्यतान्यानुमितिनिष्ठकार्यताविषयकसमूहालम्बनसाक्षात्कारवि
षयताश्रयादाय पर्वतो वह्निमानित्यादौ वह्न्यभाववद्ध्रदादावतिव्याप्तिरतस्तादृशकार्यताविषयकभिन्नत्व

साक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकसाक्षात्कारीयविषयताश्रयग्रहनिष्ठप्रतिबध्यतानिवेशिती
यान्नत्वत्र प्रथमसाक्षात्कारनिवेशोक्तिप्रयोजनमभिमिचेत्न· अनुमितिनिष्ठकार्यताविषयकत्वावच्छिन्नजन्यतानि
वेशेऽनुमितिःपरामर्शकार्येत्यनुमितिनिष्ठकार्यत्वविषयकानुमितित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदका
याप्रत्यक्षपरामर्शीयहेतुविषयतातदाश्रयहेतुमत्भूतलं घटवदितिज्ञाननिष्ठप्रतिबध्यतामादायपर्वतोवन्हि
मानित्यादौ घटाभाववद्भूतलेऽतिव्याप्तेः साक्षात्कारत्वनिवेशेनु परामर्शकार्यतापास्तदनवच्छिन्नत्वेननार्थ
दोषः द्वितीयसाक्षात्कारत्वानिवेशेनुदृशकार्यतासाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकी
भूतायाऽनुमितित्वेन भूतलं घटवदितिज्ञाननिष्ठसाक्षात्कारविषयतातदाश्रयग्रहनिष्ठप्रतिबध्यतामादायघ
टाभाववद्भूतलेऽतिव्याप्तिः यद्धर्मावच्छिन्नविषयतानिरूपकज्ञानजनकतावच्छेदिकातद्धर्माश्रयग्रहनिष्ठप्रतिबध्यता·
निवेशे परामर्शघटकज्ञानत्वमादाय सद्धेतौ दोषः अतो यद्धर्मावच्छिन्नग्रहत्वव्यापिकाताऽदृशज्ञानजनकतेति विवक्ष
णीयं तथा चासम्भवः अनुमितित्वावच्छिन्नग्रहत्वाव्यापकानुमितिस्थानादौ नादृशजनकतानिरहात् अतः साक्षा
त्कारत्वनिवेशः नन्वस्तु तत्कार्यताव्यक्तिसाक्षात्कारत्वावच्छिन्नप्रतितदाश्रयव्यक्तिसाक्षात्कारत्वेन तन्नि
रूपकव्यक्तिसाक्षात्कारत्वेनैव हेतुतया प्रकृतपक्षसाध्यहेत्वनुमितिनिष्ठकार्यतानिरूपिताधेयतासम्बन्धावच्छिन्ना
वच्छेदकतानिरूपकजन्यतानिरूपितजनकतावच्छेदकविषयताश्रयग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्ध

कतानिवेशेऽनुमितिनिष्ठकार्यताविधेयकानुमितित्वावच्छिन्नजन्यतानिरूपितसाध्यविषयतानिष्ठावच्छेदकतायां साध्यता
वच्छेदकावच्छिन्न[illegible]स्यावच्छेदकतया साध्यस्याधेयतासम्बन्धेन तावच्छेदकत्वं भ्रमप्रमासाधारणसाध्यतावच्छेदका
वच्छिन्नविषयताशाल्यनुमितित्वस्यैव परामर्शजन्यतावच्छेदकत्वात् एवं च प्रथमसाक्षात्कारत्वानिवेशे पर्वतो
वह्निमानित्यादौ घटाभाववद्भूतले न प्रागुक्तरीत्यातिव्याप्तिः एवं तादृशकार्यतासाक्षात्कारं प्रति तादृशानुमितित्वे
नाद्यावगाहिज्ञानस्य कारणताभावेन द्वितीयसाक्षात्कारनिवेशस्यापि न सार्थक्यमिति चेत् अत्र केचित्। न
घन्तेः स्वरूपतो भानमते प्रथमसाक्षात्कारत्वानिवेशे प्रागुक्तातिव्याप्तिः स्वरूपतस्तु वह्निविधेयकानुमिति
निष्ठपरामर्शजन्यतायां साध्यविधेयतायाः साध्यतावच्छेदकावच्छिन्नत्वेनावच्छेदकत्वासम्भवेन साध्यनिष्ठ
विषयतात्वेनैवावच्छेदकत्वात् तृतीयसाक्षात्कारत्वानिवेशे तादृशकार्यतासाक्षात्कारत्वावच्छिन्नं प्रति तदाशय
व्याप्तिसाक्षात्कारत्वेन हेतुत्वेऽपि तदाश्रयानुमितेर्भूतलं घटवदिति ज्ञानस्य चानुमितित्वेन यः साक्षात्कारस्तस्या
पि हेतुतया तन्निरूपितानुमितित्वनिष्ठप्रकारतानिरूपितविशेष्यताया ऐक्येन तादृशजनकतावच्छेदकतादृश
विषयताश्रयीभूतलं घटवदिति ज्ञानमिति [illegible]नातिव्याप्तिवारणाय यद्विषयताशालिसाक्षात्कारत्वव्यापिका ताद
शजनकतेति वदन्त्ये· साक्षात्कारत्वानिवेशे असम्भवः अनुमितिशाब्दादौ जनकत्वाभावात् उक्ततन्निवेश इत्याहुः।
वस्तुतस्तादृशकार्यताविषयकत्वावच्छिन्नजन्यतानिरूपितजनकतानिरूपितविषयतानिष्ठावच्छेदकतानिरूपिता

धेयतासम्बन्धावच्छिन्नावच्छेदकताश्रयग्रहनिष्ठप्रतिबध्यतानिवेशेन प्रागुक्तदोषावकाशः. परामर्शनिष्ठानुमितिकारणतायां हेतुविषयतायाः हेतुतावच्छेदकावच्छिन्नत्वेनैवावच्छेदकतया तादृशविषयतानिष्ठावच्छेदकतायां हेतोराधेयतासम्बन्धेनावच्छेदकत्वाभावात्. अन्यथा हेतुतावच्छेदकरूपेणाप्यवगाहिपरामर्शस्यानुमितिजनकत्वापत्तेः. एवं च तादृशानुमितिनिष्ठकार्यताविषयतानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकतावच्छेदकता नतु हेतुमद्भूतलं घटवदित्याकारकज्ञानानिष्ठा एवं चानुमितिभूतले घटवदित्याकारकज्ञानयोर्नुमितित्वेन साक्षात्कारत्वेन कार्यताविषयकसाक्षात्कारप्रतिकारणत्वेपि तदीयविषयताया अनुमितिनिष्ठत्वेनैव जनकतावच्छेदकतया तन्न भूतलं घटवदिति ज्ञानस्याधेयतासम्बन्धेनानवच्छेदकतया च पूर्वोक्तदोषाभावात्. तथापि साक्षात्कारत्वे विषयताविशेषोनातिरिक्त इति मताभिप्रायेण साक्षात्कारत्वेनिवेशः. किंच कार्यधर्मपुरस्कारेण निवेशासम्भवे व्यापकधर्मपुरस्कारेण निवेशस्यानुमितिग्रन्थे भट्टाचार्येणाङ्गीकृतत्वात्साक्षात्कारत्वनिवेशः. यद्वा आधेयतासम्बन्धावच्छिन्नावच्छेदकताश्रयग्रहनिष्ठप्रतिबध्यतालाभार्थमेव तन्निवेश इति दिक्.।

ननु तादृशकार्यताविशिष्टग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकयथार्थज्ञानविषयत्वं लक्षणमास्तां. कार्यतावैशिष्ट्यं च स्वाश्रयत्वस्वनिरूपितकारणतावत्त्वोभयसम्बन्धेन. तथा च पक्षे साध्यसाध्यव्याप्यहेत्ववगाहि अनुमित्यात्मकग्रहमादाय सर्वत्र लक्षणसमन्वय इति चेन्न साधारण्यानुपसंहारित्वयोरव्याप्तेः. अनुपसंहारिनिश्चयप्रतिबध्यत्वस्य तादृशोभयसम्बन्धेन प्रकृतहेतुमत्तानिश्चयोत्तरप्रकृतपक्षसाध्यविषयका

नुमितित्वघटितधर्मावच्छिन्नकार्यतावत्यां प्रकृतपक्षे प्रकृतसाध्यतन्निरूपितान्वयव्याप्तिविशिष्टहेत्ववगाह्यनुमितावसत्वात्
साधारण्यविषयकनिश्चयप्रतिबध्यत्वस्य व्यतिरेकव्याप्त्यवगाहितादृशसमूहालम्बनानुमितितावसत्वाम · नच
कार्यतावैशिष्ट्यं ग्रहे · निवेश्य तादृशप्रतिबध्यतायां निवेश्यते वैशिष्ट्यं च · स्वविशिष्टग्रहभिन्नभेदप्रतियोगितावच्छेद
कत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन स्ववैशिष्ट्यं च · पूर्वोक्तोभयसम्बन्धेन ·
एवञ्च तादृशकार्यत्वविशिष्टप्रतिबध्यता साधारण्यनिश्चयप्रतिबध्यता · अनुपसंहारित्वनिश्चयप्रतिब
ध्यता च · स्वत्वस्यानुगतत्तया स्वपदेन यत्किञ्चित्कार्यताया एव ग्रहणसम्भवात् · प्रकृतहेतौ निश्चयोत्तरः
तादृशानुमितित्वघटितधर्मावच्छिन्नयत्किञ्चित्कार्यताविशिष्टग्रहे सर्वत्र साधारण्यनिश्चयप्रतिबध्यत्व
स्य तादृशयत्किञ्चित्कार्यताविशिष्टग्रहे · नुपसंहारित्वनिश्चयप्रतिबध्यत्वस्य च सत्वात् · परम्परया: सम्बन्ध
स्य स्वीकारे तु तादृशसम्बन्धस्य प्रकारमुद्रया निवेशः कार्यः · तत्प्रकारश्च प्रकृतहेतुविषयकनिश्चयोत्तर प्रकृतपक्ष
साध्यविषयकानुमितित्वघटितधर्मावच्छिन्नकार्यता समानाधिकरणोभयावृत्तिधर्मनिष्ठनिरवच्छिन्ना
वच्छेदकतानिरूपकतादृशोभयसम्बन्धावच्छिन्नकार्यतानिष्ठावच्छेदकतानिरूपकग्रहनिष्ठावच्छेदकता
निरूपकभेदनिष्ठावच्छेदकतानिरूपकप्रतियोगित्वनिष्ठावच्छेदकतानिरूपकावच्छेदकत्वनिष्ठप्रतियोगि
ताकाभाववत्प्रतिबध्यतात्वेनेति · स्वनिरूपितकारणतायाः सम्बन्धस्यानङ्गीकारे तु तादृशसमूहालम्बना

स्वकप्रहनिष्ठाश्रयतानिरूपकतायां तन्निष्ठकारणतानिरूपकनिरूपकतायाश्चोभयोरैक्यमिति रीत्या तादृशापत्ति
श्चकार्यताव्यक्त्यवगाहिप्रतीतिसिद्धाभावत्वप्रतिबध्यतायां निवेशनीयः तत्प्रकारेण तादृशकार्यतात्वसमाना
करणोभयावृत्तिधर्मनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकाधेयतासम्बन्धावच्छिन्नावच्छेदकतानिरूपकनिरूपक
तानिष्ठावच्छेदकतानिरूपकनिरूपितत्वनि[illegible]ष्ठावच्छेदकतानिरूपकाश्रयत्वनिष्ठावच्छेदकतानिरूपक
ज्ञाननिष्ठावच्छेदकतानिरूपकाधेयत्वनिष्ठाधेयत्वनिष्ठावच्छेदकतानिरूपकभेदनिष्ठावच्छेदकतानिरूपकप्र
तियोगित्वनिष्ठावच्छेदकतानिरूपकीभूताया अवच्छेदकतायावच्छिन्ना प्रतियोगिता तन्निरूपितप्रतियोगित्व
निष्ठावच्छेदकतानिरूपितेत्यादिनिरूपकत्वनिष्ठावच्छेदकतानिरूपिताया आधेयत्वसम्बन्धावच्छिन्नावच्छेदकता
तन्निरूपकनिरूपकत्वनिष्ठावच्छेदकतानिरूपकनिरूपितत्वनिष्ठावच्छेदकतानिरूपककारणत्वनिष्ठावच्छेदक
तानिरूपकज्ञाननिष्ठावच्छेदकतानिरूपकज्ञानत्वनिष्ठावच्छेदकतानिरूपकभेदनिष्ठावच्छेदकतानिरूपकप्र
तियोगित्वनिष्ठावच्छेदकतानिरूपकावच्छेदकतात्वावच्छिन्नप्रतियोगिताकाभावत्वप्रतिबध्येनेति ऽभयावृ
त्वस्य न स्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्योभयसम्बन्धेन भेदविशिष्टान्यत्वे तादृशसम्बन्धास्वीकारात्
परत्वैकत्ववदन्यावृत्तित्वे तथाप्रसिद्धमेकत्ववदन्याप्रसिद्धेः अत एकत्वादिघटके स्वरूपतो भानमतनमवतत्वे
तद्घटकनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकप्रतियोगित्वनिष्ठावच्छेदकता
निरूपकभेदनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकनिरूपितत्वनिष्ठावच्छेदकतानिरूपक

प्रतित्वनि~~[illegible]~~ त्वावच्छिन्नप्रतियोगिताकाभावत्वं तथा च न पूर्वोक्तदोष इति वाच्यं. तथापि. वन्हि
व्याप्यवान् वन्हिव्याप्यधूमवान् तादृशालोकवानित्यादिज्ञानानामेकरूपेण। कारणत्वे धूमाभाववद्वृत्तिर्वन्हि
रितिव्यभिचारनिश्चयप्रतिबध्यताया धूमव्याप्यवन्हिमान् तादृशघटवान्. तादृशपटवान्. इत्यादिसमूहाल
म्बनज्ञानेषु तादृशकार्यतावत्त्वाऽसत्वेन व्यभिचारैः व्याप्त्यापत्तेरितिदिक्॥ ॥ बाधसत्प्रतिपक्षस्वरू
पासिद्ध्याश्रयासिद्धिस्वव्याप्तिवारणाय प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षनिवेश इति॥ नन्वत्र प्रकृतपक्ष
विषयकत्वानिवेशे साधारण्यस्याप्यसङ्ग्रहात्कथं तदभिधानमिति चेन्न. पक्षविषयकत्वानिवेशेऽपि तत्राव्या
प्तिविरहात्. तथाहि. प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यविषयत्वे सति प्रकृतसाध्यनिरूपितव्याप्तिवि
शिष्टप्रकृतहेतुमत्त्वावच्छेदकावच्छिन्नहेतुविषयकानुमितिव्यापकत्वं प्रतिबध्यतायां लक्षणे विशिष्टं. तच्च
यदि स्वरूपसम्बन्धेन तदा साधारण्यासङ्ग्रहः. पर्वतो वन्हिमान् चत्वरो वन्हिमान् ह्रदो वन्हिमानिति समूहा
लम्बनानुमितिषु पक्षे हेतुमत्ताज्ञानकालीनासाधारण्यविषयकनिश्चयप्रतिबध्यत्वाभावात्.
किन्तु. स्वनिरूपितप्रतिबन्धकतावच्छेदकविषयिताविच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वसम्ब
न्धेन व्यापकत्वं विवक्षणीयं. तथा चासाधारण्यविषयकनिश्चयप्रतिबध्यतायाः स्वनिरूपितप्रति
बन्धकतावच्छेदकपक्षधर्मिकहेतुमत्ताज्ञानकालीनज्ञानीयासाधारण्यविषयकत्वावच्छिन्नप्रति

वन्धकतानिरूपितप्रतिवध्यतायाः पर्वतघटादिधर्मिकवन्ह्यनुमितिरूपसर्वविषयमात्रसत्वात्. वन्ह्यभावव[illegible]
[illegible]दादिरूपवाधादिनिश्चयप्रतिवध्यतायाः घटोवन्हिमानित्याद्यनुमितौ धूमसम्बन्धेनासत्वाद्वाधाद्य
सङ्ग्रहः नच पर्वतोवन्हिमान्धूमादित्यत्र वन्हिव्यापकीभूताभावप्रतियोगित्वेऽतिव्याप्तिः. वन्हिव्यापकी
भावनिरूपितत्वाभाववत्प्रतियोगित्वमेवेत्याकारकबुद्धित्वावच्छिन्नाया प्रतिवध्यता तस्याः स्वनिरू
पितप्रतिबन्धकतावच्छेदकीभूताया वन्हिव्यापकीभूताभावप्रतियोगी धूम इति ज्ञानीया वन्हिव्याप
कीभूताभावप्रतियोगित्वविषयकज्ञानत्वावच्छिन्नाया घटो धूमवान्पर्वतो धूमवानित्यादिज्ञानकालीनवन्हिव्या
पकीभूताभावप्रतियोगी धूम इति निश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिवध्यताया घटोवन्हिमा[illegible]नु
घटोवन्हिमानिति समूहालम्बनानुमितौ सत्वेनातिरिक्तप्रतिवध्यतायाः उक्तप्रतिवध्यत्वरूपपरम्परास
म्बन्धेनोक्तसमूहालम्बनानुमितित्वव्यापकत्वादिति वाच्यं स्वनिरूपितप्रतिबन्धकतावच्छेदकविषयता
निष्ठभेदप्रतियोगितावच्छेदकत्वेनास्तीति प्रतीतिसिद्धाभाव[illegible]वदस्ववच्छेदकतानिरूपकप्रतिबन्ध
कतानिरूपकप्रतिवध्यतायाः सम्बन्धत्वस्वीकारात् एवं सति वन्हिव्या[illegible]पकीभूताभावनिरूपि
तत्वाभाववत्प्रतियोगित्वमिति बुद्धित्वावच्छिन्नप्रतिवध्यतानिरूपितप्रतिबन्धकतायामवच्छेदकी

धूमो या वह्निव्यापकीभूताभावनिरूपितप्रतियोगित्वमिति निश्चयीया तादृशप्रतियोगित्वविषयता तत्र वह्निव्या
पकीभूताभावप्रतियोगी धूम इति निश्चयीयधूमत्वावच्छिन्नविशेष्यतानिरूपितप्रकारत्वावच्छेदकतादृशप्र
तियोगिताविषयतायां वर्तमाना या वह्निमत्ताबुद्धित्वावच्छिन्नप्रतिबन्धकतावच्छेदकतावच्छेदस्यसत्वात्
तादृशविषयतात्वव्यापकावच्छेदकताकप्रतिबन्धकतानिरूपकप्रतिबध्यतायाः पर्वतो वह्निमानित्याद्य
नुमितावसत्वेनातिव्याप्तिविरहात्. असाधारण्यनिश्चयप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविष
यितासामान्यस्य घटपटादिपक्षकानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकवि[illegible]
स्य तथात्वसम्भवः. न च ह्रदो वह्निमान् जलादित्यादौ जलाभाववान्वह्निमान् ह्रदो वह्निव्याप्यजलवानित्यनु
मितेरपि लक्षणघटकतया तत्रासाधारण्यनिश्चयप्रतिबध्यत्वस्य नास्तीति तत्र पक्षतावच्छेदकावच्छि
न्ने हेतुमत्ताज्ञानस्याहार्यतया तस्या असाधारण्यनिश्चयस्याप्रतिबन्धकत्वात्कथमसाधारण्यसङ्ग्रह
इति वाच्यं. किञ्चिद्धर्मविशिष्टानुमितित्वव्यापकत्वस्य प्रतिबध्यतायां विवक्षणीयत्वात्. वैशिष्ट्यं च स्वाव
च्छिन्नविशेष्यतानिरूपितसाध्यप्रकारतावत्वस्वावच्छिन्नविशेष्यतानिरूपितसाध्यव्याप्यहेतुप्रकारता
वत्वोभयसम्बन्धेन. तथा च जलाभाववान्वह्निमान् ह्रदो वह्निव्याप्यजलवानित्यनुमितित्वं तादृशी. पटो

वह्निमान्घटो वह्निमानित्यनुमितिश्च तादृशी. तत्र चासाधारण्यनिश्चयप्रतिवध्यता याः सङ्ग्रहः. एतादृशापरम्परा
याः सम्बन्धत्वानङ्गीकारेण तादृशप्रतिवध्यतायाः प्रकारमुद्रयानिवेशोऽर्थिकफलम्: तथाहि. यत्किञ्चित्प्रतिवध्य
प्रतिवन्धकतानिरूपित
तानिरूपितप्रतिवन्धकतावच्छेदकविशेषतासामान्यावच्छिन्नप्रतिवध्यता वा नेति प्रतीतिसिद्धोयः प्रकृतानु
मितिनिष्ठो भेदस्तन्निरूपिताधिकरणभिन्नप्रतियोगितानिरूपितप्रतिवध्यत्वनिष्ठावच्छेदकतानिरूपितनिरू
पितत्वनिष्ठावच्छेदकतानिरूपितप्रतिवन्धकतानिष्ठावच्छेदकतानिरूपितनिरूपकत्वनिष्ठावच्छेदकतानिरूपि
तावच्छेदकत्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपित
प्रतियोगित्वनिष्ठावच्छेदकतानिरूपितभेदनिष्ठावच्छेदकतानिरूपितवृत्तित्वनिष्ठावच्छेदकतानिरूपितावच्छेदक
त्वनिष्ठावच्छेदकतानिरूपितविषयतानिष्ठावच्छेदक[illegible]त्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनि
ष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपितप्रतिवन्धकतानिरूपितविषयतानिष्ठावच्छेदकत्वनिष्ठावच्छेदक
तानिरूपितावच्छेद[illegible]त्वनिष्ठावच्छेदकतानिष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपितप्रतिवन्धकत्वनिष्ठावच्छेदक
तानिष्ठावच्छेदकतानिरूपितानिरूपितत्वनिष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपितप्रतिवध्यतानिष्ठप्रतियोगि
त्वनिष्ठसम्बन्धावच्छिन्नावच्छिन्नावच्छेदकतानिरूपिताधेयतासम्बन्धावच्छिन्नावच्छेदकत्वे नास्तीति प्रतीति

सिद्ध्यभावत्वप्रतिबध्यतापालक्षणो निवेश इति अत्रोभयत्राभावो विधेयन्यूनवारकपर्याप्तिघटितो बोध्यः किञ्च पक्ष
विषयकत्वानिवेशेः साधारण्येः व्याप्तिशरीरे वनावतरत इति यद्रूपावच्छिन्नविषयताशालिनिश्चयसामान्ये प्रकृ
तानुमित्यप्रतिबन्धकत्वासाधारण्यां विषयकत्वोभयाभाव इति लक्षणस्य सव्यभिचारे विवक्षणीयत्वादिति दिक्।
साध्याप्रसिद्ध्यव्याप्तिवारणप्रयोजनकत्वेन तदुपादानस्येतिनुमसत् वह्निनौका[illegible]नमप्रवृत्तिनिरासायेत्यस्तु
वह्नित्वादिना वह्न्याद्यनुमित्यविरोधित्वादि द्वितीये दले [illegible]कृतसाध्याभावच्छेदकावच्छिन्नाभावसत्वात्
इति।। नन्वत्र प्रथमेदलखण्डनग्रन्थकारतात्पर्यविषयत्वे पक्षतावच्छेदकव्याघातेकाले बाधस्वरूपा
सिद्ध्योर्व्याप्तिदानमसङ्गतं दलद्वयनिवेशखण्डनपरत्वे साध्याप्रसिद्धिव्याप्तिवारणानुनसदिति खण्ड
नमनुचितमिति चेन्न पक्षतावच्छेदकस्य सकृन्निवेशाभिप्रायेणैवाभिधानात् तन्निवेशस्तु पक्ष
तावच्छेदकविशिष्टानुमितित्वव्यापकप्रतिबध्यतासादृशीत्या वैशिष्ट्यं च स्वावच्छिन्नविशेष्यतानिरूपितसाध्य
तावच्छेदकावच्छिन्नप्रकारताकत्वस्वावच्छिन्नविशेष्यतानिरूपितसाध्यनिरूपितव्याप्तिविशिष्टहेतु
तावच्छेदकावच्छिन्नप्रकारताकत्वोभयसम्बन्धेन न चैवंरीत्या साध्यतावच्छेदकस्यापि सकृन्निवेशस
म्भवेन तन्निवेशस्य साध्याप्रसिद्ध्यव्याप्तिवारकत्वं प्रकृतेव नाशङ्करीतिस्तु स्वविशिष्टानुमितित्वव्यापकप्रति

वध्यतेत्यादि [illegible] रूपा वैशिष्ट्यं च । स्वावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्व स्याव-
च्छिन्नविषयतानिरूपिताधिकरणत्वविषयतानिरूपितधर्मिविषयतानिरूपितवृत्तित्वविषयतानिरूपित
हेतुतावच्छेदकावच्छिन्नविषयतानिरूपितपक्षविशेष्यताकत्व । स्वावच्छिन्नविषयतानिरूपिताभावविषय
तानिरूपितव्यापकत्वविषयतानिरूपिताभावविषयतानिरूपितप्रतियोगित्वविषयतानिरूपितहेतुविष
यतानिरूपितपक्षविषयताकत्व । [illegible]विशिष्टहेतुतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपित
पक्षविशेष्यताकत्वे ~~[illegible]~~ वेन स्वरूपसम्बन्धेन स्ववैशिष्ट्यं च । स्वावच्छिन्नप्रकारतानिरूपिताधि
करणत्वविषयतानिरूपितधर्मि[illegible]विषयतानिरूपितवृत्तित्वविषयतानिरूपितत्व [illegible]वच्छिन्नप्रका
रतानिरूपिताधिकरणत्वविषयतानिरूपितधर्मिविषयतानिरूपितभेदविषयतानिरूपिताधिकरणवि
षयतानिरूपितवृत्तित्वविषयतानिरूपिताभावविषयतानिरूपितस्वोभयसम्बन्धेनेति वाच्यं परम्परा
यास्संबन्धत्वाद्यधिका[illegible]राभावात् । न च तथापि पक्षतावच्छेदकस्यापि सकलनिवेशोऽसम्भवतीति वाच्यं
असम्भवे पक्षतावच्छेदकप्रकारविधया सकलनिवेशासम्भवात् तथाहि पक्षतावच्छेदकनिष्ठावच्छिन्नत्व
[illegible]सम्बन्धावच्छिन्नावच्छेदकताभिन्ना सती विशेष्यतात्वनिष्ठावच्छेदकताभिन्ना या अवच्छेदकता तन्निरूपक

विशेष्यतानिष्ठावच्छेदकताभिन्नासती साध्यतावच्छेदकावच्छिन्नप्रकारतात्वनिष्ठावच्छेदकताभिन्नायावच्छेदकता
तदनिरूपकतादृशप्रकारतानिष्ठावच्छेदकताभिन्नासती साध्यव्याप्यहेतुनिष्ठप्रकारतानिष्ठावच्छेदकताभि
भिन्नासती अनुमितित्वनिष्ठावच्छेदकताभिन्नाया अवच्छेदकता तदनिरूपकानुमितित्वनिष्ठावच्छेदकताभि
न्नासती आधेयत्वनिष्ठावच्छेदकताभिन्नायावच्छेदकतातदनिरूपकाधेयत्वनिष्ठावच्छेदकताभिन्नासती।
भेदत्वनिष्ठावच्छेदकताभिन्नायावच्छेदकतातदनिरूपकभेदत्वनिष्ठावच्छेदकताभिन्नासती प्रतियोगिता
त्वनिष्ठावच्छेदकताभिन्नायावच्छेदकतातदनिरूपकप्रतियोगितात्वनिष्ठावच्छेदकताभिन्नासती अवच्छेदक
तात्वनिष्ठावच्छेदकताभिन्नायावच्छेदकता तदनिरूपकप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितभेदत्वनि
ष्ठावच्छेदकतानिरूपितप्रकारितात्वनिष्ठावच्छेदकतानिरूपितानुमितित्वनिष्ठावच्छेदकतानिरूपितसाध्यतावच्छेदका
वच्छिन्नप्रकारतानिष्ठावच्छेदकतानिरूपितविशेष्यतात्वनिष्ठावच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धाव
च्छिन्नावच्छेदकताभिन्नासती साध्यव्याप्यहेतुप्रकारतात्वनिष्ठावच्छेदकताभिन्नायावच्छेदकतातद
निरूपकविशेष्यतानिष्ठावच्छेदकतानिरूपकतादृशहेतुप्रकारतानिष्ठावच्छेदकतानिरूपकानुमितिनि
ष्ठावच्छेदकतानिरूपकप्रकारितात्वनिष्ठावच्छेदकतानिरूपकभेदत्वनिष्ठावच्छेदकतानिरूपकप्रतियोगितात्वनि
ष्ठावच्छेदकतानिरूपकावच्छेदकतात्वावच्छिन्नप्रतियोगिताकाभाववद्वृत्तिविषयतानिरूपे।प्रतिबन्धकता
शालिपदार्थैकदेशत्वान्मिक्किनमते साध्यतावच्छेदकसन्निवेशस्यैवरीत्या प्रकारद्वयपानिवेशासम्भवादित्याचार्याः

इत्यपोद्दरपक्ष्मवमितिः ॥४॥

तादृशव्याप्तिद्वयप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारतायाः तत्साध्यकतद्धेतुकानुमितिजनकतावच्छेदक
प्रकारतात्वेनानुगमस्यानिवेशेन सम्भवती~~तिचान्यं~~त्यादि अनुमितिसामान्यविरोधित्वमा वाद्दिति-॥
तन्वेवमनुगमासम्भवेपि तत्तद्व्याप्यवगाहिताः स्वानन्यैरानिवेश्यप्रकारान्तरेणानुगमः सम्भवति
तथाहि: प्रकृतहेतुमत्तानिश्चयोत्तरप्रकृतपक्षे प्रकृतसाध्यकानुमितित्वावच्छिन्नकार्यताविशिष्टया
प्रतिबध्यतानिरूपितप्रतिबन्धकतेत्यादिलक्षणं. तादृशकार्यतावैशिष्ट्यं च साध्यतावच्छेदकावच्छि
न्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकविशिष्टत्वनिरूपितकारणतावच्छेदकप्रकार
तानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशाल्यनुमितित्वव्यापकत्वसम्बन्धेन. तथाचान्वयव्या
प्तिविशिष्टहेतुविषयकपरामर्शनिरूपिततादृशानुमितित्वघटितधर्मावच्छिन्नकार्यताविशिष्टप्रति
बध्यता तादृशव्याप्यवगाहिसमूहालम्बनानुमितिनिष्ठप्रतिबध्यतैव. एवं व्यतिरेकव्याप्तिविशिष्ट
हेतुविषयकपरामर्शनिरूपिततादृशानुमितित्वघटितधर्मावच्छिन्नकार्यताविशिष्टप्रतिबध्यता
च तादृशव्याप्यवगाहिसमूहालम्बनानुमितिनिष्ठैवेति न क्वाप्यव्याप्तिः- न च साध्याभाववद्वृ
त्तित्वरूपव्याप्त्यवगाहिपरामर्शस्य व्याप्यतेति धर्मितावच्छेदकज्ञानसाधारण्यापहेतुतावच्छेदक
ननिवेशैकरूपेण कारणत्वगमने तादृशसकलहेतुतावच्छेदकावगाहिपरामर्शनिरूपितकार्यताया

ऐक्यात् तादृशकार्यताया धूमव्याप्यवत्त्वालोकाद्यवगाहिसमूहालम्बनानुमितिप्रसक्त्वात् तत्र सत्वे च धूमा
भाववद्वह्निवत्त्वादिविषयकनिश्चयप्रतिबध्यताया अभावेन तादृशव्यभिचारे सर्वत्राव्याप्तिरिति वाच्यं.
स्वनिरूपितकारणतानिरूपितपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिष्ठावच्छेदकतानिरूपितनिरूपि
तत्वसम्बन्धावच्छिन्नप्रकारतानिष्ठावच्छेदकतानिरूपितावच्छिन्नतत्सम्बन्धावच्छिन्नविशेष्यत्वनिष्ठावच्छेदक
तानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकताश्रयप्रकारतावच्छेदकतापर्याप्त्यधिकरणधर्मा
वच्छिन्नप्रकारतानिरूपितप्रकृतहेतुतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपिता पक्षता
वच्छेदकावच्छिन्नाया विशेष्यता उक्तविशेष्यताविशिष्टतच्छाल्यनुमितित्वव्यापकत्वस्य सम्बन्धत्वात्
तथा च धूमवान् वह्नेरित्यादौ पर्वतो धूमवान् धूमव्याप्यवह्निमानित्यनुमितावेव तादृशकार्यतावि
शिष्टानुमितित्वसत्वात् तत्र च तादृशव्यभिचाराभावप्रतिबध्यत्वस्य सत्वान्नोक्ताव्याप्त्यवकाशः.
न चैवमपि साधारणान्ये साध्याभाववद्वृत्तित्वसाध्यसामानाधिकरण्योभयाभाववद्धेतोरपि
व्यभिचारित्वाभिधानात् तत्राव्याप्तिः. तत्र हि साध्याभाववद्वृत्तित्वं साध्यसामानाधिकरण्यवद्धे
तुमान् पक्ष इत्यादावेतादृशव्यभिचारनिश्चयप्रतिबध्यपरामर्शनिरूपितकार्यतानिरूपितका
रणतानिरूपितमुख्यविशेष्यतानिष्ठावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपि

तावच्छेदकतायाः साध्याभाववद्वृत्तित्वावच्छिन्नप्रकारताया असत्त्वात् तदवच्छेदकतापर्याप्त्यधि
करणतादृशवृत्तित्वावच्छिन्नप्रकारतानिरूपितप्रकृतहेतुतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्न
प्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशाल्यनुमितित्वस्य पर्वतो धूमवान् धूमाभा
ववद्वृत्तिर्वन्हिमानित्यनुमितावपि सत्त्वेन तत्र धूमाभाववद्वृत्तित्व धूमसामानाधिकरण्योभ
याभाववान्वन्हिरिति व्यभिचारनिश्चयप्रतिबध्यत्वस्यासत्त्वादिति वाच्यं स्वनिरूपितकारणतानि
रूपितमुख्यविशेष्यतानिष्ठावच्छेदकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतानिरूपिता या
प्रकारता तन्निष्ठनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेदकतात्वावच्छिन्नप्रतियो
गिताकपर्याप्त्यनुयोगितावच्छेदकीभूतो यो धर्मस्तद्वत्तिहेतुतावच्छेदकावच्छिन्नविशेष्यतावच्छिन्न
प्रकारतानिरूपितपक्षविशेष्यताशाल्यनुमितित्वव्यापकत्वस्य सम्बन्धस्य कारणतं धर्मवृत्ति
त्वेन स्वावच्छिन्ननिरूप्यतानिरूपितप्रकारतात्वघटितधर्मावच्छिन्ननिरूपकतावच्छेदकता
त्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तथात्वं पर्वतो धूमवान्
धूमाभाववद्वृत्तिर्वन्हिमानित्यनुमितावेतादृशसम्बन्धेन तादृशकार्यताया अभावः धूमाभावव
द्वृत्तित्वधूमसामानाधिकरण्यवन्हिमान्पर्वत इति परामर्शनिरूपितकार्यतानिरूपितकारणता

निरूपितमुख्यविशेष्यतानिष्ठावच्छेदकतानिरूपितावच्छेदकतानिरूपितविशेष्यतानिष्ठावच्छेदकतानिरू
पितावच्छेदकतानिरूपितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वस्याभाव
त्वावच्छिन्नविशेष्यतावच्छिन्नतादृशप्रकारतात्वाव्यापकतात्वावच्छिन्नविशेष्यतावच्छिन्नत्वं तादृशप्रका
रतात्वेन हृतस्य जु म दपत्वेन तगच धूमाभाववद्वृत्तिवह्निमानित्यनुमितीयहेतुतावच्छेदकवाच्छिन्न
विशेष्यतायां निरूढसम्बन्धेनाभावत्वावच्छिन्नविशेष्यतावच्छिन्नत्वं तादृशप्रकारतात्वगताद्वृत्ति
वृत्तेरसत्त्वेन पर्वतो धूमवान् धूमाभाववद्वृत्तित्वधूमसामानाधिकरण्यवद्वह्निमानित्यनुमिती
यविशेष्यतायाः एवं तादृशपक्षवसत्त्वेन व्याप्तिविरहात् तादृशपरम्परायाः संसर्गत्वानङ्गीकारे प्रका
रगद्वैव निवेशः तत्प्रकारश्च प्रकृतपक्षसाध्यहेतुकानुमितित्वावच्छिन्नकार्यतात्वसमानाधिक
रणोभयावृत्तिधर्मनिष्ठभेदावच्छिन्नावच्छेदकतानिरूपककार्यतानिष्ठावच्छेदकतानिरूपककारण
तानिष्ठावच्छेदकतानिरूपक मुख्यविशेष्यतानिष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपकप्रकारता
निष्ठावच्छेदकता। निष्ठावच्छेदकतानिरूपकविशेष्यतानिष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपक
प्रकारतानिष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपिकासती अवच्छेदकतात्वनिष्ठावच्छेदकतानिरूपि
कायाः प्रतियोगितातन्निरूपकपर्याप्त्यनुयोगितावच्छेदकतावद्धर्मनिष्ठावच्छेदकतानिरूपकानुयोगिता
निरूपकपर्याप्तिनिरूपितावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपितनिरूपकत्वनिष्ठावच्छेदकता।

निरूपितनिरूपितत्वनिष्ठावच्छेदकतानिरूपितनिरूप्यत्वनिष्ठावच्छेदकतानिरूपिताधेयतासम्बन्धावच्छिन्नावच्छेदक-
ताश्रयप्रकृतहेतुतावच्छेदकावच्छिन्नविशेष्यतावच्छिन्नप्रकारतानिरूपिताया प्रकृतपक्षतावच्छेदकावच्छिन्नावि-
शेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितप्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यताविशिष्ट-
तद्वत्त्वमिति निष्कर्षेदं प्रतियोगितावच्छेदकत्वं नास्तीति प्रामाणिकसिद्धाभावप्रतिबध्यतायां विशेषणमिति चेन्न·
साध्याभाववद्वृत्तित्वरूपव्याप्त्यवगाहिनानालिङ्गपरामर्शानां हेतुतावच्छेदकानिवेशे ऐकरूप्येणाकारणत-
मतेः प्रामाण्यज्ञानोत्तरमनुगतरूपेणोत्तेजकतया पक्षसाध्यादिविषयकतानां कार्यतावच्छेदककुक्षौ नावश्य-
कतयाऽसम्भवापत्तेरिति दिक् ॥ ५ ॥ यथाश्रुतार्थपरतानिर्वाहाय लिङ्गोपधानमतमेवाश्रीयते इत्याहुः।
तन्वत्र प्रथमकल्पपरित्यागे लक्षणान्तरे दोष एव तदभिप्रायो ज्ञायते सर्वत्र सम्भवति· तादृशकार्यतानिरूपक-
सम्बन्धेन ग्रहनिष्ठप्रतिबध्यतानिवेशेऽतिव्याप्तेर्ग्रहत्वव्यापकप्रतिबध्यतानिवेशे व्याप्तेस्तदवच्छिन्नप्रतिबध्यता-
निवेशेऽसम्भवस्य बाधेत्यादिना भट्टाचार्योक्तरूपेणानुगतरूपत्वादिति चेन्न· प्रकृतपक्षसाध्यकहेतुकानुमितिका-
र्यताप्रतियोगिकयात्किञ्चित्सम्बन्धावच्छिन्नग्रहत्वव्यापकप्रतिबध्यताया एव लक्षणे निवेशनीयतया व्यापकत्वमपि
भट्टाचार्योक्तबाधव्यभिचाराद्यव्याप्त्यभावात्· तादृशकार्यत्वप्रतियोगिकाश्रयत्वरूपसम्बन्धावच्छिन्नग्रहत्वव्यापक-
त्वस्यानुमितिविरोधिदोषप्रतिबध्यतायां तादृशकार्यत्वप्रतियोगिकनिरूपकत्वरूपसम्बन्धावच्छिन्नग्रहत्वव्यापक-
त्वस्य परामर्शविरोधिदोषप्रतिबध्यतायाञ्च सर्वत्र सत्त्वात्· नन्वेवं सति भट्टाचार्यमते प्रकारान्तरानुसरणे

किम्बीजमिति वाच्यं. साध्याभाववद्वृत्तिहेतुमत्ताज्ञानस्य हेतुतावच्छेदकविषयतासन्निवेशेपि तद्रूपेण कारणतासम्भवसम्भ
महाचार्येणोत्तल्लदोषणकरणात्. तथा सति ताद्दशकार्यताप्रतियोगिकनिरूपकत्वरूपसम्बन्धेनावच्छिन्नादिदे
ति. घयवत्परामर्शोत्पत्तेन तत्र च सर्वत्र वह्नि धूमव्यभिचारीति व्यभिचारनिराकरणप्रतिबध्यत्वाभावेन ताद्द
शव्याप्तेर्दोषोपपत्तेः व्याप्त्यापत्तेः. केचित्तु कारणेनानु. ताद्दशव्याप्तिज्ञानानां पृथक्कारणतामते स्यैव गौरवलस्वना
त्. तत्र च ताद्दशकार्यत्वप्रतियोगिकोत्पत्त्यात्मकयत्किञ्चित्सम्बन्धविशिष्टरूपत्वस्य ताद्दशज्ञाना
विषयपरामर्शोत्पत्तेन तथानिवेशे व्याप्तिविरहात्. नन्वेवं सति प्रकृतपक्षादिविषयकानुमितित्वावच्छि
न्नकार्यतानिवेशे अप्रामाण्यज्ञानानास्कन्दितरूपेणोत्पन्नेऽस्मन्मते सम्भवत्ताद्दशानुमितित्वव्यापकरूप
रामर्शनिरूपितकार्यत्वाप्रसिद्धेश्चानुमितिनिष्ठकार्यतानिवेशे पर्वतो वह्निमानित्यस्य तथोक्त्याका
रकानुमितिनिरूपितविषयकपरामर्शकार्यमादाय पर्वतो वह्निमान् धूमादित्यादौ वह्न्यभाववद्वृत्तिहे
तुत्वव्याप्तिरिति वाच्यं. कार्यतायामनुमितिनिष्ठत्वस्यैवानिवेशात्. ऽकेचित्तु व्याप्तिस्तु अनुमितौ विधेय
ताद्दृशानिरूपकत्वविशेषणेन वारणीया. नन्वेवं वह्निव्याप्यधूमवान् घटव्याप्यवांश्च पर्वत इति पराम
न र्शानन्तरं घटानुमितिप्रतिबन्धकत्वस्य पर्वतो वह्निमानित्यनुमितेरेवोदयात्. विषयताद्वयानिरूपकत्वाभि
ष्टघटव्याप्यविषयकपरामर्शोत्तरत्वावच्छिन्नकार्यताप्रतियोगिकनिरूपकत्वरूपसम्बन्धाविशिष्टघ
टव्याप्यविषयकपरामर्शनिष्ठप्रतिबध्यतामादाय पर्वतो वह्निमान् धूमादित्यादौ घटाभाववद्वृत्ति

परेऽतिव्याप्तिरिति वाच्यं. अव्यवहितोत्तरत्वावच्छिन्नकार्यतानिरूपितज्ञाननिष्ठकारणतावदन्यत्वेनानु
मितेर्विशेषणीयत्वात्. कारणतावैशिष्ट्यं च स्वनिरूपितकार्यतावत्त्व स्वावभाववद्धाननिष्ठकारण
तानिरूपितत्वव्यवहितोत्तरत्वावच्छिन्नकार्यतावत्त्वोभयसम्बन्धेन. तथा च तादृशानुमितौ परामर्श
द्वयनिष्ठकारणतानिरूपितकार्यतासत्त्वेनक्षाहानिः. कारणताया अव्यवहितोत्तरत्वावच्छिन्नकार्य
तानिरूपितत्वविशेषणादीश्वरज्ञाननिष्ठकारणतामादाय न तादृशानुमित्यप्रसिद्धिः. ज्ञाननिष्ठत्वविशे
षणात्सिद्धविशिष्टानुमितिप्रतीच्छायाः कारणत्वमत इच्छादिकारणत्वमादाय न तादृशानुमित्यप्रसिद्धिः.
वैशिष्ट्यघटक प्रथमसम्बन्धेऽनिवेशे नोदासीनानुमितिनिरूपितोदासीनपरामर्शनिष्ठकारणतामा
दाय नाप्रसिद्धिः. द्वितीयसम्बन्धानिवेशे त्वपरामर्शकारणतामादाय नाप्रसिद्धिः. तादृशद्वितीयसम्ब
घटककारणतायां ज्ञाननिष्ठत्वविशेषणात्प्रागुक्तरीत्या इच्छादिकारणतामादाय नाप्रसिद्धिः.
कार्यतायामव्यवहितोत्तरत्वावच्छिन्नत्वानिवेशादीश्वरज्ञानकार्यतामादाय नाप्रसिद्धिः. ~~कार्यताया~~
५) न च तथापि पर्वतो वह्निमान् धूमादित्यादौ वह्न्यभाववद्वृत्तिद्रव्येऽतिव्याप्तिः. प्रकृतहेत्वंशे व्याप्यत्वानव
गाहि प्रकृतहेतुविषयकवह्निव्याप्यद्रव्यवान्पर्वत इति परामर्शोत्तरानुमितौ प्रकृतसाध्यहेतुकार्या
तादृशकारणताविशिष्टान्यत्वस्य सत्त्वात्तन्निष्ठकार्यत्वप्रतियोगिकनिरूपकत्ववत्तादृशपरामर्श
त्वव्यापकप्रतिबध्यत्वस्यापि ग्रहीतुं सम्भवात् इति वाच्यं. कारणतावदन्यप्रकृतसाध्यकानुमिते

नि[illegible]ष्ठप्रकृतहेतुमत्तानिरूपकाव्यवहितोत्तरत्वावच्छिन्नकार्यतात्वेन तादृशकार्यताया लक्षणे निवेश
नीयत्वात्. इदमप्यत्र चिन्तनीयं. एवं रीत्या पूर्वोक्तदूषणोद्धारेण पूर्वोक्तरीत्या नानाविधव्याप्तिप्रकारंता:
प्रातिस्विकरूपेण प्रवेशानुगमसम्भवेनोक्तपक्षसाध्यहेतुकानुमितित्वावच्छिन्नकार्यताप्रसिद्ध्या:
सम्भवाभिधानमनुचितमिति ॥६॥ अव्यवहितोत्तरत्वसम्बन्धेन तद्धर्मावच्छिन्नधर्मिकव्यभिचारज्ञानावि
शिष्टयत्तदन्यत्वं वा कार्यतावच्छेदकमिति ।· नन्वत्र कथं लक्षणशरीरं यदि प्रकृतपक्षसाध्यहेतुकानु
मितित्वव्यापकत्वघटितमेव. प्रकृतहेतुकत्वं च प्रकृतहेतुतावच्छेदकावच्छिन्नधर्मिकव्यभिचारज्ञा
नाविशिष्टान्यत्वं. तथा च तादृशव्यभिचारज्ञानाविशिष्टान्यप्रकृतपक्षसाध्यकानुमितित्वव्या
पकप्रतिबध्यतेत्यादिलक्षणे. तथा च व्यभिचारेणाव्याप्तिरिति. तदा स्वरूपासिद्ध्यसङ्ग्रहः. एकरूपे
ण स्वरूपासिद्धिज्ञानेऽप्यपररूपेण पक्षधर्मताज्ञानादनुमित्यु[illegible]नेस्तस्याः स्वरूपासिद्धिनिश्चय
प्रतिबध्यतायास्तादृशानुमितित्वाव्यापकत्वात्. यदि चैवमेव स्वरूपासिद्धिज्ञानाविशिष्टान्य
त्वमपि विवक्षितमित्युच्यते तदा साध्यताप्रसिद्धिविरोधानुपसंहारित्वज्ञानाविशिष्टान्यत्व
स्यापि निवेशनीयतया महागौरवमिति चेन्न. प्रकृतपक्षविशेष्यकसाध्यव्याप्यहेतुप्रकारकानुमि
तित्वव्यापकघटितलक्षणस्य विव[illegible]क्षितत्वादिति दिक् ॥७॥ अभिधेयत्वं प्रमेयत्वस्य व्यभि

वारीत्यत्रस्वरूपसम्बन्धावच्छिन्नप्रमेयत्वत्वावच्छि॰न्नप्रतियोगिताकत्वसम्बन्धेनप्रमेयत्वस्यभ्रमोवाच्यः॰प्रतियोगित्वांशेसाध्य
तावच्छेदकावच्छिन्नत्वसाध्यतावच्छेदकावच्छिन्नत्वयोःसाध्याभाववद्वृत्तित्वरूपव्याप्तिघटकतयातदंशेतदुभयावगा
हिव्यभिचारज्ञानस्यैवव्याप्तिज्ञानविरोधित्वादिति।।ननुसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बं
धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारतानिरूपिताधिकरणत्वविष
यतानिरूपितवृत्तित्वविषयतानिरूपिताभावविषयतानिरूपितहेतुतावच्छेदकावच्छिन्नविषयतानिरू
पितपक्षतावच्छेदकावच्छिन्नविषयता~~निरूपित~~शालिनिश्चयत्वेनैवकारणत्वमास्तां॰एवंचस्वरूपस
म्बन्धावच्छिन्नप्रमेयत्वत्वावच्छिन्नप्रतियोगिताप्रसिद्ध्यातेनभ्रमानुपपत्तिरितिचेन्न॰महानसीयवह्न्य
भाववद्वृत्तिधूमवान्पर्वतइतिपरामर्शस्यतादृशरूपाकारतयाततःपर्वतोवह्निमानित्यनुमित्यापत्तेः॰
नचसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नसाध्यतावच्छेदकपर्याप्तावच्छेदकता
कप्रकारताघटितनिश्चयत्वंकारणतावच्छेदकमितिवाच्यं॰महानसीयत्वमुपलक्षणविधयाऽवगाहमा
नात्तादृशपरामर्शात्पर्वतोवह्निमानित्यनुमित्यापत्तेः॰तादृशपरामर्शस्याभावांशेमहानसीयत्वव
ह्नित्वधर्मद्वयावच्छिन्नप्रकारताकतया॰तादृशप्रकारतावच्छेदकतायाधर्मद्वयपर्याप्तत्वात्साध्य
तावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नसाध्यतावच्छेदका

वह्नित्वप्रकारताघटितधर्मस्य कारणतावच्छेदकत्वे तु महानसीयवह्निव्याप्यधूमवान्पर्वत इति परामर्शात्पर्वतो व-
ह्निमानित्यनुमितिकारणतापत्तिः साध्यतावच्छेदके संसर्गतावच्छेदकतापर्याप्तिर्निवेशनीया. तथा च महानसीयव-
त्वमुपलक्षणविधयावगाहमानताद‍ृशपरामर्शीयाभावविशेष्यतानिरूपितसाध्यनिष्ठप्रकारतावच्छेद-
कसंबन्धिप्रतियोगितानिरूपितावच्छेदकतापर्याप्तिः प्रकृते वह्नित्वमेव अभावप्रतियोगितावच्छेदककुक्षौ
उपलक्षणविधया प्रविष्टस्यावच्छेदकत्वाभावादिति परामर्शादनुमित्युत्पत्त्युपपत्तिरिति दिक् ॥८॥
लाघवात्प्रतियोगितासंसर्गकज्ञानस्यैवानुमितिजनकतेति ।। ननु कथं प्रतियोगितासंसर्गकज्ञा-
नस्य हेतुत्वे लाघवं तत्प्रकारकज्ञानस्य तथात्व एव लाघवात्. तत्संसर्गकज्ञानस्य तथात्वे साध्यता-
वच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यता-
घटितपरामर्शस्यैव त्वेनैव हेतुत्वस्यावश्यकतया साध्यतावच्छेदकस्य द्विधा निवेशे गौरवात्. प्रतियो-
गिताप्रकारकज्ञानस्य कारणत्वे तु साध्यतावच्छेदकस्य संसर्गकुक्षावनिवेशेन लाघवात्. न च साध्य-
तावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नप्रकारतात्वेनैव साध्य-
प्रकारतायाः कारणतावच्छेदककुक्षौ प्रवेशेन तु तादृशप्रकारतायां साध्यभावच्छेदकावच्छिन्नत्वस्यापीति वा-
च्यं. अन्यनिष्ठप्रतियोगितायाः अन्यसम्बन्धस्वीकारे वह्नित्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगितास-

म्बन्धेनाभावांशे घटावगाहिनो घटाभाववद्वृत्तिधूमवानितिपरामर्शाद्वन्हिमानित्यनुमित्यापत्तेरितिचेन्न·
प्रतियोगिताप्रकारकज्ञानस्य कारणत्वे प्रतियोगितांशे संसर्गस्य तत्कुक्षिप्रविष्टसाध्यतावच्छेदकसम्बन्धावच्छि
न्नत्वसाध्यतावच्छेदकावच्छिन्नत्वादिसंसर्गविषयतानां कारणतावच्छेदकशरीरे निवेशनीयतया
गौरवात्॥ स्वावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यतावच्छेदकव
त्वमेवाभावस्य साध्याभाववद्वृत्तित्वव्याप्तिघटके नाचयादिन्यादि । तथा च नाहशासंबन्धावच्छिन्नसाध्य
तावच्छेदकनिष्ठप्रकारतानिरूपिताभाववत्त्वावच्छिन्नविशेष्यतावच्छिन्नप्रकारताघटितनिश्चयत्वेन कार
णत्वमिति पर्यवसिते· तत्र महानसीयवन्ह्यनुमितिन्धूमपरामर्शयोः कथं कार्यकारणभावः॥ य
दि महानसीयत्ववन्हित्वनिष्ठधर्मद्वयप्रकारतानिरूपिताभाववत्त्वावच्छिन्नविशेष्यताघटितधर्मपुरस्कारे
णतदा कश्चिन्महानसीयवन्हिमान्कश्चिद्वन्हिर्महानसीयवानिति कथमनुमितिः· न च व्याप्तिघटकता
भावनाधिकरणत्वांशे साध्यस्य येन रूपेण परामर्शे भानं तेनैव रूपेणानुमितावपि भानमित्यनुमि
तिवैलक्षण्यमुपपद्यत इति वाच्यं· महानसीयवन्ह्यभाववद्वृत्तिवन्हिमहानसीयसमानाधि
करणधूमवानिति परामर्शादपि वन्हिमहानसीयवानित्यनुमित्यापत्तेरिति चेन्न· यत्र परामर्शे
अभावविशेषणतापन्नवन्ह्यंशे वन्हित्वं धर्मितावच्छेदकीकृत्य महानसीयत्वं भासते नत्वविशिष्टवै
[illegible]मेव मर्यादया महानसीयत्वस्य वन्हित्वांशे भानात् महानसीयत्वावच्छिन्नस्वनिष्ठावच्छेदकता

निरूपकप्रतियोगितासंबन्धावच्छिन्नवह्नित्वनिष्ठप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यताघटितनिश्चय
यत्वेन महानसीयवह्निमानित्यनुमितिं प्रतिकरणत्वं। यत्र परामर्शे महानसीयत्वं धर्मितावच्छेदकीकृत्य व
ह्नित्वं भासते। तस्य वह्निमहानसीयाभाववदवृत्तिवह्निमहानसीयसमानाधिकरण। धूमवानिति परामर्श
स्य वह्नित्वावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपकप्रतियोगितासम्बन्धावच्छिन्नमहानसीयत्वनिष्ठप्रकार
तानिरूपिताभावत्वावच्छिन्नविशेष्यताघटितनिश्चयत्वेन वह्निर्महानसीयवानित्यनुमितिं प्रतिकार
णत्वमिति न काप्यनुपपत्तिरिति दिक्॥६॥ स्वव्याधिकरणप्रकारावच्छिन्ना या या विषयता तदनिरूपकत्व
मिति। अत्र स्वव्यधिकरणप्रकारावच्छिन्नत्वं स्वव्यधिकरणनिष्ठप्रकारतानिरूपकत्वं। स्वव्यधिकरणत्वं
न च स्वानधिकरणवृत्तित्वं घटो द्रव्यमिति ज्ञानस्य प्रमात्वानुपपत्तेः किन्तु स्वाधिकरणावृत्तित्वं तथा च
स्वाधिकरणवृत्तिनिष्ठप्रकारतानिरूपिता या विषयता तदनिरूपकत्वमिति पर्यवसितं। न त्वत्र स्वाधिक
रणावृत्तित्वं सम्बन्धसामान्येन तदा ह्रदो वह्निमानिति ज्ञानस्य प्रमात्वापत्तिः तज्ज्ञानीयविषयता
धिकरणह्रदादौ कालिकादिसम्बन्धेन वह्न्यादिरूपप्रकारतासत्त्वेन घटो गगनवानित्यादिज्ञानी
यविषयताया एव घटादिनिष्ठायाः स्वपदेन धर्तव्यत्वात् तदनिरूपकत्वस्योक्तभ्रमे सत्त्वात्। न च
स्वाधिकरणनिरूपितप्रकारतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाभावो विवक्षणीयः तथा च तादृशज्ञानी
यविषयताधिकरणह्रदादिनिरूपितप्रकारतावच्छेदकसंयोगसम्बन्धावच्छिन्नवृत्तित्वाभावस्य वह्न्यादौ

सत्त्वेन नोक्तज्ञानसङ्ग्रहः इति वाच्यं। गुणः संयोगेन घटवानिति ज्ञानस्य प्रमात्वापत्तेः तज्ज्ञानीयविषयताश्रय
गुणनिरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या नाद्यविषयतायाः स्वपदेन धर्त्तुमशक्यत्वात्। नच
प्रकारतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धेन स्वाधिकरणनिरूपितवृत्तित्वस्याभावः
प्रकारताश्रयधर्मो विवक्षणीयः तथाच संयोगसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धस्य गुणनिरू
पितवृत्तित्वस्य व्यधिकरणतया तत्सम्बन्धावच्छिन्नताद्दशविषयताश्रयगुणनिरूपितवृत्तित्वातिछ
प्रतियोगिताकाभावस्य प्रकारीभूतघटे सत्त्वेन तदसङ्ग्रहः इति वाच्यं। विशेषरूपेण सम्बन्धत्वस्वीकारे
घटत्वप्रतियोगिकसमवायेन घटत्ववान् पट इत्याकारकज्ञानस्य प्रमात्वापत्तेः प्रकारतावच्छेदकसमवायसम्ब
न्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धेन स्वाधिकरणनिरूपिततज्ज्ञानीयविषयताश्रयपटनिरूपितवृत्तित्वस्य
घटत्वरूपे प्रकारे सत्त्वात्। नच प्रकारतानिरूपितसंसर्गनिष्ठावच्छेदकतानिरूपकवृत्तित्वीयस्वरूपस
म्बन्धेन स्वाधिकरणवृत्तित्वाभावो विवक्षणीयः तथाचोक्तज्ञानीयपटत्वनिष्ठप्रकारतानिरूपित
समवायनिष्ठावच्छेदकतानिरूपितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकं य
द् घटत्वप्रतियोगिकसमवायत्वनिष्ठद्वित्वं तदवच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरू
पकघटत्वप्रतियोगिकसमवायानिष्ठावच्छेदकवृत्तित्वीयस्वरूपसम्बन्धस्य तज्ज्ञानीयविषयताश्रय

धारतनिरूपितवृत्तित्वस्य व्यधिकरणसम्बन्धनयानत्सम्बन्धावच्छिन्नतदभावस्य घटत्वादिरूपप्रकारे सत्वान्नतत्संग्र
हइतिवाच्यं. गुणीयसंयोगेन घटवान्गुण इतिज्ञानस्य प्रमात्वापत्तेः तज्ज्ञानीयप्रकारतावच्छेदकतावच्छेद
कतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकगुणप्रतियोगिकत्वविशिष्टत्वावच्छिन्नानुयोगिताकपर्याप्तिका
वच्छेदकताकवृत्तित्वाप्रसिद्ध्यास्वपदेन ताद्दृशज्ञानीयविषयताया धर्म्मजन्मज्ञाकत्वादिनिवेशेन. स्वनिरूपित
प्रकारतावच्छेदकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकं धर्मावच्छिन्नानुयो
गिताकपर्याप्तिकावच्छेदकतानिरूपकावच्छेदकतानिरूपकीयस्वरूपसम्बन्धेन स्वाश्रयनिरूपित
वृत्तित्वाभावस्य विवक्षणीयतया प्रकृते गुणप्रतियोगिकत्वविशिष्टताद्दृशपर्याप्त्यनुयोगितावच्छेदकी
भूतद्वित्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकतानिरूपकीभूतायाः संयोगनिष्ठसंसर्गविधया
ऽवच्छेदकतानिरूपकत्वस्य वृत्तित्वेऽप्रसिद्धावपि तज्ज्ञानीयघटत्वावच्छिन्नप्रकारताप्रतिद्व
ताद्दृशप्रकारत्वीयस्वरूपसम्बन्धस्य वृत्तित्वव्यधिकरणसम्बन्धतयोक्तदोषानवकाशात्. तच्च
तद्व्यक्तित्वादिना घटत्वादिज्ञाने विषयितासम्बन्धेन. स्वरूपप[illegible]तो घटत्वादिप्रकारकज्ञा
नस्य प्रमात्वापत्तेः. तज्ज्ञानीयविषयतानिरूपितप्रकारतानिरूपितसंसर्गनिष्ठावच्छेदकतानि
रूपितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकं द्वित्ववत्तात्वविशिष्टतत्तद्व्यक्तित्वं तद्

वह्नित्वानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकसंसर्गतानिरूपकविषयितासम्बन्धावच्छिन्नवृत्तितीय
स्वरूपसम्बन्धेन तादृशज्ञाननिरूपितवृत्तित्वस्य घटत्वादिरूपप्रकारे सत्वेन स्वपदेन तादृशविषयताया ध
र्तुमशक्यत्वादिति वाच्यं। तादृशसम्बन्धेन स्वाश्रयनिरूपितनिरवच्छिन्नवृत्तित्वाभाववन्निरवच्छिन्नप्रकारता
निरूपितविशेष्यतानिरूपकत्वस्य विवक्षितत्वात्। एवं च तादृशज्ञाननिरूपितविषयतासम्बन्धावच्छिन्न
वृत्तित्वस्य घटे सत्वेपि न तद्वृत्तित्वं निरवच्छिन्नमतो नोक्तदोषः। प्रकारतायां निरवच्छिन्नत्वविशेषणात् घ
वे टत्वेन घटत्वावगाहिज्ञाने विषयितासम्बन्धेन घटत्ववत्वेन घटत्वप्रकारकज्ञानस्यासङ्ग्रहः। न चैवं
सति ह्रदे वह्निमानित्याकारकज्ञानस्य प्रमात्वापत्तिः। तज्ज्ञानीयवह्नित्वनिष्ठप्रकारताया निरवच्छि
न्नत्वाभावादिति वाच्यं। स्वाश्रयनिरूपितवृत्तितानवच्छेदकधर्मावच्छिन्नप्रकारतानिरूपितविशे
ष्यतानिरूपकत्वस्यापि विवक्षणीयतया तज्ज्ञानीयविषयताश्रयह्रदनिरूपितवृत्तितानवच्छे
दकवह्नित्वावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपकत्वात्तदसङ्ग्रहात्। अत्र स्वाश्रयनिरू
पितवृत्तिताप्रकारतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या। अन्यथा पूर्वोक्तदोषात्। एवं तादृशावच्छेद
कत्वाभावो न स्वरूपसम्बन्धेन किन्तु स्वनिरूपितप्रकारतानिरूपितसंसर्गतानिरूपितावच्छेदक
तात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताक[illegible]र्याप्तिकावच्छेदकतानि
रूपकसंसर्गतानिरूपकनिरूपितावच्छेदकतीयस्वरूपसम्ब[illegible]न्धेन। अतो न प्रागुक्तदोषाव

कादा इति। यद्वा विशेष्यताविशिष्टप्रकारताशून्यत्वं सर्वांशे प्रमात्वं। स्वव्यधिकरणप्रकारावच्छिन्नेत्यादि
नाविवक्षितं। विशेष्यतावैशिष्ट्यं च। स्वनिरूपितत्व स्वाश्रयनिरूपितनिरूपकताविशिष्टान्यत्वोभयसम्ब
न्धेन। निरूपकतावैशिष्ट्यं च। स्वावच्छेदकसम्बन्धावच्छिन्नत्व। स्वसामानाधिकरण्य स्वानवच्छेदकानव
च्छिन्नत्व स्वघटितत्वैतच्चतुष्टयसम्बन्धेन। अत्र स्वघटितत्वं च। स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन। अत्र
प्रथमसम्बन्धानिवेशे ह्रदे वह्निमानित्याकारकज्ञानीयविषयतानिरूपितवह्निप्रकारतायाः ह्र
दनिरूपितकालिकसम्बन्धावच्छिन्नवह्निनिष्ठनिरूपकतायाः। सामानाधिकरण्यादिसम्बन्धमात्रे
ण सत्वेपि न ताद्दशविषयतायाः स्वपदेन धर्तुं महाकालया घटे गगने वा नित्यज्ञानीयघटविषय
तायाः एव ताद्दशत्वेन तदनिरूपकोक्तज्ञानस्य प्रमात्वापत्तिः। द्वितीयसम्बन्धानिवेशे गगने द्रव्यमि
त्यादिज्ञानस्य प्रमात्वापत्तिः। गगनत्वनिष्ठनिरवच्छिन्नाभिरूपकताया अवच्छेदकस्य द्रव्यत्वनिष्ठप्रका
रताश्चावच्छेदकस्याप्रसिद्ध्या नायं दोष इति वाच्यं। घटो द्रव्यमिति ज्ञानसङ्ग्राहकोभयत्र स्वानवच्छे
दकत्वस्यावच्छेदकतासम्बन्धेन स्वाभाववत्त्वरूपस्य वक्तव्यत्वात्। तृतीयसम्बन्धानिवेशे स्वरूपतो
घटत्वावगाहिज्ञाने घटत्वत्वादिनाविषयितासम्बन्धेन स्वरूपतो घटत्वप्रकारकज्ञानस्य प्रमा
त्वापत्तिरिति दिक्॥ यथार्थेति व्यर्थमिति। यथार्थपददानेपि सङ्ग्रहस्य लेऽतिव्याप्तिवारणा संभवादिति॥

नन्वत्र यथार्थपदादानेप्यनिरुद्धभावद्वयकोटिकसंशयाङ्गीकर्त्तमतेन ह्रदो जलवान्वन्हिभाववान्नवेति संशयसम्भवात्.
तत्रयानुमितिप्रतिबन्धकत्वासम्भवादसम्भवः अतोऽज्ञानेसंशयान्यत्वंनिवेशनीयं. एवञ्चासम्भवाभावेन न तद्वैयर्थ्यात्:
किञ्चतादृशसंशयानङ्गीकारेऽपिसंशयान्यत्वविशेषणमावश्यकं. अन्यथाबाधग्रस्त्यैकपिसंयोगाभाववद्वृक्षस्य
महाचार्यैर्बाधत्वाभिधानात् तत्र च कपिसंयोगाभाववान्नवा वृक्ष इत्याकारकसंशयस्य याथार्थ्यविशेषणेना
वारणेनाव्याप्त्यापत्तेः न च तथापि ह्रदो वन्हिमान् ह्रदो वन्ह्यभाववानित्याहार्यदोषविषयकनिश्चये प्रतिब
न्धकत्वाभावेनासम्भववारणाय याथार्थ्यविशेषणमावश्यकमिति वाच्यं. याथार्थ्यविशेषणेनाप्रामाण्य
ज्ञानास्कन्दितदोषज्ञानावारणात्. असम्भववारणायाप्रामाण्यज्ञानाभावस्य ज्ञानविशेषणत्वावश्यकतयात
त्तदप्रामाण्यज्ञानाभावस्यनिवेशगौरवेणानुगतरूपेणैवाप्रामाण्यज्ञानाभावो निवेशनीयः. लघुकारश्च. अ
भावविशिष्टान्यत्वमिति. अभाववैशिष्ट्यं च. स्वाभाववत्त्व. स्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयतावत्त्वो
भयसम्बन्धेन. एवं च तादृशविशेषणेनैवोक्ताहार्यस्यापि वारणासम्भवे तथा याथार्थ्यविशेषणस्य वैयर्थ्यात्.
न च तथाप्युक्तविशेषणेनानियताहार्यवारणेऽपि नियताहार्यवारणं न सम्भवति समानाकारकज्ञानीयविषयता
याऐक्येऽपि नियताहार्यविषयताया दोषविषयकानाहार्यज्ञानीयदोषविषयतातो भेदस्य वक्ष्यमाणत्वात्.
तस्याः प्रतिबन्धकतानवच्छेदकत्वेन तज्ज्ञाने तदुभयसम्बन्धेनाभाववैशिष्ट्यस्याभावात् अतस्तद्व्यावृत्यर्थं

याथार्थ्यविशेषणं सार्थकमिति वाच्यं. तदुपादानेपि कपिसंयोगाभाववद्वृक्षरूपबाधेः व्याप्तिः कपिसंयोगवान् वृक्षः कपिसंयोगाभाववानिति निरुक्ताहार्यस्य तद्विशेषणेनावारणात्. तादृशाहार्यवारणाय वैशिष्ट्यघटकसम्बन्धत्व. स्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयतानिरूपकतावच्छेदकधर्मावच्छिन्नविषयिताकत्वरूपो वक्तव्यः एवं सति सर्वत्र निरुक्ताहार्यस्य वारणं सम्भवति. तथा च तद्विशेषणस्य नैयर्थ्यात्. तन्न सर्वमिदं तदा स्यात् यदा आहार्यभेदस्य प्रतिबन्धकतावच्छेदकत्वं स्यात् तदेव न सम्भवति. तथा सति ह्रदो वह्निमानिति ज्ञानं प्रति ह्रदो वह्न्यभाववानिति निश्चयस्यांशिकाहार्यस्याप्रतिबन्धकत्वापत्तेः. एवमेव संशयभेदोपि न प्रतिबन्धकतावच्छेदकः. तथा चोक्तविशेषणेनाप्रामाण्यज्ञानास्कन्दितज्ञानवारणेपि संशयाहार्ययोरवारणात् असम्भववारणाय यथार्थेति सार्थकमेवेति चेन्न. आहार्यभेदस्य प्रतिबन्धकतावच्छेदकत्वाभावेपि आहार्यस्य प्रतिबन्धकत्ववारणार्थं विरोधिविषयताशालीच्छाप्रयोज्यत्वस्य संशयस्य प्रतिबन्धकतावारणार्थं प्रकारित्वानवच्छिन्नत्वस्य वक्तव्यतयाऽभावपदेनेच्छाप्रयोज्यत्वाभावप्रकारितावच्छिन्नत्वाभाववत्त्वोपादायोक्तसम्बन्धेन. तादृशाभाववैशिष्ट्यस्याहार्यसंशययोः सत्त्वेन तद्वारणसम्भवात्. अत्र वैशिष्ट्यघटकस्वाभाववत्त्वम् स्वाश्रयविषयतानिरूपकत्व. विशेष्यतान्यतरसम्बन्धेन. विशेष्यत्वनिवेशादप्रामाण्यज्ञानास्कन्दितज्ञानास्कन्दितज्ञानवारणं. प्रथमसम्बन्धनिवेशादाहार्यसंशयवारणं बोध्यं. नन्वेवमपि यथार्थेति व्यर्थमित्यसङ्गतं तद्विशेषणसत्त्वेऽसम्भवस्यैवावश्यकत्वात्. तथा हि. तादृशसम्बन्धेनाभाववैशिष्ट्यान्यदोष

विसयकज्ञानमात्रस्य संज्ञया ह्यार्याघनात्मकतया यथार्थत्वेन यद्विषयताज्ञात्यभावविशिष्टान्ययथार्थज्ञाननिष्ठभेदप्रतियोगितावच्छेदकतात्वस्य स्वसमनियतयद्विषयताज्ञात्यभावविशिष्टान्यज्ञाननिष्ठभेदप्रतियोगितावच्छेदकतात्वापेक्षया गुरुत्वया: भावप्रतियोगितावच्छेदकत्वेन ताद्दृशाभावाप्रसिद्धेरिति चेन्न। याथार्थ्यस्याभावप्रतियोगितावच्छेदककुक्षावनिवेशात् यद्रूपावच्छिन्नविषयताज्ञात्यभावविशिष्टान्यज्ञाननिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतिसिद्धाभावस्यैव निवेशनीयत्वात् याथार्थ्यसामानाधिकरण्यस्यैव ताद्दृशाभावप्रतियोगितावच्छेदकतायां निवेशात् तन्निवेशप्रकारश्च। यद्धर्मनिष्ठावच्छेदकतानिरूपितभिन्ना सती अवच्छिन्नात्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका यद्धर्मनिष्ठावच्छेदकतानिरूपिका याऽवच्छेदकतेत्येवंरीत्या न्यूनाधिकवारकपर्याप्तिघटितावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपकविषयतानिष्ठावच्छेदकतानिरूपिका सती ज्ञानत्वनिष्ठावच्छेदकतानिरूपिका सती अभावविशिष्टान्यत्वनिष्ठावच्छेदकतानिरूपिका या याथार्थ्यसमानाधिकरणज्ञाननिष्ठावच्छेदकतान्निरूपिका सती ज्ञानत्वनिष्ठावच्छेदकतानिरूपिका सती अभावविशिष्टान्यत्वनिष्ठावच्छेदकतानिरूपिका या याथार्थ्यसमानाधिकरणज्ञाननिष्ठावच्छेदकतानिरूपकावच्छेदकतात्वावच्छिन्नप्रतियोगिताकाभावत्वेनेति।

तथा च नासम्भवः परस्परयायाथार्थ्यसामानाधिकरण्यघटिताभावत्वस्य तदघटिताभावत्व[illegible]घटितत्वात् तद्वारणीयदोषवारकतया याथार्थ्यस्यैव यथार्थमितिनदेनाभिमतं। न चाभावविशिष्टा

त्वस्त्वमित्यत्र वैशिष्ट्यघटकत्वाभाववत्त्वस्य विशेष्यत्वस्वाश्रयतिरूपतानिरूपकत्वान्यतरसम्बन्धेनाविवक्षणे
यथार्थस्यैवैतदर्थेपि विशेष्यत्वमात्रेणास्वाभाववत्त्वविवक्षणेन न तद्वैयर्थ्यं तादृशोभयसम्बन्धेनाभाववि
शिष्टस्याहार्यसंशययोरभावात्. न चान्यत्रापि किञ्चिद्विशेषणेन वारणीयदोषवारकस्य विशेषणान्तरस्य
वैयर्थ्यं. तथा चैतद्विवक्षाभिप्रायेणैव यथार्थेत्युक्तमिति वाच्यं. यथार्थपददानेप्यनियताहार्यवारणाय
तादृशाविवक्षाया आवश्यकतया तेनैव संशयानियताहार्यवारणसम्भवेन यथार्थपदप्रयोजनाभा
वात्. एवं भावद्वयकोटिकसंशयानङ्गीकारेपि न क्षतिरिति दिक्. ॥ ॥ केचित्त्वित्यादि. यद्रूपावच्छिन्न
विषयतासामान्यमनुमितिप्रतिबन्धकतावच्छेदकं तद्. विशिष्टप्रकारकप्रमाविशेष्यत्वमेव विवक्षणीयमिति.
तथा च यद्रूपावच्छिन्नविषयतासामान्यप्रयुक्तानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छे
दकं तद्रूपवत्त्वं पर्यवसितं. ज्ञायमानदोषस्य प्रतिबन्धकतया ज्ञानविषयस्य तदवच्छेदकत्वाल्लक्षणसङ्ग
तिः. अत्र च स्वरूपसम्बन्धरूपमेवावच्छेदकत्वं लक्षणप्रविष्टं. न च स्वरूपसम्बन्धरूपावच्छेदकत्वपक्षे वक्ष्यमाण
दोषग्रास इति वाच्यं. ज्ञानभेदेपि समानाकारकज्ञानविषयताया ऐक्यमङ्गीकृत्य दोषस्य वक्ष्यमाणत्वात्. अ
त्र तदङ्गीकृत्य लक्षणकरणात्. तथा चानाहार्यत्वादिकमपि न निवेशनीयं. न चैवं सत्यसम्भवः. अव्याप्यवृ
त्तित्वज्ञानकालीनह्रदो वह्न्यभाववानित्यनाहार्याप्रामाण्यज्ञानशून्यनिश्चये प्रतिबन्धकत्वाभावेन प्रति
बन्धकतासामान्यस्यानवच्छेदकत्वादिति वाच्यं. अव्याप्यवृत्तित्वज्ञानानास्कन्दितत्वस्यापि ज्ञानविशेषणत्वात्. नचै

वमपि कपिसंयोगाभाववद्वृक्षेऽतिव्याप्तिः अव्याप्यवृत्तित्वज्ञानाभावेन न ज्ञानस्यानुमितिप्रतिबन्धकत्वादिति वा
[illegible] अव्याप्यवृत्तित्वभ्रमानास्कन्दितत्वस्य विशेषणत्वात् कपिसंयोगो वृक्षेऽव्याप्यवृत्तिरिति ज्ञानस्य प्रमात्वेन त[illegible]
ज्ञानकालीनकपिसंयोगाभाववद्वृक्षज्ञानस्योक्तसकलविशेषणविशिष्टतया तदीयविषयतायाः सामान्यान्त
र्गतायास्तादृशप्रतिबन्धकतानवच्छेदकत्वेनातिव्याप्तिविरहात् न चैवमसाधारण्येऽव्याप्तिः तद्विषयतासामान्या
न्तर्गतपक्षधर्मता[illegible]ज्ञानाकालीनज्ञानीयविषयताया अनथात्वादिति वाच्यं अस्यादुष्टलक्षणतया दोषल
क्षणत्वाभावेनासाधारण्यनियतबाधस्वरूपासिद्ध्यन्यतमदोषमादायैव दुष्टलक्षणसमन्वयात् न चैवं
सत्यसाधारण्ये न दुष्ट इति व्यवहारानुपपत्तिर्यद्यपीत्यादिग्रन्थ अथ खण्डनासङ्गतिश्च न च तत्तद्दोषघटितल
क्षणस्यस्वारस्याभिधानादिति वाच्यं तादृशज्ञानीयपक्षधर्म्यावच्छिन्नविषयतात्वव्यापकः प्रकृतानुमितित्व
व्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानवच्छेदकत्व असाधारण्यविषयताभिन्नत्वोभयाभावविवक्ष
णेनादोषात् ज्ञानभेदेपि न विषयताभेदानङ्गीकारे तु अनाहार्यत्वविशिष्टयद्रूपावच्छिन्नविषयताशा
लिनिश्चयत्वव्यापकः प्रकृतानुमितिप्रतिबन्धकतानवच्छेदकत्वासाधारण्यविषयताशून्यत्वोभया
भाववदिति विवक्षणीयं एवं च पाषाणमयत्वविशिष्टपर्वतेनातिव्याप्तिः पाषाणमयत्वेवानवस्थ
भाववत्तानिश्चज्ञानकालीने पाषाणमयत्वविशिष्टपर्वतनिश्चयेऽभयाभावासत्त्वादिति दिक् ॥

इति प्रथमलक्षणम् ॥ श्री ॥

श्रीः ।। मूले लिङ्गांशानिवेशस्यानतिप्रयोजनकतयेति ।। ननु कथं अनतिप्रयोजनकत्वं लिङ्गाज्ञाने लिङ्गज्ञानमिति व्युत्पत्त्या ज्ञाने
लिङ्गज्ञानजन्यत्वलाभेनानुमितित्वलाभाद्यद्रूपावच्छिन्नविषयकानुमितित्वव्यापकं प्रकृतानुमिति~~त्व~~त्वप्रतिबन्धकत्वमि
तिलक्षणं पर्यवस्यति तथा च तत्राहार्यसंशयभेदानिवेशप्रयुक्तलाघवसम्पादनेन सप्रयोजनकत्वात् न च घटोऽग्नि
रित्यादौ घटावच्छिन्नरूपवाधेऽव्याप्तिः निर्धर्मितावच्छेदकानुमित्यनङ्गीकारेण तादृशदोषविषयकानुमित्यप्रसिद्धेः तथा
च लक्षणे अनुमितित्वप्रवेशो न सम्भवतीति वाच्यं घटवद्भूतलमित्यनुमितिमादायैव लक्षणसमन्वयसम्भवात् न चाव्या
पकविषयताशून्यत्वविशेषणस्यावश्यकतया घटावच्छिन्नविषयताव्यापकभूतलादिविषयताशालितादृशानुमि
तिमादाय लक्षणसमन्वयो न सम्भवतीति वाच्यं घटो घटवानित्यनुमितिमादायैव लक्षणसमन्वयात् तादृशानुमि
तिविषयतायाः सर्वस्या अपि घटावच्छिन्नविषयताव्यापकत्वात् न च तत्रापि घटत्वांशे घटत्ववत्त्वस्य सामानाधिकर
ण्येन भानात् तद्विषयितैवाव्यापिकेति वाच्यं यद्रूपावच्छिन्नविषयिताव्यापकत्वं प्रतिबन्धकतावच्छेदकं तद्रूपावच्छिन्नवि
षयिताव्यापकविषयताशून्यत्वस्य लक्षणे न प्रवेशः किन्तु किञ्चिद्रूपावच्छिन्नविषयिताव्यापकविषयिताशून्य-
त्वस्यैव तथा च तादृशविषयिताशून्ययद्रूपावच्छिन्नविषयताशालिज्ञाननिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रती-
तिसिद्धाभाववत्त्वेन प्रतिबन्धकत्वांशे निवेशात् ह्रदो वह्निमानित्यादौ तादृशरूपं वह्न्यभाववद्ह्रदत्वमेवेति तत्संग्रहः व
ह्न्यभाववत्त्वावच्छिन्नविषयिताव्यापकविषयिताशून्यतदवच्छिन्नविषयताशालिज्ञानवृत्तिभेदप्रतियोगितावच्छे
दकत्वं नास्तीति प्रतीतिसिद्धाभाववत्त्वं प्रतिबन्धकतायामिति नैकदेशे अतिव्याप्तिः एवं वह्न्यभाववद्ह्रदत्वावच्छि

त्वविषयिताशून्यवन्ह्यभावत्वावच्छिन्नविषयिताशालिज्ञाननिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभावश्चत
प्रतिबन्धकतायां एतत्तत्त्वमग्रे स्फुटीभविष्यति· तथा च प्रकृते घटवृत्तित्वावच्छिन्नविषयिताव्यापकविषयिताशू
न्यघटावच्छिन्नविषयिताशालि भूतलं घटवदित्यनुमितिनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति प्रतीतिसिद्धाभा
वमादायैव लक्षणसमन्वयादिति चेन्न· पर्वतीयवन्ह्यन्तरवन्ह्यभाववान्पर्वतो वन्ह्यभाववानित्यत्र वन्हिमत्प
र्वतस्यादरूपे बाधे व्याप्तिः तत्र दोषविषयकानुमितेर्महानसीयत्वविषयतारूपाव्यापकविषयताशालित्व
नियमात्· न च महानसीयवन्ह्यभाववान्पर्वत इति बाधकालीनानुमितिमादाय लक्षणसमन्वयः· तत्र केवलव
न्हेरेव भानादिति वाच्यं· यादृशस्थले एकविशेषेण बाधस्य पक्षतावच्छेदकदोषानुमितेः प्राक् तद्विशेषस्यन
बाधनिश्चयस्तत्र चानुमितित्वघटितलक्षणासम्भवाल्लिङ्गांशाविवक्षणादिति दिक्·॥· यत्प्रकारकत्वेनेत्यारभ्य
प्रतिबन्धकत्वादित्यन्तं मूलं॥· नन्वत्र पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वानापत्तेरतः सामाना
धिकरण्येनानुमितिस्थल एवातिव्याप्ति~~र्वक्त~~ वक्तव्या· तथा चावच्छेदकावच्छेदेन बाधनिश्चयस्य विरोधितया
तस्य च पर्वतत्वव्यापकवन्ह्यभावप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नवन्ह्यभावत्वावच्छिन्नप्रकारतात्वेनैव प्रति
बन्धकतया तादृशसम्बन्धाप्रसिद्ध्या तेन सम्बन्धेन तद्वत्त्वस्याप्रसिद्ध्या कथमतिव्याप्तिः· न च संसर्गतावच्छेद
कतापर्याप्तिमनिवेश्य यद्धर्मावच्छिन्नयन्निष्ठसंसर्गताकयन्निष्ठप्रकारताकप्रतिबन्धकतावच्छेदिका तद्धर्मावच्छिन्न

तन्निष्ठसंसर्गताकतन्निष्ठनिरूपकतानिरूपिताधिकरणतात्वस्य विवक्षणात् स्वरूपत्वावच्छिन्नस्वरूपनिष्ठसंसर्गताक
वन्ह्यभावत्वावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वस्य धूमादौ सत्वादिति व्याप्तिरिति वाच्यं तथा सति पक्षविशे
षणाकभ्रमसादापाप्यनि व्याप्तिः सम्भवति पर्वतत्वव्यापकवन्ह्यभावप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नाधेय
तात्वावच्छिन्नसंसर्गतानिरूपकपर्वत[illegible]कारतायाः प्रतिबन्धकतावच्छेदकतया संसर्गतावच्छेदककुक्षौ प्रविष्टा
धेयतात्वावच्छिन्नाधेयत्वनिष्ठसंसर्गतानिरूपकपर्वतनिष्ठनिरूपकतानिरूपिताधिकरणतात्वस्य धूमे सत्वात्
सम्बन्धभेदेनाधेयताभेदेपि संयोगेन वन्ह्यभावव्याप्यः पर्वते इति ज्ञानीय पर्वतत्वव्यापकवन्ह्यभावव्या
प्यप्रतियोगिकसंयोगसम्बन्धावच्छिन्नाधेयतासम्बन्धेन पर्वतप्रकारताया अप्यवच्छेदकतया संयोगसम्बन्धा
वच्छिन्नाधेयतात्वावच्छिन्नसंसर्गताकनिरूपकताकत्वस्य धूमे सत्वात् तादृशभ्रमसादायानि व्याप्तिरतो यद्धर्मा
वच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकतानिरूपितसंसर्गतानिरूपकप्रकारता तादृशप्रतिबन्धकतावच्छे
दिकातद्धर्मावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकसंसर्गताकनिरूपकाधिकरणतावत्वं विवक्षणीयं
एवं सति पक्षविशेषणकभ्रमसादायनानि व्याप्तिस्तत्र संसर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगिता
वच्छेदकत्वस्य पर्वतत्वव्यापकवन्ह्यभावव्याप्यप्रतियोगिकसंयोगसम्बन्धावच्छिन्नाधेयतात्वरूपसमु
दायवृत्तिसमुदायत्वे एवसत्वेन तदवच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकत्वस्याप्रसिद्धेः

एवंसति पक्षविशेष्यकभ्रममादायापि नातिप्रसङ्गः तत्रापि पर्वतत्वव्यापकवन्ह्यभावादिप्रतियोगिकस्वरूपसंयोगत्वा
दिरूपसमुदायगतसमुदायत्वरूपतादृशप्रतिबन्धकतावच्छेदकप्रकारतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्न
पर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नपर्याप्तिकावच्छेदकताकसंसर्गताकनिरूपकत्वस्याप्रसिद्धत्वात्. यत्तु समानविषय
कत्वेन प्रतिबध्यप्रतिबन्धकभावाभिप्रायेणैवं. तथा च. शुद्धस्वरूपसम्बन्धावच्छिन्नवन्ह्यभावत्वावच्छिन्नप्रकारतापा
अपि सामानाधिकरण्येनानुमितिप्रतिबन्धकतावच्छेदकतया पर्याप्तिविरहेपि पक्षविशेष्यकभ्रममादायातिव्याप्ति,
सङ्गतिरिति. तन्न. वन्ह्यभावव्याप्यः पर्वत इति पक्षविशेषणकभ्रममादायापि तत्सङ्गतेरिति चेन्न- अवच्छेदकावच्छेदेन उ
द्देशे विधेयसंसर्गे उद्देश्यतावच्छेदकव्यापकविधेयप्रतियोगिकत्वस्य उद्देश्यतावच्छेदकताघटकसंसर्गे विधेयव्या
प्योद्देश्यतावच्छेदकप्रतियोगिकत्वभानस्य जगदीशेनानुमितावुक्तत्वात् यत्सम्बन्धावच्छिन्नयन्निष्ठावच्छेदक
ताकयत्सम्बन्धावच्छिन्नयन्निष्ठप्रकारतातादृशप्रतिबन्धकतावच्छेदिका तत्सम्बन्धावच्छिन्नतन्निष्ठावच्छेदक
ताकतत्सम्बन्धावच्छिन्नतन्निष्ठनिरूपकतानिरूपिताधिकरणतावत्त्वविवक्षणे पक्षविशेष्यकभ्रममादाया
तिव्याप्तिः सङ्गच्छते. वन्ह्यभावव्याप्यपर्वतत्वप्रतियोगिकसमवायसम्बन्धावच्छिन्नपर्वतत्वनिष्ठावच्छेदक
तानिरूपकविशेष्यतानिरूपिकताया वन्ह्यभावत्वनिष्ठस्वरूपसम्बन्धावच्छिन्नावच्छेदकतानिरूपकशुद्धस्वरू
पसम्बन्धावच्छिन्नप्रकारतायाः सामानाधिकरण्येनानुमितिप्रतिबन्धकतावच्छेदकतया स्वरूपसम्बन्धावच्छिन्न
वन्ह्यभावत्वनिष्ठावच्छेदकताकवन्ह्यभावनिष्ठशुद्धस्वरूपसम्बन्धावच्छिन्ननिरूपकताकाधिकरणत्वस्य धूमे सत्वात्.

नचैवं पक्षादिशेषणकभ्रमसाधारण्यादतिव्याप्तिः तत्र वह्न्यभावव्याप्यत्वाद्यवच्छिन्नविशेष्यतानिरूपिताया वह्न्यभावव्याप्यव्याप्यपर्वतत्वप्रतियोगिकसमवायावच्छिन्नपर्वतत्वनिष्ठावच्छेदकतानिरूपकसंयोगादिसम्बन्धावच्छिन्नपर्वतनिष्ठप्रकारतायाः सामानाधिकरण्येनानुमितिप्रतिबन्धकतावच्छेदकतया तादृशसम्बन्धावच्छिन्नपर्वतत्वनिष्ठावच्छेदकतानिरूपकत्वाप्रसिद्धेरित्यादिकं ॥ विशिष्टदोषविषयकत्वस्य संशयादौ सत्त्वात्पुनरसम्भव इति ॥ नन्वत्राभावे संयोगेन वह्नेः साध्यतायां संयोगसम्बन्धावच्छिन्नप्रतियोगिकत्वसम्बन्धेन वह्न्यभावस्य स्वरूपेण हेतुतायां वह्न्यभाववदभावे लक्षणसमन्वयः । अभावो वह्न्यभाववान्वेति संशयेपि तत्स्थलीयानुमितित्वव्यापकपक्षतावच्छेदकविशिष्टे तादृशहेतुत्वावगाहित्वघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपिताया अभावत्वावच्छिन्ने संयोगसम्बन्धावच्छिन्नप्रतियोगित्वसम्बन्धेन वह्न्यवगाहित्वघटितधर्मावच्छिन्नप्रतिबन्धकतायाः सत्त्वात् तादृशसंशयस्याभावांशे तादृशसम्बन्धेन वह्न्यवगाहित्वादिति भ्रमः । अभावो वह्निमान्वह्न्यभाववद्वृत्तिर्वा तादृशवह्न्यभाववान्वेति ज्ञानस्य व्याप्तिघटकाभावांशे संयोगसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धेन वह्न्यवगाहित्वेऽनाहार्यतया तादृशानुमित्यप्रसिद्धेरित्यादिक् ॥ ॥ अनतिरिक्तवृत्तित्वं च स्वव्यापकत्व[illegible]त्वमिति ॥ नन्वत्र प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वाभावेऽनाहार्याप्रामाण्यज्ञानानास्कन्दितदोषविषयकनिश्चयवृत्तित्वाभावस्य वक्तुं नोक्तः व्यापकत्वानिवेशेनापि लाघवात् न चाधिकरणभेदेनाभावभेदाङ्गीकर्तृनये घटादिवृत्तिप्रतिबन्धकत्वाभावस्य तादृशोदासीननिश्चयावृत्तित्वात्तादृशोदासीनेऽतिव्याप्तिरिति वाच्यं तादृशप्रतिबन्धकत्वाभाववत्त्वतादृशनिश्चयवृत्तितानवच्छेदकत्वविवक्षणे दोषाभावात् अधिकरणभेदेनाभावभेदाङ्गीकर्तृमतेपि तादृशाभावत्वस्य गगनत्वादिवत् तेनैव न केवलाभावत्वे निश्चयवृत्तितावच्छेदकत्वसत्त्वेपि विशिष्टाभावत्वेन तदभावस्यासत्त्वेनासम्भवतादवस्थ्यात् यादृशतादृशप्रतिबन्धकताप्रतियोगिकत्वाभावगतद्वित्वेना

दृशनिश्चयवृत्तित्वविशिष्टतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वाभावो निवेश्यते तदा न लाघवप्रत्याशेति दिक् ॥
यत्तु प्रतिबन्धकताशून्यतादृशनिश्चयावृत्तित्वमेवातिरिक्तवृत्तित्वमित्याहुः तच्छुद्धह्रदत्वावच्छिन्नेऽतिप्रसङ्गाच्चेति ॥ नन्वत्र प्रति
बन्धकताशून्यतादृशनिश्चयावृत्तित्वमित्यस्यानेन प्रकृतानुमितिप्रतिबन्धकताशून्यानाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृ
त्तिविषयितानिरूपकतानवच्छेदकं यद्रूपं तद्वत्त्वं विवक्षितं तथा च नोक्तातिव्याप्तिः ह्रदत्वस्य तादृशप्रतिबन्धकताशून्यतादृश
निश्चयवृत्तिविषयितानिरूपकतावच्छेदकत्वात् न च ह्रदत्वे तादृशनिश्चयनिष्ठविषयितानिरूपकतावच्छेदकत्वसत्त्वेपि विशिष्ट
ह्रदत्वे तादृशाभावस्य दुर्घटत्वादसम्भव इति वाच्यं प्रतिबन्धकताशून्यतादृशनिश्चयनिष्ठविषयितावैशिष्ट्यान्यधर्मवत्त्वस्य
विवक्षणीयत्वात् धर्मे विषयतावैशिष्ट्यं च स्वनिरूपितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन स
च धर्मो ह्रदत्वादिनिष्ठमेकत्वमेव न तु वह्न्यभाववद्ध्रदत्वगगनसमुदायत्वमित्यसम्भवाभावात् न चासाधारण्ये व्याप्तिः
असाधारण्यतावच्छेदकधर्मस्य वह्निव्यापकीभूताभावप्रतियोगित्वज्ञातत्वादेः पक्षधर्मताज्ञानासमानकालीनता
दृशप्रतिबन्धकताशून्यासाधारण्यविषयकतादृशनिश्चयवृत्तिविषयितानिरूपकतावच्छेदकत्वादिति वाच्यं
स्वमतेपि तादृशाव्याप्तेः सम्भवत्वात् यदि च स्वमते प्रकृतपक्षे प्रकृतहेतुमत्ताज्ञानसमानकालीनत्वप्रकृतानुमित्यप्र
तिबन्धकत्वोभयाभावे यद्रूपावच्छिन्नव्यापकत्वं विवक्ष्यते तदैतन्मतेपि तादृशप्रतिबन्धकताशून्यासाधारण्यविष
यिताशून्यतादृशनिश्चयवृत्तिविषयितानिरूपकतानवच्छेदकत्वविवक्षणे न कश्चिद्दोष इति चेन्न ह्रदो वह्निमान् नित्या
कपिसंयोगाभाववत्कपिसंयोगादित्यतिव्याप्तेः तद्विषयकज्ञानस्य नियताहार्यतया तादृशनिश्चयनिष्ठविषयितानि
रूपकतानवच्छेदकत्वादिति दिक् ॥ ॥ अथैवमपि जातित्वादिविषयकस्य जातिसामान्याभाववानित्यादिज्ञान

स्यापि वन्ह्यभाववद्ह्रदत्वावच्छिन्नविषयकतया तस्य ह्रदो वन्हिमानित्याद्यनुमित्यविरोधितयाऽसम्भव इति ।। नन्वत्रासम्भ
वाभिधानमसंगतं · सामानाधिकरण्यसम्बन्धेन ह्रदे वन्हेः साध्यत्वेऽवच्छेदकावच्छेदेन बाधे लक्षणसत्वात् · तथा हि ·
ह्रदत्वावच्छेदेन वन्ह्यभावावगाहिज्ञाने ह्रदत्वव्यापकवन्ह्यभावप्रतियोगिकस्वरूपस्य प्रकारसम्बन्धतया तत्स्थलीय
लक्षणे तादृशसम्बन्धावच्छिन्नवन्ह्यभावनिष्ठनिरूपकताकविषयितामादायैव लक्षणसमन्वयात् · तादृशविषयितायाश्च
जातिमान्वन्ह्यभाववानिति ज्ञानेऽसत्वात् · तत्र हि जातित्वावच्छिन्नव्यापकवन्ह्यभावप्रतियोगिकस्वरूपमेव प्र
कारसम्बन्धस्तादृशसंसर्गकोटिप्रविष्टव्यापकस्वरूपाभावस्तु विलक्षण इति चेदत्र केचित् · असम्भवशब्देनाव्या
प्तिरेवाभिहितेत्याहुः · अन्ये तु व्यापकस्वरूपाभावगताभावत्वस्य प्रमेयत्वेन यत्र भानं ह्रदत्वसमानाधिकरण
भेदप्रतियोगितावच्छेदकत्वीयप्रमेयविशिष्टवन्ह्यभावप्रतियोगिकस्वरूपसम्बन्धेन वन्ह्यभाववान्ह्रद इत्या
कारकज्ञानस्य वारणासम्भवेनासम्भव एवेत्याहुः · वस्तुतस्तु अव्याप्तिशङ्कैव नावतरति · अवच्छेदकावच्छेदेनो
द्देश्यविधेयभावावगाहिप्रतीतौ उद्देश्यतावच्छेदकतापर्याप्त्यधिकरणधर्मनिरूपितव्यापकत्वमेव संसर्ग
शरीरे भासते न तु तदवच्छेदकावच्छिन्ननिरूपितव्यापकत्वमपि · तथा सति अवच्छेदकावच्छेदेन विरोधिधि
यः प्रतिबन्धकताशरीरे धर्मितावच्छेदकावच्छिन्नत्वेन विशेष्यताया निवेशप्रयोजनाभावात् तद्धर्मव्यापक
त्वघटितप्रकारतावच्छेदकसंसर्गबुद्धेस्तद्धर्मावच्छिन्नविशेष्यकत्वनियमात् · न चेष्टापत्तिः · अवच्छेदका

च्छेदेन बाधस्य प्रतिबन्धकतावच्छेदकविषयत्वानिरूपितधर्मितावच्छेदकघटिततया वह्न्यभाववद्ध्रदत्वावच्छिन्नस्य
दोषत्वानुपपत्तेः एवञ्चोद्देश्यतावच्छेदकत्वपर्याप्त्यधिकरणघटितस्य संसर्गत्वस्वीकारेऽवच्छेदकावच्छेदेन बा
धनिश्चयप्रतिबन्धकतावच्छेदकशरीरे धर्मितावच्छेदकावच्छिन्नत्वेन धर्मिविशेष्यतानिवेश आवश्यकः अन्य
था ह्रदो वह्निमानित्यादौ जातिमान्वह्न्यभाववानित्यादिनिश्चयानर्भावेण प्रतिबध्यप्रतिबन्धकभावव्यभि
चारात् तादृशनिश्चयस्यापि ह्रदत्वव्यापकवह्न्यभावप्रतियोगिकस्वरूपसम्बन्धेन वह्न्यभावप्रकारकत्वात्
धर्मितावच्छेदकावच्छिन्नत्वेन विशेष्यतानिवेशे प्रतिबध्यज्ञानीयविशेष्यतावच्छेदकता यादृशी तादृश्याः ए
व प्रतिबन्धकतावच्छेदकशरीरे निवेशनीयतया न व्यभिचारः एवञ्च जातिमान्वह्न्यभाववानिति ज्ञानेऽप्य
वच्छेदकावच्छेदेन बाधीयविषयतामादाय लक्षणसङ्गमनीयं तस्याः सत्वात् कथं सामानाधिकरण्येन
साध्यकस्थले लक्षणासमन्वय इति दिक् ॥ जलवान्वह्न्यभाववानित्यादिस्थलीयदोषासङ्ग्रहेणाविशे
षितधर्मावच्छिन्नपक्षादिस्थलीयस्यापि किञ्चिद्धर्मविशिष्टघटितदोषस्यासङ्ग्रहेण च पक्षतावच्छेदकांशे
ऽन्यप्रकारकत्वनिवेशाशक्यत्वादिति ॥ नन्वत्र पक्षतावच्छेदकांशेऽन्यप्रकारकत्वच्छिन्नावत् यदि
पक्षतावच्छेदकनिष्ठविशेष्यतानिरूपितप्रकारत्वानिरूपकत्वं तदा ह्रदो वह्न्यभाववानित्यादिज्ञानस्याप्यस
ङ्ग्रहः तस्यापि सामानाधिकरण्यसम्बन्धावच्छिन्नह्रदत्वनिष्ठविशेष्यतानिरूपितवह्न्यभावनिष्ठप्रकारता

त्वं निवेशनीयम् अतो न कोऽपि दोष इति वाच्यम्। तथा सत्यपि वह्न्यभाववद्ध्रदत्वादिविशिष्टविषयकानिश्चयविशिष्टवह्न्यभाववद्ध्रदत्वादिविशिष्टविषयकानिश्चयत्वस्य परस्परमनुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वात् तादृशविशिष्टद्वयघटितत्वस्य बाधादौ सत्त्वादसम्भवतादवस्थ्यमिति चेन्न। यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टविषयकद्वयाघटितत्वस्य विवक्षितत्वात्॥ अथैवमपि वह्न्यभाववज्जलात्मादिमद्वृत्तिजला~~[illegible]~~ जलाभाववद्ध्रदपक्षकवह्निसाध्यकस्थले तादृशजलवद्ध्रदात्मकाश्रयासिद्ध्यादावव्याप्तिः तत्र तादृशविशिष्टद्वयघटितत्वात्। न चाश्रयासिद्ध्यादिविषयताघटकविषयताभिन्नत्वं तादृशविशिष्टद्वयविषयतायां निवेश्यम् अतो नोक्तदोष इति वाच्यम्। तथा सति तादृशहेत्वाभाससाध्याप्रसिद्ध्यादिविषयताभिन्नत्वस्यापि निवेशनीयतया गौरवापत्तेः ग्रन्थकारस्य सत्प्रतिपक्षविषयताभिन्नत्वमात्रानिवेशायोगाच्च। न च यादृशविशिष्टविषयकानिश्चयत्वं ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टाघटकत्वं तादृशविशिष्टद्वये निवेशनीयम् अतो नोक्तदोष इति वाच्यम्। तथा सत्युक्तस्थल एव वह्न्यभाववज्जलवत्कालीनजलवद्ध्रदादेरपि दोषतापत्तेः वह्न्यभाववज्जलवद्ध्रदादिरूपवैशिष्ट्यस्य ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्तिविषयताकविशिष्टघटकत्वात्। विशिष्टपक्ष[illegible]ग्रहाविरोधितया कालीनत्वघटितोक्तविशिष्टस्याश्रयासिद्ध्यनात्मकत्वाच्च।

४१२५

पदवाक्यरत्नाकरः

श्री ५ को सरकार
संस्कृत पुस्तकालय

ायनमः नान्यः साधारणो विश्वविषयो यो विभोर्गुणः तस्यैषा शक्तिरखिलप्रपञ्चस्य प्रकाशने १ विभोः संयोगे
षसामान्यमनादिनिधनेनैचेनन्येनसकलमपिवस्तुव्याप्नुवतोभगवतोभवस्ययोगुणोनित्यसविषयकत्वाद्व्यत्वादिना
गुणाव्याहतेनधर्मेणलोकान्तरेविषयतयाविश्वमभिव्याप्यवर्त्तते तस्यैहेनाप्रतिहतस्यप्रयत्नस्यजन्यजानजननानुकूलत्वंसा
थवयः शब्दत्वेनानुगतीकृतः सन्नेकरूपव्यवह्रियमाणोगगनेनरञ्जसमवायेनावर्त्तमानोजगतिविषयेविवर्त्तमानव्यापारेन
परिमाणस्याकाशस्यवर्णलक्षणोगुणस्तस्यसर्वधार्मवोधायप्रभवत्यभिधानाभवृत्तिरितिविश्वेश्वरस्यह्लानेरिवाकाशस्यशब्दोपि
नः संसारान्मोचयतीतिप्रयोजनसम्बन्धौध्वनितः ननुघटादिवर्णानांपूर्वंचप्रकाशनसामर्थ्यंनप्रत्येकपरिसमाप्तंघश्रवणमात्रे
घावगमप्रसङ्गात् नापिसमुदायव्यासक्तं क्षणद्वयमात्रप्राणनस्यतेनपुरुषेणोच्चरितस्यघकारस्यतत्पुरुषोच्चारितघस्यमा
कारेणसहयोगपद्येनोत्पत्तेरसंभवात् विभिन्नपुरुषोच्चारितघकारटकारव्यतिकरेणार्थप्रत्ययाभावाच्च । नचैकपुरुषो
योरेवघकारयोः स्थितयुगपद्योगपद्यमव्यवधानेन पौर्वापर्यंवासमुदितत्वमित्यपिसंभवति । तथाहि । प्रथमंस्वतःपुरुषार्थता

टकार

श्रीः
३

वच्छेदकसुखदुःखाभावत्वादिविशेषितसुखादिज्ञानात् स्वस्य सुखे दुःखाभावे वा तत्साधनताप्रतिसंधानात् परस्य वा कार्यार्थप्रवृत्ते तत्कारणत्वाकलनात्कृ
वे तदुपायत्वप्रत्ययात् करणतानुसंयोगे व कुर्यामिच्छा ततश्चेष्टा कंठतानुसंयोगसाधनं मदीयेदानीतनकृतिसाध्या चेति प्रतिसंधानमथ मदीये
दानीतनकृतिसाध्यायाः करणतानुसंयोगसाधनस्य चेष्टायाः समवायिकरणं इति करणांशे लौकिकमुपनीतं चेष्टांशे पुनरलौकिकं ला
चप्रत्यक्षमुत्पद्यते । अन्तर्भागावच्छिन्नत्वं च स्वान्तःशरीरावयवावगाहकत्वात् । अतएवान्तर्नाडीमालस्पन्दनादिगोचराः प्रयत्नाउ
त्पद्यंते । तेनेष्टसाधनत्वकृतिसाध्यत्वे चेष्टायामवगाहमाने नोपादानस्य करणस्य त्वाचप्रत्यक्षेण चेष्टाचिकीर्षां जनयित्वा करणाव
च्छेदेन करणोपादानिका चेष्टासाध्यिका प्रवृत्तिर्जन्यते । स्वसाधनतयोपादानप्रत्यक्षस्य तदुपानकप्रयोजनकत्वात् । शरीरावय
वच्छिन्नावच्छेदकतासम्बन्धेन चेष्टासाध्यकप्रवृत्तौ चेष्टोपादानत्वेनावयवत्वाच्चास्य विशिष्यकारणत्वाच्च । परशरीरस्य स्वसाध
नचेष्टावदृत्येव बाह्यत्वाच्च स्वत्वेऽपि न परशरीरावच्छेदेन प्रवृत्तिः । अवच्छेदकतयात्मीयविशेषगुणे तदात्मीयादृष्टस्यावच्छे
दकतासंसर्गेण कारणत्वात् । उत्पद्यते च परशरीरोपादानिका चेष्टासाध्यिका प्रवृत्तिर्निजमहाशरीरे न त्ववच्छेदकतया शरीरा

वयवे । भवतु चोपादानत्वविशिष्टावच्छेदकतैव निरूढत्वाज्जन्यतावच्छेदकः सम्बन्धस्तेन महाशरीरावच्छेदेनोत्पन्नादिच्छे
च्छासाधकप्रयत्नोत्पत्त्यभ्युपगमेपि न क्षतिः । यत्तु कण्ठाद्यन्तरवयवावगाहिनां अंधकारे वक्राङ्गुलिः प्रविष्टे नाङ्गुलिरेव हस्त
इत्यादिवाक्याद्यवयवावगाहिनां च प्रत्यक्षाणां न त्वाचत्वम्, तद्गतपरिमाणमादायोदरादिग्रहणप्रसङ्गात् अपि त्वात्मत्वेन कण्ठ
हस्ताद्यवगाहिमानसमेव योग्यधर्मपुरस्कारेण योग्यानामपीन्द्रिययोग्यत्वाभ्युपगमात् तत एव दधिधवलमाकाशमि
ति नायनेनिश्चय इति तन्न । मम कण्ठ इति प्रतीत्या आत्मत्वेन कण्ठोग्रहात् इत्यस्यानुभवबाधितत्वात् । वक्राङ्गुलिर्हस्त इ
त्यादेवक्राङ्गुलित्वादीनामग्रहप्रसङ्गाच्च । तथा कण्ठोपादानेच्छया करणावच्छिन्नया प्रवृत्त्या कण्ठसमवेतां चेष्टां जन्यते
उपादानविषयत्वावच्छेदकत्वोभयसंसर्गेण प्रवृत्तेः । समवायेन चेष्टां प्रति कारणत्वात् । परं शरीरचेष्टासाधकप्रवृ
त्त्या उपादानतया विषये परं शरीरत्वावच्छेदके महति शरीरे चेष्टाया अजननात् । कण्ठचेष्टायाश्च विभागपूर्वसंयोगनाशो
जनयित्वा तालुना कण्ठस्य संयोगो जन्यते तेन स्वाश्रयावच्छिन्नत्वसंसर्गेण कार्योत्पत्तौ सोदनाद्यकारादिः शब्दो निजा

श्री:
२

अयावच्छेदेनोत्पाद्यते नाऽन्त्वादिप्रेरितो वायुश्च यथायथं कदंबगोलकन्यायेन वीचीतरङ्गन्यायेन वा शब्दान्तरं वा तद्देशावच्छेदेनोत्पाद्य तु प्रसारयतीति नाशोत्पत्तिप्रक्रिया। तथा च यत्प्रयोजकचेष्टागोचरप्रयत्नकाले पूर्वेषां सर्वेषामेव ज्ञानानां विनष्टत्वात् तदनन्तरं सुखादिज्ञानं तदिच्छाक्रमेण ककारप्रयोजकचेष्टागोचरप्रयत्नोत्पत्तिं यावद्यावन्तः क्षणास्तावन्तः क्षणान्तरेणैव धकारोत्पत्त्यनन्तरं ककारोत्पत्तिरिति धकतयोर्योगपद्यमव्यवधानं चेत्युच्यते चतुर्भिः पञ्चभिर्वापि प्रायेणान्तरितः क्षणैः पूर्ववर्णात्परो वर्णः पदत्वं प्राते पद्यते सुखेच्छानन्तरं सुखसाधनताज्ञानं वा कार्यबुद्धिरिति स्मरणे तज्जनिताबुबोधयिषा सुखमपि विषयीकरोति। उपायेच्छायाः फलविषयफलनियमात् सुखसाधनं बुद्धिरिति ज्ञानस्य सुखेच्छायाश्च सुखमिष्टफलत्वात्त्वविषयतानिरूपितबुद्धिनिष्ठोद्देश्यताकेच्छात्वावच्छिन्नं प्रत्येव जनकत्वात्। अन्यथा दुःखध्वंसजनकताज्ञानदुःखध्वंसेच्छाभ्यां जनितायां बुद्धीच्छायां व्यभिचारप्रसङ्गात्। फलत्वात्त्वविषयता च सुखाय धनमिच्छामीत्यनुभवसिद्धा। भवतु वा सुखसाधनताज्ञानस्यापि सुखसाधनत्वाभिऽजनितेच्छा सुखतदुपायोभयसमूहालम्बनस्वरूपैव। वर्णगोचरमिष्टसाधनतास्मरणमपि पूर्वगृहीतयावदिष्टसाधनतासमूहालम्बनस्वरू

पमितितज्जनितापीच्छा सुखं वुद्धिं वर्णं वा वगाहते। वर्णास्तु एव घत्वघोत्तरत्वादिना तज्जदिच्छाविषयास्ततो निरुक्तयावदिष्टसाध
नतासमूहात्वेंव न स्वरूपं प्रत्येकं तावद्वर्णसाधनतया तत्तत्स्थानचेष्टाज्ञानमवगाहमानं स्वकीयकृतिसाध्यप्रथमवर्णजनकचेष्टावि
षयं स्मरणम्। अथ पूर्वगृहीतयावदिष्टविषयिणी चेष्टा स्थिता। ततः प्रथमवर्णानुकूलचेष्टायामिदानीं तु न स्वकीयकृतिसाध्यत्वे
ष्टसाधनत्वयोर्मानसं जायमानमनुभूतचरण्य खिल्लानीष्ट[illegible]त्साधनानि सुखवुद्धिवर्णचेष्टान्तराणि गोचरीकरोत्युपनायकस्
त्वात्। इदानीं कालस्तु मनोयोग्यज्ञानादिस्वरूपो नो कि कादपि सन्निकर्षान्मनसा गृहीतुं शक्यः। कृत्यधिकरणत्वेनावगाहितोपि
स्याधिकरणकालगोचरस्य कर्त्तव्यताज्ञानस्य प्रवर्त्तकत्वोपगमात्। भवतु वा पूर्वोक्तमिष्टसाधनतास्वकीयकृतिसाध्यतयोः स्मरण
मेव कालत्वेन ताद्रूप्येणवेदानीं कालविषयकं तदुपनीत एव कृत्यधिकरणकालकर्त्तव्यताघटककृतिविशेषणतया मनसा गृह्यते
अतएव वर्त्तमानस्य ज्ञानस्य मनःसंनिकृष्टस्यापि पूर्वगृहीतत्वे न कृतिविशेषणतया मानसं भानमनुपपन्नमिति समाहि
तं [illegible] संभवति च कृत्यधिकरणकालस्य ताद्रूप्येणास्मरणमनवच्छिन्नप्रकारताकत्वेनानुभवस्य स्मरणं प्रति कारण

श्रीः
२

त्वाभावात्।कालिकाधिकरणतावच्छेदकधर्मवानित्यनुभवेनविषयीकृतानांकालवृत्तीदंतानामुद्बोधकविशेषवलादनवच्छि
न्नयापिप्रकारतयास्मरणेनग्रहणेवाधकाभावात्।तेनचप्रथमवर्णानुकूलचेष्टायामिष्टसाधनत्वस्वकीयेदानींतनकृति
साध्यत्वेवर्णान्तरतदनुकूलचेष्टादौचेष्टसाधनतामात्रमवगाहमानेनमानसेनप्रथमवर्णेचिकीर्षा।अन्यत्रचेच्छामात्रं
जन्यते।जन्यतांवासंस्कारोद्बोधकविशेषप्रभवेनकालिकाधिकरणतावच्छेदकधर्मवत्कालिकास्वकीयकृतिसाध्यत्वानुभ
वसमुत्थेनापमुषितकालिकाधिकरणतावच्छेदकत्वस्वरूपतन्नोपलक्षणधर्मेणप्रथमवर्णानुकूलचेष्टायामिदा
नींतनस्वकीयकृतिसाध्यत्वमन्यत्रचेष्टसाधनतामात्रमवगाहमानेनस्मरणेनैवानिरूक्ताचिकीर्षाजनितायान्तुनिरु
क्तमानसेनकथितस्मरणेनवासकलेष्टपरंपरावगाहिन्यांप्रथमवर्णचेष्टाचिकीर्षायांतादृशकृतिसाध्यत्वेष्टसाधन
त्वविशिष्टप्रथमवर्णानुकूलचेष्टावान्कण्ठइत्युपादानप्रत्यक्षंत्वाच[illegible]द्वितीयादिवर्णचेष्टानिष्ठेष्टसाधनत्वा

दिकमप्युपनीतं विषयः। इष्टसाधनद्वितीयवर्णजनकचेष्टादीनां पूर्वकालीनत्वादिसंसर्गेण प्रथमवर्णचेष्टायां विशेष
णतया भानसंभवात्। तत उपादानीभूतकण्ठावच्छेदेन प्रथमवर्णानुकूलचेष्टासाधकः प्रयत्नः। तज्जनितचेष्टो
त्पत्तिकाले तु द्वितीयादिवर्णानुकूलचेष्टादिष्विच्छा प्रथमचिकीर्षास्वरूपफलेच्छासमानकालीनस्योपादानप्र
त्यक्षात्मकस्येष्टसाधनताज्ञानस्य पूर्वं सत्त्वात्तत्तत्स्वफलेच्छा न स्वत उपायेच्छाजनिका किं त्विष्टसाधनताज्ञानोपल
क्षणीभूयजनकतावच्छेदिकेति संप्रदायः। ततः प्रथमचेष्टाजनितविभागकाले मदीयेदानीन्तनकृतिसाध्या द्वितीय
वर्णजनकचेष्टा मदिष्टसाधनमित्याकारकमखिलानां फलपरंपराणामग्रिमवर्णचेष्टानां चेष्टसाधनत्वावगाहि सम
रणमथ प्रथमचेष्टाजनितपूर्वदेशासंयोगनाशकाले द्वितीयवर्णचेष्टाचिकीर्षा सकलेच्छावगाहिनी। ततः प्रथमचेष्टा
जनितोत्तरसंयोगदशायां द्वितीयवर्णचेष्टोपादानस्य स्थानस्य त्वाचं प्रत्यक्षमनीतप्रथमवर्णानन्तरसकलचेष्टान्तरया

श्री:
४

वदिष्टतत्साधनविषयकस्यप्रथमशब्दोत्पत्तिकालेद्वितीयवर्णानुकूलचेष्टासाध्यकस्तदुपादानस्थानान्तरावच्छेदेनप्रयत्नः
स्ततस्तत्स्थानचेष्टाविभागपूर्वदेशसंयोगनाशोत्तरदेशसंयोगोत्पत्तिरितिक्षणचतुष्कमन्तराव्यतिक्रम्यद्वितीयशब्दोत्प
त्तिरेवमुत्तरोत्तरेषामपिवर्णानांयदिचस्मरणंनचिकीर्षाजनकमपितुतन्मूलैकमानसंतदापंचक्षणाःशब्दयोरन्तरकाले
पतिताःप्रायिकंचेदमतःक्वचिदधिकविलंबसंभवेपिनक्षतिः।द्रुतविलंबितेवावदतीत्यनुभवस्यविश्वजनीनत्वात्।श्रोता
नुघकारोत्पत्तेरनन्तरंजातिव्यक्तीसाक्षात्कृत्यघत्वेनघकारंविकल्पकानन्तरंघविशेषितंध्वंसंसाक्षात्कुरुतेस्मरतिघका
रोत्पत्तिकालेतत्स्मरणोपनीतघकारध्वंसविशेषितंटकारंसाक्षात्कुरुतेप्रत्येतिचघध्वंसवट्टत्वावच्छेदकत्वेनशाब्दि
शक्तिमितिभवति।घटहादिपदप्रत्यक्षेणानुघध्वंसवत्त्वंटेपिएवप्रतीयतेनतुटकारेयदितुपूर्वापरनयवशात्प्रतीयतेतदाघटप
दप्रत्यक्षकार्याणिजायन्तएव।अतएवचित्रकाव्यादौव्यवहितान्यक्षराणियोजयित्वातदर्थंस्मरन्तीतिकेचित्।तन्न्यायात्तु

ज्ञानेयोर्वियोगपर्यंसिद्धान्तविरुद्धं योग्यात्मविशेषगुणसामान्यस्य। तथा च घकारजनकचेष्टाचिकीर्षाकाले टकाले
ट्कारजनकचेष्टायामिष्टसाधनत्वमदीयेदानींतनकृतिसाध्यत्वे मूर्द्धादिस्थानेनुतादृशचेष्टासमबाधित्वमवगाहमानेत्वाच्चमुपादानप्र
त्यक्षं पूर्वं तेषामुपस्थितत्वाद्द्यप्रथमकृत्युत्पत्तिकाले द्वितीयचिकीर्षा तदनन्तरं द्वितीयाकृतिरिति कृत्योरव्यवधानवज्ज्ञानसंभवत्येककर्णाव
च्छेदेनाव्यवधानेन घकारयोरुत्पत्तिः। प्रतिसन्धीयते च घविकल्पानन्तरं विकल्प्यविषयटकारअव्यवहितोत्तरत्वरूपं घमोविशिष्टं तत्त्वस
मानकालीनप्रागभावप्रतियोगित्वं स्वावच्छेदकावच्छेद्यत्वं कालिकविशेषणतानाचेत्यत्र त्रितयस्वरूपं कालघटयास्वस्वध्वंसोभया
धिकरणत्वे सति स्वावच्छेदकावच्छिन्नत्वं वा तेन घकाराच्चिरान्तरितस्य घकाराव्यवहितपूर्वकाले उत्पत्तिकालेवोत्पन्नस्य घकारानव
च्छेदककर्णावच्छिन्नस्य च टकारस्य व्युदासः। यदि च चैत्रीयघकाराव्यवधानेनैकस्मिन्नेव अवस्युत्पन्नो मैत्रीयटकारो व्यावर्तनीयः।
तदैकपुरुषप्रयोज्यतावच्छेदकधर्मवत्त्वव्याप्यजातयएव घत्वटत्वस्थाने निवेशनीयाः। एवं च निरुक्ताव्यवहितोत्तरत्वसंसर्गेण घ
विशिष्टटत्वमेव घटपदत्वम्। अव्यवहितोत्तरितेन तत्क्रमादेव पदार्थप्रतिसन्धानं ननु तदनुरोधेन बहुक्षणसाधारणमव्यवधानं प्रकृतेऽप ५

वेशनीयनीयंगौरवात् इति प्राहुः। ननु प्रतिपद्यताम् उपनीतपूर्ववर्णो न तद्ध्वंसेन वा विशिष्ट उत्तरो वर्णः पदत्वं तथापि पदं स्वरूपसदेवार्थस्य न स्मारकमतिप्रसङ्गात् अतः पदज्ञानमेव तथेति वक्तव्यं तच्चानुपपन्नं भिन्नविषयकज्ञानेन स्मरणाजननादिति चेदुच्यते पूर्वानुभूत्या संस्कारद्बोधया स्वार्थगोचरा जन्यमाना स्मृतिः शब्दमुद्बोधकमपेक्षते। आसीत्पूर्वं विषये गवादौ गौरित्येवमाकारकोनुभवो गवि च व्यवहारादिना गोपदसंबन्धग्रहश्च तस्य चेदानीमविद्यमानस्यापि गवानुभवस्य व्यापारो भावना नाम स्मरणोपधाने प्रभवति तत्सहकारितया तु पदज्ञानमुद्बोधकं स्मृत्याजनकत्वेनापेक्षते यद्धर्मावच्छिन्नसम्बन्धो यद्धर्मविशिष्टे पूर्वं गृहीतस्तद्धर्मावच्छिन्नगोचरसंस्कारे तद्धर्मावच्छिन्नदर्शनस्य नियतोद्बोधकत्वात् दृष्टा हि गजे हस्तिपकसम्बन्धग्रहाहितसंस्कारसहकृतेन हस्तिपकदर्शनेन गजस्मृतिः। यद्यपि स्मरणसामान्ये संस्कारोद्बोधकानि नानुगतानि तथापि गोपदज्ञाज्ञविशिष्टगोस्मरणत्वावच्छिन्नं प्रति गोपदज्ञानत्वेन संभवत्येव यावत्संभवि न्यायादनुगताकारणता अगृहीतपदपदार्थसंगतिकानां पदज्ञानादर्थस्मरणानुदयात् गौर्गोपदसंगतेत्यनुभवजनितसंस्कारोपि पदज्ञा

ज्ञानसहकारित्वेनापेक्षते तस्य च अद्गृगोत्वप्रकारकस्मरणोपाधायकत्वं न क्लृप्तकारणतानिर्वाह्यमिति गोपदसंगतिसंस्कारा
प्रवहितोत्यन्तअद्गृगोस्मरणप्रति तादृशसंस्कारत्वेन पृथगेव कार्यकारणभावः कल्प्यते। तेन बोधकोत्तरजनितगोस्मरणेन व्य
भिचारः। आह्निकास्तु गोपदज्ञानस्य गोपदसङ्गतेः स्मरणत्वमेव जन्यतावच्छेदकं तदवच्छिन्ने च गोर्गोपदसंगतेति संस्कार
स्यःरूपस्य कार्यकारणभावः। अत एव पदपदार्थोभयविषयकमेव प्रतिसंधानं वाक्यार्थबोधश्चोपपद्यते इति प्राहुः। स्या
देतत् यदि पदार्थेन सह संगतिः स्यात्तत्त्वेवं। नहि पदमर्थेन सह संयोगसमवायतद्घटितसामानाधिकरण्यव्याप्त्यादि
भिः संगतं अन्नाग्निनासीशब्दे मुखस्य पूरणप्रदाहपाटनापत्तेः। न चाभिधानामार्थेन सह शब्दस्य सङ्गतिः। सप्तभ्यः प
दार्थेभ्योतिरिच्यत इति वाच्यम्। मानाभावात् पारिभाषिकटिघुभादिशब्दानामङ्गुल्याद्यभिनयानामप्यर्थेन सहा
तिरिक्तसंगतिसिद्धिप्रसंगात्। यत्तु गोबुद्धिजनकत्वेव गोपदस्य गवि सङ्गतिः सैव शक्तिः गोज्ञानस्य शक्यत्वमेव गोपदा
र्थत्वमुपचर्यते तद्बुद्धिजनकतया गृहीतं पदं तमर्थं स्मारयति धूमरव वह्निं तथाविधसङ्गतेरेव संस्कारेण पदज्ञानसह

कृतेनजनितंपदार्थस्मरणमनुभवंप्रतिहेतुः यदाहुरभियुक्ताः इन्द्रियाणांस्वविसयेष्वनादिर्योग्यतायथाअनादिरर्थैःशब्दानां
सम्बन्धोयोग्यतातथेति· साचतद्बुद्धिजननयोग्यताभासायामसत्यपिआधुनिकेगाणेपिनागाव्यादिशब्देभ्योबोधंजनयतिव्यु
त्पन्नास्तुगाव्यादिशब्देगवादिमापस्मत्वात्ततएवगवादिकंप्रतियन्ति यदाहहरिः तेसाधुष्वनुमानेनप्रत्ययोपत्तिहेतवः·
तादात्म्यमुपगम्येवशब्दार्थस्यप्रकाशकाः।नशिष्टैरनुमन्यन्तेपर्यायाइवसाधवः· नयतःस्मृतिशास्त्रेणतस्मात्साक्षा
दवाचकाः।अम्बाम्बेतियदाबालःशिक्षमाणःप्रभाषते अव्यक्तंतद्विदांतत्रव्यक्तेभवतिनिर्णयः।एवंसाधौप्रयो
क्तव्येयोपभ्रंशःप्रयुज्यते· तेनसाधुव्यवहितःकश्चिदर्थोभिधीयतेइति· भवतुवाअपभ्रंशेष्वपिज्ञापकत्वलक्षणंवा
चकत्वंव्याकरणेनतुदैवीनांवाचांक्रतूपकारकत्वलक्षणंसाधुत्वमेवव्याक्रियतेनापभ्रंशितवैरीतिश्रुत्याअपभ्रंशा
नांपरिसंख्यानात् यदाहुः प्रतिपादकमात्रंम्लेच्छेष्वप्यवगम्यते· वाचकत्वाविशेषेपिनियमःपुण्यपापयोरितिमतंत

मं पारिभाषाशब्दे तदर्थबुद्धिजनकतामगृहीत्वापि संकेतमात्रज्ञानादन्वयमतेरुत्पत्तेः शक्तिसंकेतज्ञानयोर्वैकल्पिक
जनकत्वे गौरवादिति उच्यते तादृशार्थावगाहित्वतत्पदप्रभवत्वयोः एकत्रबुद्धौ संकेतः शब्दस्यार्थेन संगतिः गवादिपद
जन्यत्वगोत्वादिविशिष्टविषयकत्वोभयमेकस्या बुद्धावेकत्रद्वयन्यायेन विशिष्टवैशिष्ट्यरीत्या वा अवगाहमानो गोपदजो
त्वविशिष्टविषयिका बुद्धिर्जायतामित्याकारकः संकेत एव गोपदस्य गोत्वविशिष्टेन सह संगतिः गोत्वविशिष्टविषयता
च गोत्वप्रकारतानिरूपितविशेष्यतास्वरूपा बुद्धिविशेषणत्वेन संकेतविषयः अत एव गोत्वोपलक्षितगोविषयकबुद्धि
त्वावच्छेदेन द्रव्यपदजन्यत्वावगाह्याधुनिकसंकेतो न गोत्वेन गोबुद्धावुपयोगिन वा पारमार्थिकद्रव्यपदस्य गोत्वविशिष्टे
शक्यत्वं किन्तु द्रव्यत्वविशिष्टे तद्धर्मविशिष्टविषयकबुद्धित्वावच्छेदेन तत्पदजन्यत्वावगाहिनः संकेतस्य तद्धर्मविशिष्ट
तत्पदयोः संसर्गत्वस्वरूपं शक्तित्वमिति व्युत्पत्तेः अतएव वाहीकादौ सत्यपि गोपदबोध्यत्वगोचरो भगवत्संकेतो न शक्तिः।

८

राज्ञानिकप्रयोगस्य कोशव्याकरणादेश्चज्ञाने, ग्राहकस्याभावेन वाहीकत्वविशिष्टे गोसदृशत्वविशिष्टे वा तादृशसंकेतो न गोप
दसम्बन्धइत्यवधारणात् भगवदिच्छायाः सर्वविषयकत्वस्य विशृंखलत्वविषयताभिरेवोपपत्तौ वाहीकविषयकबुद्धित्वावच्छेदे
नाबाधितस्यापि गोपदजन्यत्वस्यावगाहित्वं प्रमाणाभावाद्वाहीकस्मरणे गोपदस्य तज्ज्ञानस्य वा जनकत्वेपि वाहीकानु
भवत्वे शाब्दत्वावच्छेदेन तज्जन्यत्वं बाधितमेव लाक्षणिकस्याननुभावकत्वात् तदनुभवत्वावच्छेदेन तत्पदजन्यत्वाव
गाहि संकेत एव तत्र तत्पदशक्तिरित्यपि वदन्ति नन्वेवमपि ज्ञातिविशिष्टविषयकबुद्धौ गोपदजन्यत्वावगाही संकेतो
पि गवि गोपदस्य संगतिः स्यात्। न चानवच्छिन्नप्रकारतानिरूपित तादृशधर्मविशिष्टवृत्तिविशेष्यताकबुद्ध्यवगा
हि संकेत एव पदसंगतिरिति वाच्यम् गोमविशिष्टत्वानुकूलत्वावच्छिन्नप्रकारताकपश्वनिष्ठविशेष्यताकबुद्ध्य
वगाहिनः संकेतस्य पश्वपदसंगतित्वविरहप्रसंगात्। किंच शब्दाश्रयत्वबुद्धिविषयकत्वाद्युपलक्षितधर्मिविषयकबुद्ध्यव
गाही संकेतः कथमनवच्छिन्ने गगने पर्वतत्वादिविशिष्टे वा व्योमादिपदस्य तदादेर्वा संगतिः। कथं चैकत्वगोत्वोभयविशि

एवबुद्धौ गोपदजन्यत्वसंकेतः बुद्धगोत्वावच्छिन्ने गोपदस्य न संगतिः गोरित्यत्रैकवचनसहकृतेन गोपदेन तदुभयप्रकारकबुद्धिज
ननात् । तदितरप्रकारत्वानिरूपकतत्प्रकारतानिरूपकतद्विशिष्टविषयताकबुद्ध्युद्देश्यक एव संकेतः अद्धताद्विशिष्टे पदसंगतिरिति
चेत् अद्धपद्मत्वावच्छिन्ने पंकजपदसङ्गतेरनुपपत्तेः पङ्कजपदजन्यशाब्दबोधविशेष्यताश्रयपद्मत्वेतरपंकजनिकर्तृत्वप्र
कारतानिरूपकत्वनियमात् । अद्धपद्मत्वावच्छिन्ने स्मरणावगाहिसंकेत एव पङ्कजपदसङ्गतिरिति चेत् एवमपि वाहीक
त्वेन वाहीकं गोत्वेन गां स्मारयतु गोपदमिति संकेतो गोपदसंगतिः स्यात् बुद्धिजनिसंकेतोद्देश्यतायां तदितरप्रकारक
बुद्धित्वानवच्छिन्नत्वमपि प्रवेशनीयमिति चेत् सूर्यत्वेन सूर्यं चन्द्रत्वेन चन्द्र[illegible] बोधयतु पुष्पवन्तपदमिति संकेतस्य कु
गापिकस्याप्यसङ्गतित्वप्रसङ्गादिति मैवं प्रवृत्तिनिमित्तवैचित्र्येण संकेतानां सङ्गतित्ववैचित्र्यात् तथाहि संकेतवि
षयीभूतप्रकारत्वविशेषणांअद्धधर्मान्तरेणोपलक्षिततादृशोषितं एकनानेकत्र नानाव्यक्तौ वा बुद्धिगोचरं परिच्छेदक
पेनेन विचित्रापदसङ्गतिः संकेतोद्देश्यतायां बुद्धौ प्रतियोगित्वेन तादृशबुद्धिविशेष्यतायां वा निरूपकत्वेन विशेषणं साप्र ८

कारतातस्यामाधेयतयाप्रकारीभूयसंकेतविषयोधर्मः प्रवृत्तिनिमित्तं तन्निष्ठासंकेतप्रकारताकाचिदनवच्छिन्नैव यथा गोपदसंकेतस्य गोत्वनिष्ठाप्रकारता आधेयत्वसंसर्गावच्छिन्नप्रकारतानिष्ठविशेष्यतानिरूपिता च न धर्मान्तरेणावच्छिद्यते समवायेतु संसर्गावच्छिन्नाया जातिप्रकारताया धर्मावच्छिन्नत्वनियमे मानाभावात् अत एव गौरिति बुद्धेरनुव्यवसाये न प्रकारताविशेषणतयाऽस्य गोत्वादेर्ग्रहणं न तु गोत्वत्वविशिष्टस्य तथोपनायकस्य व्यवसायस्याभावात् अत एव च जातिशक्तिवादिनोपि शक्यगोत्वमेव शक्तिविशेषणतया अवगाहमाना गोत्वशक्तं गोपदमिति प्रतीतिः अपरा प्रवृत्तिनिमित्तपरिचायकधर्मावच्छिन्ना यथा बुद्धिविषयधर्मप्रकारतानिरूपितबुद्धिविषयवृत्तिविशेष्यताकबुद्धिस्तत्पदजन्येति सर्वनामपदसंकेतस्य यो गोत्वांशे प्रकारत्वांशे प्रकारता सा स्वरूपसद्बुद्धिविषयत्वावच्छिन्ना नहि तत्र संकेतेन प्रकारतायां बुद्धिविषयत्वावच्छिन्नत्वमपि विषयीक्रियते इतरत्र संकेतप्रकारतायां यद्धर्मावच्छिन्नत्वमवगाह्यते तद्धर्मावच्छिन्ना यथा धन्यपदात्पुण्यत्वावच्छिन्नया प्रकारतया निरूपितायाः पुण्यवद्विशेष्यतायाः प्रतियोगिनी बुद्धिर्जायतामिति संकेतस्य

पुरुषवृत्तिः प्रकारता यथा वा लोमत्वावच्छिन्नलोमप्रकारतानिरूपितलाङ्गूलत्वावच्छिन्नविशेष्यत्वेनाभिन्ना अवच्छिन्ना वा लोमलाङ्गूलत्वोभयावच्छिन्नाया लोमवल्लाङ्गूलवृत्तिः प्रकारता तन्निरूपितपशुवृत्तिविशेष्यताकबुद्धिः पशुपदजन्येति संकेतस्य लाङ्गूलादिवृत्तिः प्रकारत्वविशेषणताप्रकारतावच्छेदकतया भासमानेन लोमलाङ्गूलत्वादिना अवच्छिन्ना एवं त्रिविधापि प्रवृत्तिनिमित्ते संकेतोद्देश्यबुद्धिविशेषणप्रकारत्वविशेषणताक्वचिदेकवृत्तितदितरप्रकारत्वानवच्छिन्नातत्प्रकारताकबुद्धित्वावच्छिन्ना संकेतोद्देश्यतेति यावत् तथा च कश्चित्संकेत एकमात्रधर्मप्रकारकबुद्ध्युद्देश्यकः यथा गोपदस्य तत्पर्यायतदादिपदस्य धेन्वादिपदस्य च अपरो नानाधर्मप्रकारकबुद्ध्युद्देश्यकः यथा धावल्यपशुत्वोभयविशिष्टवाचिनः पुण्डरीकादिशब्दस्य धानकर्मत्वगोत्वोभयविशिष्टव्यक्तिवाचिनो धेन्वादिशब्दस्य स च द्विविधः एकगविशेष्ये प्रत्येकनानाधर्मप्रकारत्वावगाही नानाधर्मिणि नानाप्रकारत्वावगाही च आद्य उदाहृतः अन्त्यो यथा स्वर्वैद्यशरीद्वयवृत्ति यदेकदानेकावृत्तिजातिद्वयं तत्प्रत्येकप्रकारतानिरूपितप्रत्येकविशेष्यताकबुद्धिगोचरो नासत्यपदसंकेतः ९

यथा वा सूर्यत्वेन सूर्यमिन्दुत्वेनेन्दुमवगाहमानाबुद्धिर्जायतामिति पुष्पवन्तपदसंकेतः यत्तु पुष्पवन्तपदाच्चन्द्रसूर्ययोर्निद्वित्व
वन्नैव बुध्यते तथा च सामानाधिकरण्येन चन्द्रत्वसूर्यत्वाभ्यामवच्छिन्नयाद्वित्वप्रतिप्रकारतया निरूपितायाश्चन्द्रसूर्योभय
विशेष्यतायाः प्रतियोगिनीं बुद्धिमवगाहमान एव तत्र संकेतः तज्जनितस्मरणशाब्दबोधादिकं तु सामानाधिकरण्येन च
न्द्रत्वसूर्यत्वाभ्यामवच्छिन्नं द्वित्वमिव चन्द्रत्वसूर्यत्वोभयमपि धर्मिणि विशेषणतया गृह्णाति सामानाधिकरण्येन तद्ध
र्मविशिष्टस्य वैशिष्ट्यमवगाहमानाया बुद्धेः सविषयकस्य वा सामानाधिकरण्यघटकसंसर्गेण धर्मिणि विशेषणता
वच्छेदकीभूततद्धर्मवैशिष्ट्यावगाहित्वनियमात् अत एव गुणकर्मान्यत्वविशिष्टसत्ताया द्रव्ये वैशिष्ट्यमवगाहमा
नाबुद्धिर्द्रव्ये गुणान्यत्वादेरपि वैशिष्ट्यमवगाहते तेन गुणादौ न तादृशी प्रतीतिर्जायमानापि वा न प्रमाणमूहति तन्न
पुष्पवन्तपदाद्द्वित्वबुद्धेरनुभवविरुद्धत्वाद्छेदलोपुनर्वसूदत्यादावनन्वयापत्तेः अत एव भिन्नया शक्त्या तत्तदुप
स्थापकनानार्थशब्दात्पुष्पवन्तादिपदस्य वैलक्षण्यद्योतनायैकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरावित्यत्र

शाब्दैक्यमेकयोक्तैत्यनेनोक्तं संकेतविषयस्य भेदेपि बोधद्वये संकेतोद्देश्यताया ऐक्येन शाब्दैक्यव्यवहारः नाना
र्थपदसंकेतीयत्वंतु बुद्ध्योरुद्देश्यताद्वयं तत्तद्धर्मप्रकारकबुद्धित्वावच्छिन्नमिह तु यदेवोद्देश्यत्वमर्कत्वप्रकारकत्वावच्छिन्नं
तदेवेन्दुत्वप्रकारकत्वावच्छिन्नमितिविवेकः अतएवजात्याकृतिव्यक्तयः पदार्थ इतिसूत्रे पदशक्यत्वस्वरूपस्य जात्या
कृतिव्यक्तिषु पदार्थत्वस्यैकत्वं द्योतनाय पदार्थ इत्येकवचनम्॥ प्रातिपदिकयोरभेदान्वये तत्रैव तुल्यवचनान्तप्रा
तिपदिकोपस्थाप्यत्वं तन्त्रं यत्रोद्देश्यतान्वितसंख्याविरुद्धसंख्याया विधेये तादृशोसंगो वाऽन्वयो न विवक्षितः वेदाः
प्रमाणं जात्याकृतिव्यक्तयः पदार्थः शक्तिव्युत्पत्त्यभ्यासाः काव्यप्रतिहेतुः शक्यमोषधिपतेर्विलासिभिः छेत्तुमग्रन
खकोरकैः करा इत्यादिषु वेदत्वमप्रमाणे न वर्त्तत इति जातिमात्रं व्यक्तिमात्रं वा न पदशक्यमिति शक्त्यादिषु ह्येकमात्रं
न काव्योपधायकमिति विरहिणामिव विलासिनामपि न चन्द्रकरस्पर्शो नु खेद इति ध्वनयितुं प्रमाणतावच्छेदकनि
र्दोषवाक्यत्वादिस्वरूपे प्रामाण्ये गवादिपदार्थत्वे काव्योपधायकतावच्छेदकसमुदायत्वे विलासिकर्तृकशक्तौ ३०

वहुवर्थकत्वान्वयोविवक्षितएवकराभ्ढेनुशाक्यमित्यत्रशाक्यंचानेनश्वमांसादिभिरपिक्षुदभिहन्तुमितिमहाभाष्यनिर्देशासिद्धं
सामान्येक्लीवत्वंपदार्थैकदेशेऽवहुवर्थसंख्यान्वयोपिजात्याख्यायामेकस्मिन्वहुवचनमन्यतरस्यामितिसूत्रात्सिद्धः॥ ॥एवंप्रवृत्तिनिमि
भवेचेच्छयेणसंकेतत्वेचित्र्यमुपपादितमिदानीमन्यथापितद्वैचित्र्यमुपपाद्यतेसंकेतोद्विविधोनित्योजन्यश्चेत्यादिमोभिधा
अपरःपरिभाषातावविशेषणबोधकोनित्योभगवत्समवेतोअभिधेतिव्यवह्रियतेजन्योजीवसमवेतःपरिभाषेत्युच्य
तेतयोःसंकेतत्वेनैवस्मारकत्वमनुभावकत्वंचेतियुज्यतेनित्यसंकेतितात्गवादिपदात्द्विपाणिन्यादिनापित्रावा
सङ्केतितात्ऋणदृशादि[redacted]चैत्रादिपदाद्देऽमादेर्वामनुष्यविशेषस्यचस्मरणमन्वयबोधश्चननुपितृसंकेतितस्याप
दविशेषस्याप्यभिधैवातएवपितानामकुर्यादितिश्रूयतेतदभिधापकत्वमेवहितन्नामत्वं अतएवद्व्यक्षरंचतुरक्षरं
वाघोषवदाद्यंतरंतस्थंदीर्घाभिनिष्ठानंकृतंकुर्यान्नतद्धितमित्यादिगृह्येणवर्णादिद्वयभिन्नैःस्पर्शैर्हकारेणचघोषवद्भि
रादौयरलवैरन्तस्थैर्मध्येदीर्घेणोपान्त्येनघटितंकृदन्तंदेवराजादिपदमेवाभिधायकमितिनियम्यते तद्धितान्तपित्रादि

संकेतितमपि तद्धितान्तादि पर्युदस्यते अन्यथास्मृतिवैयर्थ्यादिति चेन्न परिभाषयैवोपपन्नावभिधाकल्पनायां मानाभावा
त् आजानिकप्रयोगविरहस्याभिधाबाधकत्वाच्च नामपदं च संकेतितशब्दमात्रे शक्तं न तु नित्यसंकेतितत्रा [illegible] अदेङ्गुणो
नामेति शास्त्रकारीयपरिभाषामादायापि नामपदप्रवृत्तिः घोषवदाक्षिविधिनानुसृतसंस्कारकत्वं कनूपकारकत्वं वा पदवि
शेषस्य नियम्यते नत्वभिधेतिवहवः मणिकृतस्तु आधुनिकनाम्नामशक्तत्वे शक्यसम्बन्धस्वरूपलक्षणाया अप्ययोगाद्कृत्रिम
त्वस्वरूपमर्थवत्त्वमपि न स्यात्तथा च प्रातिपदिकसंज्ञा अनुपपन्नेव स्यादपभ्रंशवत्तथा च सुपामप्यनुत्पत्त्यापत्तिस्तत्राप्यभिधा
भ्युपेतव्या द्वादशेहनि पिता नाम कुर्यादित्यत्र नामपदस्य प्रातिपदिकपर्यायतया तदर्थपर्यालोचनेनार्थवत्त्वाक्षेपात्तत्र शक्ति
सिद्धेः व्याकरणाव्युत्पाद्यत्वलक्षणं साधुत्वमपि नत्र नानुपपन्नमुणादयो बहुलमित्यादिना तेषां व्युत्पादनादित्याहुः॥६
व्यथमपि टिशब्दादीनां प्रातिपदिकसंज्ञानुपपत्त्या अव्ययसर्वनाम्नामकच् प्राक् टेरित्यादौ विभक्त्यनुत्पत्त्यापत्तिश्चादव
ध्यादिसंज्ञासंकेतग्राहकवाक्यस्य पञ्चम्यप्रकृतितया तदुपस्थितेः पञ्चमीप्रत्ययार्थान्वयानुपपत्तेरन्यथा नाक्षर १२

शाकत्वादस्य लक्ष्यार्थोपस्थापकत्वाभिनिवेशो मणिकृतामेवानुपपन्नः स्यात् गंगायां घोष इत्यादौ रक्षारितेतीरे सम्बन्धार्थान्वयसंभवात्
घादिचटादि इत्यादौ पाणिनिप्रयोगान्यथानुपपत्या निरर्थकेष्वपि संज्ञाशब्देषु प्रातिपदिसंज्ञाविधिरिति स्थिते तदापि नाम कुर्यादित्ति नामपदप्र
योगान्यथानुपपत्त्या निरर्थकेपि तदाक्षेपसंभवादिदमनुपपन्नमिति प्रतिभाति यद्यपि स्वरूपं शब्दस्याशब्दसंज्ञेति व्याकरणाव
लेन सर्वशब्दानां स्वरूपे शक्तिरिति प्रतीयते तथा च देवराजादिसंज्ञाशब्दानामानुपूर्वीविशेषे निरूढलक्षणैव गृह्यस्वरूपेण गृह्यते शक्यार्थ
स्वरूपेण सहपिते संकेतस्यैव लक्ष्यार्थे संबन्धत्वादिति न प्रातिपदिकसंज्ञाद्यनुपपत्तिरिति तत्र अशाशब्दसंज्ञेत्यनेन षष्ठ्युद्देशानां टिघु
भादीनामेव शक्तिमत्त्वानुपपत्तिता इवस्यात् गवि त्याहत्यादौ गोशब्दस्य स्वरूपपरतायां प्रातिपदिकसंज्ञापत्तेश्चेत्यधिकमुप
रिष्टात्॥ ॥ननु भवतु संकेतो नामपदार्थेन संगतिः सा किं संकेतत्वेन उत गोत्वविशिष्टविषयकबुद्धौ गोपदजन्यत्वावगाहि संकेत
त्वेन ज्ञाता गवानुभवस्मरणहेतुराद्ये अतिप्रसंगः द्वितीये तादृप्येणोपमानादिना ग्रहणासंभवः तथाहि प्रथमतो तिदेशवाक्याद्गवसदृ प
शो गोपदवाच्य इत्याकारकाद्गवयपसादृश्यमुपलक्षणीकृत्य गोपदवाच्यत्वं प्रतीयते तद्वाच्यत्वं न गोत्वादेः विशिष्टविषयताकबु
द्धित्वावच्छिन्नोद्देश्यताकसंकेतस्वरूपं गोत्वादेः पूर्वमप्रतीतेः अपितु गोपदजन्यबुद्धित्वावच्छिन्नोद्देश्यताकसंकेतविषयत्वमात्र

मन्यथातिदेशवाक्यादेव गोत्वविशिष्टशक्तिसिद्धेरुपमानवैयर्थ्यात् ततो गोत्वावच्छेदेन गवयसादृश्यप्रत्यक्षेण जनितातिदेशवा
क्यार्थस्मृतिर्गोत्वावच्छेदेन स्वाविषयीभूतं सादृश्यसंकेतविषयत्वमेवोपमापयति संकेते तु गोत्वविशिष्ट । विषयकवृत्त्याव
च्छिन्नोद्देश्यता[redacted]त्वं कथं गमयेत् सामर्थ्यात् एवं पिककोकिलत्व इत्यादिकोशो पिकोकिलत्वावच्छिन्नेपि कपदजन्यबु
द्धुद्देश्यकसंकेतविशेष्यत्वविशिष्टविषयकबुद्ध्युद्देश्यकसंकेतविषयत्वमात्रं गुणविशेषार्थकगुणपदसमभिव्याहृतस्यपूष्याप्रत्याप
यति न तु शीतपदजन्यत्वावच्छिन्नसंकेतोद्देश्यत्वमपि तादृशबुद्धेर्बोधयितुमीष्टे विशिष्टस्यकोषप्रवृत्तेः पूर्वमनुपस्थित्यासपृ
प्यास्मरणासंभवात् एतेन कर्त्तरि कृदित्यादि व्याकरणमपि[illegible]ख्यातं । आप्तवाक्यमप्यतिदेशवाक्यवन्न विशिष्टशक्तिं बोधयितुमर्ह
ति नहि कलशो घटपदवाच्य इत्यत्र वाच्यपदेन घटत्वविशिष्टविषयकघटपदजन्यबुद्ध्युद्देश्यकसंकेतविषयः पदार्थविधया बोधयितुं
शक्यते प्रागनुपस्थितेरन्यथोपदेशवैयर्थ्यात् व्यवहारवाक्यशेषविवरणशब्दान्तरसामानाधिकरण्यानि त्वनुमानविधयैव संके
तग्राहकाणीति तत्र व्युत्पादयिष्यते तथा च यवपदं दीर्घशूकवाचकं वृत्त्यन्तरं विना आर्य्यैः स्वगप्रयुज्यमानत्वादित्याद्यनुमानेनापि य
वत्त्वविशिष्टविषयकयवपदजन्यबुद्ध्युद्देश्यकसंकेतघटितं साध्यं यवपदेन साधयितुं शक्यते प्रागनुपस्थितेरुपस्थितौ वा कि १२

मनुमानेनेति चेत् उच्यते गोशब्दजन्यबुद्धेर्या संकेतोद्देश्यता तया निरूपिता विशेष्यत्वे वर्त्तते या प्रकारता तदवच्छेदकत्वं यद्विषयी
भावलक्षणं तद्रूपेण वाच्यत्वं गवादावुपमीयते विशिष्टवैशिष्ट्यबुद्धिमर्यादावशातस्तु सा अवच्छेदकता गोत्वगोसंसर्गे युगपद्यते
विघते हि विशिष्यत्वोपरि संसर्गभेदतः व्यक्तिसंसर्गशालीनां संकेते गोचरीक्रिया गो गोपदवाच्यत्वमुपमित्या गोत्वविशिष्टमुद्दि
श्य गोपदजन्यबुद्ध्युद्देश्यतया निरूपिता या विशेष्यत्वच्छिन्नविशेषणता तन्निरूपितं यद्विषयीभावलक्षणं वैशेष्यत्वीयस्वरूपसंसर्गा
वच्छिन्नमवच्छेदकत्वं तेन संसर्गेण संकेतः संकेतीयस्तादृशसंसर्गो वा विधीयते तादृशमवच्छेदकत्वमेव हि गोपदसहकृतवाच्य
पदप्रवृत्तिनिमित्तमतिदेशवाक्येनोपनीतमुपमितेः पूर्वं सादृश्यविशिष्टपिण्डप्रत्यक्षेणास्मार्यते विघते च गोत्वविशिष्टायां
गव्यपि गोविशेष्यकगोपदजन्यबुद्धिरिति संकेतस्य निरूढसंसर्गेण गवि निरावाधत्वात् नन्वेतादृशसंसर्गेण गवि संकेतस्य सं
केतप्रतियोगिकतादृशसं[illegible]वा सत्त्वामप्युपमितौ गोत्वावच्छिन्नविशेष्यताकबुद्धौ गोपदसंकेतोद्देश्यतिबुद्धेरूपस्यज्ञो वा
धकविरहात् तद्गोत्वेन गोस्मरणशाब्दबोधादेरनुत्पत्त्या नेयमुपमितिरन्वयबोधात्मिति चेत् न गोत्वविशिष्टे तादृशसंकेतप्रका
रतावच्छेदकत्वोपमितिर्ज्ञायमाना विशिष्टवैशिष्ट्यावगाहिन्या बुद्धेः स्वभाववैचित्र्येण परस्परमस्खलितविषयतापन्ने युगो

त्वगो समवायेषु विधेयधर्मे गृह्णाति· दण्डदण्डो जायत इति प्रतीतिरिव दण्डदण्डत्वसमवायेषु ज्ञानं विषयतां धर्म्मिप्रकारतन्त्रेण
धर्म्मितावच्छेदकादेरपि विशेषणत्वाभ्युपगमात्· अत एव लंबकर्णमानीयतां यष्टयः प्राविशंति स पुत्र आगतः कुण्डलिनः भूवा
दिवानुरित्यादौ धर्म्मिविशेषणतापन्नेषु कर्णयष्टिपुत्रकुण्डभूवादिप्रभृतिष्वानयनकर्मत्वप्रवेशकर्तृत्वआगतत्वगणधातुताद्दा
त्म्यानिचप्रति विशेष्यत्वमनुभवसिद्धं स्यादेतत् यदि गोपदाज्जो विशेष्यिका बुद्धिर्जायतामिति संकेतस्य विशेष्यतावच्छिप्र
कारताया अवच्छेदकत्वं गवेतावन्नेतं नन्वेवं शाब्दबोधविशेष्यत्वोपरि गोरिव गोत्वस्याप्याधाराधेयभावेन संकेतविषय
त्वे बाधात् नहि शाब्दप्रमितिरपि गोत्वादिविशेष्यिकेति चेन्न संकेतो हि शाब्दबुद्धि विशेष्यतायामाधाराधेयभावेन गोत्व
द्वित्रिप्रकारतानिरूपकत्वेनत्वावच्छिन्नप्रकारतानिरूपकत्वेन च गोत्वसमवाययोरपि विशेषणीकृत्य गृह्णाति अवच्छेदक
तानुसैव विशेषणतातन्त्रियतानदृत्यावेत्यव्यदृ तत्: अथवा गो गोपदजन्यबुद्धित्वावच्छिन्नसंकेतो द्वेरुपत्वेन निरूपि
ता याविशेष्यत्वप्रकारताया अवच्छेदकद्वयपमितो धर्म्मितावच्छेदकतयाभासमानं गोत्वं स्वप्रकारतावच्छिन्नत्वावच्छिन्न

त्वसंसर्गेण विशेष्यत्वप्रकारतायामवच्छिन्नत्वसंसर्गेणावच्छेदकतायां च विशेषणीभूय भासते गोत्वप्रकारता
वच्छिन्नगोविशेष्यताकबुद्धिर्गोपदादित्याकारकश्चोपमितिविषयीभूतः संकेतोद्देश्यते हि विशिष्य वैशिष्ट्यबुद्धे
श्यतावच्छेदकधर्मेण विधेयस्य वा तादृशेषणस्यापि वैशिष्ट्यावगाहः अत एव गन्धप्रागभावकालीनो घटो
गन्धाविशिष्टपृथिवीत्ववानिति बुद्धेरप्रामाण्यं गन्धगन्धप्रागभावयोरवच्छेद्यावच्छेदकभावस्य समानस्य बाधात्
एतेन गौर्गोपदवाच्यः इत्यंतरेण जन्यगोपदजन्यप्रतीतिविशेषविषयत्वादित्यनुमानमप्युपमानतुल्यतया
व्याख्यातं आख्यातश्चोपदेशकोषविशेषा अनुमानोपमानयोरुद्देश्यविधेयभावेन वाच्यत्वं कोकिलः पि
क इत्यादौ तादात्म्येन वाच्यं भासत इति विवेकः एवमर्थविशेष्यकबोधजनकानि वाच्यताग्राहकाणि प्रमाणा
नि व्युत्पाद्य पदे धर्मिणि वाचकताग्राहकाणि व्याकरणादिप्रमाणानि प्रस्तूयंते भूसत्तायां कर्तरि कृदुक्ते षष्ठी
धने वस्तु इत्यादौ वाचकत्वार्थसप्तम्याद्यपेक्षते विशेष्यतावच्छिन्नत्वावच्छिन्नोद्देश्यतानिरूपितजनकत्वप्रकार

तावच्छेदकत्वस्वरूपासंकेतविषयताभावाचकतासेवभूसत्तायामित्यादौसप्तम्यर्थः तदेकदेशे विशेष्य[illegible]यांसत्तात्वादि
विशिष्टस्यविशेषणतयान्वयः सप्तम्यर्थविशेष्यतया तु भ्वादेः ननुभूशब्दस्यनिर्विभक्तिकत्वेनासाधुत्वात् पदइत्यनु
पस्थितत्वाच्च कथंतत्रपदार्थान्वयः यत्तुभूशब्देनवाच्यवाचकत्वलक्षणयास्वंरूपंशब्दस्येतिसूत्रेणगृहीतसंके
तेनवास्मारितेभूवादौसत्तावाचकत्वोन्वयोनानुपपन्नः इत्या अर्थप्रतिपादकत्वस्वरूपार्थवत्वेपिभुवोनप्राति
पदिकसंज्ञा अर्थवदधातुरप्रत्ययः प्रातिपदिकमित्यत्रधातोःपर्युदासादिति तन्न भूसत्तायामित्यत्रभूपदस्य
स्वरूपेवृत्तिमत्वेक्रियावाचित्वाभावेनधातुसंज्ञाप्रवृत्त्यभावाद्धातोरितिपर्युदासाप्रसक्तेःसुबुत्पत्तेर्दुर्वारत्वात् अ
न्यथाभुवोवुक् ब्रुवोवचिः भाषायांसदवसश्रुवइत्यादावपितदनुत्पत्त्यापत्तेः इक्श्तिपौधातुनिर्देशे इत्यनेनभवि
र्भवतिभतिरितिप्रयोगापत्तेः भूशब्दस्यागृहीतशक्तिकत्वेनतद्वाच्यवाचकेचलक्षणानुपपत्तेः नवभूशब्दः
सप्रवृत्तिनिमित्तकः साधुशब्दत्वादित्यनुमानेनसामान्यतःशक्तिर्गृहीतेतिवाच्यं शक्तिपदार्थस्यशक्यतावच्छे ३४

दिकविशेषघटितत्वेन तद्ग्रहणेग्रहासंभवात् यद्विच सर्वनामशब्दानामिव वस्तुत्वमुपलक्षणीकृत्य वस्तुत्वविशिष्ट
विशेष्यकभूशब्दजन्यबुद्धिविषयकः संकेतो विशेष्यप्रवृत्तिनिमित्ताग्रहेपि ग्रह इत्युच्यते तत्रापि एतादृशसामान्यशा
क्यसंबन्धस्वरूपा लक्षणानानुभवोपयिकस्मरणोपयोगिनी अतएव सर्वनाम्नि न लक्षणेति वदन्ति· एतेन भूधा
तोःस्वरूपपरिभाषायां स्वरूपमित्यादिसूत्रग्राहितात्पास्मारिते भूधातौ सत्ताद्यर्थकत्वान्वय इत्यपि संभवति प्रातिप न
दिकसंज्ञापत्तेः नच स्वरूपार्थकस्यापि भुवः क्रियावाचित्वान्नापायाद्धातुरितिपर्युदासान्नप्रातिपदिकसंज्ञाप्रस
क्तिः भुवो वाचिरित्याहेतुसोत्रप्रातिपदिकसंज्ञा वैकल्पिकी इकश्तिपावपि वैकल्पिकावेव· यद्वा· भूशब्दो द्विवि
धः एको गणपठितत्वे सति क्रियावाची धातुरिति संज्ञायते स स्वरूपपरोप्य धातुरितिपर्युदासान्नप्रातिपदिकसं
यकः· द्वितीयस्तु गणापठितत्वाद्धातुः तस्य विकल्पेन प्रातिपदिकसंज्ञा इकश्तिपव्यादितिवाच्यं भुवो वचिः भवोवु

गित्यादौ वुवेर्भुवेश्चधातुत्वाभावेन अचिश्नुधातुभ्रुवां य्वोरियङुवङावित्यनेनोवङो विरहप्रसङ्गात् यत्तु ओओपस्थिते
भ्रूशब्दादौ सत्त्वाचकत्वादेरन्वयः पदार्थोपस्थितीनां विषयभेदेन शाब्दबुद्धिं प्रतिकारणताभेदात् पदोपस्थितोप
दजन्यत्वाप्रवेशात् अन्यथा वृत्त्युपस्थितेपदेपदार्थान्वयसंभवात् तथाच भ्रूसंज्ञायामित्यत्र भ्रुवो हत्यापदार्थानुपस्था
पकत्वेनार्थवत्त्वाभावान्नप्रातिपदिकसंज्ञा यत्र तु भुवो नुकार्यानुकरणाभावेन भेदो विवक्षितस्तत्रानुकार्यस्य ओ
ओेणानुपस्थितत्वान्नतदुपस्थितये श्रूयमाणस्य लक्षणपरिभाषा वार्त्तिकस्वरूपेयेति तत्पार्थवत्त्वाद्भ्रुवो भ्रुव इत्यपि प्रयो
गः स्वरूपपदः अतएव गावित्यत्र इत्यादावितिनोपस्थितौ तोयां कर्मतायां ओओपस्थितस्य गोशब्दस्यान्वयः अन्यथा
निपाताभिहिते कर्मणि प्रथमाभवणापत्तेः आप्रगृह्यः स्मेवाक्ये प्यासुस्याः कोपपीडयोः [illegible]न्वाचयसमाहारे
तरेतरत्वेऽचमनुद्भवये इत्यत्रकोषेपि ओओपस्थितेऽप्रगृह्यसंज्ञकतादात्म्यस्य तदर्थकत्वस्य च अन्वयः खलु वाक्यालं

कारइतिप्रत्यक्षाल्लोकेगौत्रोपस्थितस्यखल्वनुशब्दस्यवाक्यजसुखचमत्कारात्मकालंकारद्योतकत्वान्वयः अतएवश्रोत्रोपस्थितेविध्रिय
माणवाक्येपचतीत्यादौपाकंकरोतीत्यादिविवरणवाक्यतथाविधसमानार्थकत्वेनतदुपस्थापितः पाककर्तृत्वाद्यर्थोवाप्रतिपादकत्वे
न्वयोना नसंसर्गेणान्वेति पाकंकरोतीत्यादिभि[illegible]प्रतिपादितकर्तृत्वस्याख्यातार्थस्यापिप्रतिपादकतासंसर्गेणप्रथमान्तार्थभिन्नेपिपच
त्यादौवैनुपपन्नः आख्यातार्थकर्तृत्वस्याश्रयत्वसंबन्धेनान्वयस्यैवप्रथमान्तपदापेक्षा अतएवनिर्विभक्तिकनञ्पदोपस्थाप्ये
त्यन्ताभावेनपचतीत्यादौप्रतियोगितयापाकभावनान्वयः एतादृशनिर्विभक्तिकशब्दानांसाधुत्वमपिज्ञापकसिद्धं अनुकर
णशब्दाःसाधवइतिसामान्यतएवभूसत्तायामित्यनेनज्ञापनात् अतएवगावित्याहप्रतिज्ञाने[illegible]प्रत्यक्षवित्यादौत्यादिषु
अनुकरणनिरर्थकशब्दात्तस्योतोवादेशः हेलयेहेलयइतिवल्लोपः पणवमृषुरितिगुतापम[illegible]नुकरणात्वपत्राश
न्तर्गतस्याकारस्यपूर्वरूपत्वंकुमारील्लतकइतिवृतइत्यादौऌतकानुकरणप्रथमावयवस्वरस्यपूर्वयणादेशनिमित्तत्वंसंगच्छ
ते अन्यथावादिविधीनांसाधुमात्रविषयतयागौआलोकेअल्वेजिअइइत्यादौभाषायामिवतत्प्रसक्तस्यादितितत्रएवंस

ति ल्पति छति शब्दो गोऽइत्यादेरपि साधुत्वप्रसङ्गात् आ प्रगृह्य इत्यादौ विभक्तिं विनापि तादात्म्यान्वयस्य पचति पाकं
करोतीत्यादिविवरणवाक्ये प्रतिपादकतया शब्दआख्यातान्वयस्य च त्वेयेव स्वहस्तितत्वात्. तस्मादनुपपन्नमेव भूसत्तायामि
त्यादिवाक्यमिति अत्रोच्यते यद्दर्थशक्त्या धातुत्वं निपातत्वं च वादिषु तद्दर्थसम्बन्धभक्त्या बोधकत्वेपि न तत्तथा वाकारस्येव गतिविशे
षशक्तिनिबन्धनं धातुत्वं विकल्प्यशक्तिनिबन्धनं च निपातत्वमित्यन्येषामपि भूचकारप्रभृतीनां धातुत्वनिपातत्वप्रयोजिका भ
वत्यर्थविशेषशक्तिरिव तदाश्रयसंबन्धास्वरूपलक्षणया बोधकतापि अत एव स्थितिशक्तस्य तत्सम्बन्धेसत्यपि लक्षकस्य स्थाधा
तोः प्रतिष्ठत इत्यादौ धातुत्वं अभावशक्तस्य तदाधिकरणलक्षकस्य नञोऽघटं भूतलमित्यादौ निपातत्वं च संगच्छते तथा च स्वश
क्यसत्वावाचकत्वेन स्वलक्षकस्य भूशब्दस्य धातुत्वेन पर्युदस्तत्वान्न प्रातिपदिकसंज्ञा चकारस्य स्वार्थवाचके स्वरूपे लाक्ष
णिकत्वेपि निपातत्वानपायात् सुपो लुक् चान्वाचये त्याद्यमरोक्त्युपपद्यते तथैव खलु वाक्यालंकार इत्याद्यालोकप्रयोगः॥
परिभाषास्वरूपेण संकेतेन तु धर्मिमत् भवत्वादिपदं प्रातिपदिकत्वं प्रपद्यते स्वं रूपं शब्दस्याशब्दसंज्ञेति सूत्रेण प्रतिपादि ३८

तेन पाणिनिसंकेतेन ध्वनिमान्स्वादिः शब्दः प्रातिपदिकसंज्ञामपि लभते चकारादिरव्ययसंज्ञां त्यजति भट्टिप्रभृतिषु परिभाषायां औपप्र
र्थवत्त्वसंपादकत्वस्य दृष्टत्वादिति भुवो वुक्चस्त्वर्थ इत्यादयः प्रयोगाः सूपपदाः गवित्याहेत्यादिवाक्ये गौर्गोणोपास्थितेर्गविरति शब्दः परामृ
ष्टे येयावचनकर्मता। इति शब्दः सर्वनामप्रकृतिकतया बुद्धिस्थप्रकारेण परामृशति बुद्धिश्च क्वचिद्घट्टद्जन्या तदिदमादिसर्वनामपराम
र्शबीजम्। यथा यो धूमवान्स वह्निमानिति क्वचित्पूर्ववाक्यरूपप्रक्रमजन्या यथा अभून्नृपो दशरथः सोध्येष्ट वेदानिति क्वचिद्दृष्ट
मानानुभवात्मकप्रसिद्धिरूपा यथा घटं दृष्ट्वा गोपदं श्रुत्वा वा वदति इममानय स्मृणुयेति क्वचित्स्मरणरूपा यथा तेनोचते। क्षिपति
स्मेति गवित्याहेत्यादौ त्विति शब्दः परामर्शबीजमनुभवं संपादयितुं प्रयुक्तो गोशब्दोऽनेन ध्वनिमानिति न प्रातिपदिकसंज्ञकः। इति शब्दा
नन्तरं लुप्तापि प्रतीतसंहिता। द्वितीया कर्मतां ब्रूयादिति वा वचनान्वयी। गोशब्दार्थकेतिशब्दानन्तरं द्वितीया लुप्ता प्रतिसंहिता[illegible]न्वय
र्थान्विता कर्मतामभिधातुं प्रभवति अव्ययानां नित्यप्रथमान्तत्वे निर्विभक्तिकत्वे वा इत्यर्थस्य क्रियाकर्मभावसंसर्गेण साक्षाद्वचना
न्वयोऽपि संभवति दृष्टो हि नारद इति पश्यतीत्यत्रेति निपातोपात्तायाः कर्मतायाः कर्मणो वा स्तोकमेव पचतीत्यत्रेव कारणबोधितस्य

स्तोकान्यतादात्म्यस्यवच्छेदस्य कुटिलत्वेनाच्छिन्नोऽत्र नञा प्रतिसंहितस्य कुटिलान्योन्याभावस्य चदृर्शिनपाकगमने सुधात्वर्थेऽभेदान्वयः ननु तथा
पि पचति पाकं करोतीत्यादिविवरणे पचतिपदधर्मिकः प्रतिपादक, तया विव्रियमाणवाक्यार्थान्वयः कथं स्यात् पचतिपदस्य पदानुपस्थितत्वा
त् पचतीत्यस्य वाक्यतया लक्षणाया अप्ययोगात् लकार एव पचतिपदलक्षक इति चेन्न पचधात्वर्थस्यानन्वयप्रसङ्गात् पचेस्तात्पर्यमा
त्रग्राहकत्वे प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभंगप्रसङ्गात् पचधातुः पचतिलक्षको लकारो भावतीतिऽवसाधुत्वप्रयो
जनक इति चेन्न तिङर्थकृतिऽनामात्मनेपदत्वं यकसमभिव्याहृतत्वादिनियमभंगापत्तेरिति मेवं विव्रियमाणवाक्याख्यातस्य प्र
तिपाद्यत्वलाक्षणिकत्वात् तथाहि पचतीति पदं ब्रूते पाचेर्लट् विषयत्ववाक् पच्यर्थेनान्वितो लार्थो व्याख्यावाक्यार्थमन्वितः स
प्रम्पन्नोद्भवपदार्थकोद्भवपदात्परा सप्तमी बोध्यतामाह व्याख्यावाक्यव्यपेक्षया पचति पाकं करोतीत्यत्र पचेः पचतीति पदे लटस्तु
बोध्यत्वे लक्षणा तद्वाक्यार्थः पचतिपदबोध्यत्वं पाकं करोतीति विवरणवाक्यस्यार्थे पाककर्तृत्वे अन्वितः प्रभवन्यर्थाद्याख्या
नव्याख्येयपयोरेकार्थकत्वं गमयितुं एवं तस्य काव्यस्योद्भवे निर्माणे समुद्भासे च हेतुरित्यर्थोद्भवपदं सप्तम्यन्तोद्भवे पदे सप्तमीच ९७

प्रतिपाद्यते लाक्षणिकौ नञिवार्थौ निर्मोलेः समुद्भासे चेति व्याख्यातास्वार्थे निर्मोलो प्रतियोगिकत्वसमुद्भास प्रतियोगिकत्वा शैवत्वेति· वाक्यैकवाक्यतापदार्थयोरन्वये विलक्षणव्युत्पत्तिस्वीकारेणाभिमन्यपोरपि परस्परमन्वयो न विरुद्धः अतएव यत्रैते सन्त्राख्यातार्थभावं नायां नरतिमत्युमित्याद्यर्थवादिका ख्याते न लक्षणया अन्यथा वोपस्थापितं प्राधान्यं सर्वचसुवर्थकारकमन्वेतीति मीमांसकाः चैत्रः पचति पाककृतिजन्यचेष्टाश्रयत्वादिन्यायेहे तु पचम्यर्थ आख्यातार्थे अन्वेतीति नैयायिकाः इति संवलितं यत्र व्याख्येयस्य वपुः स्थितम् तत्र श्रोत्रोपस्थितं तादृशं नापरिमृश्यते· यत्र पचतीति पाकं करोतीत्यर्थ एवं व्याख्यानग्रंथस्तत्रेति द्वयं श्रोत्रोपस्थितस्य पचतिपदस्य पाकं करोतीति वाक्यस्य च परामर्षकं तदर्थस्तु प्रतिपाद्यप्रतिपादकभावसंबन्धेनार्थपदार्थे अन्वेतीत्यर्थः व्याख्यानव्याख्येययोरेकार्थकत्वं लभ्यते नन्वेवमपि विवरणेन पदसंकेतग्रह इति कथमुपपद्यतामिति चेदित्थं पचतेः पाककर्तृत्वबोधकत्वव्यवस्थितेः संग्रहाय पचिना पाककर्ताभात् कृत्यर्थता तिङः विवरणेन पाककर्तृत्वबोधकत्वे पचतिपदस्य प्रमापितेऽतिङ्कर्तृत्वबोधिका पाकार्थकपचिभिन्नत्वे सति पाककर्तृत्वबोधकपचतिपदान्तर्गतसाधुपदत्वादित्यनुमानेन चावापोद्धापाभ्यां कृतौ तिङः शक्तिर्ग्राह्येति व्युत्पादयिष्यते एवं व्याकरणान्को

षादुपमानाद्वस्तुनि गृह्यते पदसंकेतः पदे वा वस्तुवाचिता व्यवहारे विवरणोप्राप्तिकृत्पदसान्निधौ। वाक्यशेषे चानुमानद्वारा तदुभयग्रहः
तद्गृहाहितसंस्कारसचिवानुपदश्रुतिः स्मारयेत्यर्थमेषैव स्मृतिरर्थानुभाविका · कर्त्तरि कृत शेषे षष्ठीत्यादि व्याकरणेन गृहीतं गुणेन तद्वदर्थाः
सुखी मः शिशिरो जडः इत्यादि कोषेण च पदवस्तुवाचकताग्प्राति देश वाक्यार्थस्मरणसहकृतसादृश्यविशिष्टपिंडप्रत्यक्षेण वस्तुनि पदवाच्य
ता व्यवहारस्थलीयानुमानेन पुनरनियमेन क्वचिद्वस्तुनि पदवाच्यता क्वचित्पदे वस्तुवाचकता च गृह्यते तादृशग्रहणाहितसंस्कारस्तु पद
ज्ञानमुद्बोधकमासाद्य वस्तु स्मारयति तस्याश्च स्मृतेः गोपदज्ञानत्वविशिष्टजन्यत्वे सति गो गोपदशक्येति संस्कारत्वावच्छिन्नकारणता
निरूपितकार्यताधिकरणगोस्मरणत्वेन गोशाब्दबुद्धेर्जनकत्वं तेन संबन्ध्यन्तरज्ञानेन गोपदज्ञानेनैव वा पुरुषान्तरसमवेतेन कालत
त्वविधया जनितायाः पदेन सह तुल्यकालीनत्वादिसंसर्गगोचरसंस्कारेण गवि गोपदशक्यत्वसंस्कारेणैव वा पुरुषान्तरसमवे
तेन समयविधयोत्पादितायाः गौरिति स्मृतेर्न शाब्दबोधाङ्गत्वं वस्तुतस्तु पदज्ञानशक्तिसंस्कारयोः पदार्थस्मरणं प्रति साक्षादनुभवं प्र
ति च स्वजन्यपदार्थानुसंधानद्वारा कारणत्वं पदार्थस्मरणस्य चानुभवत्वादिजातिसत्त्वे शाब्दस्मरणोभयवृत्तिजात्या तत्सत्त्वे तदन्य

ता[illegible]त्वेन ज्ञात, प्रत्यक्षाद्युपस्थितस्य गोरन्वयबोधः इष्यते च चिराजरितकरणव्यापाराणां जनकतानवच्छेदकेनापि कार-
णविशेषजन्यत्वादिना सामग्रीघटकत्वम् अत एवानुभवव्यापाराणां संस्काराणां निर्विषयत्वमते घटानुभवजनितसं-
स्कारत्वेन घटस्मरणसामग्र्यां यागव्यापारस्यापूर्वस्य च ज्ञानजन्यापूर्वादेर्वैलक्षण्यं यागजन्यापूर्वत्वेन स्वर्गविशेषसामग्री-
घटकत्वं अन्यथा घटानुभवजनितसंस्कारज्ञानजनितापूर्वसत्त्वे घटस्मरणस्वर्गविशेषयोरुत्पादापत्तेः यदि चात एव सं-
स्कारस्य सविषयकत्वमपूर्वस्य च वैजात्यमभ्युपेयते तदवच्छिन्नमेव सामग्रीमध्ये प्रविशतीति मतं तदा प्रकृतेऽपि पदावच्छे-
देन पदज्ञानध्वंसिसंस्कारजन्यत्वं सधर्म एव तदुभयाव्यवहितोत्तरस्मरणत्वादिरन्वयबुद्धिं प्रति जनकतावच्छेदको न तु
तज्जन्यताप्रवेशो गौरवात् शाब्दबुद्धित्वा[illegible]नापयोगेव शाब्दबुद्धौ जनकत्वं अत एव यत्र घटपदाम्पदादीनां प्रतिसंधा-
नमथ कमत्वादीनां स्मरणमथ पदानामाकांक्षाप्रतिसन्धानं ततो विशेष्यविशेषणन्यायेन शाब्दबुद्धिस्तथाविशिष्टवै-
शिष्ट्यबुद्धिस्तत्र पदेन साक्षाज्जनिताया उपस्थितेरसत्त्वेऽपि न विशिष्टवैशिष्ट्यबुद्धेरनुपपत्तिः शाब्दिकास्तु संकेतसं-

सं[illegible]सर्गेण पदपदार्थवैशिष्ट्यावगाहि गो गौ पद्वान् गोपदं वा गोमदित्याकारकः संगतिग्रह एव पदार्थस्मारकः संकेतस्तु भ
गवत्समवेत एकोपि यत्पदजन्यत्वेन यद्धर्मविशिष्टविशेष्यिकां बुद्धिमुद्दिशति तत्तद्धर्मावच्छे तत्पदस्यैव संसर्गो भवति न
त्वन्यस्य संसर्गतात्तु तस्य संकेतत्वेनैव समवायोपि हि यदनुयोगिकत्वावच्छेदेन यत्प्रतियोगिकत्वयोरेव विशिष्टबु
द्धिं जनयति न तु वायुरूपयोः संसर्गता तु तस्य समवायत्वेनेन केनापि वाऽवच्छिन्ना कोशव्याकरणादिरपि पदतदर्थयोः सं
केतेनैवैशिष्ट्यमात्रं ग्राहयति अत एवागृहीतोपि प्रवृत्तिनिमित्ते दशरथपदवानिति निधर्मितावच्छेदकशक्तिग्रहेण तादृ
शीं स्मृतिमुत्पाद्य तादृश एव शाब्दबोधो जन्यते दशरथत्वादिजातीनामाधुनिकायोग्यत्वात्तद्विशिष्टे शक्तिग्रहासंभवा
त् दशरथत्वसंसर्गिकाबुद्धिरपि न दशरथत्वविशिष्टमुपनेतुं प्रभवति सांसर्गिकविषयताभिन्नविषयताया एवोपनीत
भानजनकतावच्छेदकत्वात् अन्यथा संयोगसंसर्गकबुद्धेरनन्तरं संयोगं जानामीत्यनुव्यवसायसम्भवेन सांसर्गिक
विषयत्वायोग्यत्वप्रवादस्य निर्युक्तिकत्वापत्तेः जातिमानिति विशिष्टबुद्धिरपि ज्ञानानवच्छिन्नदशरथत्वप्रकारकस्मर

सांजनयितुमर्हति समानप्रकारताकानुभवस्यैव स्मरणोपधायकत्वात् अन्यथा जातिमानिति निखिलजात्यवगाहिन्यावुआमु
ञ्जितसर्वजातिप्रकारकस्मरणे सार्वज्ञप्रसङ्गात् नच दशरथपदवाच्ये दशरथपदस्य लक्षणा। शक्तिज्ञानस्यैव तदाश्रय
संबन्धज्ञानस्यापि शक्यतावच्छेदकविषयत्वनियमेन तद्ग्रहे लक्षणाया अपि ग्रहणयोगात् संकेतत्वेनैव संकेत
स्य लक्षणाज्ञानविषयत्वे तु शक्तिज्ञानेपि तथैव विषयत्वौचित्यात् तादृशस्य संकेतसंसर्गकस्य निधर्मितावच्छेदकस्य
पदप्रकारकग्रह[illegible]स्य तथैव स्मरणं प्रति संस्कारद्वारा क्लृप्तकार्यकारणभावेनैव निर्वाहो दार्शनिकमते तु दशरथपद
वाच्यत्वावच्छेदेन दशरथपदलक्षणागोचरस्य संस्कारस्य कार्यकारणभावान्तरकल्प्यमिति गौरवं एवं गौ गोपद
वाच्य इति सधर्मितावच्छेदकस्य शक्तिग्रहस्य तदाहितसंस्कारस्य वा तादृशस्मरणे क्लृप्तकार्यकारणभावो न तु उक्तायां गौ
रिति स्मृतौ अतिरिक्तकारणताकल्पनं युज्यते संकेतसंसर्गेण या दशरथपदत्वावच्छिन्नप्रकारता तदतिरिक्तप्रकारत्वानि
रूपितविशे[illegible]ताकपदार्थप्रतिसंधानस्य तादृशान्वयानुभवेन तादृशगोपदत्वावच्छिन्नप्रकारतानिरूपितगोत्वावच्छिन्न

विशेष्यताकनिश्चयस्य च तादृशान्वयबुद्धौ ताद्रूप्येण कारणत्वं न तु गोपदप्रतिसन्धानजन्यागवि गोपदसंकेतसंस्कारजन्याच्च
या गोत्वावच्छिन्नस्मृतिः तस्यास्तत्वेन गोत्वावच्छिन्नान्वयानुभवे कारणतावच्छेदकगौरवात् शाब्दपदार्थज्ञानस्य तादृशवि
शिष्टबुद्धजनकत्वप्रसङ्गात् शाब्दबोधे संस्कारकारणताकल्पने गौरवात् सुरभिपदजन्यगवानुभवे लाघवतरत्वाऽगा
द्युपनीतगोत्वविशिष्टानुभवे च व्यभिचारप्रसङ्गात्. गोपदजन्यगोस्मरणनाशकानुभवत्वस्याव्यवहितोत्तरत्वसा
मानाधिकरण्योभयसम्बन्धेन तादृशस्मरणविशिष्टानुभवत्वस्य वा विनश्यदवस्यतादृशस्मरणजन्यगवानुभवाव्या
पकत्वात् विभिन्नक्षणिकयोर्वैशिष्ट्यविरहात् विनश्यदवस्थस्मृतीनां तत्तद्व्यक्तिं प्रति हेतुत्वे चातिगोरवात् तस्माद्
गोत्वावच्छेदेन संकेतसंसर्गेण गोपदवृत्तिग्रहस्य विशेषणविशेष्यतावच्छेदकप्रकारताकनिर्णयविधया[illegible]नये
गौरस्तीत्यादिपदजन्यानुभवे क्लृप्तेन कार्यकारणभावेन निर्वाहादतिरिक्तकार्यकारणभावकल्पने गौरवात् धर्मिग्रह
तुल्यविषयताक एव शाब्दबोधोऽयम्; कोषव्याकरणव्यवहारादिजनितः शाब्दानुमित्यादिरूपश्च संकेतग्रहः.

प्रात्यक्षिकोपि भवत्यन्वयबोधांगे यदि विघटितपदयोराकांक्षादिग्रहः सहकारी अतएव शाब्दबोधानन्तरमपि शाब्दबोधान्तरं नानुपपन्नं प्रथमशाब्दबोधस्यापि पदवृत्तिमत्पदार्थविषयकत्वात् नन्वेवं दशरथपदवानिति निधर्मितावच्छेदककप्रतिसन्धानस्य यदि संकेतसंसर्गावच्छिन्नदशरथपदप्रकारकत्वेन कारणता तदा घे सो दशरथपदवान्वा वस्तु संकेतसंसर्गेण दशरथपदवन्नवेत्यादिसंशयादपि शाब्दबोधप्रसङ्गः यदि च संकेतसंसर्गावच्छिन्नदशरथपदप्रकारताभिन्नप्रकारतानिरूपितविशेष्यताकत्वेन तदा दशरथो दशरथपदवानिति ग्रहजनिततथाविधान्वयबोधे व्यभिचारः यदि च जन्यतावच्छेदककुक्षावपि दशरथपदवृत्तिताग्रहावच्छेदकताभिन्नावच्छेदकतानिरूपकस्य तादृशदशरथपदावच्छिन्नविषयत्वस्य प्रवेशस्तदा दशपदवानिति निर्धर्मितावच्छेदककग्रहादनन्तरमितरबाधाद्युपनीतपुरुषत्वराजत्वदशरथत्वाद्यवगाहिनोऽन्वयबोधस्यानुपग्रह इति चेन्न इतरबाधाद्युपनीतधर्मस्य तत्प्रकारत्वेपि तन्निष्ठविषयतानवच्छेदकतया दशरथपदमात्रावच्छिन्नविषयत्वस्याभिहितान्वयबोधेपि सत्वात् एतेन गोपदस्य विशिष्य संकेताग्रहणकाले निधर्मितावच्छेदक

गोपदप्रकारकेणानेन जनिता गोपदवाच्यत्वलाघवेतरबाधाद्युपनीतं गोत्वमप्यवगाहते न्वयबोधोपि व्याख्यातः। तत्र गोत्वस्य प्रकारत्वेपि गोपदवाच्यत्वावच्छिन्नविषयतानवच्छेदकत्वात् अन्यथा हि गोत्वगोपदवाच्यत्वोभयप्रकारतानिरूपितविषयतातो गोत्वगोपदवाच्यत्वोभयावच्छिन्ना विषयता अत एव तादृशस्थले गोत्वावच्छेदेन गोपदवाच्यत्वग्रहकारणतायां न व्यभिचारस्तेनापि सुरभिपदेन गोशाब्दबुद्धौ जन्यमानायामितरबाधाद्युपनीते गोपदवाच्यत्वे इतरबाधोपनीतस्य विषयतानवच्छेदकत्वात् अत एवानुमितावपि विधेयांशे लाघवाद्युपनीतो महानसीयत्वादिर्न विधेयतावच्छेदक इति ध्रुवहि मतासिद्धिकालेपि न तथाविधानुमितिः। न च तथाविधानुमितिस्थले भिन्नविषयकप्रत्यक्षादिप्रतिबन्धाय लाघवादिज्ञानघटितापृथक्सामग्री अवश्यं च शाब्दिनिकैरपि तादृशस्थले विशेषणविशेष्यभावावच्छेदकप्रकारकानिर्णयकारणताव्यभिचारपरिहाराय कोपि प्रकार आदरणीयः नहि मया विशेषणविशेष्यतावच्छेदकप्रकारकनिर्णयकारणत्वाद्यन्यतपदवृत्तिमत्पदार्थोपस्थितेः कारणत्वमङ्गीक्रियते एवं कोशानुमानादिजनितपदधर्मिकपदार्थ

वाचकताग्रहस्य न साक्षात्पदार्थशाब्दबोधोपयोगः किन्तु पदार्थे पदवाच्यताग्राहकमानानन्तरमुत्थाप्य यदि विशेषणविशेष्यतावच्छेदविशेषणाद्युभयवैशिष्ट्यावगाहि निश्चयत्वेन विशिष्टवैशिष्ट्यबुद्धेः कारणत्वसम्भवात्तदा वाचकताग्रहस्य पदशाब्दबुद्धावेव साक्षादुपयु[illegible]ते गामुच्चारयेत्यादौ गोपदार्थवाचकं किंचिद्वाचकं वा गोपदं तत्कर्मकं त्वत्कर्तृकमाज्ञासा विषयउच्चारणमिति वाक्यार्थबोधे संकेतितत्वसंसर्गावच्छिन्नया गोत्वेन नवा केनाप्यवलीढया प्रकारतया निरूपितगोपदत्वावच्छिन्नविशेष्यताकत्वस्य निरूपकं ज्ञानमपेक्षणीयमिति न्यायादेव सिद्धमेवं विलोमानुलोमवाच्यवाचकभावग्रहेणैव पदार्थविशेष्यकस्येव क्वचित्पदविशेष्यकस्यापि अन्वयबोधस्योपपत्तेः स्वरूपेण शब्दानां न लक्षणा न वा स्वरूपवाच्यत्वावच्छिन्ने शक्त्यैवोभयबोधसंभवात् अत एव विनैव लक्षणां वाजपेयपदाद्वाजपेयपदवाच्यत्वादिना यागादेर्बोध इति विधोऽप्युपपादयिष्यते अत एव घटपदाम्पदयोरेकपदव्यतिरेकप्रयुक्तान्वयाननुप्रयोजकव्यतिरेकप्रतियोगिद्वितीयपदत्वरूपायाः पदान्तराव्यवहितघटपदोत्तरत्वविशिष्टाम्पदस्वरूपाया वा आकाङ्क्षाया ज्ञाने स्वघटपदवाच्यघटत्वावच्छिन्नप्रकारतानिरूपिता

Nepal Sanskrit University, Dang

मपदवाच्यकर्मत्वावच्छिन्नविशेष्यताकान्वयबुद्धिं प्रतिजनकत्वं सुवचमन्यथाकलञ्ञाइतिजानामीत्यादावितिनोपात्तेकर्मणिकल्नः
शान्वयबोधेव्यभिचारवारणायप्रयासान्तिशयापत्तेः घटद्वितीययोराकाङ्क्षाज्ञानसत्त्वेपिकर्मनामपदवाच्यमितिविपरीतबुद्धिसत्त्वे
कर्मपदोपस्थितेकर्मणिघटतादात्म्यान्वयापत्तेः अमपदधर्मिकघटपदाकांक्षाज्ञानस्यघटपदजन्यघटोपस्थित्यमपदजन्यकर्मोप
स्थित्योः सहकारित्वकल्पनेप्यमपदविषयककर्मपदज्ञानजनितेनकर्मस्मरणेन तथाविधेस्थले घटः कर्मेत्यन्वयबुद्धेर्दुर्वारत्वात् अ
मपदज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकीभूतेनामपदज्ञानाव्यवहितोत्तरकर्मस्मरणत्वेनावलीढतयाकथमपिता
दृशस्मरणकारणासंभवात् संभवति च तादृशस्थले बाधग्रहकालेप्यनुद्बुद्धः कर्मामपदवाच्यमित्याकारकः संस्कार इति तज्जन्यत्वा
दिप्रवेशो नापि तादृशसंस्काराव्यवहितोत्तरस्यज्ञानस्यवारयितुमशक्यत्वात् एतेनयत्रपदेआकांक्षाग्रहस्तज्जनितामपदार्थोपस्थि
तिः कारणमिति व्यक्तिभेदेनापि कार्यकारणभावो निरस्तः नचामपदधर्मिकेतराकांक्षाज्ञानेन शाब्दिकमतेप्येकविधान्वयबुद्धि
जननेपरस्परव्यभिचारस्तत्तदाकांक्षाविशिष्टपदवाच्यत्वेनपदार्थानामन्वयबोधानुप्रवेशो चात्यन्तिकानुभवविरोधादिति वा
च्यम् घटपदस्य बहुवर्णघटिततया तद्घटिताकांक्षाया द्वेधाप्रवेशेन घटाकांक्षानिर्णयत्वगुरुतया लघुनाघटपदधर्मिकामपदाका २२

निर्णायत्वेनैव जनकत्वात् तद्व्यतिरेकेण फलानुत्पत्तेः गोश्व इत्यादौ तु प्रत्ययस्य बहुवर्णघटिततया तद्धर्मिक एव प्रकृत्याकांक्षानिर्णयः का
रणगवामित्यादौ विनिगमनाविरहादुभयसत्त्व एव शाब्दबोधो नान्यथा तत्प्रकारणबाधे कार्यबाधस्य न्याय्यत्वात्· ननु तथापि विपरीतव्य
त्यन्तानामम्[illegible]घट इत्यादिवाक्यादमपदोत्तरं घटपदमित्याकांक्षाज्ञानेन जनिते घटपदवाच्यघटाभिन्नममपदवाच्यकर्मेत्यन्वयबोधे व्य
भिचार इति चेन्न ह्यव्यवहितपूर्वत्वादिकमाकांक्षा किन्त्वाकाङ्क्षाग्राहकमाकांक्षात्वम्पदव्यतिरेकप्रयुक्तो योऽन्वयबोधाभावः तत्
प्रयोजकव्यतिरेकप्रतियोगि घटपदत्वे प्रयुज्यते हि कारणाभावेन कार्याभावः· अन्वयबोधश्च घटपदवाच्यत्वावच्छिन्नविषयतानिरू
पितामपदवाच्यत्वावच्छिन्नविषयताकोग्राह्यत्वेन घटरूपं परस्येत्यादौ विशिष्टशाब्दबोधप्रतियोगिकाभावविशिष्टं प्रति घटपदाम्
पदव्यतिरेकयोः प्रयोजकत्वेऽपि न घटः कर्मेति शाब्दबोधः आकांक्षाशरीरे च न प्रवृत्तिनिमित्तानां घटकर्मत्वादीनामन्वयबोधविष
यतया प्रवेशः प्रयोजनाविरहात् सकलपदार्थसाधारणाया आकांक्षाया अभ्युपगमात् इति ज्ञानेनैव पदार्थानामन्वयबुद्धेः प्रतिनियम
नसम्भवा[illegible]· आकांक्षाज्ञानजन्यतावच्छेदकमपि तत्पदवाच्यत्वावच्छिन्नप्रकारतानिरूपितापरपदवाच्यत्वावच्छिन्नविशेष्यताका

न्वयबुद्धि[illegible]नियते पुनराकांक्षान्वयभेदेनान्यथा सत्यांपदार्थोपस्थितौ सर्वत्र सर्वसंसर्गेणान्वयबुद्धिप्रसङ्गात् सेयमाकांक्षाप्रत्ययः पर
श्च वहुच परस्तादित्यादिभिरपूर्ववाक्येषूपमीयते अनुमीयते वा परः प्रत्ययः प्रकृतिव्यतिरेकप्रयुक्तान्वयबोधाभावप्रयोजकव्यतिरेकप्र
तियोग्यतिदेशवाक्यार्थस्मारयिता घटदृतेरें म[illegible]द् इति प्रत्यक्षेण म शब्दे घटपदस्याकांक्षाबोधोपमितिजननस्यापि संभवात् एवमेव
कर्त्तरि कृदिति व्याकरणेन कृत्त्वोपलक्षिते कर्तृवाचकताग्रहानन्तरं ण्वुलादौ कृत्त्वग्रहादतिदेशवाक्यार्थस्मृत्वा ण्वुलि कर्तृवाच
कत्वमुपमित्या परिच्छिद्यते विपरीतव्युत्पन्नेषु वैयाकरणेषु वैयर्थ्येन सैवाकांक्षा परिच्छिद्यते इति क्व व्यभिचारः स्याद्वा तादृशाकांक्षाज्ञानस्यैनाय
त्यात् तत्तद्व्यवहितोत्तरोत्पन्नत्वादिजन्यतावच्छेदकम् अत एव वाक्यत्वस्यार्थसहत्वभेदेन नाकांक्षाज्ञानकार्यकारणभावभेदः इत्थं
च तत्तल्लक्षणाज्ञानस्यापि तत्तल्लक्ष्यत्वेन तत्तदर्थविषयिणी स्मृतिरेव तत्तल्लक्ष्यार्थानुभवे हेतुः शक्तिज्ञानतुल्ययोगक्षेमत्वात् प्रति
पाद्यत्वमेव वाच्यत्वं लक्ष्यसाधारणमविशेषेण जनकजन्यज्ञानयोर्विषयः यदाहुरभियुक्ताः ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो
यथा सर्वथैव सर्वशब्दानामेते पृथगवस्थिते न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते अनुविद्धमिव ज्ञानं सर्वं शब्देन दृश्यते इत्या

दिं तस्मात्स्मरणं पदेन जानितं पदैर्हन्तिमतः पदार्थस्य अन्वयबुद्धावर्थः कथं न तादृक्स्फुरतुरति व्याकुर्वते· आलङ्कारिकास्तु व्यञ्जनयाहृस्यो
पास्थितानां पदानामन्वयबुद्धौ केचित्तादात्म्येन केचिद्वाच्यवाचकभावेन पदार्थानुप्रवेशास्तथाहि दयातितिक्षासत्यं च युक्तं त्यक्तं न तु
त्वया अपवर्गव्यञ्जनानि कथं स्युर्भीमभूमिपे इत्यत्र भीमाभिधाने ऽजनि प्रकृते भीमभूमिपपदस्य व्यञ्जनालभ्यस्य तादात्म्यमारो
प्य तस्मिन्नपवर्गव्यञ्जनानामासक्तिसूचकानां दयातितिक्षादीनां प्रस्तुतानां ध्वननप्रतीतपवर्गेतरस्वरान्यवर्णाभेदेनाध्यवसि
तानामसंभवात् कथं स्युरित्यनेन प्रतिपाद्यते न प्राकरणिकयोरर्थयोः कोऽपि स्फारसिको विरोध इति तद्रूपपादकतया गुणीभूतमत्र
व्यङ्ग्यम् उदेति सविता ताम्रस्ताम्र एवास्तमेति च सम्पत्तौ च विपत्तौ च महतामेकरूपता इत्यत्र विनोदस्य प्रक्रान्तस्य सामान्येन सम
र्थनस्वरूपेऽर्थान्तरन्यासे उदयस्य सम्पत्तित्वेनास्तमयस्य विपत्तित्वेन ताम्रस्वरूपस्य चैकरूपभावेन समर्थनस्योपपादनाय ता
म्रपदवाच्यस्ताम्रपदद्वयजन्यो बोधोऽङ्गीकार्यः एकपदोपादाने तु एकपदबोध्यत्वताम्रपदबोध्यत्वयोर्धर्मयोर्वैरूप्यादेकरूपतो
पन्यासापप्रतीतिस्त्यागे न स्यादत एव तादृशस्थले कथितपदं न दोषः प्रत्युत पदान्तरोपादानमेव तादृगेवास्तमेति चेति सर्वनामत्रा

वोपादानं नु न प्रतीतिं स्थगयति सर्वनाम्नां नाम्नां पदवोध्यतामुक्तेनापि परामर्षसंभवादिति एवमेव सकलकलं परमेतज्जातं संप्रतिछ
धोअविंवमिवेत्यादौ सकलकलपदवोध्यत्वं विधुपुरयोः साधारणो धर्मः सम्भवतीत्याहुः तदुभयमपि दर्शनविरोधादुपेक्षणीय
म् नन्वेकपदजनितया पदार्थस्मृत्या सहकृतो यः पदजनितायास्तस्या मेलकासंभवात्कथमुभाभ्यां पदार्थान्वयधीरिति चेत् उच्य
ते समूहालम्बनस्मृत्या हृढयोः सव्यपेक्षयोः पदयोर्यौगपद्येन स्मृतोर्थोन्वयमर्हति प्रत्येकानुभवजनितसंस्कारैर्जनिताद्व
योर्वहूनां स्मृतिः परस्परव्यपेक्षामप्यवगाहमानाअव्यवधानेन जायतः पदार्थान् स्मारयति सा च स्मृतिः पदार्थान्वयवि
षयां वुद्धिं जनयतीति किमनुपपन्नं पदध्वनिग्रहविवरणम् अन्वयवुद्धिविषयाणामन्वयानां विभागः प्रस्तूयते ऽअभि
दा भेद इत्येवमन्वयो द्विविधोर्थयोः आद्यस्तत्रान्वयो नेष्टो निपातार्थेन कस्यचित् पदार्थयोरन्वयो द्विविधोऽभेदो भे
दश्च अभेदश्च प्रायेण निपातार्थेन सार्द्धमितरस्य संसर्गतया न भासते यदक्ष्मीरिव तेन विश्वमखिलं मञ्जीकरोतु
न्मदाय द्यौ कोन्तरश्चोष्ठितेवरमणीवर्गात्तदुत्कृष्यते यन्नोपप्लुतमेति तेनाराधित्वेत्याख्यायते तेऽजनिर्य २६

न्त्रो गार्ज्जिनवासरोरुहमुखीनन्नाभिसर्तुं क्षमे इत्यादौ यद्भिन्ने लक्ष्मी साहनयं तद्धेतुकस्याखिलाविश्वमन्त्रीकरणस्याश्रयः यद्भिन्नेत्नो लोकोत्त
रचेष्टितानिपिताहारत्यव्यवच्छेदस्तद्धेतुकस्य रमणीवर्गावधिकस्योत्कर्षस्याधिकरणं सरोरुहमुखी पदाभिन्नेनोपप्लुतमेदेत विन्निसूगमनं कर्त्रीत
त्वप्रवृत्तिनिमित्तकाशिथिलाभिन्नाख्यातकर्मतत्कृतिः यदभिन्नस्य ज्ञानगतद्भावकोटिकसंदेहस्य विषयः सा तत्प्रयुक्ताभिसरणाक्षमत्वाभा
वप्नानहमित्याकारकेणाद्वोधयत्यस्सदार्थाभेदइवेवनञ्वा कारणानिपातानामर्थमासतइतिप्रायिकमेवैतत् यद्लक्ष्मीरिवेत्यादौ सरोरुहमु
खीत्यनुषंगेणासीत्यध्याहारेणान्वये सरोरुहमुखीकर्तृके लक्ष्मीसदृशास्तित्वे अस्तेरर्थे पदित्ति हि नीयानां क्रियाविशेषणार्थस्यान्वयोन
तुनिपातार्थइतिनित्यसत्क्रियवाक्यवादिनो वैयाकरणाः यदाह कात्यायनः अस्तिर्भवतिपरः परमपुरुषे अप्रयुज्यमानो प्यस्तीति भवन्ति
रितिभवोक्तिर्जित्येणादिकेन सूत्रेण सिद्धो वर्त्तमानकालार्थकोपि तद्वाचकत्वलक्षणयालटूपरस्तेन प्रथमपुरुषलङ ज्ञास्तिधातुरप्रयु
ज्यमानक्रियेवाक्ये नित्यमध्याह्रियतेइति कात्यायनवाक्यार्थः सूत्रेभुवइतिवदनेनखतेश्चोपलक्षणं तेनवदन्तिरगुन्तिश्चेत्यपि सिद्धं इह
चप्रत्ययानाः सर्वेस्त्रियां प्रयोगीकिंवदन्तीजनश्रुतिरितिदर्शनात्   नाम्नो नाम्ना धातुना च विभक्त्या तद्भिन्नेन च सामानाधिकरण्यं स्यात्

किंवा नाम्नेव केवलम् तादात्म्यसंसर्गावच्छिन्नतत्पदार्थविषयतानिरूपितस्वार्थविषयताकबुद्धिजनकपदत्वं तेन पदेन तस्य सामानाधि-
करण्यं तच्च प्रथमं प्रातिपदिकेन सह प्रातिपदिकस्य तदपि समानविभक्तिकयोः समासान्तर्गतयोरभेदापन्नयोश्च नाम्नोरिति त्रिविधम्·
तत्राद्यं यथा पुण्यजनप्रीतिकरी कुवलयदलवलयश्यामला कान्तिः· कथमन्धकारभवतः सर्वेषां नयनहारिणी न स्यादित्यत्र संबोध्यस्यां-
धकारस्य आरोपितनीलिमस्वरूपायां कान्तो सर्वेषां प्रथमान्तार्थानां तादात्म्येनान्वयात् सामानाधिकरण्यं प्रातिपदिकानां एवं नीलो
घटः इत्यत्र नीलघटयोरपि सामानाधिकरण्यमवसेयम् नीलघटपदयोः सामानाधिकरण्ये द्विविधा आकांक्षा एका नीलप्रकार-
ताकघटविशेष्यताकबोधव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगितावच्छेदकप्रथमान्तघटनीलोभयपदत्वरूपा द्वितीया घटप्रका-
रतानिरूपितनीलविशेष्यताकबोधाभावघटिता यादृशबोधाभावघटिता आकांसा तादृशमेव बोधं प्रयोजयति व्यज्यते च विशे- क्षा
ष्यपदस्य विशेषणे प्राथम्येन तदर्थविशेष्यकबुद्धिं प्रति प्रयोजिका आकाक्षा अत एव वह्निमान् पर्वत इत्यादौ पर्वतविशेष्यक-
बोधजनकाकांक्षाव्यञ्जकाभावान्तदनभिव्यक्ता सा न पर्वतविशेष्यिका बुद्धिं विपरीतव्युत्पन्नानां तु व्यञ्जकान्तराभिव्यक्ताकांक्षा

ज्ञानाद्भवत्येव परन्तु तादृशबोधतात्पर्येण प्रयुक्तमिदं वाक्यमसाधु यत्तत्कर्मणि प्रयोगान्नहि मतो न्याये काव्ये च तत्प्रयोगान्नहिं ता
दात्म्यसंसर्गकस्थले विशेष्यत्वमेवोद्देश्यत्वं विशेषणत्वमेव विधेयत्वम् यदुद्देश्यकान्वयबुद्धिस्तस्मिन् सिद्धत्वं विधेये चा
गन्तुकत्वमेवोत्सर्गतो व्यंजयति अतएव जातिगुणवाचिनो जातिवाचिनः प्राधान्यमिति कर्मधारयघटकनाम्नोः पौर्वाप
र्यनियामकः प्राचीनानां प्रवादः अतएव न्यक्कारो ह्ययमेव मे यदरयस्मिन्वाक्ये न्यक्कारस्य पूर्वसिद्धत्वध्वननेनार्थभावाप्रक
र्षप्रसक्तिरित्यविमृष्टविधेयांशकत्वं दोष इति साहित्यविदः अतएव विशेष्यनिघ्नपदस्य प्रातिपदिकान्तरसामानाधिकर
ण्येऽप्येकलिङ्गबोधकसुवन्तत्वं प्रायेण तंत्रं अतएव नीलो घट इत्यादिर्न प्रामाणः प्रयोगश्च पृथिवी घट इत्यादिर्यच्च लिङ्गा
नन्वयिपदार्थद्वारकं पदार्थतादात्म्यमितरपदार्थेऽन्वेति न साक्षात्तत्राजहल्लिङ्गपदसमानाधिकरणोऽपि विशेष्यनिघ्न
नियतं नपुंसकत्वं सामान्यविधिप्राप्तत्वात् यथा क्षुदुपहन्तु राज्यमित्यत्र उपहननकर्मणि क्षुधि उपहननतदर्थशक्तिः
कर्मणस्तादात्म्येन साक्षादन्वयो बाधित इत्युपहन्तेरर्थद्वारीकृत्यान्वयात् सविशेषणो हि विधिनिषेधौ सति विशेष्यब

धिविशेषणमुपसंक्रामत इति न्यायात् शाब्दमिति नपुंसकनिर्देशः अगोत्पत्त्यनुकूलो व्यापार उत्पादनाशके सत्कर्मोत
पाद्यं कृत्यप्रत्ययस्य ध्वंसानुकूलो व्यापार उपहन्तेः शाब्दार्थान्वयी भावस्तादर्थ्यं वा तुमुनोर्थः प्रधानधात्वर्थकर्मण्यभि
हिते गोरणधात्वर्थकर्मत्वमुपहन्तुर्न फलीभूतध्वंसान्वयिप्रतियोगित्वस्वरूपं क्षुदनन्तरं प्रथमार्थः भवतु वा एतादृ
शस्थले उपहन्तिना फलविधयोक्तस्य ध्वंसस्य प्रथमान्तप्रातिपदिकार्थप्रतियोगितयान्वयः पदभेदेनाकांक्षावैचि
त्र्यात् इष्यते च घटो नीलो भवतीत्यादेः प्रथमान्तार्थस्य कर्तृतासंसर्गेण भवत्यर्थेन्वयः हरिस्त्वाह प्रधानेतरयोर्य
त्र द्रव्यस्य क्रिययोः पृथक् । शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते यदा त
दा गुणे तद्वदनुक्तापि प्रतीयते इति यत्र एकस्य द्रव्यस्य गुणप्रधानभावापन्नक्रियाद्वयनिरूपितं शक्तिद्वयं का
रकद्वयं पृथक् तत्र गुणशक्तेरभिधानेपि प्रधानानुरोधि प्रधानकारकानभिधानप्रयुक्तं कार्यं भवत्येव तेन पक्तुमो
दनं भुंक्ते पाचकेनोदनो भुज्यते इत्यादौ पच्यर्थकर्मकर्त्रोरभिधानेपि भुज्यर्थकर्मकर्त्रोरनभिधानाद्द्वितीयातृती २६

येसूपपदे यदि तु प्रधानक्रियाकारकं प्रत्ययेनाभिहितं तदा प्रत्ययार्थान्वितद्रव्ये गुणक्रियाकारकमनुक्तमपि प्र
थमादिप्रत्ययलक्षणया संसर्गतया वा प्रतीयते यथा पचता पक्त्वा वोदनो भुज्यते इत्यत्र पाके ओदनकर्मकत्वं।
पक्वमोदनं भुङ्क्ते चैत्र इत्यादौ चैत्रे पाककर्तृत्वं संधायशरेण हन्तीत्यादौ संधाने शरकर्मकत्वं आहूय ब्राह्मणा
य ददातीत्यादौ आह्वाने ब्राह्मणकर्मकत्व आरुह्य वृक्षात्पततीत्यादावारोहणे वृक्षकर्मकत्व गत्वा ग्रामस्य स्थाना·
गत्वा ग्रामे तिष्ठतीत्यादौ ग्रामकर्मकत्वं गमने स्वीकारयितुं ब्राह्मणाय ददातीत्यादौ प्रतिदानं ब्राह्मणादादत्ते
इत्यादौ स्वीकारे प्रतिदाने च ब्राह्मणकर्मकत्वं तत्संदानकत्वं च पतित्वा वृक्षमवलंबत इत्यादौ पतने वृक्षापादा
नकत्वं स्थित्वा ग्राममीक्षत इत्यादौ स्थितौ ग्रामाधिकरणकत्वं च तत्तद्वाचकविभक्त्यभावेपि पदादन्वयविधया
वा प्रतीयते यत्र तु द्रव्यभेदस्तत्र प्रधानक्रियाकारकस्याभिधानेपि गुणक्रियाकारकोभिधायकान्तरमपेक्षते·
अत एव सूपं पक्त्वौदनो भुज्यते इत्यादयो व्यवहारा इति संप्रदायविदः क्षुदुपहन्तुं शक्यं पक्त्वौदनो भुज्यत इत्या

दौ प्रथमान्तपदानामुपहननकर्म क्षुत् पाककर्मौदनादौ लक्षणा ननु प्रथमायाः कर्मत्वमर्थो न तु शास्तिकत्वान्ता
पि धात्वर्थप्रथमान्तार्थयोर्भेदेनान्वयोऽव्युत्पन्नत्वात् क्षुधामि सोदनमिति पदमेव कथितस्थलेयाऽध्याहरणीयमि
तिवस्तुगतिः अत एव श्रुत्वाप्यर्थं नानुमनः कंसेनार्थः कुवुद्धिनेत्यादौ प्रधानक्रियाकर्मणः कृदभिहितत्वेपि श्रव
णकर्मणि द्वितीयाश्रवणमुपपद्यत इति नव्याः। तच्चिन्त्यम् क्त्वाप्रत्ययस्य समानकर्तृकत्वार्थकत्वे कर्तुरभि
धानाच्चैत्रः पक्त्वा चैत्रेण भुज्यत इति प्रयोगस्य क्तो भावमात्राभिधायित्वे चैत्रेण पक्त्वा चैत्रो भुङ्क्त इति प्रयोगस्या
पत्तेः प्रथमया गुणकारकाभिधानस्यावश्यकत्वात् श्रुत्वाप्यर्थमित्यादौ श्रवणकर्मणो देशवाक्यार्थेन सहा
नुमतिकर्मणो धर्मस्य भेद एव विवक्षितः यद्रूपावच्छिन्नान्वयिप्रधानक्रियाकारकमभिहितं तद्रूपावच्छिन्ना
पि गुणक्रियाकारकमपि तद्रूपावच्छिन्नवाचकाद्यपेक्षया विभक्त्याभिधीयत इति सामान्यव्युत्पत्तिः अत एव चैत्र
त्वाव[illegible]देन भोजनकर्तृत्वस्य स्वरूपत्वावच्छेदेन पाककर्तृत्वस्य च विवक्षायामा प्रथमा पक्त्वा चैत्रो भुङ्क्ते इत्यादिकः प्र

योगः सुपपदः-अत्र करणतृतीयेति वदन्ति एवं बहुव्रीहेरपि विभिन्नलिङ्गस्य समानाधिकरणस्य क्वचिन्नपुंसकं साधु अत एव तमःशा
न्तिरेव यदर्थं तदाहेति प्रकाशः यदर्थमिति क्रिनन्तशब्द्यार्थविशेषणत्वान्नपुंसकं द्वितीयान्तमिति वस्तुगतिः।तस्मात्सामानाधिकरण्ये
विभिन्नलिङ्गपदेष्वपि यत् विशेष्यनिघ्नक्लीववत्वं तदन्यान्वयमूलकम् एवं प्रातिपदिकयोः सामानाधिकरण्येऽपि वचनैक्यमपि प्रायेण तन्त्रं अ
तो नीलाघटः सुन्दरदाराः शतपुरुषशिरापदत्यादि प्रमाणम्। येन प्रातिपदिकेन समभिव्याहृतायाः विभक्तेर्थोन्तदन्या संख्यात
त्समानाधिकरणप्रातिपदिकार्थे क्वचित्तदेकदेशेऽन्वेतीति द्वेधा उभयं यथा अस्मानितमेन निजायशोभुगं डिफालवज्ञश्चिकुराः शिरः
स्थितमित्यत्र चिकुरान्वयिबहुत्वमुलपाश्छिन्नं शाक्यमित्यत्र शाकार्थव्यापारान्वयिन्यैकत्वं बहूनामुलपानामेकव्यापारे द्वे घटेन सोक
र्यं विवक्षायां हि तथा प्रयोगः। एवं व्युत्पत्तिः शक्तिरभ्यासरतित्रयो हेतुरित्यत्र फलोपधानार्थकहेतुपदार्थैकदेशे फले एकत्वविवक्ष
या हेतुरित्येकवचनं तदेतद्दण्डचक्रादिन्यायेन परस्परसहकारितालाभः एवं चैत्रो मैत्रश्च सुन्दरावित्यादौ चैत्रैकत्वस्य द्वित्वविशिष्ट
सुन्दराभेदस्य चोभयोरेकत्र द्वयन्यायेनान्वयबुद्धेस्तात्पर्यप्रामाण्यमेकत्वद्वित्वयोरेकविशिष्टेपरवैशिष्ट्यबुद्धिरेव प्रतिषिध्यते न त्वे

कत्रद्वयन्यायेनएको द्वित्ववानिति प्रतीतेः सर्वजनीनत्वात् यत्रैकत्व नार्थोविवक्षितस्तत्रचैत्रमैत्रौ सुन्दराविति [illegible]द्व एवसाधु
रधिकमुपरिष्टात् तस्मादर्थैकदेशो वा संख्याभेदे विवक्षिते। सामानाधिकरण्येपि साधुर्वचनयोर्भिदा एवं विभक्त्यैक्ये क्वचिद्वि
शिष्टयोः प्रातिपदिकयोः पौर्वापर्येणैव निर्विभक्तिकयोरव्यवधानेनाप्याकांक्षाभिव्यज्यते यथा नीलोत्पलादिकर्मधा
रयोन्तर्गतयोः प्रातिपदिकयोः सामानाधिकरण्यं तथा पंकजपदादौ तेनैव वाक्यार्थमर्यादयोपस्थापितस्य पंक·जनिक
र्तुः समुदायरूपोपस्थापिते पद्मे तादात्म्येनान्वयज्ञानेनैव सह तस्य सामानाधिकरण्यं तथाहि पंकजं चरमवर्णप्रत्यक्षे पं
कजनिडप्रत्ययाः संस्कृतपंकजसमुदायश्च भासन्ते द्वितीयक्षणे पंकजनिकर्तृपद्मानि चत्वारि स्मार्यन्ते तृतीयक्षणे
खलेकपोतन्यायेन चतुर्थे विशिष्टवैशिष्ट्यमवगाहमानः पंकजनिकर्तृपद्ममित्यन्वयबोधः ततः पदान्तरोत्पादितप्र
त्यक्षपदार्थस्मरणादिक्रमेण पूर्वानुभूतविषयपंकजनिकर्तृत्वप्रकारेणस्मृतस्य पद्मस्यान्वयबोधं न तु केवलस्य
पंकजनिकर्तुः पद्मस्य वा विशिष्टपदार्थोपस्थितेः पद्मान्वयबोधं प्रत्यसमर्थत्वात् अतएव केवलस्य योगार्थस्य रू

ग्यर्थस्यवोपस्थितये लक्षणामेव पंकजपदे स्वीकुर्वन्ति यत्र कुमुदपदादिविषयिण्येव पङ्कजपदस्य कुमुदादिविषयिणी वा पंकजनिक
कर्तुः स्थलाधिकरणत्वविषयिणी वा पद्मस्योपस्थितिस्तत्र विनापि लक्षणां केवलेन योगार्थेन स्वार्थे वा कुमुदतादात्म्यस्य स्थले वृत्तित्व
स्यान्वय इति मणिकृन्मतसारः एवं धातुप्रातिपदिकयोरपि सामानाधिकरण्यं स्तोकं पचति सुखमास्ते इत्यादौ अत्र द्वितीयान्तस्तोकपदार्थ
स्य सुखपदलक्षितसुखसाधनस्य तादात्म्येन पच्याद्यर्थेऽन्वयात् अत्र धात्वर्थफलान्वयिकर्मस्येव कर्तुराप्सिततमं कर्मेति सूत्रस्याक्षरता
त्पर्याभ्यामर्थः अन्वयश्चाश्रयत्वमिव तादात्म्यमपि तथा च विक्लित्त्यनुकूलव्यापारार्थकपच्यर्थफले विक्लित्तौ स्तोकस्य स्थिरभूसंयो
गानुकूलव्यापारार्थकास्धात्वर्थफले स्थिरभूसंयोगे सुखपदलक्षितसुखसाधनस्य तादात्म्येनान्वयविवक्षायां युज्यत एव कर्मसंज्ञा
कर्मणि द्वितीया चेति जरद्वैयाकरणाः । तन्न । तथा सति द्वितीयाया इव कर्मणि लकारप्रसङ्गात् आस्यते मासः इतिवत् सुप्यते सुखमित्या
दिप्रयोगापत्तेः स्थिरभुवोः कर्मणो धात्वर्थानन्तर्भूतत्वेऽपि सुखादिकर्मणो वास्तेः सकर्मकत्वे सुखमास्यत इति भावे लकारदौर्लभ्यापत्तेः
नव्यास्तु धात्वर्थफलाश्रयत्वमेव कर्मत्वं फलत्वं च व्यापारभिन्नत्वं व्यापारत्वं अग्रे निवक्ष्यते पच्यर्थश्च विक्लित्तेरुत्पत्त्यनुकूलो ।

व्यापारः धात्वर्थत्वं नु धातुजन्यप्रतीतिविषयत्वे उत्पादकत्वस्य संसर्गत्वे प्रत्ययेरव्याहतं धात्वर्थोत्पत्तिस्वरूपफलाधिकरणतया विक्लित्तिरपि
पाककर्म उक्तार्थानामप्रयोगात् विक्लित्तिं पचतीति न प्रयोगः लब्धो हि पचिधातुनैव विक्लित्तिकर्मकः पाकः तथा च फलांशमादाय धातुना स
मानाधिकरणे प्रातिपदिकेपि ओदनादौ कर्मत्वानुवादिका द्वितीया व्रैहेयमोदनं पचतीत्यादौ व्रैहेयपदसमभिव्याहृततया एव द्वितीयायास्तत्र
द्विभक्तिप्रत्ययत्वस्य अनीयाकांक्षाद्योतकतया तादात्म्यसंसर्गकबुद्ध्युपयोगादत एवाग्निहोत्रं जुहोतीत्यादौ कर्मत्वेन भावनायामन्वि
तस्य जुहोत्यर्थस्य नामधेयमुद्भिदादिपदं करणत्वानुवादकतृतीयान्तमिति भाट्टदर्शनसिद्धान्तः यदि च व्रैहेयमोदनं पचत्यग्निहोत्रं जु
होतीत्यादौ विशेषणपदद्वितीयायास्तादात्म्यमर्थः तदाप्रच्छेतेपि तथा यत्र स्तोकादेर्व्यापारान्वयो विवक्षितस्तत्र प्रथमैव ज्योतिष्टोमेन
यजेतेत्यादौ च तृतीयाकरणानुवादिका न चैवमपि स्तोकः पच्यत इति कर्मणि लकारो दुर्वार इति वाच्यम् अस्तीत्युत्पन्नस्यात्मधा
रणमुच्यत इति निरूढं स्मत्वा आस्तेरप्यात्मधारणानुकूलव्यापारार्थकतयात्मनि धात्वर्थधारणफलवत्तया कर्मणि लकारेणात्मा
भूयत इति सर्वमतेपि प्रयोगापत्तेः अथात्मनः कर्मत्वेपि धात्वर्थान्तर्भूतत्वाद्धातोश्च फलसमानाधिकरणव्यापारवाचित्वादकर्म

व्यापारः धात्वर्थत्वं तु धातुजन्यप्रतीतिविषयत्वं उत्पादकत्वस्य संसर्गत्वेऽपि तु समभिव्याहृतं धात्वर्थो यन्निष्ठस्वरूपफलाधिकरणतया विक्लित्ति
रपि पाककर्म उक्तार्थानामप्रयोगात् विक्लित्तिं पचतीति न प्रयोगः न्नध्योहिपचिधातुनैव विक्लित्तिकर्मकः पाकः तथा च फलांशमादाय
धातुना समानाधिकरणे प्रातिपदिकेऽपि शोभनादौ कर्मत्वानुवादिका द्वितीया व्रैहेयं मोदनं पचतीत्यादौ व्रैहेयपदसमभिव्याहृतायास्त्व
द्वितीयायास्तत्र द्विमस्यन्न पदस्य अन्वीयाकांक्षाद्योतकतया तादात्म्यसंसर्गकबुद्धावुपयोगादत एवाग्निहोत्रं जुहोतीत्यादौ कर्मत्वेन भा
वनायामन्वितस्य जुहोत्यर्थस्य नामधेयमग्निहोत्रपदं कर्मत्वानुवादकद्वितीयान्तमुद्भिदा यजेत पशुकाम इत्यादौ करणतया भाव
नायामन्वितस्य यजत्यर्थस्य नामधेयमुद्भिदादिपदं करणत्वानुवादकतृतीयान्तमिति भाट्टदर्शनसिद्धान्तः। यदि च व्रैहेयमोदनं
पचत्यग्निहोत्रं जुहोतीत्यादौ विशेषणपदद्वितीयायास्तादात्म्यमर्थस्तदा प्रकृतेपि तथा यत्र स्तोकादेर्व्यापारान्वयो विवक्षितस्त
त्र प्रथमेव ज्योतिष्टोमेन यजेतेत्यादिवत् तृतीया करणत्वानुवादिका न चैवमपि स्तोकः पच्यत इति कर्मणि लकारो दुर्वार इति वाच्य
म् असीत्युपनस्यात्मधारणमुच्यते इति निरुक्तस्मृत्या अस्तेरप्यात्मधारणानुकूलव्यापारोऽर्थकतयात्मनिष्ठात्वर्थधारणफलवत्त्व

पाकर्मणि लकारेणात्मा भूयत इति सर्वमतेपि प्रयोगापत्तेः अथात्मनः कर्मत्वेपि धात्वर्थानन्तर्भूतत्वात् धातोश्च फलसमानाधिकरणव्या
पारवाचित्वादकर्मकत्वमस्ति· तथाच लः कर्मणि च भावे चाकर्मकेभ्य इत्यत्राकर्मकेभ्यो भावविधिना कर्मणि लकारो बाध्यते सकर्म
केभ्य एव कर्मणि लकारविधिरित्याक्षिप्यते सकर्मकत्वञ्च फलाधिकरणवाचकत्वे सति स्वार्थफलव्यधिकरणव्यापारवाच
कत्वं तेन शब्दोत्पत्त्यनुकूलव्यापारवाचिनः शब्दायतेरर्थेनाधस्पा[illegible]भूसंयोगानुकूलव्यापारवाचिन उपविशतेरर्थे स्फिग्भुवो
रधःसंयोगफलकक्रियावाचिनः पततेरर्थेध: पदार्थस्य सर्वावयवाधःसंयोगानुव्यापारवाचिनः शयतेरर्थेध: सर्वाङ्गयोरुदय
गिरिसंयोगानुकूलव्यापारवाचिन उदेतेरर्थे उदयगिरेः त्वङ्मनसोः संयोगस्य विभागस्य चानुकूलव्यापारवाचिनो जागर्तेर्नि
द्रातेश्चार्थे त्वङ्मनसोरवयवानामुपचयस्योपचयस्य चानुकूले व्यापारे शक्तस्य क्षीयतेर्वृद्धेश्चार्थेऽवयवानां प्राणे· सहशरीर
स्य संयोगविशेषं तदत्यन्तध्वंसं च प्रति अनुकूले व्यापारे शक्तस्य जीवतेर्म्रियतेश्चार्थे प्राणशरीरयोश्च तत्तद्धातूनां भवतेरर्थे व्यापारे
तदर्थफलस्यात्मधारणस्य लज्जतेः स्वगोपनस्य रमतेः सुखस्य सामानाधिकरण्यात् तेषां गतिनिवृत्तिं प्रवृत्तिमिच्छाध्वंस

रूपविशेषश्चाभिदधतांतिष्ठतिपश्यतिरोदितिनश्यतिदीप्यतीनांस्वार्थफलाभावान्नसकर्मकत्वप्रसङ्गः फलत्वंचमुख्यधात्वर्थव्यापारे
येनकेनापिसंसर्गेणान्वितंधात्वर्थत्वंतेनविषयताविशिष्टज्ञानेजानातेरद्रूपताविशिष्टेएगेरिच्छतेरुत्पत्त्यनुकूलयत्नेकरोतेर्वाध्यत्व
विशिष्टेद्रव्येछ्रिषेर्लौकिकविषयताविशिष्टप्रत्यक्षघ्राणजरासनचाक्षुषत्वावच्छिन्नश्रावणसाक्षात्कारेषुसाक्षात्करोतिजिघ्रतिरसयतिप
श्यतिस्पृशतिशृणोतीनांविधेयताविशिष्टयोरनुमितितर्कयोरनुमात्यापद्यत्योःसकर्मकत्वंनिराबाधमतएवसुखत्वमिच्छतिघटत्वंक
रोतिदुःखत्वंद्वेष्टिज्ञानोपनीतंगगनंसाक्षात्करोतिजिघ्रतिरसयतिपश्यतिस्पृशतिशृणोतिवह्नित्वमनुमिमीतेवह्न्यभाववत्त्वमापादयतिइ
तिनप्रयोगः यस्तुसुखवत्तयात्मानमिच्छतीतिप्रयोगःसचरुस्थालींपचतीतिप्रयोगेणतुल्ययोगक्षेमः।कर्मणिलकारेप्येवंतेनद
धातोर्निधानमश्रूयतपाञ्चजन्यइतिमाघउपपद्यतेयेनचव्यापारेणव्यधिकरणफलवत्ताधात्वनभिहितेनकर्मणासकर्मकोधातुस्त
नेवकर्मणिलकारविधानेअन्यथाप्राणवियोगफलकव्यापारार्थकहन्तेर्वियोगस्यहिनिरूप्यत्वेनैकस्मिन्नधिकरणेधा
त्वनभिहितेपिअधिकरणेत्तराकांक्षायाअविच्छेदात्चैत्रोहन्यतइतिवत्प्राणाहन्यंतइतिप्रयोगःस्यात्प्रकृतेभूप्रभृतिर्दैत्रा

कालभावगन्तव्याध्वभिः सकर्मकोपिफलाधिकरणेनात्मनानसकर्मकइति कथंतत्रकर्मणिलकारःप्रसज्यतेयेनात्मा
भूयतेइतिप्रयोगापादनंसंभवतीतिचेत्सत्यं।एवंफलस्यकर्मत्वेपिधातुनाभिधानात्तेनकर्मणासकर्मकत्वाभावात्
तत्रलकारःकथंप्रसज्येतयेनस्तोकःपच्यतइत्यादिप्रसज्यतेद्वितीयानुमतेनकर्मणासकर्मकत्वमपेक्ष्यतेअतएवनारं
शब्दायतेदीर्घमस्तीत्यादौद्वितीयाधात्वर्थानन्तर्भूतकर्मणःशब्दात्मादेविशेषणेकर्मानुवादिकाइष्यते।साचेयंद्विती
याविशेष्यनिघ्नप्रातिपदिकसमभिव्याहृताचेत्नियतनपुंसकलिङ्गाभिव्यञ्जिकासामान्येनपुंसकस्यैवसाधुत्वात्तन्नियत
लिङ्गपदसमभिव्याहृताचेत्लिङ्गत्यागानुशासनाभावात्तल्लिङ्गाभिव्यञ्जिकैव अतएवार्द्रंपचतिद्रुतिहेतुंपचतीत्या
दयःप्रयोगाः आर्द्रभिन्नांद्रुतिहेत्वभिन्नांविक्लित्तिंबोधयन्तोदृश्यन्तेइतिक्रियान्वयिफलविशेषणानांकर्मत्वानुवादिकावि
क्लित्तिव्यापारयोःसंसर्गीभूतस्यकर्मत्वस्यप्रातिपदिकावाद्वितीयाइतिशाब्दिकाःप्राहुस्तच्चिन्त्यम् विशेषणसुपांविशेष्यान्वया
कांक्षाव्यञ्जकत्वेनविशेषणविशेष्येणान्वयत्वमितिसविभक्तिकस्यविशेषणस्यकर्मधारयानुशासनासिद्धत्वेनसाधुत्वात्विभा

नुशासनंक्रियाविशेषणद्वितीयायाअसंभवात्नहिद्वितीयाव्यञ्जितेवक्रियाविशेषणस्यधातुनासहाकांक्षाज्योतिष्टो
मेनयजेतवन्गितंगच्छतीत्यादौतृतीयाप्रथमयोरपिदर्शनात्विनाविशेषविधिंप्रातिपदिकार्थमात्रेप्रथमात्यागायोगा
त्फलव्यापारयोःकर्मकर्मिभावस्यसंसर्गमर्यादयैवभानलाभेद्वितीयपानदनुवादस्यानपेक्षणाच्च तस्मात्फलविशेषणा
नामनुशासनेसिद्धेवोपपदद्वितीयानकारकार्थकेतिनस्तोकःपश्यन्तइतिकर्मणिल्नकारअनुशासनंचउभयसर्वतसोःका
र्याधिगुपर्यादिषुत्रिषुद्वितीयाम्रेडितान्तेषुततोन्यत्रापिदृश्यतेइतिउभयतोग्रामंसर्वतोग्रामंधिक्पिशुनंमेयानुपर्युपरि
पयोधरानधोधोगगनमध्यधिइत्यादावन्यत्रापिक्वचिद्द्वितीयास्यादित्यर्थकंफलेव्यापारेधात्वर्थतादन्येनान्वितार्थक
स्यप्रातिपदिकस्यद्वितीयांविधत्तेनतुव्यापारविशेषणस्यप्रथमान्तत्वप्रयुक्तंफलहेतुःपचतिचैत्रइतिप्रयोगापत्तेरितिवस्तु
गतिस्तस्मान्न्यायेनक्लीवलिंगपदत्वस्यविशेषणंआनुशासनिकीतत्रद्वितीयान्यत्रदर्शनात्एवंविभक्त्यासहप्रा
तिपदिकस्यसामानाधिकरण्यंद्रोणोव्रीहिरेकंब्रह्महेक्षुबीजयोग्रयइत्यादौप्रादेशःकुशोरत्निःकुडवमि[illegible]त्यादौच

गुरुत्वेत्वेन संख्यात्वेन परिमाणत्वेन चानवच्छिन्नमभिदधत्याः प्रथमाया अर्थे द्रोणादिगुणविशेषमभिदधतोर्थतादात्म्येना
न्वेति प्रथमार्थस्तु सोत्र परिमाणपदस्य तन्त्रेण गुरुत्वस्याप्युपस्थापकत्वात् गुरुत्वादिभेदेन व्रीह्यादौ न हि द्रोणादेरर्थस्तथात्वे
नुमर्हति प्रातिपदिकार्थयोर्भेदान्वयस्याव्युत्पन्नत्वात् एवमाख्यातेन कर्तृकर्माभिधायिना प्रथमान्तचैत्रौदनादेः सामाना
धिकरण्यं अत एव युष्मदादिसमानाधिकरणे स्थानिन्यपि मध्यम इति सौत्रो व्यवहार इति शाब्दिकास्तदुभयं चिन्त्यम् ए
वं स्वरूपार्थकतलः कनश्च तद्धितस्यार्थे देवस्य पावस्य चान्वयात् देवतावाचकत्वाद्धि तद्धितेनापि प्रातिपदिकस्य सा
मानाधिकरण्यं स्वरूपत्वं नाम गर्गानोत्वादिरेवाखण्डो धर्मः एतादृशप्रत्ययानां प्रवृत्तिनिमित्तं न पुनरनर्थक एव
तलादिरागमव्यावृत्तस्य प्रत्ययत्वस्य सार्थकत्वघटितत्वादिति वदन्ति अन्ये तु प्रातिपदिकयोरव्यवधानमेव सामानाधि
करण्यं तत्र यथा नीलोत्पलं हि गार्ग्यादौ विभक्त्या व्यवहितयोस्तु प्रातिपदिकयोर्विभक्त्यर्थद्वारक एवान्वयः नीलो घट
इत्यादौ नीलपदसमभिव्याहृतविभक्तेरर्थे घटान्वयिन्यभेदे नीलादेरन्वयः । न चाभेदार्थविभक्तेरनुशासनहीत्वं ^ ३२

ध्यंशांक्यं प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमेति सूत्रस्य प्रथमायां करणतोऽपि भक्त्यन्तरेच मात्रग्रहणसामर्थ्यात्प्रातिपदिकार्थवाचकत्वव्यवस्थापकत्वात्प्रातिपदिकार्थश्चयेन रूपेण प्रातिपदिकान्नोपस्थितस्तद्रूपावच्छिन्नेमेव विभक्तिर्बोधयति अन्यथैकधर्मावच्छिन्नयोरन्वयेनिराकांक्षत्वप्रसङ्गात् नच स्वस्वरूपभेदाभावत्वं प्रातिपदिकार्थव्यक्तिस्वरूपभेदोहि निरवच्छिन्नतन्नघक्तिवृत्तिप्रतियोगिताकस्तदभावश्च प्रतियोगिस्वरूप एव तेनैवान्योन्याभावस्याभावः प्रतियोगिविशेषणधर्मस्वरूपो यत्र प्रतियोग्यननुगतोऽनुगतश्च प्रतियोगितावच्छेदको धर्म इति निपुणतरमुपपादितं वोऽधिकारधिवरणेवक्ष्यते चोपरिष्टात् घटाभावेघटाभाववत्स्वरूपे स्वरूपभेदाभावस्याधाराधेयभावाभ्युपगमेप्यात्माश्रयो यथा न दोषस्तथा तत्रैवानुसंधेयम् अन्यथा प्रतियोगितावच्छेदक स्वरूपेन्योन्याभावस्याभावेन्योन्याभावभेदोधिकरणस्वरूपः कथमाधाराधेयभावेन वर्त्तेत अन्योन्याभावस्याभावेन्योन्याभावान्योन्याभावस्याधिकरणभेदाभ्युपगमे अनवस्थाप्रसङ्गात् नच तथापि विशेषणविभक्तेर्भेदत्वावच्छिन्नप्रतियोगिताकाभावत्वं भेदप्रतियोगिकाभावत्वं नीलभेदत्वावच्छिन्नप्रतियोगिताकाभाव

त्वेनाशक्यतावच्छेदकमादाय अप्रसिद्धिः द्वितीये पीतेपि नीलो घट इति प्रयोगप्रसङ्गः नीलभेदगगनोभयाभावादेः पीतेपि सत्वात् तृतीयेशा
म्मानन्यम् नीलपदव्यक्तितात्पर्येण नीलो घट इति वाक्यस्य प्रामाण्यप्रसङ्गश्चेति चेन्न न भेदे अत्यन्ताभावे च विभक्तेः पृथक् शक्तिस्वी
कारे नीलो घट इत्यत्र नीलत्वोपलक्षिता नीलव्यक्तिर्भेदे भेदस्तु तत्तद्व्यक्तिस्वरूपावच्छिन्नया प्रतियोगितया अभावे चाभीत्यनुपपत्तिवि
रहात् प्रतियोगितावच्छेदकविशेषणतया भासमानो धर्मः प्रतियोगितावच्छेदकत्वावच्छेदकतयापि संसर्गतया नियमतो गृह्यते इ
ति पुनरप्रामाणिकम् भवतु वा उभयावृत्तित्वोपलक्षितधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावे अत्यन्ताभावे च खण्डशः शक्तिः
स्मरणं तु सर्वनामन्यायेनोपलक्षणमुभयावृत्तित्वांशमपहाय या व्यक्तिः प्रातिपदिकेनोपस्थापिता स्वरूपतस्तद्व्यक्तित्वावच्छिन्नप्र
तियोगिताकत्वेनान्योन्याभावमवगाहते अत्यन्ताभावविशेषणतयानुभावयति चेति नीलपदस्य प्रातिपदिके न स्मरणे नीलो घट इति
वाक्यप्रामाण्यमुपपद्यते नादशो भेदे विशेषणतया नीलाद्यन्वितघटस्य विशेष्यतया अन्वयस्वीकारात् प्रकारतया च प्रतियोगितावच्छे
दकभाने न प्रतियोगितावच्छेदकविशेषणावच्छिन्नत्वभाननियमः शुद्धवह्नित्वावच्छिन्नप्रतियोगिताकाभावस्य साध्यतावच्छेदका
वच्छिन्नव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वोदत्रैव दर्शनात् तेनोभयावृत्तित्वोपलक्षिततद्व्यक्तित्वे स्वरूपतो भेदप्र

तियोगितावच्छेदकत्वग्रहणासंभवात् विभक्तिशक्तिग्रहानुपपत्तिः नन्वेवमभेदे विभक्तेरित्यादिकल्पनापेक्षया लाघवान्निरुक्ताभेदसंसर्गकैवान्वयबुद्धिरभ्युपेयतुमुचिता प्रातिपदिकार्थमात्रे प्रथमेति सूत्रे मात्रपदार्थैकदेशप्रातिपदिकार्थातिरिक्तानर्थकत्वमात्रं विवक्षितं न तु प्रातिपदिकाद्यर्थकत्वमपि अन्यत्वभ्येशान्तरकल्पनादिति चेन्न अभेदसंसर्गेण प्रातिपदिकार्थयोरन्वयाङ्गीकारे हि स्वन्तनीलपदेन सह स्वन्तघटपदस्य योऽर्थोपर्यस्वरूपायास्तदाकांक्षाया वाकांक्षायाः प्रयोजकत्वस्वीकारे गौरवमधिकवर्णघटितत्वादभेदस्य पदार्थतावादे तु नीलपदस्य तु नासह नीलप्रकारकाभेदविशेष्यकबुद्धेनेन सुनासहस्वन्तघटपदस्याभेदप्रकारकघटविशेष्यकबुद्धेर्वाकांक्षाद्वयस्य प्रयोजकत्वस्वीकारे लाघवं नीलघटपदयोरेकत्राकांक्षायामप्रवेशेन तयोर्विशेषणविशेष्यभावव्यत्यासप्रयुक्ताकांक्षाधीकारणताभेदाभावात् नन्वेवं घटो नील इति वाक्यादिव नीलो घट इति वाक्यादपि घटमुद्दिश्य नीलाभेदविधेयकस्य वाक्यार्थबोधस्य प्रसङ्गः न प्रथमान्तघटपदोत्तरत्वविशिष्टतथाविधनीलपदत्वघटिताया आकांक्षायास्तथाविधबुद्धौ प्रयोजकत्वध्रौव्येण लाघवावकाश

इतिचेदेवम् नीलप्रकारकाभेदविशेष्यकबुद्धेर्नीलोत्तरसुत्वाभिमतस्याकांक्षायाः अभेदविधेयकघटविशेष्यकबुद्धौ तु पूर्वस्वोत्तरपदत्वं
योग्याकांक्षायाश्च प्रयोजकत्वद्वयस्वीकारेणैव चारितार्थ्यात् यदि च नीलो घटः पटः अन्यो वा इत्यत्रापि अभेदे नीलान्वयस्य घ
टे चाभेदान्वयस्य प्रयोजिका नीलोत्तरसुत्वेन घटपदोत्तरसुपूर्वकसुत्वेन चाभिमतस्याकांक्षा यत्ने तएवेति घटमुद्दिश्य नी
लाभेदविधिर्दुर्वार इति सर्वमतेऽपि प्रथमान्तविशेष्यविशेषणयोरेव पौर्वापर्याभिव्यङ्ग्याकांक्षेति विभाव्यते तदाप्यभे
दस्य पदार्थतया प्रकारत्वमेव युज्यते न तु संसर्गत्वं तथा सति हि क्षुद्रपहन्तुं शाक्यं शारीरिद्वषः शिखीविनष्टः सुरभिचन्द
नमाघ्रातं निध्वनन्तूपाचजन्यः अतो वह्निमत्पर्वतोऽनुमितः इत्यादौ उपहननतदर्थशाक्तिमाव्यस्य नाशितं प्रतियोगि
नो दर्शनस्याघ्राणस्य श्रावणस्य च लौकिकविषयस्यानुमिति विधेयस्य चक्षुधिकारीणिणाज्ञेविधीविखनिवन्दनेपां
च जन्ये पर्वते च तादात्म्य वाणानदनन्वयापत्तेः स्वतादात्म्योपहननकर्मत्वादिसंसर्गेणान्वयस्वीकारे सामानाधि
करण्याभावादेकविभक्तिकत्वानुविधानानुपपत्तेः पदार्थभूतस्तु शाक्यविनष्टद्वयाघ्रातश्रुतानुमितानामभेदः स्वा ३४

अयोपहननत्रिरासवाशरीरक्षोऽभिनिध्यानवहिहृदाक्षुद्राहृवन्वयमुपलभमानोनयोऽपतांनवासामानाधिकरण्यंव्यवहरन्तियेनके
नापिसंसर्गेणैकतरपदार्थाभेदविशिष्टस्यापरपदार्थस्यवोधकयोरेवपदयोः सामानाधिकरण्यात् कर्मधारयावयवयोः सामा
नाधिकरण्यव्यवहारोगौणः अतएवप्रगृह्यईदस्यप्रथमोपात्तः प्रगृह्याभेदोनिपातार्थस्वरूपेण्यन्वेति अभेदेनतयोर
न्वयवोधोपगमेकर्मधारयस्यापिप्रसङ्गात् नवाव्ययीभावविधिनापवादः समीपसमृद्ध्यादिपरिगणितातिरिक्तस्यरू
पार्थेवर्त्तमानस्यआइतिनिपातस्याव्ययीभावविध्यविषयत्वात् आङ्मर्यादाभिविध्योरव्ययीभावविधानात् एवं
स्तोकंपचतीत्यादौद्वितीयार्थाभेदः मात्रपदसामर्थ्यान्नप्रातिपदिकार्थद्वितीयायाअपिसाधुत्वादन्यथाक्रियाविशे
षणद्वितीयायाअकारकविभक्तित्वेस्तोकंनम्रेतिविग्रहेस्तोकनम्रेतितत्पुरुषत्वानुपपत्तेः विशेषविधिंविनाऽका
रकद्वितीयायासमासस्यासाधुत्वात् नवायंकर्मधारयोविरुद्धविभक्त्यपदद्वयोः कर्मधारयायोगात् एवंद्रोणं
व्रीहिरित्यादौद्रोणादिपदंद्रोणपरिमितेवाचकंलाक्षणिकंवा प्रथमातुप्रातिपदिकार्थमभेदमभिधत्तेनतुपरि

माणं प्रमाणाभावात् अन्यत्वस्यैवार्थे सूत्रस्य प्रत्याख्येयत्वात् अन्यथा द्रोणेन क्रीणातीत्यादौ करणत्वस्यानन्वयापत्तेः
प्रातिपदिकार्थपरिमाणे तस्य बाधात् द्रव्यस्य चापदार्थत्वात् एतेन सुपां वचनवाचकतापि प्रत्युक्ता एकवचनत्वादिनात
त्प्रतिपाद्यसंख्याभेदेनैव प्रातिपदिकार्थेऽन्वयेति तद्धितप्रत्ययो देवतेत्यादौ वनर्थक एवेति कथं तस्य प्रकृतिसामानाधि
करण्यं यथा चानर्थकानामपि सार्थकसजातीयत्वं तथा स्पष्टमुपरिष्टात् अत एव देवतापर्याये देवतापदग्रहणम
प्युपपद्यते वृत्तिसमासान्तर्भूतस्य प्रातिपदिकस्यैव प्रातिपदिकेन सामानाधिकरण्यं न तु शब्दान्तरस्य प्रातिपदिका
र्थे वर्तमाना विभक्तिरपि भेदाभावत्वविशिष्टस्वार्थे प्रकृत्यर्थस्याधाराधेयभावमेवावगाहते नाभेदमभिन्नयोरपि
अभावत्वेनात्माश्रयस्याकरेसुहस्तितत्वादिति प्राहुः तदग्रे चिंतयिष्यामः॥ ॥इति श्रीमहामहोपाध्यायगोकु
लनाथशर्मणोतिपदवाक्यरत्नाकरे भेदान्वयप्रकरणम्॥ ॥नाम्नामुपस्थितानि निपाताः क्वऽच्य ज्ञादयः
भेदान्वये व्यपेक्ष्यन्ते तिङ्नामेति तु केचन भेदेन नामार्थप्रकारकान्वयबुद्धौ उपयोगिनोसुपामाकांक्षा सुपोहि॰ ३५

स्वार्थसंबोध्यत्वकर्मत्वकरणत्वसंप्रदानत्वापादनत्वसंबन्धाधिकरणत्वादिषु प्रातिपदिकार्थसम्बन्धं बोधयन्तो नामभिर
व्यवहितोत्तरत्वेनापेक्ष्यन्ते तथाहि तान्यणवङ्जादीनि स्वार्थे प्रत्ययात्मकत्वादौ प्रातिपदिकार्थस्य भेदेनान्व
यबुद्धिमादधानानि प्रातिपदिके: क्वचित् पूर्वत्वेन क्वचिदुत्तरत्वेनाकांक्ष्यते एवं निपाता नञ्वादयः स्वार्थेऽभाव
सादृश्यादौ प्रातिपदिकार्थस्य भेदान्वयं बोधयन्ति तथा क्यङ्क्यजादयो धात्वंशप्रत्ययाः स्वार्थे प्रातिपदिकार्थस्य
भेदान्वयं बोधयन्तः प्रातिपदिके व्यपेक्ष्यन्ते तथाहि पुत्रीयति गव्यति नाव्यति दीव्यतीत्यादौ पुत्रनौगोदिवां क्यज
र्थेच्छायां प्रकृत्यर्थतावच्छेदकावच्छिन्नया स्वत्वोद्देश्यतानिरूपितविषयतया संसर्गेणान्वयः पुत्रः स्वं भवत्वित्ये
वमाकारकेच्छायाः स्वत्ववृत्त्युद्देश्यतया हि निरूप्यते पुत्रत्वावच्छिन्ना विशेष्यता स्वत्ववृत्ति विषयतापि समभि
व्याहारलभ्यकर्तृप्रत्ययनिष्ठतच्छक्तित्वावच्छिन्नप्रकारतानिरूपितैव ग्राह्या तेन भ्रातुः पुत्रमिच्छतीत्यर्थे भ्रातुः पुत्री
यतीति न प्रयोगः अत एव सुप आत्मनः क्यजिति सूत्रे आत्मन इति संसर्गविशेषप्रापकमेव आत्मनः पुत्रीयतीत्यादौ

आत्मन इति संसर्गऽन्वयार्थानुवादः आत्मन इतिपदे पुत्रादिसाकांक्षे प्रयुज्यमाने अप्रयुज्यमाने वा क्यच् भवतीत्यनु
न्यासमतार्थ इत्यपि केचित् पुत्रपितरि गोस्वामिनि चात्मनि पुत्रगोपदयोऽनेक्षणा तथा च पुत्रपितरं गोस्वामिनमा
त्मानमिच्छतीति पुत्रीयति गव्यति इत्यादावर्थ इत्यपरे अशनायति उदन्यति धनायतीत्यादौ बुभुक्षापिपासालि
प्सासु क्यजर्थेच्छाकर्म इत्यस्याशनस्य उदकस्य धनस्य चान्वयः अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु इति
सूत्रे बुभुक्षात्वादेरेव प्रवृत्तिनिमित्ततानाभात् भोजनसमानकर्तृकतदिच्छास्वरूपबुभुक्षादिपर्यायाणा
मपि चामर्थे व्यधिकरणभोजनादेरन्वयासंभवात् परस्याशनीयतीत्यादिको न प्रयोगः ; क्षीरस्यति बालो लवण
स्यति उष्ट्रो दधिस्यति वा आघूर्णो मधुस्यति मक्ष्यस्यति वा भ्रमर इत्यादौ सुरासु[illegible]गागमो प्रसहानि तस्य क्यचोऽर्थे धा
रणे नेच्छास्वरूपलालसायां क्षीरादिः कर्म तयान्वयः ; अश्वस्यति वडवा वृषस्यति गौरित्यादौ मैथुनेच्छायां क्यचः शु
क्तिः मैथुने कर्तृतया अश्वस्येच्छायां प्रकारतया मैथुनस्यान्वयात् अश्वकर्तृकमैथुनप्रकारकेच्छावती वडवेत्यादि ३६

न्वयबोधे न फलतोश्वो मैथुनं करोत्वितीच्छाया लाभः मैथुनस्येच्छान्वये मैथुनत्वावच्छिन्नप्रकारितायाएवसंसर्गत्वात् मैथुनेअ
श्वकर्तृकत्वस्योपरंजकत्वात् यत्तु मैथुनेप्रकारकेच्छायां कर्मतयाश्वस्यान्वय इति तन्न तथा सति धात्वर्थान्तर्भूतकर्मत्वेनाश्वस्या
यतेरिवाश्वस्यतेरप्यकर्मकत्वापत्तेः तथा चाविरुध्यहयानश्वस्यतिषु [illegible] वंदद्वान नं प्रति वत्नेव नास्थायि न्यः समीक्ष्य समी
पगान् निजपारिष्टठगाठप्रेमारथाङ्ग विहंगमीः स्मरतापरामृतस्वान्ताद्वृषस्यति संप्रतीति नैषधचरिते प्रयोगोपि व्याहन्येत
यदि कर्तृतया मैथुनेश्वस्य मैथुनस्य च प्रकारतयाच्छायामन्वयस्तदा कर्मणोनाभिधानात् प्रयुज्यत एव हयेभ्यो द्वितीया विभक्तिः
स्वकर्तव्यत्वेन पाकमिच्छति स्वेन पाकं चिकीर्षतीतिवत् अश्वस्यति वृषस्यतीति भात् कामेस्त्रौ अत एव वृषस्यन्ती तु कामुकीत्यमरः
कामुकीपर्याये वृषस्यन्तीमगणयत् जारं वृषस्यन्ती बन्धकीति प्राञ्चः प्रयुंजत इत्यपि वदन्ति एतेन क्यच्पर्यायो यशाः काम्य
ति पुत्रकाम्यति सर्पिः काम्यति किं काम्यति स्वः काम्यतीत्यादौ काम्यच्प्रत्ययोपि व्याख्यातः मान्तादव्ययाच्च क्यचो निषेधेपि पर
काम्यचस्तदभावात् किंम्यति स्वर्यतीतिवत् किंकाम्यति। स्वःकाम्यतीति प्रयोगेप्यसाधुत्वायोगात् तथा पुत्रीयति पौरान् निशा

त्रीयतिरणे इत्यादावाचारस्य दृशाचारस्य कर्त्रर्थस्यैकदेशे प्रथमाचारे पुत्रादेः कर्मतयानिरूपणात्प्रासादेरधिकरणतयान्वयः प्रथमाचारस्य क
र्मण्यधिकरणे चाभिहितेपि द्वितीयाचारकर्मणोऽधिकरणस्य चानभिधानात् पोरेरणे चाद्वितीयासप्तम्यौ आचारस्यात्र संबद्धेन विहा
रादिः सर्वनामन्यायेन शक्यः तेन पुत्रकर्मकसंबद्धेन सदृशयोरकर्मकसम्बद्धेनानुकूलतायाः निराधिकरणकविहारसदृशरणाधि
करणकविहारानुकूलतायान रणेतिकर्तृकभावनाया लाभः एतिकासु क्यच आचारसंबद्धेनत्वविहारत्वादिप्रातिस्विकधर्मावच्छिन्न
एव सर्वनामन्यायेन शक्यः तस्य च व्युत्पत्तिवैचित्र्यात्सादृश्यसंसर्गेण तद्धर्मावच्छिन्न एवान्वयः अत एव पुत्रीयति मातुमित्यादौ शा
तुकर्मके तादृशे पुत्रकर्मकस्य संबद्धेनस्य न सादृश्येनान्वयः विभिन्नरूपावलीढयोरन्वयैकत्वं च सामर्थ्यविरहात् न हि स्वरूपमेव
वात्र सादृश्यं अत एव वादेऽन्योपि समासे साकर्माधारक्यचि क्यङ्‌ कर्मकर्त्रोर्णमुन्यत्र द्वितोऽपेक्षिप् समासेऽपि कारिकयानिर्दिष्टा
सादृश्यवाचकलुप्तोपमायां तृतीयातिसुक् समरणे सावन्तः पुरीयतीत्यत्र उदाहृता अन्यथा क्यचः सादृश्यवाचकत्वेन दृष्टोपो
दाहरणमसङ्गतं भवेदित्याहुः वस्तुतस्तु पुत्रपदं पुत्रकर्मके निरूढा जपदं निरूढलाधिकरणे आचारे निरूढलाक्षणिकं तदर्थ उपमा
नोपमेयभावसंसर्गेण क्यजर्थ आचारेऽन्वेति अत एवोपमानात्कर्मण आचारेऽधिकरणाच्चेति वक्तव्यमिति सनशासनेक्यचू प्रकृ

ते रूपमानपदत्वं निरूढलक्षणालभ्याचारविशेषणकर्माधिकरणार्थकत्वं क्यचश्चाचारमात्रवाचकत्वेमुक्ते सङ्गच्छते संभवति च क्यचु
क्यङो रैकरूप्येणलाघवत्वेनेवाचारे शक्तिः क्यच्प्रकृत्याचारस्यतत्कर्मकतदधिकरणकाचारस्यैव प्रतिपादने सामर्थ्यमनशासनस्य
नियमार्थत्वात् एतेन वाहिकुरणकर्तृकाचारसदृशाचारकर्तृत्वपरिधकरणकाचारसदृशावाहकरणकाचारकर्तृत्वादित्यान्य
र्थेलाप्रयुक्तमाने रङ्करनिष्ठते रजो वाहीकरणीयति असौ समरदुधर्षो वाहनापरिधायति देवतीयाति विप्रेभ्यः क्रतुकर्मर
णिदीक्षितः प्रहर्षमुपेतः शत्रुं गीरश्रेक्षुपीयतीति प्रयोगा न साधवः किंतु रजो वाहीकरण इव तपति परिधनेव वाहनाप्रह
रति देवतेभ्य इव ब्राह्मणेभ्यो ददाति सुपादिवमिरेः पतनीत्यादिवाक्यानेवप्रयोक्तुं युज्यन्ते हंसीयति कोभिरित्पादौ हंसक
र्मकाचार एव हंसपदार्थः क्यजर्थाचारकर्मबोधकस्यात्मानमिति पदस्याध्याहारेण हंसमिवात्मानमाचरतीति वा क्वार्थो
लभ्यते अतएव क्यचि वाद्युपमेयासौ रति कारिकोपन्यस्तापाचै कोपमेयतूपमायाः पुरतो हरिणाक्षीणामेष पुष्पायुधी
यतीति काव्यप्रकाशोक्तमुदाहरणं सङ्गच्छते यत्तु आत्मधारणं भवतेरर्थः क्रियात्वेनाचार इति व्यवह्रियते तस्य चाधात्वर्था

न्तर्भूत आत्मा कर्म तत्र हि द्वितीयरणस्यापि हि कर्मानुवादिका द्वितीयास्तिमितमास्ति नस्यन्दतेरुत्पादे तथा च युध्या युधाभिन्ना
त्मधारणं युध्यायुधभावः क्यच् प्रकृतेर्थे क्यचोपिभावान्तरंभयोः सादृश्यं संसर्गः । तथा च युध्या युधाभिन्नात्मधारण
सदृशात्मधारणवति एजनिराजा युध्या युधीयतीत्यनेन बुध्यमानि आत्मानमिति पदं नापेक्ष्यते धातुनोक्तार्थस्य पदस्य प्रयोगान
र्हत्वात् यथा च धात्वर्थान्तर्भूते कर्मणि न कर्माख्यानप्रसक्तिः धातोरकर्मकत्वात् तथा प्रतिपादितमधस्तादिति तन्न भवत्यर्थस्य क
र्तरि कर्मसंज्ञाया अप्रवृत्तेः अपादानसंप्रदानकरणाधारकर्मणां कर्तुश्चोभयसंप्राप्तौ परमेव विधीयते इति न्यायाद् अन्यथा युध्या
युधं भवति मदन इति प्रयोगप्रसङ्गात् तारंशब्दायत इत्यत्र तारशब्दस्य तु कर्मसंज्ञा भवति अपवादकाभावात् अत एव श्येनरव
भवतीत्यर्थे भवत्यर्थस्वरूप आचारे क्यङ् प्रत्यय एव साधुः नहि श्येनायते इत्यत्र सकर्मकः कश्चिदाचारः क्यङा बोध्यते
अन्यथा श्येन इव गरुत्मान्तिपतत्विरा इत्यर्थे श्येनायते पतत्रिया इत्यापत्तेः ओजायते अप्सरायते विहायते विहस्यते ।
वेत्यादौ क्यङर्थे कर्माचारे ओजोभावो प्सरोभावो विहङ्गावेक्षास्त इत्येन प्रतीयते कर्तुः क्यङ् सलोपश्चेति सूत्रेण त

कर्तृकाचारल्लक्षकादुपमानबोधकात् परतः क्यङ् तस्मिन्ये प्रकृतेः सान्तप्रातिपदिकस्य सस्य लोपो व्यवस्थितवैकल्पिक इति व्याख्या
नवशेन सल्लोपादेः साधुतोपगमात् यदाहुः सकारस्य ङ्सन्नियोगशिष्टो लोपो व्यवस्थितः ओजसोप्सरसो नित्यमितरेषां वि
भाषयेति हरिणीवाचरति हरितायते श्येनीवाचरति एतायते रोहिणीवाचरति रोहितायते इत्यादौ क्यङ्मानिनोः परयोः स्त्रि
याः पुंवद्भावे स्त्रीप्रत्ययसन्नियोगेन वर्णादनुदात्तोपधात्तो न इति सूत्रशिष्टस्य नत्वस्यापि व्यपायात् यथोस्थितात्व हरितेत
एत: रोहितशब्दादयः अपत्ये हारितः पलाशा[illegible]लः श्येतः श्वेतः त्रयस्ताः श्वेताभागा यस्याः तादृशपाण्डुल्याः श्वाविद्धोम्नेतिवत्क
व्येन्येणपात्राल्यादिनोपगीतकुत्रातरणास्यन्तर्द्धातीति ग्रहस्सूदर्शनात् रोहितो लोहितो रक्त इति कोशात् वर्णवाचिनो
हरितरोहितैतल्लोहितशब्दानामनुदात्तोपधत्व वर्णानां तणतिनितान्तानामिति फिट्सूत्रेण सिद्धमित्यनुदात्तोपधवर्ण
वाचिभ्योऽपि सिद्धस्य रोहिणीशब्दस्य गुणवृत्त्या योगरूढ्या वा नक्षत्रविशेषे प्रवृत्तिः यदा रोहितायते इत्येव यदि तु ह
तः कर्मणि वसूर्हैः कर्तर्यपि नन्वप्रत्यये रोगिणादिकं हरिण इव रोहिणोपि प्रकृत्यन्तरं तदा हरिणायत इतीव रोहिणायत

इत्येवप्रमाणम् सपत्नीशब्दश्चतुर्विधः शार्ङ्गरवादिगणपठितात् ञगोहूढान्तात्सपत्नशब्दादुत्पन्नेन ङीना निष्पन्न एको भाषि
तपुंस्कः तस्मात् क्यङि तन्निमित्तके पुंवद्भावे सपत्नीवाचरति सपत्नायते द्वितीयस्तु समानः पतिः यस्या इति विग्रहे निष्पन्न
स्य बहुव्रीहेः सपतिशब्दस्य नित्यंसपत्न्यादिषु इत्यनेनानुशासनेन नान्देशे ऋन्नेभ्यो ङीविति सूत्रेण ङीपि कृते नित्यस्त्रीलिङ्गः
पतिशब्दस्य नोढ्वाचकतया स्त्रीभिन्नेतद्घटितबहुव्रीहेरप्रसङ्गात् एतादृशस्थले नेकसंख्यः समानपदार्थः संसर्गस्तु
पदान्तरोपस्थित एव समानपदेनोपस्थाप्यते समानोपमानयोर्दृष्टः अधिकरणभ्रान्तावेत्यादौ समानपदेनानेकनिरू
पितानां निवासत्वाधिकरणत्वभ्रान्तत्वादीनां प्रतिपादनात् समानः पतिरित्यत्राप्यनेकवोढपतिः प्रतीयते तत्परिणी
ताच बहुव्रीहेः स्त्रीत्वेङीप्यर्थः इत्यनेकस्त्रीवोढभिन्नवोढपरिणीतास्त्रीसपत्नीसमुदायार्थः रुक्मिणीसत्यभामायाः स
पत्नीत्यत्र पतिपदार्थे सत्यभामापरिणेतृत्वरूपध्यतार्थस्यान्वय इति रुक्मिणी रुक्मिण्याः सपत्नीति न प्रयोगः बहुव्री
हिरेवोक्तार्थत्वात् सीतायास्तु न प्रसक्त एव सपत्नीपदप्रयोगः अग सपत्नीवाचरतीति सपत्नीयते भाषितपुंस्का ३९

नामैव पुंवद्भावविधिप्रसङ्गात् तृतीयस्तु स्वामिपर्यायेण पतिशब्देन घटिते बहुव्रीहौ विभाषासपूर्वस्येत्यनेन गृहपतिर्गृहप
त्नी स्यादाविवसोपपदस्य पत्युर्नादेशो सतिसिद्धं भाषितपुंस्कः सपत्निर्दास इति प्रयोगात् ततः क्यङि सपत्नीयत इति प्रयो
गः नादेशस्य च्व्यधिकारविषयत्वेन पुंवद्भावे तदप्रवृत्तेश्चतुर्थः सस्य समानकस्य पत्नीति विग्रहे निष्पन्नः तत्पुरुषो नि
त्यस्त्रीत्वलिङ्गः तत्पुरुषस्योत्तरपदलिङ्गत्वनियमात् पत्नीशब्दस्तु पतिशब्दान्नक्ष्यार्थे पतिकर्तृकयागजन्यफलव
ति स्त्रीत्वस्त्रीप्रत्ययार्थबोधयत् नियतलिङ्ग एव पुमादौ तदर्थासंभवात् पत्युर्नो यज्ञसंयोग इति सूत्रस्य यत् साहि
त्येन पत्राधिकारस्तस्यां स्त्रियां पतिपदार्थे न विधायकत्वात् अत्रापि सपत्नीयत इत्येव प्रयोगः कुमारविक्रमं वीक्ष्य
से पेवचिततीरकासेनादानवसिंहानां शर्वरीशसुन्दरायते इत्यादौ शर्वरीशसुन्दर्या विवाचरति इति विग्रहे शर्वरीश
ब्दस्य न पुंवद्भावः क्यङ्परत्वाभावात् किन्तु सुन्दरीशब्दस्यैव पाचिकायत इत्यादावपि कोपधस्य पुंवद्भावनि
षेधो वाचनिकः एवं कष्टायत इत्यादौ तत्कष्टचिकीर्षायामुत्साहक्यङर्थे कष्टपदार्थस्य पापस्यान्वयः सगक

सत्रकक्षकृच्छ्रगहनशब्दानां पापपरत्वमित्यर्थः क्यङर्थे क्रमणे निरुक्तोत्साहस्वरूपे विशेषणं तेन सत्रायत इत्यतः पापायोत्सहत इति पूर्वसदृशो बोधः रोमंथं वर्त्तयतीत्यर्थे रोमंथायत इति प्रयोगे निगीर्णोद्गीर्णद्रव्यं रोमंथस्तस्य कर्मतया क्यङर्थे हनकर्मस्वरूपवर्णनो अन्वयः हनुचालनभिन्ने वर्त्यर्थे पाननिपातद्रव्ये च रोमन्थपदार्थे कीटो रोमन्थं वर्त्तयतीति वाक्यमेव प्रमाणं हनुचालन इति वक्तव्यमिति वार्त्तिकात् अपानद्रव्यस्य तु वर्त्तनं निगरणं संचयो वा वर्त्तयत्यर्थः तपस्यतीत्याहे रागप्राप्तस्य भोजनादेः परिहारस्तपस्तत्कर्त्तव्ये क्यङर्थेऽन्वेति संकल्पस्तु प्रत्यवायसाधनव्यतिरिक्तप्रतियोगिविषयणीचिकीर्षा अत एव परस्मैपदमानुशासनिकं वाष्पायते ऊष्मायते फेनायते इत्यादावुद्वमने शब्दायते वैरायते अभ्रायते कण्वायते सुदिनायते दुर्दिनायते मेघायते इत्यादौ करणे क्यङर्थे कर्मतया प्रातिपदिकार्थस्यान्वयः कण्वपापं सुखायते दुःखायते इत्यादौ वेदने क्यङर्थे सुखादेर्विषयतासामानाधिकरण्योभयसंसर्गेणान्वयः तेन परस्य सुखायत इति न प्रयोगः अस्रायते सुमनायते दुर्मनायते स्वर

मनायते· दुर्मनायते इत्यादौ प्रकृत्यर्थैकदेशान्वयश्चायमसो मनस्य वैमनस्याद्यः· क्यङर्थे भूतनञावस्वरूपायामुत्पत्तावाधे
यतया प्रकृत्यर्थस्तु अवच्छेदकतयान्वेति· एवं लोहितायति· लोहितायते· पटपटायति· पटपटायते इत्यादौ· लोहितश
ब्दस्य पटपटा न कार्यशब्दादेः क्यषर्थे उत्पत्तावन्वयः· यत्तु लोहितादिडाज्भ्यः क्यषिति सूत्रे आदिपदग्राह्यगणात्· लो
हितश्यामदुःखानि हर्षगर्वसुखानि च· मूर्च्छानिद्राकृपाधूमाकरुणानित्यचर्मणी इति परिगणनं तत्र लोहितादि
डाज्भ्यः क्यषूत्रवचनं भृशादिष्वितराणीति वार्त्तिकं विरुद्धं तेन हि वार्त्तिकेन लोहितशब्दस्य डाच्प्रत्ययान्तस्य क्यष्·
श्यामादिषु भृशादिमध्यपाठेन क्यङेव साधुरिति बोध्यते· तेन श्यामायतीति न प्रमाणं वा क्यष इत्यनेन विभाषा परस्मै
पदविधानात्· उत्पुच्छयते· विपुच्छयते· विपुच्छयते· परिपुच्छयते इत्यादौ णिङर्थे उत्क्षेपविविधक्षेपपरितःक्षेपे
पुच्छस्य संभाण्डयते· संचीवरयते इत्यत्र राशीकरणं भाण्डस्यार्जनं परिधाने च· चीवरस्य अनुलोमयतीत्यत्र रीज
र्थे अनुमार्जने लोम्नः· विपाशयतीत्यत्र विमोचने पाशस्य संवस्त्रयतीत्यत्र संच्छादने वस्त्रस्य· वितूस्तयतीत्य

त्र विघाते सूत्रपदार्थस्य जटाभूतकेशस्य कर्मतया· उपवीणयतीत्यत्रोपगाने वीणाया· अतिहस्तयतीत्यत्र अतिक्रमे
हस्तिनः· अभिषेणयतीत्यत्र अभियाने सेनाया· उपश्लोकयतीत्यत्र उपस्तवे श्लोकस्य· अनुकूलयतीत्यत्रानुघट्टने
कूलस्य करणेन तमान्वयः· अत एव धात्वर्थानन्तर्भूतकर्मकाणामुपवीणयतीत्यादीनां सकर्मकत्वं तेन उपवीणय
न्तिये गुणमर्णं नमति हस्तयति तेह्निवतेय उपश्लोकयति त्वां कृतान्नमभिषेणय म्लेच्छः· हंत कामविरामापविसयेह
सजेतकः· संज्वरछेदमचिरकृतेनलंकोनुतूलयेदत्याहे· हे स्त्रीवधेते गुणं वीणया उपवादयन्तितेः· हस्तिनासागरम
तिक्रामतियस्त्वां श्लोकैरुपस्तौति स सेनया कृतान्नमभियातीति अनलं तूलेन घट्टयेत् इति च वाक्यार्थनिष्पत्तये
भवन्ति कर्मप्रत्ययाः· वर्मणा सन्नह्यति संवर्मयतीत्यादौ तत्र ह्यपर्यायस्य णिचोकर्मकत्वात् कारणतयैवान्वयः· क
र्तरि वक्तृक समानाधिकरणः· ननु कर्मणि त्वकसमानाधिकरणः· उपवर्णितानां णिङ्णिचां च तन्तूपसर्गपूर्वकं
प्रातिपदिकमेव प्रकृतिर्न तु केवलं पुच्छादि। सूत्राद्विघाते संछादे वस्त्रात्पुच्छादितस्तथा· उत्क्षेपादौ कर्मणिणिस्तत

तद्व्ययपूर्वकात् वीणात उपगानेस्यात्तूलस्तिनोति क्रमेतथा · सेनातथाभियाने।लोश्लोका[illegible]प्यभिष्टुताविति भागुरिस्मृतेः ह
हलिंगृह्णाति हलयति · कलिंगृह्णाति कलयति · कृतंगृह्णाति · कृतयति इत्यादौ णिजर्थग्रहणे हलिपदार्थमहाहला
दे: सत्यापयति अर्थापयति · वेदापयति इत्यत्रापुक् सम्प्रमिश्या हृता णिजर्थे करणे आख्याने च · सत्यार्थवेदानां मुडयति
मिश्रयति श्लक्ष्णायति · लवणयति · व्रतयति। इत्यादौ णिजर्थे करणे मुंडादेः · हस्तयते · पादयते इत्यादौ णिङर्थे निरसने
ग्रविक्रेर्वर्णां कर्मत्वेनान्वयः · मुंडादेस्तत्करोत्यर्थे ग्रहणात्यर्थे कृतादितः · वक्त्यर्थे वसनादेः टोभ्यस्तन्निरस्यति इ
ति भागुरिभाषितात् · क्रशयति · म्रदयति · द्रढयति · स्थवयति · दवयति · नेदयति · साधयति · ज्याययति · प्रापयति · स्था
पयति · स्फापयति · द्रापयति · वृंदयति इत्यादौ णिजर्थे करणे · कृशाम्रदुदृढस्थूलदूरान्तिकबाढक्षुद्रप्रियस्थिरउ
दीर्घवृन्दारकाणां कर्मतयान्वयः · संकल्पितं भोजनमभोजनं वा व्रतपदार्थः · यथा पयः शूद्रान्नं वा व्रतयति इत्यत्र णि
जर्थव्यापारे तु कूलतया भोजनाभोजनयोर्भोजनद्वये यथासंख्यं पयःशूद्रान्नकर्मकत्वयोरन्वयः · क्वचिद्व्रा

तिपदिकार्थस्याख्यातार्थ एवान्वयः पाणिनिनाप्रयोजनं न विनोसार्थमु बृहस्पतस्य नित्यमश्रूयमाणस्य लङादेरिव
क्वचिदपिसाक्षाद्बोधकस्य व्याकरणेनाव्यादेरिवारोपितार्थः क्विपः पदसंस्कारमात्रप्रयोजनकस्य सार्थकत्वात् अ
न्यथानुबन्धानामपिसार्थकत्वप्रसङ्गात् व्याकरणेनुस्वार्थसदृशाचारलाक्षणिकस्य प्रातिपदिकतुल्यानुपूर्वीक
स्य शब्दस्य धातुसंज्ञामुपदिशति अतएव क्वचित् व्याकरणेपि क्विपः क्वचित् क्यङः क्वचिदिय एव लोपोनुशिष्य
ते तत्र धातुसंज्ञेभ्यः प्रातिपदिकेभ्यः तदन्यस्वरस्यानुदात्तानुबन्धत्वादात्मनेपदं यथावगल्भते क्लीबते हो
डते इत्यादौ अवगल्भक्लीबहोडपदार्थो नपुंसकभावसदृशो भाव आख्यातार्थे आश्रयत्वेनेति अवगल्भायत इत्या
दि क्यङि तु तदर्थेसादृश्येन प्रातिपदिकलक्ष्यस्वार्थाचारः अन्येभ्यस्तु प्रातिपदिकधातुभ्यः परस्मैपदमेव प्रमाणं
घट इव मालेव क विरिव ग्रामणीरिव विधुरिव वधूरिव पितेव र इव गौरिव ग्लौरिव भवतीति विग्रहे घटति
मालाति कवयति ग्रामणयति विधवयति वधवति पितरति रयति गवति ग्लावतीति प्रयोगदर्शनात् इत्यम ४२

वरणेव पश्चादवभवतीति विग्रहे दृढमतिराणानति·पर्यानतीति प्रयोगेतु नासिकाणस्योपधादीर्घ आनुनासनिकः·अन्येतु
एणपुरुषादिसमासे एणपदार्थः·स्वस्वामिभावेन पुरुषेऽन्वेतीति प्रातिपदिकयोरपि स्वार्थभेदान्वयोपयोगीन्याकां॰
क्षा·एवं ज्येष्ठामध्यमेत्यादौ स्त्रीप्रत्ययार्थपरिणीतास्त्रियां पुंसो ज्येष्ठमध्यमादेरन्वय इति स्त्रीप्रत्ययेपि प्रातिपदिके
ण सह तथाविधाकांक्षा भवतीत्याहुः·नञित्यम् नामव्यपेक्ष्यते लिङ्गप्रत्ययेनातिऽन्यपानद्धितेन निपातेन कृताधा
तुल्यत्वेन च·अतएवकाऽश्वाचटकैत्यादौ पञ्चविशेषेषु प्रातिपदिकार्थेषु [illegible]षयवकत्वस्वरूपस्य स्त्रीत्वस्य श
ब्दस्य वृद्धेत्यादौ शब्दधर्मेण वक्ष्यमाणेन स्त्रीत्वेनाविलीढत्वरूपापद्वाच्यत्वस्य लक्ष्यस्य पाण्डवभार्यासु मध्य
मासु भद्रेस्य मध्यमपदार्थे मध्यमपुरुषपरिणीते स्त्रीत्वस्यान्वयेन डाप्प्रत्ययः·बहुयज्वाकामेदकीत्यत्र बहुद
र्शिनीत्रावयस्य स्त्रीत्व सीमाग्रामस्येत्यादौ सीमानिरूढीशब्दस्वरूपवाच्यत्वस्यान्वये डाप्प्रत्ययो डित्वाट्टि
लोपे प्रयोजनकं न पाराप्पृथक् निर्दिष्ट आत्वे नैव शाक्तः·पचनीभार्या दृणिनीपालिनापञ्चीमियादित्यादौ श॰

कस्य स्त्रीत्वस्य · प्राची उदीची इत्यादौ प्रागादेः स्त्रीत्वाव्प्रतिपाद्यत्वस्य लक्ष्यस्यान्वये ङीप्प्रत्यय अनोदात्तत्वप्रयोजनः
घटोध्नी गोरित्यादौ घटपरिमितोधःसंबंधि स्वांगविशाकस्य स्त्रीत्वस्य इन्द्राणी वरुणानी इत्यादाविन्द्राभिन्नेन पुंसा संयुक्तादौ प्रातिपदिका
र्थे प्रकृतिविशेषसमभिव्याहृतस्य स्वस्वार्थे वा स्त्रीत्वस्य हिमानीत्यादौ हिमसंहतत्वस्यारण्यानी इत्यादावरण्ये महत्त्वस्य यवानी
त्यत्र यवे दोषस्य यवनानीत्यत्र यवनकर्तृके प्रातिपदिकलक्ष्ये लिपित्वस्य आचार्यानीत्यत्र आचार्यपुंयुक्ते आर्याणीत्यत्र वैश्य
त्वजातीयस्त्रीत्वस्य अर्धलिप्री च धौरित्यत्र लेपऽस्पृत्वस्य पाणिगृहीतीत्यत्र पाणिग्रहणकर्मणि भार्यात्वस्य उलूकपक्षी शाला उ
लूकपक्षी सेनेत्यादौ उलूकपक्षसदृशपार्श्वभागे तत्सदृशपश्चाद्भागे च स्त्रीत्वाव्प्रातिपाद्यत्वस्यान्वये ङीष्प्रत्ययः · आद्युदात्तस्व
रप्रयोजनकतया पृथगुद्दिष्टत्वेनैव वाचकः भद्रबाहूरित्यत्र प्रकृतिरूपार्थव्यक्तौ श्वश्रूरित्यत्र भार्याजनकरूपश्वशुरप
दार्थे करभोरूरित्यत्र करभसदृशोर्वर्थप्यविनि · संहतोरूरित्यत्र अतिव्यतिषक्तोरुद्वयसंवलिनि · कद्रूरित्यत्र नागमातरि स्त्रीत्व
स्यान्वये ऊङ्प्रत्ययः · शार्ङ्गरवी इत्यत्र शार्ङ्गरवत्वजातिमति नारीत्यत्र नृत्वजातिमति स्त्रीत्वस्यान्वये ङीन्प्रत्ययो नित्स्वर

४२

लाभप्रयोजनः · आवश्यत्वादेअवर्णत्वजातेः स्त्रीत्वस्यान्वये चाप्प्रत्ययः स्वाभेदप्रयोजनः इत्येवं प्रातिपदिकस्यार्थे स्वार्थस्यान्वये समर्था
टाप्प्रत्ययाः प्रातिपदिकं व्यपेक्षन्ते · ङवतिरित्यादौ तिरितिनिर्द्देशोपि पूर्वं स्त्रीत्वस्यान्वयेयोऽस्यः : एवं प्रथमादिविभक्तिरपि प्रातिपदिका
र्थान्वितलिङ्गमभिधत्ते · प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रेप्रथमेति सूत्रेण प्रथमायाः कंठतो द्वितीयादीनामन्यत्र हरणसामर्थ्येनालि
ङ्गवाचकतावगमात्। तच्चलिङ्गं त्रिविधम् · सत्वरजस्तमसामुपचयः पुंस्त्वमपचयः स्त्रीत्वं साम्यं च क्लीवत्वं सुपो वाच्यम् · अतएवोपच
यापचययोरविवक्षया सामान्येनपुंसकमिति प्रवादो घटते · तन्नितयमपि केवलान्वय्येव अर्थो व्यक्तिर्वास्त्विति सर्वत्रप्रयोगदर्शनादिति
पतञ्जलिः॥ तिस्रोजातयएवैताः केषांचित्समवस्थिताः अविरुद्धाविरुद्धाभिर्गोमहिष्यादिजातिभिरिति वाक्यपदीये भर्तृहरिः · श्म
श्रुत्याद्यवयवे समवेतप्राणित्वं पुंस्त्वं · केशसमवेतप्राणित्वं स्त्रीत्वं · तदुभयोरेकमात्राप्यसमवेतप्राणित्वं नपुंसकत्वं · यथायथं सुपां स्त्री
प्रत्ययानांशक्यं यत्र न बाधः · तत्र शाब्दत्वादिपरिभाषाविशेषविषयत्वस्वरूपं स्त्रीपुंस्त्वादिकं शब्दसंस्कारप्रयोजनकं शब्दशक्तिजनितया
तादृशशब्दवाच्यत्वं वार्थशक्तिजनितया भासते · इतियुक्तं पञ्चनास्तूपजैतेत्यादौ पण्डोपुंस्त्वादिकं निरुक्तमबाधितमेव सुपामर्थः ·
यत्र तु तद्बाधस्तत्र दारा इत्यादौ बहुवचनवत्साधुत्वमात्रार्थः तल्लिङ्गाभिधायिप्रयोगो न तु शब्दधर्मशाब्दबोधगोचर इति वस्तुगतिः

स्वएविशेषइवस्त्रीत्वंपुंस्त्वादिकंशब्दधर्मः सनसुपाभिव्यक्तोर्थविशेषस्य निर्णायक इत्यपिवदन्ति· एवंचैत्रः पचति पच्यते तण्डुल इत्यादौ तिङर्थः कर्तृत्वकर्मत्वादिकुथमान्तार्थेन्वेति· तथासुपाप्युपात्तासंख्या अङ्कानीत्यादौ तद्धितेनोपात्तमल्पत्वं· घटः पटश्चेत्यादौ निपातेनोपात्तंसमुच्चितत्वं· भोक्तुंकालइत्यादौ तुमुनःकृदुपात्तंभोजनार्हत्वं प्रातिपदिकार्थेन्वेतीति तत्तदाकांक्षाः स्वयंपरिकल्पनीयाः॥ ॥इतिमहामहोपाध्यायश्रीगोकुलनाथविरचितेपदवाक्यरत्नाकरेपरिभाषाप्रकरणम्॥ ॥ननुपाकविशेषास्वादितरसविशेषेदुग्धावयवैरारब्धेद्व्यणुकादौदुग्धे वर्त्तमानस्यदधित्वसामान्यस्य तद्धतोवाचकत्वं किमिकारान्ते किंयकारान्ते किंनकारान्ते किमिनन्ते दधन्शब्दे वर्त्तते· दधिपचय· दध्यानय· दध्नाक्रीड· धधानिरमस्वेति सर्वविधप्रयोगदर्शनेन सर्वत्रैववाच्यत्वानामाद्यव्युत्पत्तिसंभवात्· नचयकारान्तादिप्रयोगानामिकारान्तस्मरणद्वारकपदार्थबोधकत्वसंभवात्· दधीत्येववाचकं ननु दध्यदध्नादीति सांप्रतं[illegible]त्वस्यापिसंभवात्· नापिदधीतिप्रकृतिमङ्गीकृत्यव्याकरणेन नानाविधविकारप्रतिपादनात् विनिगमनाि[illegible]या। व्याकरणस्य प्रकृतिलाघवोत्प्रेक्षितप्रकृतिप्रत्ययादेशादेशिभावसहस्रव्युत्पा[illegible]दनतिःपत्रसाधुपदस्य

पारमार्थिकपदपदार्थसम्बन्धाप्रतिपादकत्वात् अन्यथा नानाविधानामनुबन्धानामागमानां नित्यमश्रूयमाणानां क्विवादिप्रत्यया
नामोणादिकानां च प्रकृतिप्रत्ययविभागानां तत्तदर्थशक्तिकल्पनप्रसङ्गात्· यदाह हरिः· उपायाः शिक्ष्यमाणानां बालानां·
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते इति यज्ञकर्मप्रयोगार्हनिष्पन्नशब्दव्युत्पादनार्थमाम्नायस्य च रक्षोहागम
लघ्वसंदेहप्रयोजनाय प्रवृत्तं व्याकरणं वध्यमेव प्रकृतिं कल्पयित्वा अनचि परे संप्रसारणविधिना दधिपयपे(
त्यादि साधयितुं क्षमते· न च फले विसंवदति· एवं देवो वनं पिता नदीत्यादौ विसर्गम[illegible]रलोपानामेकत्व
वाचकत्वमुतते: स्मारितस्य सोर्विपरीतं चात्र विनिगमकं कुत्रापि साधुशब्दे अप्रयुज्यमानस्य सुकारस्य वाचकता
याव्यवहारेण गृहीतुमशक्यत्वात्· न चादेशानां नानात्वादेकस्यादेशिनो वाचकत्वमिति युज्यते· व्याकरणभेदे
नससिरिरुप्रभृतीनामादेशिनामप्यनेकत्वात्· उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिता इति न्यायात्· किंच
विसर्गेण सुकारः· तेन चैकत्वं स्मरणीयमिति परंपराकल्पने गौरवात् विसर्गस्य स्मारकतयानुभावकत्वमुचि

नम्· तस्मात्साधुनि पदे प्रयुज्यमाना विकारा एव वाचकाः· तदाहुरभियुक्ताः· साधुशब्देऽन्तर्गता हि वोधका न तु ते स्मृताः· व्यवस्थिते व्यवहृते स्तद्धेतुन्यायतस्तथोति आदिना विसर्गादयः तावत्प्रथमोऽणत्वेनान्यथाकर्तुमशक्यतया व्यवस्थिता व्यवहारबलेन वाऽनेकधा तत्संगतिकाः येरेऽपि पदार्थवोधकस्यादेशिनः स्मारकतया क्लृप्तपदार्थवोधप्रयोजकभावाश्च आदेशिनस्तु व्याकरणभेदेन नानाविधा अव्यवहार्याः पदार्थावगमपूर्वमखिलैरनभिगतप्रतिसन्धयश्चेति वर्णस्फोटवादिनः· अत्रोच्यते· पाणिन्यादिभिरुत्प्रेक्षाया आदेशा इति कल्पिताः· तस्यवातिविषाणस्य लक्षिवादेः कल्पकता· ये केचिद्बोधकास्ताक्षात्केचिच्च विकृतिंगताः· त एव वाचकास्ते न त्वादेशाः शाब्दिकेप्सिताः· व्यवहारलाघवार्थं पाणिन्यादिभिरुत्प्रेक्ष्य प्रकृत्याद्यात्मना समारोपितसमभिव्याहाराः· वस्तुतः प्रकृतिसमभिव्याहारेण साधुशब्देषु अप्रयुज्यमानतयानुरुडागमसद्भावाल्लकारक्विवादयः न कस्याप्यर्थस्य वाचकाः· परिनिष्ठिततिवाद्यादेशनिष्ठां शक्तिमादेशिन्युपचर्यैव वैयाकरणा व्यवहरन्ति· अत एव परिनिष्ठित एजन्तपुरुषादिसमासस्यार्थवत्त्वाभावे लौकिके एजन्तःस्मपुरुषसुदृश्याकारके विग्रहे वाक्य आरोप्य प्रातिपदिकसंज्ञा प्राचीनसुपनिवृत्तिपरत्वदुक्त्यादि स

कार्यं निवर्त्तयन्ति एकार्थीभावसामर्थ्यवादिनः· अत एव लकारस्यावाचकतया तदादेशानां तिङो येपि आख्यातस्य
कर्तृत्वेन तु: कर्तरिशक्तिरिति वैषम्यमुपपद्यते· यथाहि वाचकतानवच्छेदकेन कृत्परिभाषागोचरत्वेनोपलक्षिते श
तृत्वादिना वाचके प्रत्यये कर्तरि कृदिति वाचकताग्राहकातिदेशवाक्यप्रवृत्तिः· तथा तिबाद्यादेशित्व विशिष्टे लकारे कर्तृवा
चकताविधिः· विशेषणमेवोपसंक्रामति विशेष्ये बाधात्· विशेषणमुपलक्षणीकृत्य विशेष्ये न विशेषणमुपलक्षणी
कृत्य विशेषणेप्यापूर्ववाक्यप्रवृत्तेरित्यवाचक एवौत्प्रेक्षिकलकारादयः: तिबादिषु प्रकृतिसमभिव्याहारज्ञाने ल
कारजनिता च पदार्थोपस्थितिः परस्परं सह कृत्यफलं जनयति पक्षस्यासंभव उक्तिकत्वात्· यादृशपदत्वसामा
नाधिकरण्येन समभिव्याहारबुद्धिः· तद्धर्मावलीढजनिताया एव पदार्थोपस्थितेः शाब्दबोधाङ्गत्वात्· अन्यथा पच
तिल[illegible]तिवाक्यात् लकारेण पचिसमभिव्याहृतास्ति पचन वाचक इति ज्ञानकालेपि तथा शाब्दबोधप्रसङ्गात्· पदाद्य
शत्वावच्छेदेन समभिव्याहारबुद्धिसज्जनिता पदार्थोपस्थितिः· शाब्दबोधाङ्गमित्यपि न आदेशत्वाद्यनुपस्थिताव

पिशाब्दबोधो स्यात्· न च तिपो वाचकत्वेपि यत्र तिपि समभिहारबुद्धिस्तत्रावाचकत्वनिर्णये तिवन्तरजनितायां पदार्थोपस्थि
तौ· तथाविधान्वयबोधप्रसङ्गादवश्यम्· नहि शब्दव्यक्तिभेदेन पदार्थोपस्थितेः कारणताभेद आनन्त्यप्रसङ्गादिति वाच्यम्· ति
प्त्वसामानाधिकरण्येन पचिसमभिव्याहारग्रहस्य तिप्त्वावच्छेदेन वाचकताग्रहजनितायाः कर्तृत्वाद्युपस्थितेश्च परस्य स
हकारित्वोपगमात्· तिप्त्वसामानाधिकरण्येन वाचकताग्रहेण तत्संस्कारेण वा जनितायाः पदार्थोपस्थितेरप्यङ्गत्वे प
चिसमभिव्याहृतं तिपदमिति विशिष्टज्ञानस्वरूपो वा बोधकजनितत्वमेव तत्र प्रवेशनीयम्। ये च टाङसिङसाघामनसाम
नसहत्वादेश्रूयमाणा अपि बोधकाः· तेषां घटेन घटात् घटस्येत्यादाविनात्स्यस्वरूपो विकारेण न वाचकः· अनेकशक्ति
कल्पनापत्तेः· विनिगमकानुशासनादिकस्मृतेरेव दधिशब्देपि कोषादिस्थशब्दस्यैव वाचकत्वेपि दधिन्शब्दस्य वाचकत्वावश्यं
भावेन विकृतानां स्मारकतयैव प्रयोगकल्पनाया न्याय्यत्वात्· प्रथमैकवचनं तु सकारस्वदेवस्तत्रगतः सइत्वादेश्रूयमाण
स्य सकारस्य वाचकताध्रौव्येन तदुपस्थापकतयेव विसर्गादिरूपप्रयोगसंभवात्· पाणिनिप्रणीतस्मृतेरेव विनिगमकत्वा ४६

त्‌· अनुवन्धास्तु सर्वत्र कात्यनिका एवेति न तेषां वाचककुक्षिप्रवेश इति दिक्‌: एवं केषांचित्‌ श्रूयमाणानामादेशिनां वाचक
त्वेध्रुवे तदादेशानां न स्मरणद्वारैवोपयोगः भवे केषांचित्‌ शक्तिभ्रमेण अपभ्रंशादिवद्वर्णविकारादप्यत्र यबोधोपपत्तौ
पदस्फोटवादिनो विनिरस्ताः तथा हि तेषां मते सुवन्तात्तिङन्ताच प्रकृतिः पदं तद्विशिष्टार्थवाचकं घटेनेत्यादिपदं करण
ताविशिष्टैकघटैकघटकरणतायां तत्कार्यतायां वा शक्तं ननु प्रकृतिप्रत्यययोः पृथक्‌ शक्तिः पदे कियती प्रकृतिः कि
यान्‌ प्रत्यय इत्यविभागेन घट इति प्रकृतिः एनेति प्रत्ययो वा घडिति प्रकृतिः एनेति प्रत्ययो वेत्यनिश्चयात्‌ बोधोद्यात्‌ तस्य
प्रमात्वे बाधकाभावात्‌ घटपद इत्यत्रैः शाब्दबोधानुदयेन घोत्तरटेरेकारोत्तरनकारैः आनत्वेन कारणत्वावश्यकत्वे तज्जनि
तपदार्थोपस्थितेरेव सहकारित्वौचित्यात्‌ अन्यथा इनादेशादेशात्वमजानतः टाजनितपदार्थोपस्थितिसहकारेण घ
टेनेत्यतः कलशकरणताशाब्दप्रसङ्गात्‌ घटेनेत्यानुपूर्वीविशिष्टपदत्वावच्छेदेन घटकरणताशाब्दजनकतास्मान्‌
स्य कारणत्वेन तत एव उपपत्तौ किमादेशिटाप्रभृतिजनितया पदार्थोपस्थित्या का चेतः पौरमितता शक्तिर्विशिष्टता

नकारणत्वात् · वस्तुतस्तादौ प्रकृतिप्रत्ययविभागस्य शास्त्रीयस्याप्यभावे न तत्रोक्तन्यायावगतिरवश्यमुपेयत्वे सर्वत्र पदे तथैव स्वी
कर्तुमुचितत्वाच्च · तदाहुरभियुक्ताः · अथादेशा वाचकाश्चेत्पदस्फोटस्ततः स्फुटः · घटेनेत्यादिषु नहि प्रकृत्यादिभिदा स्फुटा · वस्तु
नस्तादृग्विवेकेपि संप्रमोहो हि दृश्यते इति · अत्रेदं तत्त्वम् · घटेनेत्यानुपूर्वीविशेषविशिष्टे घटकरणत्वान्वयबुद्धिव्यतिरे
कप्रयोजकव्यतिरेकप्रतियोगित्वस्वरूपाकांक्षाज्ञानस्य घटपदजनिताघटस्मृतिरितरपदस्मारितटापदजनिताकारण
तास्मृतिश्चेत्युभयं सहकारि · न चानया काक्षया स्वार्थस्मारणद्वारा वाक्यार्थोनुभाव्यते · अपि तु साक्षादिति न स्यां शक्तिव्यप
देशोपयुज्यते · न चास्यामाकांक्षायां वाक्यार्थस्यानुप्रवेशोपि तु घटत्वावच्छिन्नप्रकारतानिरूपितकरणत्वविशेष्यताशालि
न्या बुद्धेः प्रमाभ्रमसाधारण्यात् · नापि तद्बुद्धिजनकतामात्रं तत् शक्तिरसंसर्गाग्रहादावपि वाचकत्वव्यवहारप्रसङ्गात् · अपि
तु संकेतविशेष इति प्रतिपादितं प्राक् तादृशमुच्यते · आनुपूर्वीविशेषेण सुप्तिङन्तात्मके पदे आकांक्षा गृह्यते · तन्नत्पदा
र्थान्वययोग्यताशक्तिस्तु तस्याभिन्नैव प्रकृतिप्रत्ययादिषु यथावृत्त्या स्मारितानामर्थानामन्वयो मिथः · वाक्यस्फोटवादिनस्तु ४७

साधुशब्दान्तर्गतशब्दानामेव वाचकत्वमुक्तमुक्त्याप्रतिपद्यमानाः हरेव विष्णोवेत्यादिवाक्यानामेव हरिसंबोध्यत्वत्वत्कर्तृका
शंसाविषयावनक्रियादिकं प्रति वाचकत्वमभ्युपगच्छन्ति · तथाहि · हरेवेत्यादौ न हरिशब्दो न वा संबोधनप्रथमा नावति कृतुर्न
लिप्श्रूयमाण इति न वाचकैः प्रकृतिप्रत्ययाद्यैरुपपत्तिः · नापि प्रत्येकपदस्फोटः अयुपदस्यास्फुटत्वादिति वाक्यस्यैव विशि
ष्टार्थवाचकत्वमवश्याभ्युपेयम् · आद्याच व्युत्पत्तिर्वाक्यार्थवाक्ययोरेव बालानामिति तदप्यत एव परास्तमिति समुञ्जी मते व
र्णस्फोटः पदस्फोटो वाक्यस्फोट इति त्रिधा · शाब्दिकानां मतं तत्राकांक्षाशक्तिरिति भ्रमः घटेनेत्यानुपूर्वीज्ञानस्य घटत्वावच्छिन्न
प्रकारतानिरूपितकारणत्वावच्छिन्नविशेष्यताकबुद्धित्वं तद्वान्तरधर्मविशेषो वा जन्यतावच्छेदकः · सत्यामपि घटपदजनि
तायां कलशकरणत्वस्य तोण घटेत्यादितो समस्तानुपूर्वीकादिनु घटेत्यादितश्च तथाविधशाब्दबुद्ध्युदयात् · नन्वेवं विपरीतव्युत्प
न्नानां भिन्नुयटेत्यादितः शाब्दबोधे घटेनेत्यादितश्चाप्रतिपत्तेरनुपपत्तिरिति चेत् · अत एव घटेनेत्यानुपूर्वीविशेषावच्छेदेनाकां
क्षाज्ञानमपि कारणम् · तदेव च व्युत्पत्तिरित्युच्यते आकांक्षानु घटपदज्ञानत्वावच्छिन्नकारणतानिरूपितस्मरणवृत्तिकार्यता

वत्वीठस्मरणप्रकारीभूतधर्मावच्छिन्नाविशेष्यतातन्निष्ठानवच्छिन्नप्रतियोगितावच्छेदकताकाभावत्वावच्छिन्नंप्रतिप्रयोजकस्याभा
वस्यप्रतियोगित्वंतथायादृशानुपूर्वीविशिष्टज्ञानत्वावच्छेदेनतज्ज्ञानत्वावच्छेदेनवागच्छतेतादृशानुपूर्वीविशिष्टपदज्ञानाद्घटे
याकरणतेतिशाब्दबुद्धिस्त्वघटेभवतिचघटोघटपदवाच्यइतिसंस्कारसहकृतस्यघटपदज्ञानस्यतादूप्येणजनकतायांघटइति
स्मरणत्वस्यजनकतावच्छेदकस्यघटकतयाघटत्वमपिप्रकारितयाजन्यतावच्छेदकमेवंघटपदस्यकारणतात्वंघटत्वावच्छिन्न
प्रकारतानिरूपितकारणतात्वावच्छिन्नविशेष्यताव्याप्तिःस्वरूपेणयस्याभावस्यप्रतियोगितावच्छेदिकासतद्विशेष्यताविशिष्टानु
भवत्वावच्छिन्नाभावोघटेनेत्यानुपूर्वीज्ञानत्वावच्छिन्नप्रतियोगिताकाभावेनप्रयोज्यतेकारणतावच्छेदकधर्मावच्छिन्नाभावस्यका
र्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावंप्रतिप्रयोजकत्वात्घटत्वावच्छिन्नप्रकारतानिरूपितकारणतात्वावच्छिन्नवि
शेष्यताविशेषः।पुनरखण्डोज्ञानविषयभेदेनतद्भेदेप्रमाणाभावात्अखण्डधर्मःस्वरूपतस्यावच्छेदकोनविषयनिरूपका
धन्तर्भावेनगौरवात्-यश्चसाविशेष्यताविशेष्यादिभेदेनभिद्यते·कथमन्यथाकारणतात्वेनजगदवगाहिनोभ्रमात्कारणता
सामान्यावगाहिन्याःप्रमितेर्वायत्किंचित्कारणतावगाहिनिघटीयाकरणतेतिग्रहेसौवैचित्र्यंसर्वगेवज्ञानेनादृशविशेष्यताया

जगन्निरूपितत्वाद्घटीयत्वाभाववन्निरूपितघटीयत्वप्रकारित्वावच्छिन्नविशेष्यताकत्वेन सर्वत्रभ्रमप्रसङ्गादिति घटेनेत्यानुपूर्वीज्ञान
स्यघटप्रकारितानिरूपितकरणताविशेष्यितात्वेनैव स्वाजन्यतावच्छेदिकाआनुपूर्वीज्ञानाभावप्रयोज्याभावप्रतियोगितावच्छे
दिका चातो घटत्वादेर्विशिष्याप्रवेशे प्रयोज्याभावप्रतियोगितावच्छेदको धर्मो दुर्वचः घटपदजन्यस्मृतिप्रकारत्वादेरव्यावर्त्तक
त्वात् जन्यताप्रतियोगितयोरवच्छेदककुक्षावप्रवेशात् न च घटपदजन्यस्मरणप्रकारावलीढप्रकारितानिरूपितघटपदजन्यस्म
रणप्रकारावलीढविशेष्यिताकान्वयबुद्धित्वेन समं सामानाधिकरण्यमेव प्रयोज्याभावप्रतियोगितया निवेशनीयं न तु तदवच्छिन्न
त्वमिति वाच्यम् घटेनेति घटकर्मतां घटादिति घटकरणतां बोधयतीति व्युत्पन्नस्य पुंसो घटेन घटेति पदद्वयजनितस्य घट
टापाकर्मताकरणताचेति बोधस्याभावं प्रति घटेनेत्यानुपूर्वीज्ञानाभावस्य प्रयोजकत्वावगमेऽप्यसङ्घटाघटादिपदजनितपदा
र्थोपस्थितिसहकारेण घटकरणताज्ञानाद्वप्रसङ्गादिति भाव्यते त[illegible]घटपदजन्योपस्थितिप्रकारत्वोपलक्षिते च धर्मेऽवच्छेद
कताप्रकारविधयावगाहमानमुपलक्षणधर्मेषु च न तदनव[illegible]मानमाकाङ्क्षाज्ञानं हेतुरिति वक्तव्यम् प्रकारीभूतस्यावच्छेद

कतायां प्रथमारायामुदासीनधर्मसामानाधिकरण्यग्रहणे वाधकाभावात् तथाच घटपदजन्यस्मरणप्रकारत्वत्वस्यवच्छेदकतानिरूपकाव
च्छिन्नत्वत्वस्यवच्छेदकतानिरूपकप्रकारत्वत्वस्यवच्छेदकताप्रतियोगिनी याशपदजन्योपस्थितिप्रकारत्वत्वस्यवच्छेदकतानिरूपकाव
च्छिन्नत्वत्वस्यवच्छेदकत्वप्रतियोगिनी या विशेष्यत्वत्वस्यवच्छेदकतानिरूपकानुभवत्वावच्छिन्नप्रतियोगिताकोऽभावो घटेनेत्यानु
पूर्वीज्ञानत्वावच्छिन्नप्रतियोगिताकाभावप्रयोज्य इति व्युत्पत्तिः घटपदजनिताकर्मांशोपस्थितिरादेशस्मारितत्वप्रभृतिजनिता
करणतापदार्थोपस्थितिश्च घटीयाकरणतात्वस्यान्वयवुद्धौ कारणं सर्वनामशब्दानां बुद्धिप्रकारत्वोपलक्षितधर्मे प्रवृत्तिनिमि
त्तत्वमिव पदजन्यस्मरणप्रकारत्वोपलक्षितेच्छाकांक्षानिरूपकत्वमपि सुग्रहं भवतु वा घटपदज्ञानत्वावच्छिन्नकारणतानि
रूपितकार्यतावच्छेदकविषयतानिरूपिता या घटपदज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकविषयताविशि
ष्टानुभवत्वाभावप्रयोजकीभूताभावप्रतियोगित्वमाकांक्षा ननु तादृशानुभवत्वावच्छिन्नकार्यतानिरूपितकारणत्वमेव प्रवेश्य
तामलमभावयोः प्रयोज्यप्रयोजकभावोन्तर्भावेणेति चेत्स्यादेवं यदि घटेनेत्यानुपूर्वीज्ञानस्य घटकारणतायो चरणान्वयानुभ

वत्वंजन्यतावच्छेदकं स्यात् नच तथा व्यभिचारात् किंतु घटेनेत्यानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिकज्ञानत्वं घटकरणतान्वयबु
द्धित्वावच्छिन्नाभावेऽस्तु घटेनेत्यानुपूर्वीज्ञानाभावेन प्रयोज्यते यद्धर्मावच्छिन्नोत्पत्तिप्रयोजकसामग्रीकुक्षौ यद्धर्मावच्छिन्नस्य
कारणस्यानुप्रवेशस्तत्तदवच्छिन्नाभावयोः प्रयोज्यप्रयोजकभावाभ्युपगमात् घटीयाकरणतत्यन्वयबुद्धित्वेन
घटेनेत्यानुपूर्वीज्ञानघटपदेनटापदेन च जनिताकलनशाब्दकरणत्वयोरुपस्थितिः घटेनेत्यानुपूर्वीविशिष्टनिरूप्याकां
क्षाज्ञानं चेति संभूय प्रयोजकमतो भवत्यसंसर्गाग्रहादिजन्यतावच्छेदकघटकरणतागोचरान्वयबुद्धित्वावच्छिन्नप्र
तियोगिताकाभावं प्रति घटेनेत्यानुपूर्वीज्ञानाभावः प्रयोजकः भवति च घटपदज्ञानत्वेन टापदज्ञानत्वेन च पदार्थोपस्थितिद्वारा
जनकतायां कलनशाब्दत्वावच्छिन्नकारणतात्वावच्छिन्नविषयताकानुभवत्वंजन्यतावच्छेदकमथवा तत्रापि घटपदज्ञानाभा
वप्रयुक्ताभावप्रतियोगितावच्छेदकत्वादिकमेव विषयताया निवेशनीयम् इत्थं च घटपदज्ञानव्यतिरेकप्रयोज्याभाव
प्रतियोगितावच्छेदकविषयतानिरूपितेन टापदज्ञानव्यतिरेकप्रयोज्याभावप्रतियोगितावच्छेदकेन विष

पत्वेनानवच्छिन्नप्रतियोगिताकस्यान्वयबुद्ध्यभावस्यप्रयोजकोघटेनेत्यानुपूर्वीज्ञानाभाववत्त्वस्येवमाकांक्षाबुद्धेः कारण
त्वमवसेयम्· एतादृशीं चाकांक्षां यदि स्तुवन्ति ३ ज्ञानाद्घटितेतिशब्दाद्यभिप्रायस्तदा भ्रममूलत्वं नहि अस्यामा
कांक्षायाद्रूप्येणपदार्थानामभिनिवेशः घटप्रतीत्यादीनांशक्यलक्ष्यार्थसहस्रभेदेनकारणताव्याहत्यप्रसङ्गात्·
स्यादेतत्· घटेनेत्यानुपूर्वीविशिष्टघटपदार्थतापदार्थान्वयबोधजनकज्ञानविषयत्वस्वरूपायामाकांक्षायां गृ
हीतायामपिनविशेषणविशेष्यभावप्रतिनियमसंभवः· तथाहि· यजेतेत्यादावाख्यातेनप्रकृत्यर्थविशेषणत
याविधेस्ताद्विशेष्यतयाभावनायाइव घटेनेत्यादौ तृतीययापिप्रकृत्यर्थप्रतिविशेषणतया संख्याया विशेष्यत
याचकरणत्वस्यबोधोजन्यते· तत्रकरणत्वविशेषणकघटविशेष्यकान्वयबोधंकोवारयेत्· नहि घटेनेत्यानुपू
र्व्यास्तृतीयार्थविशेषणकबुद्धौनसामर्थ्यं· संख्याया अप्यविशेषणत्वप्रसङ्गात्· नचार्थभेदेनाकांक्षाभेदम
नुमन्यतेभवान्· नचासंसर्गाग्रहजन्यतावच्छेदकघटप्रकारककरणत्वविशेष्यकानुभवत्वावच्छिन्नोत्पत्तिप्र ५०

योजकसामग्र्यामेव घटेनेत्यानुपूर्वीज्ञानस्यानुप्रवेशो ननु तथाविधकरणत्वप्रकारकघटविशेष्यकान्वयानुभव
त्वावच्छिन्नोत्पत्तिप्रयोजिकायामिति वाच्यम् · कस्यचिदन्यथाप्युत्पन्नस्य घटेनेत्यतोपि करणं घट इति बोधात्त्यस्या
घटेनेत्यानुपूर्वीज्ञानस्य तत्सामग्र्यामनुप्रवेशेनावश्यकत्वात् · एवं घट एक इति घटीयमेकत्वमिति बुद्धिद्वयेपि घटे
नेत्यानुपूर्वीज्ञानस्य प्रयोजकत्वमावश्यकमिति पदार्थविशेषान्तर्भावेन घटेनेत्यानुपूर्वीविशिष्टे घटविशेषि
तकरणताबोधसामर्थ्यमेव शक्तिः सैव च ज्ञाता घटीया करणतेत्यन्वयबुद्धावुपयुज्यत इति पदस्फोटवादिनि
गर्व इति चेत् उच्यते सामान्येन प्रकृत्यर्थः प्रत्ययार्थविशेषितः आकांक्षायां निविशते न तद्रूपतया इयं घटेनेत्या
नुपूर्वीज्ञानत्वावच्छेदेन घटपदज्ञानजन्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितकरणतात्वावच्छिन्नविशे
ष्यताशालिबुद्धिजनकताग्रह एव स्वाव्यवहितोत्तरोत्पत्तिकज्ञानत्वावच्छेदेन कारणमिव मापियत्पदार्थसहस्र

भेदेनकारणतावाक्रन्याभावप्रयुक्तलाघवसंभवात्· एतादृशाकांक्षाग्रहेण शाब्दबोधे जननीये टापदजन्या काचिदिनपदशक्तिभ्रमजन्या कारणतोपस्थितिः सहकारिणीति न तयोराकांक्षाभेद एतादृशाकांक्षाबुद्धिसहकृतमानुपूर्वीविशेषज्ञानं घटप्रकारिकाकरणताविशेष्यकां विलोमाकांक्षाज्ञानसहकृतकरणताप्रकारिकाघटविशेष्यकां बुद्धिं जनयति· यस्तु द्विविधामप्याकांक्षां प्रतिसंधत्ते स घटीयाकरणतेति करणं घटश्चेति द्विधापि बुध्यत एव· यत्तु तृतीयार्थकर्तृकरणत्वादिभेदेन नाकांक्षाभेदो गौरवात् किंतु वाचकतावच्छेदकभेदेन टापदस्य हि संख्याया मेकवचनत्वेन करणत्वादेस्तु तृतीयात्वेन वाचकता तथा च घटेनेत्यानुपूर्वीविशेषावच्छेदेन घटपदत्वविशिष्टज्ञानप्रयोज्यप्रकारतावच्छिन्नतृतीयात्वविशिष्टज्ञानप्रयोज्यविशेष्यताकानुभवजननसामर्थ्यस्वरूपाकांक्षा ग्रह्यमाणा सती तृतीयात्वविशिष्टस्मारितकरणत्वकर्तृत्वादिविशेष्यकमनुभवं जनयति· यस्तु विलोमाकांक्षां प्रतिसंधत्ते स कर्तृकरणत्वादिविशेष्यतयैव प्रतिपद्यते· एवं घटपदार्थविशेष्यतानिरूपितैकवचनत्वविशिष्टार्थ ५३

प्रकारताकबुद्धिसामर्थ्यं घटेनेत्यत्र गृहीतं घटविशेषणतयैकत्वं भासयति तथा यज्ञेनेत्यादौ लिङ्त्वेन विधेयत्वेन भा
वनायां शक्तिरिति शक्यतावच्छेदकभेदादेव व्युत्पत्तिभेदो न तु तद्भेदे कुत्रापीति मतं तच्चिन्त्यम्। ननु घटपदार्थान्वित
टपदार्थबोधकं घटेनेति पदमिति साकांक्षायामपि घटान्वितकरणताबोधकत्वाभाववत् घटेनेति पदमित्यसामर्थ्यविशे
षनिर्णयसम्भवात् तदा घटीयाकरणतेत्यन्वयबुद्धिप्रसङ्ग इति घटेनेत्यानुपूर्वीविशेषावच्छेदेन घटान्वितकरणता
बोधकत्वज्ञानमेव कारणं वाच्यं· विशिष्टबोधकत्वमेव च विशिष्टशक्तिः· न च भवतु विशिष्टबोधकत्वज्ञानं कारणं न
चेयं शक्तिरि तज्ज्ञानस्य पदार्थस्मरणद्वारा कारणत्वाभावादिति वाच्यम्· एतज्ज्ञानकारणत्वावत्रपकत्वस्मारकवृ
त्तीनां एतद्ग्राहकत्वेनैवोपक्षयात्· प्रकारान्तरेण पदानामनुभावकत्वग्रहेनपेक्षणीयसंनिधीनां वृत्तिज्ञानज
नितपदार्थोपस्थितीनामन्यथासिद्धत्वात्· एवं च प्रत्ययप्रकृतिसमुदाये विशिष्टानुभावकत्वमेव शक्तिः
तद्ग्रहः साक्षादेवान्वयबोधोपयोगी न पुनरर्थस्मरणमपेक्ष्यते वाक्यार्थस्यापूर्वत्वेन तद्ग्रहे चास्मरणासम्भ

वात्प्रकृत्यर्थान्वितप्रत्ययार्थस्यापूर्वत्वेपि घटप्रकारतानिरूपितकरणताविशेष्यकबुद्धित्वावच्छेदेन पदजन्य
त्वस्य ग्रहतया न शक्तिग्रहानुपपत्तिः। वाक्यार्थमगृहीत्वापि तद्दर्शनज्ञानसंभवादिति पदस्फोटवादोदुरू
पवाद इति चेत् आस्तां तावदुपात्तेषां विशिष्टार्थबोधजनने सामर्थ्यमेव शब्दस्य विशिष्टशक्तिः। तथापि वाक्यार्
थ इव वाक्यार्थबुद्धिस्थले नानुभूयते तथात्वकारणत्वस्याज्ञानेप्यन्वयधीर्भवा। यस्य पुंसो घटान्वितकरणताज्ञा
नं वा नानुभूतचरं तस्यापि घटेनेत्यादिवाक्यात् घटान्वितकरणत्वानुभवस्य सर्वानुभवसिद्धतया न विशि
ष्टशक्तिर्वाचकसमुदायग्रहमात्रा विशिष्टानुभाविका। यत्र घटपदज्ञानिते घटकरणतयोरुपस्थितिस्तत्र घ
टेनेत्यादिसमुदायत्वावच्छेदेन घटपदार्थान्वितया पदार्थबोधकत्वं प्रतिसंधाने चाविद्यते तत्रासत्यपि समूहघ
टकरणताबोधकत्वबाधबुद्धिर्न प्रतिरुणद्धि जनयत्येव घटेनेति पदं घटकरणताबुद्धिं यदाहुर्नैत्वविदितसा ५२

मर्थ्योग्निर्नेहहतिपचतिचेति · भवतु वा घटेनेत्यादिपदत्वावच्छेदेन घटकरणताबोधकत्वाभावबुद्धिविरहो निरुक्तसामग्रीघट
कः तादृशबुद्धिमदन्यबुद्धौ तादृशबुद्धेः प्रतिबन्धकत्वात् सत्यां घटेनेतिपदे घटकरणताबोधकत्वाभावबुद्धौ घटेन करणेनेत्यु
भयविधानुपूर्वीज्ञानसत्त्वे घटकरणताबुद्धिः सामग्र्यन्तरादेव · ननु प्रथमान्तघटपदस्य तृतीयान्तस्य पटपदस्य च विषये सामान्य
तोव्युत्पन्नस्य पुंसो घटेनेति पदं श्रुत्वा घटकरणताप्रमितिरनुभवसिद्धा · नच तत्र घटेनेत्यानुपूर्वीज्ञानत्वावच्छेदेन घटपदार्था
न्वितटापदार्थबोधकत्वं प्रतीतिचरमिति तुल्योनुयोगः अथादन्तात्प्रातिपदिकाट्टाकारस्येनमादिना शब्दानुशासनेनादन्तप्राति
पदिकानंतरिनेनत्वावच्छेदेनादन्तप्रातिपदिकार्थान्वितटापदार्थबोधकत्वं बोध्यते · स च यादृशानुपूर्वीकादन्तप्रातिपदिकानन्तर
मिनपदं तादृशानुपूर्वीकपदार्थतावच्छेदकधर्मविशिष्टान्वितटापदार्थतावच्छेदकधर्मविशिष्टबोधकमित्याकारो बोधोपच्छ
दस्याभावाददन्तप्रातिपदिकत्वेनाखिलानुपूर्वीविशेषानखिलानांश्चपदार्थतावच्छेदकधर्मान्बुद्धिविशेषविषयत्वावच्छेद
कत्वादिकमुपलक्षणीकृत्य विषयीकरोति · तज्जनितस्मृतिसहकृता विशिष्यपदार्थोपस्थितिः घटेनेत्यानुपूर्वीविशेषावच्छे

Nepal Sanskrit University, Balmeekr Campus, Kathmandu

देनपदान्वितकारणताबोधकत्वमपिबो[illegible]यति. एवंचैवतदादिशब्दानांप्रयोगजनकबुद्धिविषयेलतावर्त्तमानत्वेचस्मारकशक्तिः
सुग्रहा तत्तत्पदप्रयोगकारणबुद्धिविषयतोपलक्षितधर्मवत्तितच्छब्दस्य तद्धर्मप्रयोगाधिकरणतावच्छेदकत्ववत्त्वाचात्तरतत्त
च्छब्दत्वादिधर्मवत्तितच्छक्तिः. शक्तिरतएवपदंबुध्याप्रयुक्तोपितच्छब्देनघटस्य. नचैकस्मिन्कालेप्रयुक्तत्वे:पदंकालान्तर
स्यवाचकंनवातत्कालीनो[illegible]र्थबोधः शक्तिधर्मानन्यः शक्तिग्रहस्तुसामान्योपलक्षितविशेषावगाहीसर्वोपहारेण.तथा
हितत्पदत्वलक्षणोधर्मवान्तरतत्ताशोपलक्षितानांतत्पदत्वव्यक्तीनांधर्मितावच्छेदकीकृत्यतत्पदप्रयोगोपधायकबुद्धिवि
षयत्वेअधिकरणत्ववत्त्वाचात्तरतत्तात्वोपलक्षितधर्मविशिष्टबोधकत्वावगाहि[illegible]:फलतस्तत्पदत्वावच्छेदेन
तत्पूर्वविशिष्टवाचकतामेवावगाहतेसंकेतशक्तिपक्षेप्ययमेवप्रकारः शरणी[illegible]रणीयएवमवगतेसामान्योपल
क्षितविशिष्टेषुवाच्य[illegible]चकभावेप्रत्यक्षादिनाचोपस्थितेतत्तत्पदत्वतत्तच्छक्तित्वादिनावाच्येवाचकेचोपलक्षणध
र्मोपहारेणतत्पद[illegible]क्तौमनसातत्पदार्थबोधकत्वंप्रतिसंधीयतेवाचकत्वोपनायिकायाःस्मृतेःसत्वात्सामान्यसंके

तद्ग्रहस्यवाच्यवाचकभावसन्देहापनायकतयैवोपयोगः·बुद्धिविषयत्वावच्छेदेनतत्पदप्रवृत्तिनिमित्तत्वेघटत्वत्वावच्छे
देनबुद्धिविषयत्वेचगृहीतेघटत्वंतत्पदप्रवृत्तिनिमित्तंनवेत्यादिशंकापनयात्·यदिचतत्पदव्यक्तिर्घटत्वविशिष्टबुद्धि
जनिकेतिशक्तिग्रहोभिमतः·तत्रचविरोधिनीतद्व्यक्तिर्घटत्वविशिष्टबोधिकानवा·घटत्वंतद्व्यक्तिजन्यप्रतिपत्तिप्रका
रोनवेत्यादिशंकानसामान्यसंकेतग्रहापनेया·सामान्यधर्मानवच्छादितविशेषविषयकेसंदेहेतथाविधनिर्ण
यस्यैवविरोधित्वादित्युच्यतेतदाभवतुबुद्धिविषयत्वाद्युपलक्षणधर्ममोषेणतत्पदव्यक्तित्वघटत्वाद्यवगाहिनी
सामान्यशक्तिग्रहप्रभवाशक्तिस्मृतिरन्वयबोधाङ्गंतच्छब्दत्वावान्तरतन्मात्वस्यतच्छब्दप्रयोगजनकेबुद्धिविष
यत्वस्यवाचकतावच्छेदकयोरुद्बोधकाभावादस्मरणेनवच्छिन्नतत्पदव्यक्तित्वघटत्वयोरवगाह
नेनसापदव्यक्तिर्घटबोधिकेतिस्मरणसंभवादितिचेत्·हंतैवंघटेनेत्यानुपूर्वीविशेषावच्छेदेनघटकरणता
बोधकत्वमपिमनसासुग्रहमित्यनुभाविकाशक्तिःस्मारकसमुदायवृत्तिरन्वयबोधाङ्गंस्मारकशक्तिरनुट

भावकत्वानुपपत्तिरिति पक्षस्य च साधीयानिति चेदत्राहुः· अनुभवस्मरणयोस्तुल्यप्रकारताकत्वेन कार्यकारणभावादवच्छिन्न
प्रकारतानुभवादवच्छिन्नप्रकारताकस्मरणमनुपपन्नं· न चानुपूर्वीप्रभृतिविशिष्टं वस्तु सामान्येन प्रतीयते· प्रतीतं वा विशिष्टत्वेन स्म
र्यते मनस्त्वसति विशेषदर्शने प्रायेण बाह्यार्थसंज्ञापकमेवेति सामान्येन[illegible]ोदन्तप्रातिपदिकार्थान्वितस्वपदार्थबोधकत्व
मेवाकाङ्क्षा· सा च प्रथमतोनुशासनेनादन्तप्रातिपदिकप्रकृतिकत्वावच्छेदेन प्रतिपाद्यते· पश्चात्तु घटेनेत्यश्रुतचरसमभिव्याहारं
श्रणोति तदातनशादन्तप्रातिपदिकसमभिव्याहृतेन पदत्वं प्रतीत्यानुशासनातिदेशाद्वाक्यार्थस्मरणे घटेनेत्यादिपदत्वावच्छेदेन
निरुक्तामाकाङ्क्षामुपमीते मनसा वा निश्चिनुते विशेषदर्शनसत्त्वात्· अदन्तप्रातिपदिकार्थत्वं तु अत्वावच्छिन्नमुख्यविशेष्यता
शालिपदज्ञानजन्यस्मरणप्रकारावलीढत्वं दशरामज्ञानादित्यादेः पदार्थस्मरणायोगात्· चरमवर्णमुख्यविशेष्यकोऽविच्छि
ष्टपदघटस्वार्थस्मारकः· नन्वेवं घटेनेति पदमदन्तप्रातिपदिकार्थान्वितस्वपदार्थबोधकमिति बुद्धावपि घटपदं नादन्त
प्रातिपदिकमिति निर्णये घटेनेति पदं न घटपदार्थान्वितस्वपदार्थबोधकमित्यवधारणा वा सत्यां घटपदस्य पदजनितायां

घटकरणत्वयोरुपस्थितो घटीयाकरणेनेत्यन्वयबुद्धिप्रसङ्ग इति चेन्न घटपदमदन्तप्रातिपदिकमिति बुद्धेरपि तत्र सहकारि-
त्वाभ्युपगमात् अन्यथा घटपदोत्तरैनत्वावच्छेदेनादन्तप्रातिपदिकानन्तरितेनत्वादिस्वरूपावच्छेदकधर्मनाभावाद्याकांक्षाया
एवदुरवधारणत्वापत्तेः एतादृशाकांक्षा प्रातिपदिकत्वेनोपस्थितेँम घटपदेनज्ञानितां घटार्थोपस्थितिं तत्पदज्ञानितां करणतोप-
स्थितिं चासाद्यजननीयं शाब्दबोधं घटेनेति पदस्य घटपदार्थान्वितटापर्थबोधकत्वादिबाधबुद्धेर्न विरुणद्धि इदंपदमिथिन्नीं
मदीयशाब्दबुद्धेर्जनकमिति प्रतीतिवत्फलकारणयोरेकतरस्याप्यविघटनात् परं प्रातिपदिकत्वाद्यनुपस्थितिदशा-
यामपि घटेनेत्यानुपूर्वीविशिष्टज्ञानात् शाब्दबोधदर्शनात् अपरमेप्यस्ति सामग्रीद्वयं यत्र घटपदार्थान्वितटाप-
दार्थबोधकत्वस्वरूपा घटान्वितकरणताबोधकत्वस्वरूपा चाकांक्षा यथायथमवगाहमानाभ्यां ज्ञानाभ्यां घटि-
ते तयोरेव क्रमान्निरुक्तबाधद्वयं परिपंथिसकविधएव लिङ्गान्वयव्यतिरेकिणां नानाविधव्याप्तीनामिव तुल्या-
नुपूर्वीकेपिपदेनेकविधाकांक्षाणामपि ज्ञानं हेतुः व्यतिरेकव्याप्तिग्रहविरोधित्वेनानुपसंहार्य इवाकां-

ष्याविशेषपरिपाट्योर्नां घटकरणतावोधकत्वस्वरूपाकांक्षाज्ञानघटितायां सामग्र्यां नानुप्रवेशो न हि विशिष्टवोधकत्वे ज्ञानेप
दार्थस्मरणविलंवेन विलंवो मानाभावादतएववसन्तसादावविदितप्रकृतिप्रत्ययविभागोपिपुमान्सम्वन्धवोधकत्वमनुसं
धायतथाप्रमिमीते इति चेदभिनवोयमांत्रिकस्फोटवादः·घटेनेत्यानुपूर्वीविशेषावच्छेदेन घटत्वावच्छिन्नप्रकारतानिरू
पितकरणतात्वावच्छिन्नविशेष्यताकवुद्धिजनकत्वग्रहे पदजन्यपदार्थोपस्थितेरभावे घटकरणतायाः पूर्वानुभूतत्वस्म
रणमेव न तु अनुभवः पूर्वमननुभवे तु पदस्य मूकीभाव एव·ननु तादृशसामर्थ्यज्ञानघटिता भिन्ना सामग्री कल्प्यते गो
त्वादिति वस्तुगतिः। अतएव स्फोटवादिनस्तु·कत्व[redacted]गत्वादिनोपलभ्यमानावयवोध्वनयो वा न वाचकाः
तदभिव्यङ्ग्यः स्फोटस्तु वाचकः सचावयवत्रावेदएकोद्रव्यविशेषः शब्दस्वरूप एकमिदं पदमेकं वाक्यमेकोयं
थ एको वेद इत्याद्यनुभवसाक्षिकोवश्यमभ्युपेतव्यस्तन्निष्ठा एव जातयः· पदत्ववाक्यत्वग्रन्थत्ववेदत्वादयः व
र्णसमुदायेनैव पदादिव्यवहारोपपादने तन्मात्रातिरिक्तपदस्याप्यस्वीकारप्रसङ्गः सच स्फोटो वर्णानां

नित्यत्वाश्रयविनाशाभावात्· नित्यएवसमवेतद्रव्यारंभविनाशित्वनियमेमानाभावात् कादिशब्दानांवायुविशेषः स्फोटस्यच
चरमवर्णप्रत्यक्षमभिव्यंजकम्· अपेक्षते चपदस्फोटाभिव्यंजनेघटादिवर्णमालायामर्थसंगतेवाक्यस्फोटाभिव्यंजने
पदानामाकांक्षायाग्रन्यस्फोटाभिव्यंजनादेवाक्यानामेकवाक्यतापन्नत्वस्यचग्रहः· पदस्फोटस्तुपर्यायभेदेननभिद्य
तेसमवायिभेदेपिद्रव्याभेददर्शनात् यथाचपटभीरूपेतरस्वस्यचित्रस्यावयवस्थैर्नीलपीताभ्यांरक्तश्वेताभ्यामन्य
तरस्याभिव्यंजनंतथाएकस्यघटप्रतिपादकस्यस्फोटस्यक्वचिद्घटवर्णमालयाक्वचित्कलशवर्णमालयाभि
व्यंजनंनविरुध्यते· तदुक्तंवाक्यपदीये। यथामणिकृपाणादौरूपमेकमनेकधा। तथैवध्वनिषुस्फोटएकएवहि
भिद्यतेइति· यद्वाप्रतिपर्यायंभिन्नएवस्फोटः· अतएवघटकलशयोरेकंपदमितिनव्यवहारः· अस्तुवाप्रत्येकपर्या
याभिव्यंजनीयोवर्णमालायामसमवेतएवस्फोटः· तेनवर्णानामस्थिरत्वपक्षेयौगपद्यासंभवात् स्फोटारंभ
स्यानानुपपत्तिः· भवतुवावोपदेवोक्तानुगतव्यवहारसंख्यापदत्ववाक्यत्वमहावाक्यत्वादयोजातयएव॥

घट[illegible]पटत्वादिकमपि जातिरेव· घटत्वादि जातेर्वाचिका जातेर्वाच्यतायामिव वाचकतायामपि प्रकृत्यादिलाघवसंभवात् न
दोषः॥ शक्यत्व एवत्राक्तत्वे जातेर्लाघवमीक्षतोमिति वर्णव्यक्तयस्तु वाचकजातेरभिव्यंजकतयैव वाक्यार्थबुद्धौ तु प्रयुज्य-
न्ते न तु साक्षात्· अवाचकशब्दत्वे च ध्वनय इति व्यवह्रियते· तदुक्तमभियुक्तैः। अनेकव्यक्त्यभिव्यंग्या जातिः स्फोटः इति
स्मृता। कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिता इति। न चैवं स्फोटस्य जातिरूपत्वे तस्य ब्रह्मत्ववादविरोधः·
जातेर्ब्रह्मातिरिक्तानभ्युपगमात्· तदुक्तं। सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ। सत्यं यत्तत्र सा जातिरसत्या
व्यक्तयो मताः इति· वाक्यपदीये तु सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थि-
ताः। तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते· सा नित्या सा महानात्मा तामाहुस्त्वतलादयः इति प्रदर्शितं तद्व्यवहारद-
शायामुपेक्षणीयम्॥ ॥इति स्फोटनिरासः॥ ॥तत्र वाचकशब्देषु प्रकृतिप्रत्ययाः इति पाणिनेः परिभाषा। प्रकृ-
तिर्द्वेधा। प्रातिपदिकं धातुश्च। सुपः स्त्रीप्रत्ययस्तद्धितमिति त्रिधा प्रातिपदिकप्रकृतिकाः प्रत्ययास्तिङ् कृदिति द्विधा ५६

धातुप्रकृतिकाः। तत्र सुपः किंलक्षणाः कतिविधाः किमर्थाश्चेति प्रस्तूयन्ते। स्वौजसस्सूत्रेण विहिताः प्रत्ययाः सप्तधा पुनः। त्रिभिस्त्रिभिर्लब्धास्तेषामन्वर्थाः प्रथमादयः॥ स्वौजसमौट्छ्टासित्यादिसूत्रेण प्रातिपदिकात्परे विहिता एकविंशति प्रत्यया आद्यन्तवर्णग्रहणेन सुप् इति संज्ञायन्ते। तेषां समुदायापन्नानां लब्धा विभक्तयः प्रथमाद्वितीयादिरवरणत्वयोगात् प्रथमा विभक्तिरिति क्रमेण सप्त व्यवह्रियन्ते एकैकस्य चलत्वस्यावयवास्तिस्रो भवन्ति एकत्वद्वित्ववहुत्वानां क्रमेण प्रातिपदिकाः। विभक्तीनामवयवाः प्रत्येकं सुस्त्रयस्त्रयः। एकैकस्या विभक्तेस्त्रीणि त्रीणि वचनानि तत्राद्यमेकत्वं द्वितीयं द्वित्वं तृतीयं वहुत्वमभिधत्ते। सप्तकानुगताधर्मा नत्र भासेयतस्त्रयः। अतः सुत्वादिनैतेषां संख्यावाचनेष्यते। तेषां वचनानामेकत्वादिविशेषवाचकत्वं सुत्वादिना न तु स्वमौट्प्रभृतिसप्तकानुगतधर्मेण तस्याननुगतस्यानतिप्रसक्तस्य नघोर्नियमतो ज्ञायमानस्य दुर्लभत्वात्। एकवचनादिपरिभाषा विशेषविषयत्वाज्ज्ञाने स्वादिश्रवणमात्रादेकत्वावगमात्। अन्यधर्मं पुरस्कृत्य वाचकत्वग्रहं प्रति। अन्यधर्मावलीढस्य नाकांक्षा सहकारिणी।

प्रकृतेः स्वादिसप्तकतिवादिषट्कसाधारणैकवचनत्वावच्छिन्नस्यैकत्ववाचकत्वग्रहजनितेन पदार्थस्मरणेन जन्यमानान्व
यबुद्धिं न सुत्वावच्छेदेन प्रातिपदिकस्याकांक्षत्वबुद्धिर्जनयितुमर्हति। यद्धर्मसामानाधिकरण्येनाकांक्षाप्रतिसंधानम्। तद्धर्मा
वच्छिन्नवृत्तिज्ञानजनितपदार्थोपस्थितेरेव शाब्दबोधाङ्गत्वात्। अन्यथा सुत्वावच्छेदेनैकत्ववाचकत्वाभावग्रहदशायां सु
वत्तरजनितएकत्वस्मरणे घटएकइति शाब्दजननप्रसङ्गात्। सुत्वावच्छेदेनैकवचनत्वादिग्रहस्यापि कारणत्वाभ्युपगमे गौरवा
त्। ननु व्याकरणेन सुत्वावच्छेदेनैकवचनत्वादिकं ग्राहितमपि निश्चोत्रोपस्थितेन सुत्वेन सावैकवचनत्वं गृह्यते। तत्सामाना
धिकरण्येन घटपदाकांक्षा तदवच्छिन्नवृत्तिज्ञानेन चैकत्वं स्मार्यते इति सूपपादो घटएकत्वान्वयबोध इति चेत्। एवं सत्य
मरमारभ्यदिवनात्पर्यंतं कोषपठितानां नाम्नां तद्रूपपठितत्वस्वरूपानुगतधर्मावच्छिन्नैरेव देवतावाचकत्वसंभवात् पर्या
याणां प्रत्येकवाचकत्वानुपपत्तिः। कोषकारेण स्वपठितत्वादिर्न नित्यसंकेतविषयो भवितुमर्हतीति चेत् पाणिनिपरिभाषित
त्वादिरपि न तथा स्यात्। नन्वमरादेः संकेतग्राहकेन कोषेणानुपूर्वीशक्तिवृत्तिधर्मो नोपस्थापितो यदवच्छेदेन देवतावाचक

त्वंप्रतीयते। द्व्येकयोर्द्विवचनैकवचने इतिसूत्रंतुएकवचनपरिभाषाप्रवृत्तिनिमित्तानुगतधर्मावच्छेदेनएकत्ववाचकत्वंबोध
यतीतिचेत्‌ स्यादेवम्‌ यदिपाणिनीयपरिभाषायामनुगतेननिमित्तेनप्रवृत्तिः स्यात्‌ नत्वेवं तथाहि प्रत्याहाराणांवत्‌,
श्रूयमाणप्रत्येकवर्णवृत्तिभिरकारत्वादिभिरेवधर्मैरकारादिषुप्रवर्तन्तेनतावदन्यतमत्वादिभिः अतएवअकारइकप्र
भृतिभिः शास्त्रेरूपस्थापिताअकारोदीर्घप्लुतावपिबोधयन्तीतिनकुमारीआस्तेइत्यादौअचिपरेइकोविकारोयुज्यते। तथा
हि। इकशब्देनइत्वेनह्रस्वमात्रवृत्तिधर्मेणोपस्थितइक्त्वेनबाधकस्याभेदाभिन्नस्वरसाधारणजात्यवच्छिन्नवाचकेन
दीर्घादयोपिस्मार्यन्ते। द्विरेफपदस्मारितेनभ्रमरपदेनषट्चरणइकपदेनैववास्ववाच्यवाच्यत्वरूपाजहत्स्वार्थलक्ष
णयाऽष्टादशभेदाउपस्थाप्यन्ते। इकपदस्यह्रस्वभिन्नेपरिभाषितत्वाभावात्‌। आदिरन्त्येनसहेतेत्यनेनमाहेश्वरसू
त्रेपरिपठितह्रस्वानामेवप्रत्याय्यत्वाभ्युत्पादनात्‌ अणुदित्सवर्णस्यचाप्रत्ययइत्यनेनापिअणाद्यसाधारणधर्मेण

सवर्णग्राहकत्वमुच्यते। अन्यथाह्रस्वशब्दोपात्तानामणामपितथात्वप्रसङ्गात्· नचश्रोत्रोपस्थितानामणामेवसवर्णग्राहक
त्वंनतुशब्दोत्तरस्मृतानामितिवाच्यम्· इकपदोपात्तानामप्यतथात्वप्रसङ्गात्· नचइकारोपस्थितिकालेऽष्टादशासाधारणजातेरुप
पस्थितत्वात्तयासामान्यलक्षणयाऽष्टादशानामप्युपस्थितिर्नतुह्रस्वानामष्टादशासुशक्तिरित्यत्राणुदित्सूत्रस्यतात्पर्यमितिवाच्यम्।
एवंसतिह्रस्वपदानुपस्थितेसुखस्यार्थानन्वयप्रसङ्गात् इकप्रभृतिनाप्रत्याहारेणह्रस्वमात्रवृत्तिधर्मावच्छिन्नशक्तेनाष्टादशासाधारणध
र्मावच्छिन्नोपस्थित्यसम्भवात्· ननुमाहेश्वरसूत्रपठितेषुह्रस्वेषुदीर्घादिसाधारणाअपिजातेःश्रोत्रोपस्थितत्वात्तस्याएवप्रत्येकवर्णानां
मिणादिप्रत्याहाराणांचप्रवृत्तिनिमित्तताबोधकमणुदित्सवर्णस्येतिसूत्रंनियमार्थम्। नानाजातीनांश्रोत्रोपस्थिततयातदेकतरपरि
च्छेदकत्वादितिचेदेवमपिश्रोत्रानुपस्थितानितावदन्यतमत्वादीन्यादायपरिभाषाप्रवृत्तेरसम्भवात् एवंसुप्प्रत्याहारेऽपिसुत्वादिनै
वबोधकोननुनिमित्ताजोरणानितरांश्रोत्रोपस्थितानांवर्णानांतच्छब्देनपरामृश्यतान्येकवचनद्विवचनबहुवचनान्येकशइत्यधि
कृत्यसुपइतिसूत्रंप्रत्येकधर्मावच्छिन्नानामेकवचनादिपदवाच्यतांग्राहयतियेनरूपेणैकवचनपरिभाषाविषयत्वग्रहस्ताद्रूप्ये ५८

णाएकवचनशब्दादुपस्थितेसावेकत्ववाचकत्वमाहद्व्येकयोर्द्विवचनैकवचनेइतिसूत्रंकदाचिदेकवचनपरिभाषाप्रवृत्तिनिमित्तत्वेनस्व
रूपसतोपलक्षणेनानुगतीकृतेष्वेकत्वत्वादिषुयुगपदेकवाचकतावच्छेदकत्वंग्राहयेदितिनवाक्यभेदः।वस्तुतोद्व्येकयोरित्यतिदेशवाक्यमेकव
चनपरिभाषाविषयत्वोपलक्षितेधर्मिरूपैकत्वत्ववाचकतांबोधयतएकवचनपरिभाषाविषयः।सुपितिसुत्वावच्छेदेनोपलक्षणधर्मवत्ताग्रहसह
कारेणसुत्वावच्छेदेनैकत्ववाचकतामुपमापयतिननुसाक्षात्त्वेनावच्छेदकधर्मपरिच्छेदकमतएकवचनपरिभाषाणामनेनानुग
तप्रवृत्तिनिमित्तकत्वेपिनक्षतिः एकत्वमेकवचनैःसदृशान्तरवर्जितमाआख्यायतेनहिद्वाभ्यांपशुभ्यामिज्यतेशिवः पशुना
रुद्रंयजतेइत्यादौकर्मार्थकतृतीयायाएकवचनेनसजातीयनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकमेकत्वमुच्यते सा
आत्यंचयागव्यक्तिकर्मपशुत्वेन तथाचयस्यांयागव्यक्तौयत्पशुकर्मस्यान्वयस्तद्यागपरोनतद्यागव्यक्तिकर्मपशुनिष्ठान्यो
न्याभावप्रतियोगितानवच्छेदकैकत्वमेकवचनार्थः। तेननद्विपशुकर्मकोरुद्रंसंप्रदानकोयागः यागव्यक्तिकर्मपशुत्वव्यापकै
कत्वव्यक्तिनिरूपितसमवायसंसर्गेणएकत्वंपशोप्रकारइतितत्त्वम्। एवंद्वित्वंसजातीयान्तरवृत्यंविभक्तितः प्रतीयतेस

रस्वत्यान मेषैर्यजनं त्रिभिः। द्विवचनैरपि सजातीयानिष्ठान्योन्याभावप्रतियोगितानवच्छेदकमेवाद्वित्वं प्रत्याय्यते· अन्यथासा
रस्वतो मेषो भवतु इत्यत्र त्रिभिर्मेषैः सरस्वतीदेवताकयागस्य विधानार्थावोधे[illegible]तु वैगुण्यानापत्तेः। सिद्धान्ते तु मेषकर्तृकभवनाक्षि
प्तायां यस्यां भावनायां सरस्वतीदेवतकयोर्मेषयोः कर्मतयान्वयः· तद्भावनाकर्मपशुनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकं द्वित्वं
द्विवचनाविधेयं वहुपशुकर्मकयागभावनायां विरुध्यते इति द्वाभ्यां क्रतुसाद्गुण्यं न तु त्रिभिः॥ जसादिभिस्तु त्रित्वादिर्वहुत्वत्वेन वोध्यते·
गच्छन्ति वाहा इत्युक्ते कतीति प्रश्नदर्शनात्· वहुवचनानां नु वहुत्वत्वं जात्या प्रवृत्तिनिमित्तेन त्रित्वादौ शक्तिः। ननु त्रित्वत्वादि
नानानार्थतापत्तेः। त्रित्वादीनां ताद्रूप्येण वहुवचनाद्वोधोपगमे वाहा गच्छन्तीत्युक्ते कतीति प्रश्नानुपपत्तेः। शाब्देहि संख्या
विभाजकत्रित्वत्वादिधर्मे संख्यात्वावान्तरधर्मजिज्ञासाविरुद्धात्। प्रयोक्तृपुरुषजिज्ञासाविषयसंख्यात्वावान्तरधर्मवद्वि
शिष्टशक्तस्य कतिशब्दस्य निर्विषयकत्वेनावोधकत्वात्· प्रायेण प्रकृतेरर्थे सुवर्थवचनान्वयः। क्वचित्तदेकदेशेऽपि ता
त्पर्यादनुसन्धानात्। द्रव्याश्रिता गुणाः कर्माणीत्यादौ वहुत्वस्य सौमित्री वासुदेवावित्यादौ द्वित्वस्य गगनं भगवानित्यादौ

एकत्वस्य सुपा स्मारितस्य वचनस्य संख्यायाः प्रकृतमुख्यार्थ एवान्वयः ननु तद्दिक्कदेशे द्रव्यत्वादौ बहुत्वस्य सुमित्रापुत्रत्वादौ द्वित्वस्य
शब्दस्वरूपेण गगनत्वे समग्रैश्वर्यादिस्वरूपे भगवत्त्वे चैकत्वस्यान्वयायोग्यत्वात्. प्रामाणिकं चेदं तेन पदाद्विभान्ति पूज्यपादा इत्यादौ
पूजायामनिर्धारितविशेषस्य वा भेदबहूनां कृष्णानं कृत्वा दाक्षिणे कृष्णत्रयेपि मित्यादौ बहुपदार्थैकदेशे बहुत्वत्वावच्छिन्नलिङ्गित्वे ब
हुत्वत्वे न त्रित्वपर्यवसितस्य स्वरव्ययं स्वर्गो नाकत्रिदिवत्रिदशालया इत्यादौ तत्पदवाच्य लाक्षणिक स्वर्गादिपदार्थैकदेशे स्वर्ग
पदार्थे चतुष्ट्वादिपरिणतस्य बहुत्वस्यान्वयेपि न क्षतिः। अत एव वामकरेण नवकुशधारणं कोशे च स्वर्गादिपदं न स्वरूपप
दं वाच्यवाचकभावस्य लेशतोप्यप्राप्तेः कोशस्वारसं भवात्. स्वः पदवाच्यं स्वर्गादिपदवाच्येरभिन्नमिति बोधस्यैवाभ्युपेयत्वा
त्. अत एव शब्दानां पर्यायत्वमप्यर्थतः प्राप्यते। स्वर्गनाकादीनां तु भेदाभेदौ दोषाभावे न द्वन्द्वः समासः। अत एव भेदाख्यानाद्य
न द्वन्द्व इति प्राथमिकी प्रतिज्ञाप्येतादृशस्थले उपयुज्यते. स्वरूपपरतानुपदानुपस्थितेसुगुणोस्तु तदन्वय इति मतस्यात्यन्तम
संभवदुक्तिकत्वात्. पुष्पवन्तौ नासत्यावित्यावित्यादौ तात्पर्यवशाद्धस्तेयाजोत्योर्विभागाद्द्वित्वान्वयः। साधर्म्यवैधर्म्याभ्यां त

त्वेतानमित्यत्रसाधर्म्यवैधर्म्यत्वयोर्नीलघटयोरभेदइत्यादौनीलत्वघटत्वयोर्गोर्दोग्रामःद्वौदेवावित्यादौत्वनन्वितएवद्विवचनार्थः
नित्यद्विवचनान्तत्वेनानुशिष्टस्यगोपदस्यार्थेतदेकदेशेचद्वित्वविशिष्टेद्वित्वेचद्वित्वस्यान्वयायोगात्.पशुनारुद्रंयजेत.वायव्यं
श्वेतमालभेतेत्यादौपश्वादावेववेदाःप्रमाणमित्यादौपदार्थैकदेशेप्रमाणत्वएवतात्पर्यवशादेकवचनार्थस्यान्वयः.संप
न्नोव्रीहिःसंपन्नाव्रीहयइत्यादौजात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामितिसूत्रेणानुशिष्टैकवचनस्यबहुवचनस्यचा
र्थएकत्वंजातावेवविंशत्याद्याःसदैकत्वेसर्वाःसंख्येयसंख्ययोरितिकोशेणानुशिष्टस्यविंशतिर्ब्राह्मणाइत्यादौवेकवचन
स्यार्थःसंख्यायामेकपदार्थैकदेशेऽन्वेति.यत्रतुविंशतित्वसंख्यायामेवबहुत्वान्वयोविवक्षितस्तत्रबहुवचनमपिप्रमाणम्.
असंख्याताःसहस्राणियेरुद्राअधिभूम्यामित्याम्नायेतिस्रःकोट्योऽर्द्धकोटीचतीर्थानांवायुरब्रवीदितिपुराणोक्तिमेकयैववि
शत्याबाहुभिस्त्वंविकत्थसेपत्रपरवणनाराचैश्छिन्नपंक्तिविंशतीरिति.लोकेचप्रयोगदर्शनात्.शतानिचपंचेत्यत्रश
तशब्दोऽनेकपर्यायस्तदर्थैकदेशेऽनेकत्वेदशत्वादौबहुत्वान्वयः।अविवक्षानत्वयोर्वासंख्यायायत्रनतादृशे.वाक्येऽपिप्रा

त्तिपदिकाद्धातोरेकवचः स्मृतम्· यत्रद्वाल्लरोनतः पततिग्रहं संमार्ष्टीत्यादावुद्देश्यगता संख्यानविवक्षिता यत्रगौश्चैत्रेणस्थीयतेइत्यादावा
ख्यातोपात्तसंख्यान्वययोग्यः प्रथमान्तपदार्थोभावनान्वयीनदृश्यते तत्रापि ब्राह्मणायहादिप्रातिपदिकात्स्याधातोश्चएकवचनप्रयो
गः प्रायेणयुज्यते विभक्तिविनाकृतायाः प्रकृतेरसाधुतयाकरणकर्मभावनार्थानादायतृतीयाद्वितीयादिप्रयोगस्यावश्यकत्वेनप्रथ
मोपात्तस्यएकवचनप्रथमपुरुषादेस्त्यागायोगात्· उक्तासिकाआस्यन्तेहतशायिकाः शय्यन्तइत्यादावपिभाष्यकारप्रयोगत्रापि
तमेववहुवचनानांसाधुत्वम्· उक्तासनंसदृशासनमुक्तासिकाहतशयनंसदृशंशायनंहतशायिकातयोस्तादात्म्येनधात्वर्थान्वि
तयोः सुबुपात्तस्यत्वेकारोपात्तयोः कर्तृकर्मणोर्भावनान्वयिनः प्रथमान्तार्थस्यवाऽभावेनतिङुपात्तस्यचवहुत्वस्यानन्वितत्वा
त्· एकवचनमित्येवसूत्रंनत्वेकस्मिन्नेवैकवचनमितिनैकत्वाद्यविवक्षायामपिसामान्यत; प्राप्तमेकवचनंद्व्येकयोर्द्विव
चनैकवचनेइतिविशेषसूत्रेणद्वित्वबहुत्वविवक्षायांबोध्यतेइत्यपिकल्प्यतामिति ननुगगनपदार्थैकदेशस्यशब्दस्यबहुत्वविव
क्षायांगगनानीतिप्रयोगप्रसङ्गः· यदिचसुबुत्पत्तिबहुत्वेनपदार्थैकदेशान्वयीतिमतंतदाकथंवामेबहुनकुशानकृत्वेत्य
त्रबहुत्वेबहुत्वान्वयः। अन्यथानवकृसाधारण्यानुपपत्तेः धर्मिणिवहुत्वविशिष्टेनबहुत्वान्वयः घटोघटौइतिवन्निराकांक्षा

पदे
त्वात् कथं वा सहस्राणि इत्यादौ सहस्रत्वे पूज्यपादा इत्यत्र पूजायां वा बहुत्वान्वयः। कथं वा द्वन्द्वपदार्थैकदेशेषु स्वर्गादिष्विति चेदु
च्यते· उपसर्जनत्वादेवात् पदार्थो यत्र गच्छति तस्मिन्नर्थैकदेशेपि बहुत्वस्यान्वयः· सुपा गगनपदार्थे शब्दो न प्रधानमर्थः। बहु
शब्दस्य तु संख्येव संख्येयं भक्तिः· अत एव बहुषु बहुवचनमिति संख्यामेव ~~[illegible]~~न तत्प्रयोगः। बहुवचनस्य संख्येयवाच
कतायाः सर्वतंत्रविरुद्धत्वात्। एवं विंशतिसहस्रशतादिशब्दा अपि संख्यामेव प्राधान्येनाभिदधते· द्रव्यवाचिशब्दसमाना
धिकरणास्तु बह्वादयो लक्ष्यार्थोपसर्जनीभूतेपि स्वशक्यार्थे सुबर्थबहुत्वान्वयं बोधयितुमीशते· एवं हृदर्थोपसर्ज
नीभूतपूजि'तात्वर्थे स्वं रूपं शब्दस्याशब्दसंज्ञेत्यादिग्राहितसंगतिके स्वर्गशब्दस्वरूपादौ च न बहुवचनार्थान्व
यः· गुरुत्वगुणयोरैक्यं तादात्म्यं दृश्यते जसोः। गुणसौरभगन्धानामभेद इति दर्शनात्॥ द्वन्द्वगर्भपदार्थैकदेशे
ष्वाह्वं बहुत्वयोः। अन्वयो युज्यते किं वा साधुत्वाय विभक्तयः। गुणसौरभगन्धानामभेद इत्यत्र भित्वमेवोपसर्जनी
भूतासु जातिषु· यदि बहुत्वान्वयस्तदा द्वन्द्वे भिन्ने न स्युस्त्वाजिः· न चेदापो गृहाः सिकता वर्षाः सुमनसो प्सरसो लाजा

दृष्पादाविव साधुत्वार्थकमनन्वितस्वार्थमेवेदृशस्थले बहुवचनं एकत्वं द्वित्वमप्यर्थो जसादेरनुशासनात् आहैकवचनं द्वित्वमाह द्विवचनं बहून् । यत्रजास्यान्वितं एकत्वं विवक्षितं तत्र बहुवचनं विशेष्यपारतंत्र्यप्रयुक्तम् । एवमहं ब्रवीम्यावां ब्रूव इत्यर्थे अन्यतरस्यां वयं ब्रूम इति प्रयोगात् अस्मदर्थान्वितमेकत्वं द्वित्वं च यूयं कुरुथेत्यत्र युष्मदर्थान्वितमेकत्वं द्वित्वं च बहुवचनार्थः पुनर्वसुः पुनर्वसू वा विशाखा विशाखे वा नक्षत्रमिति छन्दसि द्वित्वमेकवचनार्थः ॥ लोके तु पुनर्वसुविशाखाशब्दो नित्यद्विवचनान्तो पुष्यवन्नासत्यवद्वर्तते तिष्यश्च पुनर्वसू चेत्यादिविग्रहे तिष्यन्नखिभित्यपुनर्वसू लिङ्गपुनर्वसू इत्यादि द्वन्द्वस्य द्विवचनं बहुत्वमभिधत्ते इति तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यमित्यनुशासनात् अत्र बहुवचनस्य विशिष्योपादानादेतादृशस्थले तिष्यपुनर्वस्विति क्लीबे एकवचनान्तः प्रयोगोप्यस्तीति अवगम्यते येन ज्ञायते सर्वो द्वन्द्वो विभाषयैकवद्भवतीति । तत्र तिष्यपुनर्वस्विति एकवचनमेव न तु तिष्यपुनर्वसू इति द्विवचनमिति काशिका । नन्वेकत्वविशिष्टघटादेः प्रातिपदिकानामेव शक्तिरस्तु संगव्य अका

न्येव वचनादीनीति चेदुच्यते। गऽवादिविनिगमस्य लक्षशक्तिग्राहकविल्यवैः अप्रसिद्धा चशाकस्य न संख्याव्यंजिकाः
सुपः। सुप्रत्ययानामघटपेदत्वादिना वाचकतायामेकत्वविशिष्टघटत्वादिना वाच्यतायां चगोरवम् शरीरतः घटप
देन एकत्वादिना वाचकत्वसंभवेन एकतरस्यापरिच्छेदकविनिगमकाभावः अकयोर्द्विवचनेकवचने इति व्याकरण
स्य वाक्यार्थबुद्धेः पूर्वमेकत्वादिविशिष्टघटप्रसिद्धा तत्र प्रमाणान्तरस्य च शक्तिग्राहकस्य व्याकोपः। सुतरां च ग
गनानि वृक्षाणीत्यादौ बहुत्वविशिष्टगगनादेर्बहुवचनान्तगगनादिपदशाक्यस्याप्रसिद्धिरिति विभक्तीनामेकत्वा
द्यर्थ इत्येवोचितं ननु सुपो व्यञ्जकत्वम्॥ ॥इति वचनार्थविवरणम्॥ ॥विभक्तिः प्रथमेति सु स्वौजसः प्रत्ययाः
रूपः। आभिमुख्य तदर्थस्तु दभीष्ट प्रत्ययानेकम्। सुपां मध्ये औजस इति त्रयः प्रत्ययाः प्रथमा विभक्तिरित्यन्वर्थाः
प्राचीनानां तदनुसारिणां पाणिनीयानां च संज्ञाशक्तिः सुसुत्वादिने उकारजकारयोरनुबन्धयोः प्रयोगे नि
त्यमश्रूयमाणयोर्वाचकानन्तर्भावात् तस्याः प्रथमायाः वृक्षनृपालयचरण्डमुण्डो गच्छन्ति देवाः प्रसीदत इत्यादावा

भिन्नत्वमर्थः। तत्राभीष्टज्ञानस्वरूपम्। तत्समवेतसमवायिभावेन प्रातिपादकार्थस्याभीष्टे ज्ञानं तस्य च विषयतया
एककर्तृकायामाशंसाविषयपालनक्रियायामाशंसाविषयपालनकर्तृत्वे कत्रर्थाख्यातोपात्ते कर्तरि छतौ वा तादात्म्ये
नाधाराधेयभावेनाध्याहृतत्वम् पदार्थस्य विशेषणतया विशेष्यतया वान्वयः। युष्मदि समानाधिकरणे मध्यमपुरुष
विधानात् संबोधनप्रथमान्तार्थेन कर्त्रन्वयासंभवात्। तथा च ब्रह्मसमवेताभीष्टज्ञानविषयः एकत्वैककर्तृकाशं
साविषयपालनक्रियेति आशंसाविषयपालनकर्तृकत्वमिति वा ब्रह्मन्पालयेत्यत्र वाक्यार्थबोधः संबोधन
प्रथमायास्तु ज्ञानमिच्छास्वरूपश्चार्थः। ज्ञानविशिष्टवाक्यार्थत्वावच्छिन्नविषयतया क्रियायामिच्छा च प्रातिपदि
कार्थसमवेतवाक्यार्थविषयकज्ञानत्वावच्छिन्नविषयतया ज्ञानेऽन्वेति तेन वाक्यार्थविषयकज्ञानसमवायि
तयोद्देश्यत्वस्वरूपे संबोध्यत्वमर्थतः प्रतिपाद्यपुरुषे प्रतीयते संबोध्यत्वं चैकवचनसहकृतप्रातिपदिकार्थेन
एकत्वविशिष्टस्वप्रवृत्तिनिमित्तधर्मावच्छेदेन बोध्यते। यद्रूपावच्छेदेन च संबोध्यत्वं प्रथमाप्रत्याय्यं तद्रूपविशि

ष्टमेव युष्मदादपरामृश्यते। संवोध्यतावच्छेदकत्वोपलक्षितधर्मविशिष्टः एव युष्मत्पदशक्तेरत एव हे ब्राह्मणा
स्त्वं प्रसीद त्वां प्रणमामि त्वयाभ्युज्यतामित्यादयो न प्रयोगाः। वहुव्राह्मणत्वावच्छिन्नाया एव संवोध्यतायाः प्र
थमैपोपात्तत्वेन तद्रूपावच्छिन्नस्यैव युष्मदादपरामर्शे तत्रैकवचनस्यानन्वितार्थकत्वादसाधुत्वाच्च। एवं यत्प
दगर्भवाक्येन यद्रूपविशिष्टस्योपस्थितिस्तद्रूपविशिष्टपरामर्शिनि तत्पदेपि वचनैक्यव्यवस्था दृष्टा ये प
चन्ति तमानयेत्यप्रयोगात्। यच्छब्दगर्भवाक्येन वहुत्वविशिष्टपाककर्तृमनुष्यत्वविशिष्टस्योपस्थितत्तया
तद्रूपविशिष्टपरामर्शिणि तच्छब्दार्थे एकवचनार्थस्यानन्वयात्। हे चण्ड हे मुण्ड वलैर्वहुलैः परिवारितौ।
तत्रागच्छत गत्वा च सा समानीयतां लघु इत्यादावेकत्वविशिष्टचण्डत्वाद्यवच्छेदेन प्रथमया संवोध्यत्वबोध
नेपि तादृशरूपद्वयावच्छिन्नपरामर्शिणोपि युष्मच्छब्दाद्द्विवचनं नानुपपन्नम्। एकघटेकपटादिद्वन्द्वसमास छ
विस्या

इवप्रकृत्यर्थतावच्छेदकनानात्वेनावत्समानाधिकरणसंख्याया एकवचनप्रतिपाद्यत्वात् अत एव यश्च मूढतमो लोके यश्च बु
द्धेः परं गतः। तावुभौ सुखमेधेते सीदत्यन्तरितो जनः। इत्यादौ यच्छब्दगर्भवाक्येऽनेकत्वविशिष्टमूढतमादिरूपस्थापितत्वेत
दुभयपरामर्शिणस्तच्छब्दाद्द्विवचनमुपपन्नं. हे सौमित्रे सखा यस्ते निर्विघ्नो यस्त्वया गुहः। युवां गत्वा नदीमेतीर्णा
तमानयतं पथः। यच्छब्दाकांक्षापरिपूरणक्षमेण तच्छब्देन युष्मद एकशेषे सम्पन्नतच्छब्दार्थयुष्मद्द्वयस्य चाद्याप द्विव
चनोपपत्तिः। जानीहि नाथ दीनोऽस्मीत्यादौ अप्रामाण्यशङ्काशून्यनिश्चयोऽपि ज्ञाधातोरर्थः। अन्यथा मदीयदीनभा
वस्वरूपवाक्यार्थे प्रथमार्थनाथसमवेतताभीरुज्ञानस्याविषयतयान्वयेन विवक्षितार्थनिश्चयो जानीहीत्यस्यापौ
नरुक्त्यप्रसङ्गात्। यत्तु नाथ पालयेत्यादौ संबोधनप्रथमान्तपदार्थ एव पालनकृत्यन्वय इति तदपि न। आभिमुख्य
गुणीभूते प्रथमान्तार्थे आख्यातार्थान्वयायोगात्. अन्यथा नारायण इव नरो गच्छतीत्यादौ नारायणोऽपि गमनकर्तृ
त्वान्वयप्रसङ्गात्। युष्मदाख्यातयोराकांक्षारूपसामानाधिकरण्यं विना मध्यमपुरुषस्यासाधुत्वाच्च। न च युष्

स्मदादिस्थानिन्यपि मध्यमपुरुषो न शिष्यते · युष्मदः स्थानित्वं युष्मत्पर्यायसंबोधनपदप्रयोगेप्युपलक्षते इति वाच्यम् · भवच्छ
ब्दसामानाधिकरण्येपि तथात्वप्रसङ्गात् । स्यादेतत् । यदि संबोध्यः पुरुषो ज्ञाने समवेतत्वेन विशेषणम् विषयतया चेच्छा तद्वक्ता
नेनाक्येन प्रधानतया प्रतिपाद्यमाने आकाङ्क्षायां क्रियायां प्रथमान्तार्थेवान्वेति तदा संबोध्यवृत्तिवाक्यार्थज्ञानस्य सिद्धत्वान्नि
श्चयदशायां संबोध्यवृत्तिवाक्यार्थज्ञानस्य च वाक्याजन्यत्वनिश्चयदशायां न चैत्र त्वं गच्छेत्यादिवाक्यप्रयोगापत्तिः । भावि
भूतपुरुषान्तरीयेच्छाविषयत्वस्य चैत्रीयवाक्यार्थज्ञानेऽबाधितत्वात् । अगृहीतपदसंकेतम्लेच्छमुद्दिश्यार्यैः प्रयुज्यमान
स्य धुं गायसरित्यादिवाक्यस्य शक्तिभ्रमाजन्यत्वेनोपहास्यत्वाभावप्रसङ्गाच्च · तत्कालीनतत्पुरुषीयेच्छाविषयत्वस्य तद्वाक्य
जन्यत्वस्य ज्ञाने प्रवेशे संबुद्धिपदशक्त्यानन्त्यं दुर्घटत्वं च स्यादिति चेत् उच्यते · यथा युष्मत्पदादीनां कालपुंवाक्यभेदतः । प्रवृत्त
यो न भिद्यन्ते प्रथमायां तथैव ताः । कालपुरुषान्तरीयेच्छाविषयप्रमाणान्तरजन्यवाक्यार्थबुद्धिसमवायितावच्छेदकधर्मव
तिम्लेच्छे युष्मच्छब्दस्याप्यर्थैः शक्तिधर्मं विनाऽप्रयोगाद्यथा विशेष्यतत्तत्पदानां तत्तत्पदप्रयोगजनकेच्छाविषयतत्तत्पद ६४

जन्यवाक्यार्थबुद्धिसमवायित्वं तदवच्छेदकत्वं वा प्रवृत्तिनिमित्तं तदनुगमकं वा साधारणधर्मपुरस्कारेण वक्ष्यमा
णरीत्यासम्भवतीति नानुगमः। तथा सैव बुद्धिः प्रथमाया अपि शक्तिः कालपुरुषवाक्यविन्यासापन्ना। क्षिताभाख्य
ज्ञानेनानुगमो वहतीति चेत्सा दूषयिष्यते ननु तथापि. अकाण्डशक्तिनिर्भिन्ने वक्षसे जहति चेतनाम्. हताशरामक
स्यार्थे दग्धं जीवितुमिच्छसीत्यादौ वक्तरि संबोध्यत्वमनुपपन्नम्. तथाहि तस्य पुंसो वाक्यार्थज्ञानस्यासत्वे
वाक्यप्रयोग एवानुपपन्नः सत्वे तत्रेच्छासिद्धे विषये वाक्यजन्यो वाक्यार्थबोधश्च न सम्भवतीति प्रथमा
र्थबाध इति चेदुच्यते॥ प्र[illegible]माणान्तरनिष्पन्नवाक्यार्थज्ञानजननावाक्येन जन्याभीष्टा धीर्वक्तुर्यद्यपि
[illegible]बाधिता। प्रमाणान्तरजन्यायां वाक्यार्थबुद्धौ सत्यामपि वाक्यजन्यवाक्यार्थबुद्धित्वावच्छेदेनेच्छानानुप
न्ना. श्रवणासिद्धावपि मननेच्छावत्सिद्धेः सुतरां तद्बुद्धिं प्रति न प्रतिबन्धिका प्रतिबन्धिका चेदसत्यामे
व शाब्दबोधेच्छायामिति वक्तुरपि स्ववाक्यजनिताभाव्य वाक्यार्थबुद्धिसमवायितया संबोध्यत्वमबाधितमि

ति ।। अचेतनेपि संबुद्धिप्रथमा या प्रयुज्यते । तस्यास्तु आगतिस्तेषु निर्दिष्टे युष्मदादिभिः । नहि हितरलो लक्ष्मी
मेतां त्यजामरपादपान् हृदयहतया किं तेच्छिन्नामरोरपि चिन्तया । जठरदहनज्वालाशान्त्यै यदि स्युरमी तदास्व
पितुरुदधेरौर्वं निर्वापयेयुरुषर्बुधम् । इत्यादावचेतनस्य हृदयस्य संबोध्यत्वबोधेपि प्रथमाप्रयोगो युष्मच्छब्द
मध्यमपुरुषादिप्रयोगे नतुल्ययोगक्षेमश्चेतनक्षेत्रज्ञतादात्म्यारोपेण संबोध्यत्वभ्रमजनकतया गौण्या वृत्त्या
र्थान्तरप्रतिपादकतया वा संगमनीयः ;- अत एव तुल्ये प्रस्तुते तुल्यस्याभिधानप्रस्तुतप्रशंसाविशेषस्य लक्षणमु
दाहरता प्रकाशकारेण कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकमित्यादाव किंचनस्य कस्यचिदनुपकुर्वतो
मनस्विनः प्रस्तुतस्य तादात्म्यारोपेण युष्मच्छब्दसंबुद्धिमच्छब्दोत्तमपुरुषाणामर्थे शाखोटकाभेदेनाध्यवसितः
प्रस्तुतोर्थः संबध्यते इत्यप्रस्तुतार्थस्य व्यंजनया लक्षणया वोपस्थितिरित्यन्ये तन्न । यत्र तु व्यंजनया लभ्योर्थः
प्रकृतवाक्यार्थतादात्म्येनाध्यवसितः सन्नन्वयबोधे निविशते तत्र गुणीभूतव्यंग्यमेव न त्वप्रस्तुतप्रशंसा यथा । ६५

आगत्य संप्रति वियोगविसंस्थुलांगीमंभोजिनीं क्वचिदपि क्षपितत्रियामः। एनां प्रसादयति पश्य शनैः प्रभाते तन्वंगि पादपतनेन सह
स्ररश्मिः। अत्र व्यञ्जनया वृत्त्या प्रतीतिपथमवतरन्नायकयोर्वृत्तान्तो रविकमलिनीवृत्तान्तेन तादात्म्येन गुणीभूय भासते· ननु प्राधान्येन
दृष्टिकर्मत्वानुपपत्तेः। नापि ध्वनिविषयो दीर्घवाक्यार्थबोधे पर्येत्येशमपहाय· तथा सति खण्डितामानमपनिनीषतश्सागसः प्रि
यस्याशंसां प्रतिपादयतोऽनोऽनुपपन्नत्वप्रसङ्गात्। नहि तदा तस्य मानापनोदोपायादन्यद्दाशास्यं न च रविकमलिनीवृत्तान्तदर्शनं
तदुपायः रविकिरणपतनजनितकमलिनीकुसुमव्याकोशतादर्शनस्य कयापि विधया खण्डितायां मानत्यागाध्यवसायाजन
कत्वान्नायकप्राणिपातजनितमानिनीप्रसादाभेदेनावगतस्य दर्शनं तु प्रियप्रणामान्तो मान इति निश्चयद्वारा प्रभवति तस्याः प्र
णयकोपभङ्गायेति विस्तरोऽस्मन्महार्णवेऽनुसंधेयः· एकतिङ् वाक्यमित्युक्तं कात्यायनेन महर्षिणा संबोध्यत्वं क्रियाशेषस्तदर्थ इति
शाब्दिकाः। समर्थसूत्रे एकतिङ् वाक्यमिति कात्यायनवाक्ये तत्र भाष्यकारेण ब्रूहि देवदत्तेति नायचमुदाहृतम्। तस्यायमभि
सन्धिः। यदि क्रियया सह संबोध्यत्वान्वये आख्यातसंबोधनान्तयोर्व्यपेक्षा न स्यात् तदा निघातो नाम सर्वानुदात्तः स्वरो दे
वदत्तपद आमन्त्रितेन प्रसज्येत· आमन्त्रितस्य चेति सूत्रेणामन्त्रितप्रत्ययान्तपदात्पराणामेव निघातविधानात्। पदयो

स्तु व्यपेक्षालक्षणसामर्थ्यविरहे संबन्धेनो विधेरप्रवृत्तेः समर्थः पदविधिरिति व्यवस्थापनात् अत एव समानवाक्ये निघातयुष्मदादे
णा इति पठन्ति तयोर्व्यपेक्षानुसंधानपदार्थस्य वा आश्रयाश्रयिभावेनान्वयस्वीकारे तेन चैकवाक्यतानिर्वाह इति सांप्रतम्। मध्य
मपुरुषार्थे युष्मदर्थातिरिक्तस्य तादात्म्येनान्वयायोगात् देवदत्त त्वं जानीत्यादावाख्यातोपात्ते कर्त्तरि संबोध्यत्वस्य बाधाच्च। य
दुक्तं हरिणा। संबोधनपदं यच्च तत्क्रियायां विशेषणम्। व्रजानि देवदत्तेति निघातोऽत्र तथा सति॥ इति तस्मात् संबोध्यत्वं प्रातिपदि
कं प्रति विशेष्यम्। क्रियायां तु विशेषणं क्रियाविनाकृतं वाक्यमेव नास्तीति कात्यायनानुयायिनो वैयाकरणाः। एकतिङ् वा
क्यमिति महाभाष्यानुसारिभिः वाक्यबोध्यप्रधानार्थे संबोध्यत्वान्वयो मतः। महाभाष्यकृतस्तावदेकतिङ् वाक्यमिति का
त्यायनवाक्यं नानुमन्यन्ते ते हि पश्य मृगो धावति जानीहि जगज्जगन्नाथाज्जायत इत्यादौ भावनदर्शनयोर्जनिज्ञानयोः
कर्मकर्मिभावेन अस्ति साधवः सीदन्ति भवति दुर्जनामोदने इत्यादौ साधुसीदनसत्तयोर्मोदभवनयोश्च कर्तृक्रियाभावेन
अनुभवासि स्मरिष्यसि यजसे स्वर्गं भोक्ष्यसे इत्यादौ सिद्धसाध्यसमभिव्याहारस्थले त्वत्कर्तृकयोरनुभवस्मरणयोर्याग

स्वर्गभोगयोश्च कार्यकारणभावेनान्वयमभ्युपगच्छन्तो बहुतिङन्तमप्येकं वाक्यमभ्युपगच्छन्ति· स्मरन्ति च सुबन्तं हि यथा
नेकं सुबन्तस्य विशेषणम्। तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम्। इति। अत एव तिङन्तभिन्नात्परं तिङन्तं निहन्यत इत्यर्थ
कं तिङ्ङतिङ इति सूत्रम्। अग्निमीळे इत्यादावाख्यातान्तेळेशब्दस्य निघातस्वरं विदधत् पचति पचपेति वाक्ये पचपेत्यस्य तद्वारणा
र्थं पूर्वपदे तिङः पर्युदासो यातिङ इति प्रयुक्तं। अन्यथाख्यातयोः सामर्थ्याभावादेव पदविधेरसम्भवे तदानर्थक्यं स्यात्· न च सुप्स
तिङ् वाक्यमिति प्रयुज्यते· रात्रौ दिवसधूसरो विगतयौवना कामिनी सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः। प्रभुर्धनपरायणः
सततदुर्गतः सज्जनो नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे इत्यादौ सुबन्तचयस्य पचय पचतीत्यत्र तिङन्तचयस्य के
वलस्यापि वाक्यत्वदर्शनात्। आख्यातपदं विना पदान्तरसहितं सकलपरिकरमपि मूकतयावतिष्ठते इति कात्यायनप्रलापः
त्वात्ममात्रं व्युत्पत्तिभेदेन कस्यचिदाख्यातार्थः कस्यचित्प्रथमान्तार्थ एव वाक्येन प्रधानतया बोध्यते· तत्र तत्रैव संबोधन
पदार्थस्याभीष्टज्ञानस्य तावद्विशिष्टसंसर्गेणान्वय इति [illegible]र्थः क्रियान्वयाभिनिवेशः। अत एव देवदत्तकोपयज्ञदत्त इत्यादौ जि

Nepal Sanskrit University, Balmandi Gangotri

णासाविषयजातिगोत्वादिगुणविशिष्टस्य तदन्तत्वावच्छिन्नविषयतयादेव हृत्तसमवेतत्वेनाक्षीयं ज्ञानमन्वेतीत्युपपद्यते इतिस
र्वदर्शनसमंजसः पन्थाः। एतेन क्रियाया आकांक्षपदगणने संबोधनान्तस्योद्देशः प्रमादमूलक एवेति ध्येयम्। अन्यत्रामंत्र
णाद्विंऽ वचने प्राह केवलम्। विभक्तिः प्रथमा कर्माद्याधिक्ये न्या विभक्तयः। आमंत्रणे प्रथमा भिन्ना प्रथमा नरहत्यादौ पुंस्त्वल
क्ष्मीरित्यादौ स्त्रीत्वं हनहन्तनामित्यादौ नपुंसकत्वं एकत्वादिसंख्यास्वरूपं वचनं चाभिधत्ते। द्वितीयाद्यास्तु विभक्तयः क
र्माद्यधिकमभिदधाना एव लिंगवचने प्रतिपादयन्ति न तु केवलेन। ननु प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमेत्य
नुशासनात्। जातिवाचिनो गवादिपदाद् व्यक्तेर्नाभार्थं प्रथमाया व्यक्तो द्रोणो व्रीहिरित्यादि द्रोणादिपरिमाणस्य व्रीह्यादौ भे
दान्वयायोगात् इति चेदुच्यते। अन्यलभ्यतया जातिमतो गुणवतस्तथा। निरर्थः प्रातिपदिकार्थे सुप्रथमाविधिः। गवादि
प्रातिपदिकादेव आक्षेपाल्लक्षणया वा शक्त्या वा व्यक्तेर्द्रोणादेरन्यादिप्रातिपदिकाच्च तद्धितलोपेन भक्त्या वा गुणत्वपरिमाण
वतोऽलाभसंभवे व्यर्थः प्रातिपदिकार्थादौ प्रथमावाच्यत्वविधिरिति व्याख्याग्रन्थः। सूत्रेण प्रातिपदिकार्थः सत्ता व्यक्तिरेवसा

धा।दि
६७

।आकृतिः परिमाणं तच्छक्तिधर्मोपलक्षणम्।प्रसिद्धलिङ्गवचने तावन्मात्रे विवक्षिते·प्रथमान्तप्रयोगस्य साधुत्वमनुशिष्यते।प्राति
पदिकार्थः सत्ताइत्या तथैव व्याख्यानात्·सत्ता च व्यक्तिरेव सत्त्वप्रधानानि नामानीति निरुक्ते व्यक्तेः सत्त्वपदप्रयोगात्।लिंगे स्त्रीपुमा
न्नपुंसकं च।वचनान्येकत्वद्वित्वबहुत्वसंख्याः।परिमाणमाकृतिरवयवसंस्थानस्वरूपा तथा प्रवृत्तिनिमित्तसामान्यमुपलक्ष्यते तावत्
सुपरस्परविश्लंखलितविषताकेषु विवक्षितेषु कर्मादौ चाविवक्षिते·प्रथमान्तप्रयोगेनपभ्रष्टतयानादित्वेनाभ्युदयविशेषसाध
नत्वेन जातिविशेषेण वासाधुरित्येव प्रातिपदिकेत्यादिसूत्रार्थः नतु प्रातिपदिकार्थवाचिका प्रथमेत्यनुशासनमिदं।अनपभ्रष्ट
तानादिर्येह्यभ्युदयसाधनम्।व्यक्तिया व्यंजनीया वा जातिकार्यो ह साधुतेत्यनेन लक्षितस्य साधुत्वस्यानुशासनाद्व्याकरण
प्रवृत्तिरित्याकरेषु·साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिरिति या भावस्य प्रधानोपसर्जनभावस्य च प्रमाणान्तरसिद्धत्वे
न व्याकरणप्रतिपाद्यत्वमिति पाणिनिनेवाभिहितत्वात्।सिद्धे शब्दार्थसंबन्धे समानायामर्थावगतौ साधुभिश्चासाधुभिश्च ग
म्यागम्येतिवन्नियमः क्रियत इति भाष्यस्वरसाच्च व्याकरणस्य शक्तिग्राहकमध्ये परिगणनं न तु प्रातिपदिकार्थेत्यादिसूत्रे
क्वपदीये च व्यक्तत्वात्।आशिष्यं प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणकत्वादिति सूत्रेऽर्थस्य पदार्थयोगी च वाचक[illegible]

णव्यक्तिलिङ्गप्रवृत्तिनिमित्तसंख्याबोधकं प्रथमान्तं साधु इति कण्ठतश्चेद्बोधकत्वान्यथानुपपत्त्या वृत्तौ कल्प्यमानायां प्रातिपदिकाप्राप्ययोर्लिङ्गसंख्ययोः सुपां सुवप्राप्ययोर्व्यक्तिप्रवृत्तिनिमित्तयोश्च प्रातिपदिकानां शक्तिः कल्प्यते इति प्रमाणं तेषां स्थापकतया न तु साक्षात् अभेदत्वेन नामार्थे सुपां वृत्तिरिति भ्रमः। व्यक्तियातः प्रतीयन्ते साधुत्वार्थं सुपो यतः। यत्तु प्रागप्युत्पादितं स्वरूपभेदाभावत्वेन प्रातिपदिकार्थव्यक्तौ विशेषणविभक्तीनामर्थ इति तदपि न विशेषणविभक्तीनां साधुत्वमात्रार्थकत्वस्य व्याकरणसिद्धत्वात्। तथाहि। लुपि युक्तवद्व्यक्तिवचने इत्येकं लुपशब्देन लुप्तप्रत्ययेऽपि प्रकृतिलिङ्गवचने इष्टे प्रयोक्तव्ये न तु लवणादिपदवद्विशेष्यनिघ्नतया लिङ्गवचनान्तरप्रयोगः। यथा पञ्चालानामक्षत्रियाः नियतबहुवचनपुंलिङ्गविषयास्तेषां निवासे जनपदे तद्धितलुपि कृते पञ्चालाः जनपद इति तथा विदेहाः कुरवो मगधा मत्स्या अङ्गाः वङ्गाः कलिङ्गाः पुण्ड्रा इत्याद्यर्थकमपरं तु विशेषणानां चाजातेरिति तद्विशेषणानां तद्व्यक्तिवचने स्यातां जातिवाचि पदं वर्जयित्वा यथा पञ्चालाः रमणीया जाते नु पञ्चाला जनपद एव गोदयोर्निवासे ग्रामे विशेषे बहुक्षीरघृतो जातो तु ग्राम इत्यर्थकमेतत् सूत्रद्वितयम् प्राचीनवैयाकरणाना

मनूद्यत तदशिष्यं संज्ञाप्रमाणत्वादिति पाणिनिरसूत्रयत्। पञ्चालादीनां नियतलिङ्गवचनत्वं तद्विशेषणानां वा तुल्ययोगक्षेमं
नशिष्यं संज्ञानियतो व्यवहारस्तस्मादेव प्रमाणादनर्थकानां पञ्चालादिषु विशेषणपदेषु तन्नाद्यलिङ्गवचनवाचितुल्यानुपूर्वीका
नां सुपां प्रतिनियमनस्याशिष्टत्वात् आपो दारा इतिवदिति तदर्थः। सुबर्था एव नामार्थाः सुपामल्पत्वलाघवात् व्यञ्जकं प्रातिप
दिकं मतमित्यप्यसंगतम्। ये तु घटादीनपि प्रातिपदिकार्थान्वाचकसंख्यालाघवेन सुपामेव वाच्यानाहुस्तेषां मते यदि घटा
द्युत्तरसुत्वेन वाचकतायां प्रविष्टत्वमेव प्रातिपदिकस्य व्यञ्जकत्वं तदा क्व लाघवावकाशः। अथ सुत्वेनैव वाचकत्वं तत्रैव प्राति
पदिकं समभिव्याहारे विकरणादेर्वाचकस्योपसंधानमिवोपयुज्यत इति मतं तदापि समासे सुं विना कृतादन्वयबोधो न स्या
त्। तस्याद्यार्थविर्भावे प्रातिपदिकसत्त्वेवेति दिक्। कालापास्तु चैत्रः पचति ओदनः पच्यते इत्युक्तं सा प्रकृतरक्षक इत्यादौ तिङ्निया
ताभिहितं कारकं प्रथमार्थः। तथा च चैत्रः पचतीत्यादौ चैत्राभिन्नकर्तृनिष्ठपाककर्त्ता चैत्रीयकर्तृत्वे वा पाककर्तृत्वे तादात्म्येना
न्वेति प्रतिपाद्यतां नाम सुवाख्याताभ्यां कर्तृतात्वेनैकव्यक्तिः। एकत्वत्वेनैव एका संख्या अन्यथा ब्राह्मणस्य पाककर्तृत्वसंप्र

रुवस्त्रो भयविवक्षायां पचति ब्राह्मणाय ददातीति प्रयोगप्रसङ्गात् । तिङन्तनिरूपान्तकारकाणां प्रथमोपात्तकारके एव तादात्म्येना
न्वयात् चतुर्थ्याश्च सम्प्रदानाभिधायित्वात् तदर्थे कर्तृत्वतादात्म्यबाधादेव न तथा प्रयोगः पचति चैत्रेणेत्यादौ तृतीयोपात्ते कार
के न तादात्म्येनान्वयः । तृतीयायास्तिङादिभिरनभिहिते सूत्रार्थः । अथवा तिङः स्वार्थस्य प्रातिपदिकान्वयबुद्धौ जननीया
यां तदर्थबोधकसुपोऽपि सहकारित्वमत एव चैत्रः पचतीति प्रयोगः आख्यातोपात्तद्वित्वान्वयेऽपि सुब्जनितद्वित्वोपस्थि
तेरपि सहकारित्वात् न ऽमा सामान्यप्रत्ययान्यासु पस्थितेस्यैकद्वित्वस्यान्वयबोधोपगमात् । तथा च कर्तृत्वमपि यदि सु
पानुपस्थितं स्यान्नाख्यातेन बोधयितुं शक्येतेति तस्य प्रथमान्तार्थतासिद्धिः । एतेन प्रथमासमानाधिकरणे लट
शानचावित्यादिशानियमात् पचते देवदत्तायेति प्रमाणं न तु पचति देवदत्ताय ददातीति वाक्यमतोऽप्यर्थस्तदुपपादनाय
प्रथमाया अभिहितकारकाभिधायित्वकथनप्रयास इत्यपास्तम् । सङ्ख्यां शाब्दबोधकारकांशेऽपि सुप्तिङोस्तु
ल्यार्थत्वावश्यकत्वात् पाक्षी देवदत्ताय ददातीति प्रयोगस्य तथाप्यप्रत्याख्यानात् तत्र शत्रुरप्रसङ्गे ः । यत्र च ६९

भिहितसमासेः कारकाभिधानं पाकश्चैत्र इत्यादौ तत्राप्यध्याहृ नास्ति क्रियाकर्तृत्वमेव प्रथमार्थः। अत एवास्ति र्भवन्ति परः प्रथमपुरुषेप्यप्रयुज्यमानेप्यस्तीति कात्यायनः प्रथमपुरुष इत्युपलक्षणम्· देवदत्त त्वमूरीहं वा नया इत्यादौ वस्यास्मि इत्यादेरप्यध्याहारो ध्येयः। द्वितीयादिविभक्तयस्तु छत्तद्धितसमासैरनभिहिते कारके भवन्तीति सर्वदर्शनसमानमिति वदन्ति। तान्प्रत्युच्यते उक्तार्थानामप्रयोगाद्विभक्त्यन्तरबाधतः अर्थतः प्रथमोपात्ताप्रथमैव प्रयुज्यते। पार्थ एव घटो नास्ति हे सौ वविमत्त्वं जलम्। कल्कौ स्विष्टानकः कान्तास्त्रय इत्यादिदर्शनात्। चैत्रः पचतीत्यादावाख्याते न कर्तृत्वेभिहिते नाभिहिताधिकारीयानसंभवत्येव अनभिहिताधिकारश्चोक्तार्थानामप्रयोग इति न्यायस्यैव ज्ञापकः। अत एव बहुपटार्त्यादौ बहुचा[illegible]क्तार्थत्वाद्ग्रेकल्प्यवाद्यनुसरत्या बहुपटुकल्प इत्याद्याः प्रयोगा न भवन्ति· न च केवला प्रकृतिः प्रयोक्तव्या इति चेत्तपदानन्तरं सुपः प्रयोगावश्यकत्वात्· प्रथमोपात्तस्य त्यागे बीजाभावाच्च· प्रथमैव साधुः· पचति चैत्रा यैति प्रयोगप्रसङ्गस्तत्रापि दृढुरः। अथाख्यातार्थकर्तृत्वादेः प्रातिपदिकार्थेन सह न कुत्राप्यन्वयो येन तथाविधः प्रयोगः प्रसज्येत· अपितु प्रथमार्थेने

ति चेत् संवुद्धिप्रथमार्थे तथात्वान्वयसंभवे न चैत्र पचतीति प्रयोगप्रसङ्गात्। संबोधनप्रथमाया अपि प्रथमात्वेन कर्तृत्ववाच
कतासम्भवात्। अथ प्रकृत्यर्थविशेषितस्वार्थबोधकभिन्नया प्रथमया सहेनाख्यातार्थस्य तादात्म्येनान्वयबोधोपयिक्याकांक्षा
भ्युपेतव्या। अत एव पचतिः स्वाहेत्यादौ छन्दसि व्यत्ययानुशासनबलेन संप्रदानत्वार्थिकापि प्रथमा नाख्यातसव्यपेक्षेति
चेन्न तर्हि प्रकृत्यर्थविशेषितकर्तृत्वादिबोधिका प्रथमापि कथं तथा स्यात्। चैत्रकर्तृत्वं पाककर्तृताभिन्नमिति बोधे चैत्रस्य
कर्तृत्वविशेषणत्वात्। यदि च पाककर्तृताभिन्नकर्तृत्ववांश्चैत्र इति बोधोऽभ्युपेयते तदा उक्तकर्तृत्वत्वावच्छेदेन पाककर्तृ
त्वान्वयबोधजनने कृतिः पाककृतिरिति वाक्यस्यैवासामर्थ्यं दुरुद्धरं तादात्म्यसंसर्गावच्छिन्नतद्धर्मविशिष्टनिष्ठप्रका
रतानिरूपितविशेष्यताया निरवच्छिन्नावच्छेदकतासंसर्गेण वाक्यार्थबुद्धेस्तद्धर्मभेदप्रयोज्यत्वात्। चैत्रः कृतिः पाक
कृतिरित्यादौ तु कृतित्वनिष्ठाविशेष्यतावच्छेदकतासामानाधिकरण्येन चैत्रीयत्वावच्छिन्ने वा तादृशविशेष्यविशेषणता
या भासमानस्यापि तन्निष्ठावच्छेदकतायां सामानाधिकरण्येनावच्छेदकत्वात्। निरूपतां वा विशेष्यतायामे ७०

वावच्छेदकतयानिरूपितत्वं अवच्छेदकतायां वा स्वनिरूपकविशेष्यतानिरूपकत्वसम्बन्धेनावच्छेदकता। विशिष्टभिन्नत्वं·न च
त्वे स्वविशिष्टमन्यत्र आत्माश्रयसहनशीलविशेषणत्वादिसंबन्धेभ्यः अथ प्रथमाया निरर्थकत्वे वचनादिमात्रे वाचकत्वे
वा आख्यातोपात्तकारकं प्रथमान्तप्रातिपदिकेन्वियात् सुबाख्यातोभयोपस्थापितव्यक्तेरेव प्रातिपदिकार्थविशेषणता। तथा
भानवत्त्वेनैकवचनवदिति चेत् एवं सत्येकवचनतिङन्ततथाविधप्रथमान्तयोराकांक्षाभ्युपगमस्यावश्यकत्वे किमत्र प्र
थमायाः कर्तृत्वार्थकत्वेनोपकर्तृव्यमकारकाभिधायित्वेऽप्रथमोपात्तत्यागयोगेनैव प्रथमाप्रयोगसंभवात्·अ
न्यथा पार्थ एव धनुर्द्धरस्य[illegible]विशेषणतापन्ने पार्थे घटो नास्तीत्यत्रास्येताभावविशेषणतापन्नेऽस्तित्वाभावविशेष्ये वा घ
टे सीवधवत्ताकोत्तिरित्यत्र सा द्रष्टृविशेषणेऽहं स्यां च कर्तृत्वबाधेन प्रथमाप्रयोगानुपपन्नः स्यात्। ननु पार्थ एवेत्या
दौ अस्ति भवन्तिपरोऽध्याहर्तव्यः [illegible]कर्तृत्वं च विशेषणविशेष्ययोरव्याहतमिति पार्थधनुर्द्धरे च प्रथमाघटोऽस्तीत्य
त्र कर्तृत्वाभावआख्यातप्रथमयोरर्थः। नञ्पदं तु व्यंजकमेवान्यथातिङ्सुवन्तयोर्निरपेक्षत्वे घटो घटो वा ना

स्तीति प्रयोगप्रामाण्यप्रसङ्गात् । हंसीव धवला कीर्तिरित्यत्र कीर्त्यावस्तिनाप्रथमया हंस्यामिवनिपातेन प्रथमया च भवन
कर्तृत्वमुच्यते । या इत्रासुपायघल्कारकलिंगवचनादिर्वैभ्यतेनाइत्थमेवोपमेये इवनिपातेन प्रत्याय्यते । अतएवमु
क्ता मालेव नक्षत्रैर्भूषिता चैत्रशर्वरी । हंसीव धवलश्चन्द्रः सरसीवामलं नभः । इत्यादावुपमानोपमेययोः कार
कलिङ्गवचनवैरूप्यमुपमादोषइति चेन्न । शरैरुत्सैरिवोदीच्यानुद्धरिष्यन् रसानिव । इत्यादाविवनिपातेनाभिहि
ते करणत्वकर्मत्वादावुसरयोः प्रथमाप्रसङ्गात् इवस्यपाते तृतीयानुपपत्तेश्च । इष्यते च । विमलं जलं नंनद्याइति
क्रियानिरपेक्षं वा कथं अस्त्यत्रास्ति भवन्ति परइति चेत् । कलंकी म्लेछान्तक इत्यादौ भविष्यतिनतत्प्रयोगासंभवात् ।
भवन्ति परइत्युपलक्षणं भविष्यतीत्यस्यापीति चेत् । कालत्रयः अतीतं तदात्वमायतिरित्यादिविभागकेवा
धेय आसीदस्ति भविष्यतीत्येकतमस्यापि प्रयोगासम्भवादिति दिक् ॥ ॥इति प्रथमाविवरणम् ॥ ॥
।द्वितीयाम्भौरन्नासस्तत्रानुबन्धावक्षैरेश्शो । तस्मात्सेवं इति द्वित्वं बहुत्वं कुर्वते त्वसः ॥ अम् औट् शसिति द्वितीया

संपद्यमानस्य मित्यादौ रूपमाणास्तद्वीयाभागाभम् अभी भवन्त्येव वाचकाः दृष्टान्तु व्यौवाचकानन्तर्भूतौ अन्तत एव प्रथमा द्वितीया साधा
रणत्वेनैकत्वेन द्वित्वेन वा चकत्वमनुत्वेन बहुत्वेन वा चकत्वमित्यनुगमोपि संभवति। रामसजनम् ः सेन्ः स्तामनु[illegible]मकंलिङ्गविधानोपपत्तिकं
रूपमभ्युपेयम्। फलव्यापारयोः सर्वधातूनां शक्तिरिष्यते। द्वितीयार्थोधिकरणं फलगामीति गामिका। सर्वधातूनां फलव्यापार
योपुष्य पत्तादि पदन्नानार्थवृत्तिःशक्तिरेकपदोपात्तयोरपि परस्परमन्वयो न विरुद्धः परेषामप्याख्यातार्थकृतौ वर्त्तमानत्वस्य चे
पाकरणानां कर्त्तरि संख्यायाश्चान्वयबोधदर्शनात्। फलं तु विक्लित्ति[illegible] संयोगस्यादि तादृप्ये शोव गमिपच्यादिवाच्य व्यापा
रस्तु स्योगवतीत्यगस्यन्दविश्लेषत्वेन तु स्योगवतीत्यगप्रयत्नत्वेन यद्धि: पचतीत्यधोसंतुलनत्वेन त्यजतीत्यत्र प्रय
त्नत्वेन गम्यमानाः सकलव्यापारानुगतधर्मविरहादननुगतानां प्रवृत्तिनिमित्तानां स्वरूपसत्तामनुगमकेन बुद्धिविशेषविष
यत्वेन सर्वनाम्नामिव धातूनां शक्याः भवतु वा फलजनकतावच्छेदकत्वमेव प्रयत्नताद्यीनां स्वरूपसदनुगमकं अत एव य
त्कर्मावच्छेदेन विक्लित्त्यादिजनकताग्रहस्तत्कर्मावच्छिन्नमेव पचादिनोपस्थाप्यते धात्वर्थव्यापार एव भावनोत्पादना क्रियेति

व्यपदिश्यते तत्रैव प्रधानतया भासमानोनुकूलत्वसंसर्गेण फलस्याश्रयत्वेन वर्त्तमानत्वादेराधेयत्वेन विभक्त्युपस्थाप्यकर्तुरन्व
यः कर्तरि चाख्यातोपात्ततदर्थसंख्याया आधारत्वेन प्रथमार्थस्य तादात्म्येन प्रथमान्तार्थे प्रथमोपात्तसंख्यादेरपि संवन्धः;
फले च कर्मविभक्त्युपस्थाप्यस्याधिकरणस्याधेयत्वेनाधिकरणे च द्वितीयान्तार्थादेरभेदेन द्वितीयान्तार्थे द्वितीयार्थे वा
द्वितीयोपात्तसंख्याया विशेषणत्वं. तेन चैत्र ओदनं पचतीत्यत्रैकचैत्राभिन्नैकाधिकरणवृत्तिरेकौदनाधिकरणवृ
त्तिविक्लित्तिजनिका वर्त्तमाना क्रियेत्यन्वयबोधो। युज्यते च क्रियायाः प्राधान्यं तत्र गुणीभावः कारकाणां. अत एव भावप्रधानमाख्यात
मिति निरुक्तस्मृतिः. आख्यातान्तपदानामर्थेषु भावस्य क्रियाया एव प्राधान्यमभिधत्ते धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते इति प
रिभाषणात्. अत एव पचतिकल्पं चैत्रमैत्रदेवदत्ताः स्यादौ साधुत्वार्थं नियतं नपुंसकैकवचनं क्रियाया लिङ्गसंख्यान्वयायोग्य
त्वे बहुवचनादेरसमवेतार्थकत्वात्। कर्तुः प्राधान्ये तु तत्र लिङ्गसंख्यान्वययोग्ये तिङुपात्तेव सुवुपात्तापि संख्यान्वयादिति बहुव
चनप्रयोगप्रसङ्गः आचार्यकल्पा द्विजा इतिवत्. किं च पश्य मृगो धावतीत्यादावेकवाक्यत्वं तिङ्ङतिङः इति सूत्रस्वरससिद्धं तत्र

यदिधावनकर्त्तामृगोद्दर्शनक्रियायांकर्मतयान्वेतितदामृगात्कर्मणिद्वितीयाप्रसङ्गः अप्रथमासमानाधिकरणेस्यलटः
स्थानेशतुर्निसत्वेनतादृशप्रयोगएवनसाधुःस्यात्। सिद्धान्तेतुमृगकर्त्तृकधावनक्रियायाःकर्मतयादर्शनक्रियायामन्वयः
इतिधातोःप्रातिपदिकसंज्ञाविरहान्नद्वितीयाप्रसङ्गइतिसर्वथाभाष्यानुपेतक्रियाप्राधान्यमेवज्ञेयम्। तथाचौदनंपचति
चैत्रइत्यत्रएकौदनाधिकरणकविक्लित्त्यनुकूलव्यापारेएकचैत्राभिन्नकर्तृकेप्रतीयमानेओदनादेरत्यन्तमप्यत्वा
दधिकरणमात्रंद्वितीयार्थः अधिकरणत्वंचाखण्डोपाधिर्गगनाभावादिस्वरूपातिरिक्तोवास्वरूपेणैवजातिवद्द्वि
तीयापदशक्तिनिमित्तम्। अतएवाधिकरणत्वमाधेयत्वंवाद्वितीयार्थोनत्वधिकरणमितिदार्शनिकमतमपा
स्तम्। अधिकरणतात्वस्यशक्यतावच्छेदकत्वेगौरवात् कालंपचतीतिप्रयोगप्रसङ्गात्। विक्लित्तौकालवृत्तिस्यधिक
रणतानिरूपकत्वस्याबाधात्। तत्तत्संसर्गावच्छिन्नाधिकरणतानांतत्तद्धातुसपेक्षद्वितीयावाच्यत्वेनानाशक्ति

कत्वेन प्रसङ्गः· आधिकरणस्य द्वितीयार्थतावादे तु तत्तद्धात्वर्थफले संसर्गविशेषेण द्वितीयार्थाधिकरणान्वय इति व्युत्पत्तिरेव विचि
त्रा न तु शक्तिः· अत एव कर्मत्वकारकपर्यायत्वमपि द्वितीयाया उपपद्यते· चैत्रेणौदनः पच्यते इत्यादौ हि एकौदनाभिन्नाधिकरणकवि
क्लित्तिजनिका एकचैत्राभिन्नकर्तृका पचिक्रिया प्रतीयते· तत्रौदनादेरन्यलभ्यत्वादाश्रयमात्रं लकारार्थः। न त्वाश्रयत्वं प्रातिपदि
कसमानाधिकरण्यानुपपत्तेः। ननु तथापि चैत्रकर्तृकोभयगामिसंयोगादिफलं तत्र चैत्रश्चैत्रं गच्छतीति प्रयोगप्रसङ्गः। चैत्रा
धिकरणकसंयोगजनकस्य गमनस्याधि[illegible]त्वादिति चेन्न· परस्याः कर्तृसंज्ञया बाधितत्वे न द्वितीयाप्रवृत्तेरभावात्· कर्मसंज्ञैव हि
द्वितीयानिमित्तम्। अत एवापादानसंप्रदानकरणाधारकर्मणाम्· कर्तुश्चोभयसंप्राप्तौ परमेव प्रवर्त्तते इति पठन्ति। तत्र द्वितीयोपात्तम
धिकरणं फलं गमिधात्वर्थफलेनैवेति। तथा हि पच्यर्थविक्लित्तेः सावयवघटितपरंपरया गम्यर्थसंयोगे एवं त्यज्यर्थविभागे च समवेतत्वे
न द्वितीयार्थाधिकरणस्यान्वयः। जानातेरावरणभङ्गः। प्राकट्यं वा फलं नमावरणं त्वविद्याज्ञानमिति व्यपदिश्यमानो भावविशेष
ओपनिषदां प्रसिद्धः। अतीतानामपि सूक्ष्मरूपेणावस्थितानामिदानीन्तनेन फलं जन्यते· तेनातीतमनागतं वा जानातीति ना

नुपपन्नम् ।यद्वाहहरिः। तिरोभावाभ्युपगमे भावानां सैव नास्तीतिं अलब्धक्रमे तिरोभावे नश्यतीति प्रतीयते इति जानातीच्छति द्वेष्टि करोति पश्यतीत्यादौ ज्ञानेच्छाद्वेषप्रयत्नदर्शनादीनि फलानि तदनुकूला मनोयोगादयो व्यापारा एव क्रिया अत एव चक्षुः पश्यतीति क्वाचित्के प्रयोगः। तत्र च विषयत्वोद्देश्यत्वव्याप्यत्वसाक्षात्कारित्वैः संबन्धैर्द्वितीयार्थाधिकरणस्य ज्ञानादौ फलेन्वय इत्यपि केचित्। वस्तुतस्तु धातूनां प्राधान्येन बोध्यमानो धात्वर्थः क्रिया। तत्र च विशेषणतया भासमानो धात्वर्थः फलमिति परिभाष्यते क्रियायाः साक्षादधिकरणं कर्तृ फलस्याधिकरणं कर्म अत एव फलस्यैव प्राधान्यविवक्षायां· न गुणः पच्यते स्वयमेवेत्यादौ विक्लित्तिरेव क्रिया तदधिकरणे कर्तरि लकारः· तथा च जानातेर्विषयता ज्ञप्तिश्चेच्छतेरुद्देश्यता कामश्च करोतेः साध्यता फलस्य द्वेष्टेर्द्विष्टता द्वेषश्च [illegible]लौकिकी विषयता साक्षात्कारश्चानुमिनोतेर्विधेयतानुमितिश्चेत्येवं फलव्यापारौ क्रमात् प्रतिपाद्यौ· तत्र फले विषयतादावाधाराधेयभावेन द्वितीयार्थाधिकर

णान्वय इति वैयाकरणाः। ननु तन्मते करणाधिकरणादिनिष्ठव्यापाराणामपि धातुना प्राधान्येनाभिधानसंभवात्तत्तद्व्या
पाराश्रयत्वेन स्वतन्त्रतया कर्तृत्वं स्यादिति चेन्न स्यादेव। असिश्छिनत्ति पचति स्थाल्यपैति धराधरः। ददाति द्विजइत्यादौ कर्तृ
ताकारकान्तरेसाध्वसिश्छिनत्तीत्यत्रावयवद्वयारंभकसंयोगप्रतिद्वन्द्विविभागश्छिनत्तेरर्थः फलम्। यदवयविनाद्वि
तीयार्थाधिकरणेन समानाधिकरणतया व्यपेक्षितेन त्वाधाराधेयभावेन। अतएव वृक्षंछिनत्तीति प्रयोगः। ननु दलद्व
यमिति। तत्फलानुकूलव्यापारः करणनिष्ठो यदा विवक्षितस्तदा करणस्यापि कर्तृत्वमविरुद्धम्। अतएव विवक्षातः का
रकाणि भवन्तीति प्रवादः। एवं स्थाली पचतीत्यत्राधिकरणस्य [illegible]व विक्लित्यनुकूलो व्यापारः संतापनादिः
गिरिरपसरतीत्यत्रापादानस्यापसरतिफलीविभागानुकूलकर्माभिमुख्यादिः। द्विजो ददातीत्यत्र ददातिफलस्य स्वत्व
ध्वंसस्य स्वत्वान्तरस्य वानुकूलोऽनुमत्यादिः सम्भवतीति विवक्षावशात् सर्वस्य कारकान्तरस्य कर्तृत्वमवसेयम्। ननु
तथापि कर्मवृत्तिव्यापारप्रतिपाद्यकर्मणामपि कर्तृत्वं स्यादिति चेत् कुतो न स्यात्। अधिगच्छति शास्त्रार्थः स्मरति ग ७४

दुधातिचा। इत्यादिदर्शनात्कर्मणापि कर्तृत्वमिष्यते। अधिगमविषयत्वंस्मरणविषयत्वं अदृष्टविषयत्वंच धातुनाफ
लव्यापारयोर्विशेषणविशेष्यभावव्यत्यासेन प्रत्याय्यते। प्राधान्यवशात् क्रियाभावंप्राप्तस्यफलस्याधिकरणंशास्त्रा
र्थो भवत्यधिगम्यादिकर्त्ता यत्तु एकदेशे समूहेवा व्यापाराणांपचादयः। स्वभावतः प्रवर्त्तन्ते तुल्यरूपे समास्थिता
इति वाक्यपदीयवाक्यस्य एकदेशे फलमात्रव्यापारसमूहमात्रेवा धातवः प्रवर्त्तन्ते। तेन व्यापाराविवक्षायां व्यापारमा
त्रे च धातुप्रयोगः यथा पच्यते ओदनः स्वयमेव पचति चैत्र इत्यादावित्यर्थं व्याकुर्वाणाः अधिगच्छति शास्त्रार्थ इत्यादिप्र
योगप्रसङ्गः। न च बुभुक्षितं न प्रतिभाति किंचिदिति दर्शनात् इष्टापत्तिः। तत्र कर्मप्रवचनीयेन प्रतिना योगात् द्वितीयायाः
कर्मण्येव साधुत्वादिति चेदुच्यते। विशिष्टवृत्तिस्वीकारादेकदेशस्यान्वयात्। कर्मत्वभावको धातुर्न द्वितीयां व्य
पेक्षते स्मरति शास्त्रार्थ इत्यत्र स्मृतिधातोः स्मरणविषयतायां विशिष्टायां लक्षणा स्वरूपावृत्तिः। ननु विशेषणवि
शेष्यभावव्यत्यासमात्रेण क्लृप्ताभ्यां खण्डशक्तिभ्यां निर्वाहः। खण्डशक्तिजनितपदार्थोपस्थितेः फलविशे

Nepal Sanskrit University, Balmeekri Campus, Kathmandu

चणकव्यापारविशेष्यकशाब्दबुद्धिप्रयोजिकायां स्वधातुत्वावच्छेदेन तादृशशाब्दबुद्ध्यभावप्रयोजकीभूताभावप्रतियोगि
त्वेनक्लृप्तेर्वेव सहकारित्वाभ्युपगमात्। व्यापारप्रकारकफलविशेष्यकबुद्ध्युपयोगित्वस्य तन्त्रत्वे गौरवं एव शक्तिग्रहजनि
तखएवोपस्थितेः सहकारित्वकल्पनं चापेक्ष्य विशिष्टोपस्थितेः जनिकाविशिष्टवृत्तिरेव कल्पयितुमुचिता। तथा च वि
शिष्टपदार्थैकदेशेन द्वितीयार्थान्वयो युज्यते इति कर्मस्थभावकानां प्रायेण कर्मकत्वमन्यत्र भावदेशकालाध्वभ्यः स्म
रणशास्त्रार्थ इत्यादौ विषयताफलनमुद्बोधकादिः स्मरणीयमात्रवृत्तिर्व्यापार इति फलव्यापारयोर्वैयधिकरण्याभावा
दकर्मकः कर्मस्थभावको धातुरित्यपि वदन्ति। नन्वेवं पचति ओदन इत्यपि स्यात्। कर्मव्यापारविवक्षायां कर्मणः ओदना
देः कर्तृत्वसंभवादिति चेदुच्यते। निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते। तस्मात्कर्तृत्वेनकारेपि धातोः स्युर्यक्चिणादयः
घन्नामनिवर्त्ये विकार्ये च कर्मतन्निष्ठभावविवक्षायां सकर्मकाद्धातोः कर्तृत्वेनकारेपि कर्मवद्भावानुशासनसिद्धः। त
था च सूत्रम्। कर्मवत्कर्मणा तुल्यक्रियः इति कर्मस्थक्रियाश्रयः कर्ता कर्मवद्भवतीति तदर्थः। तदप्यनुशासनं क

र्मातिदेशत्वाद्यक्चिणात्मनेपदादीनि कर्मकार्याणि विधत्ते। तेन पच्यते अपाचि वा ओदन इत्येव प्रमाणम्। न च पचत्यपाक्षीदिति। नन्वेवं यत्र
भावे लकारस्तत्र कर्मकार्यं किं नीत्या स्यादिति। न तु लं पच्यते इति प्रयोगप्रसङ्ग इति चेदुच्यते कर्मवत्कर्मणा तुल्यक्रिय इत्यनुशासने हि ल
कारकनिर्देशात्सूत्र आक्षिप्येत्यनुवर्तते [illegible] सूत्राद्धि लकारो [illegible] निर्दिष्टो तयोरधिलकारमनुवर्त्य लकाराभिहितः कर्ता कर्मवत्
स्यात्। यदि कर्मस्थक्रियो भवतीति कर्मवत्सूत्रारंभः पर्यवस्यति। अतो लकारेण कर्त्रभिधाने कर्मकार्यं न प्रसज्यते। अत एव कृत्यक्तखल
र्थप्रत्यया अपि [illegible] कर्मकर्तरि न भवन्ति कर्तुर्लकारेणाभिधानात्। कर्मत्वातिदेशाप्रवृत्तेः। अत एव यस्त्वयमेव भेत्तव्यं भिन्नं सुभिदं वा कुशूलेनेत्या
दौ भावार्थानां तव्यक्तखलर्थानां योगे कर्तरीति नेत्येव प्रमाणम्। ननु कोऽसौ निर्वर्त्यविकार्यप्राप्याणां कर्मणां विशेष इति पृष्टे। कथ्यते। य
दुत्पत्तिस्वरूपेण फलेन व्याप्तिमज्यते। तन्निर्वर्त्यं विकार्यं विकारैः प्राप्यमतोऽन्यथा। यत्कर्मोत्पत्तिस्वरूपेण क्रियाजन्यफलेन संसृ
ज्यते तन्निर्वर्त्यं नाम। यथा कटं करोतीत्यत्र उत्पादनार्थककरोत्यर्थफलीभूतोत्पत्तिसंसृष्टः कटः। [illegible] विकारेण त्वर्थफ
लेः संसृज्यते तद्विकार्यम्। विकारस्तु क्वचिन्नाशस्वरूपः। यथा ग्रामं हिनस्तीत्यत्र ग्रामः। क्वचिन्नाशानुकूलोऽवयवविघटनादिः

तृणं छिनत्ति कुण्डलं भिनत्तीत्यादौ न तु कुण्डलादिः उत्पत्तिविकारभिन्नेन फलेन संसृष्टं कर्मप्राप्यम्। यथा ग्रामं गच्छति सूर्यं पश्यतीत्यादौ सं
योगविषयत्वाधिकरणं ग्रामसूर्यादिः। हरिः। सती वा विद्यमाना वा प्रकृतिः परिणामिनी। यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते। प्रकृतेस्तु वि
वक्षायां विकार्यमित्येकपक्षमुदाजहार। यस्य कर्मणः प्रकृतिः समवायिकारणं परिणामितयोपादानतया नोपादीयते। ननु किं पा
फलोत्पत्तिमन्निर्वर्त्यं कर्म। यथा कटं करोतीत्यत्र कटः। ननु असदपि कटोपादानं वीरणं तथात्वेन विवक्ष्यते। यत्र च प्रकृतिरुपादीयते
तद्विकार्यं। यथा कनकं कुण्डलं करोत्यत्र कुण्डलं। कनकपदं कनकोपादानेनाक्षणिकं कुण्डलपदसमानाधिकरणम्। अथवा उपादा
नत्वं साध्यता कर्मोर्थः। तत्रोपादानत्वेन कनकस्य साध्यत्वेन कुण्डलस्यान्वयः। तथा च कनकोपादानकः कुण्डलसाध्यकः प्रयत्नो
वाक्यार्थः। विकार्यकर्मणि प्रकृतिर्द्विविधा क्वचित्सती उपादेयतुल्यकालिकी यथा वीरणं कटं करोति कनकं कुण्डलं करोति वेणुद
लं वक्रं करोतीत्यादौ क्वचिदविद्यमाना कार्यासहवृत्तिः यथा काष्ठं भस्म करोति तण्डुलानोदनं पचतीत्यादौ। अत्र ध्वंसउत्पत्ति
श्च फलविषयार्थः। काष्ठध्वंसस्य भस्मोत्पत्तेश्चानुकूलो व्यापारो वाक्यार्थः। पचेरपि विक्लित्तिमिश्रणमिश्रपदार्थः तण्डुलविक्ले ७६

दिका ओदनो त्यादिका क्रिया वा क्यार्थ। प्रकृतित्वं तु काष्ठस्य परंपरया व्यावहारिकमिति तदर्थः। पक्षान्तरमप्याह। हरिरेवा केचिदन्यथा निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम्। यदसञ्जायते सद्वा जन्मना यत्प्रकाशते तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्। प्रकृत्युच्छेदसंभूतं किंचित्काष्ठादिभस्मवत्। किंचिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्। इति। पूर्वमसतस्वसत्वमध्यस्तसमयसंबन्धस्य समयसम्बन्ध उत्पत्तिरिति वैशेषिकादयः। कालिकविशेषणतासामान्येन न कोपि कुत्रापि समये संसृष्टः। दैशिकसंसर्गभेदेन कालिकविशेषणतानां भेदावश्यकत्वात्। अतएव गगनावयवावच्छेदेन संयोगसंसर्गावच्छिन्नकालिकसंसर्गतावच्छिन्नप्रतियोगिताको भावो गोमत्यपि काले वर्तते न तु समवायसंसर्गावच्छिन्नकालिकविशेषणतासंसर्गेण। इदानीमवयवेषु समवायेन गौर्न तु संयोगेनेति प्रतीत्याकारः। गगनावच्छेदेन गवाभावस्य विषयीकरणात्। अवयवे संयोगेन गवाभावस्य व्याप्यवृत्तितया कालावच्छिन्नत्वासंभवात्। अतएव चिरध्वस्तस्याप्यनुभवयागादेः भावनासुकृतादिसंसर्गावच्छिन्नकालिकविशेषणतया स्वर्गस्मरणव्यवहितपूर्वक्षणवृत्तित्वेन तत्कारणत्वं सूपपदम्। तथा च ध्वंसप्रागभावादिस्वरूपदैशिकसंसर्गावच्छिन्नकालिकेन सर्वस्मिन्नपि का

ल्पेप्रत्यासादस्यैवसर्वोभावइतिनाभावोविद्यतेसतः जन्मतुप्रकाशएवप्रकाशस्तुसमवायतादात्म्याद्यवच्छिन्नकालिकविशेष
णतयाप्रथमसमयसम्बन्धइतिकापिलाः।यदाहहरिर्द्वाउत्पत्तेःप्रागभावोबुभूवस्थानिबंधनः।अविच्छः सतोन्यैवकर्त्ताभवति सद्
जन्मनः।कारणंकार्यभावेनयदावाद्यवतिष्ठति।कार्यशब्दंतदालब्ध्वाकार्यत्वेनोपजायते।यथाहुःकुटिलीभावोव्यग्राणां
वासमग्रता।तथैवजन्मरूपत्वंसतामेकेप्रचक्षतेइति।एवंवाअसतःसत्त्वंसतःप्रकाशोवाभवत्युत्पत्तिः धात्वर्थफलोत्पत्तिमन्
निर्वर्त्यंकर्मयथाघटंकरोतिओदनंपचतीत्यादौघटौदनादिः।यथावाकनकंकुण्डलंकरोतीत्यत्रकुण्डलादिधात्वर्थफली
भूतविकारसंसृष्टंविकार्यंयथाशत्रुंहिनस्तिकाष्ठंभिनत्तीत्यादौशत्रुकाष्ठादि यथावाकनकंकुण्डलंकरोतितंकुण्डला
नोदनंपचतीत्यादौकनककुण्डलादि।प्रकृत्युच्छेदेत्यादिकारिकान्तुपदच्छेदेनसंभूतंनिर्वर्त्यकर्मसाप्रकृतिर्विकार्यक
र्मयथाकाष्ठोच्छेदसंभूतंभस्म।निवर्त्यमित्यतःकाष्ठंविकार्यंसत्यामेवयस्याःप्रकृतौगुणोत्पत्तिर्धातुनाप्रत्याय्य
ते तदपिद्वितीयंविकार्यंकर्म यथासदेवशाणेनाकारस्वरूपंकनकं।अवयवानामारंभकसंयोगमात्रविरोधिनाकर्मणापु ७१

मत्वगणौ त्यक्त्वाविकार्ये कुर्वत्पदस्य भृगं द्रव्यमर्थः । धात्वर्थोपात्तिस्तु धमन्तएवार्थोन्वेति । इत्यर्थिका । प्राप्यं लक्षणमाह हरिदेवः । क्रियाकृ
तविशेषाणां सिद्धिर्यत्र न गम्यते । दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥ तत्क्रियाकृतविशेषा उत्पत्तिक्षयोपचयादयो भावविका
रा एव गणनीयाः । तदेवं वैयाकरणस्य मतं परिष्कृत्य नैयायिकानां मतं कृत्वाप्यते । कर्मत्वघटकोभावाल्प्यत्नेपरतोयतः ।। इति सार्थ
स्ततो भेदसंबन्धाविति नाकिकाः । परसमवेतक्रियाविशेषणधात्वर्थफलसमवायित्वं कर्मत्वं भवति च ग्रामं गच्छतीत्यत्र ग्रामभिन्नसम
वेतायां क्रियायां [illegible]तो फलीभूतेन संयोगावच्छिन्नस्पन्दवाचकस्य गमेरर्थेन संयोगेन संसर्गेण ग्रामः कर्मत्वघटकपदार्थास्तु ग्राम
क्रियाफलानि नामधातुभ्यामेव लभ्यन्ते · प्रतियोग्यनुयोगिभावापन्नस्तु संसर्गमर्यादयाभासन्ते इति न वाचकं पदमपेक्षन्ते ; कर्म
फलयोः सम्बन्धः परत्वस्वरूपो भेदश्चानन्यलभ्यत्वाद्द्वितीयार्थः । प्रातिपदिकार्थविशेषितः सम्बन्धः · फले भेदश्च सामानाधि
करण्येन क्रियायामन्वेति · प्रातिपदिकार्थस्तु भेदेनन्त्रमक्तित्वावच्छिन्नप्रतियोगितयान्वेति · ननु पदान्यपतिपाद्यभेदप्रतियो
ग्यविशेषणधर्मावच्छिन्नस्यापि प्रतियोगित्वस्य संसर्गत्वेविरोधाभावात् · भवतु वा प्रातिपदिकार्थआधाराधेयभावेन भेदे भेदस्तु प्र

तियोगितावच्छेदकतासंसर्गेण क्रियायां विशेषणं विधत्ते गमनषड्डे दोगेमि। ननु भेदांशे शक्तिर्नैर्थिका तदनुभवस्य विवादग्रस्तत्वात्
चैत्रश्चैत्रं गच्छतीति प्रयोगप्रसङ्गश्च परस्या कर्तृसंज्ञया कर्मसंज्ञाया बाधादेव प्रतिहतः संज्ञैव द्वितीयाप्रयोजिका। ननु वस्तु आधेयत्वेऽ
धिकरणादपि द्वितीयापत्तिरिति चेदुच्यते। भूमिं प्रयाति विहगो विजहाति महीरुहम्। ननु स्वामीति निर्देशो भेदस्य च निषिध्यते।
भवति तावत् सर्वजनीनः खगो भुवं गच्छति न त्वमिति प्रयोगः। तत्र खगे भूकर्मकगमनकर्तृत्वं स्वकर्मकगमनकर्तृत्वाभावश्चे
त्युभयम्। अथवा खगकर्तृकं गमनं भूकर्मत्वं स्वकर्मत्वाभावश्चेत्युभयं तु कारेणानन्वर्थ एवानूद्यते। ननु मैत्रो भुङ्क्ते चैत्रस्तुप
चतीत्यत्रेव पूर्ववाक्यविधेयार्थव्यवच्छेदकार्थस्तुकारः। पौनरुक्त्यप्रसङ्गात् स्वपदसमभिव्याहृतद्वितीयानुपादिष्टत्वमागमभि
धानेन द्वाग्गम्यर्थफले द्वितीयान्तार्थस्य स्ववृत्तित्वस्य गमनेनावाससमवेतसंयोगजनकत्वस्य कथं न जानीते बोधो युज्यते। भेदस्य द्वि
तीयार्थतावादे तु विहगवृत्तिभेदप्रतियोगितावच्छेदकत्वमेव गमनेन निषिध्यते। एवं रूपं न गच्छतीत्यत्र गम्यर्थसंयोगे रूपवृ
त्तित्वाभाववत्त्वमप्रतिपाद्यते। ननु तथापि चैत्रो ग्रामं गच्छति न मनुष्यमित्यादिप्रयोगोऽनुपपन्नः गमिफले मनुष्यसमवेतत्वस्य ७८

गमनेमनुष्यान्तरनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्य च निषेधायोगात् । कथं ग्रामे चैत्रो मनुष्यं गच्छतीत्यादिको न प्रयोग इति चेदुच्यते फ-
लान्वयिनि वृत्तत्वे भेदेपि वृत्तित्वं तु फलान्वयिभेदः प्रतियोगितावच्छेदकतया व्यापाराव्यापारान्वयीति चैत्रो मनुष्यं गच्छतीति न प्रयोगः
वृत्तित्वान्वितमनुष्यव्यक्तेर्भेदान्वयायोग्यत्वात् चैत्रो न मनुष्यं गच्छतीत्यत्र तु तन्मनुष्यवृत्तिसंयोगजनकत्वविशिष्टस्पन्दवत्त्वे तन्मनु-
ष्यनिष्ठान्योन्याभावप्रतियोगितावच्छेदकं तावदभावकूट एव नञा प्रतिपाद्यते भवतु वा स्वसमवेतसंयोगजनकत्वस्ववृत्त्यन्यो-
न्याभावप्रतियोगितावच्छेदकत्वोभयसंसर्गावच्छिन्नप्रतियोगिताको मनुष्यसामान्याभाव एव नञा बोध्यः । द्वितीया तु संयोगेन
घटो नास्तीत्यत्र संयोगादिपदमिव प्रतियोगितावच्छेदकसंसर्गानुवादकतया साधुः एवमेव चैत्रस्यैवायं भ्राता इत्यादौ चैत्रान्यनि-
रूपितानि यावन्ति भ्रातृत्वानि तेषां भ्रातृत्वसंसर्गेण चैत्रान्यसामान्यस्य वा व्यवच्छेद एवकारप्रतिपाद्यः भ्रातृत्वं तु स्ववृत्त्यन्यो-
न्याभावप्रतियोगितावच्छेदकास्वजनकपुरुषप्रयोज्यतावच्छेदिका च या नाडीरूपा वा नरजातिस्तद्वत्त्वमिति बोध्यमधिकार-
विवरणे प्रपञ्चितमस्माभिः । स्यादेतत् । अधिकरणत्वनिरूपकतयाधेयत्वं वा स्वरूपेण फलान्वयि न द्वितीयार्थः कान्तं

पचतीति प्रयोगप्रसङ्गात् । पचिफलस्य काष्ठनिष्ठाधिकरणतानिरूपकत्वात् । तत्तद्धातुसमभिव्याहृतद्वितीयायास्तत्तत्संसर्गावच्छिन्नाधि
करणत्ववाचकत्वेनाश्रयानन्वयप्रसङ्गात्तद्रूपमधिकरणं द्वितीयार्थः । तस्य तत्तद्धातूपात्तेन तत्संसर्गविशेषेणान्वय इति व्युत्पत्तिवैचित्र्य
मिति चेन्न भिन्नभिन्नतत्तच्छब्दप्रवृत्तेः सर्वकर्मसु भिन्नभिन्नैक्यासम्भवाच्च न द्वितीयाश्रयार्थिका । द्वितीयादिप्रत्ययानां विश्वस्मिन्नेवान
वच्छिन्नशक्तिः तया स्वरूपेण स्मारिते वस्तुनि तादात्म्येन प्रातिपदिकार्थान्वयप्रतिकूल्यो न सम्भवति स्वरूपतस्तत्तत्पदार्थविषय
कबुद्धित्वावच्छेदेन द्वितीयापदजन्यत्वावगाहिनो नित्यसङ्केतस्य सम्भवे तु लोके तद्ग्रहणासम्भवात् । स्वरूपेण विश्वस्यानु
पस्थितेः नापि विश्वत्वमुपलक्षणीकृत्य सङ्केतग्रहः तादृशेन रूपेण स्वरूपतो विश्वस्य स्मारणासम्भवादेवं न कोऽपि शब्दः प्रवृत्तिनि
मित्तविरहितशक्तिमान् । अथ सर्वकर्मसाधारणं किमपि निमित्तमाश्रयणीयम् । तत्राधिकरणत्वं नाम तत्तत्संसर्गावच्छिन्नानु
योगित्वस्वरूपं संसर्गभेदाद्भिद्यत एव न तु सकलसंसर्गानुगतं सम्भवदपि गगनाभावादितुल्यशरीरात्माघटाभावादिभिरवि
निगम[illegible]यानुगतत्वानत्वापादकं [illegible]न च तत्स्वरूपेणाभासितुमर्हति अजातित्वात् । तस्माज्ज्ञातत्वजातिरिव त्वराङ्माश्रयपल ७९

समानकं स्याद्धाऽभावादिवत्तद्वनस्वरूपेण भासते। तस्मात्संसर्गभेदभिन्नमधिकरणत्वमाधेयत्वं वा द्वितीयार्थः। यत्तु अधिकरणत्वा
देः शक्यत्वे तद्भिन्नधर्मान्तरशक्यतावच्छेदकमावश्यकमित्यनुगमकग्राहितामधिकरणत्वस्वरूपविशिष्टत्वमेव किमिति न
णच्येदिति तु तन्न [illegible]नासिद्धान्ताभिज्ञत्वद्योतनमात्रं। ननु तथापि भावप्रधानमाख्यातमिति निरुक्तस्मृत्या क्रियाया एव प्राधान्य
मुपाख्यते तत्कथं नैयायिकाद्यभिमतः प्रथमान्ताद्यर्थविशेष्यको वाक्यार्थबोधो न विरुध्यत इति चेत् भावप्रधानमाख्यातमिति
वचनस्मृतेः। आख्यातार्थेषु भावस्य प्राधान्यमनुशिष्यते भावप्रधानमाख्यातमिति निरुक्तस्मृतेराख्यातार्थेषु संख्यावर्तमानत्वा
दिकेषु भावनाया एव धात्वर्थप्रतिप्राधान्यमर्थः। भावपदेन भावनाया अभिधानात्। अथाचार्यकल्पा इतिवत्पचन्तिकल्पाः
पुरुषा इति प्रयोगप्रसङ्गः प्रधानप्रकृत्यर्थस्य ईषदपरिसमाप्तपाककर्तुः संख्यान्वययोग्यतया तिङन्ताया एव सुबुत्पन्नाया
अपि बहुत्वसंख्याया अन्वयसंभवादिति चेत् स्यादयं कर्त्राख्यातार्थतावादिनां दोषः। भावनानुभावरूपामेव तिङन्तानामपि
न संख्यान्वयमर्हतीति साधुत्वार्थकमेकवचनम्। पचन्तिकल्पं पुरुषा यान्ति रूपं जना इति न्यायिकानामिवास्माकमप्ये

कवचनं ध्रुवम्। ननु पश्य मृगो धावतीत्यत्र मृगस्य धावनक्रियां प्रतितस्यैव कर्मतया दर्शनेऽन्वयः स्वीकर्त्तव्यः अन्यथा वाक्यभेदप्रसङ्गात्
तथा च मृगाद्द्वितीया दुर्वारा स्यात्। धातोरिव पर्युदासाभावेन प्रातिपदिकत्वात् इति चेत्सत्यम्। वाक्यैकवाक्यतेयमत्र वाक्यार्थः कर्म
त्वेन विवक्षितो ननु वाक्यं प्रातिपदिकमिति कथं द्वितीया प्रसज्येत वाक्यस्यार्थवत्वाभावात् कृत्तद्धितसमासश्चेति नियमविधेर्वा
न प्रातिपदिकम्। अत एव देवाकर्णाय संग्रामे वाप्येना सादिताः शराः मालिनं ते वपुः स्नाया इत्यादौ वैकवाक्यता। सं[illegible]र्थिः
करणकर्वापकर्तृकासादनकर्मणां शराणां विशिष्टविषयतास्वरूपकर्मत्वसंसर्गेणैव संबोध्यायामाकर्णनक्रियायां मलिने
स्य वपुर्विशेषणभागोपसंक्रान्तिविशिष्टहेतुतासंसर्गेण स्नाने चान्वयेऽपि न कर्मणि द्वितीया न वा हेतौ पञ्चमी वाक्यस्य प्रातिपदि
कसंज्ञाविरहात्। एवं धावतो मृगस्यापि विशिष्टकर्मतया दर्शनान्वयेन तत्रो द्वितीया। कालत्वपरित्यक्तेन गां वत्सादोपरित्यक्तेव
न कर्तृगवां कालत्वेन कर्मतयान्वयादेकवाक्यत्वम्। ननु तथापि केन विनिगमकेनेदं परिच्छिद्यते। यत्प्रथमान्तार्थ एव प्रधानमि
ति चेदुच्यते। पश्यति पुरुषस्तस्य पादयोरभिवादयेत्यादौ प्रथमान्तार्थः प्राधान्यान्नरुध्येत तदा। यदि तिङन्तप्रथमान्तयोः प्रथमा

न्तार्थस्यप्राधान्यं नस्यात्तदाप्रयातिपुरुषइत्यत्रपुरुषस्तदानपरामृश्येत गुणीभूतस्यार्थस्यतदपरामर्षासंभवात् अन्यथादृष्टौनेरा
जमानज्ञातस्येवामीनुरुः मा इत्यत्र राज्ञस्तच्छब्देन परामर्शप्रसङ्गात् । अतएवानुमानेनिरूप्यते इत्युपक्रम्यतथानुमितिरितितदा
निरूपणायपरामर्शासंभवात् तत्र निरूपणीयेऽनुमाने इति प्राहुरुपाध्यायाः । अत्र गन्धातुसमभिव्याहृतद्वितीयायाः संयोगविभागा
द्यर्थः । द्वितीयासाकांक्षधातुत्वमेवसकर्मकत्वमिति अनुकूव्यापारस्यधात्वर्थतावादिनः परेतुधात्वर्थफलावच्छिन्नव्यापारे द्वितीया
र्थफलान्वयमभ्युपगच्छन्ति । तदुभयमपि चिन्त्यम् । शाब्दिकतार्किकयोर्मतमुपदर्श्य भाट्टदर्शनसिद्धान्तः प्रस्तूयते । आख्याता
र्थभावनायां वदन्ते कारकान्वयः । भाट्टाः कर्मत्वं कर्तृत्वं घटत्ववदखण्डमिति निरासन्ति । आख्यातार्थभावनायां प्रधानभूतायां कारका
णामन्वयः ननु धात्वर्थे तस्यापि भावनायामन्वयात् कारकैस्तया परा[illegible]भो कारकाणां परस्परमन्वयायोगात् । कारकं तु कर्मत्व
कर्तृत्वादिकमखण्डमेव पदार्थः । अतएवाध्वर्युयजमानयोर्वाक्संयमनभावनाकर्मत्वं दर्पस्तोः कर्तृत्वं च व्यासज्यमित्युप
पद्यत इति भाट्टाः । नत्वाख्यातस्य फलव्यापारोभयवाचित्वाभावात् सकर्मकत्वमाख्यातार्थभावनायामनुपपन्नमिति नैवम्

करोतिरुत्पादयतिसाधिर्भावयतिर्जनिः। विवृण्वते तिङन्ते नोत्पत्तिव्यापारयोरसौ। तिङ् अन्वयस्तावदुत्पत्तिं प्रत्यनुकूलव्यापारे उत्पत्तिव्या
पारयोर्वा वर्त्तते। एकपदार्थयोरन्वयबुधावनुकूलत्वस्य संसर्गतयैव लाभसंभवात्। अत एवोत्पत्तिपरिच्छिन्नव्यापारवाचिनः करोत्यादय
आख्यातं विवृण्वते भावनावयवोत्पत्त्याधारत्वेन समन्वयम्। कर्मतद्भवतेकाभिधानवः कुत्रचित्क्रियः। पचतीत्यत्र पाकङ्करोत्युत्पादयति
साधयति भावयति जनयतीत्यादि विव्रियमाणस्याख्यातस्यार्थे उत्पादनाया मेकदेशीभूताया उत्पत्तावाधाराधेयभावेनान्वितः पाको
धात्वर्थ एव कर्म। अत एव विवरणवाक्ये पाकपदात्कर्मानुवादिका द्वितीया। यत्र चोदनस्य पचतीत्याख्यातार्थीभूतायामुत्पत्तिभावनान्वयो
स्यमोदनादिवनित्वं। द्वितीयोपस्थापितं तत्र क्रियाप्राप्तिपरिकानामर्थ एव कर्म। धात्वर्थस्य तत्र करणत्वेनौदनोत्पत्तावन्वयः। अ
त एव पाकेनौदनं भावयतीत्येवं तादृशवाक्यस्य विवरणम्। अत एव भावनाकर्मभूतस्य धात्वर्थस्य विशेषणेऽग्निहोत्रञ्जुहोती
ति द्वितीयाप्युपपद्यते। यत्र निरुक्तस्थले न फलान्तरं भाव्यत्वान्वययोग्यं तत्र निरुक्तया साध्यकर्तव्यताको जुहोतीति धात्वर्थ एव भा
व्यतया कर्म। अत एव जुहोतीति समानाधिकरण्येन कर्मनामधेयाग्निहोत्रपदे द्वितीया। कर्मविशेषणपरत्वान्नीलं घटमानयेत्यत्र नील

८२।११६

पदद्वये स्वपपद्यते। विना भाव्यान्तरं येन सोपपन्ना प्रवर्त्तनात्मकं वा कर्मकारणीभूय तत्र क्रियान्वयः। यस्यां भावनायां स्वर्गादिभाव्यं विना निष्फ-
लत्वेन नान्विद्रूपा न प्रवर्त्तनाया अन्वयसंभवः· धात्वर्थमात्रस्य करणत्वेन भाव्यत्वान्वयायोगात्· तत्र क्रियायां न कर्मत्वेनान्वय एकधर्मावच्छे-
कर्मान्तरस्यानाकांक्षितत्वात् किंतु करणत्वेन· अतएव यजेतेत्यत्र स्वर्गरूपेण कामपदोपात्तेनाक्षिप्ते नावा भाव्येन सकर्मिकायां भाव-
नायां करणतया यागादेरन्वयः· तथा च स्वर्गोद्देश्ययागकरणिकायाउत्पत्त्यनुकूलो व्यापारः प्रवर्त्तनागोचर इति यजेतेत्यत्र वाक्या-
र्थः। अतएव यजेतेत्यस्य यागेन स्वर्गं भावयेदिति विवरणम्। यजत्यर्थसमानाधिकरणो हि विशेषणे तृतीया दृश्यते· यागकरण-
त्वानुवादिका ज्योतिष्टोमेन यजेतेत्यत्र कर्मनामधेयाज्ज्योतिष्टोमपदात् तृतीया श्रूयते· सा च यागभावनयोः संसर्गतयाल-
ब्धस्य करणत्वस्यानुवादकत्व एव संघटते करणपदसमानाधिकरणे नाम्नि तृतीयायाः क्लृप्तत्वेन दण्डेन गामानयेत्यादौ दर्शना-
त्· नन्वेवं गोदोहेन पशुकामस्य प्रणयेत्· दध्नेन्द्रियकामस्य जुहुयादित्यादौ प्रणयनहवनादेर्धात्वर्थस्य न कारणतया भावनान्व-
यः। दधिगोदोहादिना करणेनावरुद्धायां कारणाकांक्षानुदयात्। नापि कर्मतया पश्विन्द्रियादिभाव्यावरुद्धायां भाव्या

नरेनिराकांक्षत्वादिति चेन्न क्वचित्सकर्मकोपात्तक्रियाया अनुवादकः। धातुरन्वयवैधुर्यादाख्यातं नन्वपेक्षते। यागप्रकरणान्नरादुपस्थितो
धात्वर्थः शाब्दोपात्तभावनाकरणकर्मणी न तु केवलस्य प्रत्ययस्य साधुत्वात्। आख्यातप्रयोगमात्रप्रयोजनको धातुरनुवादकः। ननु तदर्थो
वाक्यार्थ इति विशेषे भावनायां कर्मत्वकरणत्वान्यतरसंसर्गेण क्रियाया अन्वयात्। तयोश्चाकांक्षाविरहात्। हंतैवमप्राप्तधात्वर्थकेपक्षे पात्र
करणकर्मके सोमेन यजेतेत्यादौ क्रियाया भावनान्वयो दुर्घट इति चेन्न। सोमादिशब्दे मत्वर्थलक्षणामवलम्ब्य वः। विशिष्टविधिरगापिभा
वनाकरणं क्रिया। सोमेन यजेतेति वाक्यं सोमगुणविशिष्टं यागमेव भावनाकरणतयाभिधत्ते। तदुपपादनाय सोमपदस्य सोमवतिल
क्षणा। स्वर्गकामो यजेत सोमवता यागेन स्वर्गं भावयेदिति वाक्यार्थः। नन्वेवमुत्पत्त्यवच्छिन्नव्यापारे भावनायामुत्पत्त्यंशेऽधिकरणतयान्वि
तं कर्म करणतयान्वितं वा फलांशेऽधिकरणत्वेनान्वितः कर्तेत्यधिकरणत्वमाधेयत्वं वा करणत्वं कार्यत्वं वा तृतीयादीनामर्थोऽस्तु कृतम
घगड कर्तृत्वकरणत्वकर्मत्वादिस्वीकारेणेति चेदुच्यते। भावनाकर्मणि स्वर्गे व्रीहौ धात्वर्थकर्मणि। कर्मानुगतत्वं नैवाखण्डं कर्मत्व
मिष्यते। स्वर्गकामो यजेतेत्यत्र स्वर्गो भावनायां व्रीहीन् वहतीत्यत्र व्रीहिर्धात्वर्थे अवहनने तस्य कर्मत्वमनुगतत्वप्रतीयते। व्यवह्रियते च न
त्वधात्वर्थतावच्छेदके नतिङर्थतावच्छेदके न वा फले न संबन्धो नानुगमेन निर्वक्तुं शक्य इति पदप्रमाणकमकर्मकत्वमखण्डमनुग ८२

न्मप्नुयेनत्यम् । एवं कर्मत्वकर्तृत्वादेरुपरागत्वादेर्वैविध्यात्क्वचित्कर्मत्वमध्वर्युयजमानयोः । दृष्टसोऽपि कर्तृत्वं व्यासक्तमिति युज्यते ।
अध्वर्युयजमानौ वाचयन्तु न ह्यत्राध्वर्युयजमानयोः कर्मत्वं क्षौमे वसानावग्नीनादधीतामित्यत्र दंपत्योः कर्तृत्वमेकमेव द्वयोः प
र्याप्तं तद्वत्साधिकविधौ बोध्यमिष्यते । स्यादेतत् । मतद्वयेऽपि घटं जानातीत्यादावावरणभंगः प्राकट्यं विषयतास्वरूपं वा धात्वर्थफल
मजन्येऽपि व्यापारविशेषरूपधात्वर्थान्तरे फलपरिभाषामादाय कर्मसंज्ञाप्रवृत्तेः । अखण्डकर्मत्वपक्षे द्वितीयान्तराभिमतकर्मत्व
व्यवस्थैव तस्याभ्युपगमात् । एवमपि भगवान् भगवन्तं जानात्यात्मानमात्मना वेत्तीत्यादौ भगवतः स्वेतरस्य वा भेदाद्व्यापारफल
योस्तुल्याधिकरणत्वात् परया कर्तृसंज्ञया कर्मसंज्ञायाः कुतो न बाधः । कथं वा तत्र क्रियायाः परसमवेतत्वम् । यत्त्ववच्छेदकभेदादेक
स्यापि कर्तृत्वकर्मत्वोभयं न विरुद्धमिति । तन्न । भेदाभेदवादोपगमे चैत्रश्चैत्रं गच्छतीति प्रयोगापत्तेस्तथापि दुर्वारत्वादिति चेत्सत्य
म् । आधेयत्वं च भेदं च युगपद्ब्रुवतोऽप्यमः । जानासि त्वां त्वमित्यादौ हानेन लक्षणा । यद्यपि त्वमेव त्वां जानासीत्यादौ विषयता
स्वरूपफलगम्याधेयत्वमात्रमभिधया प्रतिपादयितुममानशक्यते । तस्य पुण्यवनाक्षिपद्वदेकयोक्त्या फलमाधेयत्वं कर्मा

द्वितीयाभिभेदंचाभिधातुमेवसामर्थ्यात्· तथापिभेदांशापहारेणाधेयत्वमात्रेद्वितीयायालक्षणासंभवत्येववचनर्वैनिष्फानन्तुव
च्छिन्नांशापहारेणविधेरविवक्षयेनादोषस्तथाचात्रभेदशानेनवाक्यार्थबुद्धिरितितार्किकसरणिरेवश्रेयसी· ननुलोकेविभ
क्तेनलक्षणा· तथाहि· वार्त्तिकम्· सुपांकर्मादयोप्यर्थाःसंख्याचैवतथातिङाम्· प्रसिद्धोनियमस्तत्रनियमःप्रकृतेषु
वेतिसुपांतिङांचयथानुशासनंकर्मादिकारकमेकत्वादिसंख्याचार्थः· तदनुशासनानिनियमपर्यवसायीनिस्व
नियमएकवचनमेवैकत्वंद्विवचनमेवद्वित्वम्· द्वितीयैवकर्मत्वंप्रतिपादयतीत्याकारस्तेनद्वितीयाभिन्नेकर्मत्वबोधक
त्वाभावःफलति· नन्वेवंद्वितीयायाश्चेत्कर्मोपहापगमनमपिबोधयेत्तर्हिनियमभंगप्रसङ्गविरहादित्यतःपक्षान्तर
माह· नियमःप्रकृतेषुवेति· तथाचद्वितीयाकर्मण्येवेतिनियमशरीरम्· तथाचयावन्तोनुशासनासिद्धाद्वितीयार्था
स्तस्मात्प्रकृतादन्यमर्थंद्वितीयानप्रतिपादयतीत्यर्थः फलितमितितस्यचार्थकस्यविवरणमतःकथमनन्तरो
[illegible]ककर्मैकदेशोद्वितीयासाधुरितिचेन्न। विभक्तिःप्रकृतेष्वेवेत्येवंनियमवादिनिचतुर्थचरणेनस्थांवाकारेणाहवा ८३

र्त्तिकम्।कथितवार्त्तिकचतुर्थचरणे अनास्थायां वा कारः विभक्तिः प्रकृते ह्येवेति नियमशरीरस्यासंभवदुक्तिकत्वात्. न चाहि विभ
क्तित्वावच्छेदेन प्रकृतभिन्नप्रतिपादकत्वाभावः प्रकृतप्रतिपादकत्वं च प्रतीयते. ननु विभक्तित्वसामानाधिकरण्येन विभक्तिः कर्मण्ये
वन्नाद्यो वाचकरूपेति प्रयोगात्।उद्देश्यतावच्छेदकावच्छेदेनोभयभागयोग्यत्वस्यैवैकारस्य साधुत्वात्. दृश्यते च निरर्थका अपि निपा
तसमभिव्याहृताः सुपः अव्ययार्थानामसत्त्वस्वरूपत्वेन संख्यान्वयेप्ययोग्यत्वात्।प्रातिपदिकार्थः सत्ता सा च सुपामर्थ इति प्रागेव नि
राकृतम्. ननु भवतु तर्हि प्रकृतेष्वविभक्तिरिति परिसंख्या विभक्तिः प्रकृतेतरं न प्रतिपादयतीति तस्या एव छन्दसि प्रतिप्रसवः क्रियतेऽ
सुपां सुरिति।तेन स्वर्गकामो यजेतेत्यत्र प्रथमैव।स्वर्गस्य यागकरणकभावनाकर्मत्वं लक्षणया प्रतिपादयन्त्यपि नाननुशिष्टवि
षया भक्षीणि मे दर्शनीयानि सुन्दराः पादाः संपन्ना व्रीहय इत्यादेर्जातिगतैकत्वाभिप्रायकं बहुवचनमपि जात्याख्यायामेकस्मि
न्बहुवचनमन्यतरस्यामित्यनुशासनप्रतिप्रसूतमेवेति नास्त्यननुशिष्टे विभक्तीनां लक्षणापीति चेन्न हि भेदाधेयत्वयोः शक्तिरभो
नेकार्थसुदृष्ट्या द्वयोराधेभेदस्य वाचेन्यस्य समन्वयः।कर्मणि द्वितीयेत्यनेन सूत्रेण कर्मघटकेषु क्रियाफलतदधिकरणानामन्य
त्वम्पतया भेद आधाराधेयभाव अभेदे शक्तिसंशाक्य इति प्रतिपाद्यते।शक्तिर्न योगपद्येन पुष्पवन्तपदवत् द्वयाहकाभावात्तर्किंनु

नानार्थरीत्याकांक्षावैचित्र्याद्वैकपदोपात्तयोरपि भेदाधेयत्वयोर्योग्यताद्येनान्वयव्युत्पत्त्यनुप्रवेशऔत्सर्गिकः· यत्र कर्त्रेकशोरकर्तृमात्रेणा
फलं यदधिकरणं भेदान्वययोग्यः कर्ताऽत्र तु फलस्य व्यापाराधिकरणमात्रगतत्वेन भेदान्वयबाधस्तत्राधेयत्वमात्रं द्वितीयया
शान्येव प्रतिपाद्यते न चानुशासनव्यत्यय इति बाधस्यापेक्षद्वृत्तित्वेनाभिधायामेव लक्षणाव्यपदेशः। बाधश्चात्र फलाधि
करणभिन्ने व्यापारे न वन्नेतरति सामान्याकारेणोपतिष्ठते नह्यनियतवृत्तिकसंयोगादिफलके धातौ नियमेनोभयान्वय ए
व· तेन चैत्रश्चैत्रं गच्छतीति न प्रयोगः· यत्र चैकमात्रवृत्तिविक्लित्यादिफलं तत्र कर्मगतव्यापाराभिधायिनि धातौ कर्मवत्कर्म
णा तुल्यक्रियइत्यनेन फलतो द्वितीयाप्राप्तिर्निषिध्यते· कर्मवदिति सूत्रं तु निर्वर्त्यविकार्यकर्ममात्रविषयकमित्यन्यत्र प्राप्यक
र्मगतव्यापाराभिधायिनि धातौ ज्ञानास्वादेष्वाधेयत्वमात्रार्थिका द्वितीया नानुपपन्नेत्यधिकं सकर्मकत्वलक्षणे तु संधे
यम्· तथा धातोर्बुद्धिः फलं तदनुकूलो व्यापारः क्रियावृत्त्यन्वयित्वविषयत्वे द्वितीयालाक्षणिको न कर्मसंज्ञामपेक्षते इति
स्वं जानातीत्यादौ कर्तृसंज्ञावत्त्वेऽपि विषये द्वितीयानानुपपन्ना नियमः प्रकृतेष्वेवेति वार्त्तिकं तु निरूढलक्षणास्वरूपां

वृत्तिमेवपुल्लते सुनियमयति। इयं तु स्वारसिकी विभक्तेर्विषयत्वादौ लक्षणा। एवमेव स्वेहिनस्तीत्यत्र ध्वंसं तदनुकूलं व्यापारं स्वाभिदध
न् हिंसेरर्थे ध्वंसे फले द्वितीयालक्ष्यं प्रतियोगित्वमप्यन्वेति· न चापेक्षते प्रतियोगिनि कर्मसंज्ञामाकडारादेका संज्ञेति कर्तरि तदस
म्भवात्· अभिधेयमाधाराधेयभावमात्रं तु द्वितीया न प्रभवति प्रतिपादयितुं भेदमाहात्म्येनास्याः स्वाभिधेयप्रतिपादकत्वात्· अ
तो न चैत्रर्थेत्रं गच्छतीति प्रयोगः· न चैवं स्वारसिकलक्षणाया अनियमत्वे द्वितीययागमनमपि प्रतिपाद्येतेति वाच्यम्।
स्वारसिकलक्षणायामपि भट्टपादैः प्रयोगस्य बाधकत्वोपन्यासात्· यदाहुः· क्रियन्ते सांप्रतं काश्चि[illegible]काश्चिन्नैवाप्रयोगतः
तुदाह इति· रूपं वस्त्रमित्यप्रयोगेन क्रियन्त इति कारिकान्वयः। नेयार्थतापीयमेवमुद्दप्रयोग[illegible]ति हता लक्षणा प्रयोजन
रहितत्वमेव नेयार्थताप्रयोजकमिति प्रयोजनप्रत्ययजननयोग्यतावच्छेदकसंलक्षणात्वविरहपरमिति तत्तत्रदूष्य
व्यमित्यपि वदन्ति· अकथितं चेति सूत्रेण विषये कर्मसंज्ञा ताप्यते· यतस्तु प्राधान्येन फलवाचिनो धात्वर्थफलाभा
वादकर्मकत्वान्न विषये कर्मसंज्ञेत्यपरे। धातोरुत्सर्गतो वृत्तिः फलव्यापारयोर्द्वयोः· विद्यन्ते केचनत्वर्था दुह्याचप्रच्छि

दुधादयः उत्सर्गतो धातूनां फलव्यापारंवर्थोऽदावेति प्रपंचितप्रायं दुहादयस्तु न्यर्थास्तथाहि विभागः स्यन्दनं व्यापारश्च दुहेरर्थः स्य
न्दनत्वं द्रवत्वजन्यतावच्छेदिका क्षीरादिक्रियावृत्तिजातिः गां दोग्धि दुग्धं गोपाल इत्यत्र गोविभागो जनकतया क्षीरस्यन्दने·त
च्च तथैव गोपालव्यापारे चेति दानं प्रतिश्रवः व्यापारश्च याचेरर्थः देयत्वेनाभ्युपगमः प्रतिश्रवः राजानं कनकं याचते इत्यत्र रा
ज्ञः समवेतदानमनुकूलतया कनकविषयके प्रतिश्रवे स च स्वलिप्साप्रकाशके देहीति वाक्यादौ भिक्षुव्यापारे संसृज्यते कन
के विषयतेवा द्वितीयार्थः । एतज्ज्ञापकसिद्धे वा विषयस्य कर्मसंज्ञा समवायेन दानप्रतिश्रवयोः सामानाधिकरण्येपि समवाय
विषयत्वाभ्यां वैयधिकरण्यमपीति भवति प्रतिश्रवांत्रो धातोः सकर्मकत्वं प्रतिश्रवो व्यापारश्चेत्युभयमेव धातोरर्थः प्रतिश्रव
श्च समवायिना विषयेण च कर्मत्वमाकांक्षतीति द्विकर्मकोप्याचिरित्यपि वदन्ति · उत्तरमनुशास्यत्वमनुयोगश्च प्रश्नः सा
मान्यवति विशेषबोधकं वचनमुत्तरं जिज्ञासितत्वेन प्रतिपत्तिरनुशास्यता किमादिशब्दघटितवाक्यादिरनुयोगः । जनप
दं पंथानं पृच्छतीति पथिक इत्यत्र परंपरया जननपदाश्रितमुत्तरं पथिविषयकजिज्ञासितत्वप्रतिपत्तौ सा च कः पंथा इत्या ८५

वंधावच्छिन्नव्याप्यवृत्त्याधारतासन्निकर्षः।नचैवंकार्यकारणभावद्वयकल्पनेगौरवमितिवाच्यम्॥अव्याप्यवृत्तिकर्म्मादिवा
स्तुधानुरोधेनतादृशकार्य्यकारणभावद्वयस्यसर्वसिद्धत्वात्।ननुतथापिनीलपीताभ्यांकपालिकाभ्यामारब्धेननीलपीतो
भयात्मककपालेनारब्धस्यघटस्यनीलकपालिकामात्रावच्छेदेनचक्षुःसंयोगेपिपीतोपलंभप्रसंगोदुर्वारः।कपालि
कावच्छिन्नचक्षुःसंयोगस्यतत्समवेतकपालावच्छिन्नत्वनियमेनचक्षुःसंयोगावच्छेदककपालवच्छेदेनेवघटीयपी
ताधारत्वसत्त्वात्।नचतत्रघटनिष्ठनीलपीताद्यवच्छेदकंनकपालंकिंतुनीलपीतकपालिकेवेतिवाच्यम्।तथास
तितत्रकपालावच्छेदेनघटवृत्तिनीलाद्युत्पत्तिवारणायावच्छेदकतासंवंधेननीलाद्युत्पत्तिंप्रतिसमवायसंवंधेननीले
तररूपादेःप्रतिवंधकत्वकल्पनापत्त्यामहागौरवापत्तेः।तत्रकपालेऽवच्छेदकतासंवंधेनघटवृत्तिनीलादेरसत्त्वे
तत्रघटवृत्तिनीलादेरवच्छेदकतासंवंधेनाप्यधिकरणत्वस्यैवदुर्वारत्वापत्तेः।वक्ष्यमाणयुक्त्याऽवच्छेदकतासं
वंधेनरूपोत्पत्तिंप्रतिऽवच्छेदकतासंवंधेनरूपस्यप्रतिवंधकत्वावश्यकतयाकपालनिष्ठरूपावच्छेदकायांकपालिका

नैभ२

२

यांअवच्छेदकतासंबंधेनघटादिनिष्ठरूपान्यत्वेरसंभवादिति चेन्न यांसंयोगस्य कियद्देशव्यापिनीतॅपरंपरयातद्देशभागएवा
वच्छेदकोनतुसंपूर्णावयवइत्युपगमेनकपालिकावच्छिन्नवस्तुःसंयोगस्यकपालावच्छिन्नत्वविरहात् अन्यथा
वक्ष्यमाणव्याप्यवृत्तितामतेप्यवृत्ताकारात्तच्चानुपदमेवस्फुटीभविष्यतिनचैवंतादृशघटस्यनीलकपालिकामात्राव
च्छेदेनवस्तुःसंयोगेनीलोपलंभोपिनस्यात्वस्तुःसंयोगावच्छेदकनीलकपालिकावच्छेदेनाधारत्वाविरहात्क
पालनिष्ठरूपावच्छेदिकायांकपालिकायांअवच्छेदकतासंबंधेनघटनिष्ठरूपान्यत्वेरसंभवात्।प्रतिबंधकसत्वादिति
वाच्यम्।कपालनिष्ठरूपावच्छेदिकायांकपालिकायांप्रतिबंधकसत्वादवच्छेदकतासंबंधेनघटनिष्ठरूपान्यत्वेरसंभ
वेपिवृत्तित्वलाभादवच्छेदकतासंबंधेनतस्यतत्रसत्वेबाधकाभावात्।नहियत्रयेनसंबंधेनकार्यमुत्पद्यतेतत्रैवतेनसंबं
धेनवर्त्ततइतिनियमोस्तिघटादेर्दण्डादिमतिसंयोगसंबंधेनोत्पत्त्यादेशांतरेपिसंयोगसंबंधेनसत्तः।नचतथापिनील
पीतोभयारब्धघटेनीलान्नीलमुत्पद्यमानेनीलावयवावच्छेदेनैवोत्पद्यते।नतुपीतावयवावच्छेदेनेत्यत्राकोनियामक

राम०
२

मितिवाच्यम्।समवायसंबंधेननीलादिविशेषोत्पत्तौस्यात्अथसमवेतत्वसंबंधेननीलादेरसमवायिकारणत्ववच्छेदकतासंबंधेननीलाद्युत्पत्तिंप्रतिसमवायसंबंधेननीलादेरपिहेतुत्वादवच्छेदकतासंबंधेनरूपोत्पत्तौसमवायसंबंधेनद्रव्यमपिहेतुःतेननीलपीताभयारब्धावयविव्यक्तौसमवायसंबंधेननीलान्नीलमुत्पद्यमानमारंभकनीलावयवव्यक्तावेवावच्छेदकतासंबंधेनोत्पद्येतनत्वन्यावयविनिनीलद्वारादोऽप्यनवष्टब्धोदासीनकपालादावेतत्र किंनियामकमितिनिरस्तम्।एवंसमवायसंबंधेनरूपोत्पत्तौसमवायसंबंधेनरूपमिवावच्छेदकतासंबंधेनरूपोत्पत्तावप्यवच्छेदकतासंबंधेनरूपंप्रतिबंधकंतेननीलपीताभयारब्धावयविव्यक्तौसमवायसंबंधेननीलान्नीलमुत्पद्यमानमारंभकनीलावयवव्यक्तावेवावच्छेदकतासंबंधेनोत्पद्येतनतुद्व्यावष्टब्धोदासीननीलावयवइत्यत्रकिंनियामकमितिनिरस्तम्।अवास्थितद्रव्यनिष्ठरूपस्यावयवप्रतिबंधकत्वात्।एतेनसुकुमारकठिनादिनानास्पर्शवद्वयवारब्धेऽवयविनिस्पर्शोत्पादोपपत्त्या

ना१

स्यातः। तत्रापि विनिगमकाभावाद्व्याप्यवृत्तिसुकुमारकाठिन्यादिस्पर्शस्यैवावयविनि अभ्युपगमात्। एवं तिक्तमधुराद्
२ नानारसवदवयवारब्धेवयविनि विनिगमकाभावान्नानैव रसः। सुरभ्यसुरभिनानागंधवदवयवारब्धे चावयविनि विनिग
मकाभावान्नानैव गंध उत्पद्यते शेषं दर्शितदिशावसेयमित्याहुः। नव्यास्तु व्याप्यवृत्तीत्येव तत्र नीलपीतादीनि विजाती
यनानारूपाणि अवयविनि उत्पद्यंते न चैवं नीलावयवावच्छेदेन चक्षुःसंयोगदशायामपि पीताद्युपलंभः पीतावयवा
वच्छेदेन चक्षुःसंयोगदशायां नीलाद्युपलंभः स्यात्। व्याप्यवृत्त्यादिजात्याद्यल्पत्वादिति वाच्यम्। नीलावयवाद्यवच्छिन्नच
क्षुःसंयोगाधारतावत्समवायस्यैव नीलादिग्राहकत्वात्। नीलपीताभ्यां कपालिकाभ्यामारब्धेन नीलपीतोभयकपालेना
रब्धस्य घटस्य नीलकपालिकामात्रावच्छेदेन चक्षुःसंयोगेपि पीतोपलंभप्रसंगः पूर्ववद्वारणीयः। नन्वेवं नीलपीता रम०
दिरूपभेदेन चक्षुःसंयुक्तसमवायस्यानंतकार्यकारणभावापत्त्येतत्पक्षापेक्षया पूर्वोक्ताव्याप्यवृत्तिपक्ष एव साधी २

पात्वंनचपूर्वोक्ताव्याप्यवृत्तित्वसत्त्वेप्यवच्छेदकतासंबंधेननीलपीताद्युत्पत्तिंप्रतिसमवायसंबंधेनप्रातिस्विकरूपेण
नीलपीतादेर्हेतुत्वाभ्युपगमात्। अत्रपक्षेतादृशहानन्तत्वसमपेक्ष्यात्रकार्यकारणभावादितिवाच्यम्। अवच्छेदकता
संबंधेननीलाद्युत्पत्तिंप्रतिप्रातिस्विकरूपेणनीलादेः कार्यकारणभावमपेक्ष्यनीलपीतादिविषयभेदेनचक्षुःसं
युक्तसमवायस्यकार्यकारणभावानांगुरुशरीरतयासंख्यासाम्येपितत्त्वस्यजघन्यत्वादितिचेन्न। अव्याप्यवृत्ति
त्वपक्षेऽवच्छेदकतासंबंधेनरूपोत्पत्तिंप्रतिसमवायसंबंधेनद्रव्यस्यकारणतायाअधिकत्वात्। ननुप्रातिस्वि
करूपेणनीलाद्यवच्छिन्नचक्षुःसंयोगस्यनीलादिग्राहकत्वाभ्युपगमेपिपीताद्यवच्छेदेनचक्षुःसंयोगदशायांच
क्षुःसंयुक्तसमवायलक्षणसामान्यसामग्रीमर्यादयालौकिकविषयतयाद्रव्यसमवेतचाक्षुषापत्तिर्दुर्वारा। नच
यावद्विशेषसामग्रीबाधात्सामान्यकार्यबाधः। द्रव्यसमवेतचाक्षुषंहिजगतिद्वयंरूपविषयंरूपेतरविषयंचम
क॰ त्ररूपविषयस्यचाक्षुषस्यनसामग्रीनीलादिचाक्षुषंप्रतिनीलाद्यवच्छिन्नचक्षुःसंयोगानांविशिष्यहेतुत्वात्न

वी२

पिरूपेतरविषयकचाक्षुषस्यरूपेतरविषयकचाक्षुषंप्रतिरूपेतरव्यक्तीनांतत्तद्व्यक्तित्वेनविषयविधयाहेतुत्वादितिवाच्य
४ म्।नव्यैर्विषयस्याविशेषतःकार्यकारणभावानभ्युपगमादितिचेन्न।विषयस्याविशेषतःकार्यकारणभावानभ्युपगंतन्नेय
एतदापत्तिवारणायरूपेतरचाक्षुषंप्रतिविषयनिष्ठतयारूपभेदस्यपृथक्हेतुतायावश्यकत्वात्।नचैवमपिमव्याप्य
वृत्तित्वपक्षएवमाधीयान्नितिवाच्यम्।तन्मतेप्यवच्छेदकतासंबंधेनरूपोत्पत्तिंप्रतितत्संबंधावच्छिन्नरूपाभाव
स्यप्रतिबंधकाभावविधयाहेतुत्वात्।अवच्छेदकतासंबंधेनरूपोत्पत्तौसमवायसंबंधेनद्रव्यस्यहेतुतायाःपुनरधि
कत्वात्नचतथापिनीलपीतारब्धघटस्यनीलकपालावच्छिन्नचक्षुःसंयोगाश्रयसमवायस्यघटवृत्तिपीतत
पसंख्यादावपिसत्त्वयापीतरूपसंख्यादौनीलचाक्षुषापत्तिईकौरानव्यैर्विषयस्याविशेषतःकार्यकारणभावानभ्युप
गमादितिवाच्यम्।नीलादिचाक्षुषंप्रतिसामान्यतोनीलत्वादिनापिविषयविधयाहेतुत्वात्।नचैवमव्याप्यवृत्तिपक्षम राम०
पेक्ष्यमहद्गौरवंकार्यकारणभावबाहुल्यादितिवाच्यम्।तन्मतेएकनिष्ठनीलादिव्यक्तेरवच्छेदकतासंबंधेनान्यासि ४

पं४

त्पादवारणायावच्छेदकतासंबंधेनतन्नीलव्यक्त्युत्पत्तिंप्रति अवच्छेदकतासंबंधेनतन्नीलव्यक्तिप्रागभा
तो२ वानामपिविशेषहेतुत्वावश्यकतयामहागौरवात्।व्यक्तिस्थानीयापत्तेरपिनचैवंभुवणमात्रानन्यनीलपीतादिवि
जातीयनानारूपवदवयवारब्धेवयविनिनीलादेर्व्याप्यवृत्तित्वेलोहितोयस्तुवर्णेनमुखेपुच्छेचपाण्डुरःश्वेतःखुरवि
षाणाभ्यांसनीलोवृषउच्यतेइतिविरोधः।तस्मादेकस्मिन्नेवावच्छेदकभेदेनलोहितत्वादिबाधनादवच्छे
दकत्वस्यसप्तम्यर्थत्वादितिवाच्यम्।तत्रमुखेपुच्छेचपाण्डुरइत्यादेःस्वाश्रयसमवेतत्वसंबंधेनमुखपुच्छवृत्ति
पाण्डुरत्वरूपवानित्याद्यर्थकतयावच्छेदकतापर्यंतस्यतदनर्थत्वात्।एवंसुकुमारकठिणादिनानास्पर्शव
दवयवारब्धेऽवयविन्यपिव्याप्यवृत्तयएवनानास्पर्शाःसमुत्पद्यन्तेनत्वव्याप्यवृत्तयः।उक्तक्रमेणकार्यकारणभाववा
क्लृप्त्यापत्तेरेवंविजातीयनानारसगंधवदवयवारब्धेऽवयविन्यपिव्याप्यवृत्तयएवनानारसगंधाइत्याहुः।स्वतंत्रास्तु
नीलपीतादिविजातीयनानारूपवदवयवारब्धेऽवयविन्यव्याप्यवृत्तीन्येवनीलपीतादिविजातीयनानारूपा[illegible]णु

क्ष३ प३ क्ष२ क्ष३ प२

त्पद्यंतेइतिप्राचीनमतमेवसाधीयः।व्याप्यवृत्तितापक्षेनीलावयवावच्छेदेनचक्षुःसंयोगदशायांपीताद्युपलं
भवारणायनीलावयवावच्छिन्नचक्षुःसंयोगाधारतावत्समवायस्यैवनीलादिग्राहकत्वस्यावश्यकतयानी
लपीतादिरूपभेदेनचक्षुःसंयुक्तसमवायस्यानंतकार्यकारणभावापत्तेःनचाव्याप्यवृत्तित्वपक्षेनीलपीतोभया
रब्धेऽवयविनिनीलपीतावयवावच्छेदेनपीतनीलोत्पत्तिवारणायावच्छेदकतासंबंधेननीलपीताद्युत्पत्तिप्र
तिसमवायसंबंधेनप्रातिस्विकरूपेणनीलपीतादेर्हेतुत्वमावश्यकेऽवच्छेदकतासंबंधेनरूपोत्पत्तिप्रतिसम
वायसंबंधेनद्रव्यस्यकारणत्वंपुनरधिकमितिवाच्यंप्रतिपुरुषंनीलपीतादिभेदेनचक्षुःसंयुक्तसमवायस्यका
र्यकारणभावभेदकल्पनामपेक्ष्यलाघवात्।अवच्छेदकतासंबंधेननीलाद्युत्पत्तिप्रतिसमवायसंबंधेननीलपी
तादेर्हेतुत्वानभ्युपगमाच्च।क्रियासंयोगकार्यकारणभावोक्तयुक्त्यानन्तव्यक्तिनिष्ठावच्छेदकतासंबंधेनसत्त्वाव
वच्छिन्नोत्पत्तिप्रतितादात्म्यसंबंधेनतत्तद्व्यक्तित्वेनतत्तद्देशव्यक्तीनांहेतुत्वावश्यकतयाकारणसमाजविरहादेवनी

लपीतोभयारब्धेऽवयविनिपीतावयवावच्छेदेननीलोत्पादवारणासंभवात्।तथाहिव्याप्यवृत्तिनीलादेरवच्छेदकतासं
बंधेनोत्पत्तिर्लोकेच।अव्याप्यवृत्तिनीलंतुजगतिद्विविधंएतद्व्यक्तिसमवेतंतदितरव्यक्तिसमवेतंच।तत्राद्यस्यनपी
तावयवावच्छेदेनोत्पत्तिसंभवः।नीलावयवावच्छिन्नातिरिक्तस्यएतद्व्यक्तिसमवेतनीलस्यालीकतयावच्छेदक
त्व४ तासंबंधेनतदुत्पत्तिंप्रतिनीलावयवव्यक्तेस्तादात्म्यसंबंधेनसामान्यकारणत्वात्।नापिद्वितीयस्यापीतावयवावच्छे
देनोत्पत्तिसंभवः।अवच्छेदकतासंबंधेनतदुत्पत्तिंप्रतितदितरव्यक्त्यारंभकावयवव्यक्तीनांतादात्म्यसंबंधेनतत्त
द्व्यक्तित्वेनसामान्यकारणत्वात्।तत्तदवयवावच्छिन्नातिरिक्तस्यतदितरव्यक्तिसमवेतरूपस्यालीकत्वात्।
नचतथापिन्यायनयेपीतावयवव्यक्तेरपिपाकेनरूपपरावृत्त्याकालांतरेनीलावयवविभक्त्यंतरारंभकतयातन्नी
य२ लावयवीव्यक्तिसमवेतनीलस्यैवपीतावयवावच्छेदेनतदानीमुत्पत्तिर्दुर्वारेतिवाच्यम्।क्रियासंयोगकार्यका
रणभावोक्तयुक्त्यातदवयविव्यक्तिसमवेतंसामान्यप्रत्येवतदवयवविभक्तेस्तद्व्यक्तित्वेनसमवायिकारणत
सा१

यासमवायिकारणस्यविरहादेवतद्व।यविव्यक्तिसमवेतनीलस्यापिपीतावयवावच्छेदेनतदानीमुत्पादासंभवात्॥
६ नीलादेःसमवायसंबंधेनोत्पत्तिंविनावच्छेदकतासंबंधेनोत्पत्तिविरहात्।अतएवावच्छेदकतासंबंधेनरूपोत्पत्ति
प्रतिसमवायसंबंधेनद्रव्यस्यकारणत्वमपिनोपपद्य।नचतदनभ्युपगमेनीलपीतोभयारब्धद्रव्यक्तौसमवायसं
बंधेननीलान्नीलमुत्पद्यमानेआरंभकनीलकपालावच्छेदेनेवद्रव्यानवष्टब्धोदासीननीलकपालावच्छेदेना
पिकुतोनोत्पद्यतेइतिवाच्यम्।व्याप्यवृत्तिनीलादेरवच्छेदकतासंबंधेनोत्पत्तिरलीकैव।अव्याप्यवृत्तिनीलंतुज
गतिद्विविधम्।एतद्व्यक्तिसमवेतमेतदितरव्यक्तिसमवेतंच।तयोस्तुद्वयोरेवद्रव्यानवष्टब्धोदासीननीलकपाले
तदानीमवच्छेदकतासंबंधेनोत्पत्तिर्नसंभवति।उक्तरीत्याकारणसमाजविरहात्।किंचव्याप्यवृत्तितापक्षेउक्त
युक्त्यारूपेतरचाक्षुषंप्रतिविषयनिष्ठतयारूपभेदस्यनीलादिचाक्षुषंप्रतिप्रातिस्विकरूपेणविषयविधयानी एम०
लादेश्चहेतुत्वमवश्यंवक्तव्यम्।तथाचाव्याप्यवृत्तितापक्षमपेक्ष्यमहद्गौरवम्।नचाव्याप्यवृत्तितापक्षेऽप्यवच्छे ६

दकतासंबंधेनरूपोत्पत्तिंप्रतिअवच्छेदकतासंबंधावच्छिन्नाभावस्यप्रतिबंधकाभावविधयाहेतुत्वेप्येकनिष्ठनी
लादिव्यक्तेरवच्छेदकतासंबंधेनान्यस्मिन्नुत्पादवारणायावच्छेदकतासंबंधेनतत्तन्नीलादिव्यक्त्युत्पत्तिंप्रति
अवच्छेदकतासंबंधेनतत्तन्नीलादिप्रागभावानामपिविशेषताहेतुत्वंस्यावश्यंवक्तव्यम्। तथाचमहद्गौरवम्।
व्यक्तिस्थानीयापत्तेरपिनव्यैरभ्युपगमादितिवाच्यम्। अवच्छेदकतासंबंधेनरूपोत्पत्तिंप्रतिअवच्छेदकतासं
बंधेनरूपस्यप्रतिबंधकत्वानभ्युपगमात्। नचतदनभ्युपगमेनीलपीतोभयारब्धद्रव्येसमवायसंबंधेननीला
न्नीलमुत्पद्यमानमारंभकनीलकपालावच्छेदेनेवद्व्यावष्टब्धोदासीननीलकपालावच्छेदेनकुतोनोत्पद्यतइतिवा
च्यम्। द्व्यानवष्टब्धकपालइवतदवष्टब्धकपालेपितुल्यरीत्याकारणसमाजविरहादेवतदानीमवच्छेदकता
संबंधेननीलोत्पादासंभवात्। समवायसंबंधेनोत्पत्तिंविनावच्छेदकतासंबंधेनोत्पत्तिविरहात्। समवायसंबंधे

त्वे२ स्या३

नरूपोत्पत्तिंप्रतित्वसमवायसंबंधेनरूपस्यप्रतिबंधकतायाःसर्वसिद्धत्वात्।अतएवावच्छेदकतासंबंधेनतत्तन्नीला
७ दिमत्त्वोत्पत्तिंप्रतिअवच्छेदकतासंबंधेनसामान्योत्पत्तिंप्रतितादात्म्यसंबंधेनतत्तद्व्यक्तीनांविशेषतोहेतुत्वसा
वश्यकतयासामग्रीविरहादेवावच्छेदकतासंबंधेनव्यक्तिँनीयापत्तेरसंभवात्।तत्तद्व्यक्त्यवच्छिन्नातिरिक्तायास्तत्त
न्नीलव्यक्तेरलीकत्वादितिशङ्कः।विजातीयनानारूपादिमदवयवारब्धेऽवयविनिरूपादेर्व्याप्यवृत्तित्वाव्याप्यवृत्तित्व
विचाररहस्यम्।सांप्रदायिकास्तु।तत्रचित्रारब्धेएकंविलक्षणंरूपमेवोत्पद्यते।नीलमात्रारब्धेऽवयविनिनील
पटःनीलंरूपमितिप्रतीतिवन्नीलपीतादिविजातीयनानारूपवदवयवारब्धेवयविन्यपिचित्रःपटःचित्रंरूपमि
त्यादिप्रतीतेःसर्वसिद्धत्वात्।नचसमानाधिकरणसमानकालीननानारूपमेवतद्विषयः।एवंचित्रमितिप्रतीतिरपे एम०
कोधान्यराशिरितिवद्विलक्षणसमूहविषयिकेतिवाच्यम्।नीलपीतादिविजातीयनानारूपकल्पनामपेक्ष्यपिचित्रैक ७

रूपकल्पनायाएवलघुत्वात्।नचचित्रपटादावपिनीलःपटइत्यादिप्रतीतेस्तत्रापितत्रनीलपीतादिनानारूपकल्पनमावश्यकमितिवाच्यम्।परंपरयाऽवयवनीलादिविषयकत्वेनैवतादृशप्रतीत्युपपत्तेः।साक्षात्संबंधावगाहिप्रतीतेस्त्वानंतरूपकल्पनात्मकबाधकत्वेनभ्रमत्वात्।एतेनलोहितइत्यादिस्मृतिरपिव्याख्याता।अस्याअपिपरंपरयाऽवयवनीलादिविषयकत्वात्।नचैवंतत्रलाघवादवयवीनीरूपएवाभ्युपेयताम्।चित्रप्रतीतेश्चपरंपरयाऽवयवविजातीयनानारूपविषयकत्वेनोपपत्तेरितिवाच्यम्।तेषामरूपत्वेऽप्रत्यक्षत्वापत्तेः।परंपरयारूपत्वंतुनप्रत्यक्षप्रयोजकंगौरवात्।परंपरयाऽननुगमाच्च।नचतथापिचित्ररूपस्थलेऽवयवेनीलपीतादिमत्त्वेनसामग्रीसत्त्वात्।अवयविनिनीलपीतादिकंदुर्वारमिति के५ वाच्यम्।वक्ष्यमाणक्रमेणप्रतिबध्यप्रतिबंधकभावकल्पनेनैवनीलपीताद्युत्पादवारणसंभवात्।नचैवंबहुतरप्रतिबध्यप्रतिबंधकभावकल्पनेगौरवमितिवाच्यम्।अनंतद्विजातीयनानारूपतत्प्रागभावतद्ध्वंसतत्कार्यकारणभावकल्पनामपेक्ष्यकतिपयप्रतिबध्यप्रतिबंधकभावादिकल्पनायाएवलघुत्वात्।एवंसुकुमारकठिनादिनानास्पर्श

वदवयवारब्धेः वयविन्यपित्वाद्ववा।चित्रैकस्पर्शएवाभ्युपेयते।नानास्पर्शाभ्युपगमेऽनंतव्यक्तिकल्पनापत्तेः।निःस्पर्शत्वाभ्यु
पगमेचस्पार्शनत्वानुपपत्तेः।गंधरसौ।चित्रौनस्वीक्रियेते।सुरभ्यसुरभ्यारब्धेतिक्तमधुराद्यारब्धेचलाघवान्निर्गंधत्वस्यनीर
सत्वस्यचोपगमात्।गंधरसयोर्द्व्याग्राहकत्वात्।अप्रत्यक्षतापत्तिरूपस्यबाधकस्यतत्राभावात्।तिक्तमधुरारब्धेतिक्ता
दिप्रतीतेःषड्साहरीतकीत्यादिप्रतीतेश्चपरंपरयैवोपपत्तेः।नचतिक्तमधुराद्यारब्धेसुरभ्यसुरभ्यारब्धेचसामग्रीसत्वादः
गंधरसयोरुत्पत्तिर्दुर्वारेतिवाच्यम्।अनंतगंधरसकल्पनामपेक्ष्यलाघवेनतिक्तजन्यतिक्तादिकंप्रतिस्वाश्रयसमवेतत्व
संबंधेनतिक्ताद्यभावस्यसुरभिजन्यसुरभ्यादिकंप्रतिस्वाश्रयसमवेतत्वसंबंधेनसुरभ्याद्यभावस्यचप्रतिबंधकत्वकल्पना
त्।तत्रसामग्र्याएवासिद्धेः।वस्तुतस्तुजन्यरसत्वावच्छिन्नंप्रतिरसत्वावच्छिन्नंप्रतिवारसविशिष्टरसत्वेनवागंधत्वा
द्यवच्छिन्नंप्रतिचगंधविशिष्टगंधत्वेनप्रतिबंधकत्वम्।वैशिष्ट्यंचस्वविजातीयत्वस्वसंबद्धत्वोभयसंबंधेनविव
क्षितम्।तेनतिक्ताद्येकतरमात्रारब्धस्यावयविनोननीरसत्वादिप्रसंगः।एतच्चसंबंधविधयाप्रविष्टम्।अतोननुगतत्वे

तेर

पिनक्षतिः।स्वसंवलितत्वंचस्वसमवायिसमवेतत्वसंबंधाभ्यांस्वसामानाधिकरण्यम्।विशिष्टस्यपूर्वसत्ताया अपेक्षित
त्वेनयदाकदाचित्तादृशसंबंधेनरसादिविशिष्टतामादायनातिप्रसंगः।नचैवंरूपेणसामान्यतःप्रतिबध्यप्रतिबंधक
भावेविजातीयनानारसवदारब्धनीरसावयवसरसावयवाभ्यामारब्धेऽवयविन्यपिरसोत्पत्तिप्रसंगइतिवाच्यम्।रस
२४ जन्यसत्तावच्छिन्नंप्रतिस्वाश्रयसमवेतत्वसंबंधेनरसादिसामान्याभावस्यापिपृथक्प्रतिबंधकत्वात्।रसजन्य
स५ सत्वंचजन्यतासंबंधेनरसवद्वृत्तित्वम्।तेनजन्यताया अननुगतत्वेपिनक्षतिरित्याहुः।नदसत्।नीलपीतादिविजा
तीयनानारूपवदवयवारब्धेऽवयविनिनीलपीतादिप्रत्ययस्यानुभवसिद्धत्वात्तत्रनीलपीतादेरावश्यकत्वेऽति
रिक्तचित्ररूपकल्पनायांवस्यमाणक्रमेणतस्यातिरिक्तकार्यकारणभावकल्पनायांचगौरवान्मानाभावाच्च।चि
त्रप्रत्ययस्यनीलपीतादिसमानाधिकरणैकालीनविजातीयनानारूपेणैवोपपत्तेः।नचतत्रनीलादिप्रतीतिःपरंप
रासंबंधावगाहिनीतिवाच्यम्।नचसाक्षात्संबंधावगाहित्वस्यप्रमात्वस्यचानुभवसिद्धत्वात्।अन्यथानीलादेः

समाने २

का२ वा१

९ सरेणुमात्रगतत्वप्रसंगात्। अन्यत्र तु तत्प्रतीतेः परंपरयैवोपपत्तेः। न त्वन्येषां नीरूपत्वे प्रत्यक्षत्वापत्तिरिति वाच्यम्। अनु
द्भूतत्वाभावकूटवद्रूपत्वेन प्रत्यक्षकारणत्वकल्पनामपेक्ष्य लाघवादुद्भूतैकत्वेनैव प्रत्यक्षकारणतया नीरूपत्वेपि
प्रत्यक्षतासंभवात्। एकत्वनिष्ठमुद्भूतत्वं च एकत्वव्याप्यो जातिविशेषः। न च ममाप्यनुद्भूतत्वाभावकूटवद्रूपत्वे
न न हेतुत्वमपि तु रूपत्वेनैव। अनुद्भूतरूपे मानाभावादिति वाच्यम्। तथापि चतुरण्वाद्यंत्यावयविपर्यंतेषु अनंत
व्यक्तिकल्पनामपेक्ष्य लाघवादेकत्वनिष्ठोद्भूतत्वाख्यजातिविशेषस्यैकस्यैव प्रत्यक्षजनकतावच्छेदकतया कल्प
यितुमुचितत्वात्। फलमुखगौरवस्यापि अणुरपीति न्यायेन दोषतया वहुधा व्यवस्थापितत्वात्। न चावयव
नीलादेरवयवी नीलादिकारणतया सामग्रीवलेनान्यत्रापि तत्सिद्धिरिति वाच्यम्। जन्यरूपत्वावच्छिन्नं प्रतिरू
पत्वावच्छिन्नं वा स्वाश्रयसमवेतत्वसंवंधेन महत्त्वस्य प्रतिवंधकतायाः सुवचत्वेनान्यत्र सामग्र्या एवासिद्धेः। अ राम॰
नंतरूपव्यक्तिकल्पनामपेक्ष्य प्रतिवध्यप्रतिवंधकभावकल्पनाया लघुत्वात्। तस्मादन्यत्रापि साक्षात्संवंधेन नीला ९

दिमत्त्वप्रतीतेर्यथार्थत्वस्यानुभवसिद्धतया साक्षात्संबंधेन नीलादिमत्त्वमित्युपपन्नम्। तत्त्वप्रकारेऽपि तुल्यम्। न चैवं चित्रः
पटश्चित्ररूपमित्यादिप्रतीतेरतिरिक्तचित्रावगाहित्वमप्यनुभवसिद्धमिति वाच्यम्। तदसिद्धेः। अन्यथैवं प्रतिबंधावि-
षयव्यवस्थैव क्वापि न स्यात्। अत एव चित्रमपि नातिरिक्तं रूपमिति गुणदीधितौ पदार्थखण्डने च भट्टाचार्याः॥ चि-
त्ररूपस्पर्शखण्डनम्। एतेन तिक्तमधुराद्यारब्धे सुरभ्यसुरभ्यारब्धे चावयविनि चित्ररूपवादिनां लाघवान्निर्गंधत्वनी-
रसत्वाभ्युपगमोऽपि प्रत्याख्यातः। तत्रापि साक्षात्संबंधेन तिक्तादिप्रत्ययस्य सौरभादिप्रत्ययस्य बाधितत्वेन चानुभवसि-
द्धत्वात्। अन्यथा लाघवाद्रसगंधयोस्त्रसरेणुमात्रगतत्वा[illegible]प्रसंगात्। अन्यत्र तत्प्रतीतेः परंपरयैवोपपत्तेः। न च सा-
मग्रीबलेनान्यत्रापि तत्सिद्धिरिति वाच्यम्। सामान्यतो रसगंधत्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबंधेन मह-
त्त्वस्य प्रतिबंधकतायाः सुवचत्वेनान्यत्र सामग्र्या एवासिद्धेः। अनंतरसगंधव्यक्तिकल्पनामपेक्ष्य मतिवध्यप्र

स२ स्या१

वंधकभावेकैकत्वनैयाएवलघुत्वात्।तस्मादन्यत्रापिसाक्षात्संबंधेनतिक्तादिमत्वप्रतीतेर्यथार्थत्वादुभयसिद्धतयासा
क्षात्संबंधेनरसगंधवत्त्वमित्युपेयम्।नत्वप्रकृतेपितुल्यमितिसमासः।विजातीयनानारसगंधवदवयविनोनीरसत्व
निर्गंधत्वखण्डनम्।ननुनीलपीतादिविजातीयनानारूपवदवयवारब्धेऽवयविनिचित्ररूपाभ्युपगन्तृनयेऽवयविनि
चित्रोत्पत्तिसमयेऽवयवनीलादौतत्त्वेनसामग्रीसत्त्वेपिनीलपीतादिकंनोत्पद्यते।गुणविरोधादितिसांप्रदायिकाः।
तत्रकस्तावद्गुणविरोधः।नचोक्तक्रमेणरसत्वावच्छिन्नंप्रतिरसविशिष्टरसादेरिवरूपत्वावच्छिन्नंप्रत्यपिरूपवि
शिष्टरूपत्वेनप्रतिबंधकत्वमेवगुणविरोधइतिवाच्यम्।तथासतिचित्ररूपस्थलेऽवयविनोनीरूपप्रसंगादितिवे
त्ता।त्रभट्टाचार्याः।सामान्यतोनीलत्वपीतत्वाद्यवच्छिन्नंप्रतिस्वाश्रयसमवेतत्वसंबंधेनावयविनिष्ठनीलपीतत
ररूपादीनांतत्त्वेनप्रतिबंधकत्वमेवगुणविरोधः।नचैवंतत्रनीलाद्युत्पत्तिवारणायनीलजनीलादिकंप्रतिस्वा

अपसमवेतत्वसंबंधेनावयविनिष्ठनीलाद्यभावएवप्रतिबंधकोऽभ्युपेयताम्।नीलेतररूपाद्यपेक्षयालघुत्वादिति
वाच्यम्।तथासतियत्रपीतावयवाद्यारब्धेऽवयविनियत्किंचिदवयवावच्छेदेनपाकात्तदवयवावयविनोःपी
तनाशस्ततोद्वितीयक्षणेपाकात्तदवयवेनीलोत्पत्तावस्थितावयवपीतसहकारेणतृतीयक्षणेऽवयविनिचि
त्रोत्पादस्तत्रद्वितीयक्षणेपाकान्नीलोत्पत्तिप्रसंगात्।अवयवेरूपजनकाग्निसंयोगदशायामवयविन्यपित
द्दशाग्निसंयोगनियमात्।अवयवगतनीलाद्यभावस्यनीलजनीलादिकंप्रत्येवप्रतिबंधकत्वात्।नहिचित्ररूप
स्याभ्युपगंतृनयेऽवतदभ्युपगंतृनयेऽपितत्रतदानींपाकादवयविनीलोत्पत्त्याविरापत्तिसंभवति।तथाचसत्यवचि
त्रोत्पत्तेरसंभवात्।नचसामान्यतोनीलत्वपीतत्वाद्यवच्छिन्नंप्रत्येवावयविनिष्ठनीलपीतेतरादेःप्रतिबंधक
त्वाभ्युपगमेतत्र।द्वितीयक्षणेऽवयवपीतादवयविनिपीतोत्पत्तिर्दुर्वारा।पीतेतररूपस्यप्रतिबंधकस्यावयवेस

वैकाले। विरहादितिवाच्यम्। नीलपीतत्वाद्यवच्छिन्नं प्रत्यवयवनीलपीतेतरादेः प्रतिबंधकत्वस्य कार्यसहभावेनास्तु
११ पगमादेवतद्वारणसंभवात्। यत्रनीलपीतरक्तैश्चितपारब्धचित्रावयविनी नीलावयवावच्छेदेनाग्निसंयोगात्तदवयव
वृत्तिनीलनाशसमकालंचित्रेनाशः ततस्तदवयवेपाकाच्छुक्लोत्पत्त्याशुक्लपीतरक्तैश्चितपजन्यचित्रोत्पत्तिस्तत्रपा
कादवयवेशुक्लोत्पत्तिसमयेऽवयविनिपीतरक्तोभयजन्यचित्रोत्पत्तिवारणायचित्रसामान्यंप्रतिस्वाश्रयसमवेत
त्वसंबंधेनरूपसामान्याभावस्यप्रतिबंधकत्वस्यावश्यकतयातस्यैवसामान्यैःपाकजेतररूपत्वावच्छेदेनप्रति
बंधकत्वकल्पनादपितद्वारणसंभवाच्च। पाकजेतररूपत्वेपाकजन्यतावच्छेदकोपलक्षिततत्तज्जात्यवच्छि
न्नभेदकूटवद्रूपत्वंएकत्रद्वयमितिन्यायेनतादृशभेदकूटानांस्वरूपस्यव्यासज्यवृत्त्यवच्छेदकतयानकूटभेदकूट राम०
नांविशेषणविशेष्यभावभेदेनकार्यकारणभावानंत्यं। नतुजन्यताविशेषसंबंधेनसंयोगवदन्यरूपत्वंपाकजेत ११

कु२ भी३

ररूपत्वम्। जन्यताविशेषसंबंधेन गुणवदन्यरूपत्वं सत्त्वजन्यरूपत्वमादाय विनिगमनाविरहप्रसंगाद्गौरवाच्च। न च पा
काद्रूपनाशसमये स्पर्शनाशस्यावश्यकत्वेन ये स्पर्शसामान्याभावमादाय विनिगमनाप्रसंगविरहप्रसंगादिति वाच्यम्।
स्पर्शसामान्याभावस्यानुद्भूतस्पर्शमानाभावेन प्रमादो संदिग्धव्यभिचारकत्वात्। वस्तुतो रूपनाशकविलक्षणाग्नि
संयोग एव समवायसंबंधेन तत्र पाकजेतररूपत्वावच्छिन्नस्य प्रतिबंधकः। न चैवमग्रेपि चित्रोत्पत्तिः कथं स्यादि
ति वाच्यम्। पाकारवयवरूपोत्पत्तिसमय एव तन्नाशस्योपगमादित्येव तत्त्वम्। एवं विभिन्नजातीयनानाचित्ररूप
वदवयवारब्धेऽवयविन्यवयवनिष्ठचित्रविलक्षणचित्रोत्पत्तिसमयेऽवयवनिष्ठचित्रसजातीयचित्रोत्पत्तिवारणाय
तत्तद्विलक्षणचित्रं प्रति स्वाश्रयसमवेतत्वसंबंधेनावयवनिष्ठतत्तद्विलक्षणचित्रेतररूपस्यापि प्रतिबंधकत्वमि
त्याहुः। नव्यास्तु। चित्रोत्पत्तिसमये नीलाद्युत्पत्तिवारणाय पाकजव्यावृत्तनीलत्वादिव्याप्यजातिविशेषावच्छि

ने२

न्नंप्रतिनीलाद्यभावएवस्वाश्रयसमवेतत्वसंबंधेनप्रतिबंधकोवाच्यः।नतुनीलादिसामान्यंप्रतिनीलेतररूपादेः
नीलाभावत्वादिकमपेक्ष्यनीलेतररूपादेर्गुरुत्वात्।नचैवमुक्तोदोषइतिवाच्यम्।रूपनाशकविलक्षणाग्निसंयो
गस्यफलबलकल्प्यतयातत्रावयवेग्निसंयोगोत्पत्तिद्वितीयक्षणएवावयविनितादृशाग्निसंयोगकल्पनादेव
न्यन्य४ द्वितीयक्षणेवयविनिपाकान्नीलाद्यसंभवात्।रूपवतिरूपानुत्पत्तेः।नत्ववयवेरूपनाशकाग्निसंयोगदशा
यामवयविन्यपिअवश्यंतादृशाग्निसंयोगइतिनियमेमानाभावात्।नीलेतररूपत्वादिनाप्रतिबंधकत्वा
पत्त्यागौरवप्रसंगाच्च।नचैवंद्वितीयक्षणेचित्रोत्पत्तिरेवकथंस्यात्।द्वितीयक्षणेऽवयविनिरूपांतरसत्वादिति
वाच्यम्।चतुर्थक्षणएवतत्रचित्रोत्पादात्।क्षणैकविलंबस्यचादोषत्वात्।किंचनीलेतररूपत्वादिनाप्रति
बंधकत्वेपाकजव्यावृत्तनीलपीताद्यवांतरजातिविशेषावच्छिन्नेप्रतिस्वाश्रयसमवेतत्वसंबंधेनप्रतिस्व

वा२

करूपेणपीतादेरसमवायिकारणत्वंसामान्यतःपाकजेतररूपत्वावच्छिन्नंप्रतिस्वाश्रयसमवेतत्वसंबंधेनरूपत्वेनास
मवायिकारणत्वंवावश्यकम्।अन्यथावाय्वावपिनीलाद्युत्पत्त्यापत्तेः।पाकाद्युगपदवयवावयविनोःपीताद्युत्प
त्तिसमयेवयविनिनीलाद्युत्पत्त्यापत्तेश्च।स्वाश्रयसमवेतत्वसंबंधेननीलेतररूपस्यप्रतिबंधकस्यासत्वात्।स्वाश्रय
समवेतत्वसंबंधेननीलाद्यभावस्यप्रतिबंधकत्वेतुनतत्कल्पनमितिमहल्लाघवम्।अथनीलाद्यभावस्यस्वाश्र
यसमवेतत्वसंबंधेनप्रतिबंधकत्वेपिपरमाणौपाकाद्रक्तोत्पत्तिसमयेपाकजन्यादृष्टेननीलाद्यभावप्रतिबध्यता
विशेषा३ वच्छेदकजातिवच्छिन्ननीलाद्युत्पत्तिवारणायतादृशजातिविशेषावच्छिन्ननीलादिकंप्रतिनीलादेरसम
वायिकारणत्वंपाकजेतररूपत्वावच्छिन्नंप्रतिसामान्यतोरूपत्वेनासमवायिकारणत्वंवावश्यकंस्वाश्रय
समवेतत्वसंबंधेननीलाद्यभावस्यप्रतिबंधकस्यपरमाणावसत्वात्।नचनीलाद्यभावस्यप्रतिबंधकस्यस्वा

वा

श्रयसमवेतत्वसंबंधावच्छिन्नप्रतियोगिताकाभावेपि स्वाश्रयसमवेतत्वसंबंधेनैव पाकजव्यावृत्तनीलादिकं प्रति
१२ हेतुरतः परमाणोरक्ताद्युत्पत्तिसमये न तादृशनीलापत्तिरिति वाच्यम्। तथापि द्व्यणुकेरक्ताद्युत्पत्तिसमये तादृ
शनीलाद्युत्पत्तिप्रसंगस्य दुर्वारत्वात्। नीलपीताद्यवयवारब्धेवयविनि चित्रोत्पत्तिसमये नीलाद्युत्पादस्य तदुद्दे
श्यस्यासिद्धेः। स्वाश्रयसमवेतत्वसंबंधावच्छिन्ननीलाभावाभावस्य नीलावयवनिष्ठस्यैव स्वाश्रयसमवेतत्वसंबं
धेनावयविनि सत्वादिति चेन्न। नीलाद्यभावस्य प्रतिबंधकस्य स्वाश्रयसमवेतत्वसंबंधावच्छिन्नप्रतियोगिताका
भावस्य विशेषणताविशेषस्वाश्रयसमवेतत्वोभयसंबंधाभ्यां हेतुत्वाभ्युपगमात्। वस्तुतस्तु तादृशनीलाभावा
भावस्य विशेषणताविशेषसंबंधेनैव हेतुत्वं न तु स्वाश्रयसमवेतत्वमपि कारणतावच्छेदके प्रवेशनीयम्। क्रि राम०
यासंयोगकार्यकारणभावोक्तयुक्त्या तेन तद्व्यक्तिसत्वामाम्प्रत्येव समवायिकारणप्रत्यासत्तीनां तत्तद्व्यक्तित्वेन स १२

वाधं१

मवायिकारणस्यावश्यकतयायावद्विशेषसामग्रीगांषादेवपरमाणौपाकाद्रक्तोत्पत्तिसमयेनीलाद्यभावप्रतिबध्य
सजातीयनीलाद्युत्पत्तेरसंभवात्। तन्नद्रव्यव्यक्तिसमवेतातिरिक्तस्यतादृशनीलादेरलीकत्वात्। नचतथापि
सा०३ भावकार्यस्यसमवायिकारणकत्वनियमादेवासमवायिकारणकत्वमावश्यकमितिवाच्यम्। तादृशनियम
स्यभट्टाचार्यैरेवगुणदीधितावनभ्युपगमात्। नचैवमपियत्रनीलपीतरक्तत्रितयारब्धचित्रावयविनिनीलावय
वावच्छेदेनाग्निसंयोगात्तद्द्रव्यवृत्तिनीलनाशसमकालंचित्रनाशस्तद्द्रव्येपाकाच्छुक्लोत्पत्त्याशुक्ल
पीतरक्तत्रितयजन्यचित्रोत्पत्तिस्तत्रपाकाद्द्रव्येषुशुक्लोत्पत्तिसमयेऽवयविनिपीतरक्तोभयजन्यचित्रोत्
त्तिर्दुर्वारा। नीलाद्यभावस्यनीलादिकंप्रत्येवप्रतिबंधकत्वादितिवाच्यम्। सामान्यतश्चित्रत्वावच्छिन्नंप्रतिस्वा
श्रयसमवेतत्वसंबंधेनरूपाभावस्यसमवायसंबंधेविनश्यद्द्रव्यस्यरूपनाशकविलक्षणाग्निसंयोगस्यवा

नी। २५१

२४ तिबंधकत्वात्। अन्यथा भट्टाचार्यादिमतेप्यप्रतीकारात्। अतएव चित्रत्वसामान्यजातिरपि प्रामाणिकी रूपा
भावादेः प्रतिबध्यतावच्छेदकतयैव तत्सिद्धेः। रूपनाशकविलक्षणाग्निसंयोगस्य फलबलकल्प्यतया तत्रा
वयवे तादृशाग्निसंयोगद्वितीयक्षण एवावयविनि तादृशाग्निसंयोगकल्पनादवयवपाकजशुक्लोत्पत्ति
क्षण एवावयविनि चित्रानाशात्तदानीं तत्र द्वितीयजन्यचित्रोत्पत्तेरसंभवाच्च। रूपवति रूपान्तरानुपपत्तेः।।
तथा च चित्रत्वावच्छिन्नं प्रति रूपाभावादेः प्रतिबंधकत्वं नोपपद्यते। न चैवं चित्रत्वसामान्यजातौ मानाभावः
चित्रत्वावांतरजातिभिरेव चित्रप्रत्ययोपपत्तेरिति वाच्यम्। अनुगतप्रतीतिबलेन तत्सिद्धेरित्याहुः। पितृचर
णास्तु। नीलपीतद्रूपादिजन्यतावच्छेदकचित्रत्वावांतरतत्तद्वैजात्यावच्छिन्नेतररूपं प्रति तत्[illegible]त्तद्विजातीय राम०
चित्रत्वेन कार्यसहदृष्टत्वितया प्रतिबंधकत्वादेव न चित्रोत्पत्तिसमये नीलाद्युत्पत्तिः। नीलपीतरक्ताद्यात्म २४

कश्चितथादिजन्यविलक्षणचित्रोत्पत्तिसमयेनीलपीताद्यात्मकद्वितीयादिजन्यविलक्षणचित्रोत्पत्तिवारणाय
तादृशप्रतिबध्यप्रतिबंधकभावस्यसर्वमतएवावश्यकत्वात्।नचैतथाप्येतन्मतेपाकजस्थलेन्ननीलत्वा
दिव्याप्यजातिविशेषावच्छिन्नंप्रतिस्वाश्रयसमवेतत्वसंबंधेननीलादेरसमवायिकारणत्वस्यावश्य
कतयानभ्यमतमपेस्यनास्यमतस्यसम्यक्त्वम्।तन्मतेतादृशजातिविशेषावच्छिन्नंप्रतिनीलादेरसम
वायिकारणत्वाकल्पनादितिवाच्यम्।तन्मतेभावकार्यस्यसासमवायिकारणकत्वानभ्युपगमेनापसिद्धां
तप्रसंगात्।तादृशजातिविशेषावच्छिन्नंप्रतिस्वाश्रयसमवेतत्वसंबंधावच्छिन्नप्रतियोगिताकनीला
द्यभावाभावस्यस्वाश्रयसमवेतत्वविशेषणताविशेषोभयसंबंधेनकारणत्वकल्पनामपेक्ष्यस्वाश्र
यसमवेतत्वसंबंधेननीलादेरसमवायिकारणत्वकल्पनायालघुत्वाच्च।नचास्मिन्मतेयत्रनीलैँद्व्यारब्धे
वयवे।

वयविनि यत्किंचिदवयवावच्छेदेन विलक्षणाग्निसंयोगात्तदवयवावयविनोर्द्वयोरेव नीलनाशः ततः
पाकात्तदवयवे पीतोत्पत्त्या पीतावस्थितनीलाभ्यामवयविनि चित्रोत्पत्तिस्तत्रावयवेऽपि पीतोत्पत्तिसमये
ऽवयविन्यवस्थितनीलान्नीलोत्पत्तिप्रसंगवारणाय तादृशजातिविशेषावच्छिन्नं प्रति स्वाश्रयस
मवेतत्वसंबंधेन नीलाद्यभावस्य सोमो सामान्यतो रूपत्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबंधेन रूप
सामान्याभावस्य वा प्रतिबंधकत्वावश्यकत्वात्। न च मतमपेक्ष्य गौरवमिति वाच्यम्। रूपनाशकाग्नि
संयोगविशेषस्य फलबलकल्प्यतया तत्रावयवे रूपनाशकाग्निसंयोगोत्पत्तिद्वितीयक्षण एवावय
विनि तादृशाग्निसंयोगकल्पनात्। न चावयवे रूपनाशकाग्निसंयोगोत्पत्तिक्षणेऽवयविन्यवश्यं ता
दृशाग्निसंयोग इति नियमो मानाभावात्। तादृशनियमेन च मते पितरपाकादवयवे पीतोत्पत्ति

रूपा२

समयेवयविनिपाकात्पीलोत्पत्तेर्द्वीरत्वाच्चापाकजपीतव्यावृत्तजातिविशेषावच्छिन्नं तस्येव पीताभावस्य प्रतिबंध
कत्वादिति प्राकृरिति समासः॥ ॥गुणविरोधरहस्यम्॥ नन्वतिरिक्ते चित्रं रूपं न तन्नेयतच्चावयवनिष्ठनीलपीतवि
जातीयनानारूपाणां केन रूपेण हेतुत्वम्। न तावद्रूपत्वेन चित्रत्वेन नीलपीताद्येकतरमात्रारब्धेपि चित्रोत्पत्यापत्तेः।
न च प्रागभावविरहान्न तत्र तदनुत्पाद इति वाच्यम्। एकावयवे पाकेन विजातीयरूपोत्पत्त्यापन्नावयवे निचित्रोत्पत्ति
पि४४ [illegible]र्भविता तत्र तस्यापि सत्वात्। पीवापाकस्य तत्रैवस्यापि सत्वात्। प्रागभावतत्कारणत्वं निराकर्तुमशक्यत्वाच्च। ना त्रा४
पि विजातीयनानारूपत्वेन सर्वस्यैव रूपस्य रूपान्तरविजातीयत्वादिति चेदत्र केचित्। चित्रत्वावच्छिन्नं प्रतिस्वा पो४
श्रयसमवेतत्वसंबंधेन नीलेतररूपत्वपीतेतररूपत्वरक्तेतररूपत्वादिना दण्डचक्रादिवद्धेतुत्वम्। एवं रूपत्वव्या
प्या। चित्रत्वातिरिक्तायाभाजातयस्तद्वच्छिन्नेतररूपत्वेनैव दण्डचक्रादिवद्धेतुता शुक्लेतरशुक्लतमाभ्याम्

तं१

त्वे४ द२

१६ पि चित्रोत्पादः। तदनभ्युपगमे तु रूपत्वसाक्षाद्व्याप्यत्वेन जातिर्विधेया। न चैवं कृते कार्यकारणभावकल्पनागौ
रवमेव चित्ररूपे महद्बाधकमिति वाच्यम्। चित्ररूपस्थले अनंतानां नीलपीतादीनां ध्वंसतत्प्रागभावतत्कार्यका
रणभावानां कल्पनामपेक्ष्य कतिपयकार्यकारणभावकल्पनायाएव लघुत्वादिति प्राहुः। केचित्तु चित्रत्वा
वच्छिन्नं प्रति रूपविशिष्टरूपत्वेनैव स्वाश्रयसमवेतत्वसंबंधेन हेतुत्वम्। वैशिष्ट्यं च स्वविजातीयत्वे सति स्वसं
वलितत्वसंबंधेन विवक्षितम्। तेन नीलपीताद्येकतरमात्रारब्धेऽवयविनि न चित्रोत्पादः। तच्च संबंधविधया
प्रविष्टमतो ननुगतत्वेपि न क्षतिः। स्वसंवलितत्वं च स्वसमवायिसमवेतत्वसंबंधाभ्यां स्वसामानाधिकरण्यम्॥
विशिष्टस्य पूर्वसत्ताया अपेक्षितत्वेन यदाकदाचित्तादृशसंबंधेन विशिष्टताभावादपि नातिप्रसंगः। स्वविजा राम०
तीयत्वं च चित्रत्वातिरिक्तस्ववृत्तिजातिभिन्नजातिमत्त्वम्। तेन चित्रमात्रांशे चित्रोत्पादसम्भवः। शुक्लतरशुक्लतमा १६

भ्यामपिचित्रोत्पादः।यदिचताभ्यांविजातीयशुक्लोत्पादएवतदातद्रूपत्वसाक्षाद्व्याप्यत्वेनचरमजातिर्विशेष्येत्या
हुः।अन्येतुचित्रत्वावच्छिन्नंप्रतिरूपत्वेनैवहेतुत्वम्।नचैवंनीलमात्रादपिचित्रोत्पादप्रसंगइतिवाच्यम्।चित्रत्वा
वच्छिन्नंप्रतिचित्रेतररूपत्वावच्छिन्नाभावस्यापिकार्यसहभावेनहेतुत्वादित्याहुः।स्वतंत्रास्तु।नीलपीतोभया
भाववनीलरक्तोभयाभावादीनांयावत्त्वावच्छिन्नाभावोऽरवगतश्चित्रत्वावच्छिन्नेहेतुः।सचनीलपीतादीनांय
त्किंचिदुभयसत्त्वेप्यस्तीत्याहुः।नव्यास्तु।चित्रत्वावच्छिन्नंप्रतिरूपत्वेनैवहेतुत्वम्।नचैवंनीलमात्रादपिचि
त्रोत्पादप्रसंगइतिवाच्यम्।नीलपीतमात्रारब्धनीलरक्तमात्रारब्धनीलपीतरक्तत्रितयमात्रारब्धादिपरस्प
रविलक्षणतत्तच्चित्रविशेषंप्रतिनीलत्वपीतत्वाभ्यांनीलत्वरक्तत्वाभ्यांनीलत्वपीतत्वरक्तत्वादिभिर्हेतुत्वाव
श्यकत्वेनतत्तद्विशेषसामग्रीविरहादेवतन्नंचित्रानुत्पादात्।विशेषसामग्रीसहितायाएवसामान्यसामग्र्याः

त्र १

कार्योपधायकत्वात्। नन्वेवं नीलपीतोभयादिमात्रारब्धे नीलपीतरक्तादित्रितयमात्रारब्धनीलपीतरक्तकृष्ण
ष्णचतुष्टयमात्रारब्धावयविविशेषु चित्रत्वव्याप्यपरस्परव्यावृत्तनैवजात्याभ्युपगमे नीलपीतरक्तत्रितयमात्रार
ब्धावयविनि चित्रचतुष्टयोत्पत्तिप्रसंगः। एकं नीलपीतरक्तत्रितयमात्रजन्यम्। अपरं च नीलपीतोभयमात्रज
न्यम्। अन्यच्च पीतरक्तोभयमात्रजन्यम्। अपरं च नीलरक्तोभयमात्रजन्यमिति भेदात्। समूहालंबनवद्धसमा
जग्रस्तं सर्वैवैजात्याक्रान्तमेकमेव चित्ररूपं जायत इत्यभ्युपगमे जातिसंकरप्रसंगात्। एवं नीलपीतरक्तकृष्ण
चतुष्टयारब्धे चित्रे सप्तकस्योत्पत्तिप्रसंग इत्यादिबोध्यम्। न च तत्र चतुष्टयसप्तकाद्युत्पत्त्यापत्ताविष्टापत्तिः। किं
लकं व्याप्यवृत्ति अन्यत्सर्वमव्याप्यवृत्तीत्येव विशेष इति वाच्यम्। एकस्मिन्नेवावयवे विभिन्नानारूपस्वीका
रे किमितिरिक्तरूपेण। चित्रत्वस्य नीलपीतादिसमानाधिकरणनानारूपेणैवोपपत्तेरिति चेन्न। चित्रप
पा

जन्यचित्रस्यकार्यसहभावेनद्वितीयादिजन्यचित्रप्रतिबंधकत्वादेवोक्तस्थलेषुचित्रचतुष्टयसमनकाद्युत्पत्तेरसंभ
वात्।नचैवंवहुतरकार्यकारणभावप्रतिबध्यप्रतिबंधकभावकल्पनागौरवमेवचित्ररूपमहत्त्वाधकेकिंबाध
कांतरगवेषणेनेतिवाच्यम्।अरूपकल्पनामपेक्ष्यकतिपयप्रतिबध्यप्रतिबंधकभावकल्पनायालघुत्वादि
त्वाकुः।एतेनचित्रस्पर्शोत्पत्तावपिहेतुहेतुमद्भावोव्याख्यातइतिसमासः।चित्ररूपकार्यकारणभावरहस्यम्॥ ॥
॥ ॥ ॥श्रीश्रीश्रीश्रीश्री ॥ ॥ ॥ ॥ ॥ ॥रामरामरामरामरामराम॥ ॥ ॥ ७७॥ ॥

चित्ररूपवादपुस्तकमिदं उपाध्यायहेमनारायणशर्मणाम्
पत्रसंख्या १८॥

४१२४

[illegible]गादीशी अनुमितिसङ्गतिः

जागदीशी अनुमितिसङ्गतिः

श्रीगदीशी अनुमितिदीधिति

श्री ५ को सरकार
[illegible] महाविद्यालय

श्री० जं०
१

(नित्यस्यत्वरूपयोग्यत्वेफलावश्यंभावइति६)

॥श्रीगणेशायनमः॥ ॥सस्मिताननसरोजमंगलोरिंगमाणमतिलोलकुंतलं॥रोचनोल्लसितभालमस्तमेकेशवंमनसिशैशवंवपुः॥१॥प्राचैरनुचितविविधक्षोदैःकलुषीकृतोप्यधुना॥दीधितिपुतमणिरेषश्रीजगदीशप्रकाशितःस्फुरतु।परमात्मनेसर्वोत्कृष्टात्मनेनमः।उत्कर्षश्चात्रोत्पत्तिस्थित्यादिकर्तृत्वंतस्यचैकत्वेसंभवोनसहकार्यंतरंविनेत्यतउक्तं।ॐमितिब्रह्मविष्णुशिवात्मकायेत्यर्थः।तथाचतत्रछरीरसहकारादेकस्यापिनानाकार्यकर्तृत्वेनानुपपत्तिरितिभावः।यद्यपिसुखादिसमवायिकारणतावच्छेदकत्वेनद्रव्यमानसप्रतीतिविषयविधयाकारणतावच्छेदकत्वेनवासिद्धयात्मत्वजातेरीश्वरवृत्तित्वादात्मनइत्यसंगतम्।नित्यस्येत्यादिव्याप्तेरप्रयोजकत्वेननादृशजातेरीश्वरवृत्तित्वोपगमेतुगगनादावपितज्जातिप्रसंगात्।द्रव्यत्वमेववासुखादिसमवायिकारणतावच्छेदकंभवेदितिप्रसंगस्यतुल्यत्वात्अतएवलाघवेनात्मत्वजातेरेवात्मपदप्रवृत्तिनिमित्ततयात्मपदगर्भाश्रुतिरेवतत्रात्मत्वजातिसत्त्वेप्रमाणमित्युक्तावपिननिस्तारः।शक्यतावच्छेदकतयाजातिसिद्धेरपसिद्धांतात्।तथाप्यत्रात्मपदंकृपावदर्थकमित्याहुः।नमस्यताप्रयोजकंरूपांतरमप्याहसर्वेति।सर्वभूतानिसर्वप्राणिनःविष्टभ्यस्वस्वकर्माणिनियोज्यपरितिष्ठतइत्यर्थः।केचित्तुभू

(कृपाचनिरुपाधिकपरदुःखप्रहरणेच्छा२)

आत्मत्वजातौप्रमाणाभावादेवेत्यर्थः।)२ सुखसमवायिकारणतावच्छेदकतयाऽसिद्धायाइत्यादिः।)३

इदमपिलोकसिद्धंस्यापं५)

राम
१

तथा च सर्वभूतानि पृथिव्यादीनि विष्टभ्य संयुज्य परितिष्ठत इत्यर्थः)१ (वस्तुतो भूतत्वस्यात्मावृत्तिविशेषगुणरूपतया गगनस्येश्वरानतिरेकाद्गगनं भूतमिति प्रथमार्थ एव सम्यक्)

(आहुरित्यस्वरसस्तु जन्यभक्तः स्वात्मानं संयुनक्ति इतिप्रयोगापत्तिः स्वस्य नु योः तूसंयोगस्य स्ववृत्तित्वस्त्वात्)२

तपदं यथाश्रुतार्थकमेव विष्टंभोपि संयोगविशेषः न च विभुद्वयसंयोगास्वीकारादाकाशेन समं तदसंभवादसंगतिः
।नव्यमते गगनस्येश्वरानतिरेकादत्र च स्वप्रतियोगिकसंयोगविरहेपि स्ववृत्तिसंयोगानपायादित्याहुः केचित्तु वि
ष्टंभ आरंभकसंयोगः भूतपदं जन्यभूतपरं जनकत्वं द्वितीयार्थः तथा च जन्यसर्वभूतजनकसंयोगानुकूलकृतिस
मानाधिकरणतादृशसंयोगोत्तरस्थैर्याश्रयतावत इत्यर्थ इति प्राहुः अखंडौ नित्यौ आनंदबोधौ यस्य तस्मै। न च सुख
त्वावच्छेदेन पुण्यजन्यतया नित्यसुखासंभवः। श्रुतिवाक्येभ्यो नित्यसुखसिद्धौ सुखत्वावांतरजातेरेव पुण्यजन्यतावच्छे
दकत्वकल्पनात्। आनंदाय स्वर्गादिरूपाय बोधो यस्य तादृशायोऽखण्डो नित्यस्तस्मै इति वार्थः। अखंडो दुःखानवच्छि
न्नः आनंदो यस्मात्तादृशो बोधो यस्य तस्मै चतुर्थ्यर्थः कृतिविषयतेत्यपि कश्चित्। पूर्णाय स्वनिष्ठसुखदुःखाभावगोचरेच्छाव
द्भिन्नाय निपुणां विभाव्येति। वक्तृतो निपुणविभावने स्वयमेव दोषाः प्रयास्यंतीति भावः। संगतिप्रदर्शनप्रतिज्ञयोरर्थां
तरत्वं निराचिकीर्षुस्तयोः प्रकृतोपयोगितां दर्शयति। पूर्वैस्सादिना अत्र च संगतिप्रदर्शनस्य फलमेकवाक्यताप्रतिप
त्तिः। प्रतिज्ञायास्तु फलं शिष्यावधानं। तत्रोत्तरग्रंथप्रवृत्त्यनुकूलव्यापाररूपं। तत्प्रवृत्त्यनुकूलवर्तमानकृतिसाध्यता

(एकवाक्यताप्रतिपत्तिः शिष्यावधानमेतदुभयं वा)

२ चैत्रस्यापि स्ववृत्तिसंयोगाश्रयत्वेन चैत्रः संयुनक्ति इत्यादिप्रयोगापत्तिवा
रणाय संयुक्तादिप्रयोगे भेदस्यापि सामानाधिकरण्यसंबंधेनाद्वृत्ती
यार्थफलेऽन्वये मतेतत्र इति वदन्ती त्यस्यात्वसंतः अथवा नव्यमते आला
ध्दृत्तिविशेषगुणवत्त्वस्य भूतत्वाद्गगनस्य भूतत्वाभावाद्यथाश्रुतमेव सम्यगि
ति सूक्ष्मदृशः)

अनुमानंनिरूप्यतेऽस्मात्तुमाननिरूपणंक्रियतइतिविवरणात् ४

आदिनेष्टसाधनत्वज्ञानपरिग्रहः १

ज्ञानादि पर्यवसितंश्चास्तिचोत्तरग्रंथे पूर्वग्रंथार्थसंगतार्थकत्वहेतुना पूर्वग्रंथेनसहैकप्रयोजनहेतुप्रतिपत्तिकत्व
रूपस्य पूर्वग्रंथैकवाक्यत्वस्यानुमानं। तच्चोत्तरग्रंथज्ञानस्येष्टसाधनत्वधीपर्यवसन्नमतः प्रस्तुतप्रवृत्युपयोगि
तयासंगतिप्रदर्शनस्यनार्थान्तरत्वं। एवंप्रतिज्ञापि पुनरनुमाननिरूपणेलटालभ्यायावर्त्तमानकृतेः साध्यत्वंबो
धयंस्तुत्तरग्रंथेप्रवृत्युपयोगिनोवर्त्तमानकृतिसाध्यताज्ञानस्यप्रयोजिकेतिभावः। अत्रचव्याख्येयग्रंथस्यस्वर
संवलितस्यैवधारणंसंप्रदायसिद्धमतः प्रत्यक्षेत्तीत्यपहायप्रत्यक्षवितीत्युक्तमितितुभ्रमः दीधितिकृतैवव्याख्यानं
तरमितिपक्षताग्रंथस्यव्याप्तीतिप्रकारेणधृतत्वात्। तादृशनियमस्यसंप्रदायासिद्धत्वात्' परंतुननियमः क्वचिदे
वंक्वचिदन्यथापिधारणमितिध्येयं। वस्तुतः प्रत्यक्षानंतरमित्यस्यधारणभ्रमनिरासायतथोक्तं' अनुमाननिरूप
णस्यैवप्रतिज्ञेयत्वेऽनुमितेरप्रतिज्ञातायाअग्रेनिरूपणमर्थान्तरग्रस्तंस्यादतोऽनुमितेरनुमानस्यचद्वयोरेवनिरू
पणस्यप्रतिज्ञेयतामावेदयितुमाह अत्रचेति। अत्रप्रत्यक्षोपजीवकत्वादित्यादिग्रंथेसप्तम्यर्थः प्रतिपाद्यत्वंफलतः। फ
लयोः। साक्षात्कारानुमित्योः। स्वरूपतः। प्रत्यक्षप्रमाणानुमानप्रमाणस्वरूपयोः। उपजीव्योपजीवकभावः प्रतिपाद्य

तथाचोत्तरग्रंथज्ञानेसंगतिप्रदर्शनेनेष्टसाधनत्वज्ञानंप्रतिज्ञयाच्चकृतिसाध्यताज्ञानंसम्पाद्यतइतिभावः ७

अनुमित्यनुव्यवसायादेरनुमित्युपजीवकत्वेपीत्यादिग्रंथः ६
(प्रत्यक्षफलस्यानुमित्युपजीवकत्वेपीतिग्रंथः ३) निरुक्तमुपजीवकत्वं ४

इत्यर्थः। तथा च मूले प्रत्यक्षपदस्य प्रत्यक्षप्रमितितत्करणोभयपरतयाऽनुमानपदस्य भावकरणव्युत्पत्तिभ्यामनु
मितितत्करणोभयपरतयानुमितेस्तत्करणस्य च द्वयोरेव निरूपणस्य प्रतिज्ञातत्वाच्चानुमितिनिरूपणोऽर्थान्तरत्व(
मितिभावः। केचित्तु आचार्यमते नित्यस्य ज्ञानादेरप्यनुमानत्वाद्वक्ष्यमाणस्यानुमानत्वावच्छेदेन प्रत्यक्षोपजीवकत्व
स्य संगतित्वलाभायोक्तं फलत इति फलद्वारे[redacted]त्यर्थः। तथा च प्रत्यक्षफलोपजीवकत्वमेव संगतिः। तथा च साक्षात्प्रयक
रणत्वपरं परम्परासंबंधेनानुमानगतत्वं। साक्षात्संबंधेन प्र त्यक्षोपजीवकत्वस्य संगतित्वलाभार्थं लिंगज्ञानकरणता
व व्वादिनो मणिकारस्य मतमं लं चोक्तस्वरूपत इत्याहुः। तन्न लिंगस्य नित्यत्वेप्यनुमितीत्यादिग्रंथविरोधात्। नन्वनुपजीव
कत्वं न संगतिः अनंतराभिधान व्याप्यस्यैव संगतित्वात् अनुमित्युपजीवकस्य तत्साक्षात्कारस्यानुमित्यनंतरमनि(
रूप्यतया यस्य प्रमाणफलस्योपजीवकं यत्प्रमाणफलं तन्निरूपणानंतरं निरूप्यमिति व्याप्तिविरहादत आह प्रत्य(
क्षफलस्येत्यादि। अनुमित्यनुव्यवसायादेरित्यादिपदेनानुमित्युपनीतधर्मप्रकारकप्रत्यक्षसंग्रहः। न सर्वेति। अयं
घट इत्यादिप्रत्यक्षस्येवानुमित्यनुपजीवकत्वादिति। तथा चोपजीवकत्वमात्रस्यानंतराभिधानव्याप्यत्वाभावेपि प्रमा(

साध्यादि-२

श्री० जै०
३

(प्रमाणफलविभाजकोपाधिव्यापकत्वविशिष्टस्यैव ७)

णफलविभाजकोपाधिव्यापकत्वविशिष्टमुपजीवकत्वं तादृशाभिधानव्याप्यमेवेति स्यादेवोपजीवकत्वसंगतिरिति भावः। ननु प्रमाणफलविभाजकोपाधिव्यापकत्वविशिष्टं साक्षात्कारोपजीवकत्वमनुमितावसिद्धं शाब्दादिपरामर्शादप्यनुमित्सुत्वस्यानुमितित्वावच्छेदेन साक्षात्कारोपजीवकत्वाभावात्कुतोऽस्य संगतित्वमत आह अनुमितनयत्वेति। साक्षादिति। तथा चोपजीवकत्वं प्रयोज्यतामात्रं न त्वनन्यथासिद्धत्वघटितमपीति भावः। नन्वेवमुक्तस्यैवोपजीवकताविशेषस्यानंतराभिधानव्याप्यत्वे प्रत्यक्षोपजीवकत्वादिस्तूपजीवकत्वमात्रस्य व्याप्यताप्रत्यायको मूलग्रंथो विरुद्ध इत्यत आह पुरस्कृत इति। अयं प्रमाणफलविभाजकोपाधिव्यापकत्वरूपोऽर्थो ग्रंथकृतापि तात्पर्यविषयीकृतः सामान्यशब्दस्य लक्षणया विशेषबोधकत्वादिति भावः। ननु परं परोपजीवकत्वस्यापि संगतित्वे प्रमाणफलविभाजकोपाध्यवच्छिन्नोपजीवकत्वमपि न तादृशाभिधानव्याप्यं प्रत्यक्षप्रमितावनुमितेस्तादृशोपजीवकत्वसत्त्वेऽप्यनुमित्युत्तरं तदनिरूपणात्तत्कुतोऽस्य संगतित्वमित्याशंकते यद्यपीति। अदृष्टजननीमिति। तत्प्रयोजिकामित्यर्थः। समयः शक्तिः। मत्कर्त्तव्यतादीत्यादिपदादिष्टसाधनत्वादेः संग्रहः। अयं भावः। कार्यमात्रं प्रत्यदृष्टस्य हेतुतया साक्षात्कारं प्रत्यपि धर्मादिकं हेतुः तत्र त्वकारणी

राम
३

भूतं यागादिकं यागादिश्चस्वर्गेच प्रवृत्तिं यागादिप्रवृत्तिश्च यागादिगतेष्टसाधनत्वधियं तादृशधीश्च वेदं विनानु
पपद्यमाना वेदस्य पदानां शक्तिग्रहमपेक्षते इदं पदमत्र शक्तमसति वृत्त्यंतरे वृद्धैस्तत्र प्रयुज्यत्वादित्याद्यनुमि
तिरूपशक्तिग्रहं विना वेदवाक्यादर्थावगमासंभवादेवं प्रवृत्तिजनिका यागो मत्कृतिसाध्य इत्यादिधीरपि अनुमा
निकीमिदंतर्भावेणाविधेः शक्त्यभावादिति। इदंतु चिंत्यं तेनायत्र शक्त्यादिघटकप्रत्येकपदार्थोपस्थित्या मनसैव शक्ते
र्लकर्त्तव्यत्वादेर्वा ग्रहात्प्रवृत्तिस्तत्र तादृष्टजन्यप्रत्यक्षव्यक्तेरेवानुमित्यनुपजीवकत्वात्सकलमेवेत्याद्ययुक्तमिति किं
च यत्रेदंतर्भावेनैव सामान्यव्याप्तौ व्यभिचारेपि अनुमितित्वनिष्ठप्रत्यक्षोपजीवकत्वस्य ताद्रूप्येण प्रत्यक्षानंतराभिधानव्याप्य
त्वादेव तत्र संगतिलक्षणासम्भवात्सांक्काणदावनुमित्युपजीवकत्वहेतौ व्यभिचारप्रदर्शनानौचित्यादिति दिक्। ननु प्र
क्षा त्यक्षफलमात्रस्यानुमित्युपजीवकत्वेपि तद्भूतमनुमित्युपजीवकत्वं न प्रमाणफलविभाजकधर्मव्यापकं प्रमाणफल
विभाजकस्य साक्षात्कारत्वस्य नित्यज्ञानेपि सत्त्वादत आह[illegible]ति· तथा च जन्यसाक्षात्कारत्वं फलविभाजकं न तु साक्षा
त्कारत्वमात्रं नित्येऽतिप्रसक्तत्वान्न व्यापकत्वविशिष्टमनुमित्युपजीवकत्वं च नानुमित्यनंतराभिधानव्याप्यमिति व्यभिचा

(अदृष्टाद्वारकत्वरूपधर्मानवच्छिन्नत्व३)

४ रस्त्वइवस्यएवेतिभावः।हेतौ।दृष्टद्वारकत्वंतन्मात्रद्वारकत्वंअदृष्टाद्वारकत्वपर्यवसितंतेनादृष्टद्वारकस्यापिप्रवृत्त्या
दिरूपदृष्टद्वारकतयानोक्तदोषः।तथात्वं।प्रमाणफलविभाजकोपाध्यवच्छिन्नमुपजीवत्वं।इतरस्य।उक्तधर्मानवच्छि
न्नोपजीवकतामात्रस्य·अविनिगम्यत्वात् अनंतरणाभिधानरूपंयत्साध्यंतद्वत्येववर्त्ततेनतुतदभाववतीतिविनिगम
नायाअविषयत्वाद्व्यभिचारित्वादितियावत्·यत्प्रमाणंयस्योपजीवकंतत्तदनंतरनिरूप्यमितिव्याप्तेरनुमानोत्तर
निरूपितेप्रत्यक्षप्रमाणेव्यभिचारात्स्वरूपतउपजीकतापिप्रमाकरणतावच्छेदकोपाध्यवच्छिन्नैवग्राह्याइत्याश
येनाहसर्वमितिव्याप्तिबुद्धीनामेवानुमानत्वात्तासांचसर्वासामेवमनःस्वरूपप्रत्यक्षप्रमाणाधीनत्वादितिभावः।अ
थानुमितिप्रमाकरणतावच्छेदकंव्याप्तिज्ञानत्वंतदवच्छिन्नंचनप्रत्यक्षप्रमाणोपजीवकंव्याप्तिज्ञानत्वस्येश्वरबुद्धाव
पिवृत्तेरितिप्रकृतासिद्धिरतआहअनुमितिमित्यादिंभावयतोजनयतः।तत्करणतेतिंअनुमितिकरणतायानिर्वाहि
काघटिकायाप्रत्यासत्तिःसंबंधोजन्यत्वविशिष्टरूपस्तद्विरहेणाऽनत्वादनुमित्यकरणत्वादित्यर्थः।व्याप्तिज्ञानत्वंना
नुमितिकरणतावच्छेदकंतथासतितद्वतोनित्यज्ञानस्यस्वरूपयोग्यतयाततोऽनुमित्यात्मकफलावश्यंभावापत्तेः।किंतु राम ४

स्वरूपासिद्धिः)१

(प्रमितिकरणतावच्छेदकधर्मव्यापकत्वविशिष्टोपजीवकत्वप्रसिद्धमितिभावः४)

जन्यत्वविशिष्टंव्याप्तिज्ञानत्वंतदवच्छिन्नंचमवस्यैवप्रत्यक्षप्रमाणोपजीवकमतोनासिद्धिरितिभावः अनुमानत्वाव
च्छेदेनप्रत्यक्षोपजीवकत्वंसंपाद्यप्रत्यक्षत्वावच्छेदेनानुमानोपजीवकत्वस्यव्यतिरेकमाहसर्वंपुनरितिननुव्याप्तिज्ञा
नत्वमेवानुमितिकरणतावच्छेदकंनित्यस्यस्वरूपयोग्यत्वेइत्यादिव्याप्तेरप्रयोजकत्वात्प्रयोजकत्वेवासमवायिका
रणस्थलीयत्वात्तत्रैवप्राच्येत्यादृशाव्याप्तेःसर्वत्रोद्भावितत्वात्।तथाचहेत्वसिद्धिरतआहदृष्टद्वारेति।दृष्टमात्रद्वारे
त्यर्थःतथाचादृष्टमद्वारीकृ[redacted]त्यपरप्रमाणांपदुपजीवकंतत्तदनंतरनिरूप्यमितेरेवव्याप्तिःननुप्रमाणतावच्छेदकोपा
ध्यवच्छिन्नत्वमपिनिवेश्यमितिभावः।निरुक्तमनुमानोपजीवकत्वंनप्रत्यक्षेऽस्तियतोव्यभिचारःस्यादित्याहनचेति।अपि
नानित्येंद्रियंस्तुतरांनानुमानमपेक्षतइतिसूचितं।अथादृष्टमद्वारीकृत्यपरप्रमाणांपदुजीवकंतत्तदनंतरनिरूप्यमित्य
पिनव्याप्तिःयत्रचक्षुर्घर्षणाद्रसविशेषपानाद्वापूर्वचक्षुर्नाशानंतरंचक्षुरंतरोत्पादस्तत्रादृष्टाद्वारकस्यघर्षणरस
पानादिप्रयोजकत्वदृष्टसाधनत्वाद्यनुमानस्योपजीवकेअनुमानानंतरनिरूपितेचरंवडुचक्षुषिरसपानाधीनप्र
कृष्टचक्षुषिचव्यभिचारात्।नचात्रोपजीवकत्वंजन्यतारूपमेवघटकमुक्तस्थलेनुचक्षुषोऽनुमानप्रयोज्यत्वमेवेत्यदो

५

पः तथा सति अदृष्टद्वारकत्वविशेषणवैयर्थ्यापत्तेरित्याशयेन शंकते अथेति। उपजीवकमिति। अदृष्टमद्वारीकृत्येत्यादिः। एवं कार्यमित्यत्रापि क्वचिदिति। यत्रोक्तप्रणाल्या चक्षुरंतरेत्यादेस्तत्रस्थं कार्यमित्यर्थः। प्राच्यैरनंतराभिधानव्याप्यस्यैव संगतित्वमिष्टमतस्तन्मतमनुसृत्यैव प्राक् प्रपंचितं वस्तुतस्तादृशनियमाभावेपि न क्षतिः प्रत्यक्षोपजीवकत्वादित्यत्र च पंचमी न हेतुतायां किंतु ज्ञानप्रयोज्यतायामस्तु त्वा प्रवर्त्तते इत्यादौ न तथा युज्यत इत्याशयेन परिहरति किं वानंतर इत्यादि। अनंतराभिधानव्याप्यस्यैव संगतिपदार्थत्वेन दोषतादवस्थ्यमतोऽन्यथैव संगतिपदार्थं निर्वक्ति अनंतरेति। तदभिधानानंतरं तदभिधानस्य प्रयोजिका या जिज्ञासा तज्जनकज्ञानविषयो योऽर्थः स तस्य तत्र संगतिरित्यर्थः। अत्र च प्रत्यक्षं कस्यचित्कारणमिति ज्ञानोत्तरं प्रत्यक्षकार्यत्वेन सामान्यतः प्रत्यक्षकार्यज्ञानं ततः सामान्यप्रकारेण ज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वाद्विशेषतः प्रत्यक्षकार्यज्ञानं भवत्विति शिष्याणां सैव च किं तस्य कार्य्यमित्याकारा ततश्च विशेषतः प्रत्यक्षकार्यज्ञानस्येष्टसाधनतया अनुमानादिरूपप्रत्यक्षकार्यबोधकानां वाक्यानां ज्ञानात् तत्रेच्छा ततः इष्टसाधनताद्वारा वाक्यस्य साधनताज्ञानात् कंठाभिधाने इच्छा ततः इष्टस्य साधनताज्ञानात् कंठक्रियाया

कंठाभिधानस्य

तादृशजिज्ञासाबोधकशिष्यवाक्याद्गुरोः शाब्दबोधस्ततस्तादृशज्ञानस्य शिष्येऽसिद्धत्वज्ञानं ततस्तत्र गुरोरिच्छा सैव बुबोधयिषा २

राम
५

मिच्छाततः कंठक्रियायां गुरोः प्रवृत्तिस्ततस्तु कंठक्रियातदभिघातादिक्रमेण प्रत्यक्षकार्य्यात्मकानुमानबोधकवाक्यस्या
नंतरमभिधानरूपस्य निष्पत्तिरिति प्रत्यक्षानंतरमनुमानाभिधानस्य परंपरया प्रयोजिकायाः किं प्रत्यक्षकार्य्यमित्याका
रकजिज्ञासाया जनकं यत्प्रत्यक्षकार्य्यज्ञानमिष्टसाधनमित्याकारकं ज्ञानं तस्य विषयः प्रत्यक्षकार्य्यत्वमिति तत्र लक्षण
समन्वयः जिज्ञासाजनकज्ञानविषयत्वमात्रस्य घटादावतिप्रसक्तत्वेन प्रयोजकांतं जिज्ञासाविशेषणं। प्रत्यक्षानंतरमनु
मानस्याभिधानप्रयोजिका प्रत्यक्षकार्य्याभिधानेच्छापीति तज्जनकज्ञानस्य विषये प्रत्यक्षकार्य्याभिधानादावतिव्याप्तिरतो
जिज्ञासानुसरणम्। प्रत्यक्षकार्य्यज्ञानस्य यत्फलं सुखादि तद्गोचरज्ञानस्यापि तादृशजिज्ञासाप्रयोजकत्वात्तद्विषये सुखो
दावतिव्याप्तिरतस्तादृशजिज्ञासायाः प्रयोजकत्वमुपेक्ष्य जनकत्वमुक्तं फलेच्छयैवान्यथासिद्धस्य फलज्ञानस्योपायेच्छाप्र
त्यहेतुत्वात्। तादृशजिज्ञासाजनिकायाः फलेच्छाया विषये फलादौ तथाप्यतिव्याप्तिप्रसंगोतो ज्ञानपदं यत्र क्रमेण दंड चक्र
योर्निरूपणोत्तरं दंडस्य किं कार्य्यमिति जिज्ञासया घटो निरूपितस्तत्र दंडकार्य्यत्वमपि घटे चक्रस्य संगतिः स्यात्तस्य चक्रा
भिधानानंतरं घटाभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वादत उक्तमर्थ इति। तज्ज्ञानजन्यतद्विशेष्यकयथार्थस्म

त ५

(६)प्रकारतापन्नत्वात्

६

तिप्रकारतापन्नइतितदर्थस्तथाचोक्तस्थलेदंडज्ञानेनैवदंडकार्य्यत्वप्रकारेणघटःस्मारितोननुचक्रज्ञानेनेतिनातिव्या
प्तिरेवंचयत्रचक्रज्ञानोत्तरमेवदंडकार्य्यत्वप्रकारेणघटंस्मरत्वात्तस्यनिरूपणंतत्रदंडकार्य्यत्वमपिघटेचक्रस्यप्रसंग
रूपासंगतिर्भवत्येवनचयथार्थपदवैयर्थ्यम्‌यत्रदंडकार्य्यंकिमितिजिज्ञासयाभ्रमवशेनदंडोत्तरंगगनादिकंनिरूपि
तंतत्रगगनादौदंडकार्य्यत्वस्यासंगतित्वापत्तेःनचैवंपत्रप्रथमतएवघटबोधेच्छयाघटस्यनिरूपणंतत्रकस्यापिसंग
तिर्घटेनस्यादितिवाच्यं।इष्टत्वात्तदनंतरनिरूपणत्वस्यैवतत्संगति[illegible]नियमेननिरूपणमात्रस्यासंगत्यनियतत्वात्।य
द्यपिचैवमपिप्रत्यक्षकार्य्यज्ञानमिष्टसाधनमित्येवंबोधस्यैवप्रत्यक्षकार्य्यंकिमितिजिज्ञासायाःकारणत्वात्तद्विषयेज्ञाने
ज्ञानत्वाद्याविष्टसाधनत्वादौचातिव्याप्तिस्तथापियद्धर्मविशिष्टविषयकज्ञानधर्मिकेष्टसाधनताज्ञानत्वेनतदनंतरंत
दभिधानप्रयोजकजिज्ञासांप्रतिजनकत्वंतादृशोधर्मस्तस्यतत्रसंगतिरितिविवक्षितं।अत्रचतदनंतरंतदभिधानंप्रति
यद्रूपेणजिज्ञासायाःप्रयोजकत्वंतद्रूपावच्छिन्नकार्य्यताप्रतियोगिकत्वमेवतादृशजिज्ञासाजनकत्वंवक्तव्यंतेनयत्रको
घटःकिंचद्रव्यमितिसमूहालंबनजिज्ञासयानीलोघटद्रव्येवाभिधानंतत्रनद्रव्यत्वेऽतिप्रसक्तिर्नीलोघटद्रव्येवाभिधानंप्र

(स्वविषयकत्वादिसंबंधेनज्ञानादिमत्प्रत्यक्षकार्यमितिस्व

राम
६

तिकोघटइतिजिज्ञासात्वेनैवप्रयोजकतयातदवछिन्नंप्रतिद्रव्यत्वविशिष्टविषयकज्ञानधर्म्मिकेष्टसाधनताज्ञान
त्वेनाहेतुत्वात्।नचयद्धर्म्मविशिष्टविषयकज्ञानेछात्वेनजिज्ञासायाअनंतराभिधानप्रयोजकत्वंतत्त्वमित्येवसम्यक्
जनकज्ञानविषयत्वादिप्रवेशोव्यर्थइतिवाच्यं।तस्यलक्षणांतरत्वेपियथासन्निवेशोवैयर्थ्यविरहात्।अतएवतद
नंतराभिधेयवृत्तित्वेसतितज्ज्ञानजन्यस्मृतिप्रकारतापन्नमित्येवसम्यगित्यपिसमाहितंनव्यास्तुअनंतराभिधानेत्यादेः
स्वार्थधीद्वाराअनंतराभिधानस्यप्रयोजिका निवर्त्यायाजिज्ञासाप्रत्यक्षकार्यंकिमित्याकारातस्याजनकंविषयविधया
जनकतावछेदकंयज्ज्ञानंतस्यविषयोविषयतावछेदकःप्रत्यक्षकार्यत्वमित्यर्थइतिवदंतियत्तुकार्यत्वाद्यन्यतमत्वंसंग
तित्वमितितन्नतदनंतरमभिनिरूपितेपितत्कार्यत्वादेःसंगतित्वापत्तेः प्रमेयनिरूपणोत्तरंप्रमेयवत्किमितिजिज्ञासयायत्र
प्रमेयवान्निरूपितस्तत्रप्रमेयस्वरूपायांप्रसंगसंगतावव्याप्तेः प्रमेयभेदाप्रसिद्ध्यातदन्यतमत्वस्यदुर्वचत्वादितिध्येयम्
।संगतिःषड्विधा।तदुक्तमभियुक्तैः।सप्रसंगउपोद्घातोहेतुतावसरस्तथानिर्वाहकैककार्यत्वेषोढासंगतिरिष्यतेइति।त
त्रनिर्दिष्टोपपादकत्वमुपोद्घातः।चिंतांप्रकृतसिद्ध्यर्थामुपोद्घातंविदुर्बुधाइतिप्राचीनगाथायामपिचिंतापदेहृदभिहि

अ२

अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वेसति,३

तोज्ञावदइतिन्यायेनाचिंतनीयपरंतथाचतस्यार्थोपिप्रकृतसिद्ध्युपपादकतयाचिंतनीयत्वंप्रकृतसिद्ध्युपपादकत्वपर्य्यव
सन्नमेवार्थः।हेतुत्वंकारणत्वं।अवसरोऽनंतरवक्तव्यत्वंअनंतरोद्दिष्टत्वंतथेतिन्यायभास्करकृतः।निर्वाहकंकारणताति
र्वाहकंकार्य्यत्वमितियावत्एककार्य्यत्वंएकंकार्य्यंययोरितियुक्तस्यएककार्य्यकारित्वंप्रसंगत्वंतुसंगतित्वेसत्युपोद्घा
तादिभिन्नत्वंस्मृतस्योपेक्षानर्हत्वंप्रसंगइतिप्रवादेपिस्मृतत्वमनंतराभिधानप्रयोजकजिज्ञासाजनकस्मृतिविषयत्वंउ
पेक्षानर्हत्वंचप्रसंगलक्षणोऽपेक्षार्हायेऽपोद्घातादयस्तदन्यत्वंतेनततोपिप्रागुक्तस्यैवार्थस्यलाभइतिसंक्षेपः।कारण
त्वस्यकार्य्यत्वस्यचेतिषष्ठ्यर्थःप्रकारित्वं।तथाचकार्य्येज्ञातेकारणत्वप्रकारेणकारणस्यज्ञानात्किमस्यकारणमिति
जिज्ञासाकारणेचज्ञातेकार्य्यत्वप्रकारेणकार्य्यस्यज्ञानात्किमस्यकार्य्यमितिजिज्ञासेत्यन्वयः।कार्य्यकारणज्ञानयोस्तुका
रणकार्य्यज्ञानजनकत्वमेकसंबंधिज्ञानस्यापरसंबंधिस्मारकतयेतिभावः।जिज्ञासेतितदुत्तरंचकार्यादिधीजनकवाक्यंछा
दिक्रमेणकार्याद्यभिधानमितिशेषः।इत्थंचेतिसंगतेरनंतराभिधानव्याप्यत्वाघटितत्वेचेत्यर्थः।तुल्यत्वेपीतितथाचव्याप्यता
रक्षार्थंप्रागुक्तउत्कर्षोनादरणीयः।प्रत्यक्षोपजीवकत्वादितिपंचमीतुज्ञानजन्यजिज्ञासाप्रयोज्यतायांनतुहेतुतायामिति

(अनुमानोपमानेस्वत्वंपूर्वग्रंथार्थप्रतिपत्तिप्रयोजनप्रयोज्जनकप्रतिपत्तिविषयार्थसंपूर्णत्वंपार्थसंगतार्थकत्वात्)

भावःलाघवायेति।संगतिप्रदर्शनस्यफलमेकवाक्यतानुमानंतल्लाघवायेत्यर्थः।अनुमानोपमानेपक्षीकृत्यसंमू
हालंबनैकवा क्यतासाध्यकानुमित्यपेक्षयोपमानधर्मिकैकवाक्यतानुमित्यंतरकल्पनायांगौरवादितिभावः।अथा
नुमानगतंबहुवादिसंमतत्वंकथमुपमानेसंगतिरतआहसुप्रसिद्धतयेतिइष्टसाधनीभूतप्रतिपत्तिकतयेत्यर्थः
सुप्रतिपदतयाअनिष्टाजनकप्रतिपत्तिकत्वेनअत्रहेतुर्निरसनीयेत्यादितथाचानुमानप्रतिपत्ताविष्टसाधनत्वबल
वदनिष्टाजनकत्वयोःसत्वात्तत्प्रतीत्यातत्रेच्छोत्पत्तौबाधकंनास्तीतिभावःनोपमानइतिजिज्ञासेत्यनुषज्यतेअप्रसिद्धत्वा
दितियेषामुपमानेविमतिरेवतेषामुपमानज्ञानात्मनोधर्मिणएवासत्वात्कुत्रेच्छास्यादितिभावःयस्योपमानेसंमतिस्त(
स्याप्युपमानप्रतिपत्तौबहुतरदुःखानुबंधित्वग्रहान्नेच्छासंभवतिइत्याहनिरसनीयेतिअतिदुरूहत्वंबहुतरदुःखानु
बंधिप्रतिपत्तिकत्वा।ननुबहुतरदुःखानुबंधिन्यपिपदार्थेतादृशदुःखबलवद्द्वेषाभावदशायांप्रथमंजिज्ञासाजायतएव
इत्यतआहऔत्सर्गिकीमिति।प्रायशोबहुतरदुःखजनकत्वग्रहेद्वेषोभवत्येवेतिरीतिमनुरुध्येत्यर्थःतथाचेतिप्रथममनु
मानजिज्ञासोत्पत्तौनन्निवृत्तौउपमाननिरूपणमितिभावःननुप्रतिबंधकीभूतजिज्ञासानिवृत्तिरूपस्यावसरस्यकुतःसं

गतित्वंतत्प्रकारकजिज्ञासायाअनंतरमननभिधानादतआहयथाचेति अवरस्य अवसरपदार्थस्य आकरेपंचमत्वबोधादौ अनंतरवक्तव्यत्वमेवावसरः तत्रचातःपरंकिंवक्तव्यमितिजिज्ञासयैवानंतराभिधानात्संगतिलक्षणाव्याप्तिरितिभावः। अनंतरोद्दिष्टत्वमेवावसरः अतएवावसरतः कथकाशक्तिनिरूपणमितिपरिशिष्टव्याख्यानेन्यायभास्करकृतोद्देशलक्षणाचात्रसंगतिरित्युक्तमित्यपिकेचित्। सार्वभौममतमाहशब्दांतरेति गोसदृशोगवयपदवाच्यइत्याप्तिदेशवाक्यार्थज्ञानस्यगवादिपदशक्तिग्रहंविनानुपपन्नेर्गोपदंगविशक्तंअसतिवृत्त्यंतरेवृद्धैस्तत्रप्रयुक्तत्वादित्याद्यनुमानापेक्षा उपमित्यात्मकस्यगवयादिपदशक्तिग्रहस्योपमानाधीनत्वात्पूर्वंतन्नापेक्षितमतःशब्दांतरेत्युक्तंगवयादिपदस्यनिःशक्तिकत्वग्रहेतिदेशवाक्यार्थज्ञानासंभवात्तत्प्रतिवंधार्थंगवयादिपदंकिंचिदवच्छिन्नशक्तिमत्साधुपदत्वादित्येवंविधमुपमितिविषयोऽतस्तस्यगवयादिपदस्यापिशक्त्यनुमानंप्रागपेक्षितंभवतीत्याशयेनाहसप्रवृत्तिनिमित्तेत्यादिंननुपत्रमनस्यैवगवयपदवाच्यत्वग्रहसहकृतसादृश्यज्ञानादुपमितिस्तत्रोपमानस्यशक्त्यनुमानानपेक्षितत्वान्निखिलोपमानेऽनुमानापेक्षितत्वंनसंभवत्यतआहअंततइतिबहुवादीत्यादिग्रंथतस्तादृशासंगतेरलाभएवकेचिदित्यत्रा

निःशक्तिकत्वपरिग्रहः ७४

अदृष्टजनकेत्यादेरर्थःपूर्वंप्रदर्शितएव १

स्वरसः।अथोपजीवकत्वसंगतेरनंतराभिधाननियामकत्वापेक्षायामनुमानोत्तरमेवप्रत्यक्षंकिंनानिरूपितम
तआहसंभवतिचेति।इहप्रत्यक्षानुमानस्थले।निरूपणमत्रज्ञानंनतुतदर्थकःशब्दःप्रत्यक्षबोधकशब्दस्यानुमा
नबोधकशब्दंप्रत्यहेतुत्वात्तथाचप्रत्यक्षस्यप्रागज्ञानेऽनुमानधीरेवनस्यात्कारणंविनाकार्य्यानुत्पत्तेरतःप्राक्प्र
त्यक्षंनिरूपितमितिभावःनन्वनुमानत्वादिरूपेणानुमानज्ञानेव्यभिचारात्प्रत्यक्षनिरूपणंनानुमाननिरूपणहे
तुरतआहअथतत्पूर्वकमितिसामान्यतोव्यभिचारेपिप्रत्यक्षपूर्वकत्वेनानुमाननिरूपणंप्रत्यक्षज्ञानसापेक्ष्यमे
वेतिभावःअथतत्पूर्वकमनुमानंत्रिविधंपूर्ववत्शेषवत्सामान्यतोदृष्टंचेतिसूत्रंअथप्रत्यक्षानंतरमनुमानंनिरू
प्यतइतिशेषःतच्चत्रिविधंतदाहपूर्ववदितिपूर्वंकारणंतद्वत्तल्लिंगकंयथाआर्द्रेन्धनप्रभववह्निनाधूमाद्यनुमाने
शेषःकार्य्यंतद्वत्तल्लिंगकंयथाधूमादिनावह्न्याद्यनुमानंकार्य्यकारणभिन्नलिंगकंतुसामान्यतोदृष्टंयथापृथिवीत्वा
दिनाद्रव्यत्वादेरनुमानमितिवाचस्पतिमिश्रास्तुदृष्टमितिसर्वत्रान्वितं।तथाचपूर्वमन्वयसहचारःतद्वत्तयादृष्टंगृ
हीतंशेषोव्यतिरेकसहचारस्तद्वत्तयागृहीतंसामान्यतस्तदुभयसहचारवत्तयागृहीतमित्येवंत्रैविध्यविवरणमाहुः

तच्छब्देन सौत्रेण व्याप्यादीति व्याप्यादेः प्रत्यक्षं यस्मादिति व्युत्पत्त्या प्रत्यक्षप्रमाणपरामर्शादित्यर्थः यथाश्रुते व्याप्या
दिसाक्षात्कारपूर्वकत्वेनानुमाननिरूपणस्य सत्त्वाल्लाभेपि प्रत्यक्षप्रमाणनिरूपणस्यानुमाननिरूपणहेतुत्वालाभा
दसंगत्यापत्तेः नव्यास्तु प्रत्यक्षफलानुमानफलयोः क्रमेण निरूपणे नियामकाकांक्षायामाह संभवति चेति तत्पूर्वक
मित्यादिसूत्रे चानुमानपदं भावव्युत्पत्त्यानुमितिपरमेवं च व्याप्यादिप्रत्यक्षेति यथाश्रुतमेव सम्यगिति प्राहुः नन्वेताव
ता सौत्रक्रमस्योपपादितत्वेपि प्रकृतग्रंथक्रमो नोपपादित इत्यत आह अत्रापीति अनुमानखंडेपीत्यर्थः सहचारेति।
अत्र प्रत्यक्षत्वमिंद्रियसंनिकर्षजन्यज्ञानत्वरूपं प्रत्यक्षमणुक्तं आद्येन तु साक्षात्कारत्वरूपं तथा सति प्रत्यक्षप्रमाण
निरूपणस्य अनुमाननिरूपणहेतुत्वाप्राप्तेरित्यवधातव्यं तन्निरूपणात् अनुमाननिरूपणात्। [redacted]
तस्य चेति प्रत्यक्षपूर्वकत्वेन
सहचारप्रत्यक्षजन्यत्वेन चानुमाननिरूपणस्येत्यर्थः। अनुमानोपमानयोरपि क्रमेण निरूपणे कार्य्यकारणभाव
एव नियामक इत्याह एवमिति अथानुमानपदेन भावव्युत्पत्त्यानुमितेरपि निरूप्यत्वेन प्रतिज्ञातत्वात्तत्रैव सत्त्वं तच्छे

नानुमितेः परामर्शेनुमितेरनुमितात्वविशेषणत्वात्सामर्थ्यासंगतिरतः करणव्युत्पत्त्यालब्धमनुमानमेवपरामर्
श्य व्याचष्टे तत्रेति निरूपणीयइति प्रकारांतरेण व्याप्तिज्ञानत्वानुमितिकरणत्वादिना निरूपणीयेनुमाने व्याप्तिवि
शिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वप्रकारेणानुमितेरविशेषणत्वात्तत्रेत्यत्रसामर्थ्यतादृशाविशेषणत्वमुपपादयि
तुं मध्ये पूरयति लक्षणस्वरूपप्रमाणादिभिरितिनिरूपणमित्यादिना लक्षणस्य तच्चलिंगेत्यादिना स्वरूपस्याथानुमा
नमित्यादिना प्रामाण्यस्य च निरूपणेप्यदनुमानं निविष्टं तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वेनैवानुमितेर्वि
शेषणत्वान्नासंगतिरितिभावः ननु प्रागुक्तक्रमेणानुमित्यनुमानयोर्द्वयोरेवनिरूपणस्य प्रतिज्ञानत्वादनुमाननि(
रूपणपूर्वमनुमितिः कथंनिरूपिताइत्यतआह करणस्येति। क्रियाया यो भेदो व्यावर्त्तकधर्मो व्याप्यादिज्ञानजन्यज्ञान
त्वरूपोनुमितित्वादिस्तेन भिन्नाघटितामूर्त्तिंशरीरमनुमितिकरणत्वादिरूपंयस्यतादृशत्वेनेत्यर्थः। तथाचविशिष्टबु
द्धेर्विशेषणज्ञानं विनानुत्पत्त्या पूर्वमनुमितिर्निरूपितेति भावः। प्रांचस्तु· नन्वनुमानस्य निरूपणत्वेन प्रतिज्ञानत्वादनु
मितेर्निरूपणमर्थांतरग्रस्तमतआह करणस्येति वदंति· तन्मंदं· तावताप्यनुमितेः प्रथमतो निरूपणेऽप्राप्तकाल

(इतरभेदानुमितिजनकधर्मः५)

अनुमानमनिरूप्य, १

(भावकरणव्युत्पत्तिभ्यामुभयनिरूपणस्य प्रतिज्ञाविषयत्वमेतदभिप्रायेण ५)

तादवस्थ्यात्॰ किंच॰ व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानकरणत्वेनानुमाननिरूपणे हेतुभूतस्य व्याप्त्यादिज्ञा
नजन्यत्वेनानुमितिज्ञानस्य संप्रत्यर्थं यदि प्रागेवानुमितेर्निरूपणं तर्हि व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं यऽज्ञानं
तत्करणमनुमानमित्येव मणिकारो ब्रूयात्तावतैव विशेषणज्ञानसंपत्तेः कृतमनुमित्य[illegible]भिलापेन॰ अत्रोपजीव्यो
पजीवकभावइत्यादिनार्थांतरनिरासइतितु न वाच्यं॰ तस्य प्रकारांतरेणासंगमादिति दिक्॰ आह॰ मणिकार उक्तवा
नित्यर्थः। व्याप्तीति स्वातंत्र्येण पाठधारणे॰ यथाश्रुते व्याप्तीत्यनेन क्रियालक्षणस्यैवोक्तत्वादसंगतेः तल्लक्षणमित्य
नंतरं वक्तुमिति पूरणीयं॰ आह अनुमितिलक्षणमाहेत्यपि कश्चित्॰ क्रियालक्षणपूर्वकं अनुमानरूपक्रियाविशे
षलक्षणपूर्वकमिति कः स्वार्थे॰ तथा च अनुमानलक्षणपूर्वमित्यर्थः। तल्लक्षणमाह॰ अनुमितिलक्षणमाह॰ क्वचि
दाकांक्षावैचित्र्येण समासस्थैकदेशस्यापि तत्पदेन परामर्शादिति तु नव्याः। व्याप्त्यादीत्येव पाठ इत्यन्ये॰ व्याप्तीत्यत्र इ
तिशब्दस्याद्यर्थबोधकत्व[illegible]मित्यपरे॰ तयोः सम्यक्त्वमेव यदि तादृशग्रंथस्यापि पुनः पुनर्धारणं संप्रदायसिद्धं॰ यत्रप
तिमनमुत्थापयति॰ अत्रेति अर्थ इति परेणान्वयः। व्याप्तीति व्याप्तिसंबंधपक्षसंबंधयोः सामानाधिकरण्यं संसर्ग

(क्रियाभेदभिन्नमूर्तिकृतयेति समासस्थैकदेशा[illegible]क्रियायाः ८।३)

विषयायद्वगाहतेवह्निव्याप्तिवैशिष्ट्यवत्पर्वतवैशिष्ट्यवान्धूमइत्याकारकंवह्निव्याप्तिवैशिष्ट्यवत्पर्वतवैशिष्ट्यंधूमेइत्याकारकेवाज्ञानंतज्जन्यत्वमर्थः।पदार्थतावच्छेदकेतित्वक्रांतस्यविशिष्टपदस्यवैशिष्ट्याश्रयबोधकत्वाद्व्याप्तिवैशिष्ट्याश्रयत्वमेवपदार्थतावच्छेदकंतत्प्रकारकंचज्ञानंनोपाध्यायमतेपिहेतुरितिवाच्यं·भावविहितत्वक्रांतस्यविशिष्टपदस्यवैशिष्ट्यपरतयाव्याप्तेर्वैशिष्ट्यंयत्रेतिव्युत्पत्त्याव्याप्तिवैशिष्ट्यस्यैवव्याप्तिविशिष्टपदार्थतावच्छेदकत्वादितिभावः·वचनत्वादितिसामानाधिकरण्यसंबंधेनविशेषणतावच्छेदकविशिष्टस्यविशेष्यतावच्छेदकस्यैवकर्मधारयोत्तरभावप्रत्ययार्थत्वादितिभावः इत्थंचनीलोत्पलत्वमित्यादौतादृशसंसर्गेणनीलत्ववदुत्पलत्वस्यैवतादृशभावप्रत्ययार्थस्यप्रकृत्यर्थेनीलोत्पलेऽन्वयान्नीलोत्पलीयंनीलत्ववदुत्पलत्वमित्यन्वयबोधः एतेनतादृशभावप्रत्ययस्ययदिसामानाधिकरण्यत्वेनशक्तिस्तदापदार्थतावच्छेदकयोरेकदेशतयातत्रान्वयासंभवः यदिचतत्त्वपदार्थतावच्छेदकद्वयसामानाधिकरण्यत्वेनशक्तिस्तदातादृशसामानाधिकरण्यस्याप्यवच्छेदकद्वयमात्रवृत्तित्वात्प्रकृत्यर्थस्यचतत्रानन्वयप्रसंगः कथंचिदवच्छेद्यत्वादिसंबंधेनप्रकृत्यर्थस्यतत्रा

नीलत्वोत्पलत्वयोर्नीलोत्पलेनीलत्वोत्पलत्वसामानाधिकरण्यमितिप्रतीत्यानीलोत्पलावच्छेद्यत्वंतादृशसामानाधिकरण्येवाच्यं·सामानाधिकरण्यस्यव्याप्यवृत्तित्वभंगीकुर्वतांदीधितिकाराणांमतेप्रतीतिरन्यथैवोपपन्नेत्यत [illegible]

नीलत्वोत्पलत्वसामानाधिकरण्यं १

कर्मधारयोत्तरभावप्रत्ययार्थस्यनीलोत्पलत्वस्वरूपत्वात् १

(नीलोत्पलत्वावच्छेद्यसामानाधिकरण्यस्य)

त्वपसंभवेप्युत्पलत्वेनीलोत्पलँत्वमित्यादिव्यवहारप्रसंगःताँदृशसामानाधिकरण्यस्योँत्पलत्वेपिसत्वात्नीलोत्पलत्वंन
समवेतमित्यादिव्यवहारापत्तिरित्यादिकंसमाहितंयत्तुतन्नहिशेषणतावच्छेदकादिभेदादनंतशक्तिकल्पनापत्तेर्नकर्मधा
रयोत्तरभावप्रत्ययस्यउक्तरूपेणशक्तिःकिंतुवृत्तित्वमात्रेतथाचनीलोत्पलत्वमित्यादौभावसामान्यँशक्त्योपस्थापित
स्योत्पलत्वादेर्नीलान्वितवृत्तित्वेनसहान्वयान्नीलवृत्त्युत्पलत्वंवाक्यार्थइतिमतंतन्ननीलोत्पलत्वमित्यादौनीलोत्पलयो
रभेदानुभवस्यापलापप्रसंगाँत्वस्तुतोघटत्वमित्यादौघटेतरावृत्तित्वेसतिसकलघटवृत्तित्वरूपेणघटत्वस्यानुभवः
सर्वसिद्धस्तत्रचघटस्यघटपदादेवलाभादितरावृत्तित्वादौभावप्रत्ययस्यशक्तिःतत्रापिइतरत्वमाश्रयोवृत्तिमान्सा
कल्यघटकीभूतंप्रतियोगित्वमवच्छेदकंचप्रत्येकमर्थःतथाचप्रकृत्यर्थस्यघटस्येतरत्वेतस्यचाश्रयेआश्रयस्यवृ
त्तिमतिवृत्तिमतःपुनरितरत्वेऽन्वयात्घटेतरावृत्तित्वस्यसत्यंतदलस्यलाभःएवंप्रकृत्यर्थस्यघटस्यवृत्तिमतितस्यचेत
रत्वेइतरत्वस्यचप्रतियोगित्वेप्रतियोगित्वस्यचावच्छेदकेतस्यचपुनरितरत्वेन्वयाद्घटवृत्त्यन्योन्याभावप्रतियोगिताव
च्छेदकभिन्नत्वरूपस्यसकलघटवृत्तित्वस्यलाभःव्युत्पत्तिवैचित्र्याच्चैकपदार्थानांपरस्परमन्वयःनचविशिष्टस्यापदार्थ

स्थत्व

कर्मधारयोत्तरभावप्रत्ययार्थेन २

अंशित्वाभेदप्रतियोगितावच्छेदकता,२

त्वे प्रथमं विशिष्टवैशिष्ट्यान्वयबोधो न स्यादिति वाच्यं इष्टत्वात्। क्वाचित्कस्य प्रथमं विशिष्टवैशिष्ट्यबोधस्य विशिष्टेत्वस्य
रागादितोप्युपपत्तेः। प्रकृत्यर्थतत्वावच्छेदकस्य यादृशः संबंधो भासते तादृशसंबंधावच्छिन्नतद्वृत्तिमत्त्वादिकं ग्राह्यं तेन घट
त्वादिजातेः कालिकादिसंबंधेन घटेतरवृत्तित्वेपि न क्षतिः। न वा विषयितासंबंधेन घटत्ववतो भेदस्य घटवृत्तित्वेपि घटत्वा
देर्घटवृत्त्यन्योन्याभावप्रतियोगितानवच्छेदकत्वहानिः सत्त्वं प्रमेयत्वमित्यादौ च सदितरवृत्तित्वादेर्न भानमप्रसिद्धत्वात्
किंतु सद्वृत्तिभेदप्रतियोगितानवच्छेदकत्वादिरूपं सकलसद्वृत्तित्वादिमात्रं भासते। न चैवमपि घटत्वमित्यादितोऽभाव
स्य गगनादेर्वा लाभप्रसंगः। स्वातंत्र्येणापि वृत्तिमतोऽन्वयात्। इत्थं च नीलोत्पलत्वमित्यादिकर्मधारयस्थलेपि नीलाभिन्नो
त्पलस्य भावप्रत्ययार्थेन सहान्वये नीलत्वसमवायिसमवायरूपस्य पदार्थतावच्छेदकसामानाधिकरण्यस्य भानं भवत्येव।
न चोक्तरीत्याभावप्रत्ययस्य शक्तिकल्पने गुरुत्वमित्यादितो रसवत्त्वस्य संयोगवत्त्वमित्यादितो द्रव्यत्वस्य तद्रूपवत्त्वमित्या
दितस्तद्रूपवत्त्वस्य प्रतीत्यापत्तिः प्रकृत्यर्थतावच्छेदकनिरूपितत्वविशिष्टप्रकृत्यर्थतावच्छेदकताघटकसंबंधेन वृत्तिम
त्त्वस्यैव शक्यवर्गप्रवेशेतु न तत एव निखिलातिप्रसंगभंगादित एव वृत्तित्वादौ शक्तिकल्पनायां मानाभाव इति वाच्यं ताद्रूप्येण

तत्रापि निरुक्तार्थस्य सत्त्वात् ५

इतराद्वृत्तित्वादेः)१ उक्तातिप्रसंगवारणायनिरुक्तसंबंधसंकोचस्यावश्यकत्वेतिभावः)१

श्री० ज० अनुभवानुरोधादेव तत्तच्छक्तेः कल्पनाद्व्यावर्त्तकस्यापि शक्यतावच्छेदकत्वादिति संप्रदायः केचित्तु धर्मत्वेनैव धर्मे भाव
१२ प्रत्ययस्य शक्तिस्तत्र च प्रकृत्यर्थतावच्छेदकनिष्ठाधेयत्वसंबंधेनैव प्रकृत्यर्थान्वयस्य व्युत्पन्नत्वात् घटत्वमित्यादितो न
द्रव्यत्वादेर्भानं न वा पटादौ घटधर्मस्य द्रव्यत्वादेः सत्वेपि पटादौ घटत्वं नास्तीत्यस्य वा कस्याप्ययोग्यत्वमित्याहुः तन्मंदं घ
टे घटत्वमित्यादिवाक्यस्य निराकांक्षत्वापत्तेः। घटधर्मत्वावच्छिन्ने घटवृत्तित्वस्यान्वयबोधे उद्देश्यतावच्छेदकविधेययो
रैक्यस्यावश्यकत्वादिति। नव्यास्तु घटवत्त्वमन्यत्वमित्यादिमुख्यप्रयोगसंभवाल्लाघवेन घटत्वादिकं जातिः भेदत्वादि
रखंडोपाधिर्भावप्रत्ययस्य शक्यतायामवच्छेदकं घटत्वमित्यादौ घटत्वत्वादिप्रकारेण लक्षणयैव बुद्धिरिति प्राहुः तु
स्य४ तन्मंदं। तथा सति घटवत्त्वमित्यादौ प्रकृत्यर्थघटवदादेर्भावार्थघटादौ आधेयत्वसंबंधेनान्वयस्यानुपपत्तेः। घटा
दिविशिष्टे घटादेरिव घटादौ घटादिमद्वृत्तित्वस्याप्यन्वयस्य निराकांक्षत्वात्। घटवान्घटवानित्यत्रेव घटवति घटद्वयस्याद
वप्यन्वयबोधानुदयस्य सर्वानुभवसिद्धत्वादिति संक्षेपः। ननु वह्निव्याप्तिवैशिष्ट्यवत्पर्वतवृत्तितावद्द्रव्यत्वं इत्येवंपरा राम
मर्शजन्यानुमितावव्याप्तिस्तत्र व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मताया द्रव्यत्वे। भावादत आह ज्ञानेति। भ्रांतानु १२

घटत्वेनैवधर्मत्वेनभावः)५

द्रव्यत्वहेतुकायां)१

·यत्तुहृदोवह्निमान्धूमा ४

(पर्वत्वावच्छिन्नधर्मिवृत्तितायां४३)

(कंचनमयपक्षीयविशिष्टपर्वतत्वादि)

मितिःस्यात्तस्यानुमितित्वंतथाचतत्रव्याप्तिविशिष्टत्वसमानाधिकरणंयत्पर्वतवृत्तित्वंपर्वतरूपादौप्रसिद्धंतस्यद्रव्य
त्वादावारोपमादायैवलक्षणसंगमइतिभावः।यद्वा·ननुकांचनमयपर्वतोवन्हिमानित्याद्यनुमितावव्याप्तिः।तादृशा
पक्षवृत्तित्वाप्रसिद्धेरतआहज्ञानपदेति·तथाचवन्ह्यादिव्याप्तिविशिष्टत्वसमानाधिकरणंतत्तद्धर्मिवृत्तितायास्तत्तद्रूपा
वच्छिन्नवृत्तित्वत्वेनज्ञानजन्यज्ञानत्वंतत्तद्रूपावच्छिन्नतत्तद्धर्मिकवन्ह्यादिसाध्यकानुमितेर्लक्षणमितिभावः।ह्रदादौव्या
प्तिविशिष्टत्वसमानाधिकरणह्रदधर्मत्वाप्रसिद्ध्यातज्ज्ञानासंभवादव्याप्तिरतउक्तंज्ञानपदेत्यादितत्तुच्छंतत्रतादृशसा
मानाधिकरण्यस्याप्रसिद्ध्यातज्ज्ञानासंभवस्यानुपदंवक्ष्यमाणत्वेनसंदर्भविरोधात्केचित्तुबाधिताबाधितसाधारणेत्य
स्यसदसत्साधारणेत्यर्थस्तथाचसदुपरागेणासतोभानस्यटीकाकृतास्वीकारादसदेवसामानाधिकरण्यमादायह्रदोव
ह्निमानित्याद्यनुमित्यव्याप्तिनिरासाभिप्रायकोयंग्रंथइत्याहुः।परेतुयत्रवह्निव्याप्तिविशिष्टत्ववद्गुणसंयुक्तत्ववान्धूमव
त्यादिपरामर्शाद्गुणोवह्निमानित्यनुमितिस्तत्राव्याप्तिर्गुणसंयुक्तत्वरूपस्यपक्षधर्मस्याप्रसिद्ध्यातत्ज्ञानासंभवास्य त्व२
तत्राहज्ञानेति।बाधिताबाधितेत्यस्यसदसत्साधारणस्यपक्षवृत्तित्वस्यज्ञानलाभादिसर्थइत्याहुस्तन्मंदंसदुपरागेण

बाधनिश्चयासमानकालीनत्वं ।२

श्री॰ज॰ सतःसंसर्गमर्य्यादयैवभानस्यटीकाकृदादिप्राचीनसंमतत्वेनप्रकारविधयालीकस्यगुणसंयुक्तत्वादेर्भानासंभवादऽ
१३ न्यथापरमताविशेषप्रसंगादिति॰ नव्यास्तु॰ ननुबाधकालीनस्यपरामर्शस्यानुव्यवसायेतिव्याप्तिः नचआद्यज्ञानेऽबाधि
तत्वंविशेषणं॰ अप्रामाण्यज्ञानविशिष्टबाधकालीनपरामर्शजन्यानुमितावव्याप्तिप्रसंगादतआहज्ञानेति'बाधिताबा
धितेति॰ बाधिताबाधितसाधारणपरामर्शत्वेनज्ञानस्यकारणत्वलाभादित्यर्थः।तथाचतादृशकारणत्वंलक्षणेनिविष्ट
मितिनातिव्याप्तिः।अतएवबाधितपदमपिसाधुसंगच्छतइतिप्राहुः।केचित्तु॰ ननुचरमज्ञानपदस्यभ्रमपरत्वेप्रमानुमि
तौप्रमापरत्वेचभ्रमानुमितावव्याप्तिरतउक्तंज्ञानेतिइतिक्रमेणावतारणिकामाहुः।तच्चिंत्यंवस्तुगत्यातादृशपक्षधर्मता
याज्ञानमात्रनिवेशेधूमवान्पर्वतइतिज्ञानजन्यबुद्धावप्यतिव्याप्तिरतस्तादृशसामानाधिकरण्यावगाहिज्ञानंनिवेश्य
मित्याशयेनदूषयतिपरामर्शेनेति'अनुमितिजनकज्ञानेनेत्यर्थः।निपमतइति।तथाचवह्निव्याप्तिसंबंधविशिष्टपर्वत
संबंधवान्धूमोवह्निव्याप्यधूमवांश्चपर्वतइत्यादिसमूहालंबनजन्यानुमितौलक्षणसत्वेऽपिवह्निव्याप्यधूमवान्प राम
र्वतइत्यादिधीजन्यप्रमानुमित्यव्याप्तिरितिभावः।ननुव्याप्तिसंबंधविशिष्टपक्षसंबंधनिश्चयत्वेनहेतुत्वादुक्तस्थलेऽनु १३

घटाभावभूतले घटाभाववद्भूतलं १६

मितिरेवाप्रसिद्धा कुत्राव्याप्तिरत आह गौरवेणेति। लाघवात्पक्षवृत्तौ व्याप्तिविशिष्टत्वनिरूपत्वेन पक्षे वाव्याप्तिविशिष्टवैशिष्ट्यावगाहिनिरूपत्वेन हेतुत्वादिति भावः ननु व्याप्तिविशिष्टबुद्धित्वं न व्याप्तिसंबंधावगाहिबुद्धित्वं व्याप्तितत्संबंधादिसमूहालंबनादप्यनुमित्यापातात्किंतु व्याप्तिसंबंधसंबंधावगाहिबुद्धित्वमेव तत्कुतो लाघवमित्यत आह संबंधेत्यादि तद्विशिष्टबुद्धित्वं तत्प्रकारकज्ञानत्वं न तु संबंधसंबंधावगाहित्वं संबंधसंबंधावगाहिसमूहालंबनेऽतिप्रसक्तेः। अन्यथा दंडी पुरुष इत्यादितो दंड इ पुरुषसंयोग इत्यस्य वैलक्षण्यानुपपत्तेः। प्रकारता च विषयताविशेषः स च स्वरूपसंबंधः पदार्थांतरं वा अत एवाधिकरणाभावयोः संबंधस्य स्वरूपानतिरेकेपि तदीयसमूहालंबनविशिष्टबुद्ध्योर्भेदः। न च तुल्यविषयकत्वे विषयतावैलक्षण्येन बुद्धिभेदे साकारवादापत्तिरिति वाच्यं बाह्यवस्तूनां प्रामाणिकतयापह्नोतुमशक्यत्वादित्यादेर्बौद्धाधिकारटिप्पण्यामुक्तत्वादिति भावः इति प्रांचः· तन्मंदं· विशिष्टबुद्धेः संबंधसंबंधावगाहित्वमतेपि व्याप्तिविशिष्टबुद्धित्वापेक्षया व्याप्तिसंबंधविशिष्टबुद्धित्वस्य गुरुतया तुल्यत्वायोगादिति· नव्यास्तु· ननु व्याप्तिप्रकारकपक्षधर्मताज्ञानं नानुमितिजनकं· व्याप्तिसंबंधपक्षसंबंधयोः सामानाधिकरण्यावगाहिताकान्यत्वादि

तथा च कुतो लाघवमित्यसंगतिरिति भावः १२

(प्रकारताया वैलक्षण्यानुपपादकत्वे ५)

व्याप्यवच्छिन्नप्रकारतानिरूपितपक्षधर्मताविषयिता ।४

(ह्रदानुयोगिकसंयोगः ६)

श्री०जा०
१४

त्यनुमानादुक्तगौरवंप्रामाणिकमेवेत्यतआहसंबंधेत्यादि·व्याप्तिसंबंधपक्षसंबंधयोःसामानाधिकरण्याग्रहेपीत्यर्थःवि
शिष्टज्ञानत्वस्य·विशिष्टस्यज्ञानत्वंयत्रेतिग्रन्थेनानुमितिजनकीभूतविलक्षणज्ञानस्य·उपपादितत्वात्·मिश्रादिभिरुप
पादितत्वादित्याहुः ननुव्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मतायाविशिष्टवैशिष्ट्यनिरूपितविषयिताविशे
षेणज्ञानपदार्थोऽन्वयादिलक्षणज्ञानत्वाभावात्वह्निव्याप्यधूमवान्पर्वतइत्यादिधीजन्यप्रमानुमित्यव्याप्तिरतआ
हभ्रमस्थलइतितज्ज्ञानेतिव्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मत्वज्ञानेत्यर्थः।तथाचह्रदोवह्निमानित्यादिभ्र
मानुमितौअव्याप्तिरितिभावः।अथासदेववह्निव्याप्तिविशिष्टत्वसमानाधिकरणंह्रदवृत्तित्वंभ्रमस्थलेप्रसिद्धमत
आहअसदितिअलीकेचक्षुःसन्निकर्षादेर्व्याप्त्यादेःज्ञानादेश्चविरहेणप्रत्यक्षादिप्रमाणानांतत्प्रवृत्त्यसंभवात्तत्त्वे
चासत्त्वव्याघातात्विनापिप्रमाणव्यापारंतदभ्युपगमेचशशविषाणादिप्रतीतिदशायांवंध्यासुतादेरपिग्रहप्रसंगा
त्।अगृहीतशशादिकस्यपुंसःशशविषाणमित्यादिप्रतीत्यनुत्पत्त्याल्कृमशशादिविषयतामादायभ्रमत्वेनैवतादृ
शप्रतीत्युपपन्नावतिरिक्तत्वंऽलीकविषयत्वेमानाभावात्शशविषाणयोःसंबंधोऽलीकइत्यादिव्यवहारस्यचापा

तद्ग्रहे प्रमाणव्यापारानपेक्षणात् ।३

राम
१४

र्थकत्वात् शशे विषाणमस्तीत्यादिस्थले चासङ्खवृत्त्यात्यंताभावप्रतियोग्यर्थकत्वादिति भावः न चासतो प्रसिद्ध्या तत्र व्याप्तिनिषेधस्यायोगः तदीयसंसर्गत्वावच्छेदेन तत्प्रमात्वघटकत्वोपगमेनार्थतस्तन्निरासादिति भावः न व्याप्तलिंगासंसर्गाग्रहाल्लिंगिका संसर्गाग्रहस्योपेयत्वात् भ्रमस्थलेनुमित्यनुत्पत्तेः कुत्राव्याप्तिरत आह असदिति· असतः प्रमापरामर्शादनुत्पन्नस्य व्याप्तिनिरासादनुमितिभिन्नत्वनिरासादिति वदंति लक्षणाव्याप्तिमुद्भाव्य लक्षणवाक्तः शाब्दबोधोप्यनुपपन्न इत्याह अवांतरेति· अयोग्यतासंशयस्याप्रतिबंधकत्वादुक्तं निर्णय इति तथा चेदं धर्मतान व्याप्तिविशिष्टत्वसमानाधिकरणेत्यवांतरवाक्यार्थयोग्यत्वनिर्णयेनाह शशपक्षधर्म्मतायान ज्ञानपदार्थेऽन्वयः सम्भवतीति भावः अत्रैव दृष्टांतयति विषाण इति विषाणत्वावच्छेदेनेत्यर्थः शशसम्बंधेति शशविषाणेत्यत्र तत्पुरुषे शशपदेन लक्षितस्य शशसंबंधिनस्तादात्म्येन विषाणेऽन्वये शशसम्बंधिभेदाग्रहस्येव शशसम्बंधाभावाग्रहस्यापि सतो विरोधित्वात् शशसम्बधाभावेत्यस्यैव वा शशसंबंधेनाभाव इति व्युत्पत्त्या शशासंबंधावच्छिन्नभेदोर्थः तथा विषाणजन्यं कार्मुकमित्यादिवाक्यस्थलीयान्वयबोधाभिप्रायेणेदं निपातार्थस्य शशसम्बंधादेः साक्षादेव विषाणादिनामार्थे

तथाँशाब्दार्थस्य ।१

संबंधःस्वावच्छिन्नप्रतियोगिताकत्वं७)

न्वयसंभवादितितुपरमार्थः वैयाकरणमतेशशविषाणमित्यादिवाक्यतः शशसंबंधवद्विषाणमित्याकारकोबोधस्तै
र्लुप्तविभक्तिप्रतिसंधानस्यान्वयसहकारित्वस्वीकारात्नामार्थयोर्भेदेनान्वयबोधस्यसमासातिरिक्तस्थलेएवाव्युत्प
न्नतयामणिकृन्मतेपिशशपदस्यशशसंबंधपरतयावेतितुनव्याः अनुभवानुरोधेनासमानाकारस्यापिविरोधित्व
मित्यपिकश्चित्. अपरेतुशशस्यसंबंधोयत्रेतिव्युत्पत्याशशसंबंधाभावद्रव्यस्यशशसंबंधिभेदस्यलाभेनयथाश्रु
तमेवसम्यगितिप्राहुः तच्चिंत्यं. नचेतिवाच्यमितिपरेणान्वयः प्रमैवेतिप्रकृतपक्षधर्मिकप्रकृतसाध्यकप्रमानुमि
तिरेवेत्यर्थः तेनभ्रमानुमितेरप्यंशतःप्रमात्वेपिनक्षतिः प्रमापदस्यभ्रमसामान्यभिन्नार्थकत्वेह्रदःपर्वतश्चवह्निमा
नित्यादिसमूहालंबनानुमितेरलक्ष्यत्वापत्तेरिष्टापत्तौचोपाध्यायमतेऽपितादृशसमूहालंबनानुमितावेवातिप्रसंग
संभवादग्रेयदिचेत्यभिधानस्यसंदर्भविरोधापत्तेरितिभावः सल्लिंगपरामर्शादित्यत्रसल्लिंगपरामर्शमात्रादित्यर्थः इ
त्यपिवदंतिनतुभ्रमस्यालक्ष्यत्वेपृथिवीत्वादिहेतुनायंगंधप्रागभावावच्छिन्नोघटोगंधवानित्यादिभ्रमानुमितौमहा
नसीयेतरवह्निबाधसहकृतायथार्थवह्निपरामर्शाज्जायमानायांपर्वतोमहानसीयवह्निमानित्यादिभ्रमानुमितौचा

शशसंबंधेनाभाववदित्येतादृशव्युत्पत्त्यैवाय
मर्थोलभ्यतेतत्रतृतीयार्थएवतादृशसंबंधा
वच्छिन्नप्रतियोगिताकत्वमभावेलभ्यतेऽत्रेनतथेतिचिंताबीजं७६

तथाचगंधप्रागभावउपलक्षणविषयाभासस्तेनेइतिप्रमैवसाऽनुमितिः)२

तिव्याप्तिरतआहयदिचेत्यादिपक्षतावच्छेदकसामानाधिकरण्येनैवगृहीतव्यापकतावच्छेदकरूपेणैवचपक्षे(
साध्यस्यानुमितिरित्युपाध्यायमतमालंब्योक्तंयदिचेतिप्रथमज्ञानपदस्यप्रमापरत्वेनदोषतादवस्थ्यमतआहप्रमे
तिप्रमापरमितिप्रकृतपक्षधर्मिकप्रकृतसाध्यवत्ताप्रमापरमित्यर्थस्तेनह्रदोवह्निमान्पर्वतश्चवह्निमानित्यादि
प्रमानुमितेरंशतोभ्रमत्वेपिनतत्राव्याप्तितादस्थ्यंयत्रव्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मत्वस्यहेतौनभ्र
मःकिंतुपक्षधर्मेहेतौव्याप्यत्वमात्रस्यव्याप्येवाहेतौपक्षधर्मत्वमात्रस्यभ्रमस्तादृशपरामर्शजन्यप्रमायामव्याप्तिमा
हअव्याप्येत्यादिनावस्तुतोवस्तुगत्यातथाचवह्निव्याप्यद्रव्यत्ववान्तादृशमहानसत्ववांश्चपर्वतइत्याकारकःपरा
मर्शोयत्रद्रव्यत्वगतमेवपक्षधर्मत्वंमहानसत्वगतमेवव्याप्यत्वंविषयीकरोतितत्रत्यायांपर्वतोवह्निमानितिप्रमा
यामव्याप्तिरितिभावःननुअनुमितिमात्रस्यैवसाध्यव्याप्यवत्पक्षावगाहित्वादुक्तस्थलीयानुमितिर्लिंगांशेभ्रमरूपैव
साचनलक्ष्याभ्रमसामान्यभिन्नत्वरूपस्यैवप्रमात्वस्यलक्ष्यलक्षणयोर्निवेशनीयत्वात्पर्वतोह्रदश्चवह्निमानित्या
दिसमूहालंबनानुमितेरलक्ष्यत्वेऽपिक्षत्यभावात्कुतोव्याप्तिरतआहलिंगेतिसाधकाभावादित्यादिःनचधूमादिप

नानाव्याप्तेः प्रयोजकत्वेऽनुमितेस्तदवगाहित्वावश्यकत्वेनाप्रमात्वापातात् १४

श्री० जं०
१६

रामर्शजन्यतावच्छेदकतयैवानुमितेर्वह्निव्याप्यधूमादिविषयकत्वसिद्धिरन्यथा विनापि धूमादिपरामर्शमालोकादिपरामर्शादुक्तानुमितेरुत्पत्त्या व्यभिचारादिति वाच्यं तावतापि द्रव्यत्ववत्सर्वत्तधर्मिकवह्न्यनुमितित्वावच्छिन्नं प्रत्येव वह्निव्याप्यद्रव्यत्ववत्तानिश्चयत्वेन हेतुतया तादृशानुमितेश्च प्रमात्वनियतत्वेन तत्राव्याप्तितादवस्थ्याल्लाघवादेकविधव्याप्तेरेवानुमितिप्रयोजकत्वस्य व्यवस्थाप्यत्वादिति भावः ननु पक्षस्य वस्तुगत्या साध्यवत्त्वे तत्रेश्वरीयव्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मताज्ञानस्य जन्यतासत्त्वान्नाव्याप्तिरत आह ईश्वरेति। अतिप्रसंजकत्वाद्वह्निप्रत्यक्षादिसाधारणत्वात् इदमुपलक्षणं व्याप्तिविशिष्टपक्षधर्मतेत्यस्य वैयर्थ्यमपि द्रष्टव्यं तथा च तादृशज्ञानत्वावच्छिन्नमेव जनकत्वं लक्षणे प्रवेश्यं तच्च प्रकृतानुमितावीश्वरज्ञानस्य नास्तीति भावः। यद्यपि व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मताया विषयिताविशेषेण ज्ञानमेव लक्षणे प्रविष्टमन्यथा परामर्शे न नियमत इत्युक्तदोषतादवस्थ्यात् तत्र च प्रकृतसाध्यीयव्याप्तिप्रवेशे मानाभावात् यत्किंचित्पदार्थीयव्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मताया विषयिताविशेषेण ज्ञानमादाय पक्षलक्षणसंभवान्न कुत्राप्यव्याप्तिसंभावना तथापि प्रकृतव्या

राम
१६

आघपेसः ३

अनुशासनं)५ धर्मतायाः)१

प्तिविशिष्टवैशिष्ट्यानिरूपितविलक्षणविषयितासंबंधेनधर्मत्वस्यैवज्ञानपदार्थेऽन्वयात्सर्वसामंजस्येपक्षपदार्थप
र्य्यवप्रवेशावैयर्थ्यान्नैवमन्वयोवाच्य इत्याशयः।नचसाध्यादिभेदेनव्याप्तिभेदादेकोपादानेऽन्यसाध्यकानुमित्यव्याप्तिर
तोजातिगर्भलघ्वौव्येनकुत्राप्यव्याप्तिरितिवाच्यं।तत्पक्षकतत्साध्यकतद्धेतुकानुमितित्वेनविशिष्ट्यैवलक्ष्यतयाजाति
घटनायाअनावश्यकत्वादेकविधव्याप्तेरेवसर्वत्रानुमितौहेतुत्वादित्याशयादिति।अतएवउक्तानुमित्यव्याप्तेरेववि
शेषविधिंविनाकारकविभक्तिमन्तर्भाव्यैवतत्पुरुषस्यव्युत्पन्नत्वादाहतज्ज्ञानंवेति।व्याप्तिविशिष्टेयत्पक्षधर्मताज्ञान
मितिज्ञानंनतत्पुरुषोपिनेत्यर्थः।आदिपदात्व्याप्तिविशिष्टव्याप्तिसमानाधिकरणयापक्षधर्मतेत्यादिकर्मधारयप
रिग्रहः।मिश्रमततुपन्यस्यतिव्याप्तिविशिष्टमितिअथचार्थेद्वंद्व इतिपाणिनिसूत्रेणचार्थेसमस्यमानपदार्थयोर्भेदेद्वं
द्वस्यविधानादुक्तवाक्यतैवसल्लिंगपरामर्शलाभः।तत्रव्याप्तिविशिष्टस्यैवपक्षधर्मतयातदुभयोर्भेदविरहादतआ
हपदार्थयोरितिन्यायसूत्रेद्वादशविधस्यैवप्रमेयस्यप्रविष्टत्वात्तस्यभेदःप्रमाणेऽस्येवेत्यतउक्तं।अन्यत्रचेति।अन्यत्रनी
लघटयोरभेदइत्यादिवाक्येतथाचसूत्रेपिचार्थोभेदः।समस्यमानपदप्रतिपाद्यतावच्छेदकयोरेवग्राह्यः।सचप्रकृतेपि

साध्याभाववदवृत्तित्वादिनानाविधव्याप्तीनांप्रयो
जकत्वेएकपक्षसाध्यहेतुकस्थलेऽव्याप्तेःप्रतिघटना
याआवश्यकत्वंस्यान्नैनदृत्तीतिभावः)४

सरूपैकशेषः १५

यान्निविशिष्टत्वपक्षधर्मत्वयोर्भेदादस्यैवेति भावः ननु पदार्थतावच्छेदकभेदेन द्वंद्वविधाने घटावित्यादिसरूपैकशेषा-
नस्यात् द्वंद्वापवादस्य तस्य द्वंद्वाप्रसक्तावसम्भवात् । न च पदबोध्यभेद एव द्वंद्वस्तथा च घटावित्यत्रापि घटपदबोध्यानां
घटव्यक्तीनां परस्परं भेदसत्त्वान्न द्वंद्वाप्रसक्तिरिति वाच्यम् । तथा सति घटकलशावित्येवमपि द्वंद्वप्रसंगात् । अनुशा-
सनाभावेन तत्रैकशेषस्य कर्तुमशक्यत्वादिति चेन्न । तत्र सरूपैकशेषासत्त्वेपि क्षत्यभावात् । यत्रावि हुत्वसिंहत्वादिकं वि-
भिन्नमेव हरिपदार्थतावच्छेदकं तत्रैतत्संभवाच्चेति दिक् । अत्र च नीलघटयोर्भेद इत्यादिस्थले विभक्त्युपस्थाप्यं द्वित्वादि-
कं न विशेष्यान्वितं तस्यैकत्वेन बाधात् । नापि विशेषणीभूते नीलत्वघटत्वादावन्वितं तयोः पदार्थतावच्छेदकत्वेनाकांक्षा-
विरहात् किंत्वनन्वितमेव न चैवं द्विवचनवैयर्थ्यं दारा इत्यत्र बहुवचनवत् सुप्यते इत्यत्र एकवचनवच्च साधुत्वार्थमेव तदु-
पयोगादिति ध्येयम् । स्वामिनौ देवदेवरावित्यत्रैव सुसन्निवेचित्र्यात् पदार्थतावच्छेदकेपि विभक्त्यर्थस्य द्वित्वादेरन्वय इति ।
अत एव जात्याकृतिव्यक्तयः पदार्थ इति न्यायसूत्रे पदार्थ इत्यत्रैकवचनं जात्यादित्रयस्यैकशक्तिविषयत्वलाभार्थमिति वाति-
कव्याख्येत्यपि वदंति । ननु पदार्थतावच्छेदकयोर्भेदेन द्वंद्वविधाने नीलोत्पलमित्यादिकर्मधारयस्थलेपि तदापत्तिरत आ-

पदशक्तिमार १२

समाहारद्वंद्वः १२

हपदार्थेति।भेदस्तादात्म्यातिरिक्तःसंबंधः।अभेदस्तादात्म्यं।तथाचैकपदार्थधर्मिकपदार्थान्तरवैशिष्ट्यविषयतावहिर्भूतविभिन्नधर्मावच्छिन्नपदार्थद्वयविषयताकबोधजनकत्वेनेत्यर्थः।तेनैकदानीलोत्पलमित्यस्य द्वंद्वकर्मधारयो[illegible]भयत्वेपिनक्षतिः।पदार्थयोर्भेदेद्वंद्वविधानेपिनक्षतिरित्याशयेनाहविशिष्टपदस्येति।व्याप्तिविशिष्टपक्षधर्मयोर्द्वंद्वेविशेषविधिंविनाअल्पस्वरस्यपक्षधर्मपदस्यपूर्वनिपातापत्तिरतआहविशिष्टपदस्येतीत्यपिकश्चित्ननुव्याप्तिविशिष्टेनपक्षधर्मतायांद्वंद्वेवह्निव्याप्यद्रव्यत्ववान्पर्वतइत्यादिपरामर्शेनव्याप्तिविशिष्टस्याविषयीकरणात्तत्रयानुमितावव्याप्तिरतोवैशिष्ट्यपरतामाहधर्मेति।वैशिष्ट्यपरतयेत्यर्थः।नचविशिष्टपदस्यतत्परत्वंनलक्षणयातस्यवाक्यत्वेनशक्त्यभावादितिवाच्यंधातोरेवशक्त्यावैशिष्ट्यपरत्वात्भावविहितक्तप्रत्ययस्यनिरर्थकत्वादेतदावेदयितुमेवप्रागपिविग्रहवाक्येव्याप्तिविशिष्टमितिक्लीवनिर्देशःकृतः।नपुंसकेभावेक्तइत्यनुशासनादितिभावः।उक्तत्वादिति।तत्रव्याप्तिविशिष्टेत्यादिमूलस्यतच्छेदेनैकधर्मिणोमूलकृतोक्तत्वादित्यर्थः।उक्तत्वाद्विवक्षितत्वादित्यर्थइत्यपि केचित्।द्रव्यमिति।तत्रव्याप्तिविशिष्टस्यधूमस्येवद्रव्यत्वेनपक्षधर्मत्वावगाहनादितिभावः।मीमांसकेतिमी

शिषधातोर्धर्मोर्थः ४

संबंधसंबंधाभावात्)५

मांसकैरनुमितिहेनाभिमतेज्ञानेषूक्तलक्षणस्यानुप्रवेशादुक्तत्वादित्यर्थः तथा च वह्निव्याप्यवान्पर्वत इत्यादिपरामर्शज
न्यानुमितावव्याप्तेर्जातिगर्भं तद्यावारणेऽपि वह्निव्याप्यो धूमो धूमवांश्च पर्वत इत्याकारकसमूहालंबनस्यानुव्यवसायेऽति
व्याप्तिरिति भावः ननु व्याप्तिसंबंधपक्षसंबंधयोः परस्परवैशिष्ट्यावगाहित्वं वाच्यं तथा चोक्तसमूहालंबनस्य तथात्वा
न्नोक्तातिव्याप्तिरत आह मिथ इति अव्यापकत्वाद्वह्निव्याप्यधूमवान्पर्वत इत्यादिज्ञान एवासत्वात् तथा च तादृशपरा
मर्शस्थलीयानुमित्यव्याप्तिरिति भावः लक्षणस्थं जन्यपदं जन्यताविशेषपरमतो वह्निव्याप्यो धूमो द्रव्यं पर्वतश्च वह्निरित्या
दिज्ञानजन्येनातिव्याप्तिरित्याशंकां निराचष्टे नचेति तदुभयविषयकत्वनियतेति । व्याप्तिसंबंधविषयकत्वाभावव्यापकता
दृशविषयकान्यत्वस्यैव पक्षधर्मताविषयकत्वाभावव्यापकतादृशविषयकान्यत्वस्य वाधिकरणत्वमित्यर्थः व्याप्तिविशि
ष्टत्वपक्षधर्म्मत्वोभयविषयकत्वनियतो यो धर्म्मः परामर्शत्वं तदवच्छिन्नकारणतानिरूपितं कार्य्यत्वमस्त्यनुमिताविति
तितत्र लक्षणसत्वं परामर्शाद्यनुव्यवसाये तु न परामर्शत्वादिना हेतुत्वं किंतु प्रत्यक्षमात्रे विषयत्वेन तत्त्वं न तदुभय
विषयकत्वनियतं घटज्ञानादौ व्यभिचारात् तत्र तत्परामर्शप्रत्यक्षे विषयविधया घटादिस्फुरतौ चोद्बोधकविधया तत्रस्य

रामर्शव्यक्तित्वेनहेतुतासत्वेतुधर्म्मपदंनानाव्यक्तिवृत्तिधर्म्मार्थकंवाच्यमितिभावः वैयर्थ्यादितिस्वव्यापकतदुभय
विषयकत्वसामानाधिकरण्यात्मकेतदुभयविषयकत्वनियमेस्वव्यापकव्याप्तिविषयकत्वसमानाधिकरणधर्म्मा
वच्छिन्नेसत्त्वैवसम्पृक्तत्वादितिप्राञ्चः तदुभयविषयकत्वाभाववद्वृत्तित्वलक्षणनियमस्यनिवेशेऽखण्डाभावघ
टकतयापक्षधर्म्मताविषयकत्वस्यवैयर्थ्यविरहेप्यनतिप्रयोजकत्वादित्यर्थइतिकश्चित्तन्नवव्याप्तिविशिष्टबुद्धे
र्व्याप्तिज्ञानत्वेनहेतुत्वात्तत्रातिव्याप्तिवारणार्थमेवपक्षधर्म्मताप्रवेशः। तन्निवेशेऽपिव्याप्तिविशिष्टवैशिष्ट्यबुद्धा
वतिव्याप्तिरतस्तद्वारणार्थंचरमज्ञानस्यव्याप्त्यविषयकत्वेनावश्यंविशेषणीयत्वेततएवव्याप्तिविशिष्टबुद्धावप्यतिव्या
प्तेर्निरासात्।नचैवंव्याप्त्यविषयकत्वेसतिव्याप्तिज्ञानजन्यत्वमित्यस्यैवसम्पृक्तत्वेव्याप्तिविषयकत्वनियतधर्म्मावच्छि
न्नकारणत्वप्रवेशोव्यर्थइतिवाच्यम्।परमेश्वरीयव्याप्तिज्ञानजन्यस्यैवज्ञादिप्रत्यक्षस्यवारकतयैवतस्यसार्थकत्वा
त्यद्यपिपक्षधर्म्मताविषयकत्वनियतधर्म्मावच्छिन्नकारणतेत्यादेरेवसम्पृक्तत्वान्व्याप्तिपदोपादानवैयर्थ्यमित्य
पिवक्तुंयुज्यतेतेनचैवंधूमवत्पर्वतविशिष्टबुद्धावतिव्याप्तिश्चरमज्ञानस्यपक्षधर्म्मताविषयकत्वेनविशेषणीयत्वेचा

संभवोऽनुमितिमात्रस्यैव साध्यांशे पक्षसंबंधविषयकत्वादिति वाच्यं साध्यादिभेदेन व्याप्तेरिव पक्षादिभेदेन पक्षधर्मता
यास्त्वपि भिन्नतया धूमवत्पर्वतविषयकत्वनियतधर्मावच्छिन्नकारणताकत्वे सति धूमवत्पर्वताविषयकज्ञानत्वमित्यु
क्तावसंभवविरहात् तथाप्यभावाविषयकत्वपर्यवसन्नस्य व्याप्यविषयकत्वस्य चरमज्ञानविशेषणत्वे लाघवं
पक्षधर्मताविषयकत्वप्रवेशे तु गौरवमेव धूमत्वाविषयकत्वेनोक्तो गौरवविरहेपि धूमवान्पर्वतो वह्निमानित्याका
रिकैवानुमितिरिति लिंगोपधानमतस्य प्रामाणिकत्वे सर्वत्रैवोक्तप्रकारेण सम्भवतीत्याशयेन पक्षधर्मतापदमात्र
स्य वैयर्थ्यमुक्तं संशयत्वस्य कार्यतावच्छेदकत्वे साधारणधर्मदर्शनविधया हेतुमत्तानिश्चयजन्ये साध्यादिसंशये ऽ
तिव्याप्तिभिया व्याप्तिविशिष्टपदवैयर्थ्यं नोक्तमित्यपि कश्चित् । यत्र साध्यस्यैव हेतुत्वमनुमित्सया चानुमितिः तादृशस्थ
लीयपक्षधर्मतांतर्भाव्योक्तक्रमेण लक्षणस्यासम्भवाद्व्याप्तिपदवैयर्थ्यं नोक्तमित्याहुः । इति तु स्यादिति यद्यपि धू
मो वह्निव्याप्यो द्रव्यं पर्वतवृत्तीत्यादिज्ञानस्यापि निरुक्तरूपत्वात्तदनुव्यवसायेऽतिव्याप्तिः पक्षधर्मांशे व्याप्तिप्रकार
कत्वविवक्षणेऽनुमिश्रोक्तदंदपरित्यागानौचित्यं तत्राप्युक्तविवक्षासंभवात् तथापि व्याप्तिप्रकारकनिश्चयोस्येक्षाप्र

कोरोपस्येतिव्युत्पत्त्याव्याप्यवच्छिन्नप्रकारताकमित्यर्थःतथाचज्ञानांतकर्म्मधारयेऽन्वयितावच्छेदकावच्छेदेनैवान्वयस्यव्युत्प
त्तिसिद्धतयापक्षधर्म्मतावगाहित्वावच्छेदेनव्याप्यवच्छिन्नप्रकारताकत्वस्यशब्दादेवलाभान्नविवक्षार्हंहेतुस्वातंत्र्येणैव
तद्विवक्षणीयमितिपूर्वतोवैलक्षण्यमितिभावःअत्रापीत्यपिकारेणप्रागुक्तसमस्तसमासःसमुच्चीयतेवह्निव्याप्यध
नवानित्युक्तौसाध्यवदन्यावृत्तित्वरूपव्याप्तिभानापकदाचित्प्रसिद्धिंकुर्यादतोविशिष्यनिर्देशइतिदूषणसमानाधिक
रणेति।अखण्डव्याप्तेरितिपघटितमोद्रव्यंरूपवत्वादित्यादौतमःसमवेतत्वरूपस्यपक्षधर्म्मत्वस्याप्रसिद्धिरस्तितथा
पिपक्षेधर्म्मताज्ञानमितिज्ञानांततत्पुरुषेणपक्षांशेधर्म्मतावगाहिज्ञानलाभादेवनतद्दोषइत्याशयः।ननुसाध्येहेतुव्या
पकत्वावगाहितानिरूपितंयद्धेतौसाध्यसामानाधिकरण्यस्यावगाहित्वंतदेवव्याप्तिप्रकारकत्वंवाच्यमतोनोक्ताव्याप्ति तं
रित्यतआह-अमानुमितेरितिवृत्त्यनियामकसंयोगादिसंबंधेनसाध्यहेतुभावेऽखण्डव्याप्तेःप्रसिद्ध्यात्तत्रत्यानुमितौ
अव्याप्यसंभवात्वृत्तिनियामकसम्बंधेनसाध्यत्वसाधनत्वयोःसूचनार्थमत्रेत्युक्तंनिनणमिति।अव्याप्तिरितिपूर्वेणा
न्वयः।अत्रहेतुव्यापकत्वसाध्यसामानाधिकरण्ययोरप्रसिद्ध्यात्तदुभयावगाहित्वमंतर्भाव्यापिलक्षणस्यकर्तुमशक्य

त्वादव्याप्तिरेवेति भावः। तावदिति प्रागुक्तक्रमेणान्वयव्याप्तिघटकेत्यादिः तथाविधमनुमित्युपयोगिपरस्परसंबं
धावगाहित्वं विशिष्टवैशिष्ट्यविषयिता विशेषरूपं तदेव विवक्षितं व्याप्तिप्रकारकपदेनेत्यर्थः। तेन धूमस्याधिकर
णमधिकरणवृत्तिरभावइत्याद्याकारकस्य तावत्पदार्थगोचरसमूहालम्बनस्य व्युदासः। यद्यप्यन्योन्याभावादिगर्भान्व
यव्याप्तिज्ञानस्थलीयानुमितावव्याप्तिः संभवति अत्यंताभावगर्भान्वयव्याप्तिनिविष्टवस्तूनामेव तावत्पदार्थत्वादिना
परामृष्टत्वात् तथाप्यन्वयव्याप्तीनां मध्येत्यंताभावगर्भायाः सिद्धान्तोक्तव्याप्तेरेवानुमित्युपयोगित्वमनुसृत्याशंकते न
चेति। व्यतिरेकिणीति व्यतिरेकव्याप्तिज्ञानजन्यानुमिताविन्यर्थः केचित्तु निरुक्तावगाहितादृशान्यपरामर्शजन्यानुमितावि
त्यर्थः तथा चान्योन्याभावगर्भव्याप्त्यवगाहिपरामर्शस्यापि संग्रहान्न दोषः अग्रे विरोधप्रदर्शने त्यंताभावप्रदर्शनमुप
लक्षणमिति वदंति। अत्र परामर्शस्य पक्षे साध्याभावव्यापकीभूताभावप्रतियोगित्वेन हेत्ववगाहितयान्वयव्याप्तिप्रका
रत्वाभावादिति भावः। व्याप्तिद्वये व्यभिचारधीविरोधित्वं ग्राहयति भवति हीति धूमत्व इति गृहीत इत्यग्रेऽन्वितं न तु धूम
व्यापकवह्निसमानाधिकरणधूमसमानाधिकरणणसभवान्पर्वत इति ज्ञानसत्त्वेपि धूमे व्यभिचारज्ञानानुदयात्तस्या

भवतिहीत्यादिना ।४

पिव्यभिचारधीविरोधित्वमतस्तज्जन्यानुव्यवसायेऽतिव्याप्तिरत आह तथाविधेति वह्निव्याप्येत्यर्थः नतथानपक्ष
धर्म्मांशे व्यभिचारधीविरोधितथाचतदवच्छिन्नविशेष्यकव्यभिचारधीविरोधिधीविषयप्रकारकतदवच्छिन्नव
त्ताज्ञानजन्यत्वमर्थः प्रागुक्तबुद्धिस्तु न रासभत्वावच्छिन्नविशेष्यकव्यभिचारज्ञानस्यविरोधिनी धूमत्वावच्छिन्न
व्यभिचारधीविरोधित्वेपिनतस्यपक्षधर्म्मतयामानमतोनदोष इति भावः नव्यास्तुननुधूमव्यापकवह्निसामाना
धिकरण्यमात्रमन्वयव्याप्तिस्तस्याश्च न व्यभिचारधीविरोधित्वं धूमव्यापकवह्निसमानाधिकरणो रासभ इति ग्र
हेपि रासभो वह्निव्यभिचारीति प्रत्ययात्तत् कथं व्यभिचारधीविरोधिविषयत्वेन न तदनुगम इत्यत उक्तं तथाविधेति त
थाविधं धूमव्यापकवह्निनिरूपितं धूमनिष्ठं सामानाधिकरण्यं न तथा न व्याप्तिः। रासभादौ पक्षवृत्ति रासभादौ व्य
भिचारग्रहादनुमित्यात्मककार्य्यस्यान्वयव्यभिचारग्रहात्तथा चैतदर्थमेव धूमव्यापकवह्निसमानाधिकरणधूम
त्वपर्य्यन्तं प्रागुक्तमिति भावः इति प्राहुः ननु साध्यसामानाधिकरण्यस्यापि व्यभिचारधीविरोधिधीविषयतया न
त्वप्रकारकस्य वह्निसमानाधिकरणो धूमवान्पर्वत इति ज्ञानस्य जन्ये तदनुव्यवसायादावतिव्याप्तिः यादृशविशि

ष्टविषयकत्वेन व्यभिचारज्ञानं प्रतिविरोधित्वं तत्प्रकारकत्वोक्तौ चान्वयव्याप्तिसंग्रहः केवलं धूमव्यापको वह्निरिति
ग्रहेपि धूमो वह्निव्यभिचारीति ज्ञानानुदयेन धूमत्वविशिष्टे वह्निव्यभिचारग्रहं प्रतिव, ह्नौ धूमव्यापकतानिश्चयत्वे
नैव प्रतिवंधकत्वं द्वयोर्व्याप्तिनिरूपत्वेन पृथक्प्रतिवंधकत्वाकल्पनात् वस्तुतः समानाकारस्यैव ज्ञानस्य प्रति
वंधकतया द्वयोरपि व्याप्तिबुद्ध्योर्व्यभिचारधीप्रतिवंधकत्वाभावादनुगमासंभवः न च व्यभिचारधीपदेनान्वय
व्याप्तेर्व्यतिरेकव्याप्तेश्चाभावविषयकं ज्ञानविशेषमुपादाय तद्बुद्धिप्रतिवंधकतावच्छेदकप्रकारितात्वेनान्वयव्य
तिरेकव्याप्तेः प्रकारिताद्वयमनुगमय्य तादृशप्रकारितावच्छिन्नपक्षधर्मताज्ञानजन्यत्वमर्थ इति वाच्यं धूमो वह्नि
व्याप्यो नेति बुद्धावधिकरणांन धूमीयाभिलापादिज्ञानस्यापि विरोधितया निर्धूमधूमवानयं वह्निरित्यादिज्ञानस्यापि नि
रुक्तरूपवत्तया तज्जन्यानुव्यवसायादावतिव्याप्तेः प्रतिवंधकतावच्छेदकादिभेदेन प्रतिवंधकत्वस्य भेदादेवम
प्यनुगमस्य कर्त्तुमशक्यत्वाच्चेत्यस्वरसादाह। व्यतिरेकेति। तथा च व्यतिरेकव्याप्तिज्ञानं हेतुरेव न कुतस्तज्जन्यानु
मितावव्याप्तिरिति भावः। स्वयं व्यतिरेकपरामर्शजन्यबुद्धेरर्थापत्तित्वोपगमादाश्रयणादित्यतं· आचार्यैराश्रय

णादिति तदर्थः। अथ स्थाणुत्ववत्त्वयं न स्थाणुः स्थाणुर्न वेत्यादिभ्रमसंशयोत्तरं स्थाणुत्वव्याप्यवक्रकोटरादिमान्
यमित्यादिविशेषदर्शनजन्ये अयं स्थाणुरित्यादिप्रत्यक्षे ति व्याप्तिः। व्याप्तिविशिष्टपक्षधर्मत्वज्ञानजन्यत्वस्यापि
तत्र सत्त्वादित्याशंकते· न चेति· भ्रमसंशयेति। यद्यपि स्वमते पि विशेषणज्ञानत्वेनोपनयविधया च विशेषदर्श
नस्य संशयोत्तरप्रत्यक्षे हेतुत्वाद्धेतुतामतद्रूप्यसंगतं तथापि प्रत्यक्षादिज्ञानस्यापि कालोपाधिविधया परामर्श
जन्यत्वात्तद्वारणार्थमेवावश्यं किंचिद्विशेष्यकत्वावच्छिन्नं पक्षीभूतपर्वतादिविशेष्यकत्वावच्छिन्नं वा परामर्शज
न्यत्वमेव लक्षणे निवेश्यं तथा च तत्तत्प्रकारकबुद्धित्वावच्छिन्नं प्रत्येव तत्तद्विशेषणज्ञानत्वादिना हेतुत्वात्तत्तद्वि
शेषणज्ञानादिजन्यतायाः किंचिद्विशेष्यकत्वानवच्छिन्नत्वान्नतामादाय दोषः किंतु संशयोत्तरप्रत्यक्षत्वावच्छि
न्नजन्यतामादायैव तादृशजन्यतायां धर्म्यंतर्भावस्यावश्यकत्वादिति भावः। यत्तु कालोपाधिविधया परामर्श
जन्यतामादाय प्रत्यक्षादावतिव्याप्तिं निराकर्तुं प्रमितिविनाजकोपाध्यवच्छिन्नमेव परामर्शजन्यत्वं लक्षणे नि

वैरस्यंतादृशंचनविशेषणज्ञानजन्यत्वंविशिष्टबुद्धित्वेनैवतदवच्छेदनादतोहेतुतामतइत्युक्तंनचतथापितदलौकिकप्र
त्यक्षंतत्प्रकारकप्रत्यक्षंप्रत्येववातद्विषयकज्ञानत्वेनहेतुत्वात्व्याप्त्याद्युप[illegible]नयजन्यतामादायस्वमतेपिसंशयोत्तर
प्रत्यक्षेतिव्याप्त्याहेतुतामतत्त्वसंगतमेवेतिवाच्यंतादृशहेतुतायांमानाभावात्।अप्रसिद्धसाध्यकानुमितेःसाध्य
विशेषणकत्वकारणायतत्प्रकारकानुभवत्वावच्छिन्नंप्रत्येवतद्विषयकज्ञानत्वेनहेतुत्वावश्यकत्वेनततएवोपनीत
प्रत्यक्षसंभवादितिमतंतच्चिंत्यंएतावतापिभावस्यस्यागुरुत्वादेरलौकिकप्रत्यक्षत्वावच्छिन्नंप्रत्येवतद्विषयज्ञानत्वे
नहेतुतायांबाधकाभावा[illegible]त्तदुपनीतभानात्मकेसंशयोत्तरप्रत्यक्षेस्वमतेऽव्याप्तिव्याप्तिसम्भवात्ँभावसाध्यकानुमि अ
तेरेवाप्रसिद्धसाध्यकत्वेनाभावप्रकारकानुभवत्वावच्छिन्नप्रत्येवतद्गोचरज्ञानत्वेनहेतुत्वस्यक्लृप्तत्वात्ँप्रसिद्धसाध्य अ
कपरामर्शस्यसाध्यविशेष्यकानुमितिंप्रत्येवहेतुत्वात्ततःसाध्यविशेषणकानुमितेरसम्भवाच्चेतिध्येयं।अत्रसंशयोत्त
रप्रत्यक्षेविशेषदर्शनस्यहेतुत्वेमानाभावः।विशिष्टबुद्धिसामान्यसामग्रीतएवसंशयाद्युत्तरप्रत्यक्षस्यापिसंभवात्·ए
ककोटिविशेषदर्शनस्यापरकोटिविशिष्टधीप्रतिबंधकतयोपयोगात्नचैवंतदीयसंशयोत्तरप्रत्यक्षंप्रतितदीयविशे

षदर्शनस्याहेतुत्वे संशयोत्तरं विशेषदर्शनोत्पत्तिदशायामपि तद्वत्ताप्रत्यक्षस्योत्पत्तिः स्यादिति वाच्यं । इष्टत्वात्क्षणविलक्षणस्यापथनिर्णीतव्यत्वात् न च वह्निव्याप्यधूमवत्तानिश्चयोत्तरं पर्वतधर्मिकवह्निविधेयताकत्वावच्छिन्नं प्रत्येव वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन हेतुत्वमुच्यतां लाघवान्नतु तादृशानुमितित्वावच्छिन्नं प्रति हेतुत्वं गौरवात्· स्वीक्रियतां च तादृशविधेयताकत्वमनुमिताविव भ्रमसंशयोत्तरनिश्चयात्मकप्रत्यक्षेपीति तत एव विशेषदर्शनोत्पत्तिकाले संशयोत्तरप्रत्यक्षवारणं संभवतीति वाच्यं । अनुमितावेव पक्षनिष्ठविशेष्यतानिरूपितसाध्यप्रकारतानतिरिक्तस्य विधेयत्वस्य सर्वानुभवसिद्धतया निरस्यतया प्रसक्षे तस्य शंकानास्पदत्वादिति भावः । किंच भ्रमसंशयोतद्धर्मिकतद्विपरीतज्ञानत्वेनानुगमय्य तादृशज्ञानाव्यवहितोत्तरतद्धर्मिकतत्प्रकारकनिश्चयात्मकप्रत्यक्षत्वावच्छिन्नं प्रत्येव तद्धर्मिकतद्व्याप्यदर्शनस्य हेतुत्वं वाच्यम्· अन्यथा व्यभिचारात्· न चेदं युक्तम् अव्यवहितोत्तरत्वस्य स्वत्वादिगर्भत्वेन अननुगतत्वात् विशिष्टबुद्धिसामान्यं प्रत्येवाविपरीतनिर्णयस्य प्रतिबंधकतया बाधभ्रमसत्त्वेन तद्वत्ताप्रत्यक्षस्य विशेषदर्शनसहस्रेणाप्यसंभवात् निश्चयत्वस्यार्थसमाजग्रस्तत्वेन कार्यतावच्छेदकत्वासंभवा

श्री० ज०
२३

(अनन्तर्भू[illegible]त्यादिः ४)

त्वंनचतद्धर्मिकतद्वत्तावधारणात्मकप्रत्यक्षंप्रत्येवतद्धर्मिकतद्व्याप्यदर्शनस्यहेतुत्वंनियमविषयकत्वस्यावधारण
त्वस्य [redacted] सर्वत्रसंशयोत्तरप्रत्यक्षेऽसंभवात्·तस्याप्यर्थसमाजग्रस्ततयाकार्यतानवच्छेदकत्वाच्चविषयितावि
शेषस्यावधारणत्वस्यचमानाभावेननिरस्तत्वादित्याशयेनहेतुतामतइत्युक्तौऽस्वरसोव्यंजितः।तथाविधनिश्चयत्वे
नेति।पक्षधर्मिकव्याप्यवत्तानिश्चयत्वमात्रेणेत्यर्थः।नचतत्तदप्रामाण्यज्ञानानास्कन्दितत्वस्यापिकारणतावच्छेद
कनिवेशएतन्मात्राभिधानमयुक्तंपरामर्शधर्मिकतत्तदप्रामाण्यज्ञानाभावस्यस्वातंत्र्येणैवानुमितिहेतुत्वात्·अन्य
थाविशेष्यविशेषणभावभेदेन [redacted] गुरुतरानन्तकार्यकारणभावप्रसंगात्·ग्रह्यमाणाप्रामाण्यस्यै
कस्यपरामर्शस्योत्तरं अन्यपरामर्शात्तत्क्षणविलंबेनैवानुमितेःस्वीकारात्तदुत्तरपरामर्शाभावविशिष्टतत्तदप्रामा
ण्यज्ञानत्वावच्छिन्नाभावत्वेनैववाहेतुत्वस्यवक्तव्यत्वादितिभावः।केचित्तुभ्रमेत्यादितथाविधनिश्चयत्वेनेत्यन्तमेकए
वग्रन्थस्तेनविशेषदर्शनस्यविशेषणज्ञानविधयाकुत्रचिज्जनकत्वेपिहेतुतामतइत्यस्यनासंगतिरित्याहुः।ननुनि
श्चयत्वेनहेतुत्वविवक्षणेप्यतिव्याप्तिर्नादवस्थ्यं·तद्विशेषदर्शनस्यापितद्व्याप्यवत्तानिश्चयत्वादतआह·विशेषदर्शन

(एतन्मते·भाविज्ञानमप्रमेत्यप्रामाण्यज्ञानोत्तरपरामर्शाज्ञानुमितिरिष्टैव·वह्निपरामर्शोत्तरक्षणोत्पन्नवह्निव्याप्यधूमवान्पर्वतःइत्येतन्नंज्ञानमप्रमेत्याकारकसमूहालंबनपराम

धीनंतरमनुमितिः परामर्शान्तरकल्पनादेवेति· ३)

एम
२३

स्यचेति॰तथाचविशेषदर्शनस्यभ्रमादिविरोधित्वेनकारणत्वंअनुमितौतुव्याप्यवत्तानिश्चयत्वेनातोवैलक्षण्यमि
तिभावः।भ्रमादीति।अन्यथातमसिघटसंयोगोत्तरंविनापिव्याप्यदर्शनमालोकसंयोगमात्रात्घटनिर्णयोनस्या
दितिभावः।तत्वं।हेतुत्वं।व्याप्यप्रकारकज्ञानव्यावर्त्तकधर्मदर्शनयंत्रकधर्मदर्शनालोकसंयोगादिसाधारणंभ्र
मादिविरोधित्वमप्येकंदुर्वचमित्यावेदयितुमुक्तत्वादिति।वस्तुतस्तदपिवचनमात्रंनतुदोषस्थलीयपीतत्वाभाव
व्याप्यदर्शनव्यावत्तंसंभवतीतिभावः।यद्यपिवह्निव्याप्यवत्तानिश्चयत्वघटकदलद्वयस्यविशेषणविशेष्यभावेन
गुरुतरकार्यकारणभावद्वयकल्पनामपेक्ष्यतत्पक्षकतत्साध्यकानुमितिंप्रतितद्विशेष्यकतद्व्याप्याभावप्रकारक
ज्ञानत्वेनप्रतिबंधकतायाएवलाघवेनकल्पनात्व्याप्यसंशयतोनुमित्यनुत्पत्तिसंभवात्व्याप्यवत्तानिश्चयत्वेन
नानुमितौहेतुत्वंकिंतुव्याप्यप्रकारकज्ञानत्वमात्रेणतत्तद्भ्रमत्वज्ञानानास्कंदितत्वमेवापेक्षितं।ननुतन्निश्चयाना
स्कंदितत्वं॰संशयसाधारण्यस्यव्याप्यवत्ताज्ञानस्यकस्यचिदप्यनुमित्यनुपधायकत्वात्॰व्याप्याभावप्रकारकत्वेनप्रतिबं
धकतायामपिनभ्रमत्वनिश्चयानास्कंदितत्वस्यभ्रमत्वज्ञानानास्कंदितत्वस्यवानिवेशोभ्रमत्वनिश्चयास्कंदिताद्व्याप्य

भावसंशयादप्यनुमित्यापत्तेः यत्र च व्याप्याभावस्य भ्रमात्संशयाद्वानंतरं व्याप्यपरामर्शस्तत्र भ्रमादेर्नाशोत्तरमेवानु
मितिः। गुरुतरं व्याप्यनिश्चयत्वेन हेतुत्वमपेक्ष्य लक्षणविलंबकल्पनाया न्याय्यत्वात्. तथापि व्याप्यतदभावसमुच्चया
त्मकपरामर्शादनुमित्युत्पत्तये व्याप्याभावप्रकारकत्वानवच्छिन्नव्याप्यप्रकारकत्वावच्छिन्नपक्षविशेष्यताकज्ञान
त्वरूपं पक्षधर्मिकव्याप्यवत्तानिश्चयत्वं गु[illegible]रुतर[illegible]मपि हेतुतावच्छेदकीकृतमिति प्राञ्चः। नव्यास्तु व्याप्यप्रकारत्वान्य
प्रकारत्वानवच्छिन्नपक्षनिष्ठविशेष्यताकज्ञानत्वमेव पक्षधर्मिकव्याप्यवत्तानिश्चयत्वं वाच्यं। अतस्ताद्रूप्येण हेतुता
यां न विनिगमनाविरहावकाशः। पक्षः साध्यव्याप्यवान्नवेत्यादिसंशयस्य व्याप्यप्रकारतानिरूपितं पक्षनिष्ठविशे
ष्यत्वं तदेव व्याप्यप्रकारताभिन्नेन व्याप्याभावप्रकारत्वेनावच्छिन्नमतस्तादृशसंशयादनुमित्यनुत्पादः। संशयमा
त्रस्यैव प्रकारताद्वयनिरूपितैकविशेष्यतावत्त्वात् अत एव लीलावतीप्रकाशेऽपि विरोधिनानारूपावच्छिन्नविषय
ताप्रतियोगिज्ञानं संशयः। समूहालंबने तु विरोधिप्रत्येकप्रकारतावच्छिन्नाविभिन्नैव विशेष्यता न तु विरोधिनानारू
पनि रूपितैकेति संशयग्रंथे स्फुटमभिहितमिति प्राहुः। अत एवेति तादृशनिश्चयत्वेन हेतुत्वस्य लक्षणाघटकत्वादे

समुच्चये त्वित्यर्थः:७)

वेत्यर्थः लिंगवत्वेति। लिंगं व्याप्यं तथा च व्याप्यवत्वरूपो योऽतिदेशवाक्यार्थः तस्य यज्ज्ञानं वह्निव्याप्यधूमवत्पर्वत
सदृशं चत्वरपदवाच्यमित्याकारकं तज्जन्यायामिदं चत्वरपदवाच्यमित्याकारोपमितावित्यर्थः। तथाविधेति। ताद
त्म्यो योऽतिदेशवाक्यार्थः सादृश्यं तत्प्रतिसंधानत्वेनेत्यर्थः ननु वाक्यार्थत्वस्यापि प्रवेशो गौरवान्मानाभावाच्चेति ध्ये
यं न चेति। वाच्यमिति परेणान्वयः न्यायार्थेति चिंतामणिकृतां मते तैः पंचावयवजन्यविशिष्टबुद्धिस्वीकारात्त्वम
तेनूपनयार्थविशेष्यकनिगमनार्थप्रकारकबोधेऽतिप्रसंगो द्रष्टव्यः ननु वह्निव्याप्यधूमवानयमित्युपनयार्थ
ज्ञानेन पक्षे व्याप्तिविशिष्टप्रकारकमनुवर्थस्य वह्निव्याप्यधूमसंबंधिन एव तादात्म्येन तत्र प्रकारत्वाल्लक्षणघट
कं च तादृशमेव ज्ञानमतो नातिव्याप्तिस्तथा चायमित्यादिप्रयोगस्तु न सर्वसंमत इत्यत आह तच्छब्देनेति। ननु यत्र से
स्तीत्यादिवाक्यात् वह्निव्याप्यधूमवत्पर्वतोऽस्तीत्यादिधीस्तत्रैवकारस्येव इव व्याप्यादिघटकीभूतप्रत्येकपदार्थए
वतच्छब्दशक्तिज्ञानात्प्रत्येकपदार्थोपस्थित्या परस्परैऽन्वयबोधो न त्वाहत्यैव तत्पदात् व्याप्यवत्पर्वतस्योपस्थितिर
तो नातिव्याप्तिरित्येवं ब्रूयात्तदाप्याह संकेतितेति। यत्र वह्निव्याप्यधूमवत्पर्वत एव डित्थादिपदस्य संकेतग्रहः प्रथमं

यदि॰

मु२

इत्यादिशाब्दस्यप्रत्येकपदार्थेशाब्दज्ञानात्१२

उपनयघटक१२

जातःतत्रहिश्योस्तीत्यादिवाक्यजन्येवह्निव्याप्यधूमवत्पर्वतोस्तीत्याकारकशाब्दबोधेऽतिव्याप्तिरित्यर्थःशब्दांतरेनिरु
कक्षुंस्यतेरसत्वादितिभावःननुउपनयार्थज्ञानेनन्यायार्थबुद्धौहेतुस्तद्घटकप्रत्येकपदजन्यपदार्थस्मृतेर्महावा
क्यार्थज्ञानपर्यंतमसत्वेनावांतरवाक्यार्थबोधस्यमहावाक्यार्थबुद्धावहेतुत्वात्कथंतत्रातिव्याप्तिरतआहस्मृत्या
दपिध्वतइतिपदजन्यपदार्थस्मृतिमात्रंनान्वयबोधहेतुःकिंतुपदप्रयोज्यपदार्थधीमात्रंतच्चावांतरवाक्यार्थबो
धमादायैवतावत्पर्यंतमस्तीतिभावःननुतच्छब्दाद्बुद्धिस्थत्वेनैवपदार्थोपस्थितिरतःसोस्तीत्यादिवाक्यजन्यबोधे
कथमतिव्याप्तिरुक्तेत्यतआहतदादेश्चेतिगुसादपिध्वतइतिपूर्वेणान्वयःव्याप्यवत्वादेःसंस्कारद्वारस्मरणोप्युपेक्षा
न्यतद्ज्ञानिश्चयत्वेनहेतुत्वस्यप्रामाणिकत्वेतत्रातिव्याप्तिवारणायतथाविधनिश्चयत्वमात्रावच्छिन्नहेतुत्वंलक्षणे
निवेश्यमित्याशयेनाहअतिरिक्तस्येतिपदजन्यत्वस्येति।कारणत्वादिसंबंधेनघटादिपदादुपस्थितस्यापाकाशादेः
शाब्दबोधानुत्पत्त्यावत्सोपदजन्यतदुपस्थितित्वेनैवतच्छाब्दबोधंप्रतिहेतुत्वादित्यर्थःननुचरमज्ञानपदस्यानुभव
परत्वेनैवस्मृतेर्वारणसम्भवात्तथाविधनिश्चयत्वमात्रेणहेतुत्वंनलक्षणेप्रवेश्यंकिंतुतादृशनिश्चयत्वेनहेतुत्वमे

(इत्यादौ२)

व्याप्यवत्वं१४

घटपदादाकाशशब्दाद्बोधस्य)३

वान्यथानुमितावपि भ्रमत्वज्ञानानास्कंदितव्याप्यवत्तानिश्चयत्वेनैव हेतुत्वादसंभवापत्तेस्तत्कुतः शाब्दधीकारण
मत आह निश्चयत्वस्येति। ननु तच्छाब्दबोधे तदर्थकपदज्ञानत्वेनैव हेतुत्वं तत्र च वृत्त्या स्वजन्यपदार्थोपस्थितेः कार
णताघटकप्रत्यासत्तित्वादेवोक्तातिप्रसंगनिरासस्संभवे पदार्थोपस्थितिहेतुतायां न पदजन्यत्वप्रवेशो मानाभावा
दित्यतिव्याप्तितादवस्थ्यमत आह निश्चयत्वस्येत्यपि कश्चित्। स्मृतिशाब्दरूपाया एव पदार्थोपस्थितेर्व्यापारत्वात्तस्या
श्च निश्चयत्वनियमाच्छाब्दबोधे पदार्थस्मृतित्वेन वृत्तिज्ञानजन्यपदार्थोपस्थितित्वेनैव हेतुत्वं न तु निश्चयत्वेनेति ना
तिव्याप्तिरिति भावः। न चेति वाच्यमिति परेणान्वयः तथापि पदार्थोपस्थितिजन्यतयातिव्याप्तेर्निरासेपि अत्र च घटव
दित्यादि विशिष्टवैशिष्ट्यबुद्धौ न घटत्वादिनिश्चयत्वेन हेतुत्वं किंतु घटत्वादिप्रकारकज्ञानत्वमात्रेणायं घटो न वेति सं
शयोत्तरमपि तादृशबुभुत्सादशात् किंतु यत्र विशेषणतावच्छेदकांशे धर्मितावच्छेदकतया किंचिद्भासनेतत्रैव तत्प्र
कारकनिश्चयत्वेन हेतुत्वं यथा नीलघटवदित्यादौ घटत्वविशिष्टविशेष्यकनीलनिश्चयत्वेन हेतुत्वमित्यावेदयितुं त
न्नादित्यभिहितमिति ध्येयम्। वस्तुतः पर्वतो वह्निव्याप्यधूमवान्न वेति संशयदशायां वह्निव्याप्यधूमवत्पर्वतत्वावच्छि

न्नप्रकारताकस्यैवतादृशपर्वतत्वावच्छिन्नविशेष्यताकस्यापि ज्ञानस्यानुत्पादादुक्तमपत्रैवपर्वतविशेष्यकवह्नि
व्याप्यधूमवत्तानिश्चयत्वेनहेतुत्वंजन्यतानुवह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविषयताकज्ञानत्वेनैवबोध्याविशेष्यत्वप्र
कारत्वयोर्द्वयोरपितादृशविषयत्वादेवंचविशिष्टवैशिष्ट्यबुद्धौएकविशिष्टेऽपरवैशिष्ट्यमितिबुद्धौचोभयत्रापिविशेषणता
वच्छेदकप्रकारकनिश्चयत्वेनहेतुत्वमित्यावेदयितुंतत्रादित्यभिहितमितिध्येयं।विशेष्येविशेषणंतत्रापिविशेषणांतरमि
त्यादिज्ञानस्यापिविशिष्टवैशिष्ट्यज्ञानतयात्रविशेषणतावच्छेदकप्रकारकनिश्चयस्यहेतुत्वासम्भवात्तत्रादित्युक्त
मित्यपिकेचित्खलेकपोतन्यायेनैवशाब्दधीरितिमतेतादृशप्रत्यक्षंप्रत्येवविशेषणतावच्छेदकप्रकारकनिश्चयस्य
हेतुत्वंशाब्दादेस्तादृशविषयतायाःपदार्थोपस्थित्यादेरेवनियामकत्वसम्भवादितिमतेवानशाब्दादावतिव्याप्तिरतः
प्रत्यक्षेचेत्युक्तंननुविशिष्टवैशिष्ट्यबुद्धौविशेषणतावच्छेदकप्रकारकज्ञानत्वेनैवहेतुत्वंनतुनिश्चयत्वेनगौरवात्कु
तोऽतिव्याप्तिरतआहदण्डोरक्तोनवेति।तादृशसंशयानुव्यवसायस्तुरक्तत्वेनदंडंसंदेह्मीत्याकारोरक्तत्वतदभावप्र
कारकदण्डविशेष्यकज्ञानवत्त्वावगाही ननुरक्तत्वविशिष्टदंडज्ञानावगाही रक्तंदण्डंसंदेह्मीत्यनुव्यवसायस्तुरक्तं

र॰

व

तादृशानिश्चयाभावात्।२

ट्कोटिकस्यतादृशधर्म्मिकस्यैवसंशयस्यननुदंडधर्म्मिकरक्तत्वसंशयस्यतदीयत्वेवाविशेष्येविशेषणमितिन्या
येनैवनचैवंदंडोरक्तोनवेतिसंशयानंतरमपिरक्तदंडवान्नवेत्यौचित्यावर्जितःसंशयोनस्यादितिवाच्यं·इष्टत्वात्।
सत्वेवातस्यापिविशेष्येविशेषणमित्यादिरीत्यैवस्वीकारात्।केचित्तुविशिष्टवैशिष्ट्यविषयताकस्याप्युक्तसंशय
स्यानुभवसिद्धतयाविशेषणतावच्छेदकप्रकारकज्ञानत्वेनैवतादृशबोधहेतुत्वंननुतादृशनिश्चयत्वेनद्वारवा व्यभिचारा
[redacted]त्वेनचसंशयसाधारणज्ञानस्याप्रामाण्यनिश्चया[redacted]स्कंदितस्यैवकार्य्यजनकतयातत्तदप्रामाण्यनिश्च
यत्वावच्छिन्नाभावत्वेनहेतुत्वेगौरवमितिवाच्यंसर्वत्रैवाप्रामाण्यज्ञानस्यानुगतरूपेणतद्विरोधित्वंदुर्वचत्वेनाप्रा स्य
माण्यनिश्चयानांतत्तद्व्यक्तित्वावच्छिन्नाभावत्वेनहेतुतयागौरवानवकाशात्विशेषणतावच्छेदकप्रकारकनिश्च
यत्वेनहेतुत्वपक्षेएवतदप्रामाण्यज्ञानमात्रस्यकार्य्यविरोधितयातत्तदप्रामाण्यनिश्चयव्यक्तीनामिवतदप्रामा
ण्यसंशयव्यक्तीनामप्यभावकूटस्यतत्तद्व्यक्तित्वेनैवविशिष्टवैशिष्ट्यधीहेतुत्वकल्पनायांविपरीतगौरवापत्तेरित्या
हुःविशिष्टेति·घटत्वादिविशिष्टेयोविषयस्तद्विषयत्वेनेत्यर्थःतथाचविनश्यदवस्थज्ञानजनितयोरिच्छाद्वेषयोर्वैट

क१

रुछार)

मिच्छामि घटं द्रष्टुमित्यादिविशिष्टवैशिष्ट्यप्रत्यक्षे व्यभिचारान्न ज्ञानत्वं तदीयप्रकारतावच्छेदके प्रविष्टमिति भावः।
तेनाविनश्यदवस्थज्ञानजनितेच्छादेरिच्छात्वाद्यंशे निर्विकल्पकप्रत्यक्षस्य तज्ज्ञानकज्ञानादिच्छात्वादिप्रकारेण ता-
दृशेच्छादेर्द्वितीयसाक्षात्कारस्य च प्रागुपनीतघटादिविषयकेच्छात्वादिनिर्विकल्पकादेव सम्भवात्तादृशस्थले
व्यभिचारसम्भवेपि न क्षतिः' ननु ज्ञानस्येच्छादौ प्रतिकार्य्यसहभावेन हेतुत्वमते विन श्यदवस्थज्ञानेन तयो-
रजननात्कस्य प्रत्यक्षे व्यभिचार इत्यतः स्थलान्तरमाह कृतेश्चेति न च कृतिसाक्षात्कार एव विषयोपनीतभानार्थं
विषयस्फूर्तेरावश्यकत्वान्न व्यभिचारः' सप्रकारकतद्विषयक – त्वेनेच्छादिसाधारणेनैव तद्विषयकालौकिकप्र-
त्यक्षेपि हेतुत्वादिति भावः। ननु प्रत्यासत्तिविषयाविशिष्टविषय – कस्मृतेरनपेक्षायामपि विशिष्टबुद्धौ विशेषण-
ज्ञानस्य हेतुत्वानुरोधात्तदपेक्षावश्यकीति कुतो व्यभिचार इत्यत आह विशेषणविषयकादिति तथा च विशिष्ट-
बुद्धावपि न विशेषणज्ञानत्वेन हेतुत्वं स्मरणे व्यभिचारात्किन्तु तद्विषयकत्वेनैव तच्च कृत्यादिसाधारणमतो नैत-
दनुरोधेन विषयस्फूर्तेरावश्यकत्वमिति भावः। समानविषयकत्वेनैव संस्कारस्मृत्योः कार्य्यकारणभावाद्विशेषण

(ज्ञानलक्षणासन्निकर्षः प)

(विशेषणविशेष्यभावभेदेनकार्यकारणभावद्वयापत्तेराहतत्वा । इति२)

विषयकसंस्कारात्कुतो विशिष्टस्मृतिरित्याशंकामपनेतुं विशिष्टसंस्कारादित्युक्तम् तत्रेति तत्तद्विशिष्टवैशिष्ट्यबो
धइत्यर्थः तथा च विशेषणतावच्छेदकीभूततत्तद्धर्माभावाप्रकारकतद्धर्मप्रकारकत्वेन तत्तद्धर्मप्रकारत्वान्य
प्रकारत्वानिरूपिततत्तद्विशेषणनिष्ठविशेष्यताकत्वेनैव वा तत्तद्विशिष्टवैशिष्ट्यबुद्धौ हेतुत्वाल्लक्षणे च नादृशप्र
कारताकज्ञानत्वावच्छिन्नहेतुताया एव निवेशान्नातिव्याप्तिरिति भावः यद्यपि विशेषणतावच्छेदकप्रकारतामात्रेण विशि
ष्टवैशिष्ट्यबुद्धिहेतुत्वे वह्निव्याप्यांशेऽनुद्बुद्धसंस्कारात्पर्वतेन्द्रियसंयोगदशायां वह्निव्याप्यधूमवान्पर्वत इत्याकारक
व्याप्ति)५ विशिष्टवैशिष्ट्यप्रत्यक्षापत्तिः संस्कारात्मकस्यैव सन्निकर्षस्य वह्निव्याप्यांशे सत्त्वात् धूमो वह्निव्याप्यो न वेत्याकारिका
याज्ञानलक्षणप्रत्यासत्तेः सम्भवाच्च न चापाद्यतत्तत्प्रत्यक्षव्यक्तिविशेषान्प्रति तत्तदुद्बोधकस्य तत्तद्व्यक्तित्वेन हेतु
त्वकल्पनात्तदभावादेव तादृशप्रत्यक्षापत्त्यसम्भवात्तत्प्रत्यक्षव्यक्तीनां पूर्वं स्मृतिव्यक्तेः कल्प्यपित्वात्तत्तत्स्मृतौ त
त्तदुद्बोधकव्यक्तित्वेन हेतुत्वकल्पनामपेक्ष्य तत्तत्प्रत्यक्षव्यक्तिष्वेव तत्तदुद्बोधकव्यक्तीनां हेतुत्वकल्पनाया लाघवादिति
वाच्यं तत्र विशिष्टवैशिष्ट्यप्रत्यक्षव्यक्तीनां पूर्वं विशेषणतावच्छेदकप्रकारिकाः स्मृतिव्यक्तयोऽनुभवसिद्धास्तत्तत्प्रत्यक्ष

विशेषणतावच्छेदकप्रकारक)३

श्री॰ग॰
२८

व्यक्तीनां शाब्दानुमित्याद्यात्मकविशेषणतावच्छेदकप्रकारकज्ञानैर्जनितप्रत्यक्षव्यक्तीनां चापाद्यत्वात् नहि ताद
ृशप्रत्यक्षव्यक्तिष्वपि हेतुत्वमुद्बोधकव्यक्तीनां क्लृप्तं येन तदभावादेव तादृशप्रत्यक्षनिरासः सम्भवति तथापि विशेष
णतावच्छेदकप्रकारकसंस्कारसत्त्वेप्युद्बुद्धिदशायां विशिष्टवैशिष्ट्यप्रत्यक्षं तत्र दुष्ट भावविशिष्टसंस्कारत्वे
न विशिष्टवैशिष्ट्यबोधं प्रति प्रतिबन्धकत्वकल्पनाददोषः न च ज्ञानत्वस्य कारणतावच्छेदकत्वमपेक्ष्योक्तप्रतिबन्ध
कत्वकल्पने गौरवं ज्ञानोपरमेऽपि विशिष्टविषयोपधानेन कृत्यादिसाक्षात्कारोत्पत्त्या व्यभिचारेण ज्ञानत्वस्याप्रवेश
नियमेन तादृशप्रतिबध्यप्रतिबन्धकभावकल्पनागौरवस्य प्रामाणिकत्वादित्याशयः ननु अनुमितावपि व्याप्यभावा
प्रकारकव्याप्यप्रकारकत्वमात्रेण हेतुत्वं न तु ज्ञानत्वान्तर्भावेणेत्यसंभव एवेत्यत आह इच्छादित इति ननु साध्यव्याप्य
वत्पक्षावगाहीच्छाद्वेषयोर्द्वितीयक्षणे प्रायशोऽनुमितित्वयापि वाच्येच्छादिजनकस्य परामर्शात्मकज्ञानस्य पूर्वं सत्त्वात्
कृत्युत्तरं च द्वितिक्षणेऽनुमित्यनुत्पादो निर्णेतुमशक्य इत्यतः स्फुटं व्यभिचारस्थलमाह संस्कारश्चेति। संस्कारादीत्यादि
पदादिच्छाद्वेषकृतीनां परिग्रहः ज्ञानत्वेनैवेति तदन्तर्भावेणैवेत्यर्थः तत्रानुमितौ न च परामर्शानुव्यवसायेऽतिव्याप्तिरि

अ॰

राम
२८

ति।तथाविधनिश्चयत्वेन हेतुत्वस्याविवक्षितत्वादितिप्राक्तनो हेतुरनुषंजनीयः सामान्यतो हीत्येववाग्रेपाठस्तेनन
चेत्यत्र हेतुत्वलाभेपि न क्षतिरिति ध्येयं विषयत्वेनेति। साक्षात्करोमीतिप्रतीतिसाक्षिकविलक्षणविषयत्वेनेत्यर्थः तेनातीं
द्रियस्य गुरुत्वादृष्टादेः सत्यपीन्द्रियसन्निकर्षे न प्रत्यक्षं न तु निर्विकल्पकविषयत्वेनेत्यर्थः। ज्ञानादेः सविकल्पकमात्र
वेद्यत्वात्तत्प्रत्यक्षे व्यभिचारापत्तेः। अत्र च कारणस्य तादात्म्यं कार्यस्य तु लौकिकविषयत्वं प्रत्यासत्तिस्तेनातीतविषय
कप्रत्यक्षेऽतीतविषयाणामहेतुत्वेपि न क्षतिः। ननु लौकिकविषयत्वस्यैकस्याभावात् कार्य्यतावच्छेदकसंबंधाननुग
मात्कथमनुगतः कार्य्यकारणभावः षोढासन्निकर्षजन्यत्वादेरपि सन्निकर्षभेदेन नानात्वान्न च साक्षात्कारत्वनिरू
पितविषयत्वमेव कार्य्यताघटकः संबंधस्तादृशविषयतया च प्रत्यक्षं नातीतादावतो न व्यभिचार इति वाच्यम्। शुक्ति
मरगतत्वादिधर्मिकस्य तद्रजतमेवेदं तज्जलमेवेदमित्यादिप्रत्यक्षस्य दोषविशेषजन्यस्य तादृशविषयतासंबंधेना
तीतरजतजलादावपि सत्त्वेन व्यभिचारात् तत्रापि तद्रजतं साक्षात्करोमीत्यनुभवात्। न च तत्र तादृशविषयतांशे भ्रमः। भ
नाभावात्। साक्षात्कारत्वनिरूपितविषयतया लौकिकसन्निकर्षस्यैव दोषविशेषस्यापि जन्यतावच्छेदकत्वप्रसक्तावे

य

त.१

कशेषस्य कर्त्तुमशक्यत्वाल्लौकिकस्यैव दोषविशेषजन्यस्यापि रजतत्वप्रकारकप्रत्यक्षस्य रजतानयनगोचरप्रवृ-
त्तिहेतुतयोपादानप्रत्यक्षनिष्ठप्रवृत्तिजनकतावच्छेदकत्वेन तादृशविषयताया लौकिकसंनिकर्षजन्य दोषविशे-
षजन्यप्रत्यक्षविशेषसाधारणत्वाच्च वस्तुतो विषयत्वस्य ज्ञानसमाकालीनतया निरुक्तविषयत्वावच्छिन्नस्य घटा-
देः प्रत्यक्षप्राक्कालेऽसत्वात्तादृशविषयत्वेन हेतुत्वं व्यभिचार्य्यैवेत्यत आह तत्तद्विषयकेति। अत्र तत्तत्पदं विष-
ये प्रत्यक्षे चोभयत्रान्वितं तथा च तत्तद्विषयकत्वविशिष्टतत्तत्प्रत्यक्षव्यक्तित्वेन कार्य्यत्वं तत्तद्विषयव्यक्तित्वेन हेतुत्वं त-
त्र च कार्य्यस्य विषयता कारणस्य तु तादात्म्यं प्रत्यासत्तिः न च तत्तद्विषयकत्वस्य कार्य्यतावच्छेदके प्रवेशो व्यर्थः तत्प्रत्यक्ष-
व्यक्तेरेव विषयतासंबंधेनान्यत्रापि सत्वेन व्यभिचारवारकत्वादिति भावः ननु तत्तत्परामर्शव्यक्तिप्रत्यक्षे तत्तत्परामर्श-
व्यक्तित्वेन हेतुत्वे परामर्शप्रत्यक्षसामान्यं प्रत्यपि परामर्शत्वेन हेतुत्वमावश्यकं यद्विशेषयोरिति व्याप्तेस्तथा च तदनु-
व्यवसायेऽतिव्याप्तिरेवेत्यत आह कदाचिदिति। प्रमाणाभावात्तादृशी व्याप्तिरेव न सती वा तत्परामर्शत्वव्यापकीभू-
तज्ञानत्वादिधर्मावच्छिन्नकारणतामादायैव चरितार्थान परामर्शत्वेन हेतुत्वं व्यवस्थापयतीति भावः यद्यपि विष-

एम
२९

यस्यप्रत्यक्षंप्रतिहेतुत्वेमानाभावःनचघटादिविषयस्यनाशाद्दशायामपितदिंद्रियसन्निकर्षसत्वात्तदुत्तरकालं
तत्प्रत्यक्षापत्तिरितिवाच्यंयदायत्रयत्कार्य्यस्योत्पत्तिस्तदव्यवहितप्राक्क्षणेतत्रतत्कारणमितिव्याप्तेःकारणनाशं
पादकतयाविषयनाशकालावच्छेदेनविषयेसन्निकर्षात्मककारणविरहादेवतदसम्भवात्नचयदायद्वृत्तिका
र्य्यस्योत्पादस्तदव्यवहितपूर्वंतद्वृत्तिकार्य्यस्यकारणमित्येवव्याप्तिःकारणतायाग्राहिकेतिविनष्टविषयस्यप्रत्य
क्षवारणार्थंविषयस्यहेतुत्वमावश्यकमितिवाच्यंकार्य्यकारणभावांतरकल्पनागौरवेणघटीयरूपेचक्षुःसंयु
क्तसमवायसत्वेविद्यमानस्यासन्निकृष्टरूपांतरस्यप्रत्यक्षप्रसंगेनचतादृशव्याप्तेःप्रतिहतत्वात्।नचशब्दप्रत्यक्षं
प्रत्यवश्यंकर्णावच्छिन्नशब्दत्वेनविषयस्यहेतुत्वमन्यथाकर्णानवच्छिन्नस्यापितस्यप्रत्यक्षापत्तेःस्वावच्छिन्नत्वप्रत्या
सत्याकर्णस्यतत्रहेतुत्वेकर्णावच्छिन्नसंयोगादेरपिश्रावणप्रत्यक्षप्रसंगादितिवाच्यं।तावतापिज्ञानादिसाक्षा
त्कारेविषयस्यहेतुत्वाप्राप्तेस्तथापिसत्यपींद्रियसन्निकर्षादौसामान्यकारणेगुरुत्वाद्यतींद्रियपदार्थानामप्रत्यक्ष
तयाऽवश्यंविषयाणांविशेषतोहेतुत्वंवाच्यंगुरुत्वादिकमादायतदकल्पनात्·केचित्तुतेषामतींद्रियत्वानुरोधेनसाक्षा

ज्ञानसमानकालीनविषयतापक्षेनदोषः/४

श्री॰ज॰ ३०

त्कारत्वनिरूपितविषयत्वेनतादृशविषयतावद्वृत्तिधर्म्मजन्यत्वेनवाप्रत्यक्षसामान्यंप्रतिहेतुत्वंतत्रचलौकिकस
न्निकर्षजन्यतावच्छेदकतयासिद्धस्यलौकिकत्वाख्यविषयताविशेषस्यकार्य्यतावच्छेदकसंबंधत्वान्नव्यभिचारः
धर्म्मविषयेवसंबंधविधयापिकार्य्यतावच्छेदकसिद्धौबाधकाभावान्नव्यमतेकारणतायाअतिरिक्तपदार्थत्वेनत
दवच्छेदकोपलक्षितस्यैवपूर्वसत्त्वापेक्षणादितिवदंति।तन्मंदं·कार्यतावच्छेदकत्वेनविषयत्वसिद्धावपसिद्धांतत्वात्·।
अन्यथाविशिष्टबुद्ध्यादौविशेषणज्ञानादिजन्यत्वंविशिष्टबुद्धित्वादिनावह्न्यनुमितिंप्रतिचवह्निव्याप्यवत्तानिश्चयत्वे
नहेतुत्वंनस्यात्·लाघवात्तद्विषयताविशेषस्यैवतादृशजन्यतावच्छेदकत्वौचित्यात्·तन्नदितरत्वोदिरितिव्याप्यप्रकार दितिदि
कत्वेव्याप्याभावप्रकारकेतरत्वादीत्यर्थः·परामर्शत्वस्यविशेषणचतुष्टयघटितत्वात्तत्साम्यप्रदर्शनार्थंचैत्रावलो
किनेत्यादिविशेषणचतुष्टयमुक्तंघट [redacted]
तद्विषयकत्वेतिदंहात्परस्परत्वप्रत्ययस्यप्रत्येकंसंबंधात्तादृशघटत्वेनहे एप
तुत्वंतद्विषयकप्रत्यक्षत्वेनचकार्य्यत्वमित्यर्थः·इष्टापत्तौबाधकमाहमानाभावादितिनन्वेतादृशकार्यान्यथानुपप ३०

त्तिरेव मानं भविष्यतीत्यत आह अन्यथेत्यादि॰ चैत्रावलोकनादिसामग्र्या द्रव्यप्रत्यक्षादिसामग्र्या च तादृशप्रत्यक्षस्योत्पत्तेरित्यर्थः तथा चार्थसमाजग्रस्तत्वान्नोक्तरूपं कार्य्यतावच्छेदकमिति भावः विशिष्टस्मरणाद् इति वह्निव्याप्यधूमवत्पर्वतस्मरणाद् इत्यर्थः संशयोत्तरं तदाकारस्मृत्यापत्तिभयेन स्मृतिजनकतायामपि निश्चयत्वप्रवेशादित्याशयः यद्यपि व्याप्यवत्त्वादिसंस्कारं प्रति व्याप्यवत्त्वादिनिश्चयत्वेन हेतुत्वात्तादृशसंस्कारानुत्पत्त्यैव व्याप्यवत्त्वादिसंशयान्न तद्गोचरस्मृतेः संभव इत्यनुभवस्य निश्चयत्वेन स्मृतिहेतुतायां मानाभावान्न विशिष्टस्मृतावतिव्याप्तिसंभावना तथापि फलव्यापारौ प्रत्येकरूपेणैव कारणस्य हेतुत्वादिति प्राचीनमतेनेदं व्यापारीभूतसंस्कारं प्रत्यनुभवस्य निश्चयत्वेन हेतुत्वे फलीभूतस्मृतिं प्रत्यपि ताद्रूप्येण हेतुत्वमावश्यकं यत्तु ज्ञानपदस्य करणव्युत्पत्त्यभिप्रायेणाशंकतेऽथेति विशिष्टस्य स्मरणं यत इति व्युत्पत्त्या विशिष्टसंस्कारेऽतिव्याप्तिरित्यर्थ इति तन्न संस्कारानुत्पत्त्यैवेत्याद्यग्रिमग्रंथविरोधापत्तेः केचित्तु यादृशस्मृतौ वह्निव्याप्यधूमवत्त्वानिश्चयत्वेनानुगतरूपेणोद्बोधकविधया हेतुत्वं तादृशस्मृतावतिव्याप्तिरित्यर्थ इत्याहुः तन्न उपेक्षान्यत्वेनेत्यादिग्रंथस्य व्याप्यविषयकत्वेनेत्यादिग्रंथस्य च विरोधाप

त्तेः

अगृहीतग्राहित्वेनतस्याःप्रमात्वापत्तिरितिभावः)४

तैःइदंतुचिंत्यतेधूमत्वपर्वतत्वादिरूपेणबाष्परक्षादिगोचरादपिवह्निपरामर्शात्पर्वतोवह्निमानित्यनुमित्युत्पादाद
नुमितिंप्रतिवह्निव्याप्तिधूमत्वपर्वतत्वादिनिरूपितविशिष्टवैशिष्ट्यावगाहिताविशेषेणैवहेतुत्वंनतुधूमपर्वताद्यं
तर्भावेनव्यभिचारात्स्मरणेतुधूमादिकमंतर्भाव्यैवतथात्वमन्यथाधूमत्वेनबाष्पगोचरादप्यनुभवात्ताद्रूप्येण
धूमस्मरणस्मृतेरगृहीतग्राहित्वप्रसंगात्अनुमितिजनकतावच्छेदकरूपेणस्मृतावहेतुत्वात्कथंतत्रातिव्या
प्तिप्रसक्तिरिति।आचार्यमतेत्वयंदोषःतन्मतेकरणीभूतज्ञानेधूमत्वादिनायादृशवस्तुनोभानंफलेपितथेति
नेव्याः तत्रहेतुत्वमितिस्मृतौहेतुत्वमि[illegible]त्यर्थःतथाचव्याप्यवज्ज्ञानित्वपत्वमात्रावच्छिन्नहेतुतस्यलक्षणेप्रवे
शात्तविशिष्टस्मरणेऽतिव्याप्तिरितिभावः।उपेक्षात्वंयद्येकंस्तुवचस्यात्तदात्तदन्यत्वंस्मृतिजनकतावच्छेदकंभवे
त्तत्तदेवतुनसंभवतीत्याशयेनाहउपेक्षात्वंहीतिसंकरेति।चाक्षुषत्वंविहायोपेक्षात्वंतृणस्पर्शनादौउपेक्षात्वं
विहायचाक्षुषत्वंकामिनीदर्शनादौवर्त्तमानमेकत्रतृणचाक्षुषेसंकीर्णमित्यर्थःचाक्षुषत्वव्याप्यंनानैवोपेक्षा
त्वंनिरूप्यतत्तद्भेदकूटमेवस्मृतिजनकतावच्छेदकंयदिब्रूयात्तदाहआंशिकेतिएकस्मिन्नेवज्ञानेकिंचिदंशेउपेक्षा

त्वस्य क्वचिदंशे च तदभावस्यानुभवादित्यर्थः न च व्यक्तेरभेदस्तुल्यत्वमित्यादावनुक्तत्वादांशिकत्वं न जातिबाधक
मिति वाच्यं रूपहानावसंबंधे वा तदंतर्भावादित्यर्थः नापि प्रवृत्तौ स्यादि तथा च तद्गोचरप्रवृत्त्यजनकत्वे सति तद्
गोचरनिवृत्त्यजनकं यत्तदन्यज्ञानत्वेन तद्गोचरस्मृतौ हेतुत्वं न तद्गोचरप्रवृत्तिनिवृत्त्युभयजनकत्वेन तत्प्रत्येकज
नकत्वेन वा तद्गोचरस्मृतिहेतुत्वे व्यभिचारादभावद्वयगर्भतेति ध्येयं अजिज्ञासितेति तथा च तत्प्रकारकस्मृतौ त
द्धर्मव्याप्यधर्मप्रकारकजिज्ञासाया अजनकं यद्यत्तदन्यज्ञानत्वेन हेतुत्वं व्याप्यधर्माणामननुगमात्तद्धर्मव्या
प्यधर्मप्रकारकजिज्ञासाजनकज्ञानत्वमप्यननुगतमतस्ताद्रूप्येण स्मृतिहेतुत्वासंभवादत्रापि निषेधद्वयगर्भ
तावश्यकीति भावः। तादृशादपीति प्रवृत्त्याद्यजनकादपीत्यर्थः नापि संस्कारेति। तथा च पर्वतधर्मिकव्याप्यवत्ता
स्मरणं प्रति तदाकारसंस्कारजनकज्ञानत्वेनैव हेतुत्वान्न व्याप्यवत्तानिश्चयत्वावच्छिन्नहेतुताघटितलक्षणस्य
तत्रातिव्याप्तिरिति भावः तज्जनकतावच्छेदकरूपांतरेति निश्चयत्वभिन्नस्य संस्कारजनकतावच्छेदकरूपस्यापरि
चयादित्यर्थः। तथा च निश्चयत्वमात्रस्य तथात्वे स्मृतावपि ताद्रूप्येणैव हेतुत्वं फलव्यापारैः प्रत्येकरूपेण कारण

स्य हेतुत्वनियमादित्युक्तातिव्याप्तिस्तदवस्थैवेति भावः। ननु तद्धर्म्मिकतत्प्रकारकस्मृताविव तादृशसंस्कारे
प्यनुभवस्य तदाकारसंस्कारजनकज्ञानत्वेनैकरूपेण हेतुत्वं वाच्यमतो नातिव्याप्तिरत आह अन्योन्येति। अ
ज्ञानावच्छेद्यमवच्छेदकीभूतं च संस्कारजनकत्वं विभिन्नव्याप्तिघटितमतोऽन्योन्याश्रयत्वं इतरथा पुनरात्माश्र
योद्रष्टव्यः। रूपान्तरपरिचयादिति स्मृतिजनकतावच्छेदकरूपभिन्नस्यापरिचयादित्यर्थः। ननु संस्कारे स्मृ
तिजनकज्ञानत्वेन हेतुत्वमत आह अन्योन्येति। तथा च स्मृतिजनकताग्रहे सति संस्कारजनकत्वरूपोपेक्षा
न्यत्वज्ञानं तज्ज्ञाने सति स्मृतिजनकताज्ञानमित्यन्योन्याश्रय इत्यपि कश्चित्। ननु तद्धर्म्मिकतत्प्रकारिका यावत्यो ज्ञानव्य
क्तयस्तादृशसंस्कारानुत्पादिकास्तत्तद्भेदकूटवत्त्वमेवोपेक्षान्यत्वं निरुच्यत इति चेत्तद्धर्म्मिकतत्प्रकारकनिश्चयत्वेनता
दृशस्मृतौ तथाविधसंस्कारे च हेतुत्वं वाच्यमतो नातिव्याप्तिर्नवान्योन्याश्रयादीत्यत आह। संस्कारेति। उपेक्षात्मकज्ञाना
दित्यादिः। तत्प्रवेशादिति। उपेक्षान्यत्वप्रवेशादित्यर्थः। न च स्मृताविव संस्कारेपि समानाकार [redacted] निश्चयत्वे
नैव हेतुत्वादुपेक्षात्मकनिश्चयात्संस्कारानुत्पत्तिरेव दुर्घटेति वाच्यं। समानाकारोपेक्षाबुद्धिव्यक्तीनां तत्तद्व्यक्तित्वेन

समानाकारसंस्कारं प्रति प्रतिबंधकत्वोपगमादुपेक्षाज्ञानोत्तरं तन्नाशे सत्येव ज्ञानांतरेण संस्कारोत्पादादिति भा
वः। न चास्तु चाक्षुषचक्षुःसंयोगौ प्रति चक्षुष्ट्वद्रव्यत्वाभ्यां विभिन्नरूपाभ्यां चक्षुषो हेतुतया फलव्यापारैप्रत्येक
रूपेण कारणस्य हेतुत्वनियमे व्यभिचारात् समानाकारज्ञानत्वेनैव स्मृतिजनकत्वं संस्कारं प्रत्येव निश्चयंपत्वेन हेतु
तायां संशयात् संस्कारानुत्पत्त्यैवास्मरणसंभवात्। न च विनिगमनाविरहः। समानाकारज्ञानत्वेन संस्कारहेतुत्वे सं
शयजन्यानामनंतपंडु संस्काराणां तन्नाशकत्वेन कारणांतराणां च कल्पनापत्तेरेव विनिगमकत्वात्। तथा च स्मृतौ
नातिव्याप्तिं कापि न वा संताजनकसंदेहव्यावृत्तेन निश्चयपत्वेन हेतुत्वसम्भवे तत्साधारणेन समानाकारज्ञान
त्वेन स्मृतिहेतुत्वमन्याय्यं तथा सत्युपेक्षाज्ञानस्याप्यसंताजनकतया तद्व्यावर्त्तकेनोपेक्षान्यत्वेनापि स्मृतिजनकत्व
स्यावश्यकत्वापातात्। वस्तुतः समानप्रकारकज्ञानत्वेनापि न स्मृतिहेतुता किंतु स्मृतिसामान्ये ज्ञानत्वमात्रेण तद्ध
र्मिकतत्प्रकारकस्मृतिं प्रति तादृशसंस्कारत्वेन हेतुत्वस्यावश्यकतया तत एवातिप्रसंगभंगादिति प्राहुः। यत्तु संस्का
रं प्रत्यपि समानाकारज्ञानत्वेनैव हेतुत्वं न तु तादृशनिश्चयपत्वेन गौरवात् संशयेन संस्कारोत्पादेपि उद्बोधकसमव

ध्यानविरहादेवततःस्मृत्यनुत्पादस्सम्भवादितितन्नसंशयजन्यपंडसंस्कारस्यज्ञीनांनाशार्थहेत्वंतरकल्पनागौरवप्रसंगात्तयस्यपुंसःपरसंस्कारसत्वेतत्सदृशवस्तुविशेषदर्शनादेवपरस्मृतिः तत्पुरुषीयपरस्मृतिसामान्यंप्रतितत्पु : रुषीयतादृशवस्तुदर्शनत्वेनानुगतैकरूपेणैवोद्बोधकस्यहेतुतयासंशयजन्यसंस्कारसत्वेनादृशवस्तुदर्शनदशायांतत्पुरुषीयपरस्मृत्यापत्तेर्ब्रह्मणापिवारयितुमशक्यत्वाच्चेतिदिक्। अन्येतुनिश्चयत्वघटकदलद्वयस्यविशेषणविशेष्यभावेनगुरुतरकार्य्यकारणभावद्वयकल्पनामपेक्ष्यलाघवेनतद्विशेष्यकतत्प्रकारकसंस्कारंप्रतितद्विशेष्यकतदभावप्रकारकज्ञानत्वेनप्रतिबंधकत्वंतद्विशेष्यकतत्प्रकारकज्ञानत्वमात्रेणहेतुत्वंचेत्युभयकल्पनमेवोचितंसंशयोत्तरवर्त्तिनिश्चयादपिसंदेहनाशानंतरमेवसंस्कारोत्पादसंभवादिति प्रागुक्तमंदांतत्प्रकारत्वान्यप्रकारत्वानिरूपिततन्निष्ठविशेष्यताकज्ञानत्वपर्य्यवसितेननिश्चयत्वेनहेतुतायांनिश्चयत्वघटकदलद्वयस्यैवासम्भवात्।एतेनव्याप्यसंशयोत्तरंव्याप्यवत्वस्यसंशयाकारस्मृतेरुत्पत्तिभयेनव्याप्यवत्तायाःस्मृतौनतन्निश्चयत्वेनहेतुत्वंकिंतुव्याप्यवत्ताज्ञानत्वमात्रेणव्याप्याभावप्रकारकस्मृतिंप्रतिव्याप्याप्रकारकव्या

प्याभावप्रकारकज्ञानत्वेनहेतुत्वादेवव्याप्याभावप्रकारकत्वघटितस्यव्याप्यसंशयत्वस्यस्मृतावसंभवात्।न
चव्याप्याभाववत्तास्मृतिंप्रतिव्याप्याभाववत्तानिश्चयत्वेनेवव्याप्यवत्तास्मृतिंप्रत्यपिव्याप्यवत्तानिश्चयत्वेनहे
तुतायांप्रमाणप्रसरेतदनुचितमुभयथैवसंशयाकारस्मृतेर्वारणसंभवादितिवाच्यंव्याप्यवत्तास्मृतौव्याप्य
वत्तानिश्चयत्वेनहेतुत्वेव्याप्याभावाप्रकारकत्वस्यहेतुतावच्छेदककोटिप्रवेशेगौरवंव्याप्याभाववत्तास्मृतिं
प्रतितुव्याप्यप्रकारकत्वघटितेनव्याप्याभाववत्तानिश्चयत्वेनहेतुत्वेवच्छेदकलाघवमित्यस्यैवविनिगमकत्वा
त्तथाचव्याप्यवत्तास्मृतौनातिप्रसंगशंकापितन्निश्चयत्वेनाहेतुत्वादित्यपिमतंनिरस्तं।प्रागुक्तदिशानिश्च
यत्वस्यदलद्वयाघटितत्वात्पर्वतोवह्निव्याप्याभाववान्नवेत्यादिसंशयादपितादृशसंशयाकारस्मृत्यापत्तिभ
येनव्याप्याभाववत्तास्मृतिंप्रत्यपिव्याप्याभावाभावाप्रकारकत्वघटितेनव्याप्याभाववत्तानिश्चयत्वेनहेतुता
याश्चावश्यकत्वेनविपरीतगौरवाच्चेतिदिक्केचित्तुसंस्कारंप्रतिनिश्चयत्वेनहेतुत्वोक्तावपियत्रायंघटइत्यादि
प्रत्यक्षानंतरंदिवसांतरेऽयंनघटइत्याकारकंज्ञानंतत्रतादृशज्ञानद्वयेनक्रमाज्जनितस्यघटत्वतदभावगोचर

संस्कारद्वयस्यसत्वादयंघटोनवेतिसंदेहात्मकस्मृत्यापत्तिःनचविरुद्धोभयकोट्योरेकदाउद्बोधकसमवधानविरहान्नतथा
स्मृतिरितिवाच्यंयस्यपुंसोघटत्वतदभावयोःसंस्कारसत्वेनतदुभयसदृशवस्तुविशेषदर्शनादेवतदुभयस्मृतिस्तत्पु
रुषीयघटत्वतदभावस्मृतिसामान्यंप्रत्येवतत्पुरुषीयतादृशवस्तुदर्शनत्वेनानुगतरूपेणोद्बोधकस्यहेतुत्वेनत
त्पुरुषीयोद्बोधकसमवधानस्यापिसंभवात्।तथाचतादृशसंशयाकारस्मृतेर्वारणार्थंइदंत्वावच्छेदेनघटत्वप्र
कारकस्मृतौतदवच्छेदेनघटत्वाभाववत्तास्मृतिसामग्र्यास्तादृशधर्मिकघटत्वाभाववत्तास्मृतौचतादृशघटत्वव
त्तास्मृतिसामग्र्याःप्रतिबंधकत्वस्यप्रामाणिकतयास्मृतिजनकतायामिवसंस्कारजनकतायामपिनिश्चयत्वंनप्र
वेशनीयमन्यथैवसंशयोत्तरंतदाकारस्मृतेर्वारणादित्याहुःतच्चिंत्यं।संशयजन्यपंडसंस्कारव्यक्तीनांनानात्वार्थंहे
त्वतरकल्पनामपेक्ष्यसंस्कारजनकतायांनिश्चयत्वप्रवेशएवलाघवेनोचितत्वादितिसंक्षेपः।तथात्वमितिस्मृतिहे
तुत्वमित्यर्थः।तथाचनिश्चयत्वमात्रेणस्मृतिंप्रतिहेतुत्वान्नतत्रलक्षणातिव्याप्तिः।अनुभवत्वंचजातिर्नतुस्मृ
तिभिन्नज्ञानत्वंतेनज्ञानत्वापेक्षयागुरुतयानतस्यस्मृतिकारणतावच्छेदकत्वहानिरितिभावः।द्वित्राद्यनुभव

स्मृत्युपलक्षकमेतत् ४

प्राचीनमतेनेदं ४

स्थलेस्वजन्यस्मरणेनैकसंस्कारनाशेपिसंस्कारांतरसत्वात्तदुत्तरंस्मरणासंभवत्यतउक्तंसकृदितिअनुभवोत्त
रमननुभूतस्येत्यर्थः।वस्तुतस्तुस्वविषयकस्मृत्युत्तरमननुभूतस्येत्यर्थःएतेनसमानप्रकारकत्वेनैवस्मृतेःसंस्का
रनाशकत्वादुक्तरीत्यानुभूतस्याप्येकस्मृत्यासंस्कारशतनाशात्स्मरणांतरासंभवेसकृत्पर्यंतानुधावनंव्यर्थमित्य
पास्तम्नचांततःस्वानुभवीयानुव्यवसायस्यैवस्वानुभवांतरत्वात्सकृदनुभूतत्वंवस्तुनोसिद्धंइतिवाच्यंस्वतःप्रामा
ण्यपक्षेयानुव्यवसायस्यव्यवसायोल्लिखितधर्मवद्धर्मिविषयकत्वास्वीकारात्विषयांतरसंचारादिनानुव्यवसायानु
त्पत्तिसंभवाच्चेतिभावःस्मरणोत्तरमितिकालांतरइतिशेषःतेनैकसंस्कारेणैवक्वचित्क्रमिकस्मरणद्वयोत्पादसंभ
वेपिनक्षतिःप्रसंगादितितथाचानुभवत्वेनहेतुत्वेव्यभिचारात्निश्चयत्वेनैवतथात्वंवाच्यमितिस्मृत्यंतिव्याप्तिस्तद
वस्थैवेतिभावःननुस्मरणात्मकंफलंनसंस्कारनाशहेतुस्तथासतिघटःपटश्चद्रव्यमित्याकारकसंस्कारेणोद्बोध
कवशाज्जनितयाघटोद्रव्यमित्याकारकस्मृत्यातन्नाशेपश्चात्पटोद्रव्यमित्याकारकस्मृतेरनुत्पत्तिप्रसंगादतआ
हसमानेतितथाचघटधर्मिकद्रव्यत्वप्रकारकसंस्कारनाशंप्रत्येवतादृशस्मृतित्वेनहेतुत्वान्नादृशस्मरणस्यस

एकमविनश्यदवस्थेनापरंचविनश्यदवस्थेनसंस्कारेणेत्यर्थः ५

त्वेपि पटधर्म्मिकतादृशस्मृतेरभावादेव नोक्तसमूहालंबनसंस्कारस्य नाशः न च घटधर्म्मिकद्रव्यत्वसंस्कारनाश
त्वावच्छिन्नस्य सामग्रीसत्वादसमूहालंबनद्वप्रकृतेपि तदवच्छिन्नस्य उत्पादो दुर्वार इति वाच्यं घटधर्म्मिकद्र
व्यत्वसंस्कारमात्रस्यैव सामग्रीवशेन घटे वस्त्वंतरे वा पदार्थांतरावगाहित्वनियमेन पदार्थांतरगोचरतादृश
स्मरणात्मकविशेषसामग्रीविरहादेव घटधर्म्मिकद्रव्यत्वसंस्कारनाशत्वावच्छिन्नस्योत्पत्यसंभवादिति भावः
समूहालंबनस्यापि संस्कारस्याविरलक्रमेण प्रत्येकगोचरस्मृतिद्वयजनकत्वसंभवात् क्रमिकेत्युक्तं। क्रमिक
दिनद्वयानंतरोत्पन्नेति तदर्थः। यद्यप्येवमपि कालरोगादिना संस्कारनाशस्यत्वे व्यभिचार इति कालरोगाद्यजन्य
संस्कारनाशत्वेनैव स्मृतिजन्यत्वं वाच्यं तत्र च रोगाद्यजन्यत्वं न तद्भेदकूटातिरिक्तं दुर्वचं तथा च तेषां विशेषणाविशेष्य
भावे विनिगमकाभावादनंतकार्यकारणभावध्रौव्ये तत्र स्मृतिव्यक्तित्वेन तत्तत्संस्कारनाशं प्रति हेतुत्वमेव लाघवाद्यु
क्तमतः सकृदनुभवस्थलेपि चरमस्मृतेस्तत्तद्व्यक्तित्वेनैव तन्नाशकत्वांगीकारान्न स्मरणोत्तरमस्मरणप्रसंगः। न
थापि रोगादिनाश्यव्यावत्तस्य संस्कारत्वव्याप्यजातिविशेषस्यैव स्मृतिनाश्यतावच्छेदकतया सिद्धत्वात् न तत्तन्ना

शव्यक्तिप्रतितत्तत्स्मृतिव्यक्तित्वेन हेतुत्वं वक्ततो यत्पुरुषीययत्प्रकारकसंस्कारोत्तरोगादिनाशस्तत्पुरुषीयतत्प्रकारकसंस्कारनाशसामान्यं प्रत्येव तत्पुरुषीयतत्प्रकारकस्मृतित्वेन हेतुत्वे बाधकाभाव इति तत्रैव स्मरणोत्तरमस्मरणाप्रसंग उक्तदूष्यदोषः केचित्तु रोगकालादिजन्यतत्तत्संस्कारनाशभेदकूटस्य युगपदेव विशेषणत्वं न त्वेकविशिष्टापरभेदत्वेनैकविशिष्टापरवैशिष्ट्यप्रवेशे कार्यतावच्छेदकत्वस्य गुरुत्वापातात् ततोऽनंतकार्यकारणभावद्वंकैवनेऽपि वदंति। समूहालंबनादितद्व्यादिपदार्थैकधर्मिकनानाप्रकारकसंस्कारपरिग्रहः अत्रेदमवधेयं तद्विशेष्यकतत्प्रकारकसंस्कारनाशं प्रति तादृशस्मृतेः कार्यसहभावेनैव हेतुत्वं वक्तव्यमन्यथा स्मरणजन्यसंस्कारव्यक्तीनां क्षणिकत्वापत्तेः नाशकीभूतस्य स्वजनकस्मरणस्यैव सत्वादुत्पत्त्यनंतरमेव नाशसंभवात्। न चैवमपि यत्र घटत्वप्रकारकानुभवोत्तरं युगपत्तादृशसंस्कारोऽनुभवांतरं च ततो घटत्वप्रकारेण संस्कारांतरस्मरणेन तत्र द्वितीयस्य घटत्वप्रकारकसंस्कारस्य क्षणिकत्वापत्तिः द्वितीयसंस्कारकालीनस्मरणव्यक्तेरुत्तरक्षणेऽपि सत्वा(दितिवाच्यं उपेक्षान्यज्ञानस्यैव संस्कारजनकतया तत्र सद्वितीयाद्यनुभवस्योपेक्षात्वस्वीकारस्यैव ततः संस्कारानु

एकसंस्कारनाशक्षणेऽपरसंस्कारोत्पत्तौ बाधकाभावः)४

संस्कारनाश)१ संबंधेन)१

त्यत्तैः प्रतियोगितया संस्कारनाशत्वावच्छिन्नं प्रति प्राक्क्षणवृत्तित्वविशिष्टं जनकं तया स्मृतित्वेन हेतुत्वमित्यपिक
ञ्चित्तं वस्तुतः संस्कारनाशं प्रति समानाकारस्मृतित्वेनैव ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नशब्दानामपि नाशान् प्रति
समानाधिकरणप्रत्यासत्त्या ज्ञानत्वसुखत्वदुःखत्वादिप्रत्येकरूपेणैव हेतुत्वं न तु स्वोत्तरोत्पन्नविशेषगुणत्वादि
ना तथात्वं स्वत्वस्य तत्र व्यक्तिविश्रांतिकत्वेनानंतकार्य्यकारणभावापत्तेः एवं च ज्ञानसुखदुःखादीनां स्वोत्तरक्षण
एव विनाशवारणाय प्रतियोगितासंबंधेन ध्वंससामान्यं प्रति स्वप्रतियोग्यधिकरणतादात्म्यसंबंधेन ध्वंसत्वे(
नाप्यनुगतैकरूपेण हेतुत्वं कल्प्यमतो ज्ञानसुखादीनामिव स्मृतिजन्यसंस्कारस्यापि न क्षणिकत्वं स्वप्रतियोग्य
धिकरणतादात्म्यसंबंधेन ध्वंसवत्तायाः संस्कारादौ द्वितीयक्षण एव संभवात् अधिकरणत्वं चेह कालिकसंबंधे(
न प्रवेश्यमतो न नित्यस्य ज्ञानेच्छादेश्च क्षणिकताप्रसंग इति मदेकपरिशीलितः पंथाः। यत्तु स्मृतिजन्यसंस्कारनाशस्य
तत्तच्चरमस्मृत्युत्तरनष्टसविषयकप्रतियोगिकत्वस्य लाघवेन कल्प्यनात्तादृशप्रतियोगिनः प्रथमस्मृत्युत्तरमसंभवा
न्न स्मृतिजन्यसंस्कारस्य क्षणिकत्वमिति नन्तुच्छं तथा सति सकृदनुभवजन्यसंस्कारनाशस्यापि तत्तच्चरमस्मृतिप्राक्

विनश्यदवस्थस्मृतेःसंस्कारजनकत्वात् ६                                    स्मरणोत्पादः) १

कालीनसविषयकव्यक्तिप्रतियोगिकत्वकल्पनयातद्व्यक्तिविरहादेवनैकस्मरणोत्तरंतँदुत्पादासंभवइत्यनुभव
त्वेनापिस्मृतिहेतुतायादुरुच्छेदापत्तेः केचित्तुरूपादिकंप्रतिरूपादेरिवसंस्कारंप्रत्यपिसमानाकारसंस्कारत्वेनैव
प्रतिबंधकत्वंधारावाहनस्थलेऽनेकसंस्कारव्यक्तिकल्पनामपेक्ष्यतत्कल्पनेलाघवादेवंचनकस्यापिसंस्कारस्य
क्षणिकत्वंप्राक्तनसंस्कारसत्वेस्मरणाव्यवहितोत्तरक्षणेसंस्कारानुत्पादात्तन्नाशोत्तरमुत्पन्नस्यचसंस्कारस्य
तदानींनाशकविरहादेवक्षणिकत्वासंभवात् । नचयत्रैकस्मृत्यनंतरमेवस्मरणांतरंप्राक्तनसंस्कारनाशोपश्चाच्च
प्रथमस्मरणेनसंस्कारोत्पादस्तत्रत्यस्यसंस्कारस्यक्षणिकत्वंदुर्वारमितिवाच्यंसंस्कारस्यकार्य्यसहवर्त्तित्वेनस्मृति
हेतुत्वादेकस्मृतिद्वितीयक्षणेसमानाकारस्मृत्यंतरासंभवादित्याहुः तन्मंदंयत्रघटपटावित्याकारसंस्कारोत्तरंक्र
मेणसकृदनुभूतस्यघटस्यपटस्यचप्रत्येकंस्मरणंतत्रपुनस्तादृशघटस्मरणानुत्पत्तिप्रसंगात् । क्रमिकस्मरणाभ्यां
समूहालंबनसंस्कारनाशदशायामेवघटस्मरणस्यापिनाशात्तेनपुनर्घटसंस्कारजननासंभवादितिदिक् । ननुस्मृ
तिश्चसंस्कारजनकतासत्वएवतद्द्वारास्मृतिजनकत्वंवाच्यंतदेवासिद्धंसंस्कारंप्रत्यप्यनुभवत्वेनैवहेतुत्वादनस्मा

श्री०ज०
३५

हेज्ञायते चेतिनतथा च संस्कारं प्रत्यनुभवत्वेन हेतुत्वे दृष्टे तत्र संस्कारं प्रति पुनः पुनः स्मरणत्वेन हेतुता न स्यात्सामान्यसा
मग्रीविरहादतः संस्कारं प्रत्यपि निश्चयत्वमात्रेण हेतुत्वमिति भावः प्रांचस्तु समानाकारस्मृतित्वेन संस्कारनाशहे
तुतामतेपिऽनंतानंतगोचरसंस्कारनाशानुरोधात्पुरुषभेदेन कार्यकारणभावानंत्यमावश्यकमेव तथा च
तत्तदात्मीयसंस्कारसामान्यनाशं प्रत्येव तत्तदात्मीयचरमस्मृतिव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुत्वं युक्तमंतरानंतसंस्का
रध्वंसकल्पनायां गौरवादवच्छेदकलाघवाच्च सकलसंस्काराणां चरमस्मृतिपर्यंतस्थायित्वेप्युद्बोधकविरहेणै
वमध्ये स्मरणासंभवात्तथा च सकृदनुभूतस्यापि स्मरणोत्तरं स्मरणासंभवादनुभवत्वेन स्मृतिहेतुतायां बाधका
भावइत्यत उक्तं ज्ञायते चेत्स्यादित्याहुः तच्चिंत्यं तावतास्मृतेः संस्कारजनकत्वसिद्धावपि स्मृतिजनकत्वाप्राप्तेः पत्रस्व
सहशँदार्थज्ञानत्वादिनाऽनुगतरूपेणोद्बोधकस्य स्मृतिहेतुत्वं तत्रांतरा स्मरणधाराप्रसंगाच्च।नव्यास्तु ननु स्मृतौ
न समानाकारज्ञानत्वेन हेतुत्वं सकृदनुभवस्थले स्मृतिजन्यानेकसंस्कारकल्पनागौरवापत्तेः किंतु तादृशानुभव
त्वेनैव तथात्वं न च संस्कारस्य फलनाश्यतया सकृदनुभूतस्य स्मरणद्वयानुपपत्तिः। चरमफलमात्रवृत्तिस्मृतित्व

प

राम
३५

शिष्टप्रत्यक्षंप्रतितत्तद्विशेषणादिज्ञानव्यक्तीनांविशिष्यकारणत्वस्यप्रतिबंधकत्वस्यवाकल्पनायांगौरवात्।नचस्मृ
त्यादिस्थलेव्यभिचारोऽनिरसनीयत्वात्· तथाचवह्निव्याप्यधूमवत्पर्वतवानित्याकारप्रत्यक्षेऽतिव्याप्तिस्तद्वारणा
र्थंप्रकारांतरानुसरणेनततोपिस्मृत्यतिव्याप्तिनिरासःसंभवतीत्याशयेनाहकिंचेतितत्र।अनुमिनोतितदेवेति'अन्यथा
पक्षधर्मिकव्याप्यवत्तानिश्चयत्वेनहेतुत्वस्यलक्षणेप्रविष्टत्वेऽनुमितिमात्रेसंभवापत्तेरितिभावः।ननुतद्विशेष्यक
तत्प्रकारकस्मृतिंप्रत्यपितद्धर्मवैशिष्ट्यावगाहिनिश्चयत्वेनैवहेतुत्वात्तत्रातिव्याप्तिरेवमपीत्यतआहएकतरेति।त
थाचान्वयव्यभिचारान्नोक्तरूपेणतत्रहेतुत्वमितिभावः।ननुजन्यतापितद्धर्मवैशिष्ट्यावगाहिस्मृतित्वेनैववाच्यातथाच
कार्यतावच्छेदकावच्छिन्नस्योत्पादान्नोक्तदोषइत्यतआहअन्यथेति।नियमेननियमतःअनियमेनविशेषतोनियामकाभ
वेनेत्यपिकश्चित्प्रसंगादिति।एकधर्मिकस्मृतिसामग्र्याएवापरधर्मिकस्मृतिसामग्रीत्वादितिभावः।ननुतद्विशेष्यकत
त्प्रकारकस्मृतौतादृशनिश्चयत्वेनहेतुत्वंमयापिवाच्यमेवनातःस्मरणस्योभयविशेष्यकत्वंपरंतुउभयवैशिष्ट्यावगा
हिनिश्चयत्वेनापिहेतुत्वंयद्विशेषयोरितिन्यायादेववक्तव्यमितिस्मृत्यतिव्याप्तिस्तदवस्थैवेत्यतआहसमानेतितथाचत

श्री०जे०
३९

व्याप्तेर्लौकिकप्रत्यक्षविषयत्वभावात् )६

स्प्रकारकस्मृतिसामान्यं प्रति तत्प्रकारकज्ञानत्वेनैव हेतुतयैवपद्विशेषयोरिति न्यायसामंजस्यान्न तदुभयवैशिष्ट्या
वगाहिनिश्चयत्वेनापि हेतुत्वं गौरवादिति भावः तत्र ज्ञानस्मरणयोः विशिष्येति तद्विशेष्यकतत्प्रकारकज्ञानत्वादिनै
वेत्यर्थः नानाविधव्याप्तेरनुमित्युपयोगित्वमतेनाह व्यभिचारेति हेतुतामतद्रूपेन प्रागुक्तदोषः सूचितः। नितरामिति। ना
तिप्रसंगशंकापीत्यनुषज्यते। तथैव व्यभिचारधीविरोधीत्यादिरूपेणैवं स्मृत एवेति। व्याप्यपक्षोभयवैशिष्ट्यावगाहि
त्वादिनाजनकत्वस्य लक्षणे प्रवेशादेवेत्यर्थः। ज्ञानत्वेन निश्चयत्वेन हेतुत्वेपीत्यपिनाऽस्वरसः सूचितः सच व्याप्यवत्त्वावे
छिन्नयोग्यानुपलब्धिविरहात्तदवच्छिन्नाभावस्यातीन्द्रियतया न तत्र प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानं हेतुर
भावलौकिकप्रत्यक्षं प्रत्येव तस्य हेतुत्वादित्यादिः। अधिकं सामान्यलक्षणायां वक्ष्यते। ननु व्याप्यपक्षोभयवैशिष्ट्यावगा
हिनिश्चयत्वं तदुभयनिरूपितसांसर्गिकविषयताकनिश्चयत्वं तथा च तद्रूपेण हेतुत्वे वह्निव्याप्यधूमे पर्वत इति ज्ञाना
दप्यनुमित्यापत्तिः पक्षे साऽव्याप्याधारत्वावगाहित्वस्यावच्छेदककोटिप्रवेशे तु पर्वते वह्निव्याप्यधूम इत्यादिलिंगधर्मि
कपरामर्शस्यासंग्रहः तत्र व्याप्यांशे पक्षाधेयत्वस्यैवलाभात् किं च पक्षधर्मिकव्याप्याभावप्रकारकान्यत्वे सति व्याप्यवि

एम
३९

शेष्यकपक्षाभावप्रकारकान्यव्याप्यपक्षोभयवैशिष्ट्यावगाहिज्ञानत्वमेवतादृशनिश्चयत्वं वाच्यं तथा च तस्यापि विशे
षणविशेष्यभावभेदाद्दुरुत्तरकार्यकारणभावापत्तिरतो व्याप्यवत्पक्षनिश्चयत्वेनाधेयतया पक्षप्रकारकव्याप्यधर्मि
कनिश्चयत्वेन वा यथानुभवमनुमितिहेतुत्वं वाच्यमतस्तादृशस्मृतावतिव्याप्तितादवस्थ्यमेवेत्यत आह व्याप्यविषय
कत्वेनेति। नव्यास्तु व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वस्य लक्षणघटकत्वे वह्न्याद्यापत्तावतिव्याप्तिरनु
मिताविवापत्तौ च परामर्शस्यैकरूपेण हेतुत्वादत उक्तं व्याप्यविषयकेति। तथा चापत्तेः साक्षात्कारतया परामर्शोपनी
तव्याप्तेस्तद्विषयत्वनियमान्नातिव्याप्तिरित्याहुस्तन्मन्दं पक्षधर्मतांशे गृहीताप्रामाण्यकत्वस्याहार्यत्वस्य चाधिकस्या
पत्तिजनकतायामवच्छेदकत्वादन्यथास्थाणुत्वाद्यभावभ्रमोत्तरं स्थाणुत्वादिप्रत्यक्षस्यापि व्याप्यदर्शनवशेन स्था
णुत्वादेरापत्तिप्रसंगादिति ध्येयं। एतेन व्याप्यविषयकत्वप्रवेशेन परास्तमिति परेणान्वयः विशिष्टबुद्धौ विशेषणज्ञान
स्य हेतुत्वेप्यवश्यापित्ते विशिष्टवैशिष्ट्यबुद्धेरपि विशिष्टबुद्धितया तदर्थमपेक्षितविशेषणज्ञानस्यैव विशेषणतावच्छेद
कप्रकारकत्वसंभवाद्विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानस्य व्यभिचारेण न स्यादित्याशयेनोक्तं विशेष

संस्कारसमवायद्वयं ।१

श्री० उ०
४०
व

णाधिय इति॰ हेतुत्वस्येति कल्पनादिनिपरेणान्वयः ननु संबंधद्वयेनैव हेतुत्वे प्रत्येकं व्यभिचारात् विशिष्टज्ञानत्वावच्छिन्नं
प्रत्यनुगतहेतुत्वासंभव इत्यत आह निर्विकल्पकात्मकस्य वा स्मरणस्येति विशेषणप्रकारकस्य वा स्मरणस्येत्यर्थः। ते
न व्याप्यत्वादिस्मरणस्य सविकल्पकत्वेपि न क्षतिः। कल्पनादिति योजना तथा च साक्षात्संबंधेनैव सर्वत्र हेतुत्वं ननु सं
बंधद्वयेनैवेति भावः। ननु विशिष्टबुद्धित्वं स्मरणस्यत्वे संदिग्धव्यभिचारकत्वान्न विशेषणधीजन्यतावच्छेदकं किंच
समानप्रकारकत्वेन ज्ञानस्मृत्योः कार्यकारणभावस्य क्लृप्तत्वान्निर्विकल्पकस्मरणस्यासंभवोपीत्यत आह अनुभ
वं प्रत्येवेति तस्या हेतुत्वस्य कल्पनादित्यन्वयः तथा विशेषणाधियः। नन्वेवमपि विषयोपरक्तकृत्यादिसाक्षात्का
रे व्यभिचार एव इत्यत आह नियमत इति नियमः कारणत्वं तदंगीकृत्येत्यर्थः तथा च ल्यब्लोपे पंचमीति न यत्रापेक्षाबुद्ध्या
कृतिर्जनिता यत्र वा प्रथमं चिकीर्षा ततो विषयोपरक्तमुपादानप्रत्यक्षं पश्चात्कृतिस्तत्र कृतिसाक्षात्कारपूर्वं विषयस्म
त्यकल्पनेपि नासंगतिरिति ध्येयं। न चोक्तप्रमाणत्वाव्यभिचारवारणेपि ज्ञानत्वमंतर्भाव्य हेतुत्वे मानाभाव इति वाच्यं।
विशेषणगोचरानुद्बुद्धसंस्कारदशायां विशिष्टप्रत्यक्षानुत्पत्त्यर्थं तन्निवेशावश्यकत्वादिति भावः। न व्याप्त्युपयोगादिव्या

राम
४०

विनश्यदवस्थज्ञानादिछाजनकस्थले तत्कल्पनात् ।२

विशेषणांशेऽनुद्बुद्धसंस्कारसत्वेविशिष्टस्मरणापत्तिः २

पारतयासिद्धस्यैवापूर्वस्येवानुभवव्यापारतयासिद्धस्यसंस्कारस्यापिसविषयकत्वेमानाभावाद्विशेषणविषयकत्वे
नैवविशिष्टबुद्धौहेतुत्वंसंस्कारद्वारासमानाकारनिश्चयत्वेनैवस्मृतिहेतुत्वेप्यतिप्रसंगाभावात्तेनचसंस्कारस्यनि
र्विषयकत्वेघटपटावित्यनुभवस्यपटांशएवोपेक्षात्वंतत्रतादृशज्ञानस्यघटस्मृत्युपधायकत्वजन्यसंस्कारसंबं
धेनसत्वात् घटस्येवपटस्यापिस्मरणापत्तिः।यस्यपुंसःपटानुभवोत्तरंतत्सदृशवस्तुदर्शनादेवपटस्मृतिस्त
स्युरूपीपपटस्मृतिसामान्यंप्रत्येवतदीपतादृशवस्तुदर्शनत्वेनानुगतरूपेणोद्बोधकस्यहेतुतयातत्सत्वदशाया
मुद्बोधकविरहस्यापिवक्तुमशक्यत्वात् इतिवाच्यंस्वजन्यसंस्कारद्वारातद्धर्मिकतत्प्रकारकोपेक्षान्यतादृशनिश्च
यत्वेनतथाविधस्मृतिंप्रतिहेतुत्वादुक्तस्थलेचपटोपेक्षान्यत्वविशिष्टस्यपटधर्मिकपटत्वप्रकारकज्ञानस्यस्वजन्य
संस्कारद्वाराविरहादेवपटस्मृत्यापत्त्यसंभवात्तथापिसंस्कारजनकतायामप्युपेक्षान्यत्वस्यप्रवेशनीयतयागौरवा
नवकाशात् अन्यथोक्तस्थलएवपटत्वप्रकारकसंस्कारस्यदुर्वारत्वापत्तेः यत्तुस्वध्वंसद्वारैवानुभवस्यस्मृतिजनकत्वे
संभवादतिरिक्तःसंस्कारएवनास्तिकस्यसविषयकत्वचिंतेतितत्तुच्छंयस्यपुंसःपटानुभवोत्तरंक्रमिकचतुष्टयंचप्र

पूर्व१

श्री०ज०
४१

त्यक्षाद्युत्पत्त्यव्यवहितैकालएवदशादिनेषुपटस्यदशस्मरणानुपेक्षात्मकान्युत्पन्नानितस्यतत्तद्दिनएवस्मरणोत्त
रमपिपटस्यपुनःस्मरणप्रसंगात्स्वध्वंसद्वारानुभवस्यसत्वात्तत्रत्यदशस्मरणेपूद्बोधकदशकस्यविशेष
तोहेतुत्वकल्पनयातत्रस्मृत्यनुत्पादमपेक्ष्यसंस्कारस्यस्मृतिहेतुत्वकल्पनयैवतत्संपादनेलाघवात्संस्कारस्यफ
लनाश्यतयाप्रथमस्मरणेनतन्नाशादेवास्मन्मतेपुनःस्मरणासंभवात्।नचतत्रतत्स्मरणपूर्वक्षणएवतन्नत्
स्मरणस्योत्पादप्रसंगेनसंस्कारहेतुत्वस्यैवादिनापितत्रोद्बोधकस्यविशेषतोहेतुत्वंवक्तव्यमितिसांप्रतंप्रत्यक्षादि
सामग्र्याःप्रतिबंधकत्वादेवतत्तत्स्मृतिप्राक्क्षणेस्मरणासंभवादितिप्राहुः।केचित्तुस्मृतिनाश्यतावच्छेदकतयैवसंस्का
रस्यसविषयकत्वसिद्धिस्तद्धर्मिकतत्प्रकारकसंस्कारनाशंप्रत्येवतादृशस्मृतित्वेनहेतुत्वात्स्मृतित्वेनसामान्यतःसं
स्कारनाशंप्रतिहेतुत्वेघटस्मरणादेवनिखिलसंस्कारनाशादनुभवांतरंविनोत्तरकालेपटादिस्मरणानुपपत्तेः।नहि
तत्रघटस्मृतिरेवस्वजन्यसंस्कारद्वारापटादिस्मृतिंजनयितुमीष्टेभिन्नविषयकत्वात्अन्यथाऽतिप्रसंगात्।नवापटादि
धीरेवतत्रसंस्कारद्वारासंभवतितज्जन्यसंस्कारस्यापिघटस्मृत्यैवनाशात्नचतद्धर्मिकत्वाद्यपेक्षयालाघवेनतद्धर्मि

राम
४१

कतत्प्रकारकस्मृतिनाश्यतावच्छेदकंसंस्कारनिष्ठंवैजात्यमेवकल्पयितुंयुक्तंघटत्वप्रकारकस्मृतिनाश्यतावच्छे
दकजातेर्घटपटोभयानुभवजन्यतदुभयस्मृतिनाश्यसंस्कारेपटत्वप्रकारकस्मृतिनाश्यतावच्छेदकजात्यासंक
रात्।नचतत्तोभयगोचरस्मृतिनाश्यतावच्छेदकंवैजात्यांतरंप्रत्येकस्मृतिप्रयोज्यजातिविरुद्धमेवस्वीकार्यमि
तिवाच्यंतथासतिअनंतजातितदाश्रयकल्पनामनंतनाश्य[illegible]नाशकभावकल्पनांचापेक्ष्यसंस्कारस्यैवसविषय
कत्वकल्पनायाएवलाघवेनौचित्यादित्याहुः।ननुतत्पक्षहेतुसाध्यकानुमितित्वंविशिष्यैवलक्षणतावच्छेदकंवाच्य
मतत्राहदैवादितिसामग्रीवशादित्यर्थः।तथाचवह्निव्याप्यधूमोदयंपर्वतश्चवह्निमानित्याकारानुमितस्यव्याप्ति
रितिभावः।ज्ञानवृत्तित्वंज्ञानसमवेतत्वंतेनसाक्षात्कारत्वादेःकालिकादिसंबंधेनतादृशज्ञानवृत्तित्वेपिप्रत्यक्षादौ
नातिव्याप्तिः।अनुभवत्वव्याप्येतिअनुभवत्वाव्यापकेत्यर्थस्तेनानुभवत्वस्यापित्वव्याप्यत्वात्तदादायप्रत्यक्षादौनाति
प्रसंगः।व्याप्यत्वंभेदगर्भमित्यपिकश्चित्।यत्किंचिदनुभवावृत्तित्वेनापिजातेर्विशेषणीयत्वमित्यन्ये।जातिपदंसम
वायेनहेतुनालाभायनातःस्पंदादौव्यभिचारः।अनुभवत्वजातेरसत्वपक्षेस्मृत्यन्यज्ञानत्वस्यैवतथात्वात्त[illegible]पेतादृश

ज्ञानत्वमपीति तद्वारणाय जातिपदमखंडधर्मोपेक्षमित्यपि वदंति अथानुभवत्वव्याप्यजातेर्निवेशे मूलोक्तं चरम
ज्ञानपदं व्यर्थमव्यावर्त्तकत्वादत आह एतदिति। तथा च न स्वातंत्र्येण ज्ञानपदार्थप्रवेश इति भावः। पृथक् अन्वयव्या
प्तित्वादिना न क्षतिर्नाव्याप्तिः अनुमितित्वमादाय सर्वत्रैव लक्षणसत्त्वादिति भावः। अनुभवत्वव्याप्यतामनिवेश्य
मूलस्थजन्यपदस्य जन्यतावच्छेदकविशिष्टपरतया तदनुसारिलघुलक्षणमाह पर्वतवह्निव्याप्येति। अत्रावच्छेद
कत्वस्य व्यासज्यवृत्तित्वमते कार्यतावच्छेदकत्वं तत्कोटिनिविष्टतामात्रेण वाच्यमन्यथानुमितित्वस्यापि तादृशकार्य
तावच्छेदकत्वपर्याप्त्यनधिकरणत्वादसंभवापत्तेस्तथा च वह्न्यनुमितित्वेन जन्यतायां वह्नित्वस्यापि प्रवेशात्तदादाय
वह्न्यादावतिव्याप्तिरत उक्तं ज्ञानवृत्तिरिति ज्ञानसमवेतेतितदर्थः तेन वह्नित्वादेरपि कालिकादिसंबंधेन ज्ञानवृत्तित्वे
पि नोक्तदोषः। चरमज्ञानपदस्यैतल्लाभार्थमेव मणिकृतोक्तत्वादिति भावः न च तादृशजातिमज्ज्ञानत्वमेव वक्तुमुचितं
ज्ञानवृत्तित्वप्रवेशे गौरवादिति वाच्यं। तादृशजातिमत्ज्ञानत्वं हि तादृशजातिविशिष्टज्ञानत्वं तथा च तस्य लक्षणत्वे
सामानाधिकरण्यात्मकवैशिष्ट्यस्य हेतुतावच्छेदकविधया ज्ञानत्वत्वस्य च प्रवेशे गौरवं विपरीतमेव स्यादिति भावः न

शि१ र्श

नुधूमपरामर्शविष्टानुमितित्वेन तादृशपराम नाश्यकानुमितित्वेन वा तादृशपरामर्शजन्यत्वेन तादृशपरामर्शघटकतया
ज्ञानत्वस्यापि प्रवेशात्तदादाय बुद्धिमात्रेति व्याप्तिरत आह सामानाधिकरण्येन वेति। विशेष्यविधयावछेदिकेत्यर्थः ते
न ज्ञानत्वस्यापि तादृशजन्यतायाः सामानाधिकरण्यत्वेपि नोक्तदोषः। वस्तुतस्तु कार्यतावच्छेदकत्वस्य व्यासज्यवृत्ति
त्वेऽपसिद्धांतः अन्यथा कुत्रापि कार्यतावच्छेदकधर्मस्य विशेष्यविशेषणभावभेदान्नानात्वप्रसंजनं शास्त्रकृतां विरु
द्धेत· तथा च वह्न्यनुमितित्वेन जन्यतायामनुमितित्वमेव जन्यतावच्छेदकं वह्नित्वादिकं तु तादृशजन्यतावच्छेदकतायामव
च्छेदकमतो नोक्तक्रमेण ज्ञानवत्त्वादिपदस्य व्यावृत्तिरुचिता किंतु वह्नित्वावच्छिन्नविधेयकानुमितित्वस्यैव विनिगमना
विरहात्त्वावच्छिन्नविधेयताकत्वसंबंधेन अनुमितिवृत्तिवह्नित्वस्यापि परामर्शजन्यतावच्छेदकत्वात्· तादृशं वह्नित्वादिक
मादाय वह्न्याद्यावृत्तिव्याप्तेर्वारणार्थमेव ज्ञानवृत्तिपदं समवायसंसर्गेणैव जन्यतावच्छेदकत्वस्य विवक्षया वह्नित्वादेर्वा
रणसंभवाज्ज्ञान[illegible]वृत्तित्वप्रवेशे गौरवमित्याशयादेव च सामानाधिकरण्येन वेति कल्पांतरमुक्तमिति पुक्तमुत्सस्यामः
यद्यपि पर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरज्ञानत्वावच्छिन्नं प्रत्येव लाघवात्तादृशवैशिष्ट्यावगाहिनि

श्चयत्वेनहेतुत्वेपर्वतधर्मिकवह्न्यनुमितित्वादेःकार्य्यतावच्छेदककोटिप्रविष्टत्वादनुमितिमात्रएवोक्तलक्षणस्यासंभव
स्तथापितत्तदप्रामाण्यज्ञानानास्कंदिततादृशोभयवैशिष्ट्यावगाहिनिश्चयत्वेनैवानुमितिहेतुत्वंवाच्यमन्यथाभ्रमत्वे
नगृह्यमाणादपिपरामर्शादनुमितिप्रसंगात्नचपरामर्शधर्मिकतत्तदप्रामाण्यज्ञानाभावस्यसत्वात्तंत्रेणैवानुमितिहे
तुत्वमितिनोक्तदोषःतथासतिगृहीताप्रामाण्यकस्यैवपरामर्शस्योत्तरंपरामर्शान्तरोत्पादेऽनुमित्यनुत्पत्त्यापत्तेरेवंच
पर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरंज्ञानत्वमात्रस्यतादृशनिश्चयजन्यतावच्छेदकत्वेगृहीताप्रामाण्य
कात्पर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयादनंतरंस्वसामग्रीवशाज्जायमानायांपर्वतेद्रव्यत्वस्यचत्वरेवह्नेः
र्वह्निमत्पर्वतएववाद्रव्यत्वादेरनुमितौपर्वतेवह्निविधेयकान्वयबुद्धौधूमेनपर्वतेवह्नेरपक्षेचव्यभिचारःस्या
दित्यवश्यंपर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरंपर्वतधर्मिकवह्निविधेयकानुमितित्वावच्छिन्नंप्रत्येव
तत्तदप्रामाण्यज्ञानानास्कंदिततादृशोभयवैशिष्ट्यावगाहिनिश्चयत्वेनहेतुत्वंवाच्यंत्रत्वनुमितित्वस्यापिकार्यता
वच्छेदकेऽनुप्रवेशान्नासंभवः।नचतत्तदप्रामाण्यज्ञानानास्कंदितपर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्च

२ वह्निव्याप्यधूमालोकोभयविषयकपरामर्शाद्धूमांशेऽप्रामाण्यज्ञानास्कन्दिताज्जायमानतयाविधानुमितौव्यभिचारवारणार्थंकार्यतावच्छेदककोटावर्पितद्विशेषणावषयकत्वेऽसंभवोऽस्मादिति ध्येयं
निश्चयत्वस्यदुर्वचत्वात्तद्रूप ४

योत्तरज्ञानत्वावच्छिन्नं प्रत्येव तत्तदप्रामाण्यज्ञानानास्कंदितताद्दृशवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वं वाच्यमतो न
व्यभिचारः॥ पर्वतधर्मिकवह्निविधेयकानुमितित्वापेक्षया गुरुत्वेन तत्तदप्रामाण्यज्ञानाभावकूटस्य तादृशनि
श्चयकार्यतावच्छेदककोटिप्रविष्टत्वांदनयैव दिशाग्रिमलक्षणेप्यसंभवो वारणीय इति परैरपरिशीलितः पंथाः
। ननु पूर्वोक्तयुक्त्या व्याप्यपक्षोभयवैशिष्ट्यावगाहित्वेनानुमितावर्पितहेतुत्वं अतः कल्पांतरमाह। वह्निव्याप्यवदिति
। केचित्तु व्याप्यपक्षोभयवैशिष्ट्यनिरूपितपर्वतत्वावच्छिन्नविशेष्यताकज्ञानत्वावच्छिन्ने इत्यर्थः एतेन व्याप्यवत्तानिश्चयत्व
घटकदलद्वयापेक्षया लाघवाद्व्याप्यधर्मिकपर्वतनिश्चयत्वेनैव पर्वतो वह्निमानित्यनुमितौ हेतुत्वादसंभवोपीत्यप
स्तं निश्चयत्वे दलद्वयस्याप्रवेशादिति ध्येयं· व्याप्तिज्ञानत्वावच्छिन्नकारणत्वप्रवेशेऽनुमितावसंभवोऽनुमितिमात्रे
ज्ञानत्वेन वह्न्याद्यनुमितौ च वह्न्यादिज्ञानत्वेनैव हेतुत्वस्य स्वयंवक्ष्यमाणत्वादतस्तत्परित्यागः। यद्यपि वह्न्याद्यनुमि
तौ वह्न्यादिव्याप्यवत्तानिश्चयत्वेनैव समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्या हेतुत्वमुचितं पर्वतत्वचत्वरत्वाद्यवच्छि
न्नपक्षकनिखिलानुमितिसाधारण्यात्तत्तदात्मव्यक्तीनामपि कुचित्पक्षतया परेषां विषयविधेये वास्माकं स्वरूपत

स्यावगाहिनिश्चयत्वव्याप्यधर्मावच्छिन्नकारणताप्रतियोगिकव्याप्यविषयकघटितकार्यतावच्छेदिकायाजातिसत्त्वमित्यादिलक्षणार्थः तन्नताद्दशव्याप्यत्वाप्रवेशेलघुलक्षणमस्त्विति
यवदिशतिनवीनाः वह्निव्याप्यधूमवत्त्वप्रकारत्वान्यप्रकारता ६२ प्रपन्न

व्याप्तेरेकाभावाप्राप्यत्वावच्छिन्नाभावप्रकारकान्यत्वकूटनिवेशा
पेक्षयापर्वताभावप्रकारकान्यत्वनिवेशो लाघवं ६

श्री०जा०

४४

न्द

कृतः पक्षतावच्छेदकावच्छेदेनानुमितौ न तदवच्छेदेन हेतुमत्त्वनिश्चयः कारणं किंतु तदवच्छेदेन बाधाभावनिश्चय एवेति एतेन पर्वतत्वावच्छेदेन प्रमेयत्वानुमितेः प्रमेयत्वानतिरिक्तत्वावगाहने प्रत्वाप त्ति सिसाधनमुक्तक्रमेण तावतापि वह्न्यादिसाध्यकानुमितौ समानविशेष्यतावच्छेद ५

स्तत्सुरूपीयत्वस्यावच्छेदककोटिप्रवेशेपि गौरवानवकाशात् न च पर्वतत्वाद्यवच्छेदेन साध्यवत्त्वानुमितौ तदवच्छेदेन वह्निव्याप्य[illegible]वत्तानिश्चयत्वेन हेतुत्वमावश्यकमुक्तक्रमेण हेतुतायां तदनिर्वाहादिति वाच्यं तावतापि पक्षतावच्छेदकसामानाधिकरण्येनानुमितौ समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्या परामर्शस्य हेतुतायां बाधकाभावात् साध्यव्याप्यवत्तानतिरिक्तवृत्तित्वविशिष्टपक्षतावच्छेदकताघटकसंसर्गावच्छिन्नस्य विशेष्यतावच्छेदकत्वस्य प्रत्यासत्तित्वे पक्षतावच्छेदकधर्मावच्छेदेनानुमितावप्युक्तक्रमेण हेतुतासंभवाच्च । वंकत्वप्रत्यासत्त्यावृत्त्यादिपरामर्शस्य हेतुत्वे बाधकाप्राप्तेः तथापि साध्यव्याप्यस्य धूमालोकादेरननुगमात्तादृशैकव्याप्यवत्तानिश्चयत्वेन हेतुत्वोक्तावन्यलिंगिकायां पर्वते धूमस्य चत्वरे चालोकस्य सत्त्वे समूहालंबनपरामर्शजायमानायां चानुमितौ व्यभिचारः स्यादतः पक्षीभूतस्य पर्वतादेरपि विशेष्यतावच्छेदककोटावनुप्रवेशः कृतः यदि च तत्सुरूपीयवह्निव्याप्यधूमवत्तानिश्चयत्वेनैव हेतुत्वं तत्सुरूपीयवह्न्यनुमितित्वेन च कार्यत्वं तत्र च कारणस्य विशेष्यतावच्छेदकत्वमेव संबंधः कार्यस्य तु तत्सुरूपनिष्ठज्ञानीयवह्निव्याप्यधूमवत्ताप्रकारतानिरूपितविशेष्यतावच्छेदकत्वविशिष्टमेव विशेष्यतावच्छेदकत्वं संबंधः तादृश

रम

४४

विशेष्यतावच्छेदकत्ववैशिष्ट्यं तु स्वनिरूपकज्ञानोत्तरज्ञानीयत्वस्वसामानाधिकरण्योभयसंबंधेन ग्राह्यमित्युच्यते त
दासमानविशेष्यतावच्छेदकत्वप्रसासस्यापि परामर्शानुमित्योः कार्यकारणभावः संभवत्येव परं तु स्वविषयतया ज्ञा
नसमानकालतया विनश्यदवस्थपरामर्शेन जनितायाअनुमितेर्विशेष्यतावच्छेदकीभूतपर्वतत्वादौ तदानीं तादृश
परामर्शीविशेष्यतावच्छेदकत्वस्यासंभवादेवेदमुपेक्षितमस्माभिरिति ध्येयं ग्राह्यविशिष्टवैशिष्ट्यबुद्धावतिव्याप्तेर्वा
रणाय व्याप्यविषयकेति न च ग्राह्यविशिष्टवैशिष्ट्यावगाहितामात्रस्यैव जन्यतावच्छेदकतया परामर्शजन्यतावच्छेदक
जातिविरहादेव न तत्रातिप्रसंगस्तथापि विशिष्टस्मरणत्वस्य परामर्शजन्यतावच्छेदकतया नद्वतिस्मरणेऽतिव्याप्ति
वारणार्थं ग्राह्यविषयकत्वनिवेशस्यावश्यकत्वात् वन्ह्याघापज्ञावायञ्जित्वजातिमादायातिव्याप्तिवारकं तदित्यपि
केचित् ननुपपन्न व्याप्यविशिष्टवैशिष्ट्यबुद्धौ धूमत्ववह्नित्वादिना वाष्पगुञ्जादिकमेव भातं तस्याखंडव्याप्यविषयक
त्वात्तत्रातिव्याप्तिरतो लाघवाच्चाह व्याप्तिमानइति तादृशानुमित्यविषयीभूतघटादिव्यक्तिविषयकत्वस्य व्याप्तिविशि
ष्टवैशिष्ट्यबुद्धावपि सत्वाद्भासमानानां तं व्याप्तिमानेऽवश्यंभासमानसाध्यतावच्छेदकीभूतं वह्नित्वादिकमिति तद्विषयक

त्वंचानुमितावसंभवीयतउक्तंतादृशानुमित्यविषयइतितथाचतादृशंपदभाक्त्वधूमत्वादिकंतद्विषयकत्वमेव
विशिष्यवक्तव्यमितिभावः ननुवह्निव्याप्यालोकपरामर्शजन्यायांपर्वतोवह्निमानित्यनुमितौव्यभिचाराद्वह्निव्याप्य
धूमवत्पर्वतनिश्चयत्वेननानुमितिहेतुत्वमित्युक्तलक्षणासंभवः।नचपर्वतधर्मिकवह्निव्याप्यधूमवत्त्वानिश्चयवि
शिष्टानुमितिंप्रत्येवतादृशनिश्चयत्वेनहेतुत्वंवैशिष्ट्यंचाव्यवहितोत्तरत्वसंबंधेनतच्चक्षणद्वयसाधारणंतेनविनश्य
द्वस्थधूमपरामर्शस्थलीयानुमितावपितदपेक्षेतिवाच्यंअव्यवहितोत्तरत्वस्यसंबंधत्वेमानाभावात्तादृशनिश्च
यसामान्याव्यवहितोत्तरत्वाप्रसिद्धात्तत्तत्परामर्शाव्यवहितोत्तर[illegible]व्यक्तीनांअननुगतानामेवनिवेश्यत्वेऽनुगतकार्य
कारणभावासंभवाच्चनापिधूमलिंगकपर्वतधर्मिकवह्निविधेयकानुमितिंप्रत्येवतादृशनिश्चयत्वेनहेतुत्वंधूम
लिंगकत्वंतुधूमान्यमात्रलिंगिकायाव्यावृत्तोऽनुमितयस्तत्तद्भेदकूटवत्त्वमतोनव्यभिचारइतिवाच्यंतथासतितावद्भेद
कूटानांविशेष्यविशेषणभावभेदादनंतकार्यकारणभावध्रौव्येलाघवेनतत्तदनुमितिव्यक्तित्वावच्छिन्नंप्रतितत्तत्प
रामर्शव्यक्तित्वेनहेतुत्वस्यैवोचितत्वादित्यतःस्वयंलक्षणमाहयांकांचिदित्यादिनानचवह्निव्याप्यधूमवत्पर्वतनिश्चय

संस्कारस्यापिपरामर्शनाशकतयातद्विशिष्टान्यलिंगकानुमितौव्यभिचारइतिसंस्कारान्येति १

त्वेनकारणतायां संस्कारान्यतादृशनिश्चयनाशकविशिष्टानुमितित्वमेवकार्यतावच्छेदकमित्युक्तलक्षणमेवस
म्यगितिवाच्यंधूमपरामर्शगोचरकामिनीजिज्ञासानंतरोत्पन्नतादृशपरामर्शनस्यविनाशदशायामुत्पाद्यानु
मितेरसंग्रहापत्तेः कामिनीजिज्ञासायाः प्रतिबंधकत्वेनेष्टसाधनतादिज्ञानविरहेणचतादृशपरामर्शद्वितीयक्ष
णेसंस्कारभिन्नस्यज्ञानेच्छाकृत्यादेरुत्पत्तिसंभवात् एवंसिद्ध्यात्मकधूमपरामर्शोत्तरमुत्पन्नेनापेक्षाबुद्ध्यात्मका
लोकपरामर्शेनजनितायांवह्न्यनुमितौव्यभिचारात् ज्ञानादिनाशंप्रतिलाघवेनस्वोत्तरोत्पन्नत्वेनैवजनकतयाधू
मपरामर्शोत्तरजातसंयोगादेरपितन्नाशकतयातद्विशिष्टायामालोकादिलिंगकानुमितावपिव्यभिचाराच्च अत
एवधूमपरामर्शनाशकानुमितित्वावच्छिन्नंप्रत्येववह्निव्याप्यधूमवज्ञानित्वँत्वेनहेतुत्वंनचविनश्यदवस्थधूम
परामर्शजन्यानुमित्यसंग्रहः तत्रविशिष्यैवतत्तत्परामर्शानुमितिव्यक्तीनांकार्यकारणभावस्वीकारेत्वतिरिक्त
स्यलएवोक्तानुगतरूपेणहेतुत्वसंभवात् नचविनश्यदवस्थपरामर्शजन्यानुमितिदशायामपिपरामर्शना
शकानुमित्यापत्तिः सामग्रीसत्त्वादितिवाच्यंकार्यसहवृत्तित्वेनैवधूमपरामर्शत्वेनहेतुत्वस्योक्तत्वादित्यपिनिरस्तं॥

नाश्यकानुमितौतादृशपरामर्श १

धूमपरामर्शव्यधिकरणानुमितिव्यक्तीनामपि स्वोत्तरोत्पन्नत्वेन तादृशपरामर्शनाशकतया तत्रैव व्यभिचारा-
दिति। न आलोकवह्निव्याप्यधूमवत्पर्वतनिष्ठत्वविशिष्टानुमितिं प्रत्येव तादृशनिष्ठत्वेन हेतुत्वं वैशिष्ट्यं च त-
त्रत्वसामानाधिकरण्यस्ववृत्तिप्रागभावप्रतियोगित्वोभयसंबंधेन आद्यं वृत्तिरपि कालिकी निवेश्येति नोक्त-
लक्षणस्यासंभवः न च विनश्यदवस्थपरामर्शजन्यानुमित्यसंग्रहः तत्तदनुमितौ परामर्शव्यक्तीनां विशिष्यैव
हेतुत्वान्तरस्य वक्तव्यत्वात् वस्तुतो वह्निव्याप्यधूमवत् पर्वतनिष्ठत्वविशिष्टकृतिमदनुमितिं प्रत्येव तादृशनि-
ष्ठत्वेन हेतुत्वं वाच्यं तेन विनश्यदवस्थपरामर्शस्थलीयानुमितेर्नासंग्रहः अत्र च निष्ठत्वस्य वैशिष्ट्यं पूर्वव-
त्स्वसामानाधिकरण्यस्ववृत्तिप्रागभावप्रतियोगित्वोभयसंबंधेन न निवेश्यं तादृशकृतिमत्त्वं तु सामानाधिकर-
ण्यसंबंधेन वाच्यमतो न कोपि दोषः सर्वत्र जीवनयोनियत्नमादायैव कार्यतावच्छेदकसंपत्तेः। न च यत्र धूमपरा-
मर्शोत्तरं तद्धर्मिकाप्रामाण्यग्रहात्मकालोकपरामर्शस्योत्पाददशायां बाधादिनिश्चयस्य ध्वंसः तदुत्तरं वह्न्यनु-
मितेरपि निरुक्तकृतिमदनुमितित्वात्तदव्यवहितप्राक्काले चाप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शस्यासत्त्वा

व्यभिचार इति वाच्यं अप्रामाण्यज्ञानयुक्तानामपि विशेष्यत एवोत्तेजकतया तत्रत्यतद्ग्रहेरनुत्तेजकत्वेपि क्षयभा
वादेवं च परामर्शधर्मिकाप्रामाण्यज्ञानाभावकूटस्य स्वातंत्र्येणानुमितिप्रयोजकत्वमते वह्निव्याप्यधूमवत्तानिश्च
यविशिष्टकृतिमत्त्वावच्छिन्नं प्रत्येव नादर्शनिश्चयत्वेन हेतुत्वादनुमितित्वस्य जन्यतानवच्छेदकत्वात् ज्ञातिघटि
तोक्तलक्षणस्यासंभवं स्यादतः स्वयं लक्षणमाह यांकांश्चिदित्यादिनेति प्राहुः । यत्तु वह्निव्याप्यधूमवत्त्वेन निश्चय
त्वपदेन मानसत्वव्याप्यपरामर्शत्वजातिरूपलक्षितेति तदवच्छिन्नकारणतानंतर्भाव्यैवोक्तलक्षणसंभवः । प्रागग
ननुमतत्वसाध्यादिपरामर्शादनुमित्युत्पत्त्या च परामर्शत्वजातेर्नस्फुर्तित्वव्याप्यत्वशंकापीति मतं तन्न तुच्छं निश्चयत्वं तेन
परामर्शत्वजात्युपलक्षणे व्याप्यविषयकवृत्तीत्यस्य ज्ञानवृत्तित्वादेश्च व्यर्थतापत्तेः । न वा परामर्शत्वस्य जातित्वे प्र
माणमस्ति तुल्यन्यायतया पापेच्छाप्रवृत्त्यादिजनकतावच्छेदकत्वेन सिद्धयेष्टसाधनताज्ञानत्वादिनात्यासांकर्यात्
किं चानुमितित्वावच्छिन्नं प्रति ज्ञानत्वेनैव हेतुत्वसंभवात्तादृशजातौ मानाभावः घटादावरण्यस्य दंडादेरिवानुमितौ
ज्ञानमात्रस्य स्वरूपयोग्यत्वेपि क्षतिविरहात् किं चानुमितिसामान्यं प्रति परामर्शत्वजात्या हेतुत्वस्वीकारेपि वह्न्यनुमि

श्री०ग० त्वावच्छिन्नंप्रत्यनुगतनियामकालाभः वह्निविषयकपरामर्शत्वेन तत्र हेतुत्वे वह्निविषयकह्रदादिसाध्यकप
४२ रामर्शाद्वह्न्यनुमितिप्रसंगात् न च पर्वतधर्मिकवह्न्यनुमितित्वस्य कार्यतानवच्छेदकत्वान्न तदवच्छिन्नस्योत्प
त्तावापादकाभावस्तादृशानुमितित्वस्यापि परामर्शधर्म्मिकाप्रामाण्यज्ञानाभावस्य पक्षताविशेषस्य वा का।
र्यतावच्छेदकत्वेन तदवच्छिन्नस्यापत्तिसंभवा[illegible]त् उक्तंत्ववधानत्वे पर्वतधर्मिकवह्न्यनुमितित्वावच्छिन्नं प्रतिज
नकतावच्छेदकतया धूमालोकादिनानाहेतुकवह्निपरामर्शसाधारणैकमत्वज्ञानात्कृदित व्याप्यवत्तानिश्चय
वत्तिमानसत्वव्याप्यापरामर्शत्वजातिः कदाचित्कल्प्यापि तु शाकृत एव यदि चाक्षुषादिपरामर्शात् स्मरणाविलंबे
साध्ययोः नैवानुमितिर्द्रव्यत्वव्याप्योः समूहालंबनपरामर्शाद्द्रव्यत्वव्याप्योर्नानुमितिः किंतु प्रत्येकस्यैव परामर्शादन्यथा तदु
भयजनकतावच्छेदकजात्योस्तत्रैव संकरापत्तेः एतेन धूमादिलिंगकत्वमेव धूमादिपरामर्शजन्यतावच्छेदकं तच्चा
नुमितित्वव्याप्यवैजात्यमित्यपि मतं व्याख्यातमिति दिक्। केचित्तु वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेनैव हेतुत्वं जन्य राम
तानु तादृशधूमविशिष्टपर्वतधर्मिकवह्न्यनुमितित्वेनैवानच धूमवत्पर्वतधर्मिकवह्न्यनुमितित्वेनैव लाघवाद्। ४७

भिन्नविषयक,५

पूर्वोक्तबाधादिभ्रमत्वज्ञानंवापरामर्शोत्तरंयत्रतत्रेदंबोध्यं,६

त्वजन्यतेतिवाच्यंनानाविधव्याप्तेरनुमित्युपयोगितयाजनकज्ञानविषयीभूतव्याप्तीनांविशिष्यानुमितौकार्यतावच्छेदक
त्वादेकविधव्याप्तेरेवानुमितिप्रयोजकत्वेतुधूमवत्पर्वतत्वावच्छिन्नधर्मिकवह्न्यनुमितित्वेनैवजन्यत्वंवक्तव्यंलिंगोपधान
स्याचार्यसंमतत्वेनतस्यैवपरामर्शजन्यतावच्छेदकत्वौचित्यात्।तथाचपूर्वोक्तलक्षणमेवसम्यक्।नचानुमितिमात्रस्यप
क्षहेत्ववगाहित्वेयत्रबाधकालीनपरामर्शोत्तरंपक्षेहेत्वभावस्यदोषजंलौकिकंवाप्रत्यक्षंतत्रानुमितिर्नस्यादितिवाच्यमि
ष्टत्वात्।नचैवंसतितदानींतन्मतेप्रत्यक्षाद्युत्पादेसाक्षात्कारादिकंप्रत्यनुमितिसामग्र्याविरोधितायांसिद्ध्यभावस्यैवपक्ष
धर्मिकहेत्वभाववनिश्चयाभावस्यापिप्रवेशगौरवंस्यादितिवाच्यंमणिकृन्मतेपियत्रसिद्ध्यंशेभ्रमत्वज्ञानात्मकस्यैवपराम
र्शस्योत्तरंपक्षेहेत्वभावस्यनिश्चयस्तदुत्तरमनुमितेरुत्पत्त्यर्थंसिद्धेरनुमितिविरोधितायांतत्रदप्रामाण्यज्ञानाभावस्यप्र
वेशगौरवस्यतुल्यत्वादस्माकंमतेहेत्वभावनिर्णयेन।प्रतिबंधात्तत्रानुमितेरनुत्पत्त्यासिद्धेर्विरोधितायांतत्रदप्रामाण्यज्ञा
नाभावस्याप्रविष्टत्वात्।।यत्तुलिंगोपधानमतेपक्षेऽनुमितिमात्रस्यैवविशिष्टवैशिष्ट्यबुद्धित्वेनतन्निष्ठसाध्यव्याप्यवत्ता
रामर्शजन्यत्वंवह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविषयताकत्वेनैवावच्छिद्यतेनादृशप्रत्यक्षादिसाधारण्येनलाघवान्नतुव
ह्निव्याप्यधूमवत्पर्वतधर्मिकवह्न्यनुमितित्वेनकार्यकारणभावांतरकल्पनेगौरवादितिकुतःपरामर्शजन्यतावच्छेदकीभूत

प्रतीतेघटव्याप्यवत्पर्वतविशेष्यकत्वंव्यापकंतथाविधानुमितित्वंव्याप्यं)५ न१ त्वावच्छिन्नं६

जो॰अ॰ ४८

मनुमितित्वमादायप्राग्युक्तलक्षणासंभवः नचतत्तत्साध्यकानुमितित्वस्यपरामर्शजन्यतावच्छेदकत्वेवह्निव्याप्यविशिष्टपर्वतेव
ह्नेरनुमितिदशायांघटादेरपितादृशपर्वतेनुमित्यापत्तिः। पर्वतविशेष्यकघटविधेयकानुमितित्वस्यापिघटसाध्यकपक्षताजन्य
तावच्छेदकतयातदवच्छिन्नस्यापादनसंभवादितिवाच्यं॰ सिंशोपधानपक्षेपर्वतधर्मिकघटानुमितिमात्रस्यैवघटव्याप्यवत्पर्वतत्वा
वच्छिन्नविषयताकत्वनियमेनतदवच्छिन्नंप्रतिहेतोर्घटव्याप्यवत्तयापर्वतनिश्चयस्यविरहादेवतदानींघटविधेयकानुमित्यसं
भवात्॰ व्यापकधर्मावच्छिन्नसामग्रीसहितायाएवविशेषधर्मावच्छिन्नसामग्र्याः कार्यजनकत्वादिति॰ तन्तुच्छं॰ पक्षतावच्छेदक
सामानाधिकरण्येनव्याप्यवत्तापरामर्शात्तदवच्छेदेनसाध्यानुमित्यनुत्पादात्तदवच्छेदेनसाध्यानुमितिंप्रत्यवश्यंतदवच्छेदेनसा
ले ७ ध्यव्याप्यवत्तापरामर्शस्यहेतुत्वादनुमितित्वस्यावश्यंपरामर्शजन्यतावच्छेदकेनुप्रवेशात्पर्वतत्वावच्छेदकत्वविशिष्टसंयोगसं
बंधेनवह्निव्याप्यधूमवत्पर्वतधर्मिकवह्न्यनुमितिंप्रतिपर्वतत्वावच्छेदेनवह्निव्याप्यधूमवत्तापरामर्शनिश्चयत्वेनहेतुतायाः
सुवचत्वादित्याहुः। तच्चिन्त्यं॰ तद्युक्तौस्यादि॰ अनुमितिसमवेतत्वोक्तावनुमितिप्रवेशेगौरवमतस्तदप्रवेशेलाघवंसूचयितुंव्य राम
क्तिपदंज्ञानान्तरस्यापिस्वरूपतः प्रकारतायाः क्वचिदिष्टतयाव्यक्तिगतधर्मान्तरस्याभानेपिक्षत्यभावात्॰ यत्तु॰ अनुमितिसमवे ४८

अतिव्याप्तिवारणायोक्तविशेषणदानेऽसंभवापत्तेः)२ न२
उत्पादयिष्यतेवैतत्सर्वपक्षे)१

तत्वोक्तावनुमितित्वप्रवेशेपि लघुनस्तस्यैवलक्षणत्वसंभवेशेषवैयर्थ्यापत्तेरतस्तद्युक्तित्वेनप्रवेशः कृतइति· तन्न· स्वरूपतोनु
मितित्वस्यप्रवेशेपिहेतुतावच्छेदकरूपेणाप्रविष्टतयालक्षणत्वासंभवा अप्रत्यक्षत्वमादायातिव्याप्तेर्वारणार्थमाद्यंसमवेतांतं·प्र
त्यक्षत्वस्याप्यनुमितौकालिकसंबंधेनसत्वात्समवेतेति· अनुभवत्वमादायप्रत्यक्षाद्यतिव्याप्तेर्वारणार्थमनुभवत्वान्येति·य
द्यप्यनुभवत्वप्रतियोगिकभेदस्यो ~~[illegible]~~ नुभवत्वेपिसत्वादुक्तदोषतादवस्थ्यं· अनुभवत्वत्वावच्छिन्नप्रतियोगि
ताकभेदस्योक्तौचतद्घटकीभूतंयत्सकलानुभववृत्तित्वंतदवच्छिन्नभेदस्यैवसम्यक्त्वेज्ञानत्वादिवारकस्यानुभवान्यासमवेतत्व
स्यवैयर्थ्यं· तथाप्यनुभूतिरित्याकारकयत्किंचिद्बुद्धिप्रकारत्वावच्छिन्नभेदस्यैवानुभवत्वान्यपदेनोक्तत्वाददोषः।सकलानुभववृ
त्तित्वस्यतत्राप्रविष्टत्वात्· बाधनिर्णयादिप्रतिबध्यतावच्छेदकतयापरोक्षत्वजातेः प्रामाणिकत्वेसकलानुभववृत्तिभिन्नांतादृ
शजातिमादायशाब्दबोधादावतिव्याप्तिवारणार्थमनुभवान्यासमवेतपदस्यावश्यकत्वाच्चेतिध्येयं· ज्ञानत्वादिवारणार्थमनुभ
वान्यासमवेतेति· अनुभवत्वस्यापिकालिकादिसंबंधेनानुभवादन्यत्रवृत्तेः समवेतत्वप्रवेशः· तादृशधर्मात्मकस्यानुमितित्वस्यका
लिकादिसंबंधेनेतरभेदव्यभिचारित्वात्समवायेनतस्यहेतुत्वलाभार्थंसमवायित्वमुक्तं· ननुस्वर्गाद्यनुमितौस्वर्गमनुभवामीत्यनु

परोक्षत्वस्यस्मृतौसत्वाद्दोषः अनुभवत्वंभस्मृतव्याप्यंभिन्नमेवेतिनसंकरः ३

ग्रा० श्रा०
४८

अनुभवपदस्यप्रत्यक्षार्थकत्वात्२

त्वे१

व्यवसायविरहात्साक्षात्कारत्वमेवानुभवत्वं· तथा चानुभवत्वान्येत्यस्यैव यथार्थमेव तद्व्यक्तिसमवेतत्वेनैव प्रत्यक्षंवारणात्तत्परित्या
गेप्यनुमितित्वमप्यनुभवान्यसमवेतमित्यसंभवः। तत्र अनुभवपदस्य स्मृत्यन्यज्ञानपरत्वे च स्मरणान्यज्ञानभिन्नासमवेतं फलिता
र्थमपेक्ष्य स्मरणासमवेतत्वमेव लघुतरं निवेशयितुमुचितमित्याशयेनाह· अनुभवत्वस्यादि· नव्यास्तु· यां कांचिदनुमितिव्यक्तिमित्य
स्यानुमितिः स्मृतिभिन्ना इत्याकारकानुमितिव्यक्तिमित्यर्थः। तद्व्यक्तिसमवेतेत्यस्य च तस्यास्तादृशानुमितिव्यक्तेर्या व्यक्तिर्विषयता संबं
धेन आश्रयस्तत्समवेतेत्यर्थः। तथा चानुभवत्वमादाय प्रत्यक्षादावतिव्याप्तिवारणायानुभवत्वान्येति सकलानुभववृत्तिभिन्नमा
नार्थकं· तादृशानुमितिविषयनिष्ठस्य स्मृतित्वस्य वारणार्थमनुभवान्यासमवेतेति· अथानुभवत्वं न जातिः किंतु स्मृत्यन्यज्ञानत्वं· त
था च तदन्यत्वस्य निवेशो व्यर्थः। एवं स्मृत्यन्यज्ञानभिन्नासमवेतत्वस्वरूपमनुभवान्यासमवेतत्वमपेक्ष्य स्मरणासमवेतत्वं लघुतरं
तावतैव स्मृतित्वस्य वारणसंभवादत आह· अनुभवत्वेनेति प्राहुः। ज्ञानत्वादिवारणाय स्मरणासमवेतेति· यद्यपि प्रत्यक्षासमवेतेत्यु
क्तावपि तद्वारणसंभवः। तथापि प्रत्यक्षासमवेतत्वघटितनिरुक्तेरनुभवत्वाङ्गीकारेऽनङ्गीकारे चोभयथैव सम्यक्त्वमिति विशेषः॥
व्याप्तीत्यादि·। व्याप्यविशिष्टवैशिष्ट्यबुद्धिवारणार्थमवच्छिन्नान्तं कार्यताविशेषणं· व्याप्तिविशिष्टबुद्धिवारणाय परामर्शत्वावच्छि

स्यं२

त्वं

राम
४८

न्नेत्यादि· यद्यपि धूमलिंगकवह्न्यनुमितित्वमेव धूमघटितव्याप्तिज्ञानत्वजन्यतावच्छेदकं तदवच्छिन्नं प्रति च न वह्निव्याप्यधूमवत्प
र्वतनिश्चयत्वेन हेतुत्वं· धूमलिंगिकायां महानसे वह्निमदित्याद्यनुमितौ व्यभिचारात्· किंतु पर्वतपक्षकतादृशानुमितित्वावच्छि
न्नं प्रत्येव तथात्वेन हेतुत्वं· तथा चैकावच्छेदेन व्याप्तिज्ञानपरामर्शोभयजन्यत्वाभावादनुमितावसंभवः। तथापि धूमघटित
व्याप्तिज्ञानस्य स्वजन्यपरामर्शद्वारानुमितिकारणतायां धूमलिंगकपर्वतपक्षकवह्न्यनुमितित्वस्यैव कार्यतावच्छेदकत्वादेका
वच्छेदेनोभयजन्यत्वसंभवः। अन्यथा धूमगतव्याप्त्यवगाहिना वह्निव्याप्यालोकपरामर्शेन जनितायां पर्वतो वह्निमानित्यनुमि
तौ व्यभिचारेण स्वजन्यपरामर्शद्वारा धूमीयव्याप्तिज्ञानस्यानुमितिकारणत्वानुपपत्तेरित्याशयः। जन्यतावच्छेदकावच्छिन्नांत
भागस्य तादृशव्याप्तिज्ञानजन्यतावच्छेदकधर्मघटितरूपावच्छिन्नार्थकत्वाददोष इत्यप्याहुः। अत्र पूर्वोक्तयुक्त्यानुमितौ परा
मर्शत्वेन हेतुत्वासंभवो न वा व्याप्तिज्ञानत्वेन तथात्वमनुमितिसामान्ये ज्ञानत्वेन हेतुत्वस्याग्रे व्यवस्थाप्यत्वादित्यस्वरसः· केचि
दित्यनेन सूचितः। मिश्रमतमाह· परे त्विति· पक्षताजन्यत्वस्य शब्दालभ्यार्थमाह· विशेषणमिति· ज्ञानरूपविशेष्ये त्वपि यज्ज्ञा
न्यत्वं तेनान्वितमित्यर्थः। पक्षधर्मताज्ञाने यत्र पक्षतावह्निस्वघटकतया सहकृतत्वसंबंधेन साक्षादेव वा पक्षत्वं ज्ञाने विशे

गा॰श्री॰
५०

पणमितिभावः।यथोक्ताया इति॰ विशिष्टाभावरूपायाः पक्षतायाः प्रत्यक्षस्य वारणायेत्यर्थः।ननु विशिष्टाभावरूपायाः
पक्षतायाः कालाघटीन्द्रियघटितत्वान्न स्वगोचरप्रत्यक्षमत आह॰ विशेष्येति॰ विशेष्ये सिद्धिस्तथा च पक्षसाध्यस्थले सिद्धिदशायां
कदाप्यनुमितिर्न जाता तत्र सिध्यभावमात्रं पक्षता॰ सा च योग्यत्वात्प्रत्यक्षहेतुरेवेति तत्रैवातिव्याप्तिरिति भावः।ननु पक्षविशेष्यकसा
ध्यप्रकारकनिर्णयत्वमेव सिद्धित्वं तदवच्छिन्नाभावश्च न योग्यो निश्चयत्वस्यातीन्द्रियेश्वरज्ञानादिघटितत्वान्नादृशनिश्चये चाप्रा
माण्यज्ञानाघनास्कंदितत्वप्रवेशे सुतरामयोग्यत्वमत आह॰ आदीति॰ विशेषणाभावरूपायाश्चेति तदर्थः।तथा च यत्र स्थले विशेष
सिद्धिकालीनपरामर्शसमानकालीनएकविधानुमित्सयैवानुमितिर्जनिता तत्र विशेषणाभावरूपा तादृशानुमित्सैव पक्षतेति
त प्रत्यक्षेतिव्याप्तिवारणार्थं परामर्शोपादानमिति भावः।तत्त्वेनेति॰ परामर्शत्वेनेत्यर्थः।तत्त्वेन जनकतायाः फलमाह॰ तेनेति॰ बाधा
दीत्यादिना सत्प्रतिपक्षसंग्रहः।तथा च तदानीमनुमित्सासामग्र्यभावान्न तत्संभावनापीति॰ प्रतियोगीति॰ पक्षतायाः प्रतियोगिनीया
सिद्धिस्तद्विषयकेनेत्यर्थः।तथा च सिध्यभावलौकिकप्रत्यक्षत्वरूपैकधर्मावच्छिन्नं प्रत्येव विषयविधया सिध्यभावस्य सिद्धित्वरूप
प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानत्वेन च परामर्शस्य हेतुत्वमिति भावः।एकावच्छेदेनेत्यस्य फलमाह॰ तदुभयेति॰ पक्षता

राम
५०

परामर्शोऽभिमयेत्यर्थः न च परामर्शप्रत्यक्षाविषयत्वादिनैव तस्य हेतुत्वं न तु परामर्शत्वेनेति प्रागुक्तं तथा च तत्त्वेन जनकत्वविवक्षयैव समूहालंबनव्युदासः संभवतीति वाच्यं वह्निव्याप्यधूमवत्पर्वतज्ञानाभिलापाकारकस्य परामर्शानुव्यवसायस्य ज्ञानधर्मिकव्याप्यविशिष्टवैशिष्ट्यबुद्धितया तत्र पर्वतधर्मिकव्याप्यप्रकारकनिश्चयत्वेन हेतुत्वस्यावश्यकत्वात् यद्यपि पक्षताजन्यतावच्छेदकं तत्पक्षकतत्साध्यकानुमितित्वं तत्त्वेन परामर्शजन्यतावच्छेदकं तल्लिङ्गकत्वस्याप्यधिकस्य तत्र प्रवेशादित्येकावच्छेदेन तदुभयजन्यत्वमनुमितावप्यसिद्धं तथापि पक्षताजन्यतावच्छेदकघटितधर्मावच्छिन्नपरामर्शजन्यत्वं विवक्षितं पक्षतायामपि लिंगविशेषनियंत्रित[illegible]त्वमग्रे वाच्यमतो वा नोक्तदोषः वस्तुतो विषयतासंबंधेनैव तदुभयजन्यतयोरवच्छेदकस्यैक्यं वाच्यं तथा च विषयविधया परामर्शजन्यतावच्छेदकस्य वह्निमत्पर्वतस्य पक्षताजन्यतायामपि विष[illegible]शिष्टपक्षावच्छेदकत्वान्नोक्तदोषः एतेन पक्षताजन्यत्वे सत्त्राभावजन्यत्वमेवलाघवात्प्रवेशयितुमुचितं विशिष्टवैशिष्ट्यबोधस्य ग्राह्याभावनिश्चयाभावजन्यत्वेपि धर्मितावच्छेदकनियंत्रितस्य तज्जन्यतावच्छेदकत्वस्य विशेषणतावच्छेदकप्रकारकनिश्चयजन्यतानवच्छेदकत्वादेकावच्छेदेनाभावपरामर्शोभयजन्यत्वाभावादेव तत्रातिव्याप्त्यसंभवादिति परास्तं विषयविधया बाधनिश्चयाभावजन्यतावच्छेदकस्यैव विषयतया विशेषणतावच्छेदकप्रकारकनिश्चयजन्यता

वह्निव्याप्यधूमवत्पर्वतवान्पर्वत इत्यादौ ।२

जा॰ अ॰
५१

वै२
वह्नेरेकतयातत्रैवातिप्रसंगापत्तेरिति दिक्॰ नाव्याप्तिरिति॰ अन्यथैकसाध्यादिकमंतर्भाव्य परामर्शोत्पादनेऽन्यसाध्यकानुमि
तावव्याप्तिः स्यादिति भावः॥ तच्चिंत्यमिति॰ पूर्वोक्तयुक्त्या परामर्शत्वेनानुमितिहेतुत्वमेव नास्ति॰ पक्षतायाश्च हेतुत्वमग्रे स्वयं निराकर्त्त
व्यमित्यादिकमत्र चिंताबीजं॰ न चेति॰ वाच्यमित्यग्रिमेणान्वयः॥ व्याप्तिज्ञानत्वमिति॰ व्याप्तिप्रकारकज्ञानत्वमित्यर्थः॥ न च परामर्शजन्य
ज्ञानकरणत्वस्वरूपेनुमानलक्षणे व्याप्तिज्ञानत्वेन तस्याप्रवेशान्नवैयर्थ्यमिति वाच्यं॰ व्याप्तिप्रकारकनिश्चयत्वावच्छिन्नकारण
ताघटितनिरुक्तेस्तद्घटितपूर्वोक्तत्वात्॰ व्यापकताविशेषणात्मनः कारणत्वस्य तादृशनिश्चयत्वेन निश्चयत्वग्रहं विना दुर्ग्रहत्वादि
ति भावः॥ तादृशनिश्चयवदन्यावृत्तित्वरूपव्याप्तेः कारणताघटकत्वेनाह॰ व्याप्तिज्ञानमेवेति॰ व्याप्तिप्रकारकज्ञानमेवेत्यर्थः॥ न
नु साध्यादिभेदेन व्याप्तेर्विभिन्नतया व्याप्तिज्ञानत्वादिकमनुमानमात्रस्य पक्षे भागासिद्धमतो व्याप्तिविशिष्टज्ञानजन्यत्वस्यानुभव
त्वव्याप्यजातिमत्कारणत्वं हेतुः कर्त्तव्यमत आह॰ व्याप्तेरिति॰ अधिकस्य तादृशजातिमत्कारणत्वस्याभागासिद्धिरिति॰ तथाच व्यभिचारेणा
रकत्वाद्वैयर्थ्यमिति भावः॥ फलेति॰ अनुमितिरूपं यत्फलं तदुपधायकस्यैव लक्ष्यतया स्वेतरभिन्नत्वेन ज्ञाप्यतया॰ व्याप्तिज्ञानत्वस्यानु
मित्यनुपधायकवृत्तित्वेन व्यभिचारित्वान्न हेतुत्वमतस्तादृशजातिमत्फलोपहितकारणत्वमेव हेतूकृतमिति भावः॥ स्वरूपयोग्यस्य ल

ज्ञान

एम
५१

विशेषणज्ञानस्यतत्रकरणत्वं)५ लिंगस्येति३

स्थलेपिनस्मृतिरित्याशयेनाह·करणस्येति·तथाचधर्मिभेदान्नवैयर्थ्यमितिभावः।ननुकरणत्वंकरणतावच्छेदकःकोधर्मःसचप्रकृ
तेव्याप्तिज्ञानत्वमेवेतिनधर्मिभेदसंभवइत्यतआह·व्यतिरेकेति·व्यतिरेकिस्थलेसाध्याभावस्यैवहेत्वभावव्याप्यताग्रहान्नवैयर्थ्यमूं
केतिभावः।नचैवमादिमूलस्यलक्षणपरीक्षयोरनुपयोगादन्यथातद्दुस्थापयतिं·अतिस्पलिंगानामहत्वादिद्वाराकदाचिदिंद्रियोप
जीवकत्वसंभवान्नित्यत्वेपीतिपर्यंतमनुसृतं·अनुमितिकरणस्येतत्सामान्यस्य·ज्ञानेति·ज्ञानैकरणकज्ञानत्वस्यानुभवत्वव्याप्यजा
तिमत्त्वमर्थः।तेनविशिष्टवैशिष्ट्यादिप्रत्यक्षेँनाव्याप्तिः।साक्षात्कारत्वादि[illegible]स्वरूपलक्षणांतरस्यज्ञानहेतुकस्यैवातिरिक्तानुमान
स्यचसंभवान्नेदंयुक्तमित्यस्वरसेनकश्चिदित्युक्तं·ननुतादृशजातिमत्करणत्वहेतुनेतरभेदसाधनेजातिमदंतभागोव्यर्थः।चक्षु
रादेरप्यनुमानतयाकरणत्वमात्रस्यैवहेतुत्वसंभवादित्यतस्तच्चेर्यादि[illegible]हुः।तच्चिंत्यं·[illegible]मूलमितिनव्याः।केचित्तु·लिंगस्यक
रणत्वेजगतएवानुमानतयातदितराप्रसिद्ध्याकथमनुक्तलक्षणस्येतरभेदानुमापकत्वमतस्तच्चेत्यादीतिप्राहुः।तच्चिंत्यं·कार्यमात्रं
प्रत्यकारणपारिमांडल्यादावेवानुमितिकारणेतरत्वस्यप्रसिद्धिसौलभ्यादाचार्यमतेपितद्धेतुकानुमितौपरामर्शस्यैवकारणत्वादि
तिदिक्·कौदस्यानुमानत्वाप्रसिद्ध्याताद्रूप्येणपक्षतासंभवाच्चेष्टं·अनुमानत्वेनेति·अनुमानत्वाप्रसिद्ध्यातदभिमतत्वमपितथे

ता॰ अ॰
५२

सतो विशिष्याह॰ धूमेति॰ अनुमानस्याहृत्यैवाक्षणिकत्वापत्तेः कल्पांतरमाह॰ असदिति॰ पारमार्थिके धूमादिज्ञाने ऽसतोनुमानत्वस्य
संबंधायोगात्॰ अनुमितिकरणत्वविशिष्टस्यालीकांतरवदसत्त्वमिति भावः। निर्विकल्पकसमानविषयकत्वरूपसंवादस्य [redacted] सं
भावनायामसंभवादाह॰ संवादाभिमानेति॰ संवादासंभवेपि बीजमाह॰ संभावितस्येति॰ असतइत्यत्रैव हेतुरनुगताकारस्येति॰ वह्नि
त्वा[redacted]द्यनुगतधर्मवत्त्वेत्यर्थः। अध्यक्षेणानुगताकारस्यानुल्लेखेहेतुगर्भविशेषणमाह॰ परमार्थेत्यादि॰ परमार्थसत्स्वरूपमेवल
क्षणं व्यावर्त्तकं यस्य तन्मात्रसाक्षिणेत्यर्थः। परेषामभेदेनैव धर्मधर्मिभावादिति भावः। विकल्पद्वयविषयस्यर[redacted]संवादव्यवहा
रस्य कारांतरेण संवादपदार्थं निरुच्याह॰ अध्यक्षेत्यादि॰ संभावितस्येत्यनुपपद्यते॰ तथाच संभावितस्याध्यक्षमूलकविकल्पोल्लिखि
तत्वादध्यक्षमूलकविकल्पविषयविषयकत्वरूपः संवादः संभावनायामप्यस्त्येवेति भावः। विकल्प[redacted]समानविषयकत्वस्यानादिवास
नामूलके शशशृंगादिविकल्पेऽतिप्रसक्तत्वात्[redacted]अध्यक्षमूलकत्वेन विकल्पो विशेषितः। समयादीनां ज्ञानमात्रस्योपयोगेन तत्संभाव
नासहकारेणैव शब्दादेः प्रामाण्यं स्यादत उक्तं निर्णीयेति॰ आदिनानासर्वनिर्णयादेः परिग्रहः। अप्रमाणसाधर्म्येण हेतुतायां च क्षु
रादौ व्यभिचारादाह॰ प्रमाणतेति॰ नचैवं द्विपत्वमिव व्याप्तिनिश्चयत्वमपि प्रमाणताप्रयोजकं अतस्तत्सामान्यशून्यत्वं पक्षेसत्त्वरूपापि

रम
५२

तत्रतस्यासत्यानाभिमानः)४

द्धमितिवाच्यं पक्षे योपाधीनामित्यादिग्रन्थोक्तक्रमेण क्वचिदपि व्याप्तिनिश्चयस्यासंभवेन तत्त्वस्य प्रमाणताप्रयोजकत्वासंभवादिति भा
वः। मणिकृता लिंगस्यानुमानत्वनिरासात्तन्मते पूरयति· साधर्म्यदर्शनस्यैवेति· अभिहित[illegible]मेवेस्यैवकारः संभावनाविसनंतरं योज्यः
।तथा चाभिहितं यत्साधर्म्यदर्शनं प्रमाणताप्रयोजकरूपशून्यस्यादर्शनरूपं तत्संभावनामनुमानेऽप्रामाण्यस्य संभावनामेवो
त्पादयति न त्वनुमितिं यतोऽनुमानेऽप्येवं तदप्रामाण्यसाधनेऽव्याघातः स्यादिति भावः। बहुश इति· तथा च परकीयसंदेहादिकमपि
संभाव्यैव तदुच्छेदाय परार्हः प्रयोक्तव्य इति न द्वितीयोऽपि दोष इति भावः। यावदसंदिग्धव्याप्तिर्न यवस्त्वाप्यते तावदेव भ्रमजनकत्वरू
पमप्रामाण्यं नोच्यते तस्याः सिद्धौ हेतुर्भ्रममात्रस्यैवासंदिग्धव्याप्तिरूपत्वादनुमानं न प्रमाणमिति वाक्यस्य भ्रमजनकत्वसिद्धावप्यनु
मानस्य न प्रामाण्यसिद्धिरित्याशयेनोक्तमापातत इति भावः। न चेति· वाच्यमिति परेणान्वयः। सन्मात्रावलंबनत्वं सदन्याविषयक
त्वं प्रामाण्यावगाहित्वं सद्विषयकावगाहित्वं· न च सन्मात्रावलंबनत्वादेरपि स्वानतिरिक्तत्वादनेनैव स्वग्रहसंभवः। तस्यांसद्व
दितमूर्त्तिकत्वेनातिरिक्तत्वात्· संभावनया चाध्यक्षनिष्ठस्य सन्मात्रावगाहित्वादेर्ग्रहे तेषामप्रामाणिकत्वापत्तेः संभावनामात्र
स्यैवाप्रमात्वादिति भावः। इदं· अनुमानाप्रामाण्यदूषणादिकं· व्याप्तिनिश्चये सति व्याप्तिनिश्चयत्वं प्रयोजकरूपं तच्छून्यत्वं प

प्रमाणता

ज्ञा॰ श्रा
५३

क्षेनास्तीतिस्वरूपासिध्यानुमानाप्रामाण्यंनसाधयितुंशक्यतइतिभावः॥इतिजगदीशतर्कालंकारविरचितानुमितिदीधितिटिप्पणी॥

४१२६

आर्द्रीदृषि दानाद्यारम्भ

श्री ५ को सरकार

टि. अनुमितिलक्षणेति [illegible] पक्षधर्मतां [illegible] व्याप्तिम्. [illegible] टि. मू. [illegible] पक्षः टि. मू.

श्री.
१

श्रीगणेशाय नमः॥ ॥अनुमितिलक्षणेति॥ अनुमितिस्वरूपेत्यर्थः। व्याप्तिज्ञानजन्याया अनुमितेः किमन्यत्कारणमि
ति जिज्ञासयैव पक्षतानिरूपणादिति भावः अत्रानुकूलत्वं जनकजनकतावच्छेदकसाधारणप्रयोजकत्वमात्रं तेन व्या
प्तेरनुमितिहेतुत्वेपि न क्षतिः॥ यत्तु जनकतावच्छेदकत्वमेवात्रानुकूलत्वं व्याप्तिवत्पक्षताया अपि करणव्यापारतया सिद्ध
हेतुभावस्य परामर्शस्य जनकतायामवच्छेदकत्वादिति मतं तंतुच्छं पक्षता न कारणमिति गुरुमतस्याग्रुत्तरग्रंथ
विरोधापत्तेः पक्षधर्मतामिति॥ पक्षे धर्मत्वं यस्या इति व्युत्पत्त्या पक्षतामित्यर्थः पक्षस्य धर्मत्वं धर्मविशेषः पक्षत्वमि
ति वा देवतादिशब्दवद्भवतलः स्वार्थिकत्वात् व्याप्तीतीति॥ न च प्रकृतग्रंथस्वरसंवलितस्यैव पाठस्य धर्त्तुमुचित
त्वाद्व्याप्त्येनेवधारणोक्तमितिवाच्यमप्रयोजकत्वात् व्याप्तिनिरूपणानन्तरमित्येवं मूलपाठमनुसृत्यवात

[illegible] पक्षता [illegible]

रामः
१

द्वि॰ यत्रसाध्यस्य ग्राह्यासन्न [illegible] त्वेन साध्यानुमितौ पक्षतेत्यर्थः तेन न पक्षसाध्य [illegible] संग्रहानानुगमो द्वि

थोपन्यासादिति भावः॥ ननु संदिग्धसाध्यधर्मत्वमिति मूलस्य यदि संदेहविषयीभूतसाध्यवत्त्वमर्थस्तदावि
नष्टवह्न्यादेजलादावनुमितिनस्यात्तत्रादृशसाध्याभावेन पक्षताविरहादत्रः साध्यसंशयस्यैव पक्षतात्वमा
ह्यायत्तेत्यादिना॥ यद्धर्मिकयत्संबंधावच्छिन्नयत्प्रकारकनिश्चयत्वेन यत्संशयं प्रति निवर्तकत्वं स संदेहस्त
त्पक्षकतद्विधेयकानुमितौ हेतुभूता पक्षतेत्यर्थः तेन वह्निधर्मिकघटादिनिर्णयात्मकस्य पर्वतधर्मिकवह्नि
मत्त्वनिश्चयस्यानिवर्तनीयोपि वस्यो घटादिसंदेहेन पर्वतपक्षकवह्न्यनुमितौ पक्षतानत्रवह्निमत्त्वनिश्चय
त्वेनाप्रतिबंधकत्वादिति भावः अत्र निश्चयत्वावच्छिन्नत्वं वा निश्चयत्वव्यापकत्वेन तुल्यत्वरूपसमत्वत्वरूपं ते
नप्रमेयवह्निसाध्यके प्रमेयवह्निमानवह्न्यभाववानवाइत्यादिसंग्रहः॥ अत्र पक्षधर्मिकसाध्यवत्तानिश्च

यनिवर्त्तनीयत्वमात्रं बाधनिश्चयेऽनित्यात्वमतः संशयपदं न च बाधनिश्चयस्य पक्षतात्वेन क्षतिः विशिष्टबुद्धिसा
मान्यं प्रत्येव बाधनिश्चयस्य विरोधित्वादेवं तत्रानुमित्यसंभवादिति वाच्यं संदिग्धाप्रामाण्यकबाधनिश्चयस
त्वेऽसिद्ध्यात्मकादपि परामर्शादनुमित्यापत्तेः तादृशबाधनिश्चयस्य विशिष्टबुद्ध्यप्रतिबंधकत्वात् । यद्यपि निर्व
ह्निः पर्वतो नूपवान्न वेत्यादिसंदेहात्मकस्य बाधनिश्चयस्य पर्वतधर्मिकवह्निमत्तानिश्चयनिवर्त्यत्वं संशयत्वं
वान्नीति वह्निसाध्यकपक्षतालक्षणस्य तत्रातिव्याप्तिः पक्षे साध्यसंशयत्वोक्तौ च नानुगमवानपि तथापि संश
यत्वमत्र तादृशनिश्चयाप्रतिबंधकत्वं तथा च पक्षधर्मिकसाध्यवत्तानिश्चयनिवर्त्यत्वे सति तादृशनिश्चयप्रतिबं
धकतावच्छेदकविषयिताशून्यज्ञानत्वं फलितार्थः तेन गृहीताप्रामाण्यकबाधनिश्चयस्य पक्षधर्मिकसाध्य·

वत्त्वज्ञाननिवर्तकत्वाभावेपि तन्निवर्तकतावच्छेदकविषयिताकत्वादेव व्युदासः॥ यद्यपि चैवमपि वह्निव्याप्यसाध्यका
उमितौ वह्निमान्न वेति संशयः पक्षता स्यात्॥ तस्यापि पृक्षधर्मिकवह्निव्याप्यवत्त्वद्रूपताव्यानिर्णयनिवर्त्यत्वात्ताद्
शनिश्चयाप्रतिवध्यकत्वाच्च न वेष्टापत्तिः पर्वतो वह्निमान्न वेति संशयोत्तरं पर्वतो वह्निव्याप्यवानित्येवं साध्यनिर्ण
येपि वह्निव्याप्यसाध्यकानुमित्यापत्तेः॥ तथापि प्रकृतपक्षविषयितावह्निर्भूतसाध्यविषयिताघटितधर्मावच्छि
न्नं प्रकृतपक्षधर्मिकप्रकृतसाध्यवत्तानिश्चयनिवर्त्यत्वं तन्निवेशितमित्यदोषः पर्वतो वह्निमान्न वेति संशयस्य च व
ह्निव्याप्यवत्तानिश्चयनिवर्त्यत्वेपि तादृशानिवर्त्यतायाः पर्वतधर्मिकवह्न्यभावप्रकारत्वेनैवावच्छेद्यतया वह्निव्या
प्यवत्त्वद्रूपसाध्यवत्त्वविषयितानवच्छेद्यत्वात्· न च तथापि वह्निर्भूतान्तदलं व्यर्थमिति वाच्यं· वह्निव्याप्यवत्त्वधर्मा

श्री·
३

पर्वतो वह्निमान्नवेति संशयस्य तादृशपर्वतत्वावच्छिन्नपक्षकवह्निव्याप्यसाध्यकानुमितौ पक्षतानवगुणसकत्वात्।व
क्तनत्कपक्षविषयितावह्निर्भूर्नेनाद्यपदायसाध्याभावत्वावच्छिन्नप्रकारित्वसाध्यविशेष्यकत्वान्यतरावच्छिन्नमे
वसाध्यनिश्चयनिवर्त्तत्वं वाच्यं तेन वह्नौ पक्षे वह्नेः साध्यतायां वह्निर्वह्निमान्नवेति संशयस्य पक्षविषयितावह्निर्भा
वेलसाध्यविषयिताप्रसिद्धावपि न तन्त्राव्याप्तिः॥ नन्वेवं हृदो वह्न्यभाववेत्यनुमाने हृदो वह्निमान्नवेति संशयः पक्षतान
स्यात्॥ न तन्निष्ठायासाध्यवत्तानिश्चयप्रतिबन्धकतायावह्निमत्ताविषयकत्वेनैवावच्छिन्नतया साध्याभावत्वावच्छिन्न
प्रकारित्वानवच्छेदकत्वमिति वाच्यमिष्टत्वात्॥ हृदो वह्न्यभाववान्नवेत्याकारकसंशयस्यैव पक्षतात्वात् साध्यपक्षे
भेदेन पक्षतायां नानात्वाच्चाप्यवत्तासाध्यपक्षतालक्षणे एव साध्यविषयित्वघटितधर्मावच्छिन्नतन्निवेश्यतया

रामः
३

प्रवेशपत्वादिति वस्तुतु वह्निव्याप्ये वह्निव्याप्यस्य साध्यतायां वह्निव्याप्यो वान्नवेति संशयस्य पक्षतात्वाहान्यापत्तेः तादृशनिष्ठा यातादृशपक्षधर्मिकतादृशसाध्यवत्तानिश्चयनिवर्त्यतायाः पक्षोभूतसाध्यविशेष्यकत्वावच्छेद्यत्वादिति ध्येयम्॥ केचित्तु संशयत्वमत्र प्रकृतपक्षविषयितानिरूपितप्रकृतसाध्यनिष्ठविषयिताकत्वमतो वह्निव्याप्यसाध्यकानुमितौ वह्निमत्त्वसंशयस्यानि वह्नित्वसाध्यकानुमितौ महानसियवह्निमत्त्वसंशयस्य न पक्षतात्वं तस्य तादृशसाध्यपक्षोभयवैशिष्ट्यावगाहित्वाभावात्॥ एवं च पक्षधर्मिकसाध्यवत्तानिश्चयस्यापि तादृशत्वात्तद्वारणाय निवर्त्यत्वमित्यानुक्तं न साध्यं पक्षवृत्ति न वा साध्यं पक्षनिष्ठाभावप्रतियोगि न वेत्यादिसंदेहस्यापि लक्ष्यतया तत्राव्याप्तत्वात्॥ तेषां पक्षसाध्योभयवैशिष्ट्यानवगाहित्वात्॥ पर्वतो वह्निव्याप्यवानित्येवं साध्यनिश्चयनिवर्तनी

श्री
४

यस्य पर्वतो निर्वह्निर्वह्निव्याप्यवांश्च पर्वतो वान्न वेति समूहालंबनस्य वह्निव्याप्यसाध्यकानुमितौ पक्षतात्वप्रसंगाच्च· न
स्यापि वह्निव्याप्यात्मकसाध्यपक्षोभयवैशिष्ट्यावगाहित्वात्·। आधेयत्वसंबंधावच्छिन्नसाध्यविषयितायाः प्रवेशे
तु पक्षस्साध्यवान्न वेत्यादिसंशयस्यासंग्रहापत्तेरित्यादिक्॥ यत्तु साध्यवत्तानिश्चयनिवर्त्तसंशयत्वमित्यत्र सं
शयत्वं साध्याभावनिश्चयनिवर्त्तत्वरूपं सर्वत्र ग्राह्यमतो नोक्तदोषाणामवकाश इति तन्न तत्पर्वतत्वावच्छेदेन
वह्नेः साध्यतास्थले वह्न्यभाववत्पर्वतासत्त्वे वह्निमत्पर्वतोऽयं न वेति संशयस्य पक्षतानापत्तेः॥ तादृशसंश
यस्य पर्वतत्वावच्छेदेन वह्निनिश्चयस्य तदवच्छेदेन वह्न्यभावनिश्चयस्यापि प्रतिवन्धकत्वादिति दिक्। इदन्तु वि
भाव्यते·। अन्यत्रास्तु·। यथातथापि वह्निव्याप्यवति वह्नेः साध्यतास्थले तद्धर्मिकतादृशनिश्चयप्रतिबंधकस्य संश

राम:
४

द्वि· नवासम्बन्धानारोपसंदेहेऽपिसामानाधिकरण्येन सम्बन्धेन पक्षवृत्ति· नवातमःप्रभृतिषु समवाये नाकाशादि॰ धर्मेतद्दैकल्यात् द्वि·

यस्याप्रसिद्ध्या उक्तलक्षणं नेयं वह्निव्याप्यवान्वह्निमान्नवेत्यादिसंशयस्याहार्यत्वेनाप्रतिबन्ध्यत्वादिति· ननु पक्षधर्मि
कसाध्यसंशयत्वं साध्यधर्मिकपक्षवृत्तित्वसंशयत्वादिकं वा लघुलक्षणकृतः परित्यक्तमत आह तेनेति· यादृश
संशयावगाहित्वस्य फलमाह॥ नवेति॥ मूलस्यस्य साध्यधर्मवत्त्वमित्यस्य परित्यागे वीजमाह॥ नवोतम इत्यादि सं
दिग्धसाध्यधर्मवत्वमिति मूले स्यसंदिग्धसाध्यधर्मत्वं यस्येति व्युत्पत्तिसापद्धतित्वं साध्ये संदिग्धमिति यावत्॥
किंवा संदिग्धः साध्यधर्मो यत्रेति व्युत्पत्त्या यथाश्रुतार्थः॥ तत्र प्रथमे पक्षीभूततमःसमवेतस्य द्वितीये वधर्मात्मे
कगगनसाध्यस्याप्रसिद्ध्या इदमपि लक्षणं दुष्टमित्याशयेन तमसः पक्षतया गगनस्य साध्यतयोद्देश्यत्वः अत्र
वमते पक्षसाध्यवत्तासंशयोत्तरं निश्चयात्मकपरामर्शादप्यनुमितिभवत्येवेति बोध्यम्॥ नवोक्तलक्षणस्यसा

श्री·
५

प्यसंशयमात्रपरत्वेग्निमत्त्वेतस्यविशेषणत्वादितिकल्पस्यासंगतिः॥ननुविशेषलक्षणोपलक्षणपदयोःसाक्षा
त्परंपरकारणपरत्वात्तत्संदिग्धसाध्यंयत्रतत्कर्मत्वंनतत्त्वंद्वित्वमितिउसमालब्धंस्वविशेष्यकसाध्यसंशयसंव
धित्वरूपंयथाश्रुतार्थमादायैवविशेषणत्वोपलक्षणत्वयोरत्रविकल्पइत्यपास्तः·नद्वैकल्यम्·पक्षतावैकल्य
म्॥ननुयोग्यतायाश्चनिरूपणादितिग्रंथेनाग्रेनुमितापाइवसंशयस्यापियोग्यतायानिरस्यत्वेनुमितिविन
त्वात्·।तन्निरसनामूलस्यानूनत्वमतआह·।संशयेति·सिद्धिबाधयोर्जनकस्याप्रतिज्ञानमनोयोगादेस्त
वत्त्वेवानुमिते·पूर्वसत्वाद्यावश्यक·साधकेत्यादि·।तथाचसाधकेनबाधकेनजनितंयन्मानमितिमूलेन्वयः·नतुप
क्षधर्मिकसाध्याभावनिश्चयात्मनोबाधस्यकेवलान्वयिन्यप्रसिद्धिरतआह॥केवलान्वयिनिवह्निपर्वतोनवा

रामः
५

यत्नवानित्याकारकः पतनाभावेप्रतियोगितासंबंधेन वा यत्नाद्यवगाह्यपि बाधः एवं उक्ताप्रक्षिप्यानत्र संभवतीत्यावेद
यितुं फलमइत्युक्तं। नवैवं नानाविधानां बाधबुद्धीनामनुगमासंभवः॥ प्रातिस्विकरूपेणैषां निवेशेनाप्यभाव
द्वयमिति फलासंगतिर्बाधाभावस्यानेकत्वादिति वाच्यं। पक्षधर्मिकसाध्यवत्ताज्ञानाविरोधिनिर्णयत्वेनतासाम
नुगमादिति भावः फलेप्रत्यक्षपरिकल्पितमिति: प्रत्यक्षपरिकलितत्वविशिष्टविषयकोनुमानजन्योबोधस्तदिह्यावं
न इत्यर्थः॥ तेनोपजातप्रत्यक्षविषयत्वदशायामेवानुमितिविषयत्वलाभात्तद्वचनयोर्विरोधस्यासंगतिरितिध्ये
यं॥ नचापीति· अनुमित्सानाशास्थलेपिउनरिति· उत्पन्नपरामर्शानन्तरमित्यर्थः। ननूत्पन्नरनुमित्सार्थमनुमिति
ष्टसाधनताज्ञानस्य पूर्वमपेक्षणात्तेनैवप्राक्तनपरामर्शनाशान्नतस्य चानुमितिस्यादत आह॥ ततः परामर्शात्

श्री·
५

रमिति। ततोनुमितिरित्यग्रेन्वयः॥ इष्टसाधनताज्ञानपरामर्शयोः पृथक्कल्पने गौरवादाह॥ स्मरणात्मकेति· विशि
ष्टानुभवं प्रत्येव विशेषणज्ञानस्य साक्षाद्धेतुतया तादृशविशिष्टपरामर्शार्थं विशेषणज्ञानकल्पने गौरवमपि नास्ती
त्यावेदयितुं स्मरणात्मकत्वमुक्तं· नवोक्तपरामर्शानंतरमनुमित्सादशायामनुमितिप्रसंगः सामग्रीसत्वादिति वा
च्यं सिषाधयिषानूपायाः पक्षतायाः प्रागसत्वादि[illegible]सामग्र्या एव प्रतिबंधकत्वाच्चेति भावः। कल्पनीयमिति· न
नैतावतापि प्रत्यक्षादिभिन्नं वह्निज्ञानं जायतां वह्न्यनुमितिजायतामित्यादिरूपाणामनुमित्साव्यक्तीनामनुगतरूप
विरहात्कारणत्वासंभवादिति वाच्यं· यद्यनुमित्सासत्वएव यत्पक्षकयत्साध्यकानुमितिनियमस्तदनुमित्साविरहकूटत्वावच्छि
न्नाभावत्वेनैव तत्पक्षकतत्साध्यकानुमितावनुमित्साया हेतुत्वसंभवादिति भावः· यत्तु यत्पक्षकयत्साध्यकानुमिति

रामः
५

निवर्त्ताऽनुमित्सात्वेनैव तत्पक्षकतत्साध्यकानुमितौ हेतुत्वमिति तत्तत्तादृशानुमितित्वावच्छिन्नप्रतिबंधकतानिरूपि
तघटितवन्ह्यत्वस्योक्तावशाब्दज्ञानंजायतामितिसाकारानुमित्साया असंग्रहापत्तेः तस्या मशाब्दज्ञानत्वेन प्रतिबंधक
तात्वक्तत पक्षसाध्यकानुमितित्वनिष्ठप्रतिबंधकतामात्रस्योक्तौ च समूहालंबनतादृशानुमितिप्रतिबध्यतामा
दायघटपटानुमित्सायामतिप्रतिबध्यतामादायघटपटानुमित्सायामतिव्याप्त्यापत्तेरितिध्येयम्· मिश्रमतमाशं
कातिविषयितानचेति· वास्तु सिसन्वयः अनुमितिजनकेति· ननुरूपीयतत्पक्षकतत्साध्यकानुमितौ तादृशानु
मितिजनकेऽस्त्वेव पक्षतेत्यर्थः विषयितयाधात्वर्थान्वयिन एव सन्नेः समानकर्तृत्वस्यतंत्रत्वादिति भावः एल
भेति· तथा च घनगर्जितानुमितौ न व्यभिचारः इति भावः तस्या ईश्वरेच्छायाः तदानीं सिद्धिदशायां न तज्जनक

श्री
७

त्वे॰ तादृशानुमितिजनकत्वं तद्भिन्नादृशानुमितिजनकत्वं यन्नपायात्· स्वरूपतः सत्त्वात्। न च तत्पुरुषीयतादृशानुमि
तिं प्रति तत्पुरुषीयतादृशानुमित्यव्यवहितप्राक्क्षणावच्छिन्नत्वविशिष्टेच्छात्वेन हेतुत्वे तदानीं स्वरूपयोग्यत्वमेव
नास्तीति वाच्यं· कार्याव्यवहितपूर्ववर्तित्वादिना हेतुत्वस्याग्रे सार्वभौमनिरुक्तौ निरस्तत्वादिति भावः· तदुपधानतादृ
शानुमितिविशिष्टत्वं तदभावादिति· तथा च सत्यामपि सिषावत्त्वमिति तस्यास्तत्पुरुषैकानुमित्यनन्तरमेवानुमित्यं
तरं स्यादिति भावः। तत्सामग्रीति तत्पुरुषीयतत्पक्षकतत्साध्यकानुमितिसामग्रीविशिष्टत्वमेव तादृशानुमितिज
नकत्वमित्यर्थः प्रसंगादिति· तथा च परामर्शादिकं हेतुर्न स्यात्· ।। अवच्छेदकत्वादिति भावः· तत्सामग्रीति तत्पुरुषी
यतत्पक्षकतत्साध्यकानुमितिसामग्रीविशिष्टत्वमेव तादृशानुमितिजनकत्वमित्यर्थः प्रसंगादिति· तथा च परा

रामः
७

मण्यादिकं हेतुर्न स्यात् अवच्छेदकत्वादिति भावः इष्टापत्तौ बाधकमाह होषेति· तादृशानुमितिसामग्रीविशिष्टत्वेनैव
हेतुत्वसंभवादिच्छाभागस्य वैयर्थ्यादित्यर्थः। नवात्र सामग्रीपदेनैतत्कारणस्तोम एव धर्त्तव्यस्तथाचासिद्धि
कालीनपरामर्शस्यापि तादृशस्तोमविशिष्टत्वादिति नतोऽनुमितिवारणार्थमेवेच्छाभागः प्रवेशनीयः इतिवा
च्यं सिद्धिदशायामित्यस्य स्यानुमितिकारणस्तोमस्यासत्वात् अन्यथा तादृशस्तोमविशिष्टाया भगवदिच्छा
तदानीमपि सत्वादिच्छानिवेशोपि न चानुमितेऽवारतापत्ते घनेगर्जितानुरोधेन तादृशेच्छायाः सामानाधि
करणप्रत्यासत्या हेतुत्वासंभवादिति भावः॥ नन्वीच्छाभागो नदेय तादृशानुमितिसामग्रीविशिष्टत्वेनैव हेतु
त्ववाच्यं नचैवानुमित्सायाः सर्वत्र हेतुत्वसंभवादित्यत आह॥ तदानीमिति सिद्धिदशायां यत्कारणाभावप्रयु

श्री·
८

कः सामग्रीविरहः तत्कारणस्येत्यर्थः। वह्न्यभावादित्यादि तथा चावश्यकत्वात्सैव पक्षतेति भावः। ननु क्रमोत्पन्नानां सिद्धि
च्छापरामर्शानां युगपदसत्वात्सहकृतांन दलं अर्थमत आह॥ यद्वेति। पक्षस्मरणमिति। तदनंतरं वानुमितिरित्यग्रे
त्वयविशिष्टानुभवं प्रत्येव विशेषणज्ञानस्य हेतुत्वात्तदपेक्षागौरवं नास्तीत्याशयेन स्मरणपर्यन्तानुधावनं। अ
थानुमित्यर्थमनुमितिस्वसाधनज्ञानानन्तरैकल्पयतोलाघवादाह अनुमितिमात्रादि। तादृशस्मरणादिति। साध्य
तद्व्याप्यविशिष्टपक्षस्मरणादित्यर्थः॥ अनुमित्सेति॥ तदनंतरं वानुमितिरित्यग्रेणान्वयः। स्मृत्यात्मकसिद्धौ सह
कृतानां विशेषणस्य प्रयोजनं तत्वाऽनुभवात्मकसिद्धौ तदाह। पूर्वकालेत्यादिना ज्ञानेच्छयोरयौगपद्यादनुमित्सा
जन्यक्षणे विशेषणस्मरणस्यासंभवादुत्तरक्षणे तत्स्मरणे तु परामर्शदशायामनुमित्सानाशात्तत्र पक्षतैव नोपे

रामः
८

यत इत्यत उक्तं· पूर्वकालोत्पन्नेति अनुमित्याः पूर्वकालोत्पन्नेत्यर्थः अनुमित्या या पूर्वपक्षे सन्निकर्षे अनुमित्यामवश्यं यवस्थादिसाधकतद्व्याप्यवत्त्वेन पर्वतादेः प्रत्यक्षमेव स्याद्बहिरर्थलौकिकप्रत्यक्षसामग्र्याः सर्वतो बलवत्वादनुमित्यानन्तरं सन्निकर्षेव परामर्शदशायां नानुमित्यापाः सत्त्वमत उक्तमनुमित्याकालेति॥ इदमुपलक्षणं यत्रानुमितिस्साधनताविषयकरणास्मासापात तद्व्याप्यविशिष्टस्य प्रत्यक्षानंतरमनुमित्या न चापि पक्षतासंपत्त्यर्थं सहकृतानवोधं· पक्षतासंपत्त्य इति· नवानुमित्यादशायामपि यदवच्छेदेन तदभावस्यात्मनि सत्वात्पक्षताभंगप्रसंगः देशानवच्छिन्नविशेषणतयैव सामानाधिकरण्यरूपस्यानुमित्याविरहवैशिष्ट्यस्योक्तत्वादिति· ननु सिद्धिगोचरेच्छामात्रस्य सिषाधयिषात्वेऽव्यत्वेनऽप्रज्ञानेजायतामितीच्छायामपि सिद्ध्यात्मकपरामर्शादनुमितिः स्यादत आह· सिषाधयिषेति· तत्सा

येति· प्रकृतसाध्यविधेयतानिरूपितप्रकृतपक्षविषयताकत्वप्रकारिकेत्यर्थः तेन वह्निविशिष्टहृदाद्यप्रसिद्धा
वपि· हृदो वह्निमानित्याद्यनुमितौ न पक्षताहानिः नवा पाषाणमयत्वेन पर्वते तेजस्त्वेन वह्न्यनुमितिर्जायतामि
तिच्छायामपि सिद्धिदशायां पर्वतो वह्निमानित्यनुमितितदिच्छायाः पर्वतत्वावच्छिन्नविशेष्यतानिरूपितव
ह्नित्वावच्छिन्नविधेयताऽनवगाहित्वादिति भावः वह्निमत्त्वेन पर्वतस्य पक्षत्वं जायतामितिच्छावारणार्थमाह॥ अ
नुमितिविषयीणीति· यत्किंचिदिति· इष्यत्वेनेष्यगोचरज्ञानं जायतामितीच्छायामपि वह्नेः। सिद्ध्यात्मकपरामर्शा
दनुमित्यनुत्पादादित्यर्थः· तेन ज्ञानं जायतामितिच्छोत्तरं सिद्ध्यादेव वह्निमाणत्वविषयसिद्ध्युपहितत्वविशेष
णादेव तदिच्छावारणं सिद्ध्युत्तरं च तादृशेच्छा न भवत्येव ज्ञानमात्रस्यैव ज्ञानत्वप्रकारिकेच्छाविरोधित्वादिति प्र

युक्तं· नन्वनुमितिविषयत्वेनानुमित्साव्यक्तीनां प्रवेशे गौरवादनुमितित्वप्रकारिकेच्छैव प्रवेश्यतामत आह· अनुमिति
त्वेति सिद्ध्यात्मकपरामर्शोत्तरं पर्वते वह्निज्ञानं जायतामितीच्छैव तत्रोत्पद्यते· सिद्धिविरोधित्वात्सिद्ध्यात्मकपरामर्श
पूर्वकालीनत्वात्तादृशेच्छाया नानुमितावुपयोगः स्वविषयसिद्ध्युपहितत्वाभावादतः प्रत्यक्षाद्यतिरिक्त
मित्युक्तं· अनुमित्सायाद्येति· तथा च व्यभिचाराल्लाघवमकिंचित्करमिति भावः मनु यत्र वह्निमत्वेन पर्वतस्य प्रत्यक्षं
जायतामितीच्छैव प्रत्यक्षत्वेनानुमितिमवगाह्य प्रवृत्तां न त्वापि सिद्धौ सत्यामनुमित्यापत्तिः· किंच प्रकृतसाध्यविधेयतानि
रूपितप्रकृतपक्षविषयताकत्वप्रकारकेच्छाया एवोत्तेजकत्वे वह्निभिन्नान्यविधेयकानुमितिजायमानं प्रत्यक्षा
दिभिन्नं वह्निविधेयकं ज्ञानं जायतामितीच्छायामपि सिद्ध्यात्मकपरामर्शादनुमितिर्न स्यात्। तथा च तादृशताद

श्री.
१०

शेषानामप्युत्तेजकत्वं वा व्यभिमननुगम इत्यत आह ॥ यादृशेति । भिन्नसमानकालीनानामनुमितिप्राक्क्षणाव
यवस्थायिमितिप्रायविषयाणामुत्तेजकविषयापक्षतायांप्रवेशोऽव्यर्थः कारणतावच्छेदकगौरवात् पादकस्यस्यादत
क्तिदौसमामितिक्रम· अत्रैककालानुमित्साव्यक्तिनामननुगतत्वपेक्षोत्तेजकत्वलाभार्थं यादृशयादृशेत्थं क्रममिति पां
वः । वस्तुतो यद्यदिच्छाव्यक्तिसत्त्व इत्येववक्तव्यं अन्यथा यत्रसिद्ध्यात्मको वह्निमात्रपरामर्शस्तत्रानुमितिजायमानामि
तिच्छायामपि वह्न्यनुमित्सासत्त्वमिति त्वत्प्रकारकेच्छात्वेनाप्युत्तेजकतया यत्रसिद्ध्यात्मको वह्निपरामर्शो वह्नि
मान्लकडव्यत्वादिसाध्यकः परामर्शस्तत्रानुमितिजायमानामिच्छादशायां वह्न्यनुमित्यापत्ते· एवं पर्वतमात्रप
क्षकसिद्ध्यात्मकः न चापि वह्न्यनुमितिच्छायां पर्वते वह्न्यनुमितिलक्षण वह्न्यनुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वे

राम:
१०

यत्र पर्वते महानसे च वह्निव्याप्यवत्त्वपरामर्श एव पर्वते सिध्यात्मकः॥ तत्रापि चानुमितिर्जायतामित्याकारकेच्छा
यां पर्वते चानुमित्यापत्तेः न चेष्टापत्तिस्तु भवद्विरोधात् प्रकारान्तरेणाविषयपर्य्यवसानसंभवेनानुमित्सा नाम
वगतार्थगोचरज्ञानानर्जकत्वादस्माकं तु ममहालंच नस्पाली पतते व्याप्तिनानुतेजककोणचप्रविष्टत्वाच्च दोष
इति· परं तु तत्पक्षकतल्लिङ्गकानुमितित्वावच्छिन्नं प्रत्येव पक्षितायाः कारणत्वमिति कल्पे तल्लिङ्गकतत्पक्षकतत्सा
ध्यकानुमितिप्रकारिकेच्छात्वावच्छिन्नाभावोनुगतरूपेणैव पक्षतायां लाघवान्निवेशनीयो न तु तत्तदिच्छाव्यक्तिना
मभावसमुदाय इत्याशयेनैव यादृशेच्छेत्युक्तमिति ध्येयं इच्छाभावसमुदायस्येति· ॥इदं तु पक्षतां सिद्धिधर्मि
कयत्रद्धामासप्ज्ञानमनन्तरं सिद्धिदशायामनुमितिस्तत्र द्धामासप्ज्ञानाभावसमुदायस्यापि निविष्टो विशेषणत्वं वा

ध्यान स्वभिन्नधेरनुमितिं प्रत्ये· षाभासज्ञानान्कं दिनायाक्षिद्धेरप्रतिबंधकत्वमुक्तन क्षतिरिति यद्यप्येवमपि न त
दिच्छाविरहव्यक्तीनां विशेष्यविशेषणाभावे विनिगमनाविरहेणानंतकार्यकारणभावः नवैकेच्छाविरहविशिष्टे·
यापरेच्छाविरहस्तद्विशिष्टसिद्धित्वेन प्रति।बंधकत्वे सामानाधिकरण्यात्मकवैशिष्ट्यस्य द्विधा प्रवेशे गौरवम तथा
वतिनामिच्छाविरहव्यक्तीनामेकत्र द्वयमिति शिष्टाऽयुगपदेवसिद्धिविशेषणत्वं लाघवादिति वाच्यं सिद्धेर्नावदि
च्छाविरहवैशिष्ट्यमपिसिद्धं से प्रत्येकं तत्तदभावसामानाधिकरण्यस्य वैशिष्ट्यविधया प्रवेशात्सिद्धेर्नावदभाव
वैशिष्ट्यस्यैव तत्तदेकाभावे पराभाववैशिष्ट्यप्रवेशे गौरवानवकाशात्॥ तथापि सिद्धौ तत्तदभावानां युगपद्वि
शेषणत्ववैशिष्ट्यस्य तद्रूपसामानाधिकरण्ये तु त्रित्वांशस्य सकृदेव प्रवेशाऽऽत्र घटवत्प्रत्येकाभावेऽभावान्तरवैशि

स्य स्य संबंधत्वेतु वैशिष्ट्यघटकवह्नित्वस्य बहुशः प्रवेशे गौरवमतोऽनुगमपदेवतावती नाम भावव्यक्तीनां सिद्धिविशे
षणत्वमुक्तम्· किं च क्षितौ तावदभावस्यानुगमपक्षे विशेषणत्वे विशेषणतासंबंधावच्छिन्नाधिकरणासमवेत
त्वमेवानुगतसंबंधनवत्वेकाभावेः पराभाववैशिष्ट्यविशेषणाना विशेषावच्छिन्नाधिकरणो विशेषणतया वृत्ति
त्वं क्षितांवभातथै वैशिष्ट्यं तु विशेषणाना विशेषावच्छिन्नाधिकरणोसमवेतत्वतुमित्यनुगतवैशिष्ट्यासंभवात्·
[illegible]वानैकाभावविशिष्टापराभावविशिष्टापराभावविशिष्टसिद्धित्वेन प्रतिबंधकत्वं· किं तु तावदभावविशिष्ट
सिद्धित्वेनैवेति दिक् स्वतंत्रास्तु तत्त्वादिछाविरहकूटविशिष्टसिद्धित्वावच्छिन्नाभावस्याखंडस्य तत्तद्व्यक्तित्वे
नैव हेतुत्वं तत्तद्व्यक्तित्वं वा नाशास्येन सेव व्यक्तिरित्यदोषः· चिंतामणिकृन्मते विशिष्टाभावस्यातिरिक्त

श्री.
१२

त्वात्॥ न च कारणतामात्रस्य धर्मावच्छेद्यत्वे मानाभावादेवावच्छेदकविनैव नाद्याक्षिग्रभावस्यानुमितिकारणत्वमि
ति प्रलापो ग्राह्यः व्यापकतागर्भायाः कारणताया अवच्छेदकस्य नानाव्यक्तिस्थल इवैकव्यक्तिस्थलेपि संभवेन वा
रयितुमशक्यत्वात्॥ पदार्थान्तररूपायाः कारणताया अवच्छेदकस्य नानाधिकरणेष्वपि परित्यागप्रसंगा
दित्याद्युक्तविस्मृतः। केचित्तु पक्षधर्मिकसाध्यविधेयकानुमितित्वप्रकारिकेच्छात्वेनैवानुगतरूपेणोत्तेजकताला
घवात्॥ इत्थं तत्र स्थले च तादृशेच्छोपस्थैवानुमितिस्तथैव कारणीभूतस्य विशिष्टाभावस्य सत्वेनेत्याहुः। आ
लोकपरामर्शादीति। आलोकमात्रपरामर्शादित्यर्थः॥ तदन्येति। धूमेनालोकेन च पर्वते वह्न्यनुमितिर्जायतामि
तीच्छायांसत्यामपि धूमलिंगकानुमितिरित्यर्थमात्रपदं॥ तथा च धूमलिंगकानुमित्साविरहविशिष्टैवालोकलिंगकानुमित्सा

राम:
१२

विरहविशिष्टेच्छात्वेनालोकलिंगकानुमित्या धूमलिंगकानुमितौ प्रतिबंधकेत्यर्थः। अत्र यद्यपि धूमलिंगकानुमितित्वप्र-
कारिकेच्छात्वेनैवोत्तेजकत्वे धूमेनद्रव्यत्वस्यालोकेन वह्नेः पर्वतेनुमितिर्जायतामितीच्छायामपि वह्निव्याप्य-
धूममात्रपरामर्शाद्धूमलिंगकानुमित्यापत्तेः धूमलिंगकवह्निमितित्वप्रकारीच्छात्वेन तथात्वे तु धूमेन महानसा-
दावलोकेन च पर्वते वह्न्यनुमितिर्जायतामितीच्छायामपि धूममात्रपरामर्शात्पर्वते वह्न्यनुमित्यापत्तेः न च पर्वत-
पक्षकधूमलिंगकवह्न्यनुमितौ तादृशानुमितित्वप्रकारिकेच्छाविरहविशिष्टालोकलिंगकेच्छात्वेनैव प्रतिबंधकत्वं
धूमेनालोकेन वानुमितिर्जायतामितीच्छायामपि धूममात्रस्य परामर्शाद्धूमलिंगकानुमित्यभावापत्तेस्तदिच्छाया
पर्वतपक्षकवह्न्यनुमितित्वप्रकारकत्वाभावात्। तथापि यद्यदिच्छायोक्तिदशायामालोकलिंगकानुमितिच्छा

श्री॰ व्यक्तिसत्वेपि पर्वतनधर्मिकधूमलिंगकवह्न्यनुमितिप्रामाणिकोऽन्नादिच्छाविरहाक्रान्तविशिष्टालोकलिंगकानुमितित्वप्र
१३ कारिकेज्ञात्वेनैवनाऽशधूमलिंगकानुमितिप्रतिबंधकत्वेवाच्यमतएवालोकलिंगकासमीपाधूमलिंगकापर्वते
वह्न्यनुमितिःसाजायतामितिच्छासत्वेपर्वतनधर्मिकधूममात्रपरामर्शान्नवह्न्यनुमितितदिच्छाव्यक्तेरुत्तेजकानंतर्ग
तत्वात्।।नचयत्रधूममात्रपरामर्शान्तरंधूमालोकोभयलिंगकानुमितिर्जायतामितिच्छातत्रसउभयलिंगक
परामर्शोत्पत्तानुमितिस्तत्रनउभयलिंगकापरामर्शोत्पत्तिक्षणोद्धूमलिंगकानुमितिप्रतिबंधकत्वंवाच्यमत रामः
एवालोकलिंगकासमीयाधूमलिंगेमिति·स्यादितिमानमित्यनुरोधेनतदिच्छाव्यक्तेरुत्तेजकत्वादितिवाच्यंतत्र १३
समूहालंबनपरामर्शोव्यक्तिविशिष्टतत्तदिच्छाव्यक्तित्वेनैवोत्तेजककोणेनिवेशपत्वात्।।इथंवालोकेनमह

नसेवह्न्यनुमितिर्जायतामितीच्छासत्वेपिधूमपरामर्शात्पर्वतेवह्न्यनुमितिरुत्पद्यतएवतदिच्छाव्यक्तेरपित्वन्मतउत्ते
जकत्वात्॥अतएवालोकेनवह्न्यनुमितिर्जायतामितीच्छोत्तरंधूमालोकयोःसमूहालंबनपरामर्शात्पर्वतेवह्न्य
नुमितिर्नेष्यातस्यापिधूमपरामर्शाव्यवहितोत्तरत्वेनधूमलिंगकानुमितित्वात्तादृशानुमितिविरोध्यालोकलिंगका
नुमित्सायाःसत्वादितिपरास्तम्।तदिच्छाव्यक्तेरुक्तेरुत्तेजकत्वान्नतद्धूमलिंगकत्वप्रकारकेच्छात्वेनोत्तेज
कत्वासंभवस्यानुपदमुक्तत्वात्।यत्तुपर्वतधर्मिकवह्न्यनुमितिसामान्यप्रत्यालोकादिलिंगकपरामर्शाभावविशि
ष्टालोकादिमात्रलिंगकानुमित्सात्वेनप्रतिबंधकत्वंवाच्यं।नतुधूमादितत्तल्लिंगकानुमितित्वावच्छिन्नप्रति
तदन्यलिंगकानुमित्सात्वेनप्रतिबंधकत्वंबाध्यतावच्छेदकगौरवापत्तेस्तथाचोक्तस्थलेआलोकलिंगकपरामर्श

मत्वेनतल्लिंगकानुमित्वानानुमितिप्रतिबंधिकानवमात्रपदवैयर्थ्यं धूमपरामर्शोत्तरमालोकेन धूमेन वा यद्वह्न्यनुमि
तिर्जायतामितीच्छादशायामनुमित्सपंत्तरुपादानादितिचेत्तत्र धूमपरामर्शोत्तरदशायामालोकेन भस्मना वा वह्न्यनु
मितिजायतामितीच्छासत्त्वेप्यनुमितिप्रसंगात् आलोकपरामर्शाभावविशिष्टाया अपि तादृशेच्छाया आलोकलिं
गकत्वमात्राप्रकारकत्वात्. । न चालोकलिंगकपरामर्शाभावविशिष्टे न धूमलिंगकत्वाप्रकारकालोकलिंगकानुमि
त्सात्वेन पर्वतधर्मिकवह्न्यनुमितित्सामान्यं प्रतिविरोधित्वात्त्रपदोप इति वाच्यं भस्मलिंगकपरामर्शोत्तरमप्यालो
केन धूमेन वा वह्न्यनुमितिजायतामितीच्छासत्त्वे वह्न्यनुमितिप्रसंगात्तादृशेच्छाया धूमलिंगकत्वप्रकारकत्वेनावि
रोधित्वानस्माः तल्लिंगकानुमितिमित्सायात्वावच्छिन्नं प्रतिप्रागुक्तक्रमेणानन्त्रदन्यमात्रलिंगकानुमित्सात्वेन प्र

प्रतिबंधकत्वमेव सम्पादितमिति दिक्। यदि च तत्रेति। अन्यसाधकानुमित्या यद्वान्यलिंगकानुमित्या वा अपि स्वतः प्रतिबं-
धकत्वे मानाभावादिति भावः॥ नैवेति॥ क्षिव्यात्मकालोकपरामर्शोत्तरं धूमेनानुमित्तुयामीति तादशायामनुमितिवारणा-
येत्यर्थः। न चनन्तदनुमितिर्नास्या अपि स्वतः॥ प्रतिबंधकत्वे मानाभावोन्तस्याव्यक्तिनानुत्तेजककोटिप्रवेशादेव न न चानुमिति-
रिति वाच्यं यत्र क्षिव्यात्मकालोकपरामर्शोत्तरं धूमलिंगकानुमित्यानन्तः॥ क्रमेण क्षिव्यात्मकधूमपरामर्शाद्वह्न्यनु-
मितिस्तत्र धूमपरामर्शोत्तरक्षणे वह्न्यनुमित्यापत्तेः पर्वतपक्षकवह्न्यनुमितौ नदीध्राव्यक्तेरनुत्तेजकत्वात्। अन्य-
थात्रैव क्षिव्यात्मकधूमपरामर्शाद्वह्न्यनुमितिर्न स्यादिति भावः॥ यद्यपि वक्ष्यमाणस्वविषयाक्षिव्यानुपहितत्ववि-
शेषणेनैव धूमादिलिंगकत्वपरामर्शविशिष्टायान्नदीद्रावपक्षेरनुत्तेजकतायां न कोपि दोषः तथापि क्रमस्थले धूमम

र्विशिष्टानुमित्याव्यक्तिविरहस्य सहकृतत्वसिद्धिमत्त्वादेवस्मपरामर्शोत्पत्तिदशायामप्यनुमित्यापत्तेरसंभवात्॥ नथापि
मिश्रादिसंमतमेकावच्छेदेन पक्षतापरामर्शोभयजन्यत्वमनुमितेः संपादयितुमनुमितित्वमेवान्यथानिर्वक्तिते लिंगका
नुमितित्वेनेतिवाच्येति परास्तमेव यः। ननु न लिंगकानुमितित्वप्रकारिकैतद्व्यक्तिनामनुमितेर्जनकत्वेवानुमितिर्जायतामितित्व
यां सिद्ध्यात्मकालोकपरामर्शादालोकलिंगकानुमितिर्न स्यात् तदितव्यक्तेरालोकलिंगकत्वाप्रकारकत्वादत आह तदन्य
मात्रेति धूमालोकाभ्यां वह्न्यनुमितिर्जायतामितित्वदशायां सिद्ध्यात्मकालोकपरामर्शादनुमित्यर्थ· मात्रपदेनेथात्व
न लिंगकानुमितित्वाप्रकारकत्वे सति यावद्व्यक्तिविलिंगकानुमितित्वप्रकारिकैतावत्तदितरिकानुमित्सासिषाधयिषा
पदेन वाच्येत्यर्थः तेन तदुभयलिंगकानुमितिस्थले तदन्यालिंगाप्रसिद्धावपि न क्षतिः अत्र तदन्यमात्रलिंगकानुमि

त्वातिरिक्तं न विशेषणतां किंतु नेजकीभूततत्तद्व्यक्तिमां परिचायकमिति मन्तव्यम् न तु तल्लिंगकानुमितित्वावि
रहविशिष्टसिद्धिसत्वेप्यन्यलिंगकानुमितित्वान्यलिंगकपरामर्शोत्तरं प्रकृतपक्षसाध्यानुमितेरुत्पादेन व्य
भिचारात्तु तः पक्षताया अनुमितिहेतुत्वमित्यत आह लिंगेति लिंगविशेषनियंत्रितलिंगविशेषावच्छि
न्नताकार्यताकं तथा च यद्यदनुमितित्वाव्यक्तिसत्वे सिद्धिदशायां तल्लिंगकतत्पक्षकतत्साध्यकानुमितिजा
यते न तद्व्यक्तिविरहविशिष्टसिद्ध्यभाववत्तल्लिंगकतत्साध्यकानुमितित्वावच्छिन्नं प्रत्येव हेतुरतो
न व्यभिचार इति भावः अन्यलिंगकानुमित्यापात्तु लिंगकानुमितौ स्वातंत्र्येण विरोधित्वे पक्षताया लि
गविशेषणानियंत्रितत्वेपि न क्षतिरित्याह न लिंगकानुमित्यादिति सिद्ध्यभावदशायामन्यलिंगकेषा

श्री. सत्वेपि तल्लिंगकानुमितित्वाविशेषविरहकूटविशिष्टेति तल्लिंगकानुमितित्वं तल्लिंगकपरामर्शाव्यवहितो
१८ त्तरानुमितित्वं तथा चालोकलिंगकानुमित्या इत्थं धूमालोकयोर्लिंगात्मकपरामर्शानंतरं पर्वते वह्न्यनु
मितिर्न स्यात्तस्या अपि निरुक्तधूमलिंगकत्वेनालोकलिंगकानुमित्याप्रतिबध्यत्वादतो विशेषपदं तेनवंक्ति
गत्या तल्लिंगकानुमित्या काले तल्लिंगकानुमितित्वं तल्लिंगकपरामर्शाव्यवहितोत्तरानुमितित्वं तथा चालो
कलिंगकानुमित्यात्वेनैव तल्लिंगकानुमितौ प्रतिबंधकत्वमुक्तस्थले चालोकलिंगकानुमित्याव्यक्तेरपि व्यक्ति
गत्या धूमलिंगकानुमितित्वगोचरतया तदिच्छाविरहकूटविशिष्टान्यलिंगकानुमित्यात्वेनैव तल्लिंगकानु राम:
मितौ प्रतिबंधकत्वमुक्तस्थले चालोकलिंगकानुमित्याव्यक्तेरपि व्यक्तिगत्या धूमलिंगकानुमितित्वगोचरतया १८

न्दिग्धव्यभिचारोत्तेजककोटौनिविष्टत्वान्नदोषः विशेषणदासत्त्वपक्षेपि तल्लिंगकानुमितौ प्रतिबंधकत्वमुक्तस्थले
वालोकलिंगकानुमित्याव्यभिचारेपि वह्निगत्वाधूमलिंगकानुमितित्वगोचरतयानदिग्धव्यभिचारोत्तेजककोटौनिवि
ष्टत्वान्नदोष· विशेषणदासत्त्वपक्षेपि तल्लिंगकानुमित्याविरहविशिष्टत्वस्योक्त एवार्थो ग्राह्यः अत्रापि वैशि
ष्ट्यमेकसमयावच्छेदेनैकात्मवृत्तित्वम् तेन पुरुषान्तरीयतल्लिंगकानुमितिच्छामादायात्मलिंगकानुमित्या
दशायां नानुमितेरुत्पादः न च तल्लिंगकानुमित्याभिन्नतदन्यलिंगकानुमित्यैव प्रतिबंधिका तत्तल्लिंगकानु
मित्याविरहविशिष्टत्वप्रवेशे गौरवादिति वाच्यं· यत्र क्षिप्रात्मकापेक्षाबुध्यात्मकधूमपरामर्शान्तरं क्रमेणालो
कलिंगकानुमितित्वप्रकारेण धूमलिंगकानुमितित्वप्रकारेणेच्छाद्वयी तत्र चतुर्थक्षणे धूमलिंगकानुमि

सत्त्वादापत्तेः धूमलिंगकानुमितित्वाभिव्याप्यत्वालोकलिंगकानुमितित्वाव्याप्याः सत्त्वादिति भावः । अन्यलिंगकानुमि
त्वैवेति वाकारेणेत्यस्यायम् पूर्वकल्पोक्तसत्तल्लिंगकानुमितित्वाविरहविशिष्टसिद्ध्यभावत्वेन तल्लिंगकानुमिति
हेतुत्वस्य लाघवेन तदपेक्षया तत्कल्पस्योचितत्वात् तत्पक्षसाध्यकानुमितौ सामान्यतः सिषाधयिषाविरहविशिष्टसि
द्ध्यभावत्वेन कारणतान्तरस्याप्यत्र कल्पे वक्तव्यत्वादन्यथा सिद्ध्यात्मकपरामर्शमात्रादनुमित्यापत्तेस्तादवस्थ्या
दिति ध्येयं । ननु साध्यमानं सिद्धिजनकं मानं तथा च परामर्शमात्रादनुमितिर्न स्यात् तस्यैव तादृशसाधक
मानत्वादतो भावश्च साध्यवत्त्वनिश्चय इति साध्यवत्त्वसंशयेऽप्यनुमितिर्न स्यादिति चेदत्रोक्तम् यद्यपि सा
ध्यवत्त्वनिश्चयत्वं यदि साध्यसामान्याभावाप्रकारकत्वे सति साध्यप्रकारकत्वं तदा पर्वतः कपिलवह्निमानवे

रामः
१७

त्ति संदेहदशायां पर्वतो वह्निमानित्यनुमितिर्न स्यात्तादृशसंदेहस्यापि वह्निसामान्याभावाप्रकारकत्वे सति वह्नि
प्रकारकत्वात् न च येन रूपेण साध्यता तेन रूपावच्छिन्नप्रकारकत्वं निश्चयत्वघटकमतः कपिलवह्नित्वाव
च्छिन्नप्रकारताकसंदेहस्य वह्नित्वमात्रावच्छिन्नप्रकारताकत्वाभावान्न दोष इति वाच्यं पर्वतः कपिलवह्नि
मानिति निश्चयदशायामपि पर्वतो वह्निमानित्यनुमित्यापत्तेस्तादृशनिश्चयस्य वह्नित्वमात्रावच्छिन्नप्रका
रकत्वाभावात् न चेष्टापत्तिरनुभवविरोधात् अत एवागवाक्षितत्वे साध्ये सकलगवाक्षितत्वं न हेतुरवि
शिष्टसाध्यवत्त्वानुमितौ विशिष्टसाध्यवत्त्वानुमितौ विशिष्टसाध्यवत्ताग्रहस्यापि विरोधितया पक्षधर्मताग्र
हदशायां सिद्धसाधनादिति शङ्कितावादे मिश्रैरुक्तं यदिवसाध्यप्रतियोगिकाभावाप्रकारकत्वे सति सा

यप्रकारकत्वमेवसाध्यनिश्चयत्वंनतदाह्रणवह्नित्वावच्छिन्नविधेयकानुमितिंप्रतिवह्निसामान्याभावाप्रकारकव
ह्निमत्त्वावच्छिन्नप्रकारकत्वेनकपिलवत्त्वाभावाप्रकारककपिलवह्नित्वावच्छिन्नप्रकारकत्वादिनाचप्रमेयकधर्मेतो
वत्प्रतिबंधकत्वात् तत्ताश्र्यभावकृत्यस्यैवपक्षतात्वविरोधसाध्यनिश्चयानामनुगतैकधर्माभावात् यत्कृतत्कृ
साध्यतावच्छेदकावच्छिन्नप्रकारतान्यप्रकारत्वानिरूपितप्रकृतपक्षनिष्ठविशेष्यताशालित्वमेवसाध्यनिश्च
यत्वंवाच्यंपर्वतःकपिलवह्निमान्नवेत्यादिसंशयेतुपर्वतनिष्ठविशेष्यत्वंवह्नित्वावच्छिन्नप्रकारत्वभिन्नत्वे
नकपिलवत्त्वाभावत्वावच्छिन्नप्रकारकत्वेननिरूपितमननग्राह्यमतःसंशयविशेष्यमात्राणामाचस्यैवप्रका
रताद्वयनिरूपितत्वादेवंचेतिवह्निवह्निमांश्चपर्वतइत्यादिसमुच्चयस्यापिसाध्यनिश्चयत्वसंभवान्नत्वे

पिनवह्नित्वमिति: तत्तुवयपक्षस्थले प्रकारताद्वयान्निरूपितविशेष्यताद्वयोपगमात् भूतलं घटवत्पटवच्चेत्यादिस्थ
ले भूतलस्य द्विधाभानवदत्रापि पर्वतस्य प्रकारताद्वयांशे द्वैविध्येन भानादिसम्भवो विरक्तः तत्र पर्वतेतत्स्ववह्नि
धर्मित्वेति न चैवं वह्निमान् वह्निमानित्येवमप्यनुमितिस्यादनुमितावच्छेदकमनंतर्भाव्य वह्निमत्तानिश्चयस्या
विरोधित्वादिति वाच्यमिष्टत्वात् वह्निमत्पक्षकवह्नित्वप्रकानमितिमंतर्भाव्य पक्षतायां हेतुत्वाकल्पनेन तदा
पत्संभवादत्र धर्मित्वेतु पक्षतां एकसंबंधेन साध्यवत्त्वनिश्चयेपि संबंधान्तरेण साध्यानुमितेरुत्पादात्सं
बंधविशेषेणाप्यनुसरणीयः पर्वतत्वस्यावच्छेदकत्वं विषयीकृत्यैकत्र पर्वते साध्यसिद्धावप्यन्यत्र पर्वते सर्वदे
वानुमितेः पर्वतत्वसामानाधिकरणेनेत्युक्तमवच्छेदकत्वमविषयीकृत्य पर्वतत्वप्रकारेणेति तदर्थः॥ ताह

ग्रानुमितिः पर्वतत्वसामानाधिकरण्येन साध्यानुमितिः॥ धर्मविशेषोपीति॥ तथा च पर्वतत्वप्रकारेणानन्पर्वत
धर्मिकवह्न्याद्यनुमितौ पर्वतत्वप्रकारेणानन्पर्वतधर्मिकवह्न्यादिनिश्चयत्वेनैव प्रतिबंधकत्वं वाच्यमिति भाव
इदमुपलक्षणं साध्यतावच्छेदकरूपेणैकसाध्यव्यक्तेः सिद्धावपि विनानुमित्सामन्यसाध्यव्यक्तेरनुमितेर्यानु
भाविकत्वे साध्यविशेषोपीत्यपि द्रष्टव्यम्॥ अन्यथेति॥ धर्म्यन्तरेऽनुमित्सयादेनुपक्षधर्मिविशेषोपि न निवेश्य इ
त्यर्थः॥ अथ तत्तद्विषयवह्न्यादिविधेयकानुमितिं प्रति तदीयानुमित्साविरहविशिष्टतदीयवह्न्यादिमत्तानिश्च
यत्वेनैव समानविशेष्यताप्रत्यासत्त्या प्रतिबंधकत्वं तत्सामानाधिकरण्यप्रत्यासत्त्यानन्यथात्वं तथासति पर्व
तत्वादिविशिष्टविशेष्यकवह्न्यादिप्रकारकानुमितौ पर्वतत्वादिविशिष्टविशेष्यकवह्न्यादिमत्तानिश्चय

रामः
१९

त्वेन विरोधित्वे धर्मितावच्छेदकविधया पर्वतत्वमहानसत्वाद्यनेकधर्मान्तरभावेनानंतकार्य्यकारणभावकल्पना
पत्तेः॥ न च तथापि गुरुधर्मभेदेनानंतकार्यकारणभावः न गुरुधर्मस्यापि कुक्षिनिक्षिप्ततया तद्भेदेन कार्य्यकारणभाव
नानात्वस्य त्वयाप्यंगीकर्तव्यत्वात्॥ तथा चार्थवसात्संपन्न एवावश्यं धर्मिविशेषस्य निवेशः। इति चेन्न पाषाण
मयत्वेन पर्वते वह्निनिश्चयेपि पर्वतत्वेन न तत्र वह्न्यनुमित्युत्पत्तेः समानविशेष्यतया प्रतिबंधकत्वासंभवात्
न चैवं धर्मावच्छिन्नविशेष्यत्वमेव प्रत्यासत्तिरिति दोषः पाषाणमयत्वस्याप्येकधर्मतया तदवच्छिन्नविशेष्य
त्वस्याप्यावर्तकत्वात्॥ न च धर्मावच्छिन्नविशेष्यतात्वेन प्रत्यासत्तितायां तु न धर्मघटितसंबंधभेदेन का
र्यकारणभावानंत्यमत्रापि तद्गुरुधर्मस्यावच्छेदकधर्मविधया प्रवेशे गौरवं पुनरधिकं विनिगमनाविरहेन

प्रकारेणानाश्रयासताप्रतिबध्यप्रतिबंधकभा[illegible]कल्पापत्तिश्चवक्तनस्तमानाविशेष्यतयाविरोधित्वेयत्रपर्वत
चत्वरयोरेवसाध्यवत्तानिश्चयात्मकःसाध्यव्याप्यवत्तापरामर्शस्तदनंतरंचपर्वतांशेसाध्यवत्तानिश्चयस्याप्रमा
णज्ञानंपर्वतत्ववह्निकानुमितिर्जायतामितीच्छानंतरंतत्रकालेपर्वतइवचत्वरेपिसाध्यानुमितिस्यादप्रामाण्यज्ञा
नाभावविशिष्टस्यानुमित्साविरहविशिष्टस्यचसाध्यनिश्चयस्यचत्वरेविरहात्तादृशअप्रमाण्यज्ञानव्यक्तेरनु
मित्साव्यक्तेर्वाऽनुत्तेजकतयापर्वतेऽनुमित्यनुत्पत्तेरितिदिक्पक्षतेत्यादिपक्षतावच्छेदकीभूतपर्वतत्वादिधर्मा
वच्छेदत्वमविषयीकृत्यसाध्यसिद्धावपीत्यर्थः॥ तदवच्छेदेनेतिपक्षतावच्छेदकीभूतपर्वतत्वावच्छेद्यत्वविषयीकृत्या　　दमः
नुमितिदर्शनादित्यर्थः॥ तदवच्छेदेनसिद्धेरिति। पर्वतत्वावच्छेद्यत्वावगाहिसिद्धेरित्यर्थः विरोधित्वमस्तेन्वयः त　　२०

था च पर्वतत्वावच्छेद्यत्वावगाहिपर्वतधर्मिकवह्निविधेयकानुमितिं प्रति पर्वतत्वावच्छेद्यत्वावगाहिपर्वतधर्मिकवह्निम
त्तानिश्चयत्वेन प्रतिबंधकत्वं तेन च पर्वतविशेष्यकत्वं पर्वतत्वविशिष्टविशेष्यकत्वमात्रं तेन पर्वतत्वावच्छेदेन वह्नि
निश्चयेपि पर्वतो वह्निमानित्याकारिकाया इव नीलपर्वतो वह्निमानित्याकारिकाया अप्यनुमितेर्नोत्पत्तिः॥ पर्वतत्वा
वच्छेद्यत्वं न स्वरूपसम्बंधविशेषो मानाभावात्॥ किंतु पर्वतत्वव्यापकसाध्यप्रतियोगिकत्वं तदपि संसर्गमर्यादये
वभासते पर्वतो वह्निमानित्याकारकानुमितौ पर्वतत्वव्यापकवह्निसंयोगत्वेनैव संयोगस्य संबंधविधया भानस्वी
कारात्: नत्वपक्षतावच्छेदकव्यापकत्वमेव तदवच्छेद्यत्वमस्तु तावतैव शेषो व्यर्थ इति वाच्यं: पर्वतत्वावच्छेदेन तत
द्रूपवत्त्वानुमितेः प्रमात्वापत्तेः समवायस्यैकत्वात्। पर्वतत्वव्यापकसमवायेन पर्वतस्य तद्रूपव्यक्तिमत्वात्: न

वेपर्वतत्वव्यापकवह्निसंयोगेनवह्नेः साधनव्यापकत्वाग्रहात्। तादृशसंवन्धेनवह्न्यनुमित्यसंभव इतिवा अनेकविशे
षवाधसहकाराद्यव्यापकतानवच्छेदकप्रकारेणोपनितत्त्वसिद्ध्यभावरूपपक्षतासहकाराद्यव्यापकतानवच्छेदक
संवंधेनापितादृशानुमितेः सामान्यपरामर्शादेव संभवात्। नच पर्वतधर्मिकवह्न्यनुमितिमात्रं प्रत्येव पर्वतत्वा
वच्छेद्यत्वावगाहिनिश्चयस्य विरोधित्वात् प्रतिवध्यकोटौ पर्वतत्वावच्छेद्यत्वप्रवेशो व्यर्थ इतिवाच्यं। पर्वतत्वावच्छे
देनक्षित्यनुत्तरं तदवच्छेदेनानुमितिस्तथा पर्वतत्वावच्छेदेनैव तत्सामानाधिकरण्येनाप्यनुमित्यापत्तेः। यत्तु पर्वतत्वा
वच्छेद्यत्वेमवच्छेद्यमात्रासंवंधेन पर्वतत्वादिकं वा सांख्यासे प्रकारतयैवानुमितौ भासते तथा च पर्वतः पर्वतत्वा
वच्छेद्यवह्निमानित्येव पर्वतत्वावच्छिन्नवह्निमानित्येवानुमितिरिति प्राचीनानां विसंवादिरावच्छेदेन पर्वतो वेगा

राम:
२१

तुमत्यनुमितौ तु पक्षतावच्छेदकीभूतनगशिखरावच्छिन्नत्वं स्वरूपसम्बन्धरूपमेव भासते । ननु व्यापकत्वलक्षणामनन्तु
भवात् । एवं च नगशिखरावच्छेद्यवह्निसंयोगेन वह्न्यनुमितौ शिखरावच्छेद्यवह्निसंयोगेनैव वह्निनिष्ठयो विरोधीन
तु संयोगमात्रेणेत्यवधेनेयं सामानाधिकरण्यमात्रेणेति । पक्षतावच्छेदकरूपेण पक्षे साध्यानुमितित्वमेव तत्सा
मानाधिकरण्येनानुमितित्वं न तु पक्षतावच्छेदकावच्छेदेनानुमितावव्याप्तीत्यतो मात्रपदं सिद्धिमात्रस्येति तत्र पक्षता
वच्छेदकसामानाधिकरण्यमात्रेणानुमितित्वं न तु पक्षतावच्छेदकावच्छेदेन तत्सामानाधिकरण्येन च परामर्शद्व
यात्पर्वतत्वावच्छेदेनावगाहितदनवगाह्यनुमित्योर्युगपदुत्पादप्रसंगात् । सामग्रीसत्त्वात् किन्तु यद्रूपेण साध्यता
वच्छेदकसंबंधत्वं तादृशधर्मावच्छिन्नसंसर्गताकपक्षधर्मिकसाध्यानुमितित्वं निरुक्तस्थले च संयोगनि

ह्निविधसंसर्गताकमन्नत्वं वत्वात्तु मिति स्वीकारात् । तथा च संयोगत्वमात्रावच्छिन्नसंसर्गताकपर्वतधर्मिकव
ह्निविधेयकानुमितिं प्रति संयोगत्वविशिष्टसंसर्गताकपर्वतधर्मिकवह्निमत्तानिश्चयत्वेनैकरूपेण सिद्धिद्वयं
प्रतिबंधकं पर्वतत्वावच्छेदेनानुमितौ तु संयोगनिष्ठसंसर्गता न संयोगत्वमात्रावच्छिन्ना किंतु पर्वतत्वावच्छेद्य
वह्निसंयोगत्वावच्छिन्नेति पर्वतत्वसामानाधिकरण्येन सिद्धिसत्वेपि न तदनुमितिः न चैवं संयोगमात्रेण वह्निनिश्च
येपि पर्वतीयसंयोगेन वह्न्यनुमितिः स्यात्तस्याश्च पर्वतीयत्वविशिष्टसंयोगेन वह्निनिश्चयेपि संयोगमात्रेण प
र्वते वह्न्यनुमितिरिति वाच्यमिष्टत्वात् तत्सामान्यघटितविशेषप्रकारेणैव तादृशसंबंधेनापि सिद्धिः सामान्या
नुमितिविरोधित्वात् । एवमनयैव दिशाऽन्यत्रापि प्रतिबंधकरूपमिति संक्षेपः । इत्थं चेति पक्षतावच्छेद

रा.म.
२२

कावच्छेदेन सिद्ध्युत्तरं तत्सामानाधिकरण्यमात्रेणानुमित्सायामपि तदवच्छेदेनानुमितिः स्यात् सत्त्वेः तादृशानुमि
तौ पक्षतावच्छेदकावच्छेदेनानुमित्सैवोत्तेजिका वाच्या एवं पक्षतावच्छेदकसामानाधिकरण्येन सिद्ध्यनुत्तरं
तदवच्छेदेनानुमित्सायामपि तत्सामानाधिकरण्येनानुमितिः स्यात् सत्त्वे तादृशानुमितौ पक्षतावच्छेदकावच्छे
देनानुमितौ तदवच्छिन्नसिद्धिकालीनतत्सामानाधिकरण्यमात्रेणानुमित्सा पृथक् प्रतिबन्धिका पक्षतावच्छेद
कसामानाधिकरण्यमात्रेणानुमितावपि सामानाधिकरण्येन सिद्धिकालीनातदवच्छेदेनानुमित्सा पृथक्
प्रतिबन्धिका वाच्या यदि वा सत्यामपि समानाकारकसिद्धौ पक्षतावच्छेदकावच्छेद्यत्वावगाह्यनुमित्सायां
सत्यां तत्सामानाधिकरण्यावगाह्यनुमितेर्नोत्पादस्तदा सिद्धिकालीनत्वं प्रतिबन्धकत्वे न प्रवेश्यमिति भा

वः साध्यविशेष्यकोति· विनानुमित्सामित्यादिः तां प्रतीति पक्षविशेष्यकानुमितिं प्रतीत्यर्थः समानाकारेति तथा
च संयोगसंबन्धावच्छिन्नाधेयतासंबंधेन पर्वतनिष्ठप्रकारतानिरूपितवह्नित्वावच्छिन्नविधेयकताकानुमि
तिं प्रति तादृशसम्बन्धावच्छिन्नपर्वतनिष्ठप्रकारतानिरूपितवह्नित्वावच्छिन्नविशेष्यतात्मकनिश्चयत्वेन वि
रोधित्वं विधेयत्वं तु न प्रकारतानियतं किंतु पर्वते वह्निः पर्वतो वह्निमानित्याद्यनुमितौ पर्वते वह्निरनुमितो मि
न तु वह्नौ पर्वतमित्यनुभवसाक्षिकोपि विधेयताविशेषः क्वचि विशेष्यवृत्तिरपीति नासिद्धिः अत एव कुगानां
तुगात्वमित्यत्र विशेष्यीभूतस्यापि तुगात्वस्य विधेयत्वमुक्तमुपाध्यायैरिति ध्येयं· ननु पक्षविशेष्यकसिद्ध्यु
त्तरं साध्यविशेषकानुमितिनकापत्तु· भवासिद्धेरत आह तादृशीति पक्षनिष्ठप्रकारतानिरूपितसाध्यवि

शेष्यकानुमितिं प्रतीत्यर्थः सिद्धिमात्रमिति साध्यविशेषकापक्षविशेष्यिकाव सिद्धिविरोधीति इत्यर्थः पर्वतो
वह्निमानिति निश्चयोत्तरं वह्नौ पर्वतव्याप्यवत्तापरामर्शाद्वह्निः पर्वते इत्यनुमितौ ववंधेन विधेयत्वं किंतु प
र्वतस्यैव तथात्वं यथा व्याप्यवत्ताज्ञानजन्यत्वमनुमितौ न दंश एव विधेयता त्वविषयतास्वीकारादिति भाव
नन्वेवं प्रसिद्धसाध्यकपरामर्शात्सर्वत्रैव पक्षसाध्योभयविशेष्यकानुमितिः स्यात्पक्षतादयसत्त्वेनोभय
धर्मावच्छिन्नसामग्रीसत्त्वादित्यस्वरसाद्वायवाह साध्यज्ञानत्वेनैव साध्यविशेष्यकानुमितिं प्रति विरोधि
त्वमाह साध्यप्रसिद्धिरेवेतिः एवकारेणानुमित्सायाऽत्तेजकत्वस्यापि प्रतिक्षेपः स्त्रविनः साध्यज्ञानमा
त्रस्य विरोधितायामनुभवमपि प्रमाणमाह अत एवेति साध्यविशेष्यकानुमितौ न ज्ञानमात्रस्य विरो

षितादेवेत्यर्थः इत्थं वह्निमद्व्यापकत्वघटाभाववान् ह्रद इत्यादिव्यतिरेकपरामर्शजन्याया ह्रदे धूमाभाववद्व्याप्यभाव
साध्यकानुमितेरेव साध्यविशेष्यकत्वान्नैव साध्यज्ञानं विरोधीति मंतव्यं · वह्न्यादिभावसाध्यकस्थले तु विशि
ष्ट विधेयावह्न्यादिविधेयकानुमितेरलौकिकनयानां प्रति साध्यज्ञानत्वेन विरोधित्वासंभवादिति ध्येयं विशेष्य
त्वाख्यविधेयतावच्छेदकत्वसंबंधेनानुमितिसामान्यं प्रत्येव वा प्रकारतासंसर्गेणज्ञानमात्रस्य प्रतिबंधकत्वं
वाच्यं नन्वेवमपि गोत्वाभावो गोत्वव्यापकसत्ताशून्य इत्याकारकपरामर्शाद्गोत्वाभावे गोत्वं नास्त्येव पक्षनिष्ठ
प्रकारतानिरूपितसाध्यविधेयकानुमितिर्नस्यात्परामर्शस्यैव साध्यज्ञानत्वेन विरोधित्वादिति वाच्यमिष्टत्वा
त् गोत्वाभावो न गोत्ववानित्येवं पक्षनिष्ठविशेष्यतानिरूपितसाध्यविधेयताकानुमितेरेव तच्चोत्पादात्साध्यता

वह्नेर्दक्षधर्मावच्छिन्नपक्षनिष्ठप्रकारतानिरूपितसाध्यविधेयकानुमितित्वेनैव वा प्रतिबध्यत्वं कार्यमित्यपिक्
क्वचित ॥ वस्तुतस्तु । अप्रसिद्धसाध्यकपरामर्शस्य विशेष्यविधया साध्यविधेयकानुमितित्वावच्छिन्नं प्रत्येव हेतु
त्वम् यथा गोत्वाभावव्याप्यवत्त्वप्रकारकपरामर्शजन्यायां विशेषणतास्य विशेष्यविधया गोत्वाभावविधेयकानु
मितौ व्यभिचारापत्तिः तथा चोक्तस्थले गोत्वाभावो नापि तद्वानिरूपितानुमितित्वविशेष्यताविधया गोत्वाभाव
विधेयकानुमितौ गोत्वव्यापकाभाववत्तापरामर्शस्याहेतुत्वात् ॥ तथाविधगोत्वाभावानुमितिहेतोर्गोत्वाभावव्याप्य
वत्तापरामर्शस्य विरहेण कारणबाधात्व प्रसिद्धाप्रसिद्धसाध्यकोभयपरामर्शयोः प्रसिद्धाप्रसिद्धसाध्यकोभ
यानुमित्यनुगतधर्मावच्छिन्नं प्रत्यनुगतरूपेण हेतुत्वस्य दुर्वचनादित्यत्र विस्तरः व्याप्तिस्मरणादिनेत्थिय

नानुमित्सोत्तरं व्याप्तिस्मरणं ततः सिद्ध्यात्मकपरामर्शजन्ये इत्यर्थः तथैव तथा समेव विशिष्टाभावस्येति · अनुमित्सावि
रहविशिष्टसिद्ध्यभावस्येत्यर्थः मिश्रमतमाह · अन्ये त्विति · अनुमित्सायामिति सिद्धिदशायामिति शेषः वाच्येति ॥ सि
षाधयिषापदेनेत्यादिस्तोत्पत्तीत्यादिस्थपदं तत्तदनुमित्सापरं ॥ तथा च तत्तदनुमित्सोत्पत्त्यनन्तरं त्वविशिष्टतत्त
दनुमित्साविषयसिद्ध्यभावाभावोत्पत्तेरित्यर्थः सिद्धिकालीनयदनुमित्साव्यक्तिदशायामुत्तरकाले तदनुमितिर्भवि
तात तदनुमित्साव्यक्तिविषयीभूतसिद्धिप्रागभावस्य वर्तमानक्षित्वंतरदशायामपि सत्वात्तदानीमनुमितेः वार
णाय विशिष्टांतं तदनुमित्सोत्पत्त्यनन्तरं त्वं तु तत्तदनुमित्सोत्पत्तिध्वंसविशिष्टत्वं तथा च तदनुमित्सोत्पत्त्यनंत
रं क्षणेऽनुमित्यपलापापत्तेः सिषाधयिषोत्पत्तिक्षणेऽनुमित्यपलापापत्तेः सिषाधयिषोत्पत्तिक्षणेऽनुमित्सो

रामः
२५

गत्तित्वसविशिष्टस्य तद्विषयसिद्धिप्रागभावस्यासत्वात्· किंतु तत्तदनुमित्साप्रागभावविरहविशिष्टत्वं वैशि-
ष्ट्यं चैककालावच्छेदेनैकात्मवृत्तित्वमिति नातिप्रसंगः तत्र तदनुमित्साप्रागभावविरहविशिष्टत्वमात्रोक्तौ वनुमित्सो-
त्तरमनुमित्युत्पादे तु नमित्युत्पादेन रनुमित्यापत्तिरतस्तदनुमित्साविषयसिद्धिप्रागभावपर्यन्तानुधावनं न च सिद्धि-
कालीनानुमित्सया स्वविषयीभूतैकानुमित्युत्पाददशायामपि दिनांतरभाविस्वविषयीभूताऽनुमित्यनंतरप्रा-
गभावसत्वाऽनन्तरकालमनुमित्संतरापत्तिरिति वाच्यं तत्तदनुमित्साप्रागभावविरहविशिष्टस्य तत्तदनुमित्साविष-
यीभूतसिद्धिप्रागभावकूटस्य विवक्षितत्वात्॥ उक्तस्थले चोत्पन्नाऽनुमितिरेव प्रागभावस्यासत्वादिति भावः। इ-
ष्टिपादिनेति· अनुमानतत्साध्यनिर्णयेतु स्वविषयसिद्ध्युत्पादस्य व नस्यो यादिति भावः। यद्यपि स्वपदेना

नुमित्सूपधायकतत्तदनुमित्साप्रयुक्तानामुपग्रहे दिवसान्तरीयानुमित्साप्रयुक्तयोग्यतायामप्रवेशान्नैव दोषस्तथापि
वह्न्यनुमितित्वप्रकारेणानीतानुमितिगोचरेच्छयापि सिद्धिकाले वह्न्यनुमितिर्न स्यात्तद्विषयानुमितिप्रागभावकूटस्य तदा
नीमसत्त्वात्तत्तदनुमित्साप्रयुक्तपूर्वक्षणावृत्तित्वेन तत्तदनुमित्साविषयसिद्धीनां तत्तदनुमित्साकालीनत्वेन
वा तत्तदनुमित्साविषयसिद्धिप्रागभावानां विवक्षया कृ, पंक्तिऽपपादनेऽप्यनुमितिद्वयमिति ध्या या ------
मनुमितिद्वयं न स्यात्तदनुमित्साविषयीभूतानुमितिप्रागभावकूटस्य तथानुमित्सुतान्निदशायामसत्त्वात्तादृ ग म:
शानुमित्सायामपि सिद्धेरनुत्तेजकत्वोपगमादित्यादिदूषणं दृष्टवदुत्सर्गतः बाधकं विधानेनानुमित्सोत्तरं य २६
त्र परामर्शविरोधिज्ञानाप्रसरणक्रमेण चिरकालोत्तरं परामर्शोत्पादस्तत्र सिद्धिदशायां न योग्यताऽत एव च

ध्याप्ति फलवहेतोर्विनाशानेव काल इति सेत्स्यतु कल्पनेनान्वेनादृष्टकालस्योत्तेजकत्वे किं मानमत आह फलेति· ननु यत्रानुमि
त्योत्तरं परामर्शस्तत्रत्यकालानामुपादाने यत्र क्षिप्रात्मकपरामर्शोत्तरमनुमित्सा न त्वानुमितिर्न स्यात्तत्रत्यकालानाम
पादाने यत्र क्षिप्रात्मकपरामर्शोत्तरमनुमित्सा न त्वानुमितिर्न स्यात्तत्रत्यकालानामनुत्तेजकत्वादत आह· अथवेति
उपलक्षित इति तथा चानुमित्सानाशाधिकरणतत्कालोनुमित्सावह्यमणुत्तेजकमित्याशयः नावानेवेति· लिङ्गेना
शोत्तरमपि यावत्कालमध्येनुमितिर्नोत्पन्ने तावत्काल इत्यर्थः। ननु क्रियासकानां यावत्समयानामभावस्यास
र्वदेवासत्त्वेनिसत्त्वानोक्तयोग्यताविरक्षयाप्यनुमित्सानाशोत्तरमनुमितेसंभव इत्यत आह· विशेष्येति· तथा चज
न्यमात्रस्यकालोपाधितया आत्मवेतनत्ताज्ञानादिकमेव नादृशसमयोपाध्य इत्यत न दोषः अवहितेत्यि भावेक्तः ते

णावधानैरित्यर्थः समककर्मकस्यावपूर्वस्य धातो पचत्यादेरिव कर्तृरिक्तस्यातु मपुत्र त्यादिनिष्ठेयम्॥ अनुमित्साव
च्छिनामिवन नाशाच्छिककरणक्षणानामप्युत्तेजकविधया पक्षतायां निवेशो गौरवं विनानुमित्सादस्यसंदिग्धत्वा
दित्यस्वरसो बदंसी सुक्ता इ विनः उक्तानामप्युद्बोधेड्त्यादिलौकिकप्रत्यक्षस्यानुपपत्त्यापेक्षात्वच्छिनामिवा
नुमित्सानाशोत्तरक्षिद्धिदशायामनन्तरानुमित्यस्यथानुपपत्त्या प्रागुक्तसिषाधयिषाव्यक्तीनामेवत्रिवतु
क्षणावस्थायित्वं कल्पयितुं विनंविशेषणतानाम्नानाशकभावस्यविशेषनएव विश्रामात्॥ द्वितीयपक्ष
णोनाशसामग्न्यतावच्छेदकत्वादितिप्राञ्चः साध्यनिर्णयोत्तिसाध्यनिर्णयस्यत्वप्रकारकेच्छानन्तरमित्यर्थः॥ पू
र्वोक्तरन्यायेनानुमित्साप्रागत्यन्तविशेषणतानानादिक्रमेण प्रत्यक्षमिति। नत्रनदनंनरमनुमितिप्रसंगइ

4929

श्रीगणेशायनमः॥ ॥इदं च येन रूपेण येन सम्बन्धेन साध्यं तद्रूपावच्छिन्नप्रतियोगिताकसाध्याभावस्य प्रवेशो
मा इत्य अन्यथा विशिष्टाभावादिकमादाय दोषो ध्यः। इति जागदीशाः। अनियमाशंका। ननु साध्यनिष्ठप्रतियो
गिताकमहानसीयवह्न्यभावाधिकरणनिरूपितवृत्तित्वाभावस्य हेतावसत्त्वेऽपि वह्नित्वेतरधर्मानवच्छिन्नप्रति-
योगिताकाभावस्यापि साध्यनिष्ठप्रतियोगिताकतयाऽधिकरणनिरूपितवृत्तित्वाभावस्य धूमहेतौ सत्वेनैव
लक्षणसमन्वयसम्भवादलं येन रूपेणेत्यादिविशेषणेनेति। न च महानसीयवह्निमान् धूमादित्यादावति
व्याप्तिः। वह्नित्वेतरधर्मानवच्छिन्नवह्निनिष्ठप्रतियोगिताकाभावस्य साध्यनिष्ठप्रतियोगिताकतया तदधि
करणनिरूपितवृत्तित्वाभावस्य धूमहेतौ सत्वेनातिव्याप्तिरिति वाच्यम्। साध्यनिष्ठप्रतियोगिताका
भावाधिकरणनिरूपितवृत्तित्वाभावकूटस्य निवेश्यत्वात्। तथा चानययुक्त्या वह्निमान् धूमादित्या
दावव्याप्तिः। साध्यानिष्ठप्रतियोगिताकमहानसीयवह्न्यभावाधिकरणनिरूपितवृत्तित्वाभावस्य
कूटानन्तर्गतस्य हेतावसत्वादतो येन रूपेणेत्यादिविशेषणम्॥ तथा च महानसीयवह्न्यभाव

स्वसाध्यतावच्छेदकगतरूपवृत्तिप्रतियोगिताकत्वविरहेण तदधिकरणनिरूपितवृत्तित्वामादायाव्याप्तिविरहात् इति
नच साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्या। अनुयोगितावच्छेदकीभूततद्रूपावच्छिन्नानुयोगिताकपर्याप्ति
कावच्छेदकताकप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावनिवेशेनैवातिव्याप्तिवारणसम्भवात् वृत्ति
त्वाभावकूटनिवेशो नालम् एवं सति वह्निमान्धूमादित्यादौ तादृशानुयोगितावच्छेदकीभूततद्रूपवह्नित्वगत एकत्वाव
च्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकवह्नित्वे तद्धर्मानवच्छिन्नवह्निनिष्ठप्रतियोगिताधिकरणनिरूपितवृत्ति
त्वाभावमादाय लक्षणगमनात् साध्यतावच्छेदकगतवृत्तिप्रतियोगिताकाभावनिवेशे प्रयोजनविरहादिति वाच्यम्
वह्निर्यत्रविषयितासम्बन्धेन साध्यता महानसीयवह्निविषयके यद्वह्निविषयकमहानसीयवह्निविषयकत्वानाद्ये
तरत्वस्य हेतुतायां समानाधिकरणव्यभिचारिणि महानसीयवह्न्यभावाधिकरणनिरूपितवृत्तित्वाभावस्योक्तनि
वेशाक्रान्ततया हेतौ सत्त्वादिति व्याप्त्यापत्तेः। नच तादृशरूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकप्रतियो
गित्वनिष्ठावच्छेदकता[illegible]मितरवारकविशेषितवृत्तित्वाभावनिवेश्यतया नातिव्याप्तिः। महानसीयत्वानवच्छि
न्नस्याधिक्येन तादृशाभावस्य लक्षणाक्रान्तत्वाभावादिति वा[illegible]च्यम्। वह्निमान्धूमादित्यादावव्याप्तिः व

ह्नित्वेतरधर्मानवच्छिन्नत्वस्याधिक्ये न वह्नित्वेतरधर्मानवच्छिन्नवह्निनिष्ठप्रतियोगिताकाभावस्य लक्षणाघटकत्वा
त् अतः येन रूपेणेत्यादि विशेषणम् । तथा च साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेद
कीभूतरूपवृत्तित्वप्रतियोगिताकाभावो वक्तव्यः । रूपवृत्तित्वस्य निरूपितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्य
नुयोगितावच्छेदकत्वसम्बन्धेन । ननु महानसीयवह्निमान्तज्ज्ञानत्वादित्यादावव्याप्तिः । वह्निमहानसीयाभावस्य ता
दृशरूपवृत्तित्वप्रतियोगिताकतदधिकरणे महानसीयवह्निविषयताकज्ञाने हेतोर्वृत्तित्वादिति चेन्न · वह्नित्वमहा
नसीयत्वगतद्वित्वस्याभिन्नत्वात् इति चिन्तनीयम् । सम्बन्धादिकमेवंरीत्या बोध्या । तथा हि · संयोगेतरधर्मानवच्छिन्न
वह्निनिष्ठप्रतियोगिताकाभावाधिकरणवृत्तित्वाभावस्य हेतौ सत्त्वादिति वाच्यम् । पूर्ववत्करणादिनिवेशे नातिव्याप्तिवा
रणासम्भवात् साध्यतावच्छेदकसम्बन्धनिवेशवारणं ध्येयम् । ननु साध्यतावच्छेदकेतरानवच्छिन्नसाध्याभाववद्वृत्ति
त्वं वक्तव्यम् । साध्यतावच्छेदकेसम्बन्धेनालम् । वह्निमान् धूमादित्यादौ समवायेन वह्न्यभावमादायाव्याप्तिः । ता
दृशाभावस्य लक्षणाघटकत्वात् इति चेन्न · संयोगेन समवायिनः साध्यतायां घटत्वादिहेतावव्याप्तिः । समवाये
न समवाय्यभावस्य साध्यतावच्छेदकेतरानवच्छिन्नसाध्यनिष्ठप्रतियोगिताकतया तदधिकरणघटादिनिरूपि

तद्वृत्तित्वस्य घटत्वे सत्वात् इति। ननु साध्यनिष्ठप्रतियोगितानिरूपको यस्तदधिकरणेत्यादि निवेशो लाघवादुच्यताम्। अ
भावपदं व्यर्थम्। न च वह्निमान् धूमादित्यादावव्याप्तिः। वह्निनिष्ठप्रतियोगितानिरूपकोयः वह्निप्रतियोगिकसंयोगस्तदधि
करणानिरूपितवृत्तित्वस्य धूमे सत्वादिति वाच्यम्। साध्यवत्तायां हि विरोधिताघटकसम्बन्धेन तदधिकरणानिरूपितवृ
त्त्यभावस्य विवक्षितत्वात्। तथा चात्र साध्यवत्ताविरोधिताघटको यः स्वरूपसम्बन्धस्तेन संयोगाधिकरणाप्रसि
द्धाव्याप्तिविरहादिति चेन्न। वह्न्यधिकरणत्ववान् धूमादित्यादौ वह्न्यधिकरणनिष्ठप्रतियोगितानिरूपको यः स्वरूप
सम्बन्धस्तस्य स्वरूपेणाधिकरणीभूतपर्वतवृत्तित्वस्य धूमे सत्वादव्याप्तिरतोऽभावविशेषणम्। वस्तुतस्तु आधे
यतासम्बन्धेन पर्वतविशिष्टवह्निसाध्यकधूमादिहेतावव्याप्तिः। साध्यनिष्ठप्रतियोगितानिरूपको यः पर्वतनिष्ठा
वच्छेदकतास्वरूपसम्बन्धेन तदधिकरणपर्वतनिरूपितवृत्तित्वस्य धूमे सत्वादव्याप्तिरतोऽभावपर्यन्तानुधाव
नम्। ननु कालिकेन वह्न्यभावाधिकरणपर्वतवृत्तित्वस्य धूमे सत्वादव्याप्तिरिति चेन्न। स्वरूपेण साध्याभावाधिक
रणत्वस्य विवक्षितत्वात्। न च घटभिन्नं कपालत्वादित्यादौ घटत्वस्वरूपसाध्याभावस्य स्वरूपसम्बन्धेनाधिकर
णाप्रसिद्धाव्याप्तिरिति। स्वरूपसमवायान्यतरसम्बन्धेन तदधिकरणत्वविवक्षया वह्न्यभाववान् [illegible] वह्व

२

श्रीः॥ ननु साध्याभाववद्वृत्तित्वं व्याप्तिरिति लक्षणे अभावपदोपादानं किमर्थम्। तदनुपादाने कीदृशोर्थः साध्यनिष्ठप्रतियोगितानिरूपको यस्तदधिकरणनिरूपितवृत्तित्वाभावो व्याप्तिः। तथा च वह्निमान् धूमादित्यादौ वह्निनिष्ठप्रतियोगितानिरूपको यो वह्न्यभावस्तदधिकरणवृत्तित्वाभावस्य धूमे सत्वाल्लक्षणसमन्वयः इति[illegible]. न च वह्निमान् धूमादित्यादावव्याप्तिः। वह्निनिष्ठप्रतियोगितानिरूपको यः संयोगस्तदधिकरणं पर्वतः तन्निरूपितवृत्तित्वमेव हेताविति वाच्यम्. वह्निमान् धूमादित्यादौ समवायेन वह्न्यभाववमादायाव्याप्तिसमुद्धरणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेश्यं. तथा च संसर्गीयप्रतियोगितायाः सम्बन्धावच्छिन्नत्वेन तादृशप्रतियोगितानिरूपकस्याभावस्य लक्षणाघटकत्वात्। यदि च अनुमितिग्रन्थे उपाध्यायेनोक्तसंसर्गीयायाप्रतियोगिता सा आधेयतास्वरूपा. इत्थं च आधेयतायां सम्बन्धावच्छिन्नत्वं तथा संसर्गीयप्रतियोगितायामपि एवं च संयोगस्य लक्षणाघटकत्वादव्याप्तिरिति चेन्न. कालिकेन वह्न्यभाववमादाय वह्निमान् धूमादित्यादावव्याप्तिवारणाय स्वरूपसम्बन्धेन प्रतियोगिनिरूपकाधिकरणत्वस्य विवक्षितत्वात्। एवं च संयोगस्य स्वरूपेणाधिकरणमप्रसिद्धम्. संयोगसम्बन्धावच्छिन्नाधिकरणतासम्बन्धेन वह्निमान् धूमात् विरोध्यता सम्बन्धेन

वह्निप्रकारकज्ञानवान्धूमात्. संयोगसम्बन्धेनपर्वतविशिष्टवह्निमान्पर्वतीयधूमात्. किंचवह्न्यधिकरणत्वाभाववान्वह्न्यधिकरणत्वाभावाभाववत्वात्. इत्यत्राव्याप्तिः॥ ॥

रामोराजम

...नितिं...निखिलहिं...हरिर्धरणी

सकलारिसमूहानां...राजः ति

...नोहिमगवाने...धर्म...पाल...पः

...ति ५ च्यने १

रामोराजमणिः सदाविजयते रामंरमेशं...॥

स्वस्तिश्रीगणे



रामोराजम
अडजन
कुलपा



स्वस्तिश्रीगणेशाय
नमः स्वस्तिश्रीगणेशा
यनमः शुभमस्तु

रामोरा

थिर्पे

थिर्पेथा

थिर्पे

स्वरूप...दतत्वानार्थ...रादर्शितकर्तव्यमेनाबोधन...प्रा...भिन्नधर्मस्य...ग्राचारविषयत्वात्

त०दी०
१

श्रीगणेशाय नमः ॥ विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरां गुरुम् ॥ टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकाम् ॥१॥ चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकमिष्टदेवतानमस्कारलक्षणं मङ्गलं शिष्यशिक्षायै निबध्नन् चिकीर्षितं प्रतिजानीते। निधायेति। ननु मङ्गलस्य समाप्तिसाधनत्वं नास्ति। मङ्गले कृतेऽपि किरणावल्यादौ समाप्त्यदर्शनात्। मङ्गलाभावेऽपि कादम्बर्यादौ समाप्तिदर्शनात् अन्वयव्यतिरेकव्यभिचारादिति चेन्न। किरणावल्यादौ विघ्नबाहुल्यात्समाप्त्यभावः। कादम्बर्यादौ ग्रन्थाद्बहिरेव मङ्गलं कृतम् अतो न व्यभिचारः। ननु मङ्गलस्य कर्तव्यत्वे किं प्रमाणमिति चेन्न। शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात्। तथा हि। मङ्गलं वेदबोधितकर्तव्यताकम् अलौकिकाविगी-

१॥ श्रीगणेशाय नमः ॥ ॥निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ॥ बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥१॥

विधिमंतरा रागादिप्राप्ताभिन्नेत्यर्थः। धर्मस्यानिषिद्ध...

तशिष्टाचारविषयत्वात् दर्शादिवत्। भोजनादौ व्यभिचारवारणाय अलौकिकेति। रात्रिश्राद्धादौ व्यभिचारवारणाय अविगीतेति। शिष्टपदस्य स्पष्टार्थः। न कुर्यान्निष्फलं कर्मेति जलताडनादेरपि निषिद्धत्वादिति। तर्कसंग्रह इति। तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः द्रव्यादिपदार्थास्तेषां संग्रहः संक्षेपेण स्वरूपकथनं क्रियते इत्यर्थः। कस्मै प्रयोजनायेत्यत आह। सुखबोधायेति। सुखेनानायासेन बोधः पदार्थज्ञानं तस्मै इत्यर्थः। ननु बहुषु तर्कग्रन्थेषु सत्सु किमर्थमपरो ग्रन्थः क्रियते इत्यत आह। बालानामिति। तेषामतिविस्तृतत्वाद्बालानां बोधो न भवतीत्यर्थः। ग्रहणधारणपटुर्बालः न तु स्तनंधयः। किं कृत्वा क्रियत इत्यत आह। निधायेति। विश्वेशं जगन्नियन्तारं साम्बशिवं हृदि निधाय नितरां स्थापयित्वेत्यर्थः। पदार्थान्विभजते। द्रव्येति। पदस्यार्थः पदार्थ इति व्युत्पत्त्या अभिधेयत्वं पदार्थसामान्यलक्षणं। ननु विभागादेव सप्तत्वे सिद्धे सप्तग्रहणं व्यर्थमिति चेन्न। अधिक

वेदोक्तत्वान्मङ्गले
न वेदविहितकर्म
प्रकारीत्यर्थः। वे...
नाहिंस्यादित्यादि
बोधे प्रतिव्याप्तिवार
णायाव्यतीयांते।

रक्ष:

स्वरूपज्ञानात् फलं शाब्दः प्रयोगः ५ पदार्थत्वावान्तरधर्मप्रतिपादनोद्देश १ पदार्थतत्वज्ञानं प्रयोजनं प्रतिपाद्यप्रतिपादकभावः संबंधः एतावता द्रव्यादिपदार्थाः विषयः पदार्थत्वावान्तरधर्मप्रकारक...
...निष्फलकत्वादित्यर्थः उद्देश्यविधेयभावस्थलेउद्देश्यतावच्छेदके विधेयाभावस्य...

५५ इत्थमद्रव्यस्याविद्यमानत्वात् नवद्रव्याणि तथाहि नीलं तमश्चलतीति अबाधितप्रतीतिबलात् नीलरूपाधारतया क्रियाधारतया च द्रव्यत्वं तावत्सिद्धं तत्र तमसो

द्रव्यगुणकर्मणां साधर्म्यं सत्तावत्त्वमित्यर्थः

संख्यावत्वेकृतार्थत्वात् ननु अतिरिक्तः पदार्थः प्रमितो न वा नाद्यः प्रमितस्य निषेधायोगात् नान्त्यः प्रतियोगिप्रमितिं विना निषेधानुपपत्तेरिति चेन्न पदार्थत्वं द्रव्यादिसप्तान्यतमत्वं व्याप्यमिति व्यवच्छेद्यार्थत्वात् ननु सप्तान्यतमत्वं सप्तभिन्नाभिन्नत्वमिति वक्तव्यम् स चैव सप्तभिन्नस्याप्रसिद्धत्वात् सप्तान्यतमत्वं कथमिति चेन्न द्रव्यादिसप्तान्यतमत्वं च द्रव्यादिभेदसप्तकाभाववत्त्वमित्युक्तत्वात् एवमग्रेपि द्रष्टव्यं द्रव्यं विभजते तत्रेति तत्र द्रव्यादिमध्ये द्रव्याणि नवैवेत्यन्वयः कानि तानीत्यत आह पृथिवीत्यादि ननु तमसो नाकाशादिपंचकेन्तर्भावः रूपवत्वात् अत एव न वायौ स्पर्शाभावात् सदागतिमत्त्वाभावाच्च नापि तेजसि भास्वररूपाभावात् उष्णस्पर्शाभावाच्च नापि जले शीतस्पर्शाभावात् नीलरूपाश्रयत्वाच्च नापि पृथिव्यां गन्धाभावात् स्पर्शरहितत्वाच्च तस्मात्तमो दशमद्रव्यमिति चेन्न तमसस्तेजोभावरूपत्वात् तथाहि तमो न स्वतन्त्ररूपि द्रव्यं आलोकासहकृतचक्षुर्ग्राह्यत्वात् आलोका

गुणक्रियाश्रयत्वं द्रव्यत्वं वेत्यर्थः गुणक्रियाश्रयत्वात् घटवत् दिक्कालयोर्व्यभिचारो वादेवेलक्ष्यः

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव

भाववत् रूपिवाच्छायायामालोकस्य कारणत्वात् तस्मात्प्रौढप्रकाशकतेजःसामान्याभावस्तमः तत्र नीलं तमश्चलतीति प्रत्ययो भ्रमः अतो नव द्रव्याणीति सिद्धं द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणं लक्ष्यैकदेशावृत्तित्वं अव्याप्तिः यथा गोः कपिलत्वं अलक्ष्यवृत्तित्वं अतिव्याप्तिः यथा गोः शृंगित्वं लक्ष्यमात्रावर्त्तनमसंभवः यथा गोरेकशफत्वं एतद्दूषणत्रयरहितो धर्मो लक्षणम् स एवासाधारणधर्म इत्युच्यते यथा गोः सास्नादिमत्त्वं लक्ष्यतावच्छेदकसमनियतत्वं असाधारणत्वं व्यावर्त्तकस्यैव लक्षणत्वे व्यावृत्तावभिधेयत्वादेरतिव्याप्तिवारणायेतरभिन्नत्वं धर्मविशेषणं देयं व्यवहारस्यापि लक्षणप्रयोजनत्वे न देयं व्यावृत्तेरपि व्यवहारसाधनत्वात् ननु गुणवत्त्वं न द्रव्यलक्षणं आद्यक्षणे उत्पन्नविनष्टद्रव्ये चाव्याप्तेरिति चेन्न गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात्

संयोगादिजनकतावच्छेदकतया द्रव्यत्वजातिसिद्धिः ॥

उक्तदूषणाभाववद्यथार्थविशिष्टत्वार्थः

उक्तविवक्षयाऽव्याप्तिवारणोऽपि द्रष्टव्यः २

अव्याप्तिवारणाय सामानाधिकरण्यविशेषणं सत्तामादायातिव्याप्तिवारणाय सत्ताभिन्नेति द्रव्यगुणान्यतरत्वमादायातिव्याप्तिवारणाय जातीति समवायेन तादृशधर्मवत्त्वं तात्पर्यम् अतः व्याप्ति

लक्ष्यतावच्छेदकव्यापकत्वे सति लक्षणतावच्छेदकव्याप्यत्वं ४

प

सामान्यवत्त्वं समवायेन बोध्यं · तेन न कालिकादिसंबंधेन तद्वति ध्वंसेऽतिव्याप्तिः २

ऽन्यविवक्षायाऽतिव्याप्तिवारणोपि, ~~यद्यपि~~ यद्यपि लक्षणालक्ष्यतावच्छेदकयोरभेदस्तथापि लक्षणे नैतरभेदे सिद्धे हेतोः साध्यसमानाधिकरणत्वनिश्चयेऽपि हेतौ धर्मितावच्छेदकसाध्यनिश्चयस्या नियतत्वादिति जनिप्राये रोऽहमिति संक्षेपः एवमग्रेपि बोध्यं २

एकस्मिन्नर्थे समवायेन सत्त्वादेवेत्यर्थः · गुणे गुणानंगीकारादिति,

त०दी० २

ननु रूपमपि एकं रूपं रसात्पृथगिति व्यवहाराद्गुणेऽतिव्याप्तिरिति चेन्न · एकार्थसमवायादेवतादृशव्यवहारोपपत्तौ गुणे गुणानंगीकारात् · गुणान्विभजते · रूपेति · द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः · गुणत्वजातिमान्वा · ननु लघुत्वमृदुत्वकठिनत्वादीनां विद्यमानत्वात् कथं चतुर्विंशतिर्गुणा इति चेन्न · लघुत्वस्य गुरुत्वाभावरूपत्वात् · मृदुत्वकठिनत्वयोरवयवसंयोगविशेषरूपत्वात् · कर्म विभजते · उत्क्षेपणेति · ऊर्ध्वदेशसंयोगानुकूलं कर्मोत्क्षेपणं · अधःसंयोगानुकूलं कर्म अपक्षेपणं · आकुंचनं संकोचः · प्रसारणं विकाशः · गमनमन्यत्सर्वमेवेत्यर्थः · संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म · कर्मत्वजातिमद्वा · ननु भ्रमणादेरपि अतिरिक्तस्य कर्मणः सत्त्वात् पंचत्वमनुपपन्नमिति चेन्न · भ्रमणादीनामपि गमनेनान्तर्भावान्न पंचत्वविरोधः · सामान्यं विभजते · परमिति · परमधिकवृत्ति · अपरं न्यूनवृत्ति · सामान्यादिचतुष्टये जातिर्नास्ति · विशेषं विभजते · नित्येति · पृथिव्यादि

रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माऽधर्मसंस्काराश्चतुर्विंशतिर्गुणाः · उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि पंचकर्माणि · परमपरं चेति द्विविधं सामान्यं · नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव · समवायस्त्वेक एव · अभावश्चतुर्विधः · प्रागभावः प्रध्वंसाभावोऽत्यंताभावोऽन्योन्याभावश्चेति ·

चतुष्टयस्य परमाणवः आकाशादिपंचकं च नित्यद्रव्याणि · समवायस्य भेदो नास्तीत्याह · समवायस्त्विति · अभावं विभजते · प्रागभाव इति · तत्र उद्देशक्रमानुसारात् प्रथमम् · पृथिव्या लक्षणमाह · गन्धवतीति · नाम्ना पदार्थसंकीर्त्तनमुद्देशः · उद्देशक्रम एव सर्वत्र वेदकनियामिका · ननु सुरभ्यसुरभ्यवयवारब्धे परस्परविरोधेन गन्धानुत्पादात् अव्याप्तिः · न च तत्र गंधप्रतीत्यनुपपत्तिरिति वाच्यम् · अवयवगंधस्यैव प्रतीतिसंभवेन चित्रगन्धानंगीकारात् · किंच · उत्पन्नविनष्टघटादौ अव्याप्तिरिति चेन्न · गंधसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्य विवक्षितत्वात् · ननु जलादावपि गंधप्रतीतेरतिव्याप्तिरिति चेन्न · अन्वयव्यतिरेकाभ्यां पृथिवीगंधस्यैव तत्र भानांगीकारात् · ननु तथापि कालस्य सर्वाधारतया सर्वेषां लक्षणानां काले अतिव्याप्तिरिति चेन्न · सर्वाधारताप्रयोजक

संतोषावधिकत्वस्य रूपस्यहानिः
सोऽयमकालिंगजन्याद्भुतरभेदाद्गमितिचि
धपरत्वं स्पष्टीभावनीयं

गंधसमानाधिक
रणतावच्छेदकतया
पृथिवीत्वजातिः सि
ध्यति ·

लतीयायोगे

रामो
२

स्वाश्रयसमवेतत्वसंबंधेनेत्यादि २

जातित्वादिकमादायातिव्याप्तेर्वारणाय गंधसमानाधिकरणेति ·
सत्तावारणाय द्रव्यत्वापरेति · द्रव्यत्वव्यापकजातीत्यर्थः
तेन द्रव्य[illegible] २

जलादिनामिति भातीति २

प्रत्यक्षे नद्वितीयाये नांगीकारात् · किंचेति २

जातिः कालादिरिक

स्वाश्रयसंयुक्तसंबंधेनेत्यादि · २

नथेंद्रियत्वं नजातिरित्याशयेनाह· शब्देतरोद्भूतेति· आत्माद्यावृत्तिव्याप्तिवारणाय सत्यंतं· श्रोत्रेऽव्याप्तिवारणाय शब्देतरेति· चक्षुरादौ विशेषगुणस्याद्भूतरूपादेः सत्वेनाव्याप्तिवारणायोद्भूतेति· उद्भूतत्वं नजातिः
शुक्लत्वादिना संकरात· न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यं· चाक्षुषजनकोद्भूतरूपत्वादिना कारणत्वानुपपत्तेः· किंतु यच्छुक्लत्वादिव्याप्यमनुद्भूतत्वं नानातत्तदभावकूटवत्वमुद्भूतत्वं तच्च संयोगादे
अपि· तथा च शब्देतरोद्भूतगुणासंयोगमादाय संभवस्यवारणाय विशेषेति· कालादावतिव्याप्तिवारणाय विशेष्यदलं· तत्रैवातिव्याप्तिवारणाय ज्ञानकारणेति· प्राचीनमते विषयावयवेंद्रियावय-
वसंयोगस्य प्र-
त्यक्षजनकतया
तदाश्रयस्येन्द्रिया-
वयवस्य· नवीनम-
ते· कालादौ तु प्राभा-
वगतप्रत्यक्षे सन्निक-
र्षघटकतया कार-
णीभूतावच्छ्संयो-
गाश्रयस्य काला-
देश्च वारणाय मनः
पदं· न चात्मान्य-
त्वे सतीत्यनेनैवात्म-
न्यतिव्याप्तिवारण-
संभवे किं तदितरश-
ब्देतरेत्यादिविशे-
षणेनेति वाच्यं·
तथा सति वर्तमा-
नः संयोगस्य ज्ञा-
नमात्रप्रतिहेतुत्वे
मते तत्रातिव्याप्ते-
रित्यलं विस्तरेण·

सवं धर्मिन्नासंबंधेन लक्षणासत्वस्य अभिमतत्वात्· पृथिवीं विभजते· सा द्विविधेति· नित्यत्वं ध्वंसाप्रतियोगित्वं अनित्यत्वं ध्वंसप्रतियोगि-
त्वं· प्रकारान्तरेण विभजते· पुनरिति· शरीरमिति· आत्मनो भोगायतनं शरीरं· यदवच्छिन्नात्मनि भोगो जायते तद्भोगायतनं· सुखदुःखान्य-
तरसाक्षात्कारो भोगः· शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिंद्रियत्वं· शरीरेन्द्रियाभ्यां भिन्नो विषयः· एवं
च गंधवत्शरीरं पार्थिवं शरीरं· गंधवदिन्द्रियं पार्थिवेन्द्रियं· गंधवान्विषयः पार्थिवो विषय इति तत्त्वलक्षणं बोध्यं· पार्थिवशरीरं दर्शय-
ति· शरीरमिति· इन्द्रियं दर्शयति· इन्द्रियमिति· गंधग्राहकमिति प्रयोजनकथनं· घ्राणमिति तिसंज्ञा· नासाग्रेति आश्रयोक्तिः· एवमुत्तरत्र ज्ञे-
यं· पार्थिवविषयं दर्शयति· मृत्पाषाणेति· अपांलक्षणमाह· शीतेति· उत्पन्नविनष्टजलेऽव्याप्तिवारणाय शीतस्पर्शसमानाधिकरणद्र-

गन्धवती पृथ्वी· सा द्विविधा· नित्यानित्या च· नित्या परमाणुरूपा· अनित्या कार्यरूपा· पुनस्त्रिविधा· शरीरेन्द्रियविषयभेदा-
त्· शरीरमस्मदादीनां· इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति· विषयो मृत्पाषाणादिः· शीतस्पर्शवत्य आपः· ता द्विधा· नित्या अनित्याश्च·
नित्याः परमाणुरूपाः· अनित्याः कार्यरूपाः· ताः पुनस्त्रिविधा· शरीरेन्द्रियविषयभेदात्· शरीरं वरुणलोके· इन्द्रियं रसग्राहकं रस-
नं जिह्वाग्रवर्ति· विषयः सरित्समुद्रादिः· उष्णस्पर्शवत्तेजः· तद्द्विविधं· नित्यमनित्यं च· नित्यं परमाणुरूपम् अनित्यं कार्यरूपं· पुनस्त्रिविधं·

व्यत्वापरजातिमत्वं तात्पर्यं· शीतं शिलातलमित्यादौ जलसंबंधादेव शीतस्पर्शभानमिति नातिव्याप्तिः· अस्मत्सर्वं पृथिवीत्याद्यपि बोध्यं· ते-
जसो लक्षणमाह· उष्णस्पर्शवदिति· उष्णं जलमिति प्रतीतिः· तेजःसंबंधादुष्णत्वान्नातिव्याप्तिः· विषयं विभजते· भौमेति·
ननु सुवर्णं पार्थिवं पीतत्वाद्गुरुत्वात् हरिद्रावत् इति चेन्न· अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शनेन जलमध्यस्थघृतेना-
शदर्शनेन असति प्रतिबंधके पार्थिवद्रवत्वनाशाग्निसंयोगयोः कार्यकारणभावावधारणात् सुवर्णस्य अत्यन्तानलसंयोगे सति
अनुच्छिद्यमानद्रवत्वाधिकरणत्वेन पार्थिवत्वानुपपत्तेः· तस्मात् पीतद्रव्यद्रवत्वनाशप्रतिबंधकतया द्रव्यान्तरसिद्धौ नैमि-
त्तिकद्रवत्वाधिकरणतया जलत्वानुपपत्तेः· रूपवत्तया वाय्वादिभिन्नत्वे अनलाभिन्नत्वे तैजसत्वसिद्धिः· तस्य उष्णस्पर्शभास्वर-

आयतनं अवच्छे-
दकं· यदवच्छिन्न
इति सुखदुःखा-
न्यतरसाक्षात्का-
रपघे इदं इदं
वाक्यं· अत्रा-
त्मावच्छिन्नत्वे सति
इति विशेषणाद्ये-
तेन घटादीनामव-
च्छेदकत्वे-
ऽपि तत्र नातिव्याप्तिः
शरीरत्वं तु न जाति
पृथिवीत्वादिना
संकरात्· २

त॰दी॰

३

रूपयोरुपष्टंभकपार्थिवरूपस्पर्शाभ्यां प्रतिबंधादनुपलब्धिरस्मादुष्णवर्णं तेजसमिति. वायुं लक्षयति रूपरहितइति. आकाशादावतिव्या
प्तिवारणाय स्पर्शवानिति. पृथिव्यादावतिव्याप्तिवारणाय रूपरहितइति. ननु प्राणस्य कुत्रान्तर्भाव इत्यत आह. शरीरेति. संचेति.
एकस्यैव स्थानभेदात्प्राणापानशब्दैर्व्यवह्रियते इत्यर्थः. स्पर्शानुमेयो वायुः. तथाहि. योयं वायौ वाति सति अनुष्णाशीतस्पर्शो
भासते स स्पर्शः क्वचिदाश्रितः गुणत्वात्. रूपवत्. न चास्य पृथिव्याश्रयः उद्भूतस्पर्शवत्पार्थिवस्य उद्भूतरूपवत्त्वनियमात्.
न जलतेजसी. अनुष्णाशीतत्वात्. न विभुचतुष्टयं सर्वत्रोपलब्धिप्रसंगात्. न मनः परमाणुस्पर्शस्यातीन्द्रियत्वात्. तस्माद्यः प्रतीय स्प ४
मानस्पर्शाश्रयः स वायुः. ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात्. घटवदिति चेन्न. उद्भूतरूपवत्त्वस्य उपाधित्वात्. यत्र

शरीरेन्द्रियविषयभेदात्. शरीरमादित्यलोके. इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति. विषयश्चतुर्विधः. भौमदिव्योदर्याकर
जभेदात्. भौमं वह्न्यादिकं. अबिन्धनं दिव्यं विद्युदादि. भुक्तस्य परिणामहेतुरौदर्यं. आकरजं सुवर्णादि. रूपरहितः स्पर्शवान्वायुः.
स द्विविधः. नित्योऽनित्यश्च. नित्यः परमाणुरूपोऽनित्यः कार्यरूपः. स पुनस्त्रिविधः. शरीरेन्द्रियविषयभेदात्. शरीरं वायुलोके. इन्द्रियं
स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति. विषयो वृक्षादिकंपहेतुः. शरीरान्तःसंचारी वायुः प्राणः. स चैकोप्युपाधिभेदात्प्राणापानादिसंज्ञां लभते.

वास्ति यत्र प्रत्य
क्षस्पर्शाश्रयः
तत्र उद्भूतरूपव
त्वं नास्ति इ १

द्रव्यत्वे सति बहिरिन्द्रियजन्यप्रत्यक्षत्वं तत्र उद्भूतरूपवत्त्वमिति साध्यव्यापकत्वं. सति साधनाव्यापकत्वं. न चैवं तप्तवारिस्थतेजसो
प्यप्रत्यक्षत्वापत्तिः रूपत्वात्. तस्माद्रूपरहितत्वाद्वायुरप्रत्यक्षः. इदानीं कार्यरूपपृथिव्यादिचतुष्टयस्योत्पत्तिविनाशक्रमः कथ्य
ते. ईश्वरस्य चिकीर्षावशात्परमाणुषु क्रिया जायते. ततः परमाणुद्वयसंयोगे सति द्व्यणुकमुत्पद्यते. त्रिभिर्द्व्यणुकैस्त्र्यणुकं.
एवं चतुरणुकादिक्रमेण महती पृथिवी. महत्य आपः. महत्तेजः. महान्वायुरुत्पद्यते. एवमुत्पन्नस्य कार्यद्रव्यस्य संजिहीर्षावशात् क्रि हरिः
यया परमाणुद्वयविभागे सति द्व्यणुकनाशः. ततस्त्र्यणुकस्य ततश्चतुरणुकस्य. इत्येवं पृथिव्यादिनाशः. असमवायिका ३

प्रत्यक्षं तत्रोद्भूतरूपवत्त्वमिति साध्यव्यापकत्वे सति पक्षे साधनाव्यापकत्वात् ४

तु. उद्भूतरूपवत्त्वं उपाधिः सोपाधिकत्वात्प्रत्यक्ष
स्पर्शाश्रयत्वमापातासिद्धः ५

परमाणुत्वात् स्वल्पसमवा
यिकारणास्[illegible]भिन्नत्वात्

जालान्तरस्थसूर्यमरीचिस्थं सूक्ष्मं यद्दृश्यते रजः तस्य षष्ठितमो भागः परमाणुः स उच्यते १

रणनाशात् द्व्यणुकनाशः समवायिकारणनाशात् त्र्यणुकनाश इति संप्रदायः सर्वत्रासमवायिकारणनाशाद् द्रव्यनाश इति नवीनाः किं पुनः परमा
णुसद्भावे प्रमाणं उच्यते जालसूर्यमरीचिस्थं सूक्ष्मतमं यद् उपलभ्यते तत्सावयवं चाक्षुषद्रव्यत्वात् पटवत् त्र्यणुकावयवोऽपि सावयवः मह
दारम्भकत्वात् तन्तुवत् यो द्व्यणुकावयवः स एव परमाणुः स च नित्यः कार्यत्वे अनवस्थाप्रसंगात् सृष्टिप्रलयसद्भावे धाता यथापूर्वमकल्प
यदिति श्रुतिः प्रमाणं सर्वकार्यद्रव्यध्वंसः अवान्तरप्रलयः सर्वभावकार्यध्वंसो महाप्रलय इति विवेकः आकाशं लक्षयति शब्दगुणकमि
ति नन्वाकाशमपि किं पृथिव्यादिवन्नाना नेत्याह तच्चैकमिति भेदप्रमाणाभावादित्यर्थः एकत्वादेव सर्वत्र शब्दोपलब्धेर्विभुत्वमंगी
कर्तव्यमित्याह विभ्विति सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं मूर्तत्वं परिच्छिन्नपरिमाणवत्त्वं क्रियावत्त्वं वा विभुत्वादेव आत्मवन्नित्यत्व
मित्याह नित्यं चेति कालं लक्षयति अतीतेति सर्वाधारः कालः सर्वकार्यनिमित्तकारणं च दिशो लक्षणमाह प्राचीति दिगपि कार्यमा

शब्दगुणमाकाशं तच्चैकं विभु नित्यं च अतीतादिव्यवहारहेतुः कालः स चैको विभुर्नित्यश्च प्राच्यादिव्यवहार
हेतुर्दिक् सा चैका नित्या विभ्वी च ज्ञानाधिकरणमात्मा स द्विविधः परमात्मा जीवश्च तत्रेश्वरः सर्वज्ञः पर
मात्मा एक एव जीवः प्रतिशरीरं भिन्नो विभुर्नित्यश्च सुखाद्युपलब्धिसाधनमिन्द्रियं मनः

त्रे निमित्तकारणं आत्मनो लक्षणमाह ज्ञानेति आत्मानं विभजते स द्विविध इति परमात्मनो लक्षणमाह तत्रेति नित्यज्ञानाधिकरण
त्वमीश्वरत्वं नन्वीश्वरसद्भावे किं प्रमाणं न तावत्प्रत्यक्षं तद्धि बाह्यमान्तरं वा नाद्यः अरूपिद्रव्यत्वात् ~~उपादानगोचर~~ [illegible]
नान्त्यः आत्मसुखादिव्यतिरिक्तत्वात् नाप्यनुमानं लिङ्गाभावादिति चेन्न अंकुरादिकं सकर्तृजन्यं कार्यत्वात् घटवदित्यनुमानस्य
प्रमाणत्वात् उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वं उपादानं समवायिकारणं सकलपरमाण्वादिसूक्ष्मदर्शि
त्वात्सर्वज्ञत्वं यः सर्वज्ञः सर्ववित् इत्यागमोऽपि तत्र प्रमाणं जीवस्य लक्षणमाह जीव इति सुखादिकं जीवलक्षणं ननु मनुष्यो
ऽहं ब्राह्मणोऽहमित्यादौ सर्वत्राहंप्रत्यये शरीरस्यैव विषयत्वात् शरीरमेवात्मेति चेन्न करपादादिनाशे शरीरनाशादात्मनोऽपि
नाशापत्तेः नापीन्द्रियाणामात्मत्वं योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामीत्यनुसंधानाभावप्रसंगात् अन्यानुभूते

स्यानुसंधानायोगात्· तस्माद्देहेन्द्रियव्यतिरिक्तो जीव· सुखदुःखादिवैचित्र्यात्प्रतिशरीरंभिन्नः सचनपरमाणुः शरीरव्यापिसुखानुप
लब्धिप्रसंगात्· नमध्यमपरिमाणः तथासत्यनित्यत्वप्रसंगेनकृतहानाकृताभ्यागमप्रसंगात्· तस्मान्नित्योविभुर्जीवः· मनसोल
लक्षणमाह· सुखेति· स्पर्शरहितत्वेसतिक्रियावत्त्वंमनसोलक्षणं· मनोविभजते· तच्चेति· एकैकस्यात्मनएकैकंमनइत्यात्म
नामनेकत्वान्मनसोप्यनेकत्वमित्यर्थः· परमाणुरूपमिति· मध्यमपरिमाणत्वेऽनित्यत्वप्रसंगादित्यर्थः· ननुमनोविभुस्प
र्शरहितद्रव्यत्वात्· आकाशवदितिचेन्न· मनसोविभुत्वेआत्ममनःसंयोगस्यासमवायिकारणस्याभावात्· ज्ञानानुत्पत्तिप्रसं
गात्· नचविभुद्वयस्यसंयोगोस्तीतिवाच्यं· तत्संयोगस्यनित्यत्वेनसुषुप्त्यभावप्रसंगात्· पुरीततिव्यतिरिक्तप्रदेशेआत्ममनःसंयो
गस्यसर्वदापिविद्यमानत्वात्· अस्मन्मतेतुयदामनःपुरीततिंप्रविशतितदासुषुप्तिः· यदानिःसरतितदाज्ञानोत्पत्तिरित्यनुकूल

तच्चप्रत्यात्मनियतत्वादनन्तं परमाणुरूपंनित्यंच· इतिद्रव्याणि· अथगुणाः· चक्षुर्मात्रग्राह्योगुणोरूपं· तच्चशुक्लनीलपीत
रक्तहरितकपिशचित्रभेदात्सप्तविधं· पृथ्वीजलतेजोवृत्ति· तत्रपृथिव्यांसप्तविधं· अभास्वरंशुक्लंजले· शुक्लंभास्वरंतेज
सि· रसनग्राह्योगुणोरसः· सचमधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधः· पृथिवीजलवृत्तिः·

सिद्धिः· रूपंलक्षयति· चक्षुरिति· संख्यादावतिव्याप्तिवारणायमात्रपदं· रूपत्वेतिव्याप्तिवारणायगुणपदं· ननुअव्याप्यवृत्तिनी
लादिसमुदायएवचित्ररूपमितिचेन्न· रूपस्याव्याप्यवृत्तित्वनियमात्· ननुचित्रपटेअवयवरूपप्रतीतिरितिचेन्न· रूपरहितत्वे
नपटस्याप्रत्यक्षप्रसंगात्· नचरूपवत्समवेतत्वंप्रत्यक्षत्वप्रयोजकं· गौरवात्· तस्मात्पटस्यप्रत्यक्षत्वानुपपत्त्याचित्ररू
सिद्धिः· रसंलक्षयति· रसनेति· रसत्वेतिव्याप्तिवारणायगुणपदं· रसस्याश्रयमाह· पृथिवीति· आश्रयंविभज्यदर्शय
ति· पृथिव्यामिति· गंधलक्षयति· घ्राणेति· गंधत्वेतिव्याप्तिवारणायगुणपदं· स्पर्शंलक्षयति· त्वगिति· स्पर्शत्वेति
व्याप्तिवारणायगुणपदं· संयोगादावतिव्याप्तिवारणायमात्रपदं· पाकजमिति· पाकस्तेजःसंयोगस्तेनपूर्वरूपंनश्यतिरूपां

तस्मिन्घटे इत्यर्थः· अत्र परमाणुष्वेव पाको न द्व्यणुकादौ आमनिक्षिप्ते घटे परमाणुषु रूपान्तरोत्पत्तौ श्यामघटनाशे पुनर्द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिः· तत्र परमाणवः समवायिकारणं· तत्र संयोगोऽसमवायिकारणं· अदृष्टादिकं निमित्तकारणम्। द्व्यणुकादिरूपे कारणरूपमसमवायिकारणमिति पीलुपाकवादिनो वैशेषिकाः· पूर्वघटस्य नाशं विनैवावयविन्यवयवेषु परमाणुपर्यन्तेषु युगपद्रूपान्तरोत्पत्तिरिति पिठरपाकवादिनो नैयायिकाः· अत एव पार्थिवपरमाणुरूपादिकमनित्यमित्यर्थः· अन्यत्र जलादावित्यर्थः· नित्यगतमिति परमाणुगतमित्यर्थः· अनित्यगतमिति· द्व्यणुकादिनिष्ठमित्यर्थः· रूपादिचतुष्टयमुद्भूतं प्रत्यक्षं· अनुद्भूतमप्रत्यक्षं· उद्भूतत्वं प्रत्यक्षत्वप्रयोजको धर्मः· तदभावोऽनुद्भूतत्वम्। संख्यां लक्षयति· एकेति· परिमाणं लक्षयति· मानेति· परिमाणं विभजते· तच्चेति· भावप्रधानो निर्देशः· अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वं चेत्यर्थः· पृथक्त्वं

चातीतानागतसामान्याश्रयप्रत्यक्षे सामान्यस्य व्यभिचारेण हेतुत्वासम्भवात् तज्ज्ञानस्य । हेतुत्वमावश्यकमिति भावः ॥]

एवमाचार्यैरपि लक्षणाविलंबेन तस्योपेयत्वादिसाशयवतां नव्यानां मतमुपपादयति आतीतेत्यादिना। अनेक
स्यैतत्प्रकारकप्रत्यक्षत्वावच्छिन्नं प्रति निर्विकल्पकादिसाधारणतद्विषयकज्ञानत्वेनैव हेतुत्वं अन्त्ये च कार्य
स्वस्वप्रकाराश्रयतत्तत्सामान्याश्रयनिष्ठविशेष्यत्वसंबंधः कारणस्य तु स्वविषयाश्रयतत्तत्सामान्याश्रय
निष्ठविषयत्वं प्रत्यासत्तिरतो नातिप्रसंगः। नचैवं निर्विकल्पकोत्तरं जातस्याघटत्वविशिष्टप्रत्यक्षस्यापि या
वद्घटविषयकत्वापत्तिरिष्टत्वात्। सामान्यप्रकारकज्ञानत्वेन हेतुत्वोपगमेऽपि निर्विकल्पकतृतीयक्षणे याव
द्घटावगाहिप्रत्यक्षोत्पत्त्या लक्षणविलंबस्याशक्यनिर्णेतव्यत्वात्। नच तद्विषयकत्वतत्प्रकारत्वयोः समशरी
रकतया तद्विषयकत्वेनैव हेतुत्वमित्यत्र विनिगमकाभाव इति। ज्ञापमिकतद्विशिष्टप्रत्यक्षे सौरभादिविशे
ष्यकज्ञानोत्तरं जायमाने सुरभिचंदनमित्यादिप्रत्यक्षे च व्यभिचारादेव तत्प्रकारकज्ञानत्वेन हेतुत्वस्यासंभवा
त्। न च स्वप्रकाराश्रयतत्तत्सामान्याश्रयनिष्ठलौकिकमुख्यविशेष्यतासंबंधेन तत्तत्सामान्यप्रकारकप्रत्यक्षं
प्रत्येव तत्तत्सामान्यप्रकारकज्ञानत्वेन हेतुत्वं वाच्यमतो नोक्तदोषः कार्यतावच्छेदकसंबंधस्य गुरुत्वापत्तेः। चेद

नैसौरभमित्यादिज्ञानोत्तरं जायमानस्य सुरभिचंदनमित्येवं सौरभाश्रयमुख्यविशेष्यकमानसप्रत्यक्षस्य सौरभ
प्रकारकज्ञानाजन्यत्वेन तथापि व्यभिचारतादवस्थ्यं । न च तद्विषयकज्ञानत्वेन हेतुत्वे घटवदित्यादौ संसर्गविध
या संयोगज्ञानादपि संयोगवत्त्वेन तदाश्रयस्य प्रत्यक्षापत्तिरतस्तत्प्रकारकज्ञानत्वेनैव हेतुत्वं युक्तमिति प्र वाच्यं । सं
योगविशिष्टबुद्धिसामान्यं प्रति सांसर्गिकाव्यसंयोगविषयताकज्ञानहेतुतया तद्विरहादेव तत्संयोगवदितिज्ञा
नासंभवात् । सांसर्गिकसाधारण्यात्तद्विषयताकज्ञानत्वेन ~~नैव~~ तद्विशिष्टबुद्धौ हेतुतास्वीकारे तु तत्त्वापि तत्संयोगव
दित्याकारकज्ञानोत्पादेन तस्यपावत्संयोगाश्रयविषयकत्वोपगमेपि क्षत्यभावात् । वस्तुतस्तु तद्विषयकज्ञा
नत्वमात्रेण हेतुत्वे समवायेन घटत्वप्रकारकज्ञा[illegible]नात्कालिकसंबंधेन तदाश्रयस्य कालादेः प्रत्य
क्षापत्तेस्तत्संबंधावच्छिन्नतत्प्रकारकतदाश्रयप्रत्यक्षं प्रति तदितरसंबंधानवच्छिन्नतन्निष्ठविषयताकज्ञान
त्वेनैव हेतुत्वं वाच्यं । न तु तत्संबंधावच्छिन्नतत्प्रकारकज्ञानत्वेन तथा सति सुरभि चंदनमित्यादि प्रागुक्तमानसो
पनीतभाने व्यभिचारभिया तत्तद्बुद्धिभिन्नत्वस्य तत्प्रकारकज्ञाना[illegible]स्य वा कार्यतावच्छेदकानुप्रवे

व्यवहितोत्तरत्व

षेमहागौरवापत्तेः। न चैकसंबंधेन तत्प्रकारकप्रत्यक्षदशायां संबंधांतरेण तत्प्रकारकप्रत्यक्षे यदि बाधकसं
भवस्तदोत्तरकालं संबंधांतरेण तदाश्रयस्य प्रत्यक्षे स एव प्रतिबंधकोऽन्यथा पुनरिष्टमेव तदानीं संबंधांतरेण
तदाश्रयस्य प्रत्यक्षमतस्तद्विषयकज्ञानत्वेनैव लघुना हेतुत्वं युक्तमिति वाच्यं। समवायेन घटत्वप्रकारकानुमि
प्रकर्णिका त्यनंतरं जातस्य तत्संबंधेन घटत्वाश्रयप्रत्यक्षस्य संबंधांतरेण तदाश्रयविषयकत्वस्य दुर्वारतापत्तेस्तादृशा नुमितिदशा
यां संबंधांतरेण घटत्वस्य परामर्शाद्यभावादेव तत्संबंधावच्छिन्नघटत्वप्रकारकज्ञानानुत्पत्तेस्तत्र बाधकस्या
कल्पनादिति ध्येयं। नन्विद्धिपभेदेन नानाकार्यकारणभावस्य परित्यागे घटत्वप्रकारेण तदाश्रयस्य प्रत्य
क्षमेव क्वचित्स्पार्शनं क्वचिच्चाक्षुषं जायत इत्यत्र किं नियामकमत आह अपेक्षणीयं चेति। धूमादौ वाष्प
त्वादिभ्रमजनकदोषदशायां चक्षुःकरणकबोधसामग्रीसत्त्वेऽपि धूमत्वादिप्रकारकं न तदाश्रयस्य चाक्षु ४७
षं जायत इत्यतस्तद्धर्मवत्त्वबोधानुसरणं सामग्र्यंतरमिति। तथा च तत्तद्विशेषसामग्र्या तत एव चाक्षुषस्पा
र्शनादिनियम इति भावः। कारणांतरमुपेक्ष्य सामग्र्यंतरपर्यंतापेक्षायाः प्रयोजनमाह अत एवेति। अंशत

मसं।निविडंतमः।सौदामिनी।संपातः।तडित्संयोगः।आलोकस्यपश्चात्सत्त्वलाभायसौदामिनीपर्यन्तानुसरणं चरमं।विद्युत्संपातजन्यचाक्षुषोत्तरं।दूरेति।दूरत्वसामान्यमधिकृत्योक्तं।अत्रदोषवशात्तमोधर्मिकस्यैव चक्षुःकरणकद्रव्यत्ववत्ताबोधस्यसामग्र्यासत्त्वाच्चरमंनिविडद्रव्यस्यचाक्षुषोदुर्निवारएव।परंतुक्रस्थले घटत्वादिनाघटादेश्चाक्षुषसंतानवारणार्थमेवसामग्र्यपेक्षाकांक्षेतितुविभावनीयं।द्वित्रिचतुःसाक्षात्कारोपगमेक्षणसंभवादाह।संतानेति।तथाचतादृशचाक्षुषधारानुभवबाधितेतिभावः।अत्रकेचित्।चक्षुरादीन्द्रियान्तर्भाविणासामान्यज्ञानस्यअहेतुत्वेसौरभत्वप्रकारेणयत्किंचित्सौरभज्ञानोत्तरंजायमानस्यसुरभिचंदनमित्यादिचाक्षुषस्यपूर्वानुपस्थितयावत्सौरभमुख्यविशेष्यकत्वापत्तिः।सामग्रीप्रत्यासत्तेरविशिष्टत्वात्। नचेष्टापत्तिर्बहिरिन्द्रियस्यस्वायोग्यमात्रनिष्ठमुख्यविशेष्यताकज्ञानाजनकत्वनियमात्[redacted]रभत्वअस्मन्मतेसौ सामान्यज्ञानस्यसौरभत्वप्रकारकतदाश्रयघ्राणजत्वावच्छिन्नंप्रतितादृशमानसत्वावच्छिन्नंप्रत्येववाविशिष्यहेतुत्वकल्पनान्नतादृशंचाक्षुषमित्याहुः।तन्न।सौरभमुख्यविशेष्यकज्ञानस्यानुमितिशाब्दबोधघ्रा ध

रूपमि

णजादित्वरूपस्यैव पारमार्थिकतयानन्मुख्यविशेष्यकानुमित्यादिसामग्र्या विरहादेव तदानीं तादृशज्ञानास
५८ संभवात् अनुमित्यादिभिन्नस्य तादृशज्ञानस्यालौकिकतयाऽऽपादयितुमशक्यत्वात्। वस्तुतो मुख्यविशेष्यत
संबंधेन सौरभत्वादिप्रकारकचाक्षुषादिकं प्रति तादात्म्येन सौरभत्वादिना गंधत्वेन वा प्रतिबंधकत्वात्। इना
न्निरासः। तादृशसंबंधेन तथाविधचाक्षुषं तु घटादावेव सौरभत्वस्य भ्रमरूपं सुलभं न च सौरभत्वप्रका
७ रकेति व्यर्थं प्रमेयत्वादिसामान्यप्रत्यासत्त्या तादृक्षसौरभमुख्यविशेष्यकचाक्षुषस्य सर्वसंमतत्वात् त
त्रापि चक्षुर्योग्यमात्रविशेष्यकत्वोपगमे तु नन्त्वोपादेयं न चैवं घटाद्युपनीतचाक्षुषस्यापि घटादिमुख्य
विशेष्यकत्वं स्यादुक्तकार्यकारणभावस्यैवापादकत्वादिष्टापत्तौ चोपनीतं विशेषणतयैवभासत इ
त्यस्य विरोध इति वाच्यम् मुख्यविशेष्यतयाद्रव्यचाक्षुषत्वावच्छिन्नं प्रति चक्षुरादिलौकिकसन्निकर्षाभाव ५८
विशिष्टज्ञानत्वेन विषयतया प्रतिबंधकत्वादत एव सत्स्वपि भ्रमत्वादिज्ञाने लौकिकसन्निकर्षदशायां तन्मु
ख्यविशेष्यकं लौकिकप्रत्यक्षमिति ध्येयम् गंधादेरचाक्षुषत्वोपपत्तये चाक्षुषादिकं प्रति तादात्म्येनावश्यं

गंधत्वादिनाप्रतिबंधकत्वं वाच्यं। तथा च तत्रैव लौकिकविषयतामात्रं न प्रतिबध्यताघटकसंबंधः किं
तु मुख्यविशेष्यत्वनिरूपितलौकिकविषयत्वयोरन्यतरदेव संबंधादेरननुगमस्य स्वरूपसंबंधेनैतुनास्त्वालेए ६
वत्वहत्तितत्वात्। प्रकारतान्यविषयत्वं वा तादृशसंबंधो वाच्यः। सुरभिचंदनमित्यादिचाक्षुषे चंदनांशे प्र
विशेष्यता४ कारतैव सौरभत्वांशे [redacted] नत्वधिकेतकप्रतिबंधकसंबंधेदेव चाक्षुषज्ञानं न सौरभमुख्यविशेष्यक दृना
मित्यपि वदंति। तन्निसंकेचित्तु घटत्वपटत्वादौ भ्रांतं तद्विषयकज्ञानानां वा प्रत्यासत्तित्वे कार्यकारणभावा
नंत्यप्रसंगात्। सर्वेषां नित्यज्ञानव्यक्तिरेव प्रत्यासत्तिः। तस्याश्च स्वाश्रयविशेष्यकप्रत्यक्षत्वावच्छिन्नं प्रति
तद्व्यक्तित्वेन हेतुत्वं स्वाश्रयविषयकप्रत्यक्षे हेतुत्वे तु नित्यज्ञानव्यक्तेः सर्वदा सत्त्वात् किंचित्सन्निकर्षदशायां य
तद्गोचरानिर्विकल्पकोत्पत्त्या तदुत्तरं सार्वज्ञापत्तिरतः स्वाश्रयविशेष्यकत्वानुसरणं। स्वाश्रयत्वविषयत
तया यांत्वाद्यः। न च तज्ज्ञानभ्रमाश्रयत्वाविशेषाद्घट इत्याकारकप्रत्यक्षकाले पटत्वेन पटस्यापि प्रत्यक्षापत्तिः
पटत्वांत्तानदशायामिष्टापत्तेरन्यथा विशेषणज्ञानविरहादेव तदसंभवात्। नापि घटत्वेनैघटस्य प्रत्यक्ष

दशायां ताद्रूप्येण पटादेः प्रत्यक्षापत्तिर्घटत्वप्रकारेण पटादिग्रहस्य भ्रमतया तज्जनकदोषविरहादेव त-
स्याप्यसंभवात् । अन्यथा घटत्वादिसामान्यज्ञानस्य प्रत्यासत्तितायामपि भ्रमत्वघटत्वयोरुपस्थितौ भ्रमत्वे-
न पटप्रसक्तदशायां घटत्वेनापि पटस्य प्रत्यक्षापत्तेर्दुर्वारत्वात् तादृशदोषसत्वे च तथाविधभ्रमस्येष्टत्वा-
त् । न च विनिगमनाविरहाद्गगनाभावादीनां तत्तत्संयोगाभावव्यक्तीनां च तत्तद्व्यक्तित्वेन स्वाश्रयविशे-
ष्यकप्रत्यक्षं प्रति हेतुतापत्तिरिति वाच्यं । गगनाद्यभावानामन्यथासिद्धत्वात् कार्यमात्रहेतोर्निसत्तानस्य
स्वाश्रयप्रत्यक्षेप्यनन्यथासिद्धत्वात् गगनाद्यभावानां ताद्रूप्येणाहेतुत्वेपि लाघवसंभवाच्च । घटत्वादिज्ञा- ते
नत्वेन हेतुतायां घटत्वादिप्रकारकतद्ग्राहप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे गौरवापत्तेः । सुरभिचंदनमित्या-
देः सौरभत्वादिविशेष्यकप्रत्यक्षस्यानुरोधादेव सौरभत्वादेर्ज्ञानलक्षणायाः स्वीकार्यत्वादित्याहुः । ननु सा-
मान्यं यदि न प्रत्यासत्तिः किंतु तज्ज्ञानं तदा ज्ञानलक्षणया सह एतस्याः को भेद इत्यत आह । इयं चेति । सा-
मान्यलक्षणा चेत्यर्थः । इतरा । ज्ञानलक्षणा तस्येति । प्रत्यासत्तिरित्यनुषज्यते । तथा च कार्यकारणभा-

वभेदादेवप्रसो ससोर्भेदव्यवहार इति भावः॥ अत एवेति। ज्ञानलक्षणाया अतिरिक्तप्रत्यासत्तित्वस्वीकारादे
व। अन्यथायंसौरभत्वजात्युपस्थित्यनंतरं सुरभिगंध इतिवत् सुरभिचंदनमित्याकारकं सौरभत्वप्रकारेण चं
दनमित्याकारकं सौरभत्वप्रकारेण चंदनस्य भ्रमात्मकं चाक्षुषं तत्र सौरभत्वजातेर्भानं न स्यान्न हि तत्र सुरभि
गंधस्य भानसंभवो येन सामान्यलक्षणया तत्तद्धर्मप्रकारकतदाश्रयप्रत्यक्षं प्रत्येव हेतुतया सौरभत्वप्रत्या
सत्तेः कार्यतावच्छेदकतयैव सौरभत्वजातेर्भानं भविष्यतीति संभावनीयं। चक्षुषो बहिरिन्द्रियत्वेन [illegible] यो स्वा
ग्यमुख्यविशेष्यकज्ञानाजनकत्वनियमात् पूर्वानुपस्थितस्य सुरभिगंधस्य तत्र भानासंभवेनोक्तरीत्या तद्द
तजातेरपि तत्र भानासंभवादिति भावः। इत्यादावित्यादिपदे न भ्रमांतरस्य तदनुव्यवसायस्य च परिग्रहः॥
यत्तु ज्ञानस्यातदिन्द्रियजन्यत्वं नियामकमिति पूर्वमतेनायं ग्रंथस्तथा च सौरभस्मृत्यनंतरं जायमानायां
सुरभिचंदनमित्याकारकचाक्षुषप्रमायां सामान्यप्रत्यासत्त्या न सौरभत्वस्य भानसंभवः कारणाभावात्तस्य
सौरभत्वचाक्षुषस्याभावादतो ज्ञानलक्षणा पृथक्प्रत्यासत्तिरिति मतं तन्मन्दं ज्ञानस्यातदिन्द्रियजन्यत्वा

पेक्षायां सुरभिगंधास्यापितत्वभानासंभवेन सौरभत्वजातौ पर्यंतानुसरणस्य संदर्भविरोधापत्तेः। अत्रेदं तत्त्वं।
यद्यपि घटत्वादिप्रत्यक्षे तल्लौकिकप्रत्यक्षे तदलौकिकप्रत्यक्षे वा न तद्धीर्वा ज्ञानत्वेन ज्ञानलक्षणाया हेतु
त्वं घटत्वादिनिर्विकल्पके प्रमेयत्वादिसामान्यलक्षणाजन्यघटत्वादिप्रत्यक्षे च व्यभिचारात् तथापि लौकि
कालौकिकसाधारणं घटत्वादिप्रकारकं प्रत्यक्षमात्रं प्रत्येव घटत्वादिज्ञानत्वेन हेतुत्वं। अत एव प्रा
प्र थमिकस्य घटत्वचैत्रत्वादिप्रकारकप्रत्यक्षस्य घटत्वचैत्रत्वादिनिर्विकल्पकं विनानुपपत्तेस्तत्सिद्धिरा
वश्यका। पूर्वानुभूतवस्तुमात्रस्यैव तत्तात्वेन घटत्वाद्यात्मकतत्ताप्रत्यभिज्ञानुरोधेनैव परैरपि तत्का
र्यकारणभावस्याभ्युपेतव्यत्वात्। न चैवं जन्यसविकल्पकस्यैव प्रत्यासत्तित्वमिति प्राचीनगाथा
विरोधः तस्याकिंचित्करत्वात्। सखंडघटादेरुपनीतस्थल एव तथा नियमसंभवाच्च। द्रव्यत्वादिप्रका ५०
रेण घटादेरुपनयसत्त्वेपि घटत्वादिप्रकारेणातस्योपनीतप्रत्यक्षानुदयेन घटत्वादिना तत्तद्घटप्र
कारकप्रत्यक्षं प्रति घटत्वादिप्रकारेणैव तत्तद्घटाद्युपनयस्य हेतुत्वात्। अत एव घटघटत्वयोर्निर्विक

ल्पकोत्तरंघटेघटत्वस्यैवघटत्वेपिघटस्यनवैशिष्ट्यावगाहिप्रत्यक्षंद्रव्यत्वघटत्वादिप्रकारेणैवघटा
तु दीनांविशिष्टबुद्धेःपारमार्थिकतयातद्भ्रमतस्यघटत्वादिप्रकारेणघटादिज्ञानस्यतदानीमसत्वात्।
नचैवंनिर्विकल्पकोत्तरंविशेष्यविशेषणाभिसत्यादिक्रमेणापिघटवदित्याकारकप्रत्यक्षंनस्यादिष्टत्वा त,६
त्जातीतरनिष्ठप्रकारतायाःकिंचिदवच्छिन्नत्वनियमात्द्रव्यगुणकर्मणांनिरवच्छिन्नप्रकारत्वाननुभ
वात्।नचनिर्विकल्पकस्यप्रत्यासत्तित्वेस्वविषयीभूतघटाद्युपधानेनतस्यप्रत्यक्षापत्तिःविषयानुपधा स
नेनतज्ज्ञानादिप्रत्यक्षस्यालीकतयाविषयोपनायकविरहादेवमनःसन्निकृष्टस्यापितस्यातीन्द्रिय
त्वोपगमादितिवाच्यं।सत्यपिसन्निकर्षेप्रत्यक्षसामान्यंप्रत्येवादृष्टत्वादिनेवनिर्विकल्पकत्वेनापिता
दात्म्यसंबंधेनविशेषितत्वकल्पनादेवनिर्विकस्याप्रत्यक्षत्वादन्यथासुखत्वादिनिर्विकस्यस्वविषयीभू कल्प
व तसुखत्वाद्युपधानेनप्रत्यक्षस्यदुर्वारतापत्तेः।सुखत्वस्यनिर्विकल्पकद्वयसुखत्वेपिलौकिकस्यमनः
सन्निकर्षस्यसत्वात्तदुपधानेनतन्निर्विकल्पकस्यप्रत्यक्षेबाधकाभावादितियत्तुघटादिप्रकारक

प्रत्यक्षं प्रत्येव घटादिज्ञानत्वेन त्वेन हेतुत्वे घटादिविशेष्यकं घटोद्भूतमित्याकारकमानसोपनीतभानं न स्यादि
ति तन्न। घटादिधर्मिकद्रव्यत्वाद्यसंसर्गाग्रहादिवशादेव मानसधियो घटादिविशेष्यकत्वसंभवात्। घट इत्येता
वन्मात्राकारस्य बाधनिर्णयाप्रतिबध्यमानसप्रत्यक्षस्याऽसत्त्वेपि क्षसमाधानात्। न चैवं घटत्वेन घटादेरनुपस्थि स्थि
तिदशायामपि तद्विशेष्यकं मानसं प्रत्यक्षं स्यात्तद्धर्मिकासंसर्गाग्रहस्य तदानीमपि सत्त्वादिति वाच्यं घटत्व
प्रकारकप्रत्यक्षत्वस्य घटनिष्ठलौकिकविशेष्यताकप्रत्यक्षत्वव्यापकतया तदवच्छिन्नं प्रति हेतुभूतस्य घ
टज्ञानस्य विरहादेवानुपपत्तेः घटादेर्विशेष्यविधया मानसग्रहासंभवात्। घटोद्भूतमित्यादिमानसस्य
घटं ज्ञानामि साघाकारकनियमात्। अत एवोपनीतं विशेषणतयैव भासत इत्यभिधाय मानसे तु नाय
ते नियम इति प्राचीनैरप्युक्तमित्यलं पल्लवितेन। व्याप्तेः सामानाधिकरण्यस्वरूपत्वे परामर्शस्य भ्रमतापत्ति
न्य रतो भावार्थमाह धूमेत्यादि। लाघवादाह वह्निमदिति। न च केवलान्वयि न्य व्याप्तेः। व्यतिरेक्यनुमानस्यैव परैः स्वी ७१
कारादिति। केवलान्वयिनः संग्राहकत्वेपि लघुव्याप्तिमाह साध्यासंबंधिनेति। अन्यावच्छेदकत्वं स्वरूपसंबंध
भाव:

विशेषइतिहृदयं तेन प्रागुक्तावच्छेदकत्वघटनायांगौरवानवकाशः। सर्वैति। सामानाधिकरण्योपलक्षितस्वधू
मत्वादेः सकलधूमनिष्ठत्वादिति भावः। व्याप्तिर्नानात्वादिति। सामानाधिकरण्यस्वरूपतयेत्यादिः। तस्मात्पर्वती
यधूमे। अथानुभवस्मरणयोः समानप्रकारतामात्रेण हेतुमद्भावे पूर्वागृहीतस्यापि स्मरणे मानं स्या हेतु
दितिस्मृतेरगृहीतग्राहित्वेन तन्मते प्रामाण्यापत्तिरित्यन्यथा योजयति। शाब्देनुभवेति। अन्यशाब्दस्मृ
तेरिव शाब्दानुभवस्यापि साक्षादेव शाब्दबोधजनकत्वे हेतुपदं यथाश्रुतार्थकमेव अन्यथा तु प्रयोजकप
रं तद्बोध्यं। एवमिति। गोत्वप्रकारेण गोधर्मिकशक्तिग्रहस्य शाब्दधीहेतुत्वे इत्यर्थः। धर्मिणि शक्तिसत्त्वेपि तद्वि
भ्रा॰| षयकत्वस्य शाब्दधीजनकतानवच्छेदकत्वान्नै[illegible]शक्यत्वव्यवहार इति कुञ्जशक्तिवादिनः श्रीकरस्य मत
क मनुसृत्य परिहरति। जातौ व्यक्तौ चेत्यादि। जातिविषयत्वेनैवेति। जातिप्रकारकत्वेनैवेत्यर्थः। तेन मूलो
क्तस्य समानप्रकारत्वेन हेतुत्वस्य न विरोधः। अनुभावयतीति। शाब्दबोधं जनयतीति। तदपोतर। जातिशक्ति

वाद्यर्थत्वात्। कस्यचिन्मतमाह पर्वदेति। पशुत्वस्य संस्था संस्थानाख्यत्वादुच्चैःश्रवोनिष्ठतया तेजस्त्वेन सांक दि.
र्याच्च। लोमव लोमवल्लाङ्गूलवत्त्वमेव पशुत्वं तस्य चोपाधित्वेनान्यतमासमं तुल्यवित्तिवेद्यत्वाभावात्तादृशोपधि
विशिष्टधर्मिण्येव पदैः शक्तिस्वीकारादिति भावः। पृथिवीत्वादिप्रत्येकव्याप्यायदिना नैव पृथिवीमात्रवृत्ति
र्वा पशुत्वजातिः पशुपदशक्या स्यात्। यत सुवर्णस्येवोच्चैःश्रवसोपि तेजस्त्वप्रवादस्य तेजोभागस्यो
पष्टंभकतयाप्युपपत्तेस्तदाह। लिङ्गादीति। यजेतेत्यादौ कार्यत्वप्रकारेण। घटादौ लिङ्गः शक्तिग्रहाधारावि
षयकं कार्यमित्यन्वयबोधयोग्यताबलात्तादृशज्ञानं विना पूर्वं व्युत्पत्तिलाभस्य परैर्वक्ष्यमाणत्वादिति
भावः। कार्ये लिङ्गादिशक्तेस्तार्किकैरनङ्गीकारादेककार्ये शक्तिग्रहादपरकार्यस्य बोधानुपपत्तेश्चेः शं ५२
दि. कितुमशक्यत्वादाह। परेति। परे सांप्रायमतेन। न्यायमतेन च समर्पणं वैसत्त्वरसः कश्चिदिसने
नस्तुपितः। यद्यपि गोपदस्य नानार्थत्वेन यत्र वाक्यत्वप्रकारेण वाक्यस्यैन्द्रियत्वप्रकारेणैन्द्रियस्य वा बो

धकं गोपदं। तत्त्वं वाक्यत्वादेरुपाधित्वात् तद्विशिष्टव्यक्तौ शक्तेः। परेषामपि खाकाशादिपदेष्वपीति मूलं त
दभिप्रायेणैव साधु संगच्छते। तथापि लाघवेन गोत्वादिशक्तेन गवादिपदे न लक्षणयैव वाक्यत्वादिप्रका
रकबोधोपपत्तौ न वाक्यत्वादिविशिष्टे गोपदस्य शक्तिर्गौरवादित्याशयेन तादृशाभिप्रायो मूलस्य नोप
वर्णितः। [redacted] ः। अत्र गो
पदं गोत्ववदित्याकारकस्य पदविशेषकशक्तिज्ञानस्यैव शाब्दधीहेतुत्वाद्गोत्वप्रकारतामादायैव च तत्त्वस
मानप्रकारकत्वेन हेतुत्वसंभवात् यथाश्रुतमेव मूलं सम्यगिति तु मैथिलाः। यद्विशिष्टज्ञानमिति।
जन्यं यत्प्रकारकं यत्प्रकारकं ज्ञानमित्यर्थः। तेन नित्यज्ञानेन न व्यभिचारः। परेषां च व्यर्थविशेषणत्वं न दोषाये
तिभावः। तद्धीसाध्यत्वं च समवायसंबन्धावच्छिन्नं ग्राह्यं। नातः परेषामीश्वरज्ञानजन्यत्वसिद्धावपी
तरं। अपाभावत्वादिज्ञानं विनापि तद्विशिष्टप्रत्यक्षोत्पादाद्व्यभिचार इत्यत आह। अभावत्वेति। अन्य

धाविनाप्यभावत्वज्ञानमलौकिकस्याभावत्वविशिष्टप्रत्यक्षस्यप्रसंगात्‌लौकिकान्यतत्प्रकारकज्ञानंप्र
तितज्ज्ञानत्वेनहेतुत्वेचगौरवादितिभावः।यत्तुतयोरनुगमादाहवह्नीति।वन्हेर्विरुद्धरूपज्ञानत्वेनेत्य
र्थः।वैलक्षण्यंचानुमितित्वेनातःपूर्ववद्व्यभिचारः।अथात्ववन्ह्यंतरज्ञानजन्यत्वेनेसिद्धसाधनं।नचैवंवन्हित्वेनानु
जादेर्धर्मव्यापकत्वग्रहोत्तरंजायमानानुमितेर्वन्ह्यंतर[redacted]ज्ञानजन्यत्वबाधात्तत्रैवप्रकृतवन्हिज्ञानजन्य
ण। त्वसिद्ध्यर्थंसामान्यलक्षणँस्यादितिवा।वंनुज्ञायांवन्हित्वग्रहस्यतदधीनानुमितेश्चगुरुमतेऽसंभवात्तेषा
मन्यथाख्यात्यसंभवादतआह।तद्वन्हीति।अयंदेशोदग्निमानित्याद्यनुमितौविशेषणतावच्छेदकीभूततदृ
मानार्थंसामान्यलक्षणापत्तेराहविशिष्टेत्यादि।नन्वेवंविशेषणतावच्छेदकप्रकारकज्ञानंविहापिसुरभिचंद २
नमित्यादिविशिष्टवैशिष्ट्यधीःस्यादतआहवस्तुतइति।तथाचतादृशबुद्धेःप्रत्यक्षादिनियतत्वेनतदानीं
प्रत्यक्षादिसामग्य्रविरहादेवनतादृशंज्ञानमितिभावः।विशेषणतावच्छेदकादीनामित्यादिपदाद्विशेष्यादि ५३
संग्रहः।तादृशंविशिष्टवैशिष्ट्यावगाहि।अनुमित्यादिष्विति।तादृशइतिलिंगव्यत्ययेनानुपपत्तेस्ताद्

प्येण। विशेषणतावच्छेदकरूपेण येन रूपेण व्यापकतायाः शक्तेर्वा ग्रहः तेन रूपेणैवानुमितेः शाब्दस्य
वा६। चोत्पत्तेरिति भावः। अत एव वैद्रूप्यसन्निकर्षादेर्नियामकत्वादेवा तद्भानार्थं विशेषणतावच्छेदकभानार्थं म।
ननु विशेष्यादिसन्निकर्षेपि दंडत्वदंडयोर्निर्विकल्पकोत्तरं दंडे दंडत्वस्यैव दंडत्वादौ तद्दंडादेर्विशिष्ट
प्रत्यक्षानुत्पत्त्यावश्यं दंडत्वादिना तद्दंडादेर्विशिष्टबुद्धौ विशेषणतावच्छेदकाभूतदंडत्वादिना तद्दंडा
देर्ज्ञानं हेतुः। एवं दंडो रक्तो न वेति संशयोत्तरं रक्तदंडवानिति विशिष्टबोधानुत्पत्तेस्तत्र विशेषणतावच्छे ल
दकप्रकारकनिश्चयोऽवश्यं हेतुरत आह। अस्त्वेवेति। स्मृतौ व्यभिचारात् तादृशज्ञानमात्रे हेतुत्वासंभवात् ता
हप्रसक्तेरिति। विशेषणतावच्छेदकांशे धर्मितावच्छेदकासत्त्वसत्त्वाभ्यां विशिष्टवैशिष्ट्यबुद्धेर्द्वैविध्यमा द
मुदाहरन्द्वितीयमाह। दंडसंयोगवानिति। यत्किंचिदिति। तथा च विशेषणव्यक्तेः पूर्वमभानेपि न क्षतिरि
ग तिभावः। क्वचिदिति। एकेन घटादेरन्वयेन घटत्वादिसाध्यकानुमितेर्दृष्टांतत्वसंभवादाह विशेषणज्ञानत्वेन हे
तुत्वस्येति। निरस्तत्वादिसमोऽन्वयः। विशेष्यज्ञानादिसादिपदेन संबंधज्ञानग्रहः कारणतापत्तेति। तथा च

तद्ध्दिहाप्यप्रयोजकत्वमितिभावः।विशेष्यधियो हि हेतुत्वेव स्रमापेक्षापत्तेराह मानाभावेन चेति। एतेन
मानाभावेन निरस्तमित्यन्वयः। ननु सामान्यलक्षणाजन्यज्ञाने सन्निकृष्टघटांतरस्यापि विशेष्यत्वात्तस्य
च प्रागनुपस्थितत्वेन विशेष्यत्वानस्य हेतुत्वे दुर्घटमत आह जन्यतां चेति। निर्विकं अनुपस्थितत्वाप्रये कल्पा
क्षा त्वाप्रकारकं। तथा च तत्रानुपस्थितघटांशे निर्विकल्पात्मकमेव यावद्घटगोचरं ज्ञानमतो नोक्तदोषः।
घटत्वादिसामान्यस्य चेतरप्रकार प्र त्वानिरूपितविषयतासंबंधेनैव घटत्वप्रकारकप्रत्यक्षं प्रति
हेतुत्वं वाच्यमतो विनापि घटत्वस्य ज्ञानं द्रव्यत्वादिसामान्यस्य ज्ञानात् घटस्य प्रत्यक्षोत्पादेपि न व्यभि
सा चार इतिभावः। नन्वेवं प्रमेयत्वसामान्यलक्षणया घटत्वपटत्वादिघटपटादिपूर्वानुपस्थितयावद्वस्तु निर्वि
कल्पकोत्पत्तावुत्तरकाले घटादौ घटत्वादिनिश्चये बाधकाभावेन तदुत्पत्त्या सार्वज्ञं स्यादित्यत आह न चेष्टापत्तिः। त ५४
थात्वे तिप्रमेयत्वादिसामान्यप्रत्यासत्तिजन्यज्ञानोत्तरं प्र अयं घटो द्रव्यं न वेत्यादि संशयानुत्पत्तिप्रसंगादत
आह। सार्वज्ञेति। यत्तु केचिदुक्तं प्रमेयत्वसामान्यलक्षणया ~~घटत्वसामान्यलक्षणया घटत्वसामान्य~~

[redacted] घटत्वज्ञानोत्पत्तिकाले तद्व्यक्तिधर्मस्यापि निर्विकल्पकज्ञानादुत्त
रकाले घटे घटत्वस्येव घटत्वेपि तद्व्यक्तिधर्माणामवश्यंभानं सामग्रीसत्वात्तथा च घटत्वांशे ऽन्यप्रकारक
ज्ञानासंभवान्न सार्वज्ञापत्तिरिति तन्तुच्छं। घटत्वांशे धर्मान्तरप्रकारकस्येव तदंशे ऽन्यप्रकारकस्यापि ज्ञा
नस्य सामग्रीसत्वेनोत्पत्तिसंभवात्। जातिमान्घटइत्याकारकप्रत्यक्षानुरोधेनानिरवच्छिन्नघटत्वा
द्विप्रकारकज्ञानं प्रति निरवच्छिन्नघटत्वादिविषयताकज्ञानत्वेन हेतुत्वात्। अन्य [redacted]
था घटांशे घटत्वमिव घटत्वांशेपि जातित्वमवगाहमानस्येव ज्ञानस्योत्पत्त्या जातिमा
नित्येव धीः स्यात् न तु जातिमान्घटइत्याकारिकेति दिक्। तस्यास्तदजनकत्वेपीति। सामान्यप्रत्यास
त्तेर्निर्विकल्पकाजनकत्वेपीत्यर्थः। तत एवेति सामान्यजन्यज्ञाने व्यभिचारादेव विशेष्यज्ञानं न कार
णमित्यर्थः। ननु धर्मिज्ञानस्य संशयहेतुत्वे मानाभावादसन्निकृष्टधूमादीनामज्ञानेपि तद्धर्मिकः सं
शयो भविष्यतीति व्यर्थं तन्हेनापे[illegible]प्रत्यासत्तिकल्पनमत आह धर्मीत्यादि। संशय एवेति। संदेहस्य

द्वा

मी

५५ प्रत्यक्षरूपतया धर्मीन्द्रियसन्निकर्षं विना तद्विषयकत्वासंभवादिति भावः। ननु संशये धर्मिभानार्थं धर्मि
तावच्छेदकप्रकारकं कस्यचिदेव ज्ञानं तत्र हेतुरस्तु कृतं सामान्यलक्षणयेत्यत आहेमितीति। अविवादा ध२
दित्यस्य सामान्यप्रत्यासत्त्याविषयत्वादि। अविवादमेव विवृणोति। तद्धर्मत्वादि। प्रकारकेति। यथा च सामा
न्यप्रकारकत्वेनैव हेतुत्वं न तु तद्विषयकत्वमात्रेण तथोक्तमधस्तात्। धूमत्वेनेति। तदवच्छिन्नत्वविशे
ष्यताकेत्यर्थः। करणान्तरोक्तदोष इति। ननु छं वह्निव्याप्यो धूमः सुंदर इति धूमत्वसामानाधिकरण्ये
न व्याप्तिनिश्चयेपि वह्निव्याप्यो धूमः कुत्रप इति धूमधर्मिकव्याप्यभावज्ञानेंदवच्छेदकत्वावगा दसा ५
हिन एव ज्ञानस्य प्रतिबंधकत्वादित्यन्यत्र विस्तरः। व्याप्तिज्ञानं व्याप्तिनिश्चयः। असिद्ध इति। धूमत्वा
वच्छेदेन व्याप्तिनिश्चयस्यैव विरोधिनः सत्त्वादिति भावः। तद्विरोधितया धूमो वह्निव्याप्यो न वेति संदे ५५
हविरोधितया। सः। संदेहः। नानुपपन्न इत्यस्य प्रसिद्धधूम इत्यादिः। तथा च कृतं सामान्यलक्षणयेति
भावः। ननु लाघवात्तदभावनिश्चयत्वेन प्रत्यासत्तौ तद्वत्ताबुद्धिं प्रति विरोधित्वान्नैवमतस्तत्र प्रतिबंद
(नैव समानविशेष्यत्व

४ देनेत्यर्थः। तेन न श्वेतधूमत्वावच्छेदेन वह्निव्याप्यवत्तानिश्चयस्य धूमत्वप्रकारकत्वेपि तदनन्तरं धूमो वह्निव्याप्यो न वेति संदेहस्ताहक्तानिश्च
येन धूमत्वस्यावच्छेदकत्वावगाहनात्। यत्तु। धूमत्वेनेत्यस्य धूमत्वमात्रावच्छि ४

माहः। कथमित्यादिना। दृष्टेत्यादीति। समानधर्मिकस्यैव ज्ञानस्य विरोधित्वे पार्थिवं तैजसं जलीयं च रू
पं वायुत्वाभावव्याप्यमित्येवं निर्णये रूपं वायुत्वाभावव्याप्यं न वेति रूपविशेष्यकसंशयो न स्यात्
रूपमात्रे विरोधिव्याप्तिनिर्णयात् ततः समानधर्मावच्छिन्नविशेष्यताकज्ञानस्यैव विरोधित्वं वाच्यमिति
भावः। न चेति। वाच्यमित्यऽन्वयः। संभावनयेति। पार्थिवादिरूपभिन्नं न वेत्याद्याकारसंभावनयेत्यर्थः। रूपं
तथा निर्णीतव्याप्तिकेऽपि रूपेषु व्याप्तिसंदेहः। संभावनाविरहविशिष्टस्यैव समानधर्मिकनिश्चय
स्य प्रतिबंधकत्वादिति भावः। ननु चैवं प्रसिद्धधूम एव व्याप्तिनिश्चयेऽप्येतद्धूमातिरिक्तो धूमो न वेति सं
भावनयैव धूमो वह्निव्यभिचारी न वेति संशयसंभवात्कृतं सामान्यलक्षणयेत्यत आह। विशेषतश्चे
ति। तथा च विशेषतो घटत्वादिरूपेणोपस्थितानां प्रसिद्धधूमभिन्नानां धूमत्वाभाववत्तया निश्चयात्त
दतिरिक्तस्याप्रसिद्धस्योपस्थित्यर्थमेव सामान्यलक्षणा वाच्या तां विनाऽसंभावनाया एवाऽसंभवादिति
भावः। समानधर्मिकज्ञानस्य विरोधित्वे संभावनैवैव न संभवति कस्यो तैजसत्वं स्यादित्याह। एतद्

ति। तेषु विशेषदर्शनादिति। रूपेषु पार्थिवादिभिन्नत्वाभावदर्शनादित्यर्थः। अतिरिक्ते पार्थिवादि
रूपातिरिक्ते। रूपान्यन्न रूपमिति प्रासङ्गिकस्यैव विशेषदर्शनस्याकारोयं उद्देश्यतावच्छेदकविधेययो
५६ रैक्येन तादृशशाब्दस्यासंभवादिति ध्येयं। सामान्यरूपेणोक्तौ विशेषतोपि विशेषदर्शनमाह। रूपाद
यइति। आदिपदेनैकर्मत्वादिप्रकारेणाकर्मसामान्यादेः परिग्रहः। रसादयइ सत्ताद्यादिपदार्थं घटा
दिप्रकारेणाग्रं घटपटादीनां संग्रहः। ननु संभावनायां यद्विशेष्यतावच्छेदकं तदंतर्भावेणासमानध
र्मिकनिर्णयः संभावनाविरोधी। रूपान्यत्तु न रूपमित्याकारनिर्णयस्तु न संभावनाया विशेष्यतावच्छे
दकं यत्प्रसिद्धरूपभिन्नत्वं तदंतर्भावेणातः संभावनास्यादेवेति यदि रूपान्यत्वतदंतर्भावेणापि निर्ण
यमाह। प्रसिद्धत्वादि। प्रसिद्धरूपभिन्नं सर्वं न रूपमिति निर्णयसत्त्वे रूपं वायुवृत्ति न वेति पर्यव ५६
सितो रूपं वायुत्वाभावव्यभिचारि न वेत्याकारः संदेहो नोत्पद्यत इत्यत उक्तं रूपभिन्नमिति। उद्देश्यता
वच्छेदकविधेययोरैक्येन प्रसिद्धरूपभिन्नं यद्रूपभिन्नं सर्वं न रूपमित्याकारस्य शाब्दविशेषदर्शनस्या

संभवादाहरूपं रसादिर्वेति। अत्रापि प्रसिद्धेरूपादेः संबंधाप्रसिद्धरूपभिन्नं यद्रूपं रसादिकं तत्सर्वं न
रूपमित्यर्थः। तेन संभावनाधर्मितावच्छेदकांतर्भावलाभः। रूपत्वकोटिकसंभावनायां रूपभेदनि[illegible]यो
न बाधकः भिन्नविषयकत्वात्। किंतु रूपत्वाभावनिश्चय एवेत्यभिधानेप्याह। रूपत्वाभाववदिति। त
स्मादिति। प्रसिद्धरूपातिरिक्ते रूपत्वसंभावनाया इत्यर्थः। ननु चैतादृशसंभावनाविरहदशायां रूपं वा
युत्वाभाववद्व्यभिचारि न वेति संशयोऽप्रसिद्ध एवेत्यत आह। तदानीमिति। संभावनाविरहदशायां वा
युत्वनिर्णये एतादृशानुभवे विप्रतिपन्नं प्रत्याह। अतिरिक्तेति। तद्धर्मिकतदभावनिश्चयाभावत्वे
न हेतुत्वमपेक्ष्य संभावनाविरहविशिष्टतादृशनिश्चयाभावत्वेन हेतुतायां गौरवादित्यर्थः। तत्रैवानिवर्
तव्याप्तिक एवाभिश्रमतमुपन्यस्य दूषयति। यत्त्विति। तां सामान्यलक्षणां। तत्प्रतियोगीति। सामान्याभा
वप्रतियोगीत्यर्थः। अभावबुद्धौ प्रतियोगिज्ञानस्य हेतुतास्थल एव सकलप्रतियोगिज्ञानापेक्षा स्यात्
सैव तु नास्तीत्याह। नहीति। प्रथमे। तथेति। तथ सामान्यलक्षणावादिनः। द्वितीयेदंतेति। ननु चाभाव

त्वप्रकारकतल्लौकिकप्रत्यक्षे प्रतियोगिज्ञानं हेतुरत आह मानाभावादिति। अत एवाप्रतियोगिज्ञानं विनाप्यभावप्रत्यक्षं स्यादेवान्विदं भावो न वेति संशयविषयीभूतमिदंत्वं तेजोऽभावत्वमेव तथा च तत्रापि च तेजोत्वप्रतियोगिज्ञानसत्त्वान्न व्यभिचार इत्यत आह तेजोभावत्वेनेति। तद्योगादिति। भावत्वसंशयायोगादित्यर्थः। तद्धर्मविशिष्टधर्मिकतदभावग्रहं प्रति तादृशज्ञानेच्छाविरहविशिष्टज्ञानमात्रस्य प्रतिबंधकत्वात्। अन्यथा निर्वह्निर्वह्निमानित्येवमनाहार्यधीप्रसंगादिति भावः। अथाभावबुद्धौ प्रतियोगिज्ञानस्याहेतुत्वे विनापि घटादिग्रहं घटो नास्तीत्याकारकप्रत्यक्षापत्तिरत आह प्रतियोगीति। तथा चोक्तबुद्धेर्घटत्वविशिष्टवैशिष्ट्यबुद्धित्वात्तत्कारणीभूतस्य घटत्वप्रकारकज्ञानस्य विरहादेव न तस्योत्पाद इति भावः। ननु स्वातंत्र्येणाभावप्रत्यक्षे प्रतियोगिज्ञानस्याहेतुत्वेऽपि अभाव- ५८

त प्रत्यक्षे सकलप्रतियोगिविषयत्वरक्षार्थं सन्निकर्षविधयैव तदपेक्षा स्यादत आह सकलेति। तस्य सामान्याभावप्रत्यक्षस्य। अथाभावलौकिकप्रत्यक्षे प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्या

हेतुत्वे घटनिर्विकल्पकोत्तरं विशेष्ये विशेषणमिति न्यायेनाभावे घटं घटे च घटत्वमवगाह्य घटाभा
वेऽहं साक्षात्कारे लौकिकप्रत्यक्षं स्यान्न चेष्टापत्तिः। अननुभवात्। अपसिद्धान्ताच्च। घटत्वप्रकारेण घटवि
शिष्टबुद्धौ घटत्वप्रकारेण घटज्ञानस्य हेतुत्वात्तस्याकथंचित्तन्निरासेऽपि घटाज्ञानदशायामिन्द्रियसंब
द्धविशेषणतया ने साक्षात्कारस्य घटाभावलौकिकप्रत्यक्षस्य प्रसंगो दुर्वारः। अभावप्रत्यक्षं प्रतिविशि
ष्टप्रतियोगिज्ञानस्य हेतुत्वे तु प्रागुपस्थितस्य विशिष्टप्रतियोगिनोऽभावांशे विशेषणौभासमाने
बाधकाभावान्न तादृशं प्रसक्तं न च घटाभावस्यैव घटत्वावच्छिन्नाभावत्वेन प्रात्यक्षिकभ्रमे घटज्ञा
नाजन्यत्वमिति वाच्यं प्रतियोगिज्ञानस्य हेतुत्वं दुर्वचं च घटत्वावच्छिन्नाभावत्वेन प्रत्यक्षं प्रत्येव घटज्ञा
नत्वेन हेतुत्वे तु घटाज्ञानदशायां विशेषणताप्रत्यासन्ने साक्षात्कारप्रत्यक्षं दुर्वारमिति वाऽयं। घटत्वाव[illegible]
च्छिन्नप्रकारत्वाभ्यप्रकारत्वानिरूपिताभावनिष्ठलौकिकविषयताकप्रत्यक्षं प्रत्येव घटत्वादिप्रका
त्वेन रकज्ञानं हेतुत्वात्तस्य च भ्रमप्रमानिर्विकल्पकसाधारणत्वात् प्रकारत्वं तु प्रतियोगितासंबंधा

अभावसग्रहस्तदातस्मा ५

वच्छिन्नस्याग्रहमतो घटो नास्तीति प्रसक्तस्वस्वरूपसंबंधे नोभावत्वप्रकारकत्वेपि नासंग्रहः। यद्यपि वि
शिष्टप्रतियोगित्तानस्य हेतुत्वपक्षेऽभावो न घटो यद्सभावे प्रतियोगितासंबंधावछिन्नघटाभावनिश्च
५८ यद्शायामिंद्रियसंबद्धविशेषणतावशान्नेत्साकारप्रसक्तस्य दुर्वारत्वं। ~~नैवाभावस्य हेतुत्वपक्षेऽभावो न घ~~
~~टो यद्सभावे प्रतियोगितासंबंधावछिन्नघटाभावनिश्चयदशायामिंद्रियसंबद्धविशेषणतावशान्नेत्सा~~
~~कारप्रसक्तस्य दुर्वारत्वं~~ न वाभावत्वसामानाधिकरण्येन यदि घटस्यौ विरोधित्वादग्ने घटो नास्ति संबंधीर्ज्ञा
यते प्रतियोगिविशिष्टबुद्धेः सामग्रीसत्वात् अभावत्वावच्छेदेन घटाभावग्रहस्तु तदानीमसंभवी। अभावत्व
विशिष्टे प्रतियोगितासंबंधेन घटविशिष्टबुद्धिमात्रस्यैव तदवच्छेदे न प्रतियोगितासंबंधावछिन्नघटाभा
ववत्ताज्ञानविरोधित्वादिसुभययथापि नेत्साकारप्रसक्त्यापादनं तु घटमिति वा। तदसंभवेप्यभावत्वावच्छेदे ५९
न प्रतियोगितासंबंधेन घटवद्वृत्तिधर्मवत्तानिर्णयदशायां विशेषणसन्निकर्षान्नेत्साकारप्रसक्त्यापत्ते ता
वेन्नलेपत्वात्। तद्वद्वृत्तिधर्मवत्ताज्ञानस्यापि तद्वत्ताज्ञानविरोधित्वेनाभावांशे घटवत्ताज्ञानासंभवात्।

तथापिनैसाकारप्रत्यक्षस्यघटत्वावच्छिन्नप्रकारत्वान्यप्रकारत्वानिरूपिताभावनिष्ठविषयताकत्ववत्तुँ ~~[illegible]~~ कुञ्ज
ज्ञानत्वघटत्वादितत्तद्धर्मावच्छिन्नप्रकारत्वानिरूपिताभावनिष्ठविषयताकत्वेनतादृशतादृशविषयताकाभाव
प्रत्यक्षत्वावच्छिन्नंप्रतिहेतुःतस्यतत्तद्धर्मप्रकारकज्ञानकूटस्यैकदाविरहादेवंनतुनैसाकारकप्रत्यक्षंविस्तृ
तोघटत्वपटत्वादिप्रत्येकधर्मावच्छिन्नाभावत्वप्रकारकप्रत्यक्षंप्रत्येवंघटत्वपटत्वादिप्रत्येकधर्मप्रकारक
ज्ञानत्वेनहेतुत्वंतथाचतादृशप्रत्यक्षस्यसामग्र्याविरहादेवंकेवलेन्द्रियसन्निकर्षदशायामभावोनघटो
यंदृश्यादिवाघटदशायांवानाभावस्यप्रत्यक्षंविशेषसामग्र्याविरहादित्यतआहप्रतियोगिज्ञानस्यहेतुत्वेप
तिपत्तुघटत्वाद्यवच्छिन्नप्रतियोगितासंबंधेनघटत्वादिविशिष्टवैशिष्ट्यावगाह्यभावत्वावच्छिन्नधर्मिता
काभाववल्लौकिकप्रत्यक्षत्वंप्रतियोगितासंबंधेनघटत्वादिविशिष्टवैशिष्ट्यावगाहिध्वंसादिलौकिकप्रत्यक्ष
पि/ त्वेदंत्वादिप्रकारकाभावप्रत्यक्षत्वंचनानैवंद्रियसंबद्धविशेषणतायाएवंकार्यतावच्छेदकंवाच्यंनतु
प्रतियोगिज्ञानस्यैतावतैवनैसाकारप्रत्यक्षस्याप्रसंभवात्नचैवंघटाभावोनास्तीत्यभावप्रकार

कत्वेविषयकप्रत्यक्षं नस्यात्तादृशाभावस्यदृश्यत्वेनेंद्रियसंबद्धविशेषणतायास्तद्ग्राहकत्वासंभवादिंद्रि
५१ यसंयोगादेश्चासाक्षात्कारत्वावच्छिन्नंप्रत्येवहेतुत्वादितिवा अंदृश्यत्वप्रयुक्तत्वादेरिवंघटाभावत्वादिप्रभावप्र
कारकद्रव्यप्रत्यक्षत्वस्यापींद्रियसंयोगजन्यतावच्छेदकत्वोपगमात्।वस्तुतोनक्रमतः भावाभावस्यातिरिक्त
त्वाद्विशेषणतैवतद्ग्राहिकेतिसांप्रदायिकैरुक्तंतत्तुच्छंतत्तत्स्वरूपीयघटत्वाद्यवच्छिन्नाभावत्वप्रकार
कचाक्षुषत्वाद्यवच्छिन्नंप्रतितत्तत्स्वरूपीयचक्षुःसंबद्धविशेषणतात्वेनेंद्रियभेदेनपुरुषभेदेनचानंतहे
तुताकल्पनामपेक्ष्यघटत्वाद्यवच्छिन्नाभावत्वप्रकारकप्रत्यक्षत्वावच्छिन्नंप्रत्येवलाघवेनसामानाधिक
रण्यप्रत्यासत्त्याघटत्वादिप्रकारकज्ञानत्वेनहेतुतायायुक्तत्वात्संयोगसंयुक्तसमवायादिभेदेनेंद्रियसंबंधा
नामप्यननुगमाच्च।यदपिप्रसिद्धानामभावलौकिकप्रत्यक्षाणांविशिष्टवैशिष्ट्यावगाहित्वनियमात्तद्वि ५१
शेषणतावच्छेदकप्रकारकज्ञानविरहादेवतेषांनापत्तिरतिरिक्तस्यचैतेनसाकारप्रत्यक्षस्यालौकिकतयानाप
त्तिसंभावनापिपारमार्थिककार्यमतोनासामग्र्याएवकार्योत्पत्तिव्याप्यत्वोपगमात्तथाचघटत्वादिविशि

ष्टवैशिष्ट्यावगाहभावप्रत्यक्षत्वादिनानाधर्माणामिंद्रियसंबद्धविशेषणतायाः प्रतियोगिज्ञानस्य कार्ये
तावच्छेदकत्वविरहेपि न क्षतिरिति। तदसत्। यत्र पटाभावे घटत्वावच्छिन्नप्रतियोगिताकत्वादिभ्रमस्य
सामग्री नास्ति तत्रेंद्रियसंबद्धविशेषणतावलाज्ज्ञायमानस्य पारमार्थिकस्य घटो नास्तीति प्रत्यक्षस्य घटा
भावइव पटाभावेपि लौकिकविषयतासंबंधेनोत्पत्तेर्दुर्वारत्वात्तस्य च पटाभावांशे विशिष्टबुद्धिसामग्रीवि
रहान्नैसाकारकतायाः अर्थवशासंपादनीयत्वादिति दिक्। तदभावेति। तस्याभावप्रत्यक्षइत्यर्थः। तादृशाकारण
तायां साधकाभावमुक्त्वा व्यभिचाररूपं बाधकमप्याह। ध्वंसेत्यादिना। घटध्वंसो हि घटतत्प्रागभावतदत्यं
न्ताभावानामभावस्तत्त्वे घटप्रागभावादयो न संतीति प्रत्यपात्व्यवहाराच्च। एवं घटप्रागभावोपि घटतद्ध्वं
सतदत्यंताभावानामभावस्तथा घटात्यंताभावेपि घटतद्ध्वंसतत्प्रागभावानामभावस्तेषां च एकैकप्रतियो
गिज्ञानमात्रादेवग्रहात्स्फुटतरो व्यभिचार इति भावः। स्वमते ध्वंसप्रागभावयोर~~त्यंता~~त्यन्ताभावेन समं न विरोधो ध्वं
सस्य [illegible] प्रागभावः प्रागभावस्य च ध्वंसोऽतिरिक्त एवं सति उक्तमभ्युपगमादिति भावानेरुपगमादित्यर्थः। इदमुप

लक्षणं नव्यमते समनियततत्संख्यापरिमाणाद्यभावानामेकमादेकभवित्तायापरप्रतियोगित्वानादेश्चास्य
त्वाच्च तन्नैव स्वमतेपि अभिचारोद्रष्टव्यः। ननु स्वपरप्रकाशकतेजःप्रतियोगिकयावत्संसर्गाभावरूपस्यांधकार
स्यग्रहो न तादृशयावत्तेजोग्रहं विनाप्रतियोगिबुद्धेरभावप्रत्यक्षहेतुत्वात् यावत्तादृशतेजोग्रहश्च न सामान्य
लक्षणां विना संभवतीति प्राचां मतं दूषयति। अंधकारस्त्विति। तेजोविशेषेति। महत्प्रभात्वावच्छिन्नाभाववद्वस्त्वर्थः।
उद्भूतानभिभूतरूपवन्महत्तेजःसामान्याभाववत्त्वं नार्थः अनुद्भूतत्वाभावाद्यात्मकस्योद्भूतत्वादेरतीद्रियतया
तद्घटितधर्मावच्छिन्नाभावस्यायोग्यत्वेन प्रत्यक्षायोगात्। नीलत्वशुक्लत्वादिव्यापकमुद्भूतत्वमेकमेव सामान्यं
चाक्षुषप्रयोजकं पिशाचनिदाघोष्मादौ न नीलशुक्लाद्यात्मकं रूपं किं तु तद्भिन्नमेव प्रत्यक्षस्य चाक्षुषाद्यस्य त
त्त्वनियमः द्रव्यरूपस्य नीलशुक्लाद्यन्यतमत्वनियमे मानाभावादित्यस्मद्गुरुचरणमतानुसरणे तूक्तप्रकारेण वि
सम्यगिति ध्येयं। न चालोकसन्निधानेपि घटाद्यरूपे तम इति चाक्षुषापत्तिः। चक्षुःसंयुक्तसमवेतरूपविशेषणता
यास्तादृशप्रभाद्यभावेपि सत्त्वादिति वाच्यं। तमःसाक्षात्कारं प्रति चक्षुःसंयुक्तविशेषणताया एव हेतुत्वोपगमादिति

नामेकदेशवृत्ती २

भावः। एकत्रेति। एकदेशायतेजोध्वंसप्रागभावव्यक्तीनामसदेशोविरहादितिभावः। ननुपाकत्वंप्रतियोगिविशेषणं
तथाचयावंतितादृशतेजांसितत्तद्व्यक्तितेतरधर्मानवच्छिन्नतत्तद्व्यक्तिनिष्ठप्रतियोगिताकाभावानामेवतमस्त्वंवा
च्यमत आह अननुगमादिति। निरुक्ताभावानामननुगतैकधर्माभावात्तमस्यनुगताकारप्रतीतिर्नस्यादितिभावः। न
नुयावंतितादृशतेजांसितेषामेकप्रतियोगिकाभावेस[redacted]विशिष्टेनापरप्रतियोगिताकाभा
वेनविशिष्टमन्यप्रतियोगिकाभावमुपादायतेनतेनापिविशिष्टमपरापरप्रतियोगिताकाभावत्वमेवानुगमकंवा
च्यमत आह गौरवादिति। अनंतानामभावानांतमःप्रतीतिविषयत्वकल्पनामपेक्ष्यतेजोविशेषसामान्याभावस्यै
वतादृशप्रतीतिविषयतायांलाघवादितिभावः। ननुतेजोविशेषसामान्याभावस्यसन्निकर्षदशायांनितेजोभा त
प वस्यापिसन्निकृष्टतयातेषामपितमःप्रतीतिविषैता[illegible]ध्रोव्यात्कुतोगौरवमत आह तेजोविशेषेति। तेजोविशेष
१ त्वादित्यानविरहेतेजोविशेषात्वंनाभावप्रत्यक्षानुगमादितियोजना। तथाचविशिष्टप्रतियोग्यनुपस्थितौतेजस्त्वा स्थि
दिसामान्यलक्षणयाकारेपिनाभावसमुदायस्यप्रत्यक्षसंभवइतिव्यपेतमितिभावः। तेजःसामान्येति। तथाच

प्रत्यासत्त्ये ५

प्रागभावस्य प्रतियोगिसामग्र्यां सत्त्वात्तेजःसामग्रीविरहदशायामंधकारप्रतीतिर्न स्यादिति भावः। ननु भाविप्रति
योगिकप्रागभावव्यक्तिप्रसक्तस्य तादृशप्रतियोगिव्यक्तिज्ञानं विनानुसारात्तदर्थं सामान्यलक्षणावश्यकत्वास्तत आह
प्रागभावेति। तथा च घटप्रागभाव इति प्रसक्तस्य विशिष्टवैशिष्ट्यबुद्धितया घटत्वप्रकारकज्ञानमात्रं तत्र हेतुर्न
तु प्रतियोगिव्यक्तिज्ञानं तत्प्रवेशादिति भावः। ननु घटादिप्रतियोगिविशेषितप्रागभावप्रसक्तौ घटादेर्भानार्थं तस्याव
श्यं सन्निकर्षो वाच्यः। स च लौकिकप्रत्यासत्तिबाधाद्गत्यैव ज्ञानलक्षणासंपादकत्वेन सामान्यलक्षणायां पर्य
वसेदित्याशंकते अथैवमादिना। इति प्रसक्तौ। इत्याकारशब्दप्रयोजकप्रसक्तं घटीयप्रागभावो वर्तमान इत्याकारप्र
सक्तमिति यावत्। यथाश्रुते घटस्य विशेष्यतयैव भानात् प्रतियोगिविशेषितमित्यादेरसंगत्यापत्तेः। भ्रमत्वमि
ति। प्रसज्येतेति शेषः। प्रतियोगितासंबंधेन तत्तद्घटाभाववति घटत्वादिप्रकारेणापि तादृशसंबंधेन तत्तद्घटा
तु वगाहिनो ज्ञानस्य भ्रमत्वादिति भावः। स्मृतमिति। यद्यपि घटत्वप्रकारकानुभवस्यैव प्रत्यासत्तित्वौचित्यं घटो भ दौ
विष्यतीति प्रसक्तमेव भाविघटं विषयीकर्तुमर्हति तथाप्युक्तप्रसक्तौ प्रागभावांशे भाविघटस्य विशेषण

तयातस्यज्ञानंपूर्वमपेक्षितमित्याशयेनस्मृतंचस्कृतं।तन्नापिस्मृतत्वमविवक्षितंकिंतुज्ञानमात्रंतेनघटत्व
सामान्यलक्षणाजन्यानुभवादपिघटविशेषितप्रागभावप्रसक्तेःक्वचित्संभवान्नन्यूनत्वं।सामान्यप्रत्यासत्ते
राश्रयमुख्यविशेष्यकप्रसक्तिंप्रत्येवजनकत्वात्तादृशप्रत्यासत्त्याप्रागभावविशेषणत्वेनघटस्यप्रसक्तिर्नसंभवति।
अतःस्मृतिमूलकत्वमित्यप्याहुः।तंभाविघटं।तत्रघटोभविष्यतीत्याकारकप्रसक्तिं।नन्वास्तुप्रतियोगिविशेषितप्र
सक्तेःप्रतियोगिविशेष्यकमित्यर्थः।तत्रप्रसक्तिविशेषणं।तेनघटोवर्तमानप्रागभावप्रतियोगीत्याकारकस्यैवप्र
कारा२८ सक्तेस्तल्लाभः।घटत्वेनानुभूतंस्मृतंचेत्यत्रचकारोपिवार्थे।तेनक्वचित्सामान्यप्रत्यासत्त्याघटत्वेनानुभूतंक्वचि
त्तादृशानुभवबलाद्घटत्वेनस्मृतमेवभाविघटंघटोभविष्यतीतिप्रसक्तिंसामान्यप्रत्यासत्तिबलादुक्तंवातद्दू
षितंनघटोयोवर्तमानप्रागभाववृत्तिप्रसक्तस्यभाविघटप्रागभावएवघटत्वप्रकारेणप्रतियोगितयाघटांतरा
वगाहित्वेपिनभ्रमत्वंप्रतियोगितासंबंधेनघटत्वावच्छिन्नाभाववत्येवतादृशसंबंधेनघटत्वावच्छिन्नप्रकारताक
ज्ञानस्यतादृशसंबंधेनघटत्वावच्छिन्नस्यभ्रमत्वादिस्वीकृतावपिनक्षतिरितिप्राहुः।नचातिद्वितीयवाच्यमित्य

त्तेन नेनान्वयः। कारणांतरप्रवेशो गौरवादाह। चरमकारणेति। प्रतियोगिनद्रव्यादिः। अन्यदा। चरमकारणास
त्त्वदशायां। तस्याः सामग्र्याः। तथात्वे। प्रागभावध्वंसकत्वे। अतिप्रसंगादिति। सामग्र्यां प्रागभावव्यभिचारग्रहदशा
यामपि तस्य सत्त्वप्रसंगादित्यर्थः। तत्वं प्रागभावध्वंसकत्वं। तद्धेतुका। सामग्री हेतुका। न च सामग्र्याः प्रागभाव
व्याप्यत्वग्रहे पि पक्षधर्मतानिश्चयाभावात् कथमनुमितिरिति वाच्यं। घटप्रागभावव्याप्यघटसामग्र्याः कपाल
वृत्तित्वसंदेहे पि प्रागभावप्रसक्तस्यानुसादेन प्रसक्तानुरोधेनापि पक्षधर्मतानिश्चयस्यावश्यं वाच्यत्वादिति
भावः। अनुमितिरेवेति। तथा च तस्यां पूर्वाग्रहे। तस्यापि घटादेः पक्षधर्मतावच्छेदकत्वानमविरुद्धं। अनुमितौ व्या
पकतावच्छेदकप्रकारेणाज्ञानस्यैव तन्त्रत्वादिति भावः। ननु कपालादौ प्रागभावव्याप्यसामग्र्याः परामर्शे पि
घटप्रागभावस्य नानुमितिः समानविषये लौकिकप्रत्यक्षसामग्र्याः बलवत्वादत आह। तावत्कालमिति। सा
मग्र्यां प्रागभावव्याप्यत्वादिग्रहकालपर्यन्तमित्यर्थः। असत्त्वेनेति। न च यत्र चरमकारणे सति क्षणे तत्पूर्वक्षणे
तत्पूर्वक्षणे वा प्रागभावव्याप्यतया चरमसामग्र्याः परामर्शस्तत्रोत्तरकाले प्रागभावप्रसक्तेर्बाधकाभावः पूर्वोव

षयस्यसत्वादितिवाच्यंप्रागभावव्याप्यचरमकारणवत्तायाःस्वसत्वादिसाधारणनिर्णयमात्रस्यातिप्रसक्त
त्वात्तद्धिलौकिकनिर्णयस्यैवहेतुतयापूर्वंतदसंभवादितिभावः।तद्बुद्धेरेवेत्येवकारेणव्याप्यत्वादिधीव्युदासः
तथाचकार्योपधायकत्वेनचरमकारणवत्ताल्लौकिकप्रत्यक्षमेवप्रागभावस्यव्यंजकमतःस्वरूपतस्तदनुभ
वेकार्योपधायकतयातत्तत्स्मरणोत्तानप्रागभावप्रत्यक्षमेतदभिप्रायेणैवोक्तंकार्यत्वादोदृष्टइति।केचित्तुयादृ
शस्यप्रागभावप्रत्यक्षकारणकापोदैस्यानंतरंकार्यमितस्यप्रागभावप्रत्यक्षस्योत्पादोदृष्टःप्रमाणसिद्धस्त
द्बुद्धेरेवतादृशकारणकलापांतर्गतबुद्धिव्यक्तेरेवप्रागभावव्यंजकत्वोपगमादित्यर्थः॥तथाचप्रागभावव्याप्य
त्वाद्यविषयकस्यापिचरमकारणविषयकतज्ज्ञानस्यैवविशिष्टप्रागभावप्रत्यक्षहेतुत्वोपगमान्नतस्याप्य
नुमितिरितिभावः।तेनस्वरूपतोज्ञानादिकमादायनातिप्रसंगशंकालेशोपासाकूः।ननुप्रागभावव्याप्यचरमसा
मग्रीमत्त्वज्ञानमेवप्रागभावग्रहेहेतुःपरामर्शस्यानुमितिहेतुतायाःक्लृप्तत्वान्नतुकार्योपधायकतयासामग्रीमत्व
ज्ञानेनतथाकारणत्वांतरकल्पनेगौरवात्।एवंचान्यत्रसमानविषयेप्रत्यक्षसामग्र्याबलवत्वेप्यत्रतदकल्पनात्

६ [गुरवस्तु ननु घटो भविष्यतीतिशब्देनाभिलप्यमानो योऽर्थस्तज्ज्ञानमेव प्रागभावप्रत्यक्षं किंवा कार्यानुत्पाददशायामिह कपाले घटो नास्तीत्याकारकमिहेदानीं घटो नास्तीत्याकारकं वा नाद्य इत्याह भविष्यत्त्वं हीति।। द्वितीयादिविलक्षितस्य प्रत्यक्षत्वाद्यभावादिति प्राहुः] ६

प्रागभावस्यानुमितिरेव जायतामतः प्रत्यक्षासत्त्वेऽनुमानमपि प्रागभावस्येदं घटमित्याह अनुयोगितेति। अनुयोगित्वं घटादिनिष्ठप्रतियोगितानिरूपितस्वरूपसं~~ब~~म्बन्धविशेषः। आदिपदाद्ध्वंसोपाधिरूपस्य प्रागभावत्वस्य परिग्रहः। प्रागभावत्वादेरित्यादिपदात्तदीयप्रमास्याद्युपसंग्रहः। ताद्रूप्येण। प्रागभावत्वरूपेण। असंभवादिति। तथा चानागतस्यैव तस्य प्रत्यक्षमास्थेयमिति भावः। घटो भविष्यतीतिशब्दाभिलप्यमानोऽर्थ एव यदि भविष्यत्त्वं तदा तस्यातीन्द्रियत्वेन प्रत्यक्षमेव नास्ति कुतस्तत्र प्रतियोगिविषयताया रक्षायै सामान्यलक्षणास्वीकार्येत्याशयेनाह भविष्यत्त्वं हीति। भविष्यतीतिपदाभिलप्यमानं ह्यस्यार्थः। नष्टादावपि भविष्यतीति प्रयोगापत्तेरत उक्तं वर्तमानेति प्रागभावविशेषणं। तत्त्वं तत्प्रयोगकालीनत्वं। ध्वंसाभाविनीति। ध्वंसाभावि घटीयप्रागभावस्याद्यापि वर्तमानत्वात्। न चाद्यादिकालस्य प्रतियोगिन्येवान्वयः तथा सत्यद्यभाविनि परध्वंसे भविष्यतीति प्रसंगात् अद्यभाविनः परध्वंसेऽपि वृत्तेः। नापि प्रागभावे प्रतियोगिनि चोभयत्र कालादेरन्वयान्नैवमिति युक्तं। आद्य सत्ये घटो भविष्यतीति प्रयोगापत्तेः। घटतत्प्रागभावयोरेकक्षणावृत्तित्वादिति भावः। उत्पत्तिरवश्यंभविष्य ६३

त्वघटिके सत्त्वहेतुः समानार्थकत्वादित्सत्तं। स्वयं प्रागभावास्वीकारादाह। वर्तमानकालेति। अन्योत्पत्तिरपि ध्वंस
घटिता ग्राह्या। इदं निरुक्तभविष्यत्त्वं अतीन्द्रियत्वादिति। तथा चानुमानादेव तज्ज्ञानं वाच्यमित्यनागत
भानार्थं न सामान्यप्रत्यासत्त्यादरः। यद्यपि भविष्यत्त्वस्यातीन्द्रियत्वेपि भाविघटविशेषिततल्लौकिकप्रत्य
क्षानुरोधेनैव सामान्यप्रत्यासत्तिरेवश्यकीतस्य प्राचीनघटावगाहित्वे तु भ्रमत्वापत्तेः स्तथापि
वक्ष्यमाणक्रमेण शब्दादनुमानाद्वा घटत्वादिप्रकारेण भाविनो घटादेर्ज्ञानोत्पत्तौ विनापि सामान्यलक्ष स तत्त्वा
णां भाविघटादेर्भविष्यत्त्वभानं भविष्यतीति सिद्धान्तनिर्गर्वः। ननु तर्केपि भविष्यत्त्वे कालादेस्तद्घटकप्रागभा ग
वान्वयित्वे पूर्वोक्तातिप्रसंगतादवस्थ्यमत आह। इहेति। इत्यादौ इत्यादिप्रयोगे। तादृशोत्पत्तेः। विद्यमानप्रा यो
गभावप्रतियोग्युत्पत्तेः। देशविशेषः। कपालादिः। कालविशेषश्च। आद्येत्यादिः। अधिकरणत्वेनेति। प्राचीनम
ते भेदार्थकविभक्तिसमवधानस्थले नामार्थधात्वर्थयोरपि भेदेनान्वयस्योपगमात्। अधिकरणताविशेष
णत्वेनेति वार्थः। तथा चेहाद्य घटो भविष्यतीत्यादौ वर्तमानप्रागभावप्रतियोगिनी या एतत्कपालादि वृत्तिरया

दिक्कालवृत्तिरुत्पत्तिस्तदाश्रयो घट इत्याकारः शाब्दबोधः। उत्पत्तिमत्तो वेति। अधिकरणत्वेन प्रतीयत इत्यनुषंजनीयं। कालस्य प्रागभावान्वये श्वोभाविन्यद्य भविष्यतीति प्रयोगप्रसंगस्य पूर्वमुक्तत्वाद्देशस्य प्रागभावान्वये दोषमाह। अत एवेति। यतो न प्रागभावे देशकालयोरन्वयः। तत एवेत्यर्थः॥ घटादावित्यादिना घटप्रागभावसंग्रहः। तत्रापि घटध्वंसप्रागभावत्वस्य प्रामाणिकैरस्वीकारात् तत्प्रागभावेति। घटनाशप्रागभावेत्यर्थः। तन्नाशस्य नाशनास्य घटकैककपाले। नेत्यस्य वृद्धिरित्यनेन संबन्धः। न च घटध्वंसस्य प्रागभावो न घटादिकं त्वतिरिक्त एव स च तादृशकपाले नास्तीति नोक्तदोष इति वाच्यं। प्राचां मते नोक्तत्वात्। नव्यमतेऽपि देशविशेषस्योत्पत्तिविशेषणतयैवान्वयस्यानुभाविकत्वादिति भावः। उत्पत्तिमतीति देशकालयोरधिकरणत्वेनान्वये दोषमाह। नवेति। न चोत्पत्तिमति प्रागभावे चोभयत्रैव देशकालयोरन्वयो वक्तव्य इति ~~[illegible]~~ प्रागभावस्य परध्वंसः प्राक्क्षणयोरसत्त्वात्तदोष इति वाच्यं। आद्यक्षणे घटो भविष्यतीति प्रयोगानुपपत्तेः। घटतत्प्रागभावयोरेकक्षणावृत्तित्वाद्दूषकत्वादिति भावः। परध्वंसः प्राक्क्षणेऽगन्तेति गतेर्वा मित्त्वे तदाद्यासत्त्वे विद्यमानप्रागभावप्रतियोगित्वमेवासंभ

वीसत उक्तं गमिष्यतीति। ननु भविष्यत्तानुस्यातिप्रसङ्ग याभ्यामुत्पत्तिर्हि यो परस्थापनाद्वलो भविष्यतीत्यादौ वि
घमानप्रागभावप्रतियोग्युत्पत्तिकोत्पत्तिमानित्यन्वयबोधे ऽनुभवविशेषणत्वत आह। अन्त्र वेति। गगनं
द्रव्यं भवतीत्यादौ द्रव्यात्मकविशेषणसंबंधस्यानुभवात् द्रव्यादितादात्म्यमेव भुवः शक्यं समभिव्याहृ
तद्रव्यादिपदस्य तत्तदर्थे तात्पर्यग्राहकत्वात्। तादात्म्यमात्रस्य भवशक्यत्वे नामार्थस्य द्रव्यादेर्धात्वर्थ
स्यापि तन्मते भेदान्वयानुपपत्तेः एतच्चास्ति खलु क्षणं स्वरूपसत्त्वमेव भुवः शक्यं। न तु उत्पत्तिर्गौरवादित्या
शयेनोच्यते इत्यपाह। यद्यप्यसाध्यतद्देवोक्तं भवतीति लक्षणापि संभवतीति भावः। तादृशेति। विद्यमा
न प्रागभावप्रतियोगित्वमित्यर्थः। स्वयं प्रागभावास्वीकारादाह। ~~तादृशेति विद्यमानप्रागभावप्रतियोगि~~
त्वमित्यर्थः। स्वयं प्रागभावास्वीकारादाह। तादृशेति। वर्तमानकालीनोत्तरकालीनत्वमेवेत्यर्थः। प्रसाध्यतद्
त्पन्नुपपत्तेः। प्रांच वस्तु भविष्यत्तायामिति शाब्दिकस्य तैरिहानुशासनात्। घटो भविष्यतीत्यादौ धातोः का
लसंबंधरूपं सत्तामात्रमर्थः तदुत्तरप्रत्ययस्य तु वर्तमानप्रागभावप्रतियोगित्वं कालादिबोधकाद्यादि

परस्यसम्बन्धात्सत्तिरर्थः शारदि पुष्यन्ति सप्तच्छदा इत्यादौ सम्बन्धात्तदर्थकत्वनुसारनादेवं चए
तद्देशोत्पत्तिकेन कालोत्पत्तिकावयाविद्यमानप्रागभावप्रतियोगिनीस्वरूपसत्तातदाश्रयोघटइत्यव
याकारकसाक्षात्कारेहाघघटोभविष्यतीत्यादावन्वयबोधस्यसत्वदेवोत्पत्तिविषयकत्वानुभवात्
स्वरूपसत्वाननुभवाच्चेदाधितिकृतोपेक्षितमिति स्मर्तव्यं। ननु वर्तमानप्रागभावप्रतियोगितामात्रस्यैव
भस्यायार्थत्वेस्य संहितसादिभविष्यन्तायामनुशासनविरोधः स्यादतो नयादिधातूत्तरस्यैव स्यतिप्रभृते
भविष्यत्ताबोधकत्वमुपपादयति। नेष्यतीति। ननु धात्वर्थस्य यस्योपलक्षणकत्वेन क्वापि दृष्टचरम
तो दृष्टांतमाह नष्टेति नष्ट इत्यादौ चेति। आख्यातकृद्भेदेन दृष्टांतद्वयोपन्यासः। यथाक्रमं। उत्पत्तिरि दे । यथायथं
ति। प्रसाध्यत इत्यस्यानुपपत्तेः। अत्र च वर्तमानत्वादौ कृच्छक्तिकानां प्रत्ययानामनुशासनात्। क्षणाद्यावत्क्षणत्वप्रयोस्तु
परस्परमन्वयाद्विशिष्टलाभ इत्यवधातव्यं। यद्यपि कारकविभक्त्यर्थस्य धात्वर्थान्वयित्वानुरोधेन धातु
नैवोत्पत्तिर्नाशश्च प्रसाध्यत इत्येवानुमुचितं। तथापि प्रसर्पं विनाकृतत्वात् केवलनशधातोरुत्पत्तिविशि

ष्टनाशस्याप्रतीतेः प्रत्ययसत्त्वे च प्रतीतेरन्वयव्यतिरेकाभ्यां प्रत्ययस्यैवौत्स। निरूर्थः स्वभाववैचित्र्याच्च प्रत्य
यार्थेनापि ध्वंसविकारकस्य सम्बन्धे स्यान्वय इत्याशयः। एवं च नश्यतीत्यस्य वर्त्तमानप्रागभावप्रतियोग्युत्प
त्तिको यो नाशस्तत्प्रतियोगितावानित्यर्थः। नश्यतीत्यस्य वर्त्तमानोत्पत्तिको यो नाशः तत्प्रतियोगितावा
नित्यर्थः। नष्टत्वादौ च वर्त्तमानध्वंसप्रतियोग्युत्पत्तिको यो नाशस्तत्प्रतियोगितावानित्यर्थः श्रेयां तस्मा
मेवेति। प्रत्ययोपस्थाप्यो सत्त्वावेव न तु प्रकृत्यर्थनाश इत्यर्थः। ननु भविष्यत्त्वादौ यत्स्यतिप्रभृतेरनुशा इत्ते
सनं तत्त्वविद्यमानप्रागभावप्रतियोगित्वादिपरमेवास्तु भविष्यत्त्वादिपदमाख्यातस्योत्सर्थकत्वं प्रथ
मत आह एतेनेति। एतेनेदं सत्त्वावेव कालविशेषादेर्वर्त्तमानैरर्थान्वयेन। इदं च परास्तमित्यन्वयः। नश्य त्वा
तीति व्यवहारस्यादिति योजना। ध्वंसाभावविनाशस्य परध्वंसोपि सत्त्वादिति भावः। नष्टे चेति। चिरोत्पन्ननाशस्य
विद्यमानत्वादिति भावः। ~~त्वादेश्चान्वयेनादितिभावः~~ नष्टश्चेति। नष्टत्वसनुपपत्तेः स्यादिव्यवहारः॥ आ तिति। इत्यनुषज्यते
दिपदेन नष्टवानित्यादिसंग्रहः। कथं तथापीति तत्त्वस्य नाशोऽसम्भवादिति भावः। तत्र नष्टत्वादौ। अत।

परस्य सम्बन्धात्तत्सत्तिरर्थः शरदि पुष्प्यन्ति सप्तच्छदा इत्यादौ सम्बन्धात्तदर्थकत्वानुसारेणादेवं चेत्
तर्हि ध्वंसोत्पत्तिकेन कालोत्पत्तिकावयोर्विद्यमानप्रागभावप्रतियोगिनी स्वरूपसत्त्वात्तदाश्रयो घट इत्यस्व
याकाराद्युत्पत्तिकत्वेन हि घटो भविष्यतीत्यादावन्वयबोधस्य सत्त्वादेवोत्पत्तिविषयकत्वानुभवात्
स्वरूपसत्त्वाननुभवाच्च दीधितिकृतोपेक्षितमिति स्मर्तव्यम्। ननु वर्तमानप्रागभावप्रतियोगितामात्रस्यैव
प्रत्ययार्थत्वे स्य संहितसादि भविष्यत्तायामनुशासनविरोधः स्यादतोनद्यादिधातूत्तरस्यैव स्यतिप्रभृते
र्भविष्यत्ताबोधकत्वमुपपादयति। नष्टेऽसतीति। ननु धातूत्तरप्रत्ययस्योत्पत्त्यर्थकत्वेन कुत्रापि दृष्टचरम
तः दृष्टांतमाह नष्टोत्पत्तिनष्ट इत्यादौ चेति। आख्यातकृतोर्भेदेन दृष्टांतद्वयोपन्यासः पृथाक्रमं। उत्पत्ति दे। यथायथं
ति। प्रसाध्यत इत्यनुपपत्तेः। अत्र च वर्तमानत्वादेः कुत्र शक्तिकानां प्रत्ययानामुत्पत्तेः कृष्णायाश्च लक्षणयोस्तु
परस्परमन्वयाद्विशिष्टलाभः सर्वधातूनाम्। यद्यपि कारकविभक्त्यर्थस्य धात्वर्थान्वयित्वानुरोधेन धातु
नैवोत्पत्तिर्नाशश्च प्रसाध्यत इत्येवं वक्तुमुचितं तथापि प्रसङ्गं विनाकृतत्वात्केवलनशधातोरुत्पत्तिविशि

ष्टनाशस्याप्रतीतेः प्रत्ययपक्षे चाप्रतीतेरन्वयव्यतिरेकाभ्यां प्रत्ययस्यैवोत्पत्तिरर्थः स्वभाववैचित्र्याच्च प्रत्य-
यार्थेनापि सिद्धत्वकारकत्वसमर्थस्यान्वय इत्याशयः। एवं च नष्ट इत्यस्य वर्तमानप्रागभावप्रतियोग्युत्प-
त्तिको यो नाशस्तत्प्रतियोगितावानित्यर्थः। नश्यत इत्यस्य वर्तमानोत्पत्तिको यो नाशः तत्प्रतियोगितावा-
नित्यर्थः। नष्ट इत्यादौ च वर्तमानध्वंसप्रतियोग्युत्पत्तिको यो नाशस्तत्प्रतियोगितावानित्यर्थः। प्रथमं तस्या- इति
मेवेति। प्रत्ययोपस्थाप्योत्पत्तावेव न तु प्रकृत्यर्थनाश इत्यर्थः। ननु भविष्यत्वादौ यत्स्यतिप्रभृतेरनुत्पा-
सन्नं तत्त्वं विद्यमानप्रागभावप्रतियोगित्वादिपरमेवास्तु भविष्यत्वादिपदमाख्यातस्योत्पत्त्यर्थकत्वं व्यर्थ-
मत आह एतेनेति। एतेनोत्पत्तावेव कालविशेषादेर्वर्तमानैरध्वान्वयेन। इदं च परास्तमित्यन्वयः। नष्ट ता
तीतिव्यवहारस्यादिति योजना। ध्वो भाविनाशस्य परध्वोऽपि सत्त्वादिति भावः। नष्टे चेति। चिरोत्पन्ननाशस्य
विद्यमानत्वादिति भावः। ~~त्वादेर्ध्वान्वयेनादिति भावः।~~ नस्यां चेति। नष्ट इत्यनुपपन्नतेरित्यादिव्यवहार॥ आ- तिन्ति। इत्यनुसन्ध्यते
दिपदेन नष्टवानित्यादिसंग्रहः। क्तप्रत्ययार्थोऽतीतत्वस्य नाशोऽसंभवादिति भावः। तत्र नष्ट इत्यादौ। अत।

ष्ट स्यात् २

नेति। तथा च नाशस्य विद्यमानत्वेपि अतीतकालसंबंधित्वान्नष्ठ इत्यादिव्यवहारो नानुपपन्न इति भावः। ना
घवाद्याह। वर्तमानत्वं चेति। प्रथमे चिरविनष्टेपि पूर्वेद्युर्नष्ट इति चिरोत्पन्ननाशस्यातीतकालसंबंधि
त्वपूर्वदिनवृत्तित्वयोः सत्वात्। द्वितीये तु चिरविनष्टेप्यधुना नष्ट इति स्यात्। तादृशनाशस्य वर्तमानत्वादधु
नातनत्वाच्चेत्याह। चिरविनष्टेपीत्यादिना। ननु घटो भविष्यति नंक्ष्यतीत्यादौ धात्वर्थोत्पत्तिनाशादेः कथं
घटाद्यन्वयो धात्वर्थनामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वादत आह कर्त्तरीति। भविष्यतीत्यादावाश्र
यत्वरूपं नंक्ष्यतीत्यादौ च प्रतियोगित्वरूपं कर्तृत्वमाख्यातेन प्रत्याय्यते भविष्यतीत्यत्राश्रयरूपो नष्ट इ
त्यत्र च प्रतियोगिरूपः कर्त्ता कृता ख्यायते। तथा च प्रकृते धात्वर्थनामार्थयोर्[illegible]न्वयबोध एवेति भा
उभा वः। कृतित्वरूपकर्तृत्वस्याख्यातहे[illegible]मनभिधानात्। घटादिपदोत्तरमनभिहिताधिकारायत्तृतीयाप्रस
दित्याशंकामुदासाय कर्तृत्वं कर्त्ता चेति द्वयोरुपन्यासस्तेन मुख्यभाक्तकर्तृत्वमात्राभिधानस्थल एव तृ न
तीयेति भावः। ननु घटानुत्पाददशायामिह कपाले घटो नास्तीति प्रतियोगिविशेषितप्रागभावप्रसक्ता

६६

नुरोधादेवसामान्यलक्षणावाच्येसत आहकार्यानुसारेति। समयावच्छेदेनेति। कालिकास्याप्यवृत्तित्वसूचनाय अयं घटो नास्तीत्याकारकप्रत्ययः। तादृशेति। घटो नास्तीत्याकारेत्यर्थः। घटान्तरप्रतियोगिकध्वंसप्रागभावयोस्तत्त्वसत्त्वादिति भावः। यद्यपि घटप्रतियोगिकाभावमात्रावगाहनेपि न सामान्यलक्षणासिद्धिः पूर्वावगतघटव्यक्तीनां ज्ञानादेव तादृशबुद्धिसंभवात्, तथापि विस्तृगतिमनुरुध्येदं। प्रतियोगिताकमिति। अभावमवगाहत इदमनुषञ्जनीयं। तथेति। घटत्वावच्छिन्नप्रतियोगिताकावित्यर्थः। ध्वंसप्रागभावयोः सामान्यान्याभावत्वस्वीकारेपि तत्त्वकपालेन तत्संभवदसाहसंभवतो वेति। इदमपि विस्तृगतिमनुरुध्य। अन्यथा घटत्वावच्छिन्नध्वंसादेः सत्त्वेपि तत्तत्सदृशस्यघटत्वेन यत्किंचिद्व्यक्तिज्ञानादेव संभवेन तदनुरोधात् सामान्यप्रत्यासत्तेसिद्धिरिति ध्येयं। ततः पूर्वमिति। तादृशप्रतीतिपूर्वमित्यर्थः। तत्त्वकपाले। नेवदृसनुपपत्ते। न च भाविनष्टयोरसत्ताभावध्वंसादेरपि सामान्यावच्छिन्नप्रतियोगिताकत्वेबाधकाभावः। कस्यचिद्घटस्यनाशदशायामेव भाविघटोनष्टः कस्यचिद्घटस्योत्पत्तिदशायां च प्रनष्टघटोभविष्यतीतिप्रस

यापत्तेरेवबाधकत्वादिति भावः। ननु पटात्यंताभावस्य पटध्वंसाद्यविरोधित्वे पटध्वंसात्यंताभावस्वरूपस्य
स पटात्यंताभावस्य पटध्वंसदशायामपि तंतौ सत्त्वात् तदानीमपि तंतौ पटध्वंसो नास्तीति प्रतीतिः स्यात् अ
न्यथा तदानीं तंतौ पटो नास्तीत्यपि प्रतीतिर्न स्यादित्यसकामेनापि ध्वंसात्यंताभावयोर्विरोधो वाच्य इत्याश
येन शंकते। अथैवमिति। एवं पटसमवायित्वस्यापि तदत्यंताभाववत्त्वे। कपालादाविति। त्वावधारयां त
था च तंतावपि पटध्वंसदशायां तादृशबुद्धिः स्यादिति भावः। अत्रैव हेतुरत्यंताभावस्येत्यादि। तन्मतेत्या
दिः। तत्तदिति। कपालाद्यात्मक इत्यर्थः। स्वरूपाणामननुगमादभावत्वप्रतीतेर्भ्रमत्वापत्तेः। तं तु स्वरूपाणा
मतथात्वे पटसमवायित्वदशायां तत्र पटध्वंसस्य सत्ताप्रतीत्यपलापापत्तेश्चाह। अतिरिक्तेति। स च पट
सत्त्वदशायां तंतावप्यस्तीति भावः। नन्विहेदानीं घटप्रागभाव इति प्रत्यक्षे भाविनो घटस्याभावादर्थसन्निकर्ष
संपादकतया सामान्यप्रत्यासत्तिरावश्यकीत्यत आह इहेति। नन्वेयां नामिति। तथा च किमनुरोधात्सामा
न्यलक्षणा स्वीकार्येति भावः। एवमिति। भविष्यति नास्तीत्यादिप्रत्ययानामन्यथा विषयकत्वे प्रागभावत्वेन

प्रतीतेश्चानुपगमइत्यर्थः। प्रागभावस्येव ध्वंसस्याप्यसत्वे तद्घटितस्य पूर्वत्वादेः पश्चान्निर्वचनमसंगतं स्या
दतो ध्वंसे प्रमाणोपन्यासपूर्वकं प्रागभावमपाकरोति ज्ञातइत्यादि। उत्पन्नो घटध्वंसइत्याकारकबुद्धेरुत्संरो
उपनीतभानतया न वस्तुत्वव्यवस्थापकत्वमिति यदि ब्रूयात्तदा घटादेरप्युत्पत्तिर्न स्यात्तत्तुल्यत्वादित्यावेदयि
तुं जातो घटइत्यादिवदुक्तं। अतिरिक्ततामिति। अनंताभावादित्यादि। नास्तीति। प्रागभावशब्दोऽपि प्राक्काल
वृत्त्यभावबोधकतया वाक्यमेव न तु पदमिति भावः। ननु प्रागभावकालवृत्तित्वरूपं सामान्यतः पूर्वत्वं त
त्प्रागभावकालवृत्तित्वरूपं च तत्पूर्वत्वं विना प्रागभावं दुर्वचमत आह पूर्वत्वेति। तत्पूर्वत्वादीत्यादिपदेन
तदव्यवहितपूर्वत्वसंग्रहः। तच्च तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगिकालवृत्तित्वं सामान्यतः पूर्वत्वं अ
तीतकालवृत्तित्वं। तच्च ध्वंसप्रतियोगिकालवृत्तित्वं [illegible] महाप्रलयवारणाय प्रतियोग्यंतस्याव
रूपकत्वादिति भावः। तदुत्पत्तीत्यादि। स्वस्यापि स्वतृतीयक्षणादिवृत्तिध्वंसप्रतियोगिनि प्रथमादिक्षणे वृ
त त्तेः सर्वस्येव स्वपूर्वत्वापत्तिरत उक्तं तदुत्पत्तीति। अलं च तदु[illegible]त्पत्ति[illegible]दधिकरणसमयध्वंसानधिकरणस

मयमात्रं न तु तत्संसर्गोपि निवेश्यो वैयर्थ्यात्। स्वोत्पत्तिकालीनात्यंताभावप्रतियोगित्वाद्वितीयक्षणादिवृत्तित्वमपि सर्वस्यास्तीति पूर्वदोषतादवस्थ्यमतो ध्वंसेत्युक्तं। नष्टघटादिगोचरज्ञानादिव्यक्तीनां स्वोत्पत्तिक्षणवृत्तिध्वंसप्रतियोगिनि घटादौ विषयतया वर्तमानत्वेन स्वपूर्वत्वापत्तिरतः कालेति। कालिकसंबंधेन वृत्तित्वप्रापकं। ननु दुःखप्रागभावस्योत्तरकालानुवृत्ति[illegible]मुद्दिश्य प्रायश्चित्तोद्देश्यत्वस्यान्यथानुपपत्त्यैव प्रागभावः सेत्स्यतीत्यत आह दुःखात्यंताभावस्येति। अत्यंताभावस्य स्वत एवोत्तरकालानुवृत्तेः संभवात्प्रायश्चित्तमनुपयुक्तं स्यादत उक्तं स्वस्मिन्निति। ननूत्तरकालसंबंधात्मिकायां तदनुवृत्तौ प्रायश्चित्तं न हेतुस्तस्याः स्वकारणाधीनत्वात् दुःखात्यंताभावस्य तु नित्यत्वान्न तत्र प्रायश्चित्तस्य हेतुत्वं संभवतीत्यत आह दुःखसाधनेति। तथा च दुःखसाधनीभूतपापनाशं प्रत्येव प्रायश्चित्तं हेतुस्तस्य च दुःखात्यंताभावसुखतत्साधनान्यत्वेपि द्विष्टाभावत्वेनैवेष्टत्वमिति स्वयमेव बोद्धाधिकारटिप्पण्यां व्यवस्थापितमिति भावः। नत्विति। प्रवृत्तेः प्रयोज
तथा नत्वानाधीनैतदन्यथानुपपत्त्या प्रयोजनकल्पनेऽन्योन्याश्रयप्रसंगादिति भावः। ननु प्रागभावासत्वे जात

२ [ननु इयं प्रवृत्तिः सफला प्रेक्षावत्प्रवृत्तित्वादित्यनुमानस्य दुःखसाधनध्वंसादिफलकतया न तथासिद्धिः, तथापि इयं प्रवृत्तिः प्रागभावफला प्रागभावोद्देश्यकप्रवृत्तित्वादित्यनुमानात्फलत्वेन प्रागभावः सिध्येदित्यत आह प्रमाणान्तरेति। तथा च प्रागभावे मानान्तराभावात् साध्यसाधनयोरप्रसिद्ध्या न तादृशानुमितिरिति भावः।] २

स्यापि घटस्य द्वितीयादिक्षणे पुनरुत्पादप्रसंगः कपालसंयोगाद्यात्मकसामग्र्यास्तदानीमपि सत्त्वात् । न चा
पाद्यस्य पुनरुत्पादस्याप्रसिद्धिः । एतद्घटद्वितीयक्षणो यद्येतद्घटसामग्र्याः क्षणः स्यादेतद्घटोत्पत्तिप्राक्क्ष
णः स्यादित्यापादनसंभवात् । नचान्त्यसामग्रीपदेन दंडचक्रादिमात्राभिधाने सर्वैरेव घटद्वितीयक्षण
स्यैव तद्घटोपगमाद्विपर्य्ययापर्यवसायित्वं प्रागभावादिघटितकारणकूटस्याभिधाने चापादकाप्र
सिद्धिरिति वाच्यं । स्वकारणीभूतदंडचक्रादिविशिष्टोयंघटोय[illegible]दिदंडचक्राद्यतिरिक्तकारणको न स्यात्
जन्यत्वे सति तद्घटोत्पत्तेरप्यभाववान्स्यात् दंडचक्रादिजन्यस्य तत्सत्त्वे जनननियमादित्यस्य वि[illegible]क्षि व
तत्वात् । वस्तुतो घटोत्पत्तिक्षणो यदि तद्घटजनकतावच्छेदकधर्मावच्छिन्नाभाववान्स्यात्तद्घटोत्पत्तिप्रा
क्क्षणः स्यादित्येवापादनीयमतो न कश्चिद्दोष इत्यत आह यत्सत्त्वेति । तथा च जन्यद्रव्यसामान्यं प्रत्येवं द्रव्यादि
सामान्याभावत्वेन हेतुत्वात् उत्पन्नस्य घटादेर्द्वितीयादिक्षणे पुनर्नोत्पादः । न चैवं तन्तुसंयोगनाशान्महापटना
शोत्तरमवस्थितेभ्यस्तंतुसंयोगेभ्य एव पटोत्तरोत्पाददशायां पुनर्महापटोत्पत्तिवारणार्थं प्रागभावस्य हेतु

समावश्यकं द्रव्यसामान्याभावस्य प्राक् सत्त्वात् कार्योत्पत्तिक्षणे कार्यस्य प्रतिबंधासंभवादिति वा च्यं । तन्न विनष्ट
तंतुसंयोगव्यक्तेर्महापटं प्रति विशिष्य हेतुत्वात् तदभावादेव तदानीं महापटोत्पत्त्यसंभवात् अतिरिक्तस्य प्राग
भावधर्मिणः कल्पनामपेक्ष्य क्लृप्तायास्तंतुसंयोगव्यक्तेरेव विशिष्य महापटं प्रति हेतुतायाः कल्पनार्हत्वात् ।
न च तंतुसंयोगव्यक्तेरिव तत्समनियतसंयोगांतराणामपि विनिगमनाविरहाद्विशिष्य हेतुतापत्तिः तेषा
मन्यथासिद्धत्वस्य सर्वसंमतत्वात् । न चैवमपि महापटोत्पत्तिदशायामेवोक्तस्थले भाविरहेंउ पटोत्पत्तिः स्या
त्कार्यस्य पूर्वमसत्त्वेन तदानीं प्रतिबंधायोगादिति वाच्यं । महापटध्वंसस्याप्युत्तरपटं प्रति विशिष्य हेतुत्वा
दन्यथा प्रागभाववादिनामपि तदुत्पत्त्यनुपपत्तेरिति संक्षेपः । लाघवादिति । न च प्रागभावत्वाकारेण का
टोप९ र्यस्य प्रतिबंधकत्वमावश्यकमन्यथा यत्र पटे [illegible] ध्वं तंतावेव तंत्वंतरस्यारंभकः संयोगस्तत्र पूर्वपटसत्त्वेपि ६९
तत्रांशोत्तरभाविपटस्य पटोपष्ट ध्वं तंतावुत्पत्तिप्रसंगात् तत्प्रागभावस्य सत्त्वात् तथा च लाघवोपन्यासो
ऽनुचित इति वाच्यं । तन्नैव पटानुपष्ट ध्वंदासौ न तंतावुत्तरपटस्य तदानीमुत्पत्तिवारणाय पूर्वपटध्वंस

कार्यसम ३

स्योत्तरपटं प्रति हेतुतावश्यकत्वे प्रागभाववादिना कार्यस्यैकापि प्रतिबंधकत्वाकल्पनादन्यथोदासीनतंतोद्ध्वंसा
मान्याभावस्य तदानीमपि सत्वात्तन्नोत्तरपटस्य तदानीमुत्पत्तावेकतंतुकपटस्यैवाकारणपत्तेरिति भावः। कार्या
दिरिसादिपदे नैकालोत्पत्तिकध्वंसानां परिग्रहः। तेन निर्विकल्पकोत्पत्तौ नांततीयक्षणे नाशेपि चतुर्थक्षणे
क पुनर्नोत्सारः। तत्तन्निर्विकल्पसमकालोत्पन्नध्वंसैः प्रतिबंधादन्यथा निर्विकल्पे हेतुमत्तायाः सन्निकर्षो क
दिवतेस्तृतीयक्षणेप्यनुवृत्तेश्च चतुर्थक्षणेपुनस्तदुत्पत्तिप्रसंगात्। यद्यपि निर्विकल्पसमकालोत्पन्ना क
नंतध्वंसव्यक्तीनां तत्तन्निर्विकल्पकं प्रति विशिष्य प्रतिबंधकत्वकल्पनामपेक्ष्य लाघवादेकः प्रागभा
व एव हेतुः कल्पयितुमुचितस्तस्य च कारणत्वेनैव धर्मिग्राहकप्रमाणतः सिद्धा नेतरे विनिगमनाविरहः।
न च तत्तन्निर्विकल्पकसमकालोत्पन्नध्वंसवत्वं तरप्रागभावव्यक्तीनां तत्तन्निर्विकल्पप्रागभावस्यैवात्तत्त
कं न्निर्विकल्पं प्रति हेतुत्वमित्यत्र विनिगमनाविरहस्तदवस्थ एवेति वाच्यं जन्यभावत्वावच्छिन्नं प्रत्येव [illegible] क
[illegible] हेतुतां [illegible] प्रागभावत्वेन हेतुत्वं तत्तत्कार्यस्य तादात्म्यं कारणस्य प्रतियोगित्वसंबंधेनतु

ल्प्यं२

गतरूपेणहेतुतायामेकवस्तुप्रागभावस्यवस्त्वंतरहेतुत्वासंभवात्।तथापियद्यन्वयव्यतिरेकसिद्धविरोधिना
२समक्रा मपिनिर्विकल्पकालोत्पन्नध्वंसानांप्रतिबंधकत्वंपरित्यज्यनिर्विकल्पैहहेतुत्वेनपदार्थो[illegible]तरंकौ[illegible]तर्हि[illegible]रक
हारादावपिमणिमंत्रादीनांबहूनांप्रतिबंधकत्वमपेक्ष्यलाघवाद्दाहोपधायकत्वेनवस्त्वंतरकल्पनाप्रसंग
स्तस्मात्कॢप्तवस्तूनांनियामकत्वासंभवस्थलएवकारणत्वेनवस्तुसिद्धिरित्याशयः।शेषमशेषमग्रेवक्ष्या
मः।सामग्रीक्षणत्वंनकार्योत्पत्तिप्राक्क्षणत्वव्याप्यमप्रयोजकत्वात्,अतिरिक्तप्रागभावकल्पनापत्तिरूप
प्रतिकूलतर्कपराहतत्वाच्च।किंतुकार्योत्पत्तिद्वितीयक्षणोयदिसामग्र्यव्यवहितोत्तरक्षणःस्यात्कार्योत्प
मग्रीस४ त्तिमान्स्यादित्येवव्याप्तिस्तत्रचसामग्र्यव्यवहितोत्तरत्वंसामग्र्यध्वंसाधिकरणकालध्वंसानधिकरणत्वे
सतिसामग्रीकालध्वंसाधिकरणत्वरूपंकार्योत्पत्तिद्वितीयक्षणादावसिद्धंकार्योत्पादक्षणेनैवव्यवधानादिति ७०
कुतस्तेनपुनरुत्पादःप्रसंजनायद्सादिकंप्रतिबंधकत्वेनापीत्यपिकारेणध्वनितं।ननुतत्पूर्वत्वंतदुत्प
त्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वरूपंप्रागुक्तंतच्चोत्पत्तिस्तदधिकरणक्षणावृत्तिप्रागभावप्रतियो

मिसमयसंबंधरूपेण निविष्टासा चैव विनाप्रागभावं द्वे चेत्तत आह तदुत्पत्तित्वेति। स्वाधिकरणेति। यस्यो
त्पत्तिर्लक्ष्या तदेव घटादिकं स्वपदेन ग्राह्यं। तथा च तदधिकरणसमयध्वंसानधिकरणेन साद्धं तस्य सम
यसंबंधः कालिकसंबंधस्तदुत्पत्तिरित्यर्थः। घटाद्युत्पत्तिक्षणस्यापि विषयित्वव्यभिचारादिसंबंधेन घटाद्यधि
करणीभूतं यत्पूर्वोत्पन्नज्ञानादिकं तद्ध्वंसाधिकरणत्वादुत्पत्तिमात्रेऽसंभवः स्यादतः कालिकसंबंधेन स्वाधि
करणत्वाभावायाद्यं समयपदमिह हेतावुपाधिर्नेहोपाधिरित्यादिप्रतीत्या व्यभिचारादिसंबंधस्याप्यधिकरणत्व रा
नियामकतायाः स्वयमेवाग्रे वक्ष्यमाणत्वात्। अस्तु वा नष्टघटादिगोचरस्य ज्ञानादेरुत्पत्तावव्याप्तिवारकं
तत्। अन्यथा तादृशज्ञानोत्पत्तिक्षणस्यापि विषयतया तज्ज्ञानाधिकरणीभूतं यन्नष्टघटादि तद्ध्वंसाधिकर
णत्वेनाव्याप्तिप्रसंगात्। घटे ज्ञानमित्यादिव्यवहारबलेन विषयताया वृत्तिनियामकत्वादिति ध्येयं। तेन तद्घ
टादित्ति[illegible]मयध्वंसानधिकरणीभूते तेन [illegible] तद्घटादिपूर्वोत्पन्नज्ञाना[illegible]दिना विषयत्वादिसंबंध[illegible]स्यपूर्वमपि ध
य तेन तद्घटादौ सत्त्वात्तत्रातिव्याप्तिवारणाय[illegible]हिताय समयपदं। ननु ध्वंसघटितोत्पत्तिलक्षणे किंमानमि

४ [ अत्र नीलत्वादिविशिष्टघटादेरुत्पत्तिस्तन्नीलत्वादिविशिष्टघटाद्यधिकरणसमयमन्तर्भाव्य निर्वाच्या, तेन पूर्वोत्पन्नघटे पाकान्नीलघटो जातः कर्मणा भूतलसंयुक्तो जात इत्यादयो व्यवहारा इति ध्येयम्।] ४

सार्थक्यायामाचार्यस्य संवादमाह अध्वस्तेति। न ध्वस्तः क्षणयोगस्तदीयक्षणासंबंधो यत्र काले तादृशस्य क्षणयोगः कालिकसंबंधस्तस्य जनिरुत्पत्तिरित्यर्थः। तदीयक्षणयोगध्वंसाभावावच्छिन्नस्य वस्तुनः क्षणयोगो जनिरितिवार्थः। क्षणद्वयप्रवेशे वैयर्थ्यादाचष्टे क्षणः समय इति। प्रलयसत्त्वे तदुसत्त्वाव्याप्तेस्तदधिकरणसमयस्य महाकालादेः ध्वंसाप्रसिद्धेः। तदुक्तं महाप्रलयानङ्गीकार इति। तदङ्गीकारे महाप्रलयाङ्गीकारे। क्वचित् दिसादि। अन्त्यसदं यस्य घटादेरुत्पत्तिः स्यात्तत्परं। तद्धटीयतृतीयादिक्षणसंबंध एव द्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वाभावात्तद्धटीयद्वितीयादिक्षणसंबंधेऽतिव्याप्तिरतः क्वचिदपीत्युक्तं। तथा च यदीयसमयसंबंधसामान्ये यत्समयवृत्तिध्वंसप्रतियोगित्वं नास्तीत्यर्थलाभात्तत्सामान्यान्तर्गतप्रथमक्षणसंबंध एव द्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वाभावविरहान्नातिव्याप्तिः। चरमध्वंसीयसमयसंबंधसामान्य एव तदुत्पत्तिक्षणवृत्तिध्वंसप्रतियोगि[illegible]सत्त्वादुत्पत्तिमात्रोऽसंभवः स्यादतः प्रथमं सैयपदं। तथा च तदीयकालिकविशेषणतारूपसमयासंबंधसामान्यमित्यर्थः। तेन तज्ज्ञानस्यैव समयतया ज्ञानस्यापि तथात्वात् समयपदोक्तावपि ज्ञानविषयत्वात्। ७१

२ तामा[illegible]वाचनेन महाप्रलयोत्पत्तावव्याप्तिः। तद्घटादेः सपूर्वोत्पन्नज्ञानादीनां विषयत्वादिसंबंधस्यापि सामान्यान्तर्गतत्वात् तत्र च तद्घटाद्युत्पत्तिक्षणवृत्तिध्वंसप्रतियोगित्वस्यैव २

धतिव्याप्तिरितिप्रसक्तौ।प्रसक्तंचयदीयसमयसामान्यंइत्यस्यैवसम्यक्त्वेसंबंधपदंअर्थमित्यादिदूषणंयस्यार्थे
नसमयस्यानन्वयेनवैयर्थ्यानवकाशादितिध्येयं।।यत्रघटोत्पत्तिप्राक्क्षणेसर्वैर्ध्वंसादृसाकारकंज्ञानमुत्पन्नं
तत्तंतज्ज्ञानव्यक्त्यासमंघटीयकालिकसंबंधस्यापिलक्ष्यत्वात्तत्राव्याप्तिर्घटीयकालिकसंबंधसामान्यएववि
षयितया।तज्ज्ञानेवर्तमानस्यध्वंसस्यप्रतियोगित्वादतःकालिकसंबंधेनवृत्तेरभावायद्वितीयंसमय
पदं।यदिचविषयितायाध्वंसनियामकत्वाद्धटितिध्वंसप्रतियोगित्वंनास्तीत्युच्यतेतथापिनोक्तदोषइतिविभा
व्यतेतदायंकालोघटद्वितीयक्षणवान्घटोत्पत्तिक्षणवत्वादित्यत्रहेतौघटाद्यक्षणसंबंधध्वंसरूपाधिरि
तिप्रतीत्याव्यभिचाराएदिसंबंधेनघटोत्पत्तिक्षणेपिघटोत्पत्तिध्वंसस्यसत्वादुत्पत्तिमात्रेऽसंभवएवस्यादतो
द्वितीयंसमयपदं।घटादेःस्वपूर्वोत्पन्नज्ञानादिविषयतायामतिव्याप्तेस्तृतीयंसमयपदं।ननुसमयसंबंधः
कालिकविशेषणतासाचयदिसमवायादिसंबंधवदेकैवनित्यानतुस्वरूपसंबंधस्तदातदीयसंबंधसामा
न्यएवतदीयद्वितीयक्षणवृत्तिध्वंसाप्रतियोगित्वात्तत्राव्याप्तिरतआहतदधिकरणइत्यादि।यत्तुमस्य

प्रत्न यद्वृत्तिध्वंसप्रतियोगितात्वावच्छिन्नाभावाप्रसिद्ध्या तद्वृत्तावव्याप्तिर्ध्वंसप्रतियोगितायास्तेन लघुधर्मेणैव
तादृशप्रतियोगित्वावच्छेदादतस्तदधिकरणे सत्वादिति न युक्तं गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेऽपि मलक्ष
णापि तदधिकरणक्षणावृत्तित्वस्याप्रसिद्धिप्रसंगात् तदधिकरणावृत्तित्वनिष्ठप्रतियोगितायाः कालिकसं(क्षण
बंधावच्छिन्नतद्वृत्तित्वत्वेनैव लघुधर्मेणावच्छेदात् । जन्यमात्रस्यैव कालोपाधित्वात् यत्समयवृत्तिध्वंसप्रति
योगित्वं नास्तीत्यत्र तादृशप्रतियोगित्वाभावकूटस्यैवं विवक्षणे गुरुधर्मस्यानवच्छेदकत्वेप्युक्ताव्याप्तेर
भावाच्चेति दिक् । स्ववृत्तीति । तथा च यत्समयवृत्तिध्वंसप्रतियोगित्वं यद्ध्वंसाधिकरणक्षणावृत्तित्वाव्य
तेन सार्द्धं तद्व्यक्तेः समयसंबंधस्तत्क्षणकोत्पत्तिरित्यर्थः । घटाद्युत्पत्तिकालीनध्वंसप्रतियोगित्वं न घ
टाद्यधिकरणकालावृत्तित्वव्याप्यं नष्टमात्रस्यैव घटाद्यधिकरणस्थूलकालवृत्तित्वादिसंभववार
णाय क्षणपदं । घटादिद्वितीयादिक्षणावृत्तिध्वंसप्रतियोगित्वस्य चिरातीते घटाद्यधिकरणक्षणावृत्ति ७२
त्वसामानाधिकरण्याद्वितीयादिक्षणसंबंधेत्यव्याप्तिरतोऽव्याप्यपदं । यद्यपि चिरविनष्टस्य द्वितीयादि

क्षणवृत्तिध्वंसस्यैयत्किंचित्प्रतियोगित्वंघटाद्यधिकरणक्षणावृत्तित्वमाप्यमेवंतथापितदधिकरणक्ष
णावृत्तित्वंयत्समयवृत्तिध्वंसप्रतियोगित्वव्यापकंतत्समयसंबंधवत्वंविवक्षितं।नचेज्जन्यमात्रस्यकालो
पाधित्वात्तदवृत्तित्वंयत्समयवृत्तिध्वंसप्रतियोगित्वव्यापकंतत्समयसंबंधएवोस्तितिरक्त।यथासन्निवे
शवैयर्थ्यविरहादितिभावः।चिरातीततत्तानवृत्तिध्वंसप्रतियोगिनःसर्वस्यैवंघटाद्यधिकरणक्षणावृत्ति
त्वाद्घटादिनिष्ठतदीयविषयत्वादिसंबंधेऽतिव्याप्तिरतःसमयसंबंधेति।ननुतदधिकरणक्षणावृत्तित्वे
।पत्र सैक्षणत्वंस्ववृत्तिप्रतियोगिकप्रागभावानधिकरणसमयत्वंतच्चप्रागभावंविनाऽदुर्वचमतआहस्व
णत्वंचेति।यत्तुस्वजन्यविभागप्रागभावावच्छिन्नकर्मत्वरूपंक्षणत्वंप्रागभावासत्वेदुर्वचमतोऽन्यथा
निर्वक्तिःक्षणत्वंचेति।तन्न।प्रलयोस्तत्तावव्याप्तिभियाविभागप्रागभावावच्छिन्नकर्मणःक्षणत्वशंकाया
एवानुत्थानात्।स्ववृत्तीति।स्ववृत्तिर्योध्वंसस्तत्प्रतियोग्यधिकरणंयद्यत्तदन्यसमयत्वमर्थः।स्ववृत्तित्वं
प्रतियोग्यधिकरणत्वंचकालिकसंबंधेनबोध्यंतेनक्षणानांयथाकथंचित्संबंधेनतस्मिन्वर्तमानस्य

स्वोत्तरोत्पन्नध्वंसस्यप्रतियोगिमत्त्वेपिनाव्याप्तिर्नवास्वस्मिन्कालिकतयावर्तमानस्यैवध्वंसस्यप्रतियो
गिनःपूर्वोत्पन्नत्वानादेर्विषयतयाधिकरणत्वेप्यसंभवः।नित्यवस्तुव्युदासायमयपदं।लक्षणमिदंक्षणिक
स्यासशब्दादेरेग्राकारएवंअन्यथाक्षित्यादेःस्ववृत्तिध्वंसप्रतियोग्यधिकरणत्वात्प्रलयान्यक्षणमात्र
एवाक्षिप्रसंगात्अतस्तदनंगाकारेव्याहस्ववृत्तीति।स्ववृत्तिर्योध्वंसस्तत्प्रतियोगिप्रतियोगिकोभावोवाध्वं
म सस्तद्विशिष्टस्यैवत्वमित्यर्थः।तथाचक्षणिकपदार्थासत्वेपिस्थिराणामेवांसेणावच्छेदेनेतादृशयावद्ध्वंस क्ष
विशिष्टतयाक्षणत्वमितिभावः।यावद्ध्वंसविशिष्टसमयत्वंमहाप्रलयान्यक्षणमात्रेव्याप्तमतःप्रतियोगि
कांतंतदपिध्वंसविशेषणं।सृष्टिकालीनक्षणमात्रस्यैवस्वोत्तरोत्पन्नपदार्थासत्ताभाववत्वात्तत्प्रतियोगि
कध्वंसवैशिष्ट्याभावादव्याप्तितादवस्थ्यमतोध्वंसपर्यंतं।अन्तेध्वंसस्यस्ववृत्तित्वंकालिकसंबंधेनबो
ध्यं।तेनयथाकथंचिद्व्यभिचारादिसंबंधेनतत्क्षणवृत्तीनांतत्क्षणोत्तरोत्पन्नध्वंसानांकालिकसं
बंधेनवैशिष्ट्यस्यतत्क्षणेभुविरहेपिनाव्याप्तिः।प्रहरादीनामपिस्ववृत्तिध्वंसप्रतियोगिप्रतियोगि ७३

वद्धवंशानां विप्रयतमा ५

कयत्किंचिद्ध्वंसविशिष्टत्वादतिव्याप्तिरतो यावत्पदं। नष्टघटप्रतियोगिकसंयोगादेरपि स्ववृत्तिध्वंसप्र
तियोगिप्रतियोगिकत्वाद्यावत्तद्वैशिष्ट्यस्य चेत्क्वचिदपि क्षणे विरहादसंभवः स्यादतोऽभावनिरूपितस्व
ति प्रतियोगिविशेषस्वत्वलाभाय चरमं ध्वंसपदं। तेनाभावत्वमपेक्ष्य जन्याभावत्वरूपस्य ध्वंसत्वस्य गुरुत्वे
पि न क्षतिस्तस्याप्रविष्टत्वात्। अभावत्वस्येव ध्वंसत्वस्यापि अखंडत्वमते वैयर्थ्यानवकाशा[illegible]च्चा। संबंधं
नि सादृति ज्ञाने पि रुक्तयो[illegible]शिष्ट्यस्य क्षणद्वयावच्छेदेन सत्त्वात्तत्रातिव्याप्तिरतः समयपदं कालिकसंबं ध ~~ध्वंसे~~
धेन वैशिष्ट्यलाभाय। यत्तु महाप्रलयावच्छेदेन गगनादेरपि निरुक्तयावद्ध्वंसविशिष्टत्वादतिव्याप्ति
८ रतः समयपदं जन्यार्थकमिति तन्न। यथाकथंचित्संबंधेन स्व[illegible]तित्वमादायाव्याप्तिभिया कालिकसंबं
धेन स्ववृत्तित्वस्य वाच्यतया तत्संबंधेन गगनवृत्तित्वाप्रसिद्ध्यैव तत्रातिव्याप्त्यसंभवात् महाप्रलयाव
च्छेदेन महाकालस्यैव तु तादृशयावद्ध्वंसविशिष्टतया क्षणत्वं न क्षतिकरमिति ध्येयं। लाघवादाह। स्ववृत्ति
यावदिति। ध्वंसत्वं यदि जन्याभावत्वं नाखंडोपाधिस्तदा जन्यत्व[illegible]प्रवेशे वैयर्थ्ये प्रागभावानंगीकारे

णाभावत्वघटितस्यैव सम्बन्धत्वादित्याशयेन लक्षणान्तरमाह। स्ववृत्तीति। यावदभाववैशिष्ट्यं न कस्यापि क्रि
यादेरतः स्ववृत्तीति। स्ववृत्तियावत्सदार्थवैशिष्ट्यमपि न कस्यचित्स्थिरस्येत्स्याव्याप्तिरत उक्तमभावेति। कार्यो
त्पत्तिक्षणे सामग्रीक्षणो नष्ट इत्यादिव्यवहारौपयिकं विनश्यदवस्थक्रियायाः क्षणत्वमुक्त्वा घटपूर्वं त
त्सामग्रीक्षणो जायत इत्यादिव्यवहारोपयुक्तमुत्पत्स्यदवच्छिन्नक्रियादीनां क्षणत्वमाह स्वस्वेति। स्ववृत्तिः स
न्स्वपूर्ववृत्तियावान्पदार्थस्तद्विशिष्टसमयत्वमित्यर्थः। स्ववृत्तियावत्सदार्थवैशिष्ट्यं स्वपूर्ववृत्तियाव
त्सदार्थवैशिष्ट्यं वा न कस्यापि स्थिरस्य क्रियादेः संभवति स्वोत्तरोत्पन्नस्वपूर्वनष्टयोः स्वस्मिन्नसत्त्वादित्यु
भयमुपात्तं पदार्थेति तु स्वरूपकथनं न तु प्रविष्टं वैयर्थ्यात्। न च स्वस्वोत्तरवृत्तियावत्सदार्थविशिष्टत्वमित्ये
व सम्यक् वक्ष्यमाणस्वपूर्वत्वापेक्षया स्वध्वंसकालीनत्वरूपस्वोत्तरत्वप्रवेशे लाघवात् स्वक्षणावच्छिन्नस्वक्रिया ७४
देरेव तथात्वादिति वाच्यं। स्वोत्तरवर्तित्वस्याप्रसिद्ध्या प्रलयक्षणाव्याप्तिप्रसंगादिति भावः। प्रहरादेरपि अ
स्वस्वपूर्ववर्तियत्किंचित्सदार्थविशिष्टत्वात्तद्वारणाय यावदिति। न च यावत्त्वस्यैकस्याभावात्सातिस्वैकरूपे

अ

योपादानैर्नातिप्रसक्त्यत्किंचित्पदार्थप्रवेशावश्यकत्वेशेषवैय्यर्थ्यमितिवाच्यं।स्वस्वपूर्ववृत्तिपदार्थत्वव्याप
कावच्छेदकताकाधिकरणतावत्त्वस्यैवलक्षणत्वावसरेनतादृशव्यापकत्वलाभात्।समयपदंतुस्ववृत्तित्वस
स्वपूर्ववृत्तित्वस्यतादृशयावत्पदार्थवैशिष्ट्यस्यचकालिकसंबंधावच्छिन्नत्वलाभाय।तेनविषयत्वादिसं
बंधेनस्वनिष्ठस्यचिरातीततत्तानादेरुत्पत्त्यवच्छिन्नक्रियादौकालिकसंबंधेनवैशिष्ट्यविरहेपिनासंभवः।नवा
क्षणमात्रस्यैवविषयतयास्वपूर्ववर्तिनःकालिकसंबंधेनचस्थितिक्षणावच्छेदेनस्ववृत्तित्तानस्याद्यक्षणाव
च्छेदेनकालिकतयावैशिष्ट्यविरहेव्याप्तिः।नापिसर्वपदार्थोत्पत्तितानस्याप्युत्पत्त्यवच्छिन्नस्यक्षणत्वाद्वि
षयितयातदीयवैशिष्ट्यस्यक्षणद्वयावच्छेदेनसत्वात्तत्रातिव्याप्तिरिति।ननुक्षणलक्षणांतर्गतंस्वपूर्वत्वं
स्वोत्पत्तिकालीनध्वंसप्रतियोगित्वंतदंतर्गताचोत्पत्तिःक्षणघटितेत्यन्योन्याश्रयइत्यतआहस्वपूर्वत्वंचे
ति।स्वाधिकरणीभूततृतीयादिक्षणवृत्तिध्वंसप्रतियोगिकालवृत्तेःस्ववृत्तिपदार्थस्याद्यक्षणावच्छेदेनस्व
स्मिन्वैशिष्ट्याभावाल्लक्ष्यान्यक्षणमात्राव्याप्तेरतःस्वपूर्वत्वनिरुक्तौयावदितिकालविशेषणंदत्तं।ननु

क्रियामात्रस्यैवकालोपाधित्वाद्दक्षणमिदंप्रलयक्षणाव्याप्तं एवंतदुत्पत्तावुत्पत्तिक्षणेऽव्याप्तत आह जन्ये
तिमात्रपदंकृत्स्नार्थकं। तथाचतद्दिनि क्रियाया अभावेऽपि चरमध्वंसरूपकालोपाधिमादायैवलक्षणसम
र्थनमिति। नित्यस्यकालिकसंबंधेनाव्यावर्तकतया जन्यावच्छिन्नस्यैवतथात्वमुचितमित्याशयेनपदार्थ
मात्रंपरित्यज्यजन्यमात्रस्येत्युक्तं। केचित्तुनतुमहाप्रलयावच्छेदेनस्ववृत्तियावद्ध्वंसविशिष्टत्वादिलक्षणा
क्रांतस्यमहाकालस्याखिलक्षणत्वात्तत्रेदंलक्षणमव्याप्तं निरुक्ततत्पूर्वत्वाप्रसिद्धेरत आह जन्यमात्रस्येति।
क तथाचोत्पत्तिघटेक्षणत्वस्यमहाकालेऽसत्त्वेऽपिनक्षतिर्जन्यंकालोपाधिरूपंक्षणमादायैवसर्वत्रोत्पत्ति
लक्षणसंभवादितिभावइत्याहुः। केषांचित्तुसाखिलक्षणमाह। योयदित्यादि। सर्वेध्वंसाइत्याकारकविनश्य
द्वस्तुबुध्यासार्द्धघटीयकालिकसंबंधस्यापिलक्ष्यतया तत्राव्याप्तिस्तादृशबुद्धौविषयितयावर्तमानस्य
ध्वंसस्यप्रतियोगिनिभाविकालेघटस्यदृष्टेरतोध्वंसस्यकालिकसंबंधेनवृत्तिमत्त्वाभायकालपदं एवंता ७५
दृशध्वंसप्रतियोगित्वंतस्यतद्वृत्तित्वमित्यत्रवृत्तिमत्त्वंकालिकसंबंधेनबोध्यं। तेनातीतविषयकत्वा

Nepal Sanskrit University, Balmoki Campus, Kathmandu

नस्यो सत्त्वेनाव्याप्तिर्विषयतासंबंधेऽतिव्याप्तिर्वा। अन्यतत्तत्समयवृत्तिध्वंसप्रतियोग्यवृत्तित्वे सति तत्त
स्तू त्समयवृत्तित्वरूपा तल्लक्षणे सत्त्वयावद् [illegible] नामेकैकैवोसत्ति नैत्वान्वयभेदेन विभिन्नतायोपदिसनेयोल्लेख
प्रदर्शनमात्रपरत्वात्। न च ध्वंसप्रतियोगिवृत्तित्वमपेक्ष्य महाप्रलयवृत्तिध्वंसप्रतियोगिवृत्तित्वस्य गुरु
त्वात्तदवच्छिन्नाभावाप्रसिध्याहा प्रलयोसत्ताव्याप्तिरिति वाच्यं। प्रागेव दत्तोत्तरत्वादिति ध्येयं। स्वानधिक
रणेप्यिति। तन्तुमात्रस्यैव तंतुत्वेन तत्पटत्वरूपयोग्यत्वात्तदनधिकरणतंतुघपितत्सामग्रीसत्त्वादिति भा
वः। न च तत्पटत्वस्य कार्यतानवच्छेदकत्वात्तदवच्छिन्नस्यान्यत्रापसंसंभवः। पटत्वावच्छिन्नसामग्रीसत्त्वे
चेपटत्वावच्छिन्न [illegible] मन्यत्रोस्यघत एवेति वाच्यं। पटमात्रस्यैव तत्तत्पटत्वेन कार्यत्वस्यावश्यकत्वात्।
अन्यथायत्नेतंतुत्रयारब्धपटस्यैकतंतुनाशाद्विनाशे सत्यनन्तरक्षण एव तदारंभकतंत्वंतरस्यनाश
स्तत्तदानीमेवावस्थिततंतौ पटांतरोत्पादप्रसंगात्। पटत्वावच्छिन्नस्य सामग्रीसत्त्वात्। न चेष्टापत्तिः।
एकतंतुपटस्यानंगीकारात्। न च विनश्यत्तंतुमादाय पटोत्पादः। कार्यकालावृत्तेः समवायित्वायोगात्त

स्मात्सिद्धतत्तत्पटव्यक्तिंप्रतिविशिष्यकॢप्तकारणस्यविरहादेवतत्तत्पटसामान्यस्यानुत्पत्तिरतस्तत्तत्पट
त्वावच्छिन्नस्यापिस्वानधिकरणेघापत्तिसंभवइतिभावः।सहस्त्रादीनामिति।तदारंभकेत्यादिः।तत्तंतुत्वे
नेत्यादि।नचसमवायेनतत्पटंप्रतितादात्म्येनतत्तंतुत्वेनहेतुत्वेमिथोव्यभिचारःकालिकसंबंधेनेव
विशेषतःकार्यकारणभावस्तुनतत्पटानधिकरणतंतुषूत्पत्तिवारकःसंभवतीतिवाच्यंतत्तत्तंतु
निरूपितसमवायेनतत्पटंप्रत्येवतादात्म्येनतत्तत्तंतोर्हेतुत्वात्तादृशसमवायेनतत्पटस्यात्त
तंतावसत्त्वेनव्यभिचारासंभवात्।नचैवंतादृशसमवायेनस्वानधिकरणतंतुषुतत्पटस्यानुत्पादे
पिसमवायमात्रेणतत्तत्पटोत्पादोदुर्वारइतिवाच्यं।समवायमात्रस्यतादृशकार्यतानवच्छेदकतयातत्
संबंधेनान्यत्रतत्पटोत्पत्त्यसंभवादितिभावः।यत्तुसमवायेनतत्पटत्वावच्छिन्नंप्रत्येवतत्तत्तंतुत्वेन
हेतुत्वंतावत्तंतुनिष्ठसहस्रत्वादिसंख्यायाएवकारणताघटकसंबंधत्वेनव्यभिचारासंभवादितितत्तु
च्छं।यस्यतंतोर्द्वितीयक्षणएवतत्तंत्वंतरसंयोगःस्यात्ततीयक्षणेसहस्रतंतुकपटोत्पत्तिस्तत्रैवतंतौव्य

भिचारितादवस्थ्यात् । सहस्रत्वादिसंख्यायाः समानाधिकरण्यायावदेकत्वसापेक्षतयाद्रव्यस्योत्पत्तिहेतौ
लक्षणेतदसंभवात् । केचित्तुयावंतःकार्यतावच्छेदकधर्मावच्छिन्नास्तत्तस्यैकस्ययत्किंचिदाश्रयनिष्ठा
भावप्रतियोगितानवच्छेदकधर्मवत्त्वमेवकारणताघटकंतथाचसमवायेनतत्सत्त्वावच्छिन्नंप्रत्येवता
तं दात्म्येनतत्तत्तंतुत्वेनहेतुत्वंतुघटं । तत्सदाश्रयीभूततत्तंतौतत्तंतुभेदस्यासत्त्वात् । एतेनसंयोगादि
वं कंप्रत्यपिकर्मादेःकारणत्वंव्याख्यातं । नचैवंलक्षणस्यापिद्रव्येपिद्वित्वाद्युत्पत्तिःस्यात्द्रव्यान्तरैकसमा
दायोक्तक्रमेणसामग्र्यासत्त्वादितिवाच्यंदृष्टत्वात् । यावत्त्वप्रवेशस्तुवह्नित्वावच्छिन्नंप्रत्येवतृणत्वादिहे
त्ववारणार्थं । नचैवंकार्यसमानाधिकरणवृत्तिधर्मत्वमेककारणत्वेननिवेश्यतामन्यथासिद्धेनिरूपकत्वद
लेनैवव्यापकतानवच्छेदकान्तरव्युदाससंभवादितिवाच्यं । व्यभिचारग्रहाप्रतिबध्यतयातस्यकारणता
स्वरूपत्वायोगादित्याहुः । ननुकृत्स्नापिप्रागभावव्यक्तिःकथंनान्यत्रकार्यंजनयतीत्यतआहसचेति ।
सामानाधिकरण्यप्रत्यासत्त्यैवतस्यहेतुत्वादितिभावः । नचैवमपिद्वितंतुकपटादौनतत्सिद्धिस्तत्त्वा

तिरिक्तस्यप्रागभावधर्मिणःकल्पनामपेक्ष्यकॢप्ततंतुसंयोगव्यक्तेरेवलाघवेनहेतुत्वौचित्यादतआ
हेत्थंचेति।कार्योत्पादनियामकतयाचेत्यर्थः।प्रागभावत्वेनेति।तत्तत्प्रागभावव्यक्तित्वमौत्तासिद्धौताव
द्रूपेणहेतुत्वाभिधानमनुचितमितितुविभावनीयं।प्रागभावस्वीकारेपितत्तंतुव्यक्तीनांतत्तच्चरमतं
तुसंयोगव्यक्तीनांवातत्सत्वंप्रतिविशिष्यहेतुत्वस्यावश्यकत्वेकॢप्तंप्रागभावकल्पनयाद्दसाशयेनसमा
धत्तेत्रिचतुरेवेति।असमवायिकारणासंपत्त्यर्थमाहसंयुक्तेष्वेति।त्रितंतुकस्यचतुस्तंतुकस्यवा
पटस्यावश्यमुत्पत्तेःपटसामान्यस्याप्यसंभवादाह।नष्टेति।सहस्रादिकतंतुकपटोत्पत्तिप्रसं
गइत्यर्थः।प्रागभावादिघटितायास्तत्पटसामग्र्यास्तदानीमपिसत्वादितिभावः।यद्यपिसर्वत्रैवखं
डपटध्वंसस्यमहापटहेतुतयात्रिचतुरादितंतुकपटस्यध्वंसविरहादेत्रिचतुस्तंतुसंयोगदशायां २७७
नसहस्रतंतुकपटोत्पादइतिचरमतंतुसंयोगादेस्तत्रविशिष्यहेतुत्वेमानाभावः।नचखंडपटध्वंसस्ये
वचरमसंयोगव्यक्तीनामपिविनिगमनाविरहेणतत्त्वहेतुत्वमितिवाच्यं।चरमसंयोगोत्पत्त्यनंतरमेव

खंडघटध्वंसदशायामेव महापटोत्पत्तिप्रसंगेन खंडपटध्वंसस्यावश्यं महापटहेतुत्वात्तथापि त्रिचतुरा
दितंतुकखंडपटध्वंसस्यैव स्वसमानाधिकरणसहस्रत्वादिसंख्यासंबंधेन सहस्रादितंतुकमहापटप्र
तिहेतुत्वादेव स्वानधिकरणतंतुषु तत्पटानुत्पत्तिसंभवे प्रागभावकल्पने मानाभाव इत्यत्र तात्पर्यं शंकते
तावदिति। विनेति। तंतुतत्संयोगयोस्तंतुत्वविलक्षणतत्संयोगत्वाभ्यां पटं प्रति हेतुत्वेन तदवच्छिन्न
विरहस्यासंभवादिति भावः। कार्यानुत्पादस्य प्रयोजकाभावमुक्त्वा कार्योत्पादप्रयोजकस्य सत्त्वमाह
सामग्रीति। पुनः शंकते तत्पटेति। यावत्तंतुत्वेन हेतुत्वासंभवादाश्रयांतं। तत्पटप्रागभावाश्रयस्यैकस्या
पि तंतोः सत्त्वादतिप्रसंगतादवस्थ्यमतो यावदिति। प्रवेशे सादिप्रवेशे कारणतावच्छेदकतया अन्यथा
सिद्धत्वमप्रवेशे तु वस्तुगत्या तत्पटप्रागभावाश्रयाणामेव तंतूनां तावत्तंतुत्वेन हेतुत्वे प्रागभावस्य हेतुत्वे मा
नाभाव इत्यर्थः। ननु माभूत्प्रागभावस्य हेतुत्वं कारणतावच्छेदकतयैव तत्सिद्धिर्भविष्यतीत्यत आह परस्प
रेति। तत्पटप्रागभावाश्रययावत्तंतूनां तदानीमनपायादिति भावः। तत्पटप्रागभावव्याप्येति। तत्पटप्रागभा

वक्ष्यमाणेति। तत्पटप्रागभावानधिकरणावृत्तीत्यर्थः। संयोगस्यारंभकोऽवयवस्तेन तत्पटप्रागभाववन्मात्रवृत्तीना
मनारंभकसंयोगांतराणां तत्पटपूर्वमसत्त्वेपि न क्षतिः। तत्प्रागभावसामानाधिकरण्यस्य तत्पटानाधारतं
तुवृत्तिपटांतरारंभकालीनसंयोगसाधारणत्वात् व्याप्यतापर्यंतानुसरणं। तंतुसंयोगेष्विति। पटारंभकेष्वि
त्यादिः। ननु तत्पटप्राक्क्षणवृत्तित्वेनापि संयोगानां विशेषणान्नैष दोष इत्यत आह तत्पटेति। तथा च ला
घवात् तत्पटव्याप्यतादृशयावत्तंतुसंयोगत्वेनैव तत्पटं प्रति हेतुत्वसंभवादवच्छेदकतयापि न प्रागभावसि
द्धिरिति भावः। ननु तत्पटस्यैव तन्नियतसंख्याविशेषस्यापि तत्क्रमेणावच्छेदकत्वे विनिगमनाविरहाद्
धुरपि तत्पटो नावच्छेदकः किंतु तत्प्रागभाव एव धर्मिग्राहकप्रमाणेन तथैव तस्य सिद्धेरत आह यावत्त्वे
ति। तथा च तादृशसंयोगनिष्ठं यावत्त्वमप्यपेक्षाबुद्धिविशेषविषयत्वमेव तच्चापेक्षाबुद्धिव्यक्तीनां भेदान्ना
नेसनं तत्कार्यकारणभावद्वये व्यर्थमतिरिक्तप्रागभावस्यावच्छेदकतया कल्पनमिति भावः। अन्नवदिति। ७८
ति यत्र क्रमेण तंतूनां तत्संयोगानां वा जननोत्तरं पटस्योत्पादस्तत्र प्रागेव तत्पटस्योत्पादवारणाय चरमस्य

नो वि तं

तेतोक्ततत्संयोगस्यवाविशिष्यहेतुत्वावच्छेदकत्वेतत्तएवोदासीनतंतुषुंपटोत्पत्तिवारणेपियत्नसमस्ततं त
तुष्वेकदैवोत्पन्नेषुसंयुक्तेषु चपटस्योत्पत्तिस्तत्तत्पटस्यान्यत्रोत्पादवारणार्थंप्रागभावःकारणतयाक
ल्प्यतेतत्तत्तंतुसंयोगानांविशिष्यहेतुत्वकल्पनयातद्वारणेगौरवात्।नहितत्तापितत्पटोत्पत्तेःपूर्वंतत्प
टारंभकतत्ततंतुषुद्व्यारंभकसंयोगःयेनतदानींतत्पटस्योत्पादवारणायविशिष्यसंयोगानांहेतुत्वमा
वश्यकंस्यात्।नच[illegible]स्येतत्पटत्वेनैवतादृशपटंप्रतितत्तत्तंतूनांतादात्म्येनहेतुत्वान्नान्यत्रतस्योत्पादइति
वाच्यं।कार्यत्वेनकारणतायामन्यथासिद्धेः।अन्यथाद्रव्यचाक्षुषत्वावच्छिन्नंप्रतिचाक्षुषवद्रूप ६
त्वादिनैवहेतुत्वसंभवेउद्भूतरूपादीनामहेतुत्वापत्तेः।समस्तस्यारंभकतंतुसंयोगनाशान्नष्टस्यापिप
टस्यपुनःस्वारंभकतंतुषूत्पत्तिप्रसंगेनतत्तदारंभकसंयोगव्यक्तीनांविशिष्यतत्पटंप्रतिहेतुत्वकल्पने
महागौरवापत्तेश्च।अस्माकंतुप्रागभावविरहादेवनष्टस्यपुनर्नोत्पादः।यत्तुयुगपदुत्पन्नैःसंयुक्तैश्च
सहस्रतंतुभिर्जनितस्यपटस्यान्यत्रोत्पत्तिवारणार्थंतावत्तंतुपर्याप्तास्तत्पटारंभकसंयोगसमकालो

सत्त्वसंख्यात्मकैरेव तत्पटं प्रति विशिष्य हेतुत्वं युक्तं तावत्कैतैव तदानीमन्यत्र कालांतरे वा तावत्तंतुषु तत्पटस्योत्पादवारणादिति तन्तुष्ठं। यस्य तंतोर्द्वितीयक्षणएव तंत्वंतरसंयोगोत्पन्नस्तत्तृतीयक्षणेऽसहस्रतंतुकपटोऽसति तत्तत्त्वे वर्तंतोव्यभिचारात् सहस्रत्वादिसंख्यायाः समानाधिकरणयावदेकत्वसापेक्षतया द्व्योसति द्वितीयक्षणे तदसंभवात्। किं चैतादृशसंख्यात्मकानांत्यव्यक्तित्वेन तत्पटं प्रति हेतुत्वे अनंतकार्यकारणभावापत्तिस्तावत्तंतुपर्याप्ततादृशसंख्यात्वेन हेतुत्वे च महागौरवमतस्तत्पटप्रागभावव्यक्तिरेव तत्पटहेतुतयाकल्प्यपि तु मुचिता। कारणतायेव धर्मिग्राहकमानसिद्धायाः तस्याः पदार्थांतरेण सार्द्धं विनिगमनाविरहस्यासंभवादितिदिक्। समवायिनोद्रव्यस्यासमवायिकारणानां निमित्तकारणस्य चापेक्षाबुद्धेरविशेषात्। क्वचिदेव तत्तत्त्रित्वादिकं जायते क्वचिन्नेति नियमो न स्यादतो यावति तत्तत्त्रित्वादिप्रागभावस्तावत्स्वेव तत्तत्त्रित्वाद्युत्पत्तिरिति। तत्तत्त्रित्वाद्युत्पत्तिनियामकतयैव प्रागभावसिद्धिरिति आचार्यमतं निरस्यति। एतेनेति। कस्यचित्समवायिनस्तन्निष्ठैकत्वस्य वानुत्पत्तिदशायामपि तत्तत्त्रित्वाद्युत्पत्तिप्रसंगेन चरमस्य

१ [नव्यास्तु प्रागभावानङ्गीकारे चतुर्थक्षणवृत्तिध्वंसप्रतियोगिकाया अपेक्षाबुद्धिव्यक्तेस्तृतीयक्षणे ध्वंसः स्यात्। न च द्वितीयप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वं वाच्यम्, तथा सति चतुर्थक्षणोत्पत्तिध्वंसो न स्यात्। चक्षुःसन्निकर्षादिद्वित्वनिर्विकल्पकसामग्र्यास्तदानीमपि सत्त्वात्। प्रागभावस्वीकारे तु द्वित्वनिर्विकल्पकात्प्राक् तदभावस्यैव प्रतिबन्धकत्वाददोष इत्यपि वदन्ति।] ४

समवायिनस्तदेकत्वस्य वा तत्तत्त्वविशिष्टहेतुताध्रौव्येत द्विरहादेर्वान्यत्तत्तत्स्मित्वाद्युत्पत्तिसंभवे प्रागभावे
मानाभावेनैतस्य । द्वित्वस्थलेऽतिरिक्तप्रागभावधर्मिणस्तत्त्वानन्यथासिद्धत्वनियतपूर्ववर्तित्वयोः स्वक
स्वनामपेक्ष्य समवायिनस्वरमेकत्वस्यैव वा नन्यथासिद्धत्वकल्पनेन लघीयस्त्वात् द्वित्वानुरोधान्न प्रागभावः
सिध्यति सतत्त्वत्वपर्यन्तानुसरणे। केचित्तु तत्त्वतानिनः स्युकादेः सत्त्वामपि विहितनिषिद्धक्रियायां धर्माध
र्मयोरनुत्पादात् तज्ज्ञ[illegible]नकतया तत्त्वतान प्रागभावः सिध्यति। न चोत्पन्नेऽपि तत्त्वता नैतादृशज्ञानान्तरप्राग
भावसत्त्वात् तदानीं धर्माद्युत्पत्तिप्रसंगः। समानकालावच्छिन्नैकात्मवृत्तित्वसंबंधेन तत्त्वता नश्यत्वेन प्राग
भावस्य विशेषणीयत्वात्। न चैवं निरुक्तप्रत्यासत्त्या तत्त्वतानाभावविशिष्टप्रागभावत्वेनैव हेतुत्वमुपेयं
तत्त्वधीप्रागभावत्वप्रवेशे गौरवात् तथा चाद्यतत्त्वतानकालोत्पन्नात्मगुणान्तरप्रागभावानामपि हेतुत्वाप
त्तिरिति वाच्यं। तादृग्रूपेण हेतुतायामिष्टत्वात्। न चोक्तक्रमेण तत्त्वधीप्रागभावस्य हेतुतामपेक्ष्य लाघवात्
मिथ्याज्ञानजन्यवासनाया एव धर्मादिहेतुत्वं युक्तमिति वाच्यं। आत्मधर्मिकगौरत्वस्थूलत्वादिप्रकारकत्व

ऽक्षणस्य मिथ्याज्ञानवासनात्वस्य नानात्वेन गुरुत्वेन च तादृप्येणाधर्माद्यजनकत्वात्। न चोक्तक्रमेणात्व
ज्ञानत्वमपि आत्मधर्मिकदेहान्यत्वादिप्रकारत्वमेवेति तदवच्छिन्नस्य प्रागभावत्वेनापि हेतुत्वेऽननुगमो गौ
रवं चेति वाच्यं। मानसत्वव्याप्यस्य मुक्तिजनकतावच्छेदकवैजात्यस्यैव तत्त्वज्ञानपदेनोपलक्षणात्। न च मि
थ्याज्ञानजन्यवासनाया अपि धर्मादिजनकत्वं भावनात्वव्याप्यवैजात्यविशेषेणैव धर्मत्वमतो न गौरवमि
ति वाच्यं। मिथ्याज्ञानोत्तरं तादृशवासनोत्पत्तिदशायामपि धर्माद्युत्पादाद्भावनात्वव्याप्यवैजात्ये न हेतुता
न संभवादित्याहुः। तेषां धर्मा[illegible]धर्मोत्पादनियामकतैव वस्त्वन्तरसिद्धावपि तत्तत्त्वज्ञानप्रागभावत्वादि
सिद्धौ प्रमाणमनुचिन्तनीयं। ननूक्तक्रमेण सिद्धस्यापि प्रागभावस्य प्रतियोगिहेतुत्वं नागतमत आह वर्णे
यस्य व्याप्यवृत्तेरित्यादि। द्वितीयक्षण इति। उत्पत्तिवारणायेत्यन्वयः। तथा चा[illegible]त्वावच्छेदेनोत्पन्नायाः संयो
गव्यक्तेर्द्वितीयादिक्षणे पुनरुत्पादः स्यात् महत्वाद्यवच्छेदेन तदभावस्य सत्त्वात् कार्यस्य प्रतिबन्धकत्वासंभवात्।
अत्नावच्छिन्नतत्तत्संयोगप्रसस्नावच्छेद्यत्वविशिष्टतत्तत्संयोगाभावत्वेन हेतुतायां च गौरवात् तत्तत्संयोगं प्रति

तत्तत्संयोगप्रागभावत्वेनैवहेतुत्वंयुक्तमितिभावः। ननुघटादिसंयोगसामान्यंप्रत्येवसमानावच्छेदकत्वप्र
त्यासत्त्याघटादिसंयोगसामान्याभावस्यहेतुत्वंवाच्यमतोनगौरवं।नचैवमपिप्रसक्तसिद्धंप्रागभावमादायवि
निगमनाविरहः। तस्यघटसंयोगप्रागभावत्वेनहेतुत्वेघटीयसंयोगांतरप्रागभावमादायैवोसन्नस्यापित
स्यपुनःप्रसंगात्तत्तद्घटसंयोगव्यक्तीनांतत्तत्संयोगव्यक्तिप्रागभावत्वेनहेतुत्वेचानंतकार्यकारणभावापत्तिर्गौर
वस्यैवंविनिगमकत्वादिसन्नाहधाराएवहनेति।ननुतत्तत्संयोगासत्ताभावस्यनिरवच्छिन्नविशेषणतयैव
तत्तत्संयोगंप्रतिहेतुत्वंवाच्यमतःस्थलांतरमनुसरतिधारावहनेति।सम्प्राहुःधारावहनेसु[illegible]र्जिनकाभूता
म त्मनःसंयोगादिव्यक्तीनांचतुर्थक्षणेसत्त्वमावेदितं।तेनतत्तत्कारणव्यक्त्यभावप्रयुक्तायाःकार्यानुत्पत्तेर्ना
वसरः। सविकल्पकस्यस्वकारणीभूततत्तद्विशेषणज्ञानव्यक्त्यभावादेवचतुर्थक्षणेनोत्पादःसंभवत्यतो ती
निर्विकल्पकपर्यंतानुसरणं।आंशिकनिर्विकल्पकस्यापिविशेषणज्ञानसापेक्षत्वात्प्राथमिकेति।तेनसप्र
कारकात्मज्ञानलाभः। द्वितीयतृतीयक्षणयोःस्वात्मककार्येणप्रतिबंधसंभवाच्चतुर्थक्षणइत्युक्तं।नचत

तन्निर्विकल्पकं प्रति तत्तत्समकालोत्पन्नध्वंसविशेषस्यैव प्रतिबंधकत्वं तदुत्पत्तिकालपर्यंतस्थायिद्वित्वविशे
षस्यैवाजनकत्वमस्तु न तु कार्याभावस्योत्तरत्वानाभावस्य च द्वयोर्हेतुत्वमतो न गौरवमिति वाच्यं। तादृशध्वंसा
नां द्वित्वादीनां च बहूनां विनिगमकाभावेन तथात्वकल्पनामपेक्ष्य लाघवेनैकस्यैव तन्निर्विकल्पकप्रागभा
वस्य तन्निर्विकल्पकहेतुत्वेन कल्पनार्हत्वादतो द्वियस्य निर्विकल्पकप्रागभावस्य प्रमाणान्तरासिद्धतया
तेन सार्द्धं विनिगमकाभावस्य वक्तुमशक्यत्वादिति भावः। ननु तत्तत्संयोगं प्रति तत्तत्संयोगप्रागभावस्य ला
घवेन हेतुत्वासिद्धावपि मूलावच्छेदेन जायमानश्चेन संयोगः कुतो नाग्रावच्छेदेन जायते स्वरूपसंबंधेन तत्र
भाव त्प्रागस्योभयावच्छेदेनाविशिष्टत्वादत आह स्वतो वेत्यादि। तथा च प्रागभावस्यावच्छिन्नवृत्तितानियामिका
समानावच्छेदकत्वप्रत्यासत्त्यैव तस्य प्रतियोगिहेतुत्वादिति भावः। अत्र कल्प्यपर्यंतग्रंथेन न साधारणप्रस
क्तस्यासत्त्वमावेदितं। वर्णयंत्यनेन न च निर्विकल्पकसामान्यं प्रति ज्ञानत्वेनैव प्रतिबंधकत्वकल्पनया चतु
र्थक्षणे पुनर्निर्विकल्पकासंभवात्तस्य तदुत्तरत्वानस्य चाभावद्वयं तत्कारणं न वाच्यमिति स्वरसः। सवि
तैव संयोगावच्छिन्नवृत्ति ४

८१

तः। तत्तत्संख्याविशेषाणामिति। सहस्रतंतुकपटादौ चरमतंतुसंयोगोत्पत्तिकालीनस्य सहस्रत्वादिसंख्या
विशेषस्यैवांततः परमेश्वरीयापेक्षाबुद्धिजन्यस्य सामानाधिकरण्यप्रत्या[illegible]सत्ताहेतुत्वांगीकारेणैवसा
नाधिकरण्यतंतुषु तत्पटस्यानुत्पादसंभवेपि। त्वर्थः। यस्य तंतोर्हि तत्क्षणएव तंत्वंतरसंयोगोत्पत्तिस्तत्
क्षणे सहस्रतंतुकपटोत्पत्तिस्तन्नैव तंतौ व्यभिचारात्। सहस्रत्वादिसंख्याया हेतुत्वमसंभावितं एकत्वाम
संख्यामात्रस्यैव समानाधिकरण्याया वदेकत्वसापेक्षतयापूर्वसिद्धेः। यत्क्षणे तदसंभवात् पुरुषकाल
भेदेन सहस्रत्वादीनामनंतत्वेनानंतकारणभावापत्तिर्गौरवं चेति। द्वित्वोत्पादनियामकत्वेनापि प्रागभावः
कल्पयितुमुचित एकस्याशयेनोक्तं संभवेपीति। क्रमोत्पन्नरूपलैकस्याश्रितसमवायिभिन्नकेस्तदेकत्वस्यवानु
त्पत्तिदशायामपिकारणांतरसत्वमाद्यप्रागभाववादिनामपि द्वित्वोत्पत्तिप्रसंगादुत्पद्यमानासमवायिभि
न्नकेस्तदेकत्वस्यवाविशिष्टहेतुताध्रौव्ये प्रागभावकल्पनं व्यर्थमतो युगपदुत्पन्नपर्यंतानुसरणां पूर्वोक्तयुक्त्या त्या
द्वित्वोत्पादनियामकत्वेन प्रागभावासिद्धेराहनित्यादाविति। नियामकत्वेनेति। अन्यथा युगपदुत्पन्नविनष्टन्नि

त्वादेः स्वानधिकरणोभयद्वित्वेऽप्युक्तातिप्रसंगात्। न चापेक्षाबुद्धिव्यक्तेरेव विशिष्य हेतुत्वान्नातिप्रसंगः। स्वाना
श्रयप्रमात्रीयापेक्षाबुद्धेरपि द्वित्वजनकत्वदर्शनात्। न च तत्तद्व्यक्तिनिष्ठैकत्वान्यसंख्यासामान्यं प्रति तत्तद्व्य
क्तिनिष्ठविशेष्यत्वसंबंधेनैकत्वप्रकारकत्वेनैवापेक्षाबुद्धेर्जनकत्वं प्रकारांतरेणानुगमासंभवात्तथा च तत्त
एवैकनिष्ठत्रित्वादेरन्यद्वयेऽनुत्पत्तिसंभव इति वाच्यं पुरुषत्रयाणां घटादिविभिन्नद्रव्यधर्मिकैकत्वज्ञा
नजन्यादपि तेषु त्रित्वापत्तिप्रसंगेनापेक्षाबुद्धित्वादिरूपेणाहेतुत्वादिति भावः। अन्ये त्वित्यस्वारस्यबीजं तु स्वान्य
तरकर्माधीनस्यैकनिष्ठसंयोगादेरन्यत्रोत्पत्तिवारणार्थमवश्यं तत्तद्द्रव्यसमवेतकार्यत्वावच्छिन्नं प्रति त
त्तद्द्रव्यत्वेन हेतुत्वं वाच्यम् तस्तदन्यतरत्वेनास्यत्वेन न तदीयत्रित्वाद्युत्पादः किं तु तत्त्रित्वाद्यंतर्भावेनानंतप्रा
गभावहेतुत्वेन। न च कार्यत्वस्यैव कालिकसंबंधेन घटत्वपटत्वादिमत्त्वस्यापि विनिगमनाविरहेण कार्य ६२
स तावच्छेदकेऽनुप्रवेशादनंतकार्यकारणभावावश्यकत्वमिति वाच्यं तत्समवेतत्वकालिकोभयसंबंधेन तत्तद्द्र
त व्यत्वावच्छिन्नं प्रत्येव तत्तद्द्रव्यत्वेन हेतुत्वस्योक्तत्वात्। निरुक्तधर्मस्यापि जन्यतावच्छेदकपक्षे तत्तद्व्यक्ति

समवेतत्वावच्छिन्नं प्रत्येव तत्तद्व्यक्तित्वेन हेतुत्वसंभवाच्चेति दृष्टव्यं। मिश्रोक्तं सामान्यप्रत्यासत्तौ युक्तमन्तरमुप
न्यस्यति यत्त्वित्यादि। ज्ञानेच्छेति। ज्ञानेच्छयोरिच्छाक्षणे सत्त्वेत्यर्थः। तदुपस्थितिमिति। इच्छोपधायकज्ञानस्य क्षणस्यो
पधायकेच्छायाश्चोपस्थितिं विनेत्यर्थः। न चेति। इच्छाकाले ज्ञानस्य क्षतिकाले चेच्छायाः न साक्षात्कार इत्यर्थः।
ज्ञानसंस्कारयोरेकदोत्पादाद्योग्येत्युक्तं। योग्यत्वं चावेगावृत्तिप्रत्यक्षजातिमत्त्वं। तेन निर्विकल्पकद्वयस्यापि
नैकदोत्पत्तिः। इत्थं च ज्ञानसंयोगयोरुक्तयोग्यतावतो यौगपद्येन व्यभिचारः स्यादत उक्तं विशेषेति। रूपर
सयोर्योग्यविशेषगुणयोर्घटादौ युगपदुत्पादादुक्तमात्मनीति। विभिन्नावच्छेदेन सुखदुःखयोर्यौगपद्य
स्वीकारे एकावच्छेदेनेति पूरणीयं। केचित्तु विशेषगुणपदं स्वविषयकपरं वाच्यं। एवं चात्मपदं शरीरपरे रा
नी कं। तेन कायव्यूहस्थले सौभरिप्रभृतीनां शरीरावच्छेदेन ज्ञानादेर्यौगपद्येऽपि न क्षतिरित्याहुः। इच्छादिजन
केति। इच्छाद्युपधायके इत्यर्थः। ननु ज्ञानादाविच्छादेः स्वरूपयोग्यत्वस्य फलोपधायकत्वस्य वा ग्रहायेज्ञा
नत्वादिसामान्यप्रत्यासत्तिरभ्युपेयते तन्नाद्यदित्याह। पौर्वापर्येत्यादिना। ग्रहासंभवादिति अवश्यम

भ्युपेयत्वादित्यत्र हेतुः। इच्छाकृतीति। इच्छानुसारित्वे ज्ञानस्य म्भःस्यनुसारित्वे चेच्छायाः साक्षात्कारादित्य
र्थः। मननेति। कारणत्वनिविष्टसमस्तवस्तुपस्थितावित्यादिः। तथाच फलानुपधायक एव ज्ञानादाविच्छादि
स्वरूपयोग्यत्वस्यान्वयव्यतिरेकाभ्यां मननसाध्यत्वसंभवादिच्छाद्युपधायकज्ञानादिव्यक्तीनामनुपस्थितावपि
न क्षतिरिति भावः। द्वितीयमभिप्रेत्याह। कृत्यनुसारित्वेऽ इति। ज्ञानेच्छयोः समूहालम्बनसाक्षात्कारस्यसंभ
न वादिति योजना। न चेच्छोत्तरज्ञानस्यैव साक्षात्कारः कार्यसहभावेन विषयस्य हेतुत्वादिति वाच्यं। अनुमित्याद्यु
त्तरमपि परामर्शादनुव्यवसायात्सर्वत्र विशिष्य विषयस्य तथा हेतुत्वाभावात्। न चेच्छायाः साक्षात्कारस्य ज्ञा
नत्वांशे निर्विकल्पकतया जनकतावच्छेदकरूपेण फलोपधायकत्वेऽग्रहासंभवस्तदवस्थ इति वाच्यं। अ
भावत्वादेरिव ज्ञानत्वादेः सविकल्पकैकवेद्यत्वात्। निर्विकल्पोत्तरमौपनयिकस्य ज्ञानस्य ज्ञानत्वविशिष्टज्ञा ९३
नबोधस्यासंभवाच्चेति भावः। नन्वेवमपि ज्ञानस्यैकस्योपधायकत्वग्रहः सामान्यप्रत्यासत्तिं विना दुर्घटः। कृति
पर्यन्तं फलोपधायकज्ञानव्यक्तेरसत्त्वेन तदुत्तरं तद्ग्रहासंभवादत आह स्मरणेन चेति। तथा च संस्मरणं ज्ञान

तन्मंस्मृतित्वादिसादिक्रमेणापेक्षधर्मतावच्छात् कृतिफलोपधायकत्वानुमितिमनुमाय पश्चात्तत्कृति
कारणत्वग्रहः करणीय इति भावः। ननु यत्नोपेक्षात्मकेन तानेन कृतिर्जनिता तत्तेन स्मरणानुसन्धास्मसा त्या
तदनुमानमसंभवीत्यत आह विंशतीति। आसमानुरोधात् तानयोरेवात्मनि योगपद्यं नेष्यते न तु विशेष
गुणमात्रस्येत्याशयः। न चैक एव प्रयत्नस्तत्र विंशसंगुल्यवच्छेदेनोत्पद्यत इति वाच्यं। अंगुलिचेष्टानां ना
रतम्यानुभवेन यत्नवैलक्षण्यस्यावश्यकत्वादिति भावः। नन्विदं गोपदशक्यतावच्छेदकं गोत्वादिसत्त्व
तादात्म्येनायं सास्नावान् गोत्वादिसत्त्वं च समवायेन गोत्वहेतौ गवेतरवृत्तित्वविशिष्टसकलगोवृत्तित्वरू
पस्य गोत्वत्वस्य व्याप्यतावच्छेदकतया तदन्तर्गतसकलगोग्रहार्थं सामान्यप्रत्यासत्तिरावश्यकीति प्राग
ल्भमतं निरस्यति। गोत्वे चेति। गोपदशक्यतावच्छेदकत्वस्य साध्यतायां समवेतत्वविशिष्टगवेतरासम
वेतत्वमात्रं गोरूपादौ व्यभिचारीत्यतो गोनिष्ठाभावेति। गोनिष्ठाभावस्य प्रतियोगितायां येन तदन्यत्वमित्यु
रस्यां गोनिष्ठान्योन्याभावप्रतियोगितावच्छेदकान्यत्वे साध्ये तादृशधर्मस्तेन गोत्वस्यापि गो विशिष्टाभावादित्यपि निष्ठ
भरा

स्थ्यम्

योगित्वेपि न हेतुत्वप्रसिद्धिः। अवच्छेदकसंबंतु निरवच्छिन्नं समवायसंबंधावच्छिन्नं च ग्राह्यमतो न दोषतादवस्थ्यं। ग
गन्धादौ व्यभिचारवारणार्थमाह समवेतत्वेति। सास्नादेः साध्यतायां गवेतरासमवेतमात्रस्यैव समवायेन हेतु
त्वसंभवादाह। अविशेषितत्वेति। नत्विति। न तु तत्तदनंतगोव्यक्तिवृत्तित्वविशेषितमित्यर्थः। अशक्यत्वादिति। त
तद्व्यक्तित्वेनानंतगोव्यक्तीनामेकदानुपस्थितेरिति भावः। नैयायिकः शंकते। स्यादेतदिति। एतद्दूषणं स्यादि
त्यर्थः। समानेति। रजतत्वावच्छिन्नधर्मिताकेष्टसाधनताज्ञानत्वेन समवायप्रत्यासत्त्या रजतत्वप्रकारकेच्छां प्र
तिप्रयोजकत्वमित्यर्थः। रजतत्वप्रकारकेच्छासामान्यं प्रति तत्प्रकारकज्ञानत्वेन हेतुतायां मानाभावेन यथा
श्रुतासंगतेः। रजतानयनत्वादिप्रकारकप्रवृत्तिं प्रत्येव रजतत्वादिप्रकारकत्वेनोपादानप्रत्यक्षस्य हेतुत्वा
दिति ध्येयं। रजतत्वादिपदं सुखत्वादेरुपलक्षणं। सुखादेः स्वतः प्रयोजनतया समानप्रकारकत्वेनैव तत्प्र
ज्ञानेच्छयोः कारणत्वसंभवादित्यपि कश्चित्। वस्तुतो यद्धर्मिकेष्टसाधनताज्ञानं तत्रैव यदभावे द्वेषस्तत्रा
पीच्छा जायत इति सर्वत्र फलान्यगोचरेच्छायां नेष्टसाधनताज्ञानापेक्षेति स्वयमेव बौद्धाधिकारे व्यवस्थापि

नं।तथा च यत्र विनश्यद्वस्थेनैव रजत~~ाभाव~~धर्मिकेष्टसाधनताज्ञानेन रजताभावे द्वेषो जनितस्तत्रोत्तरकालभ्रमज्ञानेपि रजते रजतत्वप्रकारेणेच्छापत्तिरतः सामान्यतो रजतत्वप्रकारकेच्छायां रजतत्वप्रकारकज्ञानत्वेनापि हेतुत्वान्तरमावश्यकमतः समानप्रकारतामात्रेणेसादिकं यथाश्रुतमेव सम्यगिति प्रतीमः। क्वचिद्वेति। रजतत्ववत्तया निश्चिते धर्मिण्यस्यपेः। क्वचिद्गृहीतरजतत्वासंसर्गके घटादौ। नियमो न स्यादिति। तथा च रजतत्वप्रकारकज्ञानात् घटादेरपि तत्प्रकारकेच्छापत्तिर्भावः। ननु तत्स्वरूपीयरजतत्वप्रकारकेच्छासामान्यं प्रतिव तत्स्वरूपीयरजतत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानत्वेन हेतुत्वं तत्र च कार्यस्य विशेष्यत्वं कारणस्य तु स्वप्रकारीभूतरजतत्वाश्रयत्वं प्रत्यासत्तिरतो घटादौ न रजतत्वप्रकारकेच्छेत्यत आह तादृशप्रकारकेति। [ज्ञानप्रकारीभूतरजतत्वाश्रय एवेत्यर्थः।] कथमिति। तथा च शुक्त्यादिधर्मिकरजतत्वप्रकारकेच्छायां व्यभिचार इत्युक्तक्रमेण हेतु [redacted] त्वमसंभवीति भावः। ननु तद्धर्मिकरजतत्वासंसर्गग्रहस्याभावोपि हेतुर्वाच्य इतीच्छायां न विशेष्यानियमः।

तद्धर्मिकरजतत्वप्रकारकेच्छायां।

नचगुरूणां रजतधर्मिकरजतत्वासंसर्गाग्रहस्याप्रसिध्या रजतत्वप्रकारेण तन्नेच्छा नस्यात्कारणबाधादिति वाच्यं रजतान्यतद्धर्मिकेच्छायामेवोक्तक्रमेण हेतुत्वोपगमात् रजतत्वासंसर्गेसाकांक्षततद्धर्मिकज्ञानाभावस्यैव वा हेतुत्वादत आह॥ अनुपस्थितेति। तथा च यत्र घटादौ रजतत्वासंसर्गाग्रहसत्त्वे रजतत्वप्रकारेच्छानुत्पादेप्यनु[illegible]नुपस्थितत्वावद्वस्तुषु तादृशीच्छा दुर्वारा तेषु रजतत्वासंसर्गज्ञानविरहस्य स्वतः सिद्धत्वादिति भावः। एकधर्मिकरजतत्वप्रकारकज्ञानदशायां यत्र यत्र रजतत्वासंसर्गज्ञानस्वविरहः तेषु भाविधर्माज्ञातेष्वपि जायत एव रजतत्वप्रकारकेच्छेति यदि स्यात्तदाह॥ वस्तुत इति। नियामकत्वमिति कारणतावच्छेदकीभूयेत्यादिः। इच्छायां धर्मिनियमार्थं तत्तद्धर्मिविशेष्यकरजतत्वप्रकारकेच्छायां तत्तद्धर्मिकरजतत्वासंसर्गाग्रहाभावत्वेन कारणत्वमपेक्ष्य तत्तद्धर्मिकेच्छायां तत्तद्धर्मिकेष्टसाधनताज्ञानत्वेनैव लाघवाद्धेतुत्वं युक्तमित्यर्थः। तथा च भाविरजतधर्मिकेच्छाजननार्थमवश्यमपेक्षणीयस्य भाविरजतधर्मिकज्ञानस्य प्रकारान्तरेणासंभवादवश्यं सामान्यलक्षणा वाच्येति निगर्वः। नन्वेवं द्रव्यत्वेन रजतधर्मिकेष्टसाधनताज्ञानादपि रजतत्वप्रकारेण तन्नेच्छा स्यादत आह

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

स्वे संवादिविसंवादीच्छासाधारण्येनेत्यर्थः। तदिच्छायाम्। तद्विषयकेच्छायाम्। तत्प्रकारकत्वमिति।

सामान्यतो वेति। तथा च रजतत्वप्रकारेण तत्तद्धर्मिकेष्टसाधनताज्ञानत्वेन रजतत्वप्रकारकतत्तद्धर्मिकेच्छां
प्रति हेतुत्वान्नातिप्रसंग इति भावः। नन्वेवं संवादीच्छास्थले एवं तत्तदनंतधर्मघटितभावेनानंतकार्यकारणभावापत्ति
रतः सामान्यतो रजतधार्मिकरजतत्वप्रकारकेच्छायां रजतत्वप्रकारेण रजतधर्मिकेष्टसाधनताज्ञानत्वेन
हेतुत्वमस्तु तथा चातीतन[illegible]रजतगोचरज्ञानादेव भाविरजतव्यक्ताविच्छासंभवात्तत्कृतं सामान्यलक्षणया
विसंवादीच्छास्थले तु तत्तद्धर्मघटितभावेनानंतकार्यकारणभावोऽनन्यगत्यैव सर्वैरभ्युपेतव्य इत्यस्वरसादाह अ
स्तु वेति। तथा च धर्मिमात्रस्याप्रवेशेनातिलाघवात् तत्स्वरूपीयरजतत्वप्रकारकेच्छां प्रति तदीयरजतत्वावच्छि
न्नविशेष्यताकेष्टसाधनताज्ञानत्वेनैव हेतुत्वमस्तु समानविशेष्यतायाः प्रत्यासत्तित्वादेवैकधर्मिकज्ञानादन्य
धर्मिकेच्छानुत्पत्तेः संभवादित्यकामेनापि सामान्यलक्षणा स्वीकार्या। तां विना भाविरजतादिज्ञानासंभवे तदि
च्छानुत्पत्तिप्रसंगादित्याशयः। न चात्रानंतपुरुषघटितभावादनंतकार्यकारणभावतादवस्थ्यमिति वाच्यं। रज
तत्वप्रकारेण तत्तत्स्वरूपधर्मिकविसंवादीच्छानुरोधेन विषयविधया पुरुषव्यक्तीनां निवेशस्यपूर्वकत्वे

ष्यावश्यकत्वादितिभावः॥सामानाधिकरण्यमिवेति॥परमेतेदृष्टांतत्रपाचेत्समानप्रकारतामात्रेणहेतुता
वादिभिःपरैर्यथैकस्यपुंसोज्ञानादन्यस्येछात्वादवारणार्थंसामानाधिकरण्यंप्रत्यासत्तिरुच्यतेतथैवास्माभिर
प्येकधर्मिकज्ञानादन्यधर्मिकेछात्वादवारणार्थंसमानविशेष्यत्वंप्रत्यासत्तिःस्वीकृतेतिभावः॥प्रांचस्तुरजत
त्वप्रकारकेछासामान्यंप्रत्येवरजतत्वावछिन्नधर्मिकेष्टसाधनताज्ञानत्वेनहेतुत्वंतत्रचएकस्यपुंसोरज
तत्वप्रकारेणज्ञानादन्यस्यतादृशेछाप्रसायथासामानाधिकरण्यंप्रत्यासत्तिस्तथैकधर्मिकज्ञानादन्यधर्मि
केछासतिप्रसंगेनसमानविशेष्यत्वमपितथेतियथाश्रुतमेवंग्रंथमाहुस्तन्न।समानविशेष्यत्वप्रत्यास
त्त्याहेतुनायांतत्पुरुषीयत्वस्यावश्यंनिवेशनीयत्वादन्यथारजतत्वेनरजतधर्मिकेष्टसाधनताज्ञानवतोपि
पुंसःशुक्तिधर्मिकरजतत्वप्रकारकेछोत्पत्तिप्रसंगात्पुरुषांतरीयरजतत्वप्रकारकज्ञानस्यविशेष्यतासंबंधे
नशुक्तौसत्वादितिदिक्।स्वत्वस्यानुगतत्वेरजतत्वप्रकारकेछासामान्यंप्रत्येवस्वसमानविशेष्यकरजतत्वप्रका
रकज्ञानत्वेनहेतुत्वंपाश्चैस्तन्मपिसम्यक्विशेष्यनियमार्थं~~अ~~ग संसर्गाग्रहादेःकारणत्वकल्पनामपेक्ष्यल्प

घवादिसाह असंसर्गाग्रहादेरित्यादिना। आदिना भेदाग्रहस्याप्यनेकधर्माग्रहादेः परिग्रहः॥ समानविषयत्वस्य। त्वस
मानविशेष्यकत्वस्य। निवेशोपीत्यपि नानुगतानतिप्रसक्तं स्वत्वमेवद्वेवेचामित्यस्वरसः सूचितः॥ ननु यथार्थे रज
तत्वप्रकारकेच्छात्वाद्यवच्छिन्नं प्रति दोषाद्यभावविशिष्टस्य रजतत्वासंसर्गाग्रहस्य हेतुत्वाद्रजतत्वप्रकारकेच्छासा
मान्यं प्रत्यपि रजतत्वासंसर्गाग्रहोऽवश्यं हेतुर्यद्विशेषयोरिति न्यायात्। कुतस्तत्कारणतामपेक्ष्योक्तं लाघवम
त आह कारणेति। कार्यस्येच्छादेः॥ तथा च यथार्थेच्छादिकं प्रत्यपि यथार्थत्वानादरेव समानविशेष्यत्वप्रत्यास
साहेतुत्वाद्विशेषतो व्यसंसर्गाग्रहादेर्हेतुत्वमसिद्धमिति भावः॥ एतेन समानविशेष्यत्वप्रत्यासत्त्यैवातिप्रसंग
भंगे नेन निरस्तमित्युत्तरेणान्वयः॥ तत्प्रकारकज्ञानमिति। तत्प्रकारेणेष्टसाधनताज्ञानमित्यर्थः॥ हेतुरिति परेणा
न्वयः। तस्यामिच्छायां इदं रजतमिति भ्रमात्तदुत्पादो यथार्थेच्छाप्रसंगादाह दोषाभावसहितमिति। तत्प्रकारक
ज्ञानमित्यनुषज्यते। भ्रमोत्पादो रजतभेदाग्रहे तद्धर्मिकविसंवादेच्छानुत्पत्तेराह विसंवादिन्यामिति। तस्यामि
त्यनुषज्यते। उपस्थितं यद्रजतं तद्धर्मिकरजतभेदाग्रहसहितमित्यर्थः॥ नचैवं रजतभेदाग्रहदशायां स्व
गे

न्यौ कौ विसंवादी ज्ञानं स्यादिति वाच्यं। विसंवादि रजतत्वप्रकारकेज्ञात्वेन [illegible] रजतभेदप्रकारकत्वानिरूपिता रजत
धर्मिताकज्ञानत्वेन हेतुत्वं समानविशेष्यत्वं प्रत्यासत्तिरित्यनंतास्पर्यात्। अथ अन्यथाख्यातिमनंगीकुर्वतामस्मा
वं कूटलिंगजनितादिदं रजतमित्याकारकज्ञानद्वयादपि यथार्थे रजतेच्छोत्पादात्तन्न यथार्थरजतत्वप्रकारकज्ञा
नत्वेन हेतुत्वं घटमत आह त्वद्दिशापीति। उपस्थितं यद्रजतं तद्भिन्नरजतभेदग्रहाभावस्येत्यर्थः। नचै
वमेकत्र रजतभेदग्रहेपि रजतांतरे संवादी ज्ञानं स्यात् रजतधर्मिकभेदग्रहसत्वादिति वाच्यं। संवादि रज
त तप्रकारकेज्ञात्वेन कार्यत्वं रजतभेदप्रकारकत्वानिरूपित रजतधर्मिताकज्ञानत्वेन रजतभेदनिराकांक्ष रजत
धर्मिताकज्ञानत्वेन रजतत्वसाकांक्ष रजतधर्मिताकज्ञानत्वेन वा हेतुत्वं समानविशेष्यता च प्रत्यासत्ति
यात। आ रित्यनंतास्पर्यं कांक्षा च परेषां पदार्थांतरं। क्वचित्ज्ञानद्वयसत्वेपि तेन रजत एव नेदं रजतमिति भ्रमात्मकज्ञा २७
नद्वयापि न संवादी ज्ञानं वा कूटलिंगकपरामर्शोत्तरोत्पन्नस्य भ्रमात्मनाभिषिक्तस्येदं रजतमितिज्ञानद्वयस्यो
त्तरं संवादी ज्ञानुत्पत्तिरिति ध्येयं। हेतुत्वमिति। प्रयोजकत्वेत्यर्थः। तेन भेदाग्रहस्य प्रकारणतावच्छेदकत्वेपि नक्ष

तिः। औ विसादिति। अन्यथाख्यातिवादिनां पुनरस्माकं लाघवाद्विशिष्टज्ञानमेव हेतुरित्याशयः। औ विसेहे
तुमाह दोषाणामित्यादि। अभावमपेक्ष्येति। न च भेदग्रहस्यैव भेदव्याप्यवत्ताग्रहाणां भेदावच्छेदकवत्ताग्र
हाणां चाभावस्य हेतुतायाः कल्पनीयत्वात्तथापि गौरवं समानमिति वाच्यं। संवादिरजतेच्छां प्रति रजतत्वसा
कांक्ष रजतधर्मिकज्ञानत्वेन हेतुत्वमित्यत्र चरमकल्पे भेदव्याप्यवत्ताग्रहस्य हेतुत्वाभावेपि क्षत्यभावादिति
भावः। सिद्ध इति उत्पन्न इत्यर्थः। सुखादाविच्छा न स्यादिति मूलश्रवणादाह सुख इति। ननूत्पन्नसुखे सिद्धत्वनि
र्णयेन प्रतिबंधात्कथमिच्छोत्पत्तिरत आह लाघवादिति। तत्तद्धर्मिकेच्छायां तत्तद्धर्मिकसिद्धत्वनिश्चयत्वेन
प्रतिबंधकत्वे धर्मिभेदेन गौरवादित्यर्थः। तत्प्रकारकेच्छायामिति। तत्तद्धर्मविशिष्टोद्देश्यताकेच्छायामित्यर्थः।
तेन सुखत्वावच्छेदेनासिद्धत्वग्रहेपि सुखहेतुः फलेज्ञायतामित्यादेः सुखत्वादिप्रकारकेच्छायामुत्पादः। तन्ने
च्छायां तादृशपदत्वविशिष्टस्यैवोद्देश्यतायां विषयत्वात् उद्देश्यत्वं पुनरिच्छामित्यनुभवसाक्षिको [illegible]
विषयताविशेषः। मुख्यविशेष्यतानिरूपिततत्प्रकारताकेच्छायामित्यर्थः। करणान्तोक्तदोष इति तु न युक्तं

सुखत्वावच्छेदेनासिद्धत्वग्रहेप्यहं सुखी स्यामित्याकारकेच्छाप्रसंगात्। आत्मत्वावच्छेदेनसिद्धत्वनिश्चयदशायाम
हं सुखी स्यामितीच्छानुत्पादप्रसंगाच्चेति ध्येयं। तत्प्रकारकसिद्धतानिश्चयमात्रस्याविरोधित्वे सिद्धः सुखत्वांश्च
गुणाद्यादिसमूहालंबनस्थलेपि सुखं जायतामितीच्छा न स्यात् तदुक्तं तदवच्छेदेनेति। तद्धर्मावच्छिन्नविशे
ष्यताकेत्यर्थः। अवच्छेदकत्वं तु विशेष्यकोटिप्रविष्टतामात्रेण ग्राह्यं। तेन सुखं सिद्धमित्याकारकस्यैव भोजन
सुखं सिद्धमित्याकारकस्यापि निश्चयस्य सत्वे सुखं जायतामितीच्छायां नोत्पादः। अत एव साधनलाभेपि ध
नमात्रार्थिनो नेच्छा। किं तु प्रतिग्रहाद्यर्थान धनार्थिन एवं यत्किंचिद्विशेषसिद्धौ सामान्येच्छाविच्छेदादिति शिरोम ह
णावप्युक्तं। न चैवं सुखसामान्यं सिद्धमित्येवं सुखत्वावच्छेदकतामंतर्भाव्य निश्चयेपि भोजनसुखं जायता
मितीच्छाप्रसंगः तादृशसुखत्वावच्छिन्ने सिद्धत्वानिश्चयादिति वाच्यं। तस्यापि स्वातंत्र्येण तादृशेच्छाविरोधि ९८
त्वादिति भावः। ज्ञानमिति। निश्चयइत्यर्थः। न चेत्यादि। तत्सुखत्वावच्छेदेनासिद्धत्वज्ञानं प्रकृते सुखत्वप्रका
रकेच्छास्थले नेत्यर्थः। उत्पन्नसुखेषु तत्तद्घ्यक्तित्वेनैव सिद्धत्वनिश्चयात् सुखत्वमंतर्भाव्य तत्सुखं सिद्धमित्याका
व्यक्ति

कं रैनिश्चयसत्वेतुसुखांतरत्वप्रकारेणतन्नेच्छेतिभावः। ननुइच्छासामान्यंप्रत्येवसमानविशेष्यत्वप्रसा
सत्तासिद्धत्वनिश्चयस्यप्रतिबंधकत्वंतत्तदनंतधर्मितावच्छेदकांतर्भावेणतथात्वेगौरवात्तत्वक्रमःसिद्धसु
धानंतधर्म त्वाद्विच्छेत्सतआहकपमिति। अन्ये[redacted]र्मा[redacted]नंतर्भावेनविरोधित्वेनैय्यायिकःशंकते। अथेति
यद्यप्यप्रामाण्यज्ञानाभावविशिष्टसिद्धत्वनिश्चयाभावत्वेनहेतुत्वमपेक्ष्यासिद्धत्वज्ञानस्यतद्धर्मिकतत्त
दप्रामाण्यनिश्चयाभावकूटस्यचप्रत्येकरूपेणहेतुतायामेवगौरवंतथापिसिद्धत्वस्यैवतदवच्छेदकधर्म तद्व्याप्यवत्स
वत्त्वस्यचज्ञानेप्रतिबंधकत्वाकल्पनादेवलाघवं। सिद्धत्वज्ञानीयतत्तदप्रामाण्यसंशयव्यक्तीनांप्रातिस्विक स्व
रूपेणाभावकूटस्यप्रतिबंधकतावच्छेदकीभूतस्वविशेष्यविशेषणाभावेनानंतकार्यकारणभावकल्पना
मपेक्ष्यचलाघवंग्राह्यं। सिद्धत्वस्यज्ञानांतरमप्रमेत्यादिरूपाप्रामाण्यज्ञानसत्वेपिसिद्धत्वनिश्चयेनेच्छाप्र
तिबंधादप्रामाण्यज्ञानसामान्यस्योत्तेजकत्वासंभवात्। नचतत्तदप्रामाण्यज्ञानाभावकूटविशिष्टसिद्ध
त्वनिश्चयाभावव्यक्तेरखंडतव्यक्तित्वेनैवहेतुत्वादुक्तगौरवानवकाशः। प्रतियोग्यविशेषिताभावस्यहे

तुत्वेनादृशासिद्धत्वनिश्चयाभावसहचरितस्यानतिप्रसक्तस्याभावांतरस्यापि तद्व्यक्तित्वेन हेतुतापत्तेः विशिष्टा
भावस्य विशेष्यविशेषणाभावानतिरिक्तत्वेऽखंडाभावव्यक्तित्वासंभवाच्चेत्याशयः। असिद्धत्वज्ञानार्थमित्यस्यको
र्थः किं सुखादावसिद्धत्वप्रकारकज्ञानार्थमसिद्धत्वविषयकज्ञानार्थं वा नाद्य इत्याह विशेषेति। उत्पन्नसुखेष्वेवत
न्नष्टातित्वेनासिद्धत्वनिश्चयेपि सुखत्वेनासिद्धत्वज्ञाने बाधकाभावादिति भावः। ननु विशेषणतः सिद्धत्वज्ञान
दशायां यत्सामान्यतोः सिद्धत्वज्ञानं तन्न विशिष्टधीः अन्यथाव्यासङ्गानङ्गीकारादित्यत आह तदिति। एकमि
ति स्वमते द्वयं वेति परेषामसिद्धत्वसाकांक्षधर्मिज्ञानस्यैवेच्छाजनकतया तज्ज्ञानद्वयेपि तत्संभवादिति भावः।
द्वितीयेत्वाह सामान्येति। सुखत्वादिसामान्यलक्षणया तज्ज्ञासामर्थ्यादिति भावः। नन्वेवमिच्छाया अनागतवि
षयकत्वप्रवादो व्याहन्येतेत्यत आह वस्तुतस्त्विति। वर्तमानकालस्य सुखप्रागभाववत्त्वाद्यनुमितौ वर्तमान
कालवृत्तिप्रागभावप्रतियोगित्वादिलक्षणमसिद्धत्वं सुखस्यापि सुग्रहमित्याशयेनाह अयं काल इदं सरि
प्रागभावानभ्युपगमे वर्तमानकालध्वंसाधिकरणकालोत्पत्तिकत्वमेव वा ध्वंसो मनस्तक्रूहार्थे साध्यांतरमा

९९

हसुखोसादेसादिंमहाप्रलयमनंगीकुर्वतांसहकालत्वादिति। तदंगीकारे त्वाहतनादृष्टेति। सुखासतिकालीन
ध्वंसप्रतियोगिकालत्वादिसर्वः। अनुमानादिति प्रयोजकत्वेपं च मा। तेनोक्तानुमितेः साध्याप्रसिद्धत्वान
वगाहित्वेपि न क्षतिः। तत्सहकारेणामनसैवोत्तरकालमुक्तस्याप्रसिद्धत्वस्यग्रहसंभवादिति ध्येयं। मिथ्या। सुव
र्तमानकालवृत्तिप्रागभावप्रतियोगित्वं नासिद्धत्वं विरोधसम्भवाभावादौ तदभावनिश्चयेपीच्छानुभवात्। के
तु वर्तमानकालावच्छेदेन स्वावृत्तित्वमेव तथा। सुखादिधर्मिकस्वावृत्तित्वप्रकारकतत्कालीनेच्छां प्रति सुखा
दिधर्मिकतत्तत्कालावच्छिन्नस्वावृत्तित्वप्रकारकता न तेन हेतुत्वात्। अत एव सुखं मे जायतामित्याकारके
नुभवः च्छायाः सर्वजनसिद्धौ संपद्यते। असिद्धत्वज्ञानस्य जन्यतावच्छेदककृतयैव सर्वेच्छायां मदंशोपरागात्। स्व
वृत्तित्वं तु सुखादौ स्वसमवेतत्वं पाकादौ स्वकृतिविषयत्वं तामादौ स्वाप्यत्वादिकं यथानुभवमस्तु नायंसि ग'
द्धत्वज्ञानस्य विरोधित्वपक्षे च तत्तत्कालावच्छेदेन स्वावृत्तित्वमेवासिद्धत्वं ग्राह्यमिति प्राहुः। ननु भाविसुख
प्रागभावादिव्यक्तेः पूर्वमसत्तानात्वपं तत्साध्यकानुमितिरत आह निपुणेत्यादि। साध्यतावच्छेदकरूपेणोप

व्यक्तितानादेव पक्षधर्मतावलात्ताद्रूप्येण साध्यांतरानुमितेः पाकानुमाने संपादयिष्यमाणत्वादिति भावः। अ
त्रे जातिमत्त्वप्रकारेण वन्ह्यादेरुपनयदशायां वन्हित्वेन तस्योपनीतप्रत्यक्षानुदयाद्वन्हित्वेन तत्तद्व्यक्त्युपनी
तप्रत्यक्षं प्रति वन्हित्वेन तत्तद्व्यक्तेर्ज्ञानमवश्यं हेतुर्वाच्यं तथा च तत्रैवावन्हित्वेन तद्व्यक्तीनां विशिष्योपा
दानेपि वन्हित्वेन यस्य कस्यापि ज्ञानमेव च वन्हित्वेन वन्ह्युपनीतप्रत्यक्षं प्रति हेतुः कल्प्यते न तु तत्तद्रूपं
[illegible]तर्भाविपालाघवादिति वन्हित्वेन कस्यापि ज्ञानसत्त्वे वन्हित्वेन सकलवन्हिप्रत्यक्षं दुर्वारमिति अर्थवश
संपन्नमेव सामान्यलक्षणायाः प्रत्यासत्तित्वा। न चैवं वन्हित्वेन तत्तद्गुंजोपनीतभानं प्रत्यपि वन्हित्वप्रका
रकतत्तद्गुंजाज्ञानत्वेन हेतुत्वमपेक्ष्य लाघवेन सामान्यतो वन्हित्वप्रकारकगुंजोपनीतप्रत्यक्षं प्रत्येव व
न्हित्वप्रकारकगुंजाज्ञानत्वेन हेतुत्वकल्पनमेव युक्तमिति वाच्यं। वन्हित्वेनैकगुंजाज्ञानानोत्तरं ताद्रूप्येण गुं २३६
जांतरोपनीतभानस्यानुभवविरोधितत्वादेव ततस्तत्तदनंतगुंजांतर्भावेण हेतुत्वकल्पनात् प्रकृते च वन्हि १००
त्वेनैकवन्हेरुपनयोत्तरं ताद्रूप्येण वन्ह्यंतरोपनीतप्रत्यक्षे वाधकाभावाद्यथा वाधकवलादेव सामान्य

स लक्षणात्वं इन संभवे साध्यकाभावोपन्यासानौचित्यादित्यस्मद्गुरुचरणाः। तच्चिन्त्यम्। ननु प्रमेयत्वे प्रकारेण घटवत्ता
नादुत्पन्नस्य प्रमेयवानिति निश्चयस्यैव विरोधिघटत्वप्रकारकस्य सत्वात्कथं घटो न वेत्याकारः तादात्म्येन घट
स्यसंदेहस्यत आह संशयेति। तद्विरोधी। घटो न वेति संशयविरोधी। निष्प्रकारको निरवच्छिन्नप्रकारताकः
तेन घटत्वांशे सप्रकारकस्यापि स घटः प्रमेयवानिति निश्चयस्य स घटो न वेत्याकारकसंशयस्य विरोधि
त्वमस्तु। न चैवमयं घटत्ववानिति निर्णयो घटो न वेति संशयविरोधी न स्यात्। घटत्वांशे घटत्वस्यैव
प्रकारत्वादत आह घटत्वेति। तथा च तद्वद्वृत्तिधर्मवत्ताज्ञानं तदभावव्याप्यवत्ताज्ञानविपर्येव तद्वत्ता
नंप्रतिबंधकमिति भावः। ननु प्रमेयत्वसामान्यलक्षणयैव स्वाश्रयस्य घटत्वादेर्निर्विकल्पकं कुतो न ज
न न्यत इत्यत आह सामान्येति। अन्यथा धर्मीतरज्ञानादपि स्वाश्रयस्य प्रत्यक्षोदयेन व्यभिचारप्रसंगादिति १०९
भावः। ननु सामान्य[illegible]ले सामान्यप्रत्यासत्तेर्विशिष्टप्रत्यक्षजनकत्वमेव नास्तीत्यत आह विशिष्टधीसाम २८६
ग्रीति। इति श्रीमहोपाध्यायजगदीशतर्कालंकारभट्टाचार्यविरचिता सामान्यलक्षणाटिप्पणी समाप्ता॥छ